SASTRA-SIDDHANTA-LEŚA-SAṄGRAHA

OF

ŚRĪMAD-APPAYYA-DĪKṢITENDRA

WITH THE COMMENTARY

KṚṢṆĀLAṄKĀRA

OF

ACYUTAKṚṢṆĀNANDA-TĪRTHA

Edited by

[illegible]

and

[illegible]

Lecturer, Centre of Advanced Study in Philosophy, University of Madras

Śrīmad-Appayya-Dīkṣitendra-Granthāvalī

Prakāśana Samiti (Regd.)

[illegible]



अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरून्नमस्यामः ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥

Śrīmad-Appayya-Dīkṣitendra-Granthāvali Series-Vol. 2

SASTRA - SIDDHANTA - LESA - SANGRAHA

OF

ŚRĪMAD - APPAYYA-DĪKṢITENDRA

WITH THE COMMENTARY

KṚṢṆĀLAṄKĀRA

OF

ACYUTAKṚṢṆĀNANDA-TĪRTHA

Edited by

Brahmaśrī S. R. KRISHNAMURTI SASTRI
Professor of Vedānta, Madras Sanskrit College, Madras

AND

Dr N. VEEZHINATHAN
Lecturer, Centre of Advanced Study in Philosophy, University of Madras

Śrīmad-Appayya-Dīkṣithendra-Granthāvali

Prakāśana-Samiti (Regd.)

SECUNDERABAD-26 (A.P.)

First Edition 1973

Copies 1000

All Rights Reserved by the S. A. D. G. P. Samithi (Regd.)

Price: Rs. 20/- for Ordinary Edition.
Rs. 25/- for Deluxe Edition.
For Complete Set of 15 Volumes for ordinary Edition and
Deluxe Edition Rs. 225/- & 300/- respectively.

Published with the financial Aid of the
Andhra Pradesh and Union Governments
by

Adayappalam Ramanathan
Honorary Executive Secretary

on behalf of the Srimad Appayya Dikshithendra
Granthavali Prakasana Samiti (Regd.)
"KAMAKOTI KUTIR" No. 9A, Mandaleeka Nagar
Marredpally (West), Secunderabad-26
(ANDHRA PRADESH).

Printed at
Bharathi Vijayam Press
MADRAS-600005.

ओम्

श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिः—ग्रन्थाङ्कः—२

श्रीमदप्पय्यदीक्षितेन्द्रविरचितः

शास्त्रसिद्धान्तलेशसंग्रहः

श्रीमदच्युतकृष्णानन्दतीर्थविरचितकृष्णालङ्काराख्यव्याख्यया सहितः

सम्पादकौ

ब्रह्मश्री एस्. आर्. कृष्णमूर्तिशास्त्री

वेदान्तप्राचार्यः, मद्रपुरीसंस्कृतकलाशाला

डा. एन्. वीळिनाथन्

वेदान्ताध्यापकः, मद्रपुरीविश्वविद्यालयः

श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः

सिकन्दराबाद् - २६ (आं. प्र.)

Advisory-Cum-Editorial Board

1. Sri K. Balasubramania Sastri, Madras.
2. „ V. K. Dongray Sastri, Secunderabad.
3. „ Gourinath Sastri, Varanasi.
4. „ V. Jagadeeswara Sastri, Madras.
5. „ Dr. D. G. Joshi, Ahmednagar
6. „ S. R. Krishnamurthi Sastri, Madras.
7. „ K. L. Sastri, Hyderabad.
8. „ Dr. T. M. P. Mahadevan, Madras.
9. „ D. G. Padhye, Hyderabad.
10. „ Dr. B. D. Pandhye, Ahmedabad
11. „ P. N. Pattabhi Rama Sastri, Varanasi.
12. „ Dr. P. Sri Ramachandrudu, Hyderabad.
13. „ M. Ramanatha Deekshither, Madras.
14. „ V. S. Ramachandra Sastri, Bangalore.
15. „ G. Ramachandra Sastri, Rameswaram.
16. „ R. Ramamurthy Sastri, Madras.
17. „ K. Ramachandra Sarma, Madras.
18. „ D. Ramalinga Reddy, Madras.
19. „ T. R. Ramakrishna Sastri, Madras.
20. „ N. Ramakrishna Sastri, Kanchipuram.
21. „ Dr. K. A. S. Iyer, Lucknow.
22. „ S. Suryanarayana Sastri, Secunderabad.
23. „ R. Srinivasa Sastri, Trichirappalli.
24. „ S. Subramania Sastri, Tirupathi.
25. „ V. Subramania Sastri, Madras.
26. „ V. H. Subramania Sastri, Madras.
27. „ S. Subramania Sastri, Varanasi.
28. „ A. Subramania Sastri, Varanasi.
29. „ K. R. Subramania Sastri, Hyderabad.
30. „ Dr. K. Subramanian, Secunderabad.
31. „ A. G. Venkatachari, Madras.
32. „ Dr. C. S. Venkateswaran, Chidambaram.

श्रीचन्द्रमौलीश्वर

मुद्रा

स्वस्ति श्रीमदखिलभूमण्डलालंकारत्रयस्त्रिंशत्कोटिदेवतासेवितश्रीकामाक्षीदेवीसनाथश्रीमदेकाम्रनाथश्रीमहादेवीसनाथ-श्रीहस्तिगिरिनाथसाक्षात्कारपरमाधिष्ठानसत्यव्रतनामाङ्कितकाञ्चीदिव्यक्षेत्रे शारदामठसुस्थितानाम्, अतुलितसुधा-रसमाधुर्यकमलासनकामिनीधम्मिल्लसंफुल्लमल्लिकामालिकानिष्यन्दमकरन्दझरीसौवस्तिकवाङ्निगुम्भविजृम्भणानन्दतुन्दि-लितमनीषिमण्डलानाम्, अनवरताद्वैतविद्याविनोदरसिकानाम्, निरन्तरालंकृतीकृतशान्तिदान्तिभूम्नाम्, सकलभुवन-चक्रप्रतिष्ठापकश्रीचक्रप्रतिष्ठाविख्यातयशोऽलंकृतानाम्, निखिलपाषण्डषण्डकण्टकोत्पाटनेन विशदीकृतवेदवेदान्त-मार्गषण्मतप्रतिष्ठापकाचार्याणां श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीजगद्गुरुश्रीमच्छंकरभगवत्पादाचार्याणाम्, अधिष्ठाने सिंहासनाभिषिक्तश्रीमन्महादेवेन्द्रसरस्वतीसंयमीन्द्राणाम्, अन्तेवासिवर्यश्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीपादादेशानु-सारेण श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः क्रियते नारायणस्मृतिः —

सर्वतन्त्रस्वतन्त्रैः पदवाक्यप्रमाणपारावारपारीणैः, समाहृतवाजपेयादिमहाध्वरविशेषसमुल्लसितदीक्षा-विशेषैः, परिमल—न्यायरक्षामणि-सिद्धान्तलेशसंग्रह-नयमणिमाला-नयमयूखमालिका—न्यायमुक्तावली—चित्रमीमांसादि—चतुरधिकशतग्रन्थनिर्माणचातुरीविशिष्टैः, साक्षात्कृताद्वैतपरतत्त्वैः, श्रीमदप्पय्यदीक्षितेन्द्रमहोदयैः, विरचितानां ग्रन्थानामनेकेषाममुद्रितत्वम्, केषाञ्चन प्राचीनकालेमुद्रितत्वेऽपि अद्यत्वे दुर्लभत्वं च पर्यालोच्य, सर्वेषामपि श्रीदीक्षितेन्द्रग्रन्थानां मुद्रापणे आस्तिकलोकस्य महोपकारं मन्वानैः अनेकैः आस्तिकैः श्रीमदप्पय्यदी-क्षितेन्द्रग्रन्थप्रकाशनसमितिनाम्ना एकां समितिं व्यवस्थाप्य, एतत्समितिद्वारा श्रीदीक्षितेन्द्रनिखिलग्रन्थमुद्रापणे प्रवृत्ताः आदिमत्वेन ब्रह्मसूत्रप्रथमाध्यायव्याख्याभूतं अतिसूक्ष्मविचारप्रचुरं न्यायरक्षामणिं मुद्रापयितुं प्रवर्तन्ते इति विज्ञाय भृशं मोदामहे ।

आस्तिकाः अस्मिन् श्रीदीक्षितेन्द्रग्रन्थमुद्रापणसत्कार्ये सहयोगमातन्वन्तः एतद्ग्रन्थपठनपाठनरताः मारमणोमारमणात्मकपरमात्मकृपाभाजनीभूताश्च सकलान्यपि मङ्गलान्यवाप्नुयुरित्याशास्महे—

यात्रास्थानम्—मच्छिलीपट्टनम्
कीलक—कार्तिकबहुलद्वादशी

नारायणस्मृतिः

श्रीकाञ्चीकामकोटिपीठाधिपतिजगद्गुरुश्रीशङ्करभगवत्पादाचार्याणां

श्री १००८ चन्द्रशेखरेन्द्रसरस्वतीसंयमीन्द्राणां

करकमलयोः भक्त्या समर्पितोऽयमुपहारः

श्रीकाञ्चीकामकोटिपीठाधिष्ठान

प्रात:स्मरणीयस्वनामधन्यवैदिकमार्गप्रतिष्ठापक-षण्मतस्थापनाचार्य

जगद्गुरु श्रीशङ्करभगवत्पादा: परमहंस परिव्राजकादि

श्री १००८ चन्द्रशेखरसरस्वतीपादा:

श्री जयेन्द्रसरस्वतीपादाश्च

विभूतिः फालाग्रे शिरसि नवबिल्वादिवलयः गले रुद्राक्षालिः स्मितविलसितं चारु वदने ।
करे वामे दण्डः तदितरकरे ज्ञानकरणम् पुरस्तादास्तां मे भरतजनताहोपुरुषिका ॥

GENERAL PREFACE

Śrimad-Appayya - Dīkṣithendra - Granthāvali - Prakāśana - Samiti was started with the blessings of His Holiness Jagadguru Śrī Śaṅkarācārya Swami of Śrī Kāñci Kāmakoṭi Pīṭha, for printing and publishing an authoritative edition of the works of Śrimad-Appayya-Dīkṣita of Adayappalam. Erudite scholars and savants from different parts of India have associated themselves in the work of the advisory and editorial boards.

Śrīmad Dīksīta was one of the pre-eminent exponents of Advaita and Śaivism. He strove to reconcile differing creeds, cults, and philosophies. He pleaded for harmony, tolerence, and goodwill and strove for understanding, in an age of intolerence and religious proselytisation. His works cover almost all branches of learning and bear a balanced and catholic outlook searching for truth without any heat or controversial temper. A perusal of his *Nyāyamañjari*, *Nyāyamaṇimālā*, *Nayamayūkhamālikā* and *Nyāyamuktāvalī* dealing with *Advaita*, *Śivādvaita*, *Viśiṣṭādvaita* and *Dvaita* philosophies will bear testimony to this. It is a tribute to his learning and versatality that the last two expositions have been adopted as manuals for reverent and detailed study by the adherents of the schools of thought other than Advaita. It has been aptly pointed out " from the heights of philosophic enlightenment he saw in the different methods of approach, elements lending themselves to a reconciliation and not to mutual exclusiveness and hostility ". The late Dr. C. P. Ramaswami Aiyar, a decendent of Śrīmad-Dīkṣita, referring to him in the *History of My Times* says. " He embodied in himself a remarkable example of freedom from personal conventions...........he was polymath of the type of Roger Bacon, the Admirable Crighton, Abèlard and Leonardo da Vinci, having mastered at a very early age all the knowledge available at the time of Philosophy, Rhetoric and Literature.........his early work *Siddhāntaleśa-Saṅgraha* was encyclopaedic in character ".

Sri Dīkṣithendra's expositions viz., *Parimala*, *Nyāyaraksāmaṇi* and *Siddhānta-leśa-saṅgraha* are authoritative reference books on Advaitic thought. His *Śivārākamaṇidīpikā* a commentary on *Śrīkaṇṭha-bhāṣya* on the *Brahma-sūtra* and his exposition of the same to more than five hundred pupils during his life time, mark him out as a brilliant successor of the great Adi Śaṅkarācārya. His fame rests also on his mastery of *Mīmāṁsa-śāstra*. His poetic genius, warm devotion and piety are evident in his *Ātmārpaṇastuti*, *Durgā-candrakalāstuti*, *Āditya-stotra* and *Kuvalayānanda* and *Citra-mīmāṁsā*. That he could have achieved so much within a span of Seventy two years, mastered the Śāstras and was

responsible for about 104 works on diverse subjects is a remarkably versatile performance What is rare, he was revered by his contemporaries and loved and respected by princes and peasants alike. Many of his contemporaries have referred to him as an *avatāra-puruṣa* in his own life time. This is a tribute to his great stature, eminence and qualities.

At the behest of His Holiness the Jagadguru, the Samiti have striven to popularise and propogate the teachings of Śrīmad-Appayya-Dīkṣithendra. Of his One hundred and four expositions, some have been published but even these are either out of print or are not available for reference and many are still in manuscript form. It has been our endeavour to publish this series similar to the Granthāvali of Śrī Adi Śaṅkara's works. An earlier project under the lead of Mahāmahopadhyāya Pandit Chinnaswami Sastri of Varanasi blessed by the Pīṭhadhipatis and patronised by influential persons like Dr S. Radhakrishnan and Maharajahs, fell through on account of his illness and consequent inability.

We are grateful to the Government of Andhra Pradesh, who pioneered in sponsoring this project and the Government of India, who have made generous grants. But for the liberal grant of Rs. 80,000/- for the project by the Andhra Pradesh Government (Education Department) and also their immediate release of Rs. 20,000/-, the project could not have been started.

To the patrons, office bearers and members of the various committees of the Samithi and to its Hony. Executive Secretary, who have been striving with a high sense of duty, we are much indebted for their cheerful co-operation. Finally, we thank the printers and also proof-readers who have striven hard in the production of this *Granthāvali.*

I shall always cherish the task of associating myself with this project as a privilege and great good fortune.

C. R. PATTABHI RAMAN

PRESIDENT

S. A. D. G. P. Samithi (Regd.).

"THE GROVE"
MADRAS-18
Dt. 25-7-1971

OUR HOMAGE AND PROFOUND THANKS

Śrī Appayya Dīkṣita's *Śāstra-siddhānta-leś a-saṅgraha* was first printed in Sanskrit and published in 1897. It was printed and published in Telugu script in 1904. The Telugu edition of the text has been popular throughout Andhra Pradesh. Since copies of the Sanskrit edition of the text were out of stock and since the need for a fresh edition of it was keenly felt by scholars throughout India, His Holiness Śrī Śaṅkarācārya-pūjyapāda of Kāñcī Kāmakoṭi-pīṭha directed the Samiti to bring out a fresh edition of the book as the second volume in the collected works of Śrī Appayya Dīkṣita. The Samiti offers its respectful salutations at the Lotus-feet of His Holiness—the Sage of Kāñcī.

The task of editing the text with Śrī Acyuta Kṛṣṇānanda's commentary was entrusted to Brahmaśrī S. R. Krishnamurthy Sastrigal, Professor of Vedānta at the Sanskrit College, Mylapore, Madras, and Dr N. Veezhinathan, Lecturer in Sanskrit at the Centre for Advanced Study in Philosophy, University of Madras. The Samiti owes a deep debt of gratitude to Brahmaśrī Krishnamurthy Sastrigal and Dr Veezhinathan for their valuable work in preparing the present edition with a very useful analytical table of contents and notes.

The Samiti is thankful to the members of the different Committees, the Advisory Board, and the Honorary Secretary, who helped to bring out this work at a short time.

The Samiti expresses its grateful thanks to the Curator, Government Oriental Manuscripts Library, Madras, for making available on loan the manuscript of the *Śāstra-siddhānta-leśa-saṅgraha* and to Śrī Kāñcī Kāmakoṭi Maṭh's Library at Kāñcīpuram for the loan of a copy of the Telugu edition of the text.

This volume could not have been brought out but for the timely release of the second instalment of Rs. 20,000/- by the Education Department of the Government of Andhra Pradesh. The Samiti takes this opportunity to record its appreciation of the good work which the Government of Andhra Pradesh has been doing to the cause of Sanskrit education, and expresses its profound thanks to the authorities of the Department of Education, Andhra Pradesh for their timely help and co-operation.

The Samiti is thankful to Messrs Bharathi Vijayam Press for their neat and expeditious printing of this book.

" KAMAKOTI KUTIR "
No. 9A, Mandaleeka Nagar,
West Marredpally,
Secunderabad-26 (A.P.)
Date : 10—12—1973.

The Managing Committee of the
S. A. D. G. P. SAMITI

PREFACE

The *Śāstra-siddhānta-leśa-saṅgraha*, a comprehensive and scholarly work of Śrī Appayya Dīkṣita, is a popular Advaita text. It is at once a digest and a source book of Advaita Vedānta. One should read Śrī Dīkṣita's *Śāstra-siddhānta* to appreciate the luxuriant variety of views, both profound and subtle, which have been expounded by Advaitins, who closely followed Śaṅkara, in vindication of the central teaching of Advaita.

Śrī Appayya Dīkṣita's *Śāstra-siddhānta-leśa-saṅgraha* makes a comprehensive survey of the doctrinal interpretations and arguments as formulated by post-Śaṅkara Advaitins. Though this work, as indicated by the title, is characterized as a *saṅgraha*, an epitome, which refers not to the whole, but only to a part or fragment (*leśa*) of the various views relating to the final position (*siddhānta*) of non-duality as taught by Scripture, it is much more than a compendium of the different view-points within the compass of Advaita. It is invaluable as it helps us, by a careful analysis of the issues involved, to distinguish one standpoint from another. The order of topics taken up for discussion and the sequence in which the different views on each topic are presented in this book testify to the range and depth of scholarship of Śrī Appayya. Two points deserve special mention here. First, Śrī Dīkṣita does not always follow the chronological order in the presentation of the divergent views on each problem. The sequence of views that are presented here is more logical than chronological. The views are so arranged that there is a smooth transition from the one to the other. Second, every one of the views mentioned and discussed here has been championed by one or more Advaitins of great repute; and all of them have been formulated in consonance with the central thesis of Advaita, viz., that Brahman is real, that the *jīva* in its essential nature is non-different from Brahman, and that the world of plurality is illusory. It is open to any one to prefer any particular view which is appealing and tenable to him according to his taste and judgement.

The *Śāstra-siddhānta-leśa-saṅgraha* consists of four chapters. The first chapter discusses such important topics as the nature of Brahman, the distinction between *Īśvara* and *jīvas* the problem of the causality of the world, the nature and the locus of *māyā-avidyā*, the nature and scope of injunction in respect of the Vedāntic study. The second chapter focusses its attention on the problem of Scripture *versus* perception and the authority of Scripture, the nature of dream and erroneous cognition. The means to liberation is the chief topic of discussion in the third chapter. The fourth chapter is concerned with *jīvanmukti*, the nature of liberation in the context of *eka-jīva-vāda* and *aneka-jīva-vāda*, the nature of the removal of ignorance, and so on. It will be obvious even to a casual reader who goes through the contents of the text that Śrī Appayya Dīkṣita's analysis and discussion of the various problems, both on the doctrinal and ratiocinative sides, are exhaustive, lucid, and brilliant. The value of Śrī Dīkṣita's *Śāstra-siddhānta* is

greatly enhanced by Śrī Acyuta Kṛṣṇānanda Tīrtha's commentary, which is also printed along with the text in the present edition. If a discerning student is able to see both order and unity in the diversity of views presented in the *Śastra-siddhānta*, which will normally pass for a catalogue of theories, and appreciate their philosophical significance, it is because of Śrī Acyuta Kṛṣṇānanda's brilliant commentary on the text.

This edition of the *Śāstra-siddhānta-leśa-saṅgraha* is humbly dedicated to His Holiness Śrī Candraśekharendra Sarasvatī Śrīpūjyapādāḥ, the head of the hoary Śāṅkarite institution at Kāñcī. The edition of this work would not have been completed but for the benign grace of His Holiness who remains ever our inspiring Light and Guide. We offer our most respectful homage at the Lotus-feet of His Holiness.

To Śrīmad-Appayya-Dīkṣitendra-Granthāvalī-Prakāśana-Samiti, we are grateful for sponsoring the publication of this work.

Madras
20—3—74

S. R. KRISHNAMURTI SASTRI
Professor of Vedānta, Sanskrit College, Madras

श्रीगुरुचरणारविन्दाभ्यां नमः

भूमिका

श्रीपरमशिवांशावतारत्वेन सर्वतन्त्रस्वतन्त्रत्वेन चतुर्मतसामरस्यपरायणत्वेन शताधिकप्रबन्धनिर्मातृत्वेन च विश्रुतानां श्रीमदप्पय्यदीक्षितेन्द्राणां कृतिष्वन्यतमोऽयं शास्त्रसिद्धान्तलेशसङ्ग्रहाख्यो ग्रन्थः अद्वैतसिद्धान्तसिद्धप्रक्रियाणां उपपादक इतरान् ग्रन्थानतिशेते। यद्यपि द्वैतविशिष्टाद्वैताद्वैतसिद्धान्तप्रतिपाद्यार्थनिरूपणपरान् ग्रन्थान् श्रीदीक्षितेन्द्रा रचयामासुः, तथापि औपनिषदाद्वैतदर्शने एव तेषां परमादरः परमतात्पर्यञ्च। एतच्च आनन्दलहर्यां तट्टीकायां चन्द्रिकायां शिवाद्वैतनिर्णये च कण्ठतः उद्घोषितम्।

एवं सत्यपि विशिष्टशिवाद्वैतपरं ब्रह्मसूत्रभाष्यं श्रीशिवार्कमणिदीपिकया आदरेण व्याख्यातं महीकृतञ्च, येन सन्तुष्टो महाराजः कनकाभिषेकेण महीचकार श्रीदीक्षितेन्द्रान्। तत्र को हेतुः इति जिज्ञासूनां श्रीदीक्षितेन्द्रा एव शिवार्कमणिदीपिकाव्याख्यानारम्भे आनन्दलहरीतट्टीकयोः शिवाद्वैतनिर्णये च तत्र हेतुं स्पष्टीचक्रुः।

तद्यथा—विशिष्टशिवाद्वैतभाष्यकाराः 'ब्रह्मसूत्राणां अद्वैते एव तात्पर्यम्' इत्यस्यार्थस्य तत्र स्वाभिमतेश्च गमकानि लिङ्गानि स्वीयग्रन्थे तत्र तत्र सूचयाम्बभूवुः। तेन सगुणेश्वरोपासना अद्वैततत्त्वप्रतिपत्तौ उपकरोति इत्यतो हेतोः तत्परभाष्यप्रणयने प्रवृत्तिः इति तेषामाशयो लक्ष्यते। अयमर्थः पूर्वोक्तग्रन्थेषु स्पष्टीकृतः श्रीदीक्षितेन्द्रैः। तच्च सगुणं ब्रह्म श्रीमच्छङ्करभगवत्पादोपदर्शिते औपनिषदाद्वैतदर्शने उमासहायः परमशिव एव, यतो ब्रह्मसूत्रारूढं सगुणं तदेव। अस्य चार्थस्य सूत्रतद्भाष्यादीनि प्रमाणवाक्यानि श्रीदीक्षितेन्द्रैः पूर्वोक्तेषु स्वीयग्रन्थेषु प्रदर्शितानि। नैवंभूतसगुणब्रह्मपरं इतरत् भाष्यद्वयम्; नापि अद्वैततात्पर्यसूचकलिङ्गवत्। प्रत्युत औपनिषदशुद्धाद्वैते बद्धप्रद्वेषमपि लक्ष्यते। औपनिषदं हि दर्शनं सम्यग्दर्शनम्। तच्च ब्रह्मसूत्रपरमतात्पर्यविषयीभूतं अद्वैतदर्शनमेव। यतो ब्रह्मसूत्राणि उपनिषत्तात्पर्यनिर्णयाय प्रवृत्तानि। अतश्च अद्वैतदर्शनतात्पर्यवत् तत्पर्यवसायि च सूत्रव्याख्यानं ग्राह्यम्। न तद्द्वयं तथा। विशिष्टशिवाद्वैतं तु तथाभूतमिति तद्ग्राह्यम्। तेन तत् व्याख्यार्हम्, व्याख्यानेन महीकरणीयम्, अद्वैतदर्शने तात्पर्यवत्त्वं च तस्य आविष्करणीयम्—इति।

ब्रह्मसूत्राणां अद्वैत एव तात्पर्यं च स्थालीपुलाकन्यायेन प्रत्यध्यायं एकमधिकरणमादाय सविमर्शं 'जीवेश्वरैक्यं तदन्यथानुपपत्त्या बन्धमिथ्यात्वञ्च सूत्रतात्पर्यविषयः' इति प्रतिपादनेन निरूपितं शास्त्रसिद्धान्तलेशसंङ्ग्रहेऽस्मिन् ग्रन्थे चतुर्थपरिच्छेदावसाने। मुक्तस्य शुद्धब्रह्मभावापत्तिः इति पक्षोऽपि तेषां इष्ट एव।

न्यायरक्षामणौ हि पक्षद्वयमपि दहराधिकरणे सुषुप्त्युत्क्रान्त्यधिकरणे च स्पष्टमुक्तम्। यदि मुक्तस्य ईश्वरभावापत्तिः सूत्रतात्पर्यविषयः यदि वा शुद्धब्रह्मभावापत्तिः उभयथापि अद्वैतमेव ब्रह्मसूत्रतात्पर्यविषय इत्यत्र न विमतिलेशो वक्तुं शक्यः इति तेषां आशयः।

एवं द्वैतिभिः विशिष्टाद्वैतिभिश्च अद्वैतप्रक्रियासु उद्भाव्यमानानां दूषणाभासानां परिहारोऽपि ग्रन्थेऽस्मिन् प्रक्रियोपपादनेन लम्भितो भवति।

श्रवणविधिसमर्थने, प्रतिकर्मव्यवस्थायां, मिथ्यात्वबोधकश्रुत्यादीनां द्वैतग्राहिप्रत्यक्षादिविरोधपरिहारे, अपच्छेदन्यायवैषम्यपरिहारे, परमार्थसत्त्वाभावेऽपि अर्थक्रियाकारित्वसमर्थने, विषयावैलक्षण्येऽपि ज्ञानवैलक्षण्यसमर्थने, बिम्बप्रतिबिम्बयोरैक्यनिरूपणे, एकात्मवादे भोगासाङ्कर्यनिरूपणे, जीवन्मुक्तिपरममुक्तिस्वरूपनिरूपणे च परैरुद्भाव्यमानदोषाणां परिहारोऽस्मिन् ग्रन्थे स्पष्टः। विषयविशेषे परमतदुष्टता च निरूपिता-बिम्बाद्भिन्नस्य प्रतिबिम्बस्य सत्यत्वे, प्रतिबिम्बस्य छायाविशेषरूपत्वे, जीवेश्वरयोः मुख्यांशांशिभावे, जीवाणुत्वे च। मुक्तस्य ईश्वरभावापत्तिनिरूपणावसरे यादवप्रकाशाभिमतस्य श्रुतप्रकाशिकाभिमतस्य च ब्रह्मसूत्रानभिमतत्वं सूपपादितम्।

ग्रन्थान्तरानारूढमेकं मतं कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायानाम्। तदेतत् ग्रन्थेऽस्मिन् विस्तरेण प्रतिपादितम्।

श्रीदीक्षितेन्द्राः श्रीनृसिंहाश्रमस्वामिषु बद्धबहुमानाः। मिथ्यात्वस्य मिथ्यात्वसत्यत्वविकल्पनेन परोद्भावितदूषणाभासानां निराकरणं जीवाणुत्वमतनिराकरणं च आश्रमस्वामिनां अद्वैतदीपिकाख्यं ग्रन्थमेकमेवाश्रित्य कृतम्। प्रक्रियाभेदनिरूपणेऽपि आश्रमस्वामिनां मतमपि तत्र तत्र उपपादितम्। परन्तु नामनिर्देशो न क्वापि कृतः। क्वचित् स्वतातपादानां पक्षनिर्वहणे बद्धादराः, यथा ज्ञानविषययोः प्रत्यक्षत्वनिर्वचने।

अत्र प्रतिपाद्या विषयाः विस्तृतविषयानुक्रमणिकातोऽवगन्तुं शक्या इति पुनरुक्तिभयात् नात्र वर्णिताः।

परमहंसपरिव्राजका अपि श्रीअच्युतकृष्णानन्दतीर्थाः एतद्ग्रन्थरचनानिर्वर्णनवशीकृताः हृदयङ्गमां अन्यूनानतिरिक्ताक्षरां व्याख्यां रचयामासुः अस्य ग्रन्थस्य इतीदमेवालं ग्रन्थस्यास्य महिमातिशयपरिज्ञाने।

एवं प्रकृतग्रन्थप्रतिपाद्यार्थसंशीलनं अनायासेन अद्वितीयात्ममननायोपयुज्यते इत्याशयेन संजिघृक्षवः परमहंसपरिव्राजका अपि श्रीगङ्गाधरेन्द्रसरस्वत्यः, श्रीवासुदेवेन्द्रसरस्वत्यश्च, किं बहुना जीवन्मुक्ताः श्रीसदाशिवब्रह्मेन्द्रसरस्वत्योऽपि सङ्ग्रहकरणेन इदं ग्रन्थरत्नं महयाञ्चक्रुः—इति इदमपि ग्रन्थस्यास्य उत्कर्षातिशयं व्यनक्ति।

सोऽयं ग्रन्थः भारतदेशमभिव्याप्य पण्डितवर्यैः पुरस्कृतः इति ज्ञायते। यतः सर्वतन्त्रस्वतन्त्रैः श्रीमन्मिथिलामण्डलमण्डनैः विद्वत्प्रकाण्डप्रवरैः श्रीधर्मदत्तबच्चा झा शर्ममहोदयैः स्वीयगूढार्थतत्त्वालोके श्रीमधुसूदन-

सरस्वतीनां भगवद्गीतागूढार्थदीपिकाया: व्याख्यारूपेऽपि एतद्ग्रन्थाश्रयणेनैव अद्वैतप्रक्रियाभेदाः सर्वे प्रतिपादिताः इति नातोऽधिकं किमपि वक्तव्यमस्ति अस्य ग्रन्थस्य महोत्कर्षे । अद्वैतसिद्धान्तसिद्धप्रक्रियाणां आकरोऽयं ग्रन्थः इत्युक्तिरपि नातिशयोक्तिः ।

स्वीयकृतीनां अंशतः परिगणनं श्रीदीक्षितेन्द्रैः कृतिविशेषारम्भे कृतमिति प्रथा । तद्यथा— "श्रीवीरवेङ्कटपतिक्षोणिपालस्य साम्प्रतः । कृतः कुवलयानन्दश्चित्रमीमांसया सह ॥ अभिधालक्षणावृत्तिविवृतिः वृत्तिवार्तिकम् । यादवाभ्युदयाख्याया व्याख्यानञ्च कृतं कृतेः ॥ नामसङ्ग्रहमाला च व्याख्या तस्याश्च विस्तृता । काञ्चीवरदराजस्य दिव्यविग्रहवर्णनम् । व्याख्या तस्य च संक्लृप्ता नातिसङ्क्षेपविस्तरा । सर्वपापप्रशमनी श्रीकृष्णध्यानपद्धतिः । सर्वदुर्गातितरणी दुर्गाचन्द्रकलास्तुतिः । आदित्यस्तोत्ररत्नञ्च तद्व्याख्यानञ्च विस्तृतम् ॥ नानापद्यात्मकचतुर्मतसारार्थसङ्ग्रहः । न्यायमुक्तावली तद्वन्मध्वाचार्यमतानुगा । मयूखमालिका हृद्या लक्ष्मणाचार्यवर्त्मना । श्रीकण्ठाचार्यपद्धत्या निर्मिता मणिमालिका ॥ शङ्कराचार्यदृष्ट्या च प्रक्लृप्ता नयमञ्जरी । न्यायमुक्तावलीव्याख्या नातिविस्तरसङ्ग्रहा ॥ अद्वैतशास्त्रसिद्धान्तलेशङ्ग्रहनामकः । न्यायरक्षामणिस्सर्वसूत्रतात्पर्यवर्णकः । तथा परिमलः कल्पतरुगूडार्थभेदनः । श्रीकण्ठभाष्यव्याख्या च शिवार्कमणिदीपिका ॥ श्रीशिवानन्दलहरी शिवाद्वैतविनिर्णयः । रत्नत्रयपरीक्षा च पञ्चरत्नस्तवस्तथा ॥ तथाशिखरिणीमाला ब्रह्मतर्कस्तवादयः । शिवतत्त्वविवेकश्च शिवकर्णामृतं तथा ॥ शिवार्चनप्रकाशार्थचन्द्रिका बालचन्द्रिका । मीमांसायाश्चित्रपटस्तथा विधिरसायनम् ॥ मीमांसान्यायनिर्गूढ उपक्रमपराक्रमः । एते चान्ये च बहवः प्रबन्धाः प्राग्विनिर्मिताः ॥" इति । इतः परं बहवः ग्रन्थाः विरचिताः S. S. सूर्यनारायण शास्त्रिणां शिवाद्वैतविनिर्णयभूमिकातः अवगन्तव्याः ॥

स्वमतिविमलतायै काचन टिप्पणी रचिताऽत्र योजिता । तत्र नैके दोषाः स्युरपि । परन्तु ते अबुद्धिपूर्विका इति क्षन्तव्योऽहं शोधनेनानुग्राह्योऽहं इति च प्रार्थये ।

एतादृशस्य अत्युत्तमस्य ग्रन्थरत्नस्य पुनः प्रकाशनं श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थप्रकाशनसमित्या क्रियमाणं महान्तं लोकोपकारं आचरति ।

सर्वस्यास्य कार्यनिर्वहणस्य परमहंसयोगिनां जीवन्मुक्तानां श्रीकाञ्च्यां करुणया अस्मत्साक्षात्कारविषयीभूतानां भगवत्पादानां आज्ञारूपानुग्रह एव परमं निदानं बलं च । इत्थं—

'भवे भवे इतोऽप्यधिकं अद्वैतवासनावासितोऽहं भवेयं श्रीपरमाचार्याणां करुणापूर्णानुग्रहात्' इति प्रार्थयमानः श्रीचरणयोः सविनयं साष्टाङ्गं वन्दमानः

कृष्णमूर्ति शास्त्री, एस् . आर्.,
मद्रपुरी संस्कृतकलाशाला, मद्रपुरी

श्री रामः सहायः

साङ्केतिकविवरणम्

क. उ.	कठोपनिषत्
के. उ.	केनोपनिषत्
कौ. उ.	कौषीतक्युपनिषत्
गौ. ध. सू.	गौतमधर्मसूत्रम्
छा. उ.	छान्दोग्योपनिषत्
जा. उ.	जाबालोपनिषत्
जै. सू.	जैमिनिसूत्रम्
तन्त्र. वा.	तन्त्रवार्तिकम्
तै. उ.	तैत्तिरीयोपनिषत्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
तै. सं.	तैत्तिरीयसंहिता
ना. प. उ.	नारायण-परिव्राजकोपनिषत्
नृ. उ.	नृसिंहतापिन्युपनिषत्
नै. सि.	नैष्कर्म्यसिद्धिः
प. द.	पञ्चदशी
पं. वा.	पञ्चीकरणवार्तिकम्
प्र. उ.	प्रश्नोपनिषत्
बृ. उ.	बृहदारण्यकोपनिषत्
बृ. वा.	बृहदारण्यकोपनिषद्भाष्यवार्तिकम्
ब्र. सू.	ब्रह्मसूत्रम्
ब्र. सू. भा.	ब्रह्मसूत्रभाष्यम्
भ. गी.	भगवद्गीता
म. उ.	महोपनिषत्
म. भा.	महाभारतम्
मनु.	मनुस्मृतिः
महा. ना. उ.	महानारायणोपनिषत्
मा. उ.	माण्डूक्योपनिषत्
मा. का.	माण्डूक्यकारिका
मु. उ.	मुण्डकोपनिषत्
वि. पु.	विष्णुपुराणम्
श्वे. उ.	श्वेताश्वतरोपनिषत्
सं. वा.	संबन्धवार्तिकम्

ॐ

शास्त्रसिद्धान्तलेशसङ्ग्रहविषयानुक्रमणिका

प्रथमपरिच्छेदः

ब्रह्मतत्त्वानुसन्धानलक्षणमङ्गलाचरणम्-चिकीर्षितप्रतिज्ञा-स्वीयप्रकृतग्रन्थस्य वेदान्तशास्त्रप्रकरणत्वेन वेदान्तमीमांसाशास्त्राङ्गत्वज्ञापनाय उपक्रमिष्यमाणविचारस्य जिज्ञासासूत्रार्थसम्बन्धसूचनं 'आत्मा-वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिवेदान्तवाक्येषु श्रूयमाणो विधिः किंविध इतिविचारोपक्रमश्च- ५

कथमऽपि केनापि कदाऽपि विना विधिं प्राप्तिरहितस्य प्राप्तिफलको विधिरपूर्वविधिः—यथा व्रीहीन् प्रोक्षतीत्यादिः, कदाचिदेव प्राप्तस्य अप्राप्तांशपरिपूरणफलको विधिर्नियमविधिः—यथा व्रीहीनवहन्तीत्यादिः, नित्यप्राप्तयोः अन्यतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः—यथा पंच पंचनखा भक्ष्याः इत्यादिः—इति विधिप्रभेदलक्षणोदाहरणनिरूपणम् ५

१. श्रवणविधिविचारः

१. वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरिति विशिष्य प्रमाणान्तरेणात्यन्तमज्ञातत्वात् **अपूर्वोऽयं विधिरिति प्रकटार्थकारादिमतनिरूपणम्**— ८

२.क. अपरोक्षवस्तुविषयप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वस्य विचारत्वावच्छेदेन विचार्यनिर्णयहेतुत्वस्य च क्लृप्त्या विचारितवेदान्तशब्दज्ञानरूपस्य श्रवणस्य नित्यापरोक्षब्रह्मसाक्षात्कारहेतुत्वप्राप्तेर्ना-पूर्वोऽयं विधिः—किन्तु मनसाऽहमिति गृह्यमाणे जीवे अध्ययनगृहीतवेदान्तैः उपदिष्टं निर्विशेष-ब्रह्मचैतन्यरूपत्वमाकर्ण्य तत्साक्षात्कर्तुं तत्रैव कदाचित् सावधानं मनःप्रणिदधानस्य पुरुषस्य वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यादिति तदप्राप्तांशपरिपूरणार्थं अपरोक्षज्ञानोद्देशेन वेदान्त-**श्रवणनियम**विधिरेवायम् - १०

ख. अथवा--भिन्नात्मज्ञानान्मुक्तिरिति भ्रान्त्या तदर्थं द्वैतपरशास्त्रान्तरश्रवणेपि पक्षे प्रवृत्तिसम्भवात् **तद्वारणाय अद्वैतात्मपरवेदान्तश्रवणे अयं नियमविधिः-**

ग. अथवा—स्वाध्यायग्रहणे यथा लिखितपाठादिव्यावृत्तये गुरुमुखाधीनाध्ययननियमविधिः, तथा शास्त्रान्तरकुशलस्य स्वप्रयत्नसाध्यस्यापि वेदान्तविचारस्य ब्रह्मसाक्षात्कारहेतुत्वव्यावृत्तये **गुरुमुखा-धीनवेदान्तश्रवणनियमविधिरयम् -**

घ. अथवा - शास्त्रव्युत्पत्तिहीनस्य भाषांतरप्रबन्धेनाद्वैतात्मविचारे प्रवृत्तिप्रसक्तौ तद्व्यावृत्तये **वेदान्तविचारनियमविधिरयम्** -

ङ. अथवा—कर्मसु कल्पसूत्रकारादिवाक्यानामपि मन्त्रवत्पक्षप्राप्तौ मन्त्रैरेव मन्त्रार्थः स्मर्तव्य इति नियमविधिर्नियमादृष्टाय यथा, तथा वेदान्तमूलेतिहासपुराणस्मृतिपौरुषेयप्रबन्धानामप्यद्वैतात्मविचारे प्राप्तौ **वेदान्तविचारनियमविधिरिति** च विवरणानुसारिणां मतभेदोपपादनम्-

च. योगमार्ग-सगुणब्रह्मोपासन-तपोविशेषादिव्यावृत्त्यर्थं नियमविधिः इति च **टीकायाम्**-

३. स्वतःपरोक्षज्ञानजननसमर्थस्यापि शब्दस्य मनननिदिध्यासनसाहाय्यात्, भावनाप्रचयसहकृतविधुरान्तःकरणस्य कामिनीसाक्षात्कारजनकत्ववत् अपरोक्षज्ञानजनकत्वस्य लोकतः प्राप्तत्वान्नापूर्वविधिः—किन्तु शाब्दपरोक्षज्ञानोद्देशेन श्रवणस्य शाब्दापरोक्षोद्देशेन मनननिदिध्यासनयोः सहकारितया नियमविधिरिति विवरणैकदेशिनां मतनिरूपणम्- २२

४. शास्त्राचार्योपदेशशमदमादिसहकृतमनस एवात्मापरोक्षज्ञानजनकत्वम्, निर्विचिकित्सपरोक्षज्ञानजनकत्वमेव श्रवणस्येति परोक्षज्ञानोद्देशेन श्रवणस्य मानसापरोक्षसहकारितया मनननिदिध्यासनयोः नियमविधिरिति केषाञ्चिन्मतनिरूपणम्- २३

५. षड्जादिसाक्षात्कारे श्रोत्रेन्द्रियमेव करणम् गान्धर्वशास्त्रविचारस्तु षड्जादिष्वारोपितेतरेतराविवेकनिवृत्तावुपयुज्यत इति षड्जादिसाक्षात्कारे श्रोत्रस्य सहकारी भवति यथा, तथा शमादिसंस्कृतं मनः आत्मसाक्षात्कारे करणम् । वेदान्तश्रवणन्तु आत्मन्यारोपितदेहादितादात्म्यनिवृत्तावुपयुज्यत इति मनःसहकारित्वेन क्लृप्तत्वान्नापूर्वविधिः, किन्तु श्रवणे नियमविधिरपरोक्षज्ञानार्थत्वेनैव, एवं मनननिदिध्यासनयोरपि, तादर्थ्यञ्चास्य अपरोक्षज्ञानकरणमनःसहकारित्वेनैवेति अपरेषां मतनिरूपणम्- २३

६. पूर्वोक्तपक्षेषु परोक्षापरोक्षज्ञानोद्देशेन विचाराख्यश्रवणविधाने तस्याप्रमाणत्वेन ज्ञानाजनकत्वात् तज्जन्यत्वे च ज्ञानस्य तत्प्रामाण्यस्य परतस्त्वापत्तेश्च न ज्ञानं श्रवणफलम्, विचारजन्यतात्पर्यनिर्णयविशिष्टशब्दज्ञानरूपश्रवणे विध्यनुपपत्तेश्च, इत्यरुच्या विचारस्योहापोहात्मकमानसक्रियारूपत्वमभ्युपेत्य वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयद्वारा तात्पर्यभ्रमादिपुरुषापराधनिरासोद्देशेनैव विचारात्मकश्रवणे नियमविधिरिति सङ्क्षेपशारीरकमतानुसारिणां मतनिरूपणम्- २४

७. यथा औषधज्ञानाय तादर्थ्येन चरकादिश्रवणे प्रवृत्तस्य मध्ये मध्ये विषयासक्त्या व्यापारान्तरे प्रवृत्तिः, तथा आत्मसाक्षात्काराय वेदान्तश्रवणे प्रवृत्तस्यापि प्राचीनदुर्वासनया बहिः प्रवृत्तिः स्यादिति तन्निषेधार्थं श्रोतव्य इति परिसङ्ख्याविधिरिति वार्तिकमतानुसारिणां मतप्रतिपादनम् २६

८. यथा आत्मा ब्रह्मस्वभावः चिद्रूपत्वात् ब्रह्मवत् बुद्ध्यादिः कल्पितः दृश्यत्वात् शुक्तिरजतादिवत् इत्याद्यनुमानरूपस्य मननस्य अहं चिदात्मा ब्रह्मस्वभाव एव ब्रह्म च चिदेकरसप्रत्यगात्मस्वभावमेवेति तत्त्वंपदलक्ष्यार्थनिर्णयरूपस्य निदिध्यासनस्य च ज्ञानरूपत्वम्, एवं वेदान्तवाक्यानामुपक्रमादिषड्विधतात्पर्यलिङ्गैरद्वितीये ब्रह्मणि तात्पर्यनिर्णयात्मकस्य श्रवणस्यापि ज्ञानरूपत्वमेवैष्टव्यं न तात्पर्यविचाररूपत्वमिति न कोपि विधिस्तत्र प्रवर्तते—प्रमाणफलत्वात्। विधिलिङ्गानां तव्यप्रत्ययानां "विष्णुरुपांशु यष्टव्य" इत्यादिविधिच्छायार्थवादस्येव स्तुतिमुखेन अत्यन्तरुच्युत्पादकत्वमात्रेणोपयोगः, पृथक् श्रवणानुष्ठापकविध्यभावेऽपि यथा कर्मकाण्डविचारः 'कर्मवाक्यविचारः कर्तव्यः' इति पृथग्विध्यभावेपि स्वाध्यायविधिनैव सिद्ध्यति, एवं वेदान्तश्रवणमपि वेदार्थविचारत्वाविशेषात्तद्बलादेव सिद्ध्यतीति न पृथक् श्रोतव्यवाक्यविध्यपेक्षेति—**आचार्यवाचस्पतिमतानुगानां** मतोपपादनम्, मूलोक्तानां नियमव्यावर्त्यानां विधिं विनैव व्यावृत्त्युपपादनं च मूले, **टीकायां** टीकोक्तव्यावर्त्यानाम्। श्रवणमनननिदिध्यासनानां ज्ञानरूपत्वप्रतिपादकवार्तिकार्थविवेचनं **टीकायां**। २८

२. ब्रह्मलक्षणविचारः

समनन्तरस्य ब्रह्मलक्षणविचारस्य जन्मादिसूत्रसम्बन्धकथनम्।

१. जगज्जन्मादिष्वेकैकमप्यनन्यगामित्वात् प्रत्येकमेव ब्रह्मलक्षणमिति द्वितीयसूत्रार्थ इति वेदान्तकौमुदीकाराणां मतोपपादानम्- ३९

२. इदं जन्मादिकमेकमेवसत् लक्षणं भूत्वा अभिन्ननिमित्तोपादानत्वे पर्यवस्यत् अद्वितीयं ब्रह्म अतद्व्यावृत्तिद्वारा लक्षणया ज्ञापयति, न तु प्रत्येकं लक्षणं सदिति अन्येषां मतनिरूपणम्- ४२

परिणमविवर्तयोः लक्षणोभेदोपन्यासपुरस्सरं ब्रह्मणः विवर्तोपादानत्वनिरूपणम्, कार्यमिथ्यात्वसमर्थनं टीकायाम्- ४५

३. अभिन्ननिमित्तोपादनं ब्रह्म किं शुद्धरूपम्, उत ईश्वररूपम्, अथवा जीवरूपम्, इति विचारः

१. जन्मादिसूत्रे वाक्यार्थभूतशुद्धब्रह्मण एव प्राधान्येन लक्षणीयत्वात् तस्यैव जगदुपादानत्वमिति संक्षेपशारीरकानुसारिणां मतप्रतिपादनम्- ४९

२. मायोपाधिनिरूपितबिम्बत्वविशिष्टं सर्वज्ञत्वादिगुणकमीश्वररूपं ब्रह्मचैतन्यमेव उपादानमिति विवरणानुसारिणां मतोपपादनम्, संक्षेपशारीरकाविरोधोपपादनञ्च- ५०

३. मायापरिणामवियदादिप्रपञ्चस्य ईश्वर एवोपादानम्, अन्तःकरणादेस्तु जीवाविद्यापरिणामसूक्ष्मभूतानामीश्वरमायापरिणाममहाभूतोपष्टब्धानामुपादानतया तत्र तत्प्रविष्टौ जीवेशावुभावप्युपादानमिति मायाऽविद्याभेदवादिनां मतोपपादनम। मायाऽविद्याभेदस्य श्रुत्यादिसम्मतत्वनिरूपणं उक्तमतपरिष्करणं च **टीकायाम्**- ५६

४. मायापरिणामवियदादिप्रपञ्चस्येश्वर उपादानम्, अविद्यापरिणामान्तःकरणादेस्तु जीव एवेति मायाविद्याविभेदवादिष्वेकदेशिनां मतप्रतिपादनम्- ५८

५. वियदादिप्रपञ्चस्येश्वर उपादानम्, अन्तःकरणादीनान्तु जीवतादात्म्यप्रतीतेर्जीव एवोपादानमिति मायाऽविद्याऽभेदवादिष्वेकदेशिमतनिरूपणम्। उक्तमते अस्वरसोपपादनं **टीकायाम्**- ५८

६. कृत्स्नस्य व्यावहारिकप्रपञ्चस्य ब्रह्मैवोपादानम्—जीवस्तु स्वप्नादिप्रातिभासिकप्रपंचस्योपादानं इत्यन्येषां मतनिरूपणम्- ५९

७. कृत्स्नस्य प्रपञ्चस्य प्रातिभासिकत्वमङ्गीकृत्य स्वप्नप्रपञ्चस्येव जीव एव सेश्वरवियदादिनिखिलदृश्यप्रपञ्चस्य कारणमिति दृष्टिसृष्टिवादिनां मतनिरूपणम्- ६०

४ मायायाः कारणत्वविचारः

'मायान्तु प्रकृतिं विद्यात्' इति श्रुतिमाश्रित्य चैतन्यस्य जगदुपादानत्वाक्षेपः- ६१

१. अत्र ब्रह्म माया चेत्युभयं विवर्तत्वेन परिणामित्वेन चोपादानं, उपादानत्वञ्च स्वात्मनि कार्यजनिहेतुत्वं उभयसाधारणं-इति पदार्थतत्त्वनिर्णयकाराणां उक्ताक्षेपसमाधानवर्णनम्- ६१

२. मायाब्रह्मरूपपरिणामविवर्तोपादानद्वयसाधारणं स्वाभिन्नकार्यजनकत्वरूपं उपादानलक्षणमाश्रित्य केषाञ्चित्समाधानकथनम्- ६२

३. कूटस्थस्य ब्रह्मणः स्वतः कारणत्वानुपपत्तेर्मायाद्वारा कारणत्वम्। तथा च कूटस्थचैतन्यरूपे ब्रह्मणि अध्यस्ता माया ब्रह्मणो जगत्प्रकृतित्वं सम्पाद्य स्वयमपि सहकारिकारणभावमुपेयते घटादौ मृद इव तद्गतश्लक्ष्णत्वादेरपि, इति संक्षेपशारीरकक्रन्मतनिरूपणम्- ६४

टीकायां मायाप्रकृतित्वबोधकश्रुत्यर्थनिर्वाहः- ६५

४. जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया जगदुपादानम्, मायायाः सहकारित्वेपि न कार्यप्रवेशोस्तीति न द्वारकारणत्वं इति वाचस्पतिमिश्रमतकथनम् ६६

टीकायां अविद्यात्मिकाया मायायाः जीवाश्रितत्वोपपादनम्- ६७

५. शक्त्यात्मकमायैव मुख्यमुपादानम्, न ब्रह्म, तस्य तु जगदुपादानमायाधिष्ठानत्वेनौपचारिकमुपादानत्वं इति वेदान्तसिद्धान्तमुक्तावलीकृतां मतप्रदर्शनम्- ६७

५. जीवेश्वरस्वरूपविचारः

१. तत्र **उभयोरपि प्रतिबिम्बत्वम्** मायायाश्चित्प्रतिबिम्बः ईश्वरः, अविद्यायाश्चित्प्रतिबिम्बो जीवः। अत्र च मायाया आवरणविक्षेपशक्तिमद्भाग एवाविद्येति प्रदेशप्रदेशिभावेन मायाऽविद्ययोर्भेदवादिप्रकटार्थकारमतनिरूपणम्- ६८

२. शुद्धसत्त्वप्रधाना मूलप्रकृतिः माया मलिनसत्त्वप्रधानाऽविद्येति मायाऽविद्याभेदं परिकल्प्य मायाप्रतिबिम्ब ईश्वरः अविद्याप्रतिबिम्बो जीव इति श्रीविद्यारण्यस्वामिभिस्तत्त्वविवेकोक्तमतनिरूपणम्- ६९

३. मूलप्रकृतिरेव विक्षेपशक्तिप्राधान्येन माया ईश्वरोपाधिर्भवति आवरणशक्तिप्राधान्येन अविद्या जीवोपाधिरिति च जीवेश्वरविभाग इति क्वचित्प्रतिपादितमतकथनम्- ६९

४. अविद्यायाश्चित्प्रतिबिम्बः ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीव इति संक्षेपशारीरकमतनिरूपणम्- ७०

५. चिच्चातुर्विध्यं परिकल्प्य, ब्रह्माश्रितसकलप्राणिधीवासनोपरक्ताज्ञाने प्रतिबिम्बितश्चैतन्यमीश्वरः अन्तःकरणे प्रतिबिम्बितश्चैतन्यं जीवः, इति चित्रदीपोक्तमतोपपादनम्, अस्मिन्मते 'अहं ब्रह्मास्मि' इति वाक्यार्थविवेचनम्- ७१

८. ईश्वरत्वेन चित्रदीपोक्तस्य जीवत्वप्रतिपादकब्रह्मानन्दोक्तमतोपपादनम्, **टीकायां** माण्डूक्यागमप्रकरणस्य विस्तरेण व्याख्यानम्- ७९

९. चित्त्रैविध्यमवलम्ब्य पारमार्थिकव्यावहारिकप्रातिभासिकभेदेन जीवत्रैविध्यं इति श्रीविद्यारण्यस्वामिभिः दृग्दृश्यविवेकाख्यग्रन्थोक्तस्य उपपादनम्- ८६

१०. ईश्वरो न प्रतिबिम्बरूपः, नापि शुद्धं ब्रह्म बिम्बरूपम्, किन्तु अविद्याप्रतिबिम्बो जीवः, तद्बिम्बभूत ईश्वरः, तदुभयानुगतं शुद्धचैतन्यं इति विवरणानुसारिणांमतोपपादनम्- ८७

११. अन्तःकरणावच्छिन्नो जीवः, तदनवच्छिन्नः किन्त्वविद्यावच्छिन्न ईश्वरः, इति वाचस्पत्यनुसारिणांमतोपपादनम्, अवच्छेदवाद-प्रतिबिम्बवादयोः साधकबाधकविवेचनञ्च- ९४

१२. जीवो हि न प्रतिबिम्बो नाप्यवच्छिन्नः, किन्त्वविकृतं ब्रह्मैव सच्चिदानन्दादिलक्षणं स्वाविद्यया जीवः-इति वार्तिकानुसारिणं मतवर्णनम्- १०४

६. जीवैकत्वनानात्वविचारः

एकजीववादः

१. स्वप्नवज्जागरेऽप्येक एव जीवः, तेनैकमेव शरीरं सजीवम्, अन्यानि तु निर्जीवानि, तदज्ञानकल्पितमेव सेश्वरं सर्वञ्जगत्, बद्धमुक्तगुरुशिष्यशास्त्रादिव्यवहारः स्वाप्नव्यवहारवत् इति वार्तिकानुयायिनां एकशरीरैकजीववादनिरूपणम्- १०६

२. हिरण्यगर्भ एवैको ब्रह्मप्रतिबिम्बो मुख्यजीवः, अन्ये तत्प्रतिबिम्बभूता जीवाभासाः, इति मुख्यामुख्यविभागेन सविशेषानेकशरीरैकजीववादिनां अन्येषां मतनिरूपणम्- १०६

३. अविद्यायांब्रह्मप्रतिबिम्ब एको जीवः, सर्वं शरीरं तुल्यतया स्वभोगाद्यर्थमधितिष्ठतीति अपरेषां अविशेषानेकशरीरैकजीववादप्रतिपादनम्- १०८

बन्धमुक्तिव्यवस्थाया आञ्जस्येनोपपत्तये **नानाजीववादोपक्षेपः** १०९

४. अनेकान्तःकरणानाञ्जीवोपाधित्वाभ्युपगमेन ब्रह्मैव स्वाविद्यया नानान्तःकरणरूपेण परिणतया नानाजीवभावं प्राप्य संसरति स्वविद्यया क्रमेण मुच्यत इति ज्ञानाज्ञानप्रयुक्तबन्धमुक्त्यादिव्यवस्था- इत्यनेकजीववादे 'मूलाज्ञानमेकं' इति पक्षे ब्रह्माश्रयविषयकमेकमेवाज्ञानं सांशं अंशान्तरैर्बद्धेष्वनुवर्तते ; तस्य तस्य ज्ञानेन तत्तदन्तःकरणादिपरिणामिनो मूलाज्ञानांशस्य निवृत्तौ मुक्तेऽशेन निवर्तते इति केषाञ्चिन्मतवर्णनम्- ११०

मनोनियम्योऽविद्यासंसर्गलक्षणो बन्धो यावन्मनः संसारिषु यथावदवतिष्ठते । तत्त्वज्ञानेन मनोनाशे न संसृज्यते प्रतियोगिसंसर्गेऽत्यन्ताभाववदिति अपरेषां मतनिरूपणम्- १११

शुद्धचैतन्यविषयकं जीवाश्रयमेकमेवाज्ञानं यथा जातिर्व्यक्तिमालाश्रयापि नष्टां व्यक्तिञ्जहाति एवं सर्वजीववर्त्यपि सत् तत्त्वज्ञं त्यजतीति मतान्तरकथनम्- ११२

प्रतिजीवं मूलाविद्याभेदमुपगम्य तदनुवृत्तिनिवृत्तिभ्यां बन्धमुक्तिव्यवस्थां समर्थयतां मतवर्णनम्- ११३

७. नानाऽविद्यावादे तत्कृतप्रपञ्चैकत्वनानात्वविचारः

१. सर्वाविद्यापरिणाम एक एव प्रपञ्चो बहुतन्त्वारब्धपटवदास्ते । एकमुक्तौ तदविद्यानाशे एकतन्तुनाशे पटनाशवत् तत्प्रपञ्चनाशेऽपि इतरतन्त्वारब्धपटवदितराविद्याकृतः प्रपञ्चोऽस्त्येवेति केषाञ्चिन्मतकथनम्- ११४

२. तत्तदविद्याकृतो वियदादिप्रपञ्चः प्रतिपुरुषं शुक्तिरजतादिवत् तत्तदपेक्षाबुद्धिजन्यद्वित्वादिवच्च भिन्न एव, प्रत्यभिज्ञानप्रत्यक्षन्तु भ्रममात्रं-इति अन्येषां मतवर्णनम्- ११४

३. जीवाश्रिताविद्यासङ्ग्राद्भिन्ना ईश्वराश्रिता मायैव वियदादिप्रपञ्चपरिणाम्युपादानम्—जीवाविद्यानान्तु आवरणे इव प्रातिभासिकविक्षेपेऽप्युपादानत्वस्वीकारान्न वैयर्थ्यमिति मतनिरूपणम्- ११५

८. ब्रह्मणः कर्तृत्ववादः

ब्रह्मण: उपादानत्वतत्प्रसक्तानुप्रसक्तविचारोपसंहार:, कर्तृत्वरूपनिमित्तत्वविचारोपक्षेपश्च- ११५

१. कार्यानुकूलज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वमिति मतोपपादनम्- ११६

२. कार्यमात्रकर्तृत्वलक्षणानुगमाय ज्ञानादित्रितयरूपकर्तृत्वसाधनार्थं इच्छाकृत्यन्तरापेक्षायामनवस्थापातात् कार्यानुकूलज्ञानवत्त्वमेव ब्रह्मण: कर्तृत्वम्। नित्यज्ञानस्वरूपस्य ब्रह्मण:तादृशज्ञानवत्त्वमौपाधिकमिति न ज्ञानेऽप्येष प्रसङ्ग इति अन्येषाम्मतनिरूपणम्- ११६

३. कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्युक्तौ अधिष्ठानज्ञानवत्त्वेन जीवस्यापि शुक्तिरजतादिभ्रमे कर्तृत्वप्रसङ्गात् तद्वारणाय कार्यानुकूलस्रष्टव्यालोचनारूपज्ञानवत्त्वं कर्तृत्वं वक्तव्यमिति अपरेषां मतवर्णनम् ११८

९. ब्रह्मणः सर्वज्ञत्ववादः

कथं ब्रह्मण: सर्वज्ञत्वम्? जीववत् प्रमाणसिद्धवृत्तिज्ञानाश्रयत्वरूपज्ञातृत्वप्रयोजकान्त:करणाभावादिति आक्षेपे-

१. ईश्वरस्य सर्ववस्तुविषयसकलप्राणिधीवासनोपरक्ताज्ञानोपाधिकत्वेन सर्वविषयवासनासाक्षितया सर्वज्ञत्वमिति भारतीतीर्थानां समाधानवर्णनम्- ११९

२. अन्त:करणवृत्तियोगाज्जीवस्य ज्ञातृत्ववत् चित्प्रतिबिम्बग्राहकसात्विकत्रैकालिकमायावृत्त्या त्रैकालिकसर्वपदार्थविषयकापरोक्षज्ञानवत्त्वेन सर्वज्ञत्वमिति प्रकटार्थकाराणां मतनिरूपणम्- ११९

३. ब्रह्मणो विद्यमाननिखिलप्रपञ्चसाक्षात्कारवत्त्वात् तज्जन्यसंस्कारजस्मरणेनातीतसकलवस्त्ववभाससिद्धेः मायाया: सृज्यमाननिखिलपदार्थस्फुरणरूपेण परिणममानत्वेन तत्साक्षितया तदुपाधिकस्य ब्रह्मणोऽनागतवस्तुविज्ञानोपपत्तेश्च सर्वज्ञत्वमिति तत्त्वशुद्धिकाराणांमतवर्णनम्- १२०

४. स्वरूपज्ञानेनैव ब्रह्मण: स्वसंसृष्टसर्वावभासकत्वात् अतीतानागतयोश्च अविद्यायाम्भित्तौ विमृष्टानुन्मीलितचित्रवद्वासनात्मना-संस्कारात्मना सत्वेन तत्संसर्गस्याप्युपपत्ते: सर्वज्ञत्वमिति वेदान्तकौमुदीकृन्मतोपपादनम्- १२१

५. यद्यपि ब्रह्मण: स्वरूपचैतन्येनैव स्वसंसृष्टसर्वावभासकत्वरूपं सर्वज्ञत्वं, तथापि ज्ञानस्य स्वतोऽकार्यत्वेपि दृश्यावच्छिन्नरूपेण कार्यत्वात् तदाश्रयत्वेन ब्रह्मणो न ज्ञानजनिकर्तृत्वबोधक "य:सर्वज्ञ:" इत्यादिश्रुतिविरोध इति वाचस्पतिमिश्रमतोपपादनम्- १२३

१०. प्रतिकर्मव्यवस्थावर्णनम्

ईश्वरवज्जीवोपि वृत्तिं विना स्वरूपेणैव विषयानवभासयत्विति शङ्कायां-

१. सर्वोपादानत्वाद्ब्रह्मचैतन्यस्य तेन स्वारोपितं सर्वमवभास्यते, न जीवचैतन्येन, तस्याविद्योपाधिकतया व्यापकत्वेपि अनुपादानत्वेन सम्बन्धाभावात्। यथा गोत्वादिसामान्यं सर्वगतमपि सास्नादिमद्व्यक्तावेव संसृज्यते नाश्वादिव्यक्तौ, तथा सर्वगतोपि जीवः अन्तःकरणमात्रेण संसृज्यते न विषयैः। तथा च इंद्रियद्वारा बहिरागत्य विषयदेशं व्याप्नुवदन्तःकरणवृत्तिमारुह्य जीवो विषयैः सम्बध्यते तदर्था वृत्तिरिति- १२४

२. अथवा अन्तःकरणोपाधिकतया परिच्छिन्नो जीवः संसर्गाभावाद्विषयान्नावभासयति। वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्येनाभेदाभिव्यक्तौ तु विषयं प्रकाशयति। अतोऽभेदाभिव्यक्त्यर्था वृत्तिरिति- १२५

३. अथवा—जीवःसर्वगतोऽपि विषयैःसंसृष्टएव अविद्यावृतत्वाद्विषयान्नावभासयति, वृत्त्युपरागादावरणनिवृत्तौ तत्रैव प्रकाशमानः सन् विषयं प्रकाशयति, अत आवरणाभिभवार्था वृत्तिरिति च-विवरणोक्तपक्षभेदैः समाधानवर्णनम् १२५

११. विषयोपरागपदार्थविचारः

किंलक्षणको विषयोपराग इति जिज्ञासायाम्-

१. विषयचैतन्ययोर्विषयविषयिभावसम्बन्ध एव विषयोपराग इति मतनिरूपणम्- १२६

२. जीवतादात्म्यापन्नमनोवृत्तेर्विषयसंयोगे तद्द्वारा जीवस्यापि विषयेण संयुक्तवृत्तितादात्म्यलक्षणः परम्परासम्बन्ध एव स इति मतान्तरनिरूपणम्- १२६

३. साक्षात्प्रमातृसम्बन्धे सत्येव सुखादेरापरोक्ष्यदर्शनात्, प्रमात्रवच्छेदिकायाः वृत्तेः बाह्यघटादिविषयैः संयोगे सति वृत्त्यवच्छेदेन तदुपादानस्य प्रमातुः संयोगजसंयोगोऽस्तीति स एव स इति अपरेषां मतोपपादनम्- १२७

४. अन्तःकरणोपहितो जीवो विषयावभासकः, तस्यान्तःकरणवृत्त्या विषयाधिष्ठानब्रह्मचैतन्यैक्यद्वारा विषयैस्तादात्म्यमेव सम्बन्ध इति एकदेशिमतप्रतिपादनम्- १२८

१२. अभेदाभिव्यक्तिपदार्थविचारः

केयमभेदाभिव्यक्तिरिति जिज्ञासायाम्-

१. तटाककेदारसलिलयोः कुल्याद्वारेव वृत्तिद्वारा अन्तः करणावच्छिन्नजीवचैतन्यस्य विषयावच्छिन्नब्रह्मचैतन्येनैक्यमभेदाभिव्यक्तिरिति केषाञ्चिन्मतवर्णनम्- १३०

२. विषयावच्छिन्नब्रह्मचैतन्यस्य वृत्तौ यः प्रतिबिम्बो विषयप्रकाशकः तस्य अन्तःकरणावच्छिन्नजीवचैतन्येनैकत्वमभेदाभिव्यक्तिरिति अन्येषाम्मतवर्णनम्- १३१

३. साक्षाद्विषयावभासकविषयावच्छिन्नबिंबभूतब्रह्मचैतन्यस्यैव अन्तःकरणप्रतिबिम्बत्वविशिष्टजीवचैतन्येन सह बिम्बत्वप्रतिबिम्बत्वोपलक्षितशुद्धचैतन्यात्मना एकीभावोऽभेदाभिव्यक्तिरिति अपरेषांमतनिरूपणम्- १३२

१३. आवरणाभिभवपदार्थविचारः

को नामावरणाभिभवः इति जिज्ञासायाम्—

१. चैतन्यमात्रावारकमूलाज्ञानस्य विषयावच्छिन्नप्रदेशे ज्ञानेनैकांशनाशो वा-कटवत्संवेष्टनं वा-भीतभटवदपसरणं वाऽभिभवः इति केषाञ्चिन्मतवर्णनम्- १३३

२. चैतन्यमात्रावारकाज्ञानस्य तत्तद्विषयाकारवृत्तिसंसृष्टविषयावच्छिन्नचैतन्यानावारकत्वस्वाभाव्यमेवाभिभवः इति अन्येषांमतनिरूपणम्- १३३

३. चैतन्यमात्रावारकमूलाज्ञानस्य अवस्थाभेदरूपं विषयावच्छिन्नचैतन्यावारकमज्ञानान्तरमस्ति, तन्नाश एवाभिभव इति अपरेषांमतोपपादनम् १३४

१४. अवस्थाऽज्ञानसादित्वानादित्वविचारः

उक्तावस्थाऽज्ञानानि किमनादीनि उत सादीनीति जिज्ञासायाम्—

१. इमान्यवस्थारूपाणि घटाद्यज्ञानानि अनादीनि अज्ञानत्वाविशेषात् मूलाज्ञानवदिति केषाञ्चिन्मतनिरूपणम्- १३५

२. अवस्थाऽज्ञानानि आदिमन्ति अवस्थाज्ञानत्वात् स्वप्नकारणीभूतनिद्रावत् सुषुप्तिवच्चेति अन्येषांमतनिरूपणम्- १३५

१५. अवस्थाऽज्ञानानादित्वपक्षपरिष्कारः

अवस्थाज्ञानानामनादित्वपक्षे प्राथमिकज्ञानेनैकमेवाज्ञानन्नश्यति नेतराणीत्यत्र विनिगमकाभावात् सर्वाज्ञाननाशो वक्तव्यः, अन्यथा एकावरणनाशेप्यावरणान्तराणां सत्त्वाद्विषयप्रकाशानुपपत्तेरिति शङ्कायाम्-

१. यथा न्यायमते यावन्ति घटज्ञानानि तावन्तो घटज्ञानप्रागभावाः सन्ति, तत्र प्रथमज्ञानेनैक एव ज्ञानप्रागभावो निवर्तते, अन्ये यथापूर्वं सन्त्येव, तेषां सत्त्वेपि विषयप्रकाशश्च तैरुपेयते । एवं

एकज्ञानोदये एकमेवाज्ञानं निवर्तते अज्ञानान्तरेषु सत्स्वपि विषयप्रकाशश्च भवतीति केषाञ्चिन्मतवर्णनम्- १३७

२. अवस्थाऽज्ञानानां मध्ये यदा यदज्ञानमावृणोति तदा तज्ज्ञानेन तदज्ञानमेव निवर्तते, नहि सर्वाज्ञानं सर्वदा आवृणोति निष्फलत्वात्, किन्तु प्रथमज्ञाने नष्टेऽज्ञानान्तरमावृणोतीति अन्येषाम्मतनिरूपणम्- १३७

३. सन्ततमेव समस्ताज्ञानानामावारकत्वस्वाभाव्येपि, यथा कस्यचिच्छिरसि निपतन्नशनिरितरानपि तत्रत्यानपसारयति, यथावा सन्निपातरूपैकदोषनिवर्तकमौषधं दोषान्तराण्यपि दूरीकरोति, तथा एकाज्ञानं नाशयज्ज्ञानं अज्ञानान्तराण्यपि तिरस्करोतीति इतरेषांसमाधानवर्णनम्- १३८

१६. 'ज्ञानसामान्यमज्ञाननिवर्तकं' इतिनियमपरीक्षा

धारावाहिकस्थले प्रथमज्ञानेनैवाज्ञानमात्रस्याभिभवसम्भवे द्वितीयादिज्ञानस्य नाज्ञाननिवर्तकता इति शङ्कायां-

१. यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वं यस्मिन्नसति यस्यासत्वं तत् तज्जन्यमिति साध्यलक्षणविशेषानुरोधेन प्रथमज्ञानातिरस्कृतमज्ञानं तज्ज्ञानोपरमसमये उत्पन्नेन द्वितीयादिज्ञानेन प्रदीपोपरमसमये उत्पन्नप्रदीपान्तरेण तम इव तिरस्कृतं तिष्ठतीति न धारावहनस्थले उक्तनियमभङ्गः इति केषाञ्चित्समाधानस्य वर्णनम्- १३९

२. एकेन ज्ञानेन एकस्याज्ञानस्य नाश एव, न त्वज्ञानान्तराणामपसरणम्। अज्ञानानि स्वस्वकालोपलक्षितविषयावारकाणि, ज्ञानानि च स्वस्वकालोपलक्षितविषयावारकाज्ञाननाशकानीति धारावाहिकस्थले न नियमभङ्ग इति न्यायचन्द्रिकाकृन्मतनिरूपणम्- १४०

३. प्रथमज्ञानेन घटादिविषयकमज्ञानमात्रं निवर्तते द्वितीयादिज्ञानैस्तु देशकालादिविशिष्टाज्ञानानि निवर्तन्त इति नोक्तस्थले उक्तनियमभङ्गः- १४१

४. अथवा-धारवाहिकस्थले प्रथमोत्पन्नमेकमेव ज्ञानं दीर्घकालं नैरन्तर्येणावतिष्ठते वृत्तिभेदानङ्गीकारात्, अतो न तत्र उक्तनियमभङ्गशङ्का- १४२

५. यद्वा वृत्तिभेदाङ्गीकारेऽपि द्वितीयादिज्ञानानामधिगतार्थविषयकत्वेनाप्रामाण्यादावरणानाशकत्वेऽपि न नियमभङ्गः, **प्रमात्मकज्ञानस्यैव तथात्वाभ्युपगमात्**, ज्ञानसामान्यं अज्ञाननिवर्तकं इति नियमानभ्युपगमात्—इति च अपरेषाम्मतोपपादनम्- १४२

१७. 'प्रमासामान्यं अज्ञाननिवर्तकं' इति नियमपरीक्षा

प्रमारूपाया अपि परोक्षवृत्तेः बहिर्विषयदेशागमनेनाज्ञानानिवर्तकत्वात् उक्तनियमभङ्ग इति शङ्कायाम्

१. विषयावारकमज्ञानं द्विविधम्, एकं विषयाश्रितं अपरं पुरुषाश्रितं चेति। तत्र परोक्षवृत्तेर्विषयगताज्ञानानिवर्तकत्वेऽपि पुरुषगताज्ञाननिवर्तकत्वमस्ति, अपरोक्षवृत्तेस्तु तदुभयनिवर्तकत्वमस्तीति न नियमभङ्ग इति केषाञ्चिन्मतवर्णनम्- १४४

२. परोक्षवृत्त्या यथाऽज्ञाननिवृत्तिरनुभूयते एवं सत्यपि परोक्षज्ञाने दूरस्थवृक्षे विपरीतपरिमाणोत्पत्तिरङ्गीक्रियते। तथाचानुभवद्वयानुरोधेन पुरुषाश्रितस्यैवाज्ञानस्य विषयावारकस्यैकदेशः परोक्षज्ञानेन निवर्तते एकदेशान्तरमनुवर्तत इति एकस्यैव पुरुषगताज्ञानस्य अवस्थाद्वयं कल्प्यते न त्वज्ञानद्वैविध्यमभ्युपगम्यते गौरवादिति मतान्तरानुसारेण उक्तनियमाभङ्गवर्णनम्- १४६

अवस्थाद्वयानङ्गीकारेऽपि अज्ञाननिवर्तकतावच्छेदककोटौ अप्रतिबद्धत्वविशेषणनिवेशेन उक्तनियमाभङ्गनिरूपणं **टीकायाम्**- १४६

३. घटादेर्मृदादिपरिणामत्ववत् शुक्तिरजतादेरपि परिणामत्वमभ्युपेयम्, तत्परिणामि च अन्वयव्यतिरेकाभ्यामज्ञानमेव। तच्चाज्ञानं विषयचैतन्यगतमेव न प्रमातृगतम्, तस्य पुरुषं विहाय बहिर्निर्गमनासम्भवात् अक्रियत्वेन प्रभान्यायात् पुरुषं सम्बध्यापि बहिर्निर्गत्य परिणामायोगाच्च विषयचैतन्यगतमेवाज्ञानं तदावारकम्। तस्यापरोक्षज्ञानेनैव निवृत्तिः। तथा च **अप्रतिबद्धापरोक्षज्ञानमज्ञाननिवर्तकमित्येव नियमः**, न तु 'प्रमासामान्यं अप्रतिबद्धप्रमासामान्यं वा अज्ञाननिवर्तकं' इति नियमः, अतो न नियमभङ्गशङ्का—इति मतान्तरनिरूपणम्- १४७

अविद्याहङ्कारसुखदुःखादितद्धर्माणां साक्षिभास्यानामज्ञानाभावेन तज्ज्ञानस्यावरणानिवर्तकत्वेन अप्रतिबद्धापरोक्षज्ञानमज्ञाननिवर्तकमिति नियमस्यापि भङ्गः इति शङ्कायाम्-

वृत्तिरूपापरोक्षज्ञानस्यैवाज्ञाननिवर्तकत्वाभ्युपगमात् अविद्यासुखदुःखादितद्धर्म्यहङ्कारादीनां प्रत्यक्षस्य साक्षिरूपत्वेन न नियमभङ्ग इति समाधानवर्णनम्- १४८

१८. साक्षिस्वरूपविचारः

अहमर्थजीवातिरेकेण साक्षी नाम क इति जिज्ञासायाम्—

१. देहद्वयाधिष्ठानं यच्चैतन्यं जीवेश्वरत्वास्पृष्टं तत् स्वावच्छेदकदेहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षी—इति कूटस्थदीपं नाटकदीपं चावलम्ब्य श्रीविद्यारण्यस्वामिमतोपपादनम्, साक्षिणः सद्भावे जीवातिरिक्तत्वे च श्रुतिप्रमाणप्रदर्शनञ्च- १४९

२. अन्तःकरणगतचित्प्रतिबिम्बात्मकानां सर्वेषां जीवानां अधिष्ठानतयाऽऽन्तरं स्वरूपं जीवेश्वरत्वजगत्वादिरहितं शुद्धं ब्रह्मैव तत्तज्जीवाधिष्ठानत्वादेव तत्तज्जीवतादात्म्यापत्त्या प्रतिशरीरं प्राप्तभेदं सत् साक्षी—इति साक्षिणो जीवत्वेश्वरत्वधर्मरहितस्वरूपत्वे संवादित्वेन तत्त्वप्रदीपिकाकृन्मतवर्णनम्- १५३

३. ईश्वरस्यैव कश्चिद्रूपभेदोऽपरोक्षःजाग्रदादौ जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीनः सुषुप्त्यादौ च सर्वकार्यकरणोपरमे जीवाश्रयाज्ञानमात्राभिव्यञ्जकः प्राज्ञशब्दवाच्यः साक्षी—इति वेदान्तकौमुदीकृन्मतनिरूपणम्- १५३

४. तत्त्वशुद्धिकाराणामपि कौमुदीमतं सम्मतमिति वर्णनम्- १५५

५. साक्षित्वं नाम उदासीनत्वे सति साक्षाद्द्रष्टृत्वम्। तच्चासङ्गोदासीनस्वप्रकाशस्वरूपस्य जीवस्यैव सम्भवेत्, नेश्वरस्य परोक्षस्य, कर्तृत्वादिकं च जीवस्य बुद्धितादात्म्यात् इति न उदासीनत्वानुपपत्तिः, अतः अविद्याप्रतिबिम्बजीव एव साक्षी—इति मतान्तरवर्णनम्- १५६

५. अविद्याप्रतिबिम्बितकेवलजीवस्य साक्षित्वं न सम्भवति पुरुषान्तरसुखदुःखादिसाक्षात्कारप्रसङ्गात्, किन्तु तस्यैव तत्तदन्तःकरणोपहितस्य साक्षित्वं—इति मतान्तरनिरूपणम्, उपाध्युपलक्षणविशेषणानां सदलप्रयोजनं लक्षणकथनं **टीकायाम्**- १५७

१९. साक्षिचैतन्यस्य आवृतत्वानावृतत्वचिन्ता

अविद्याहङ्कारादीनामनावृतसाक्षिभास्यत्वनियमात् चैतन्यसामान्यावारकाविद्यावृतः साक्षी कथं तदवभासको भवेदिति आक्षेपे- १५९

१. यथा राहुग्रस्तश्चन्द्रः आवृत एव राहुं प्रकाशयति, तथा अविद्यावृत एव साक्षी अविद्यादीन् प्रकाशयतीति केषाञ्चिन्मतेन समाधानम्- १६०

२. यथा राहुणा सर्वात्मना ग्रस्तस्य चन्द्रमण्डलादेः स्वावारकराहुमात्रप्रकाशकत्वेपि तदितरघटाद्यनवभासकत्वम्, एवं सर्वात्मनाऽऽवृतस्य साक्षिणः स्वावारकाविद्यामात्रप्रकाशकत्वेपि तद्भिन्नाहङ्काराद्यनवभासकत्वप्रसङ्गात् तेषां च अनावृतसाक्षिचैतन्यसम्बन्धादेव सर्वदाऽज्ञानसंशयविपरीतज्ञानाभावानुभवाच्च अविद्या स्वाश्रयसाक्षिचैतन्यं विहायैव चैतन्यमावृणोतीत्यनुभवानुरोधादङ्गीकर्तव्यमिति परमार्थसमाधानवर्णनम्- १६०

२०. साक्ष्यानन्दस्यानावृतत्वविचारः

साक्षिचैतन्यस्याज्ञानानावृतत्वे स्वस्वरूपभूतानन्दादेरप्यनावृतत्वस्य प्रसङ्गे इष्टापत्त्या समाधानम्- १६०

संसारदशायामपि स्वरूपानन्दप्रकाशाभ्युपगमे मुक्तिससंारयोरविशेषापत्तिरिति शङ्काया विस्तरेण समर्थनम्- १६१

१. उत्कृष्टधवलरूपस्य मालिन्यतारतम्ययुक्तानेकदर्पणप्रतिबिम्बे उपाधिमालिन्यतारतम्यवशात् प्रतिबिम्बे धावल्यापकर्षतारतम्याध्यासवत्, वस्तुतो निरतिशयैकरूपस्वरूपानन्दस्य उपाधिमालिन्यतारतम्यदोषात् उत्कर्षापकर्षाध्यास इति संसारदशायां सातिशयत्वम्, विद्योदये निखिलाध्यासनिवृत्तेः कल्पित-सातिशयत्वापायात्कृतकृत्यतेति विशेषो मुक्तिसंसारयोरिति अद्वैतविद्याचार्याणां मतेन समाधानम्- १६४

२. एकस्मिन्नेव चैतन्ये जीवत्वावच्छेदेन अज्ञत्वादिकं ईश्वरत्वावच्छेदेन तदभावश्च कल्प्यते यथा ; तथा 'आनन्दो मयि नास्ति, न प्रकाशते' इत्यनुभवादानन्दत्वावच्छेदेनावृतत्वं चित्त्वा-वच्छेदेनाहङ्काराद्यवभासकचैतन्ये तदभावश्च कल्प्यते, जीवेश्वरत्वादेरिव चिदानन्दत्वादिरूप-भेदस्याप्यविद्याकल्पितत्वाभ्युपगमान्नाद्वैतविरोधः, प्रकाशमानेऽप्यावरणसम्भवश्च—इति मतान्त-रोपपादनम्- १६६

२१. केवलसाक्षिभास्यानां स्मरणोपपत्तिनिरूपणम्

अहङ्काराद्यनुभवरूपस्य साक्षिणो नित्यत्वात् कथमहङ्कारादिस्मृतिः, ज्ञानसूक्ष्मावस्थारूपसंस्कारस्य ज्ञानदशायामसंभवात्-इत्याक्षेपे-

१. यद्वस्तुगोचरवृत्त्यवच्छिन्नचैतन्ये वृत्तिरूपयदवच्छिन्नचैतन्ये वा यावन्तः पदार्थाः प्रकाशन्ते तद्वस्तुगोचरवृत्त्या तथा वा तावत्सु पदार्थेषु संस्काराधानमिति नियमात् घटादिविषयकवृत्त्य-वच्छिन्नसाक्षिणाऽनित्येन घटादिविषये इव अहङ्कारादावपि संस्काराधानं सम्भवति, घटादिवृत्त्य-वच्छिन्नचैतन्ये सुखदुःखेच्छादीनां प्रकाशासम्भवेऽपि सुखादिगोचरवृत्तिं विनैव तत्संस्काराधीन-स्मरणोपपत्तिश्चेति समाधानम्- १६९

२. सुषुप्तादुत्थितस्याविद्याद्यनुसन्धानसिद्धये सुषुप्तौ कल्पितामविद्यागोचराविद्यावृत्तिमिव अहमाकारा-विद्यावृत्तिमङ्गीकृत्य अनुसन्धानादिकं समर्थयतां मतवर्णनम्- १७२

३. अहमर्थगोचरा वृत्तिरन्तःकरणवृत्तिरेव ; सा च न ज्ञानम्, क्लृप्तकरणाजन्यत्वात्, किन्तु उपासनादिवृत्तिवत् क्रियारूपैवेति ज्ञानरूपवृत्तिं विना साक्षिवेद्यत्वरूपस्य केवलसाक्षिवेद्यत्वस्य न क्षतिः—इति मतप्रतिपादनम्- १७३

४. अहमर्थगोचराऽपि मनोवृत्तिर्ज्ञानमेव ; तत्करणं च मन एव, तथा च जन्यज्ञानरूपस्य तस्य नाशात् संस्कारादिकं सम्भवति, केवलसाक्षिवेद्यत्वसिद्धान्तोऽपि अहमर्थातिरिक्तविषय एव, अज्ञाननिवर्तकत्वनियमः बाह्यगोचरापरोक्षप्रमाणामेव इति वदतामितरेषाम्मतवर्णनम्- १७४

२२. भ्रमकारणीभूतेदमाकारवृत्तेरावरणाभिभावकत्वनिरूपणम्

ननु इदंरजतमिति भ्रमस्थले प्रथमं इदमाकारा अपरोक्षवृत्तिरुदेति, पश्चादिदंरजतमितिभ्रमो भवति। तत्र प्रथमोत्पन्नेदमाकारवृत्तेरज्ञानानिवर्तकत्वे पूर्वोक्तनियमभङ्गः, निवर्तकत्वे चोपादानाभावेन भ्रमो न स्यादिति आक्षेपे- १७४

१. इदमाकारवृत्तिनिवर्त्यं इदमंशाज्ञानमन्यत्, रजतोपादानशुक्तित्वादिविशेषांशाज्ञानमन्यत्। तथाच न नियमभङ्गः, न वा रजतोत्पत्त्ययोगः इति केषाञ्चित्समाधानवर्णनम्- १७५

२. अपरे तु-इदं रजतमिति भ्रमस्थले इदंतादात्म्येन प्रतीतस्य रजतस्य इदमंशाज्ञानमेवोपादानम्। अतः तस्याज्ञानस्येदमाकारवृत्त्या इदमंशाज्ञानावरणशक्तिमात्रनिवृत्तावपि विक्षेपशक्तिमद्विशेषांशाज्ञानानुवृत्त्या अध्यासोपादानत्वं सम्भवतीति न पूर्वोक्तदोषद्वयम्-इत्यपरेषांमतवर्णनम्- १७५

३. इदंरजतमिति इदमंशतादात्म्यविशिष्टरजतगोचरा एकैव इन्द्रियजन्या वृत्तिः। 'इदं रजतं' इति भ्रमरूपविशिष्टज्ञानात्पूर्वं 'इदं' इति धर्मिमात्राकारवृत्तेरननुभवात्, अधिष्ठानसामान्यज्ञानस्याध्यासकारणत्वे मानाभावात्, अन्वयव्यतिरेकाभ्यां अधिष्ठानसंप्रयोगस्यैव कारणत्वप्राप्तेः, अप्रतिबद्धदुष्टेन्द्रियसम्प्रयोगस्य अविद्याक्षोभे विशिष्टवृत्त्युत्पादने चोपयोगमात्रोपपत्तेश्च इदं रजतमिति भ्रमरूपवृत्तिव्यतिरेकेण रजतोत्पत्तेः प्राक् इदमाकारा वृत्तिरेव नास्ति। रजतप्रत्यक्षं तु ऐन्द्रियकमेव, न तु साक्षिरूपम्। ज्ञानसमकालोत्पन्नप्रातिभासिकरजते स्वज्ञानात्पूर्वमिन्द्रियसंप्रयोगाभावेपि स्वतादात्म्याश्रयेदमर्थसम्प्रयोगादेव स्वस्यापि चक्षुर्ग्राह्यत्वं सम्भवति, तथा च इदम्मात्रवृत्तेरभावात् न तत्र व्यभिचारः, 'इदं रजतं' इति वृत्तेः प्रमात्वाभावात् न तत्र व्यभिचारः इति 'बाह्यापरोक्षप्रमासामान्यं अज्ञाननिवर्तकं' इति नियमस्य अबाधः—इति कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायमतोपपादनम्, उक्तमतोक्तोपपत्तीनां निराकरणेन धर्मिज्ञानस्य अध्यासकारणत्वव्यवस्थापनं—टीकायाम्- १७७

भ्रमस्थले वृत्त्येकत्वानेकत्वविचारः

१. अध्यासकारणत्वेन अधिष्ठानगोचरेदमाकारां वृत्तिमभ्युपगम्य तदभिव्यक्तसाक्षिणैव स्वाध्यस्तरजतप्रकाशसम्भवात् इदंवृत्त्यैव रजतसंस्कारस्य च सम्भवात्, रजताकारा वृत्तिर्व्यर्थैवेति मन्यमानानां मतनिरूपणम्- १९६

२. स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमितिपक्षे अध्यासकारणीभूता इदंवृत्तिरेका, इदंरजतमिति द्वितीया तु इदमंशतदध्यस्तरजतोभयगोचरा इति-भ्रमस्यवृत्तिद्वयरूपत्ववादिमतनिरूपणम्- १९६

२. वृत्तिद्वयमिति पक्षे एव 'इदमित्येका वृत्तिः, इदं रजतमिति द्वितीया तु अध्यस्तरजत-रजतेदन्त्व-संसर्गमात्रगोचराऽविद्यावृत्तिः, तत्र इदमंशावच्छिन्नचैतन्यस्थाविद्या रजताकारेण परिणमते, इदमंशविषयकवृत्तिज्ञानावच्छिन्नचैतन्यस्थाविद्या अध्यस्तरजतगोचरवृत्तिज्ञानाभासरूपेण परिणमते इति वदतां मतोपपादनम्- १९६

२३. वृत्तिनिर्गमनप्रयोजनविचारः

बहिरनिर्गतवृत्त्यवच्छिन्नसाक्षिचैतन्येनैव सकलविषयप्रकाशतत्संस्काराद्युपपत्तौ वृत्तिनिर्गमो व्यर्थ इति आक्षेपे— १९८

१. प्रत्यक्षपरोक्षज्ञानयोर्वैलक्षण्यमनुभवसिद्धम्। तत्र प्रत्यक्षस्थले विषयावच्छिन्नचैतन्यमेव विषय-प्रकाशः, न जीवचैतन्यम्। तस्यानुपादानत्वेन साक्षात्तादात्म्यसम्बन्धासम्भवात्, तत्सम्भवेऽन्यस्य स्वरूपसम्बन्धादेः कल्पनायोगात्। तादृशविषयाधिष्ठानब्रह्मचैतन्यस्यावृतत्वात् आवरणाभि-भवरूपाभिव्यक्तिसिद्ध्यर्थं वृत्तिनिर्गमाभ्युपगम आवश्यकः-इति केषाञ्चित्समाधानस्य निरूपणम्- १९८

२. अहङ्कारादिष्वापरोक्ष्यस्य साक्षाच्चैतन्यसंसर्गप्रयुक्तत्वेन घटादावपि स्वसंसृष्टमेव चैतन्यमापारोक्ष्य-हेतुरिति तदभिव्यक्तये वृत्तिनिर्गमोऽभ्युपेय इति अपरेषांमतवर्णनम्- १९९

३. शब्दानुमानावगतपरोक्षज्ञानग्राह्यापेक्षया प्रत्यक्षग्राह्यगन्धादौ अभिव्यक्तापरोक्षैकरसचैतन्यतादात्म्यात् स्पष्टता विषयताविशेषरूपाऽस्ति, तत्सिद्धये वृत्तिनिर्गम इति मतान्तरोपपादनम्- १९९

ज्ञानाज्ञानयोर्विरोधे समानविषयकत्वमात्रं प्रयोजकमङ्गीकृत्य विषयचैतन्यगतस्य अज्ञानस्य अविनिर्गतवृत्त्यैव निवृत्तिसिद्धेस्तन्निर्गमो व्यर्थ इति पुनरप्याक्षेपे-

१. वृत्तिनिर्गमानभ्युपगमे ज्ञानाज्ञानयोर्विरोधप्रयोजकस्य समानाश्रयत्वे सति समानविषयकत्वस्य दुर्नि-रूपत्वेन विरोधो न स्यादिति तन्निर्वाहाय निवर्तकज्ञानस्य अज्ञानाश्रयचैतन्यसंसर्गनियत-त्वरूपविशेषणसिद्धये वृत्तिनिर्गमोऽभ्युपेय इति केषाञ्चित्समाधानस्योपपादनम्- २०१

२. विषयगताज्ञानस्य अन्वयव्यतिरेकाभ्यां ज्ञाननिवर्त्यत्वग्रहदशायां लाघवात् समानाधिकरणज्ञान-निवर्त्यत्वं गृह्यत इति तत्सिद्ध्यर्थतया वृत्तिनिर्गमः फलतीति मतान्तरवर्णनम्- २०६

३. समानाधिकरणयोरेव तमःप्रकाशयोर्निवर्त्यनिवर्तकभावस्य दृष्टत्वेन दृष्टानुरोधात् ज्ञानज्ञानयोरपि समा-नाधिकरणयोरेव निवर्त्यनिवर्तकभावः कल्प्यत इति तदर्थं वृत्तिनिर्गम इति अपरेषां मतवर्णनम्- २०७

४. आवरणाभिभवार्थं वृत्तिनिर्गमानभ्युपगमेऽपि चिदुपरागार्थं वा प्रमातुर्विषयावभासकब्रह्मचैतन्येन अभेदाभिव्यक्त्यर्थं वा वृत्तिनिर्गम आवश्यक इति मतान्तरवर्णनम्- २०७

२५

अभिव्यज्यमानजीवब्रह्माभेदे प्रमाणजिज्ञासायाम्—प्रत्यगभिन्नेऽद्वये ब्रह्मणि समन्वयाध्यायोक्त-न्यायानुगृहीतवेदान्तानां प्रमाणत्वकथनम्, एतद्व्याजेन प्रथमपरिच्छेदस्य समन्वयाध्यायसङ्गतत्वज्ञापनम्, प्रथमपरिच्छेदोपसंहारश्च- २०७

द्वितीयपरिच्छेदः

१. द्वितीयपरिच्छेदस्य अविरोधाध्यायेन प्रथमपरिच्छेदेन च सङ्गतिसूचनपूर्वकं मिथ्यात्वश्रुतीनां प्रत्यक्षाबाधनिरूपणम्-

प्रत्यगभिन्नेऽद्वये ब्रह्मणि वेदान्तानां समन्वयो न सिद्ध्यति, द्वैतमिथ्यात्वबोधकश्रुतीनां घटपटादिद्वितीयप्रपञ्चसत्ताग्राहिप्रत्यक्षादिप्रमाणविरोधात् द्वैतमिथ्यात्वासाधकत्वात्-इत्याक्षेपे- २०९

१. प्रत्यक्षादिप्रमाणं न घटादि तन्निष्ठपारमार्थिकत्वं वा गृह्णाति। किन्तु घटःसन्-इति घटाद्यनुविद्धं तदधिष्ठानं निर्विशेषचिन्मात्रम्, इदमंशवत्। सर्वस्माद्भिन्नत्वेन प्रतीयमानं घटादिकं तु साक्षिरूपभ्रान्त्या प्रतिभासते आरोपितरजतांश इव, अतो न विरोधः-इति तत्त्वशुद्धिकृन्मतोपपादनम्- २१०

२. घटादेरिन्द्रियग्राह्यत्वेपि मिथ्यात्वबोधकश्रुतीनां न प्रत्यक्षविरोधः, सन् घट इत्यादिप्रत्यक्षेण घटादौ प्रतीयमानस्य सत्त्वस्य अधिष्ठानभूतब्रह्मगतत्वस्वीकारात् इति न्यायसुधाकृन्मतनिरूपणम्- २१३

३. प्रत्यक्षस्य पराग्विषयघटादौ पृथक् सत्त्वग्राहित्वेपि तस्य प्रमाणाभासत्वात् न तेन तत्त्वावेदकप्रमाणश्रुतिबाध इति संक्षेपशारीरकाचार्यमतप्रतिपादनम्- २१३

४. घटादिसत्त्वग्राहिप्रत्यक्षस्य प्रामाण्येऽपि, तद्ग्राह्यघटादिसत्त्वस्य सत्ताजातिरूपत्वेन वा तत्तद्देशकालसम्बन्धरूपत्वेन वा घटादिस्वरूपत्त्वेन वा मिथ्यात्वाविरोधित्वात् तद्बोधकश्रुतीनां न प्रत्यक्षविरोधः इति केषाञ्चिन्मतवर्णनम्- २१४

५. अबाध्यत्वरूपसत्त्वस्य प्रत्यक्षग्राह्यत्वेपि न मिथ्यात्वश्रुतिविरोधः। कालत्रयाबाध्यत्वरूपसत्त्वमेव मिथ्यात्वविरोधि, तच्च ब्रह्मण एव। प्रपञ्चस्य तु यावद्ब्रह्मज्ञानमबाध्यत्वरूपं सत्त्वम्, तच्च न मिथ्यात्वविरोधीति न मिथ्यात्वश्रुतेः प्रत्यक्षविरोधः-इति अपरेषां मतनिरूपणम्- २१५

६. कालत्रयाबाध्यत्वरूपसत्त्वग्राहित्वेन प्रत्यक्षस्य श्रुतिविरोधित्वेपि न मिथ्यात्वसिद्ध्यनुपपत्तिः। श्रुत्या, अपच्छेदन्यायेन परत्वोपेतया, निर्दोषया, दोषशङ्काकलङ्कितस्य प्रथमप्रवृत्तस्य प्रत्यक्षस्य बाधोपपत्तेः इति मतान्तरनिरूपणम्- २१६

२. श्रुतेः प्रत्यक्षात्प्राबल्यप्रयोजकविचारः

आगमस्य प्रत्यक्षात्प्राबल्ये किमर्थं प्रत्यक्षाविरोधाय "यजमानः प्रस्तरः" "सोमेन यजेत" इत्यादौ श्रौतस्य प्रस्तरशब्दस्य सोमशब्दस्य च गौणी लक्षणा च वृत्तिरङ्गीकृतेति शङ्कायाम्- २१६

१. तात्पर्यवती श्रुतिः प्रत्यक्षाद्बलवती, न तु श्रुतिमात्रम्, अतो नोक्तदोषः। अद्वैतश्रुतिस्तु उपक्रमादिषड्विधलिङ्गावगमिततात्पर्या प्रत्यक्षाद्बलवतीत्यतः प्रत्यक्षस्यैव बाध इति भामतीकृन्मतोपपादनम्- २२०

२. न तात्पर्यवत्त्वेन श्रुतेः प्राबल्यं, किन्तु निर्दोषत्वात् परत्वाच्च श्रुतिमात्रस्य अपच्छेदन्यायेन प्रत्यक्षात्प्राबल्यमित्युत्सर्गः। यत्र श्रुतिबाधितं प्रत्यक्षं निरवकाशम् तत्र प्रत्यक्षेण श्रुतिरेव बाध्यते। प्रकृते च प्रत्यक्षं अर्थक्रियासमर्थव्यावहारिकविषये चरितार्थमिति नोत्सर्गपरित्यागः—इति विवरणानुसारिमतोपपादनम्, पराभिमतस्य अपच्छेदन्यायवैषम्यस्य परिहारश्च- २२३

उपक्रमन्यायेन प्रत्यक्षस्यप्राबल्यशङ्कायाः परिहारः

अपच्छेदन्यायेन प्रत्यक्षाच्छ्रुतेरिव, उपक्रमन्यायेन प्रत्यक्षस्यैव श्रुतेः प्राबल्यं कुतो न स्यात् विनिगमनाविरहादिति आक्षेपे- २३४

उक्रमन्यायप्रवृत्तिस्तत्रैव, यत्र परस्य पूर्वापेक्षा एकवाक्यता च प्रतीयते। प्रत्यक्षागमयोस्तु एकवाक्यताऽभावात् प्रत्यक्षमविगणय्य अद्वैतागमस्यैवापच्छेदन्यायेन स्वार्थबोधकत्वं इत्यस्त्येव विनिगमना। अतएव लोकेपि प्रथमप्रवृत्तं शुक्तिरूप्यप्रत्यक्षमाप्तोपदेशेन बाध्यते इति समाधनवर्णनम्- २३५

३. उपजीव्यत्वेन प्रत्यक्षस्य प्राबल्यशङ्का, तत्परिहारश्च

आगमापेक्षया उपजीव्यत्वेन प्रत्यक्षस्यैव प्राबल्यम्। अपच्छेदशास्त्रयोर्हि न पूर्वं परस्योपजीव्यमिति युक्तः पूर्वस्य परेण बाधस्तत्र। इह तु उपजीव्यत्वात्पूर्वस्य वर्णपदादिस्वरूपविषयकप्रत्यक्षस्य न परेण "नेह नाना" इत्यागमेन बाध इति आक्षेपे- २३६

१. भ्रमप्रमासाधारणमेव प्रत्यक्षमुपजीव्यम्, न तद्वर्णपदादिस्वरूपम्। अतः श्रुत्या स्वरूपोपमर्देपि नोपजीव्यविरोध इति केषाञ्चिन्मतवर्णनम्- २३६

२. निर्विषयवाक्याच्छाब्दबोधानुदयेन वर्णपदादिस्वरूपयोग्यताऽपेक्षायामपि नोपजीव्यविरोधः, मुक्तिपर्यन्तस्थाय्यर्थक्रियाकार्यसद्विलक्षणव्यावहारिकप्रपञ्चस्वरूपस्य मिथ्यात्वाविरोधिनः स्वाधिकरणे संयोगतदत्यन्ताभाववदभ्युपगमादिति मतान्तरनिरूपणम्- २३६

३. "नेह नानेति" श्रुत्या सत्यत्वेनैव प्रपञ्चनिषेधात् स्वरूपेण च तस्यानिषेधान्नोपजीव्यविरोध इति अपरेषां मतोपपादनम्- २३८

४. ब्रह्मणि पारमार्थिकं सत्यत्वं, प्रपञ्चे व्यवहारिकं, शुक्तिरजतादौ प्रातिभासिकं, इति सत्तात्रैविध्यानङ्गीकाराद्ब्रह्मात्मकाधिष्ठानगतमेकमेव पारमार्थिकं सत्त्वं; तदनुवेधादेव घटादौ सर्वत्र सत्प्रतीत्युपपत्तेर्नोपजीव्यवर्णपदादिप्रत्यक्षविरोध इत्यन्येषाम्मतनिरूपणम्- २३९

ब्रह्मगतपारमार्थिकसत्त्वस्यैव प्रपञ्चेपि भानमभ्युपेत्य तद्व्यतिरिक्तसत्त्वाभासाकल्पने व्यवहितसत्यरजतातिरेकेण शुक्तौ रजताभासोत्पत्तिः किमर्थमभ्युपेयते गौरवादिति शङ्कायाम्- २४०

असन्निकृष्टस्यापरोक्ष्यासम्भवात् तन्निर्वाहार्थं गौरवमपि प्रामाणिकत्वान्न दोषायेति तदभ्युपगमः इति समाधानवर्णनम्- २४०

४. प्रतिबिम्बस्वरूपसत्यत्वमिथ्यात्वविचारः

आपरोक्ष्याय रजताभासोत्पत्त्यभ्युपगमे प्रतिबिम्बभ्रमस्थलेऽपि ग्रीवास्थमुखातिरेकेण मुखाभासोत्पत्तिरुपेया स्यात्, इष्टापत्तौ ब्रह्मप्रतिबिम्बजीवस्यापि ततो भेदेन मिथ्यात्वापत्त्या मुक्तिभाक्त्वानुपपत्तिरिति शङ्कायाम्- २४०

१. ग्रीवास्थमुखे दर्पणोपाधिसन्निधानवशाद्दर्पणस्थत्वादिधर्माध्याससम्भवेन न दर्पणे मुखाध्यासः कल्पनीयः, ग्रीवास्थमुखस्यापरोक्ष्यं तु उपाधिप्रतिहतनयनरश्मीनां परावृत्त्य बिम्बग्राहित्वनियमाभ्युपगमात्, इति विवरणोक्तसमाधानवर्णनम्- २४१

२. बिम्बमुखाद्भेदेन तत्सदृशत्वेन चान्यैः पार्श्वस्थैः स्पष्टं निरीक्ष्यमाणं तत्प्रतिबिम्बं ततो भिन्नं स्वरूपतो मिथ्यैव, 'दर्पणे मुखं नास्ति, मिथ्यैवात्र दर्पणे मुखमभात्' इत्यादिसर्वसिद्धबाधाच्च, प्रतिबिम्बजीवस्य स्वरूपतो मिथ्यात्वेऽपि अधिष्ठानात्मना सत्यतया मुक्तिभाक्त्वोपपत्तिः, विद्यारण्यप्रभृतीनामप्यभिमतोऽयं पक्षः-इति अद्वैतविद्याकृन्मतोपपादनम्, उक्तमतविमर्शनं **टीकायाम्** 'बिम्बाद्भिन्नं प्रतिबिम्बं सत्यं छायाविशेषरूपं' इति माध्वमतस्य निरसनम्- २४३

प्रतिबिम्बस्य मिथ्यात्ववादे हि शुक्तिरजतादेरिव तस्यापि अन्वयव्यतिरेकशालि अज्ञानमुपादानं, तन्निवर्तकं ज्ञानं च वाच्यम्। तच्चोभयं न सम्भवति, दर्पणादिरूपाधिष्ठानसाक्षात्कारेणाज्ञानस्य निवृत्तत्वानिवृत्तत्वाभ्यामनिरूपणादिति आक्षेपे- २५२

१. शुक्तिरजताद्यध्यासवत् न प्रतिबिम्बाध्यासे केवलाधिष्ठानावारकमज्ञानमुपादानम्, न वाऽधिष्ठानविशेषांशज्ञानं निवर्तकम्। किन्तु आवरणशक्तिमदज्ञानस्य अधिष्ठानज्ञानेन निवृत्तावपि विक्षेप-

शक्तिमदज्ञानस्य अनिवृत्तत्वात्तदेवोपादानम्। बिम्बोपाध्योः सन्निधिनिवृत्तिसहितं 'दर्पणे मम मुखं नास्तीति' ज्ञानमेव प्रतिबिम्बाध्यासस्य निवर्तकमिति केषाञ्चित्समाधानवर्णनम्- २५२

२. दर्पणाद्युपादानभूतं मूलाज्ञानमेव प्रतिबिम्बाध्यासस्याप्युपादानम्। बिम्बोपाधिसन्निधिनिवृत्तिसहकृतमधिष्ठानज्ञानं तस्य निवर्तकम्। निवृत्तिश्च नाश एव न तु बाधः। मूलाज्ञानकार्यत्वेपि प्रतिबिम्बाध्यासस्य अविद्यातिरिक्तबिम्बसन्निधानरूपदोषजन्यत्वात् स्वप्नाध्यासवत् प्रातीतिकत्वमपीति अन्येषां समाधानस्योपपादनम्- २५२

५. स्वप्नाध्यासोपादानविचारः

स्वप्नाध्यासस्य किमुपादानमिति जिज्ञासायाम् २५६

१. स्वप्नजाग्रत्प्रपञ्चयोरेकाज्ञानकार्यत्वप्रतिपादकप्राचीनवचनानुरोधात् स्वप्नाध्यासस्यापि मूलाज्ञानकार्यत्वमेव, बाधश्च ब्रह्मज्ञानेनैव, **अविद्यातिरिक्तनिद्रादिदोषजन्यतयैव प्रातिभासिकत्वं** इति केषाञ्चिन्मतवर्णनम्- २५६

२. स्वप्नाध्यासस्य मूलाज्ञानकार्यत्वेपि **ब्रह्मज्ञानेतरजाग्रद्बोधबाध्यत्वात् प्रातिभासिकत्वं** रज्जुसर्पाध्यासस्येव स्वानन्तरोत्पन्नदण्डभ्रमबाध्यस्य इत्यन्येषाम्मतवर्णनम्- २५६

३. जाग्रत्प्रपञ्चं तद्द्रष्टारं चावृत्य जायमानो निद्रारूपो मूलाज्ञानावस्थाभेदः स्वप्नाध्यासस्योपादानम्, स्वप्नपञ्चस्य तद्द्रष्टुः प्रातिभासिकजीवस्य चाधिष्ठानभूतव्यावहारिकजीवयाथात्म्यज्ञानेन निवृत्तिः। प्रातिभासिकजीवस्य व्यावहारिकजीवे ऽध्यस्ततया तादात्म्यसत्त्वात् प्रातिभासिकजीवानुभवेन व्यावहारिकजीवस्य तदनुसन्धातृत्वोपपत्तिरिति अपरेषाम्मतनिरूपणम्- २५७

६ स्वप्नाध्यासाधिष्ठानविचारः

अनवच्छिन्नचैतन्यस्य स्वप्नप्रपञ्चाधिष्ठानत्वे स्वाप्नगजादेर्बाह्यदेशस्थत्वं वक्तव्यम्, तथा च तस्य विच्छिन्नदेशत्वेन न साक्षिभास्यत्वम्, इन्द्रियाणामुपरतत्वाच्च, अहङ्कारोपहितचैतन्यस्याधिष्ठानत्वे अहं गजो गजवानिति वा धीप्रसङ्गः-इत्याक्षेपे- २५९

१. अहङ्कारानवच्छिन्नमान्तरमीश्वरचैतन्यं बिम्बात्मकं स्वाप्नप्रपञ्चस्याधिष्ठानं देहान्तरिन्द्रियानपेक्षं स्वतन्त्रान्तःकरणवृत्त्यभिव्यक्तं अवभासकं-इति मतेन समाधानम्- २५९

२. अविद्यायां प्रतिबिम्बभूतं जीवचैतन्यं स्वतो ऽपरोक्षमहङ्कारानवच्छिन्नं स्वाप्नप्रपञ्चस्याधिष्ठानम्। स्वाप्नगजादौ 'अहं इदं पश्यामि' इत्यादिव्यवहारस्तु प्रमातुः अहङ्कारानवच्छिन्नाधिष्ठानचैतन्यगोचरान्तःकरणादिवृत्तिकृताभेदाभिव्यक्त्या इति मतान्तरेण समाधानोपपादनम्- २६०

३. अहङ्काराद्युपहितजीवचैतन्यमेवाधिष्ठानम्, नत्वहङ्कारविशिष्टम्। अतो न अहं गज इत्याद्यनुभवापत्तिरिति द्वितीयपक्षेण समाधानम्, द्वितीयपक्षप्रवृत्तौ बीजप्रदर्शनं टीकायाम्- २६२

४. शुक्तिरूप्यस्थलेऽपि वृत्तिमदन्त:करणप्रतिबिम्बितशुक्तीदमंशावच्छिन्नचैतन्ये शुक्तिरजताद्यध्यस्यते, न तु सर्वसाधारणबिम्बचैतन्ये, सुखादिवदनन्यवेद्यत्वादिति अतिदेशनम्- २६२

५. इदमंशावच्छिन्नबिम्बभूतब्रह्मचैतन्य एव शुक्तिरूप्याध्यास:, तत्तदविद्याश्रयपुरुषग्राह्यत्वात्तस्यैव प्रत्यक्षं नान्यस्येत्यनन्यवेद्यत्वं-इति इतरेषाम्मतनिरूपणम्- २६३

७. स्वाप्नपदार्थज्ञानस्य अनैन्द्रियकत्वनिरूपणम्

स्वाप्नपदार्थेषु चाक्षुषत्वानुभव: कथमुपपन्न इति प्रश्ने- २६३

स्वप्ने चक्षुरादीन्द्रियाणामुपरतत्वात् श्रुत्यादौ तथैव प्रतिपादनाच्च चाक्षुषत्वानुभवो भ्रम एवेति उत्तरवर्णनम्- २६३

८. दृष्टिसृष्टिवादनिरूपणम्

कल्पितस्याज्ञातसत्त्वाभावात् दृष्टे: पूर्वं घटाद्यभावेन जाग्रदर्थानुभवस्यापि स्वाप्नवदेव अनैन्द्रियकत्वात् केवलसाक्षिरूपत्वमिति दृष्टिसृष्टिवादोपक्षेप:- २६८

दृष्टिसृष्टिवादे साविद्यस्य प्रपञ्चजातस्य कल्पकाभावात् संसारानुपलब्धिप्रसङ्ग इति शङ्कायाम्- २६८

१. अविद्योपहित: कल्पक:, अनिदम्पूर्वकत्वेन कल्पककल्पनाप्रवाहस्यानादित्वात् पूर्वपूर्वकल्पिताविद्योपहित उत्तरोत्तराविद्याकल्पक:। स्वप्ने इव जागरेऽपि किञ्चित्सादित्वेन किञ्चिदनादित्वेन च कल्प्यत इति साधनादिविभागोपपत्तिश्च-इति समाधानवर्णनम्- २६९

२. तत्रैव-अविद्यादेरनादित्वान्न तत्कल्पक आत्मा, किन्त्वेतद्व्यतिरिक्तप्रपञ्चस्यैवेति मतान्तरनिरूपणम्- २७०

३. दृष्टिसमसमया विश्वसृष्टिरिति वाद उक्त:। दृष्टिरेव विश्वसृष्टिरिति दृष्टिसृष्टिवादान्तरनिरूपणम्- २७२
दृष्टिसृष्टिवादे वियदादिसर्गतत्क्रमप्रतिपादकश्रुतीनां अप्रामाण्यशङ्का, तत्समाधानञ्च

९. द्विविधदृष्टिसृष्टिवादाद्विलक्षणसृष्टदृष्टिवादनिरूपणम्

सृष्टे:=श्रुत्युक्तक्रमेण ईश्वरसृष्टेऽज्ञातसत्ताके प्रपञ्चे, दृष्टि:=तत्तद्विषयप्रमाणावतरणेन तस्य तस्य ज्ञानं सृष्टदृष्टि:। अस्मिन्मते प्रपञ्चस्य कल्पनासमसमयत्वाभावेऽपि ज्ञानैकनिवर्त्यतया वा, सदसद्विलक्षणतया वा, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगितया वा, मिथ्यात्वसिद्धिवर्णनम्- २७२

मिथ्यात्वस्य एवंरूपत्वे वियदादेरिव अहङ्कारतद्धर्माणां मिथ्यात्वं अप्रातिभासिकत्वेऽपि सिद्धयतीति भाष्यटीकाविवरणेषु तत्प्रातिभासिकत्वसाधनाय कारणत्रयसम्पादनं व्यर्थमिति शङ्कायाम्- २७४

१. अहङ्कारादीनामपि केवलसाक्षिभास्यतया शुक्तिरजतादिवत् प्रातिभासिकत्वस्य सिद्धत्वात् न कारणत्रितयसम्पादनवैयर्थ्यमिति चित्सुखाचार्याभिमतभाष्याद्याशयवर्णनम्- २७४

२. अहङ्कारादीनां साक्षिवेद्यत्वेऽपि व्यवहारदशायां बाधानुपलम्भाद्व्यावहारिकत्वमेव, विवरणे कारणत्रितयसम्पादनं तु तत्प्रातिभासिकत्वमभ्युपेत्येति रामाद्वयाचार्यमतवर्णनम्- २७४

१० मिथ्याभूतस्यार्थक्रियाकारित्वविचारः

दृष्टिसृष्टिवादे सृष्टदृष्टिवादे च जाग्रत्प्रपञ्चस्य मिथ्यात्वेन सम्प्रतिपन्नत्वात् कथमर्थक्रियासमर्थत्वमिति आक्षेपे-

१. यथा स्वाप्नजलाद्यवगाहनादिरूपस्वसमानसत्ताकार्थक्रियाकारित्वं सर्वसम्प्रतिपन्नं प्रातिभासिकपदार्थानां सत्यार्थक्रियाकारित्वाभावेपि, एवं जाग्रत्प्रपञ्चस्यापि परमार्थसत्यत्वाभावेऽपि स्वसमानसत्ताकार्थक्रियाकारित्वं समानमिति केषाञ्चित्समाधानस्य वर्णनम्- २७४

२. असत्यस्य सत्यार्थक्रियाकारित्वमपि सम्भवति, प्रातिभासिकस्वप्नभुजङ्गमाङ्गनादीनां प्रबोधाबाध्यभयकम्पसुखादिव्यावहारिकार्थक्रियाया अपि जनकत्वदर्शनादिति अद्वैतविद्याचार्यमतोपपादनम्- २७५

३. स्वाप्नपदार्थानामिव जागरेऽपि आलोकवत्यपवरके सद्यःप्रविष्टपुरुषकल्पितसन्तमसस्यापि अर्थक्रियाकारित्वं दृश्यत इति अन्येषाम्मतोवर्णनम्- २७६

४. अर्थक्रियाकारित्वे न सत्यत्वं प्रयोजकम्, अपि तु तत्तत्स्वरूपमात्रम्, मरीच्युदकशुक्तिरजतादेः प्रसिद्धोदकाद्युचितार्थक्रियाकारित्वापादनं तु उदकत्वादिजात्यभावात् निराकरणीयमिति तत्त्वशुद्धिकारानुयायिमतवर्णनम्- २७७

५. मरीच्युदकादावपि उदकत्वादिजातिरस्ति, तदर्थिप्रवृत्तिरूपाऽर्थक्रिया च दृश्यते, अतो न सत्यत्वमर्थक्रियाकारित्वप्रयोजकम्, नहि सर्वा अर्थक्रिया सर्वत्र भवति, क्वचित्कासाञ्चिदेवार्थक्रियाणामिष्यमाणत्वादिति-इतरेषाम्मतोपपादनम्- २७७

११. प्रपञ्चमिथ्यात्वमिथ्यात्वसमर्थनम्

ननु प्रपञ्चगतमिथ्यात्वरूपधर्मस्य सत्यत्वे ब्रह्मणोऽद्वितीयत्वहानिः, मिथ्यात्वेऽपि च प्रपञ्चसत्यत्वापत्त्या अद्वैतक्षतिरेवेति आक्षेपे- २७९

१. मिथ्यात्वस्य मिथ्यात्वेऽपि न प्रपञ्चसत्यत्वापत्तिः। प्रपञ्चसमानसत्ताकं हि मिथ्यात्वम्। तच्च धर्मिणः सत्यत्वप्रतिक्षेपकम्, स्वाश्रयसमसत्ताकधर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वात्। एकसत्तापक्षे तु स्वाश्रयसाक्षात्कारानिवर्त्यधर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वमिति, कल्पितमपि प्रपञ्चमिथ्यात्वं प्रपञ्चसाक्षात्कारानिवर्त्यत्वात् सत्यत्वप्रतिक्षेपकमेव। ब्रह्मनिष्ठसप्रपञ्चत्वं तु ब्रह्मसाक्षात्कार-निवर्त्यत्वान्न निष्प्रपञ्चत्वप्रतिक्षेपकमिति—अद्वैतदीपिकाकृत्समाधानोपपादनम्- २७९

१२. जीवब्रह्मभेदनिरसनम्

वियदादिप्रपञ्चस्य मिथ्यात्वे सिद्धेऽपि सुखदुःखादिव्यवस्थया परस्परभिन्नानां जीवानामेकेन ब्रह्मणै-क्यासम्भवात् तेषामपवर्गभाक्त्वेन सत्यत्वाच्च नाद्वैतसिद्धिरिति आक्षेपे— २८२

१. न हि जीवानां सच्चिदाद्यात्मनां परस्परं भेदः सम्भवति, प्रमाणाभावात्, सुखदुःखादिव्यवस्थाया-स्तूपाधिभेदादेवोपपत्तेरिति समाधानम्- २८२

१३. ऐकात्म्यवादे सुखदुःखतदनुभवादिव्यवस्थोपपादनम्

उपाधिभेदेऽप्यात्मनोऽभेदानपायात् कथं सुखदुःखादिव्यवस्था सिद्ध्यतीति आक्षेपे— २८३

१. श्रुतिभिश्चिन्मात्रस्यात्मन औदासीन्यप्रतिपादनात् अन्तःकरणस्यैव सुखदुःखाद्यखिलानर्था-श्रयत्वप्रतिपादनाच्च तद्भेदादेव सुखदुःखादिव्यवस्था सिद्ध्यति। 'अहङ्कर्ता सुखी' इत्यादिव्यवहारः कर्तृत्वादिबन्धाश्रयाहङ्कारतादात्म्याध्यासाधिष्ठानत्वेन। तत्तदन्तःकरणभेदेन तत्तदुपहितस्य साक्षि-णोऽपि सुखदुःखाद्यनुभवरूपस्य भेदात् तद्व्यवस्थोपपत्तिश्च-इति केषाञ्चित्समाधानस्योपपादनम्- २८३

२. जडस्य कर्तृत्वादिबन्धाश्रयत्वानुपपत्तेः चेतनस्य कर्तृत्वाद्याश्रयत्वप्रतीतेश्चिदाभास एव तदाश्रयः। तस्य चोपाधिभेदेन भेदात् सुखदुःखादिव्यवस्थोपपत्तिः। स्वरूपतः सत्यतया मुक्त्यन्वयिनि परमार्थजीवे चिदाभासस्याध्यस्तत्वात् कर्तृत्वाद्याश्रयचिदाभासतादात्म्याध्यासाधिष्ठानत्वरूपबन्धस्य न मोक्षवैयधिकरण्यम्-इत्यन्येषांमतवर्णनम्- २८५

३. "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इत्यादिश्रुत्या देहादिविशिष्टस्यैव भोक्तृत्वश्रवणात् देहादिभेदेन तद्विशिष्टभेदाद्व्यवस्था, विशिष्टगतबन्धस्य विशेष्यान्वयिनो मुक्त्यन्वयिनि केवलात्मन्य-प्यन्वयः सिद्ध इति बन्धमुक्त्योर्न वैयधिकरण्यमिति मतान्तरवर्णनम्- २८६

४. शुद्धचिन्मात्रात्मैव कर्तृत्वादिबन्धाश्रयः, स्फटिकलौहित्यन्यायेन कर्तृत्वाद्याश्रयान्तःकरणसान्निध्यात् आत्मनि कर्तृत्वाद्यन्तरस्याध्यासः, आत्मन एकत्वेऽप्युक्तोपाधिभेदात् सुखदुःखादिव्यवस्थोपपत्तिः, एकस्मिन्वृक्षे मूलाग्रोपाधिभेदमात्रेण संयोगतदभावव्यवस्थादर्शनात्, एकस्याप्याकाशस्य कर्ण-शष्कुल्याद्युपाधिभेदेनैव श्रोत्रेन्द्रियत्वाद्यापन्नस्य पुरुषभेदेन विचित्रशब्दज्ञानजनकत्वदर्शनाच्च अन्यभेदादन्यतव्यवस्थोपपत्तिः—इति मतान्तरवर्णनम्- २८६

५. आश्रयभेदादेव विरुद्धधर्मव्यवस्थेति नियमेऽपि कल्पितान्तःकरणरूपोपाधिभेदेन नानात्वमापन्नजीवरूपाश्रयभेदादेव सुखदुःखादिव्यवस्था इतिमतनिरूपणम्- २८६

१४. उक्तव्यवस्थोपपादकोपाधिभेदविचारः

जीवानां परस्परं सुखदुःखाद्यननुसन्धानप्रयोजकः कोऽसावुपाधिरिति जिज्ञासायाम्- २८८

१. भोगायतनस्य देहतदवयवहस्तादिरूपस्य भेद एव तदननुसन्धानप्रयोजकोपाधिरिति केषाञ्चिन्मतवर्णनम्- २८८

२. विश्लिष्टोपाधिभेद एवाननुसन्धानप्रयोजकः। विश्लेषश्च एकस्मिन्नवयविनि अवयवभावेन अननुप्रवेशः, मातृतद्गर्भस्थशरीरयोः विश्लिष्टत्वादेव न गर्भगतस्य मातृसुखाद्यनुसन्धानप्रसङ्गः, करचरणादीनां संश्लिष्टत्वादेवेतरेतरानुसन्धानसिद्धिः, अदृष्टविशेषासहकृतस्य भोगायतनभेदादेरननुसन्धानप्रयोजकत्वस्य विवक्षितत्वात् न योगिजातिस्मरादिषु व्यभिचारः—इति मतान्तरवर्णनम्- २८९

३. प्रत्यभिज्ञानायोग्यशरीरभेद एवाननुसन्धानप्रयोजकोपाधिः इत्यपरेषाम्मतोपपादनम्- २९०

४. अन्तःकरणरूपोपाधिभेद एवाननुसन्धानप्रयोजक इति मतान्तरस्य पूर्वोक्तस्य स्मारणम्- २९१

५. जीवोपाधिभूताज्ञानानि नाना, तद्भेद एवाननुसन्धानप्रयोजक इति एकेषां मतवर्णनम्- २९१

६. विभ्वात्मनानात्ववादे सुखदुःखादिव्यवस्थाया उपाधिभेदं विना दुरुपपादत्वनिरूपणम्- २९१

जीवाणुत्ववादोपक्षेपः, तन्निरसनञ्च

१. जीवा अणवः, तदीया ज्ञानसुखादिगुणा व्यापिनः, जीवाः सांशाः

एवञ्च सति सुखदुःखादिव्यवस्था, तदनुसन्धानव्यवस्था, एकस्य सुखदुःखादियौगपद्यं, इत्यादिसर्वोपपत्तिः जीवेश्वरभेदानुभवोपपत्तिश्चेति—जीवाणुत्ववादिनां परेषां आशयवर्णनम्- २९३

२. अद्वैतदीपिकोक्तस्य जीवाणुत्ववादेऽपि उक्तव्यवस्थादेर्दुरुपपादत्वस्य समर्थनारम्भः २९४

तत्र जीवस्याणुत्वसांशत्वकल्पनेऽपि भेद एवाननुसन्धानप्रयोजको वक्तव्यः, स च भेदसामान्यं वा भेदविशेषोवा? विशेषश्च भेदस्य अंशांशिभावासहचरितत्वं वा अभेदासहचरितत्वं वा—इत्यादिविकल्पनेन जीवाणुत्ववादे व्यवस्थायाः दुरुपपादत्वप्रतिपादनम्- २९४

३. जीवानां अणुत्वेऽपि निरंशत्वमाश्रित्य परकीयप्रत्यवस्थानं तद्दूषणञ्च;

परमते ब्रह्मजीवयोः विभुत्वाणुत्वव्यवस्थाया दुरुपपादत्वनिरूपणम्- २९८

५. जीवेश्वरयोरुभयोः विभुत्वाणुत्वबोधकश्रुत्यादीनां अविरोधेनार्थवर्णनम्, अद्वितीये ब्रह्मणि वेदान्तसमन्वयस्य अविरोधोपपादनोपसंहारेण द्वितीयपरिच्छेदसमापनञ्च- ३००

तृतीयपरिच्छेदः

१. मुक्तिसाधननिरूपणम्

तच्च वेदान्तप्रतिपाद्यं ब्रह्म ज्ञानेनैवाप्यते स्वकण्ठाभरणवत्। नित्यसिद्धब्रह्मस्वरूपस्यापि सतः स्वाज्ञानमेव स्वस्वरूपाप्राप्तिरिति तदज्ञाननिवृत्तिरूपस्वप्राप्तौ ज्ञानमेव केवलं साधनं नान्यदिति श्रुतिस्मृत्यादिभिर्निश्चितत्वात्। क्रियात्मकानां कर्मोपासनानां तु परम्परया ब्रह्मावाप्तौ साधनता, एतादृशसाधनतैव ब्रह्मप्राप्तिसाधनतास्मृतेरर्थः, इति मुक्तेर्ज्ञानैकसाधनकत्वोपपादनम्- ३०३

२. कर्मणां विविदिषाविद्याफलकत्वविचारः

कर्मणां कथं क्वोपयोग इति जिज्ञासायां—

१. प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येन' इति न्यायेन प्रत्ययार्थस्य प्राधान्यात् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिश्रुतौ यज्ञादीनां विद्यासम्पादनद्वारा ब्रह्मप्राप्त्युपायभूतायां विविदिषायामुपयोग इति भामतीकृन्मतोपपादनम्- ३०३

२. 'इच्छेष्यमाणसमभिव्याहारे इष्यमाणस्यैव प्राधान्यम्, नत्विच्छायाः' इति विशेषन्यायेन इष्यमाणे प्रकृत्यर्थभूते ज्ञाने एव यज्ञादीनामुपयोग इति विवरणानुसारिमतोपपादनम्- ३०५

'तमेतं' इत्यादिश्रुत्युक्तविनियोगः किं सामान्येन सर्वेषां कर्मणाम्, उत आश्रमकर्मणामेवेति संशये-

१. वेदानुवचन-यज्ञ-दान-तपआद्याश्रमत्रयधर्मप्रतिपादकश्रुत्यनुसारं **सर्वाश्रमकर्मणामेव** विद्योपयोग इति केषाञ्चित्पक्षोपपादनम्- ३०८

२. 'अन्तरा चापि तु तद्दृष्टेः' इत्यधिकरणोक्तरीत्या नाश्रमधर्माणामेव विद्योपयोगः, किन्तु **विधुराद्यनुष्ठितकर्मणामपि**। परन्तु 'विशेषानुग्रहश्च' इति सूत्रभाष्ययोः तदनुष्ठितजपादि-**नित्यकर्मणां** विद्योपयोगः स्पष्टमुक्तः। तत्फलस्य दुरितक्षयस्य विद्ययाऽपेक्षितत्वादिति कल्पतरुकृन्मतोपपादनम्- ३०९

३. यज्ञादिशब्दानां नित्ययज्ञादिष्विव काम्ययज्ञादिष्वपि रूढत्वाविशेषात् नित्यानामिव **काम्यानामपि** श्रुत्या विनियोगो भातीति नित्यकाम्यसाधारण एवायं विनियोग इति संक्षेपशारीरकमतप्रतिपादनम् ३१०

३. विद्यार्थकर्मसु अधिकारिचिन्ता

विविदिषाद्वारा विद्यायां विनियुक्तानां कर्मणां ब्राह्मणमात्राधिकारिकत्वं विविदिषावाक्ये ब्राह्मणपदमात्रस्य श्रवणादिति आक्षेपे-

१. विविदिषावाक्यस्थब्राह्मणपदस्य विद्याधिकारिमात्रोपलक्षणत्वेन क्षत्रियादीनामपि विद्यार्थकर्मस्वधिकारः इति समाधानम्- ३१३

ब्राह्मणपदस्य विद्याधिकारिमात्रोपलक्षणत्वे शूद्रस्यापि विद्यायामर्थित्वरूपाधिकारिविशेषणसम्भवात् विद्यार्थकर्मसु शूद्रस्याप्यधिकारप्रसङ्ग इति शङ्कायां- ३१६

१. अपशूद्राधिकरणन्यायेन अध्ययनगृहीतवेदजन्यवेदार्थज्ञानस्य वेदार्थानुष्ठाने नियमितत्वात् अध्ययनशून्यशूद्रस्य तदभावात् न सगुणनिर्गुणविद्यानुष्ठानेष्वधिकार इति तत्तुल्यतया विद्यार्थकर्मस्वप्यधिकारो नास्तीति केषाञ्चिन्मतनिरूपणम्- ३१६

२. वेदानुवचनाग्निहोत्राद्यसम्भवेऽपि शूद्रस्य विद्यार्थकर्मसु स्ववर्णोचितेषु स्मार्तपौराणिकागमिकेषु श्रीपञ्चाक्षरजपपाकयज्ञद्विजशुश्रूषानामकीर्तनतीर्थस्नानसत्याक्रोधशौचाचमनार्थपाणिपादप्रक्षालनश्राद्धकर्मभृत्यभरणस्वदारतुष्ट्यादिष्वधिकारस्मरणादस्त्येवाधिकारः, निषेधवचनानां सगुणनिर्गुणविद्यासाधनवेदान्तश्रवणादिष्वधिकारनिषेधपरत्वम्, विद्यार्थजपादिकर्मानुष्ठानं विद्योत्पत्तियोग्यविमलदेवशरीरनिष्पादनद्वारा मुक्त्यर्थं वा वेदान्तश्रवणयोग्यत्रैवर्णिकशरीरनिष्पादनद्वारा विद्यार्थं वा भविष्यतीति अन्येषाम्मतोपपादनम्- ३१६

४. संन्यासोपयोगादिविचारः

कर्मणां विद्योपयोगे कर्मसंन्यासस्य विद्योपयोगः कथं सम्भवेत्, यदि सम्भवति किं दृष्टद्वारा उतादृष्टद्वारेति शङ्कायाम्- ३१९

१. विद्योत्पत्तिप्रतिबन्धकदुरितानि द्विविधानि यज्ञाद्यपूर्वनिवर्त्यानि संन्यासापूर्वनिवर्त्यानि चेत्यतः संन्यासापूर्वमपि कर्मवत् विद्यायामुपयुज्यते । अत एव गृहस्थाद्यसन्न्यासिकृतवेदान्तश्रवणादि इह जन्मनि जन्मान्तरे वा संन्यासापूर्वजनितदुरितक्षयमपेक्ष्यैव विद्यां जनयेत् । संन्यासानधिकृतक्षत्रियादीनां तु पूर्वजन्मानुष्ठितसंन्यासमहिम्ना इह जन्मन्यपि विद्या जायेतेति केषाञ्चिन्मतेन समाधानम्- ३१९

२. उपरतिशब्दितस्य सन्न्यासस्य 'शान्तो दान्त उपरतः' इति साधनचतुष्टयान्तर्गतत्वेनाधिकारिविशेषणताया उक्तत्वात् त्यागलक्षणक्रियारूपस्य तस्य स्वरूपेणानुवृत्त्ययोगात् अपूर्वद्वारैव विद्योपयोग इति अन्येषाम्मतवर्णनम्- ३२०

३. 'दृष्टद्वारे सम्भवत्यदृष्टकल्पनायोगः' इतिन्यायात् सन्न्यासस्य विक्षेपाभावरूपदृष्टद्वारा श्रवणाङ्गत्वेन आत्मज्ञाने उपयोगः । यदि इतराश्रमिणोऽपि सात्विकस्य विषयदोषदृष्ट्या जितेन्द्रियस्य कर्मच्छिद्रेषु वेदान्तश्रवणादि संभवः, तदा सन्न्यासिनैव श्रवणादि कर्तव्यमिति तत्र नियमविधिरभ्युपेय इति अपरेषां मतनिरूपणम्- ३२१

'ब्राह्मणो व्युत्थाय' इत्यदिश्रुतिषु ब्राह्मणपदग्रहणेन, सन्न्यासस्य श्रवणाद्यङ्गत्वेन विधौ श्रवणाधिकारिविशेषणत्वे च ब्राह्मणमात्राधिकारिकत्वप्रतीतेः, तद्रहितयोः क्षत्रियवैश्ययोः कथं वेदान्तश्रवणाद्यनुष्ठानमिति आक्षेपे- ३२२

F

१. "यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा" इत्यादिसाधारणश्रुत्या, क्षत्रियवैश्ययोरपि सन्न्यासाधिकारस्य सिद्धत्वेन, श्रुत्यन्तरेषु ब्राह्मणग्रहणं त्रयाणामुपलक्षणार्थमिति केषञ्चिन्मतेन समाधानम्- ३२३

२. सर्वेषु सन्न्यासविधायकश्रुतिवाक्येषु ब्राह्मणग्रहणात् "यदि वेतरथा" इत्यादिजाबालश्रुतौ ब्राह्मणपदाभावेपि बहुश्रुत्यन्तरसिद्धब्राह्मणाधिकारिकत्वमेव सन्न्यासस्य वक्तव्यम्। एवंच ब्राह्मणानामेव श्रवणाद्यङ्गत्वेन सन्न्यासविधानम्, नेतरयोः। तयोस्तन्निरपेक्षमेव श्रवणाद्यधिकारो देववदिति अन्येषाम्मतोपपादनम्- ३२३

३. "ब्रह्मसंस्थोऽमृतत्वमेति" इत्यादिश्रुतौ, सर्वदाऽमृतत्वकामस्य ब्रह्मण्यनन्यव्यापारतया विचारविधानात्, तस्य च सन्न्यासं विनाऽसम्भवात्, सन्न्यासिन एव श्रवणे मुख्याधिकारः। देवानामनुष्ठेयकर्माभावेन तत्सन्न्यासाभावेपि मुख्याधिकार एव। इतरयोः शूद्रवत्प्रतिषेधाभावात् विधुरादीनामिव वेदान्तश्रवणेऽमुख्योऽधिकारः सन्न्यासाभावात्, जन्मान्तरे तदीयश्रवणस्य विद्याजनकत्वमिति अपरेषाम्मतोपपादनम्- ३२५

अमुख्याधिकारिकृतवेदान्तविचारस्य जन्मान्तरे विद्याजनकत्वं न सङ्गच्छते, दृष्टफलभूतवाक्यार्थावगत्यर्थत्वाद्विचारस्य, सन्न्यासरूपशास्त्रीयाङ्गविधुरस्य श्रवणस्य अदृष्टानुत्पादकत्वेन अदृष्टद्वाराजनकत्वासम्भवाच्च-इति शङ्कायां- ३२८

१. अमुख्याधिकारिणाऽपि विविदिषुणा क्रियमाणं वेदान्तश्रवणं विविदिषोत्पादकयज्ञाद्यनुष्ठानजन्यापूर्वद्वारा जन्मान्तरीयायामपि विद्यायामुपकारं करोतीति केषाञ्चिन्मतवर्णनम् ३२९

श्रवणादौ विध्यभावपक्षे सन्न्यासिना क्रियमाणस्यापि श्रवणस्यैहिकविद्याजननेऽदृष्टानपेक्षत्वेपि प्रतिबन्धे सति जन्मान्तरे तस्य विद्याजनने यज्ञाद्यनुष्ठानजन्यादृष्टमेव द्वारमेष्टव्यमिति उक्तमतस्योपष्टम्भनम् ३२९

२. नियमविधिपक्षेऽपि यावद्ब्रह्मज्ञानोदयमावर्त्यमानमेव श्रवणं नियमादृष्टं जनयति, न तु फलपर्यन्तश्रवणावृत्तेः प्राक्, इत्यतोऽस्मिन्पक्षेपि पूर्वोक्तनियमादृष्टकल्पनाप्रकारेणैव निर्वाहः कर्तव्य इति विवरणाचार्याशयवर्णनम्- ३२९

३. दृष्टार्थस्यैव श्रवणस्य "दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात्। गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेत्-इत्यादिवचनप्रामाण्यात् स्वतन्त्रादृष्टोत्पादकत्वमप्यस्तीति श्रवणादृष्टमहिम्नैवामुष्मिकविद्योपयोगित्वमिति मतान्तरनिरूपणम् ३३०

५. **पूर्वोक्तसाङ्ख्यमार्गरूपश्रवणादावशक्तस्य मन्दाधिकारिणो मुमुक्षोर्विद्याप्राप्तौ उपायनिरूपणम्**

'तत्कारणं साङ्ख्ययोगाभिपन्नम्' "यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥" इत्यादि-

श्रुतिस्मृतिप्रामाण्यात् साङ्ख्यानां विद्यावासौ मनननिदिध्यासनसहकृतश्रवणात्मकवेदान्तविचार इव मन्दानां योगशब्दितं निर्विकल्पकब्रह्मध्यानमपि आनन्दादिभिरस्थूलादिभिश्चोपलक्षितमखण्डैकरसमद्वितीयंब्रह्माहमस्मीत्येवम्भूतं अविसंवादिभ्रमन्यायेन ब्रह्मसाक्षात्कारे कारणम् ॥ अयमत्र विशेषः—बुद्धिमान्द्यादिप्रतिबन्धकाभावे पुरुषधौरेयस्य श्रवणादिना ब्रह्मसाक्षात्कारो झटिति सिद्धयतीति साङ्ख्यो मार्गो मुख्यः कल्पः । मन्दानां तु केवलनिर्गुणोपास्त्या विलम्बेन सिद्धयतीति योगमार्गोऽनुकल्प इति श्रीविद्यारण्यस्वामिसम्मतोपायोपपादनम्- ३३१

६. ब्रह्मसाक्षात्कारे करणविचारः

अस्मिन्साङ्ख्ययोगपक्षद्वयेपि ब्रह्मसाक्षात्कारे किं करणमिति जिज्ञासायाम्- ३३६

१. योगमार्गे प्रत्ययाभ्यासरूपप्रसङ्ख्यानस्य, साङ्ख्यमार्गे निदिध्यासनरूपप्रसङ्ख्यानस्य च करणत्वम्-प्रसङ्ख्यानस्य च करणत्वं कामातुरस्य व्यवहितकामिनीसाक्षात्कारे क्लृप्तम्, प्रसङ्ख्यानस्य वेदान्तप्रमाणमूलकतया तज्जन्यस्य ब्रह्मसाक्षात्कारस्य प्रमात्वम्-इति केषाञ्चित्पक्षोपपादनम्- ३३६

२. मन एव प्रसङ्ख्यानसहकृतं ब्रह्मसाक्षात्कारे करणम् । कामातुरकामिनीसाक्षात्कारादावपि प्रसङ्ख्यानसहकृतं मन एव करणमिति दृष्टमिति अन्येषाम्मतोपपादनम्- ३३८

३. "तन्त्वौपनिषदम्पुरुषम्" इत्यादिश्रुतिषु ब्रह्मण उपनिषदेकसमधिगम्यत्वश्रवणात् योगमार्गेण साङ्ख्यमार्गेण वा दृष्टादृष्टलक्षणसकलप्रतिबन्धक्षये सति अप्रतिबद्धं सदौपनिषदं महावाक्यमेव ब्रह्मसाक्षात्कारे करणम्, न मनः, "यन्मनसा न मनुते" इत्यादिनिषेधश्रवणादिति अपरेषाम्मतोपपादनम्- ३३९

७. शाब्दापरोक्षसमर्थनम्

करणनिबन्धनत्वादपरोक्षत्वस्य परोक्षज्ञानजनकत्वस्वभावस्य शब्दस्य महावाक्यस्य कथमपरोक्षब्रह्मज्ञानजनकत्वमिति शङ्कायाम्- ३४०

१. स्वतोऽसमर्थोपि शब्दः श्रवणमनननिदिध्यासनजनितसंस्कारलब्धब्रह्मैकाग्र्यवच्चित्तानुगृहीतः सन् अपरोक्षमपि ज्ञानं जनयत्येव । "तरति शोकमात्मवित्" इति श्रुतौ शोकोपलक्षितकर्तृत्वाद्यध्यासस्य अपरोक्षस्य अपरोक्षात्मज्ञाननिवर्त्यत्वप्रतिपादनात्, अन्यथा तस्य परोक्षस्य अपरोक्षभ्रमनिवर्तकत्वायोगात्, औपनिषदे ब्रह्मणि वेदेतरप्रमाणासम्भवात् श्रुतिषु ज्ञानादेव कैवल्यश्रवणाच्च शब्दस्य अपरोक्षज्ञानकरणत्वं शास्त्रप्रामाण्यात्स्वीकर्तव्यमिति केषाञ्चित्समाधानवर्णनम्- ३४०

२. बहिरसमर्थस्यापि मनसो ध्यानाभ्याससाहाय्यात् नष्टवनितासाक्षात्कारजननकत्वं दृष्टम्, तद्वत् निदिध्यासनसहकृतशब्दस्यापि अपरोक्षज्ञानजनकत्वं युक्तमेवेति शास्त्रप्रमाणमनुपजीव्यापि समादधानानाम्मतवर्णनम्- ३४१

३. अपरोक्षार्थविषयकत्वं ज्ञानस्यापरोक्षत्वम्, न तु करणनिबन्धनम्, अर्थापरोक्ष्यं च स्वव्यवहारानुकूलचैतन्याभिन्नत्वं तत्तत्प्रमातृचैतन्याभिन्नत्वपर्यवसितम्। न तु अपरोक्षज्ञानविषयत्वम्, अतो नान्योन्याश्रयः। एवं च ब्रह्मणः स्वत एव नित्यापरोक्षरूपत्वात्, सर्वदा सर्वपुरुषचैतन्यरूपत्वेन तदभिन्नत्वाच्च तद्विषयकस्य शाब्दस्यापि ब्रह्मज्ञानस्यापरोक्षत्वं युक्तमेवेति अपरेषाम्मतनिरूपणम्- ३४१

४. तत्तदर्थाभिन्नत्वे सति तत्तदर्थव्यवहारानुकूलज्ञानत्वं ज्ञानापरोक्ष्यम्। स च चैतन्यस्यैव धर्मः नान्तःकरणवृत्तिधर्मः। अर्थापरोक्ष्यं तु—स्वव्यवहारानुकूलचैतन्याभिन्नत्वम्-इति अद्वैतविद्याचार्यमतेन ज्ञानार्थापरोक्ष्यनिर्वचनेन शाब्दापरोक्षनिर्वहणम्, उक्तज्ञानार्थापरोक्ष्यलक्षणे अतिव्याप्तिशङ्का तन्निरासश्च, अज्ञाननिवृत्तिप्रयोजकनिर्णयश्च- ३४३

८. घटादिज्ञानानां मूलाज्ञानानिवर्तकत्वसमर्थनम्

ननु वेदान्तजन्यब्रह्मज्ञानेनेव 'घटः सन्' इति घटादिचाक्षुषादिज्ञानेनापि मूलाज्ञाननिवृत्तिः स्यात्, तत्रावच्छेदकांशस्य कल्पितत्वेपि अकल्पितमूलाज्ञानविषयशुद्धचैतन्यविषयकत्वाविशेषादिति शङ्कायाम्- ३४९

१. श्रुतिभिर्ब्रह्मणो वेदान्तैकसमधिगम्यत्वश्रवणात् प्रत्यक्षादिप्रमाणान्तरावेद्यत्वश्रवणाच्च न चक्षुरादीन्द्रियजन्यवृत्तिविषयत्वं ब्रह्मणः सम्भवति। किं च अज्ञानतत्कार्यातिरिक्ततद्विषयविषयकस्यैव अज्ञाननिवर्तकत्वम्। तदभावाच्च घटादिज्ञानानां न तन्निवर्तकत्वम्। ज्ञानाज्ञानयोर्निवर्त्यनिवर्तकभावे एतादृशसमानविषयकत्वस्यैव तन्त्रत्वादिति वाचस्पतिमिश्रानुसारिणांमतोपपादनेन समाधानम्- ३४९

अथ वा—घटादिज्ञानानां चैतन्यं नैव विषयः, किं तु जडमेव; घटादिज्ञाननिवर्त्यावस्थाऽज्ञानानां जडमात्रविषयकत्वात्। जडे आवरणकृत्याभावाज्ञानैकत्वादीनां मूलाज्ञानविषयत्वाच्चादोष इति प्रकारान्तरेण समाधानम्- ३५२

२. ज्ञानाज्ञानयोश्चैतन्याश्रितत्वनियमेन अज्ञानमात्रस्य तमस इव स्वाश्रयादन्यत्रावरणहेतुत्वानुपपत्तेः घटाद्यवस्थाऽज्ञाननिवर्तकचाक्षुषादिज्ञानानां तत्तद्विषयावच्छिन्नचैतन्यमेव विषयः, न जडमात्रम्। घटादिज्ञानानां चैतन्यविषयकत्वेऽप्यवच्छिन्नविषयकत्वात्, केवलनिष्प्रपञ्चाद्वितीयशुद्धचिन्मात्रगोचरवेदान्तैकप्रमाणजन्यत्वाभावेन श्रोतव्यविधिसिद्धश्रवणनियमादृष्टजनिताप्रतिबद्धब्रह्मज्ञानत्वाभावाच्चेति केषाञ्चित् समाधानान्तरनिरूपणम्- ३५४

३. तत्त्वमस्यादिवेदान्तमहावाक्यजन्यं जीवब्रह्माभेदविषयकज्ञानमेव तादृशमूलाज्ञाननिवर्तकम्, तस्य जीवब्रह्माभेदावारकत्वात्, घटादिज्ञानस्य महावाक्यजन्यज्ञानस्य च समानविषयकत्वेन विषयतो

विशेषाभावेपि सामग्रीविशेषादेव घटादिज्ञानापेक्षया महावाक्यजन्यज्ञानस्य अभेदज्ञानत्वरूपं वैलक्षण्यम्, महावाक्यजन्यज्ञानस्य अभेदज्ञानत्वं नाम सामग्रीविशेषाधीनत्वप्रयुक्तस्वरूपसम्बन्ध-विशेषेण चैतन्यगोचरत्वम्, तच्च घटादिज्ञानव्यावृत्तमिति अन्येषांमतोपपादनम्- ३५५

९. ब्रह्मज्ञानस्य मूलाज्ञाननिवर्तकत्वसमर्थनम्

घटादिज्ञानवत् ब्रह्मज्ञानमपि स्वोपादानमूलाज्ञानबाधकं न भवति, लोके कार्यस्य स्वोपादानस्थिति-विरोधित्वादर्शनादिति आक्षेपे- ३५९

१. उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोजकविरोधाभावस्योत्सर्गतः क्वचिद्दृष्टत्वेपि अन्यत्र निवर्त्य-निवर्तकभावप्रयोजकत्वेन घटादिज्ञानाज्ञानयोः क्लृप्तस्य समानविषयकत्वस्य विशेषरूपतया, तस्य च ब्रह्माज्ञानतज्ज्ञानयोः सत्त्वात्, तेन च सामान्यरूपोपादानोपादेयाभावप्रयुक्ताविरोधस्य बाधात्, कार्यकारणयोरपि वेणुतज्जवह्न्योः पटाग्निसंयोगयोर्निवर्त्यनिवर्तकभावस्य दृष्टत्वाच्च, भवत्येव ब्रह्मज्ञानेन स्वोपादानमूलाज्ञानस्य बाध इति समाधानवर्णनम्- ३५९

१०. अज्ञाननिवर्तकब्रह्मज्ञाननिवर्तकविचारः

एवमपि सविलासमूलाज्ञाननिवर्तकचरमसाक्षात्कारस्य निवर्तकान्तराभावात् कथं निवृत्तिः? कथञ्चिन्निवर्तकान्तरकल्पनायामप्यनवस्थापातात्, स्वेनैव निवृत्त्ययोगात्, अनिवृत्तौ द्वैतापत्तेश्चेति शङ्कायाम्- ३६०

१. नैवात्र क्रमो विवक्षितः- प्रथमं ब्रह्मज्ञानेन स्वेतरस्य सकलस्य नाशः पश्चात्स्वस्येति। किन्तर्हि। ब्रह्मज्ञानस्यापि स्वेनैव ब्रह्मात्मन्यध्यस्तसविलासमूलाज्ञानेन सहैव नाशोऽभ्युपगम्यते। न हि स्वस्वेतरविनाशकत्वमेकस्य न दृष्टम्, कतकरजसि पङ्किलजलस्थरजोनिवृत्त्या सहैव स्वनिवृत्तेरपि दृष्टत्वादिति समाधानवर्णनम्- ३६०

२. प्रतप्तायःपिण्डे निक्षिप्तं जलं यथा वह्निं विनाशयत् स्वयमपि तत्क्षणाद्विनश्यति, तथा ब्रह्मज्ञानमपि स्वेतरनिखिलं दृश्यं निवर्तयत् स्वयमपि नश्यतीति दृष्टान्तान्तरेण समाधानम्- ३६०

३. यथा शुष्कतृणतूलादिपुञ्जनिक्षिप्तो वह्निस्तृणादिपुञ्जं नाशयित्वा स्वयमपि नश्यति, तथा सविलास-मूलाज्ञानं निर्लेपं विनाशयदात्मज्ञानं स्वयमपि नश्यतीति अपरेणदृष्टान्तेन समाधानम्- ३६०

ब्रह्मज्ञानं कारणान्तरमनपेक्ष्य स्वयमेव नश्यतीत्यनुपपन्नम्, घटादिनाशे प्रतियोग्यतिरिक्तमुद्गरपाता-दिकारणान्तरदर्शनात् इत्याक्षेपे- ३६०

दग्धतृणकूटदहनवत् कारणान्तरमनपेक्ष्य कालादृष्टेश्वरेच्छादीनां नाशपूर्वभावितया कारणभावम-पेक्ष्य चेति उभयथाऽप्युपपत्तिः, ज्ञानातिरिक्तकारणापेक्षायामपि ज्ञानाघटितसामग्र्यनिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वरूपस्य मिथ्यात्वस्य न हानिश्च इति समाधानम्- ३६१

४. यथा तमस्तमोन्तरं न निवर्तयति, एवं चरमसाक्षात्कारोऽपि जडत्वाविशेषात्सविलासमूलाज्ञानं न शक्नोति निवर्तयितुम्, किन्तु चैतन्यमेव प्रकाशरूपत्वाच्छक्नोति निवर्तयितुम्। तस्यापि स्वरूपेणाज्ञानादिसाक्षितया साधकत्वेऽपि अखण्डाकारवृत्त्युपहिततया बाधकत्वसम्भवः, यथा तृणादेः साधकमपि सवितृकिरणं सूर्यकान्तोपलारूढं सत् दाहकं भवति। चैतन्यस्यैव सर्वनाशकत्वात् नानवस्थादिदोषः-इत्येकेषाम्मतनिरूपणम्- ३६२

५. विरोधप्रयोजकस्य समानविषयकत्वादेर्ज्ञानाज्ञानयोरेव सत्त्वात् मूलाज्ञानस्यैव ब्रह्मज्ञानं साक्षान्निवर्तकम्। प्रपञ्चरूपतत्कार्यस्य तु स्वोपादानमूलाज्ञाननिवृत्तिद्वारा। मिथ्यात्वञ्च साक्षात् परम्परया वा ज्ञानैकनिवर्त्यत्वम्। चरमसाक्षात्कारस्यापि मूलाज्ञाननिवृत्त्यैव निवृत्तिः। विदुषो देहादिप्रपञ्चस्यापि साक्षाज्ज्ञानेन सह विरोधाभावात् प्रारब्धकर्मप्रतिबन्धेनाविद्यालेशानुवृत्त्या जीवन्मुक्तिशास्त्रस्याप्यवकाश एवं सत्येव भवतीति पञ्चपादिकानुसारिमतोपपादनम्, साधनाध्यायोपसंहारः, फलाध्यायार्थोपक्षेपश्च- ३६३

चतुर्थपरिच्छेदः

१. जीवन्मुक्तिसदसद्भावोपपादनम्

कोयमविद्यालेशो नाम, यदनुवृत्त्या जीवन्मुक्तिः इति जिज्ञासायाम्- ३६५

१. आवरणविक्षेपशक्तिद्वयविशिष्टाया अविद्याया आत्मसाक्षात्कारेणावरणशक्तेर्नाशेपि प्रारब्धकर्मरूपप्रतिबन्धनाशावधि अनुवृत्ता विक्षेपशक्तिरेव लेश इति केषाञ्चिन्मतवर्णनम्- ३६५

२. तत्त्वज्ञानेनाविद्यानाशेऽपि क्षालितलशुनभाण्डगन्धवत् अविद्याजन्या देहादिस्थितिहेतुर्वासनैव लेशशब्दार्थ इति अन्येषाम्मतनिरूपणम्- ३६५

३. दग्धपटन्यायात् तत्त्वज्ञानेन दृढतरकार्याक्षमत्वं नीता अविद्यैवाविद्यालेश इति मतान्तरवर्णनम्- ३६६

४. अप्रतिबद्धापरोक्षब्रह्मसाक्षात्कारोदयमात्रेण निःशेषं सविलाससवासनाविद्यानिवृत्तेः अविद्यालेशानुवृत्तिवार्तैवानुपपन्ना। जीवन्मुक्तिप्रतिपादकशास्त्रं तु श्रवणादिविधिस्तावकार्थवादमात्रमिति सर्वज्ञात्मगुरूणाम्मतोपपादनम्- ३६६

२. अविद्यानिवृत्तिस्वरूपविचारः

तत्त्वसाक्षात्कारफलभूताविद्यानिवृत्तिः किमधिष्ठानचिन्मात्ररूपः, उत तद्भिन्न इति जिज्ञासायाम्-

१. अधिष्ठानचैतन्यरूपैवाविद्यानिवृत्तिः। नित्यसिद्धत्वेऽपि तस्य न ज्ञानसाध्यत्वासम्भवः। यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चाभावः तत् तत्साध्यमिति अनादिसाधारणसाध्यलक्षण-

सद्भावात्, यस्मिन्ब्रह्मज्ञाने सत्यग्रिमक्षणे आत्मरूपाविद्यानिवृत्तिसत्त्वम्, तद्व्यतिरेके तदभावः-भ्रान्तिसिद्धः कश्चिच्चैतन्यरूपाविद्यानिवृत्त्यभाव इति—इति ब्रह्मसिद्धिकाराणाम्मतोपपादनम्- ३६६

२. अविद्यानिवृत्तिरात्मरूपा न भवति, किन्तु तद्भिन्नैव। तथापि सा न सती, द्वैतापत्तेः। ज्ञान-वैय्यर्थ्यान्नाप्यसती। विरोधान्न सदसती च। नाप्यनिर्वाच्या। तस्या अज्ञानोपादानकत्व-नियमेनानिर्मोक्षप्रसङ्गात्। किन्तु उक्तप्रकारचतुष्टयविलक्षणपञ्चमप्रकारेति आनन्दबोधाचार्या-णाम्मतोपपादनम्- ३६८

३. अविद्यानिवृत्तिरपि स्वकारणाविद्यावदनिर्वाच्यैव, न चोपादानाविद्यानुवृत्त्याऽनिर्मोक्षप्रसङ्गः, तस्याः क्षणिकभावविकारत्वोपगमेन स्वतो नाशात् - इति अद्वैतविद्याचार्यमतोपपादनम्- ३६८

३. मोक्षस्य स्थिरपुरुषार्थत्वोपपादनम्

अविद्यानिवृत्तेः क्षणिकत्वे कथं मोक्षः स्थिरपुरुषार्थो भवेदिति शङ्कायाम्-

१. सुखस्य दुःखाभावस्य वा मुख्यपुरुषार्थत्वेन ज्ञानसाध्याया अविद्यानिवृत्तेः सुखेतरत्वात् दुःखा-भावेतरत्वाच्च साक्षादपुरुषार्थत्वेपि पुरुषार्थसाधनतया पुरुषार्थत्वमुपचर्यते, अविद्योच्छेदानन्तरमेव अखण्डानन्दस्फुरणस्य संसारदुःखोच्छेदस्य च दर्शनादिति केषाञ्चिन्मतेनसमाधानवर्णनम्- ३७२

२. निरतिशयस्वरूपसुखमेव स्वतः पुरुषार्थः, नाविद्यानिवृत्तिवत् दुःखाभावः। सुखानुभवकाले दुःखस्य प्रतिबन्धकत्वेन तदभावविधया सुखशेषत्वात्। न च वैपरीत्यम्, लोके क्षणिकग्राम्यसुख-मुद्दिश्य दीर्घकालदुःखानुभवस्य क्लेशार्जितबहुर्थादिव्ययस्य च दर्शनात्-इतिचित्सुखाचार्यमतोपपादनेन समाधानम्- ३७३

४. नित्यसिद्धमोक्षमुद्दिश्य साधनानुष्ठाने प्रवृत्त्युपपादनम्

निरतिशयब्रह्मानन्दस्यैव मुक्तिरूपत्वे तस्य च वेदान्तमहावाक्यैः प्रत्यगात्मस्वरूपतया प्रतिपादनात् कथं नित्यप्राप्तेऽप्यानन्दे तदर्थं साधनानुष्ठानप्रवृत्तिरिति शङ्कायाम्-

१. नित्यप्राप्तेऽप्यर्थेऽप्राप्तत्वभ्रान्त्या तत्प्राप्त्यर्थं तदुचितोपायेषु प्रवृत्तिर्लोके दृष्टा, प्राप्तिश्चौपचारि क्येवेति केषाञ्चित्समाधानवर्णनम्- ३७४

२. 'आनन्दो मयि नास्ति न प्रकाशते' इति लोकव्यवहारसिद्धोऽविद्याधीनस्थितिकः काल्पनिकः कश्चिद्ब्रह्मानन्दस्याभावोऽङ्गीकर्तव्यः; अविद्यानिवृत्तौ च तन्मूलकानन्दाभावोऽपि निवर्तत इति 'यस्मिन्सत्यग्रिमक्षणे' इति न्यायेन मुख्यमेव तत्प्राप्यत्वमिति अन्येषांसमाधानवर्णनम्- ३७५

३. सत्तामात्रेण नाखण्डब्रह्मसुखं पुरुषार्थः, किन्त्वपरोक्षब्रह्मविज्ञानेनाविद्यानिवृत्तौ सत्याम् अनावृतचैतन्याभिन्नाखण्डस्वरूपानन्दस्यैव पुरुषार्थत्वमिति अनावृतत्वसम्पादनाय ज्ञानार्थप्रवृत्तिरिति अपरेषां समाधानवर्णनम्- ३७५

४. यथा वस्तुतोऽभेदेपि जीवानामाविद्यकभेदान्नान्योन्यसुखाद्यापरोक्ष्यं, एवं चिदानन्दयोः सत्त्वेपि वास्तवाभेदे काल्पनिकभेदान्नानन्दापरोक्ष्यम्। ज्ञानेन भेदप्रविलये त्वपरोक्षत्वप्रयोजकचैतन्याभेदसत्वादानन्दापरोक्ष्यम्, तदापरोक्ष्यमेव तस्य विद्यासाध्यत्वमिति इतरेषां समाधानोपपादनम्- ३७६

५. मुक्तस्वरूपविचारः

मुक्तिदशायां विद्याविध्वंसिताविद्याद्यखिलोपाधिकस्य जीवस्य किमीश्वररूपेणावस्थानम्, उत निर्विशेषशुद्धचिन्मात्रात्मनावस्थितिर्भवतीति विवित्सायाम्-

१. एकजीववादे जीवस्यैकत्वात् तदीयमूलाज्ञानरूपोपाधेरप्येकत्वेन यदा अद्वितीयशुद्धचिन्मात्रस्वतत्त्वसाक्षात्कारोदयः तदानीमेव देवतिर्यङ्मनुष्यादिभूतभौतिकनिखिलदृश्यप्रपञ्चोपादानाज्ञानस्य निःशेषं प्रविलयात् शुद्धनिर्विशेषचैतन्यात्मनाऽवस्थानं सिद्ध्यति। शुकादिमुक्तिप्रतिपादकशास्त्रं तु श्रवणादिविध्यर्थवाद इति एकजीववादिनाम्मतवर्णनम्- ३७६

२. अनेकजीववादे प्रतिबिम्ब ईश्वरः प्रतिबिम्बा जीवा इत्यस्मिन्पक्षे, एकस्य जीवस्य तत्त्वज्ञानेन स्वाविद्यातत्कार्यप्रपञ्चप्रविलयाद्बिम्बभूतशुद्धचैतन्यात्मना मुक्तावस्थितिः, परन्तु यावत्सर्वमुक्तिर्भविष्यति तावद्बद्धजीवान्तराविद्याकृत जीवेश्वरविभागादिप्रपञ्चोऽनुवर्तते, इति अपरेषांमतनिरूपणम्- ३७७

३. अनेकजीववाद एव मायायां अविद्यायां अन्तःकरणे वा चित्प्रतिबिम्बो जीवः, बिम्बस्थानीय ईश्वरः, तदुभयानुगतं शुद्धचैतन्यमित्यस्मिन् पक्षे तु, एकस्य जीवस्य ज्ञानोदयेऽपि जीवेश्वर विभागाद्यस्पृष्टनिर्विशेषब्रह्मभावरूपमुक्तिर्न सिद्ध्यति। किं तु, यावत्सर्वमुक्ति सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वसर्वकामत्वादिगुणकबिम्बभूतपरमेश्वरभावापत्तिरेवेष्यते। न च मुक्तस्य ईश्वरत्वप्रयोजकाविद्यायाः ज्ञानेन दग्धत्वात्कथमीश्वरभावापत्तिरिति शङ्क्यम्। स्वाविद्याभावेऽपि बहुजीवान्तराविद्यायाः तदानीमनपायात्। यद्यपि सगुणोपासनयापि श्रुतिषु ईश्वरभावापत्तिः श्रूयते, तथाऽपि सगुणोपासकानामखण्डतत्त्वसाक्षात्काराभावात् न अविद्यातत्कार्याहङ्कारादिनाशः, आवरणानपायात् न अखण्डस्वरूपानन्दाभिव्यक्तिश्च। किञ्च तेषां संकल्पमात्रात् स्वभोगोपयोगिदिव्यदेहेन्द्रियवनितादिसृष्टिसामर्थ्ये सत्यपि निखिलजगदुत्पत्तिप्रलयादिसामर्थ्यं नास्त्येव। ते च सगुणब्रह्मलोकं गत्वा तत्रकृतश्रवणादिजन्यनिर्गुणब्रह्मसाक्षात्कारेण सम्पन्नाः सन्तः सगुणब्रह्मणैव सह क्रमेण मुच्यन्ते। वेदान्तश्रवणादिजन्याखण्डब्रह्मसाक्षात्कारेण सद्योमुक्तानां तु निःसन्धिबन्धमीश्वरभावं प्राप्तानां यावत्सर्वमुक्ति जगत्सृष्ट्यादिसामर्थ्यं सर्वमुक्तौ बिम्बभावनिवृत्त्या निर्विशेषब्रह्मात्मनावस्थितिश्चेति विशेष इति स्वमतोपपादनम्, अत्र श्रुतिसूत्रभाष्यानुगुण्योपपादनम् ३७८

४. ग्रन्थोपसंहारः- ३९५

॥ श्रीः ॥

शास्त्रसिद्धान्तलेशसङ्ग्रहः

कृष्णालङ्काराख्यव्याख्यासहितः

—: (*) :—

कृष्णालङ्कारः

शास्त्रसिद्धान्तलेशसङ्ग्रहव्याख्या

वेदवेद्यमुमाकान्तं कुमाराभ्यामलंकृतम् ।
नन्दीशप्रमुखैस्सेव्यं प्रणमामीष्टसिद्धये ॥ १ ॥
शङ्करं शङ्कराचार्यं व्यासं नारायणात्मकम् ।
सरस्वतीं च ब्रह्माणं प्रणमामि पुनःपुनः ॥ २ ॥
गोविन्देति समाक्रन्द्य रक्षां प्राप भयातुरः ।
यं गजः करुणामूर्तिं तं गोविन्दं भजेऽन्वहम् ॥ ३ ॥
आपन्ना यं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ।
कृष्णा कृष्णस्य महिषी तं कृष्णं संश्रयेऽन्वहम् ॥ ४ ॥
प्रकाशितब्रह्मतत्त्वं प्रकृष्टगुणशालिनम् ।
प्रणवस्योपदेष्टारं प्रणमाम्यनिशं गुरुम् ॥ ५ ॥
यो मे विश्वेश्वरक्षेत्रे विश्वेश्वरसमो गुरुः ।
समभ्यास्ते स्वयञ्ज्योतिर्वाणीसंज्ञो भजामि तम् ॥ ६ ॥
यस्य शिष्यप्रशिष्याद्यैः व्याप्तेयं साम्प्रतं मही ।
सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये सदा ॥ ७ ॥
गुरोरपि गरीयान्मे यः कलाभिरलंकृतः ।
अद्वैतानन्दवाण्याख्यस्तं वन्दे शमवारिधिम् ॥ ८ ॥
ओतप्रोतमिदं सर्वं यस्मिन् सच्चित्सुखात्मके ।
पर्यवस्यन्ति वेदान्ता यत्र चाहं तदक्षरम् ॥ ९ ॥
श्रीकृष्णचरणद्वन्द्वं प्रणिपत्य निबन्धनम् ।
व्याकुर्वे शास्त्रसिद्धान्तलेशसङ्ग्रहसंज्ञितम् ॥ १० ॥
आचार्यचरणद्वन्द्वस्मृतिर्लेखकरूपिणम् ।
मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्यतः ॥ ११ ॥

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ १ ॥

---

[1]कुमाराभ्यां - विघ्नेश्वरसुब्रह्मण्याभ्याम् । शङ्करं - शङ्करस्य शिवस्य अवताररूपं शङ्कराचार्यं - भगवत्पादम् । तथा च शिवपुराणवचनम्—'व्याकुर्वन् व्याससूत्रार्थं श्रुतेरर्थं यथोचिवान् । श्रुतेर्न्याय्यः स एवार्थः शङ्करः सवितानन:'[2] इत्यादि । व्यासं - सूत्रकृतं बादरायणम् । नारायणात्मकं - नारायणस्यावताररूपम् । तथा च वचनम्—'द्वापरे द्वापरे विष्णुः व्यासरूपी महामुनिः' इति । 'न ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्' इत्यादि च । ब्रह्माणं - सरस्वतीभर्तारं, हिरण्यगर्भं [च] । आपन्ना - सभायां वस्त्रापहारनिमित्तामापदं प्राप्ता । रक्षां - वस्त्रकोटिलाभनिमित्ताम् । कृष्णा - द्रौपदी । कृष्णस्य - अर्जुनस्य । प्रकाशितं - शिष्यशतेभ्य उपदिष्टं ब्रह्मतत्त्वं येन गुरुणा स तथोक्तः तम् । स्वयञ्ज्योतिर्वाणीसंज्ञः - स्वयम्प्रकाशसरस्वतीसंज्ञः । गरीयान् - गुरुः । इदं सर्वं यस्मिन् सच्चित्सुखात्मके अक्षरे - ब्रह्मणि ओतप्रोतं - अध्यस्तं, वेदान्ताश्च यत्र - अक्षरे विषये[3] पर्यवस्यन्ति - तात्पर्येण बोधहेतवो भवन्ति तदहं इति सम्बन्धः । अक्षरे सर्वस्य ओतप्रोतत्वोक्त्या ब्रह्मणः सर्वाधिष्ठानत्वरूपं तटस्थलक्षणं उक्तम् । 'सच्चित्सुखात्मकः' इत्यनेन सत्यज्ञानानन्दस्वरूपात्मकं स्वरूपलक्षणं उक्तम् । तत्र वेदान्तानां पर्यवसानोक्त्या उक्तरूपे ब्रह्मणि अक्षरे वेदान्ता एव प्रमाणं इत्युक्तम् । (नाहमत्र प्रभुर्यतः इत्यत्र) अत्र-व्याख्याने प्रभुः - समर्थ इत्यर्थः ।

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचयगमनयोः[4] सिद्धये भगवत्पादीयभाष्यस्तुतिमुखेन भाष्यप्रतिपाद्यब्रह्मतत्त्वानुसन्धानलक्षणं मङ्गलाचरणं करोति—**अधिगतभिदेति** । दृष्टान्तमुखेन श्रीमूर्तिचरणारविन्दगङ्गयोः अनुसन्धानलक्षणमपि मङ्गलं करोति—**शौरीति** । शौरिपदोद्गता सरित् महीभेदान् सम्प्राप्य यथा सहस्रधा अधिगतभिदा, तथा भगवत्पादश्रीमन्मुखाम्बुजनिर्गता ब्रह्माद्वयैकपरायणा जननहरणी सूक्तिः पूर्वाचार्यान् व्याख्यातॄन् व्याख्येयत्वेन उपेत्य अर्थतः[5] सहस्रधा अधिगतभिदा सती जयतीति सम्बन्धः । अत्र सूक्तिः सहस्रधा अधिगतभिदेति सूक्तिविशेषणेन स्वग्रन्थे प्रदर्शयिष्यमाणसिद्धान्तभेदानां सर्वेषां भगवत्पाद-

---

1. स्वकृतश्लोकस्थपदविशेषाणां विवक्षितमर्थं आह—'कुमाराभ्यां' इत्यादिना 'समर्थ इत्यर्थः' इत्यन्तेन ग्रन्थेन ।

2. सवितानन:—प्रशस्तमुखः ।

3. विषये—अस्य 'बोधहेतवः' इत्यत्र एकदेशे बोधेऽन्वयः ।

4. प्रचयगमनम्—प्रचयः विस्तारः बहुशिष्यजनसंबन्धः तस्य गमनं प्राप्तिः ।

5. भगवत्पादसूक्तेः व्याख्यातृभेदेन स्वरूपतो भेदाभावात् 'अधिगतभिदा' इत्यसङ्गतं इत्याशङ्क्य आह-अर्थत इति ।

प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं
सन्नह्यद्भिरनादरात् सरणयो नानाविधा दर्शिताः ।
तन्मूलानिह संग्रहेण कतिचित् सिद्धान्तभेदान् धिय-
श्शुद्ध्यै सङ्कलयामि तातचरणव्याख्यावचःख्यापितान् ॥ २ ॥

श्रीमन्मुखाम्बुजनिर्गता सूक्तिरेव मूलं इति सूचितम्। अधिगतभिदा - प्राप्तभेदा सरित् - गङ्गा । महीभेदान् - भूप्रदेशान् । शौरेः - श्रीमहाविष्णोः पदोद्गता - पादाम्बुजनिर्गता जयति - सर्वोत्कर्षेण वर्तते इति स्तुतिः । भगवत्पादस्य श्रीमन्मुखमेवाम्बुजं - कमलं तस्मान्निर्गता । मुखे अम्बुजत्वारोपे कान्तिमत्त्वादिरूपं श्रीमत्त्वं निमित्तं इति सूचनार्थं श्रीमदिति विशेषणम् । जननहरणी - जननं संसारः तत् स्वजन्यब्रह्मज्ञानद्वारा हरतीति जननहरणी, सूक्तिः - ग्रन्थतोऽर्थतश्च निरवद्यं भाष्यम् । ब्रह्माद्वयैकपरायणा - ब्रह्म च तत् अद्वयं च ब्रह्माद्वयं, ब्रह्माद्वयं च तत् एकं च ब्रह्माद्वयैकं, ब्रह्माद्वयैकं परायणं - परमतात्पर्यविषयो यस्याः सूक्तेः, सा ब्रह्माद्वयैकपरायणा। अनेन विशेषणेन [1]द्वितीयप्रपञ्चशून्यं एकरूपं सत्यज्ञानानन्दलक्षणं ब्रह्म सूक्तिपदसङ्गृहीतस्य भाष्यात्मकशास्त्रस्य विषयः इत्युक्तं भवति । जननहरणीति विशेषणेन शास्त्रस्य मुक्तिः प्रयोजनं इत्युक्तम् । अर्थात् मुक्तिकामः शास्त्रस्याधिकारी, मुक्तेरधिकारिणश्च प्राप्यप्राप्तृभावलक्षणः सम्बन्धश्च सूचितः। एवं श्रुत्यर्थाभ्यां[2] श्लोकेन भाष्यात्मकवेदान्तशास्त्रस्य विषयादिकं कथयता ग्रन्थकारेण स्वकीयग्रन्थस्य वेदान्तशास्त्रप्रकरणत्वात् तस्यापि तदेव विषयादि इति सूचितं भवति ।

इदानीं चिकीर्षितं प्रतिजानीते—**प्राचीनैरिति** । प्राचीनैराचार्यैः आत्मैक्यसिद्धौ परम् - अत्यन्तं सन्नह्यद्भिः - तात्पर्यवद्भिः आत्मैक्यसिद्ध्युपायतया व्यवहारसिद्धविषयेषु - भ्रान्तिमात्रसिद्धपदार्थेषु जीवेश्वरजगद्रूपेषु अनादरात् सरणयः—प्रकाराः नानाविधाः—परस्परविरुद्धाः दर्शिताः । अनादरादित्यनेन 'परस्परविरुद्धेषु जीवैकत्वनानात्वतत्प्रतिबिम्बत्वादि[3]रूपप्रकारेषु अभिनिवेशवतामाचार्याणां भेदवादिनामिव अनाप्तत्वं स्यात्' इति शङ्का निराकृता भवति । विवक्षितवस्तुप्रतिपत्त्युपायतया विरुद्धनानाप्रकारप्रदर्शनं आचार्याणां न दोषाय भवति[4] । किं तु अलङ्कारायैव भवति । प्रतिपत्तॄणां प्रज्ञावैचित्र्येण कस्यचित् प्रतिपत्तुः केनचित्

1. द्वितीयपदस्य व्याख्यानं प्रपञ्च इति ।

2. श्रुत्यर्थाभ्याम् - शब्दतः अर्थतश्च । विषयः प्रयोजनं च शब्दतः, अधिकारी संबन्धश्च अर्थतः उक्तः ।

3. अवच्छिन्नत्वं आदिशब्दार्थः ।

4. अनेन प्रतिबिम्बवादाद्युपरि अवच्छेदवादाद्युक्तदूषणानां अवच्छेदवादाद्युपरि प्रतिबिम्बवादाद्युक्तदूषणानामुद्भावनेन अद्वैतसिद्धान्तनिराकरणाभिमानः परकीयो निरस्तो वेदितव्यः ।

तेषूपपादनापेक्षान् पक्षान् प्रायो यथामति[1] ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरम्[2] ॥ ३ ॥

प्रकारेण मुक्तिसाधनब्रह्मात्मैक्यज्ञानलाभात् । तदुक्तं सुरेश्वराचार्यैः—'यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥' [बृहदारण्यकवार्तिकम्-१-४-४०२] इति । व्युत्पत्तिः - बोधः । प्रत्यक् चासौ आत्मा च प्रत्यगात्मा सर्वान्तरश्चिदात्मा, तस्मिन् विषये । प्रक्रिया - प्रकारः । इह - वेदान्तशास्त्रे । साध्वी - निरवद्या गुणभूता । सा च अनवस्थिता - नानाविधा । **परिमले** दीक्षितैरप्येतदुक्तम्—[3]'अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमानेषु पदार्थेषु विरोधो न दोषावहः, यथा तात्त्विकारुन्धतीप्रतिपत्त्युपायतया नानापुरुषैः कल्प्यमानासु तत्प्राच्योदीच्यादिनक्षत्ररूपासु स्थूलारुन्धतीषु[4] विरोधो न दोषावहः' [ब्र.सू. १-४-१५] इति । तन्मूलान् - प्राचीनप्रदर्शितनानाविधसरणिमूलान् । इह - स्वग्रन्थे । धियः शुद्ध्यै स्वबुद्धिपरिष्काराय । वस्तुतस्तु लोकानुग्रह एव प्रयोजनमिति बोध्यम् । तातचरणानां - पितृचरणानां व्याख्यारूपैः वचोभिः ख्यापितान् - ज्ञापितान् । अनेन स्वस्य ब्रह्मविद्यां आचार्यादेव लब्धां दर्शयति स्वग्रन्थस्योपादेयत्वसिद्धये ॥ २ ॥

'इह सङ्ग्रहेण सिद्धान्तभेदान् सङ्कलयामि' इत्युक्तमेव विवृण्वन्, 'ननु प्राचीनग्रन्थसिद्धान्तानामेव स्वग्रन्थे सङ्ग्रहः इत्युक्तमयुक्तं, प्राचीनग्रन्थेष्वविद्यमानस्यापि युक्तिभिः उपपादनस्य स्वकीयसङ्ग्रहग्रन्थे तत्र तत्र उपलम्भात्' इति शङ्कां निराकरोति—तेष्विति ॥ ३ ॥

---

1. यथामति—अनेन अहङ्काराराहित्यं सूच्यते । वस्तुतस्तु स्वीयबुद्धेः यावत् ऊहापोहसामर्थ्यादिरूपं कौशलं तावदुपयोजनेन सम्यक् विमृश्य विविच्य च लिखनमपि सूचितं भवति ।

2. अनेन श्लोकत्रयेण स्वीयग्रन्थस्य शास्त्रसिद्धान्तलेशसङ्ग्रह इति नामापि सूचितं भवति । तथा हि - 'ब्रह्माद्वयैकपरायणा भगवत्पादश्रीमन्मुखाम्बुजनिर्गता सूक्तिः' इत्यनेन, हिततमशासनात् भगवत्पादसूक्तिः शास्त्रमित्युक्तम् । सा च 'पूर्वाचार्यानुपेत्य अधिगतभिदा' इत्युक्ता । तांश्च भेदान् 'प्राचीनैः.......दर्शिताः' इत्यनूद्य 'तन्मूलान् कतिचित् सिद्धान्तभेदान् सङ्ग्रहेण सङ्कलयामि' इत्यनेन वचनेन शास्त्रसिद्धान्तलेशसङ्ग्रहः उक्तः । तेन पूर्वोक्तसंज्ञालाभः । अत एव कृष्णालङ्कारे उक्तम् - 'व्याकुर्वे **शास्त्रसिद्धान्तलेशसङ्ग्रह**संज्ञितम्' इति । **सिद्धान्तलेशसङ्ग्रह** इति तु लोकप्रसिद्धिः ॥

3. अर्थतोऽनुवादोऽयम् ।

4. स्थूलारुन्धतीषु—स्थूलाः - स्पष्टं दृश्याः, अरुन्धत्यः-अरुन्धतीत्वेन कल्प्यमानाः ताराविशेषाः - स्थूलारुन्धत्यः, तासु ।

श्रवणविधिविचारः

[तत्र अपूर्वादिविधित्रयस्वरूपनिरूपणम्]

तत्र तावत्[1] 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः (मन्तव्यः)' [बृ.उ. २-४-५] इति अधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्ने ब्रह्मात्मनि समुदितजिज्ञासस्य तज्ज्ञानाय वेदान्तश्रवणे विधिः प्रतीयमानः किंविध इति चिन्त्यते ।

तिस्रः खलु विधेर्विधाः - अपूर्वविधिः नियमविधिः परिसङ्ख्याविधिश्च इति । तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिराद्यः । यथा 'व्रीहीन् प्रोक्षति' इति । नात्र व्रीहीणां प्रोक्षणस्य संस्कारकर्मणो विना विनियोगं मानान्तरेण कथमपि प्राप्तिरस्ति । पक्षप्राप्तस्य अप्राप्तांशपरिपूरणफलको

स्वग्रन्थे प्रथमं श्रवणविधिः विचार्यते इत्याह—**तत्र तावदिति** । श्रवणविधावधिकारिणं निर्दिशति—**अधीतेति** । वेदान्तैर्जनितापातप्रतिपत्तिविषये ब्रह्माभिन्नात्मनि सम्यक् - दाढर्येन उदिता - उत्पन्ना जिज्ञासा निर्णयरूपज्ञानेच्छा यस्य इत्यर्थः । अधीतवेदस्यापि शिक्षाकल्पव्याकरणादीनां वेदाङ्गानां अध्ययनाभावे सति व्युत्पत्ते[2]रभावात् जिज्ञासाहेतुभूतापातप्रतिपत्तिरपि न सम्भवेत् इत्यभिप्रेत्य अधीतसाङ्गस्वाध्यायस्य इत्युक्तम् । न च - निर्दोषवेदान्तजन्यायाः ब्रह्मात्मप्रतिपत्तेः कथं आपातत्वं इति - वाच्यम् । 'नाहं ब्रह्म' इतिप्रत्यक्षविरोधादि[3]शङ्कया प्रमारूपायामपि ब्रह्मात्मप्रतिपत्तौ अप्रामाण्यशङ्कास्पदत्व[4]रूपस्य आपातत्वस्य सम्भवात् इति भावः । वेदान्तश्रवणे श्रोतव्य इति विधिः प्रतीयमानः इति सम्बन्धः । **तज्ज्ञानायेति** । अप्रामाण्यशङ्कानास्पदब्रह्मात्मज्ञानाय इत्यर्थः ।

'खलु'शब्देन अपूर्वविधित्वादिप्रकारत्रयस्य पूर्वतन्त्रे प्रसिद्धिः सूच्यते । **कालत्रयेऽपीति** । कथमपि - दृष्टार्थत्वेन अदृष्टार्थत्वेन वा केनापि प्रकारेण कालत्रयेऽपि - कदापि विधिं विना[5] प्राप्तिरहितस्य प्रोक्षणादेः प्राप्तिफलको विधिः आद्यः - अपूर्वविधिः इत्यर्थः । 'व्रीहीन्' इति द्वितीयाश्रुत्या व्रीहीणां संस्कार्यत्वावगमात् प्रोक्षणस्य संस्कारकर्मत्वं उक्तमिति मन्तव्यम् । **विनियोगमिति** । विधायकशब्दं इत्यर्थः । **पुरोडाशेति** । दर्शपूर्णमासयोः आग्नेयादियागानां उत्पत्तौ[6] पुरोडाशद्रव्यं विहितम् । व्रीहयस्तु उत्पन्ने[7] यागे यागानुवादेन

---

1. प्रथममित्यर्थः ।
2. व्युत्पत्तिः- पदपदार्थसङ्गतिज्ञानम् ।
3. 'द्वा सुपर्णा' [मु. उ. ३-१-१] इत्यादिश्रुतिविरोधः आदिशब्दार्थः ।
4. अप्रमात्वेन संशयविषयत्वं अप्रामाण्यशङ्कास्पदत्वम् ।
5. विधिं विना—विधिवाक्यातिरिक्तेन प्रत्यक्षाद्यन्यतमेन प्रमाणेन ।
6. उत्पत्तौ—'यदाग्नेयः' इत्याद्युत्पत्तिवाक्ये ।
7. उत्पन्ने—उत्पत्तिवाक्येन विहिते ।

विधिर्द्वितीयः । यथा 'व्रीहीनवहन्ति' इति । अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेव अवहननप्राप्तिः भविष्यति इति न तत्प्राप्त्यर्थोऽयं विधिः, किंतु आक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषात् नखविदलनादिरपि पक्षे प्राप्नुयात् इति अवहननाप्राप्तांशसद्भावात्[1] तदंशपरिपूरणफलकः[2] । द्वयोः शेषिणोः एकस्य शेषस्य वा एकस्मिन् शेषिणि द्वयोः शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिः तृतीयः । यथा अग्निचयने 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति, यथा वा चातुर्मास्यान्तर्गतेष्टिविशेषे गृहमेधीये 'आज्यभागौ यजति' इति । अग्निचयने अश्वरशनाग्रहणं गर्दभरशनाग्रहणं च इति द्वयमनुष्ठेयम् । तत्र अश्वरशनाग्रहणे 'इमामगृभ्णन्' इति मन्त्रो लिङ्गादेव रशनाग्रहणप्रकाशनसामर्थ्यरूपात् नित्यं प्राप्नोति इति न तत्प्राप्त्यर्थः तदप्राप्तांशपरिपूरणार्थो वा विधिः, किं तु लिङ्गाविशेषात् गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयात् इति तन्निवृत्त्यर्थः । तथा गृहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वात् अतिदेशादेव आज्यभागौ

विहिताः । तथा च व्रीहीणामुत्पन्नशिष्टाना[3]मुत्पत्तिशिष्ट[4]पुरोडाशावरुद्धे[5] यागे साक्षात्साधनत्वायोगात् पुरोडाशप्रकृतिद्रव्यत्वेन यागसाधनत्वं पर्यवस्यति[6] । पुरोडाशप्रकृतित्वं च व्रीहीणां तण्डुलनिष्पत्तिद्वारकम् । तण्डुलनिष्पत्तिश्च स्वकारणमाक्षिपति[7] । तण्डुलनिष्पत्तौ च कारणं अन्वयव्यतिरेकाभ्यां अवहननं निश्चितमिति विधिं विना विधित्सितावहननप्राप्तिरस्तीत्यर्थः । ननु अवहननस्य लोकतः[8] प्राप्तौ तस्य लोकत एव नित्यप्राप्तिरपि स्यात् इत्यत आह—**किंत्वित्यादिना । आक्षेपादिति ।** तण्डुलनिष्पत्त्याक्षेपात्[9] इत्यर्थः । किंतु अवहननाप्राप्तांशसद्भावात्तदंशपरिपूरणफलक इति सम्बन्धः ।

द्वयोरिति । द्वयोः शेषिणोः एकस्य शेषस्य नित्यप्राप्तौ शेष्यन्तरस्य निवृत्तिफलकः एकस्मिन् शेषिणि द्वयोः शेषयोः नित्यप्राप्तौ शेषान्तरस्य निवृत्तिफलको वा विधिस्तृतीय इति योजना । **न तदिति ।** प्राप्तत्वात् न तत्प्राप्त्यर्थः, नित्यप्राप्तत्वात् न तदप्राप्तांशपरिपूरणार्थो वा इत्यर्थः । **अतिदेशादेवेति ।** 'प्रकृति-

---

1. अप्राप्तांशसद्भावात्—अप्राप्तेः सद्भावात् इत्यर्थः । अप्राप्तिश्च प्रवृत्तिविषयताप्रयोजकप्रतीत्यभावः ।

2. तदंशपरिपूरणफलकः—तदंशपरिपूरणं च पूर्वोक्ताया अप्राप्तेः अभावः । तथा च आक्षेपकप्रमाणावतारप्रतिबन्धद्वारा अवघाते नियतप्रवृत्तिविषयताप्रयोजकप्रतीतिः नियमविधेः फलम् ।

3. उत्पन्नशिष्टानां—उत्पत्तिवाक्यविहितकर्मानुवादेन 'व्रीहिभिर्यजेत' इति वाक्येन विहितानाम् ।

4. उत्पत्तिशिष्टेति—कर्मोत्पत्तिवाक्येनैव विहितेत्यर्थः ।

5. अवरुद्धे—निवृत्तद्रव्याकाङ्क्षे ।

6. अन्यथा 'व्रीहिभिर्यजेत' इति वाक्यस्य अननुष्ठापकत्वलक्षणं अप्रामाण्यं स्यात् इति भावः ।

7. आक्षिपति—अर्थापयति अनुमापयति वा ।

8. लोकतः- विध्यतिरिक्तप्रमाणेन ।

9. तण्डुलनिष्पत्तिरूपात् आक्षेपात् - अर्थापत्तिरूपात् अनुमानरूपाद्वा प्रमाणात् ।

नित्यं प्राप्नुतः इति न तत्र विधिः तत्प्राप्त्यर्थः तन्नियमार्थो वा; किं तु अतिदेशात् प्रयाजादिकमपि प्राप्नुयात् इति तन्निवृत्त्यर्थः। गृहमेधीयाधिकरणपूर्वपक्षरीत्या[1] इदमुदाहरणं यत्र क्वचिदुदाहर्तव्यमित्युदाहृतम्। न च नियमविधावपि पक्षप्राप्तावहननस्य अप्राप्तांशपरिपूरणे कृते तदवरुद्धत्वात् पाक्षिकसाधनान्तरस्य नखविदलनादेः निवृत्तिरपि लभ्यत इति इतरनिवृत्तिफलकत्वाविशेषात् नियमपरिसङ्ख्ययोः फलतो विवेको न युक्त इति शङ्क्यम्। विधितोऽवहननियमं विना आक्षेपलभ्यस्य नखविदलनादेर्निवर्तयितुमशक्यतया अप्राप्तांशपरिपूरणरूपस्य नियमस्य प्राथम्यात् विधेयावहननगतत्वेन प्रत्यासन्नत्वाच्च तस्यैव नियमविधिफलत्वोपगमात्। तदनुनिष्पादिन्या अविधेयगतत्वेन विप्रकृष्टाया इतरनिवृत्तेः सन्निकृष्टफलसम्भवे फलत्वानौचित्यात्।

वद्विकृतिः कर्तव्या' इत्येवंरूपादित्यर्थः। **न तत्र विधिरिति।** 'आज्यभागौ यजति' इति विधिः आज्यभागयोः प्राप्त्यर्थो न भवति। विधिं विना प्राप्तत्वात्। तयोः अप्राप्तांशपरिपूरणार्थो वा न भवति। नित्यप्राप्तत्वात्। किं तु तन्निवृत्त्यर्थ इति योजना। ननु, 'आज्यभागौ यजति' इति विधेः इतराङ्गकलापपरिसङ्ख्यायकत्वं न सिद्धान्तः इत्यत आह—**गृहमेधीयाधिकरणेति। नियमविधावपीति।** परिसङ्ख्याविधौ इव नियमविधावपीत्यर्थः। **तदवरुद्धत्वादिति।** अवहननेनैवावरुद्धत्वात्-तण्डुलनिष्पत्त्याक्षेपस्य शान्तत्वात् इत्यर्थः[2]। **फलत इति।** नियमविधेः पक्षप्राप्तावहननादिक्रियादिविधायकत्वात् परिसङ्ख्याविधेश्च नित्यप्राप्तक्रियादिविधायकत्वात् नियमपरिसङ्ख्याविध्योः स्वरूपतो विवेकलाभेऽपि फलतो[3] भेदो न युक्त इत्यर्थः। नियमस्य नियमविधिफलत्वोपगमे हेतुद्वयमाह - **प्राथम्यादित्यादिना। प्रत्यासन्नत्वादिति।** विधिं प्रति प्रत्यासन्नत्वात्[4] इत्यर्थः। विधेयक्रियागतत्वं प्रत्यासन्नत्वे हेतुः। इतरनिवृत्त्यपेक्षया प्रथमोपस्थितत्वरूपे प्राथम्ये हेतुमाह - **विधित इत्यादिना अशक्यतयेत्यन्तेन।** इतरनिवृत्तेर्नियमविधिफलत्वानुपगमे हेतुद्वयमाह - **तदनुनिष्पादिन्या इत्यादिना।** अप्राप्तांशपरिपूरणोपस्थित्यनन्तरमुपस्थिताया इत्यर्थः। अनेन विलम्बितोपस्थितिकत्वं एको हेतुः उक्त इति मन्तव्यम्। द्वितीयहेतौ विप्रकृष्टत्वे हेतुमाह - **अविधेयेति।** निवृत्तिर्नामाननुष्ठेयता, अनङ्गता वा। सा च अविधेयनखविदलनादिगता इत्यर्थः।

---

1. गृहमेधीयाधिकरणे (जै. सू. १०-७-९) अष्टौ पक्षाः उपन्यस्ताः। तत्रायं पञ्चमः पक्षः। अत्र दोषोद्भावनपूर्वकं षष्ठसप्तमाष्टमाः प्रवृत्ताः। गृहमेधीयः अपूर्वः न विकृतिः, प्रत्यक्षविहिताज्यभागेनैव अङ्गाकाङ्क्षायाः शान्तिः, अतो न अङ्गान्तरप्रसक्तिः तन्निवृत्तिर्वा-इत्यष्टमपक्षस्य सिद्धान्तितत्वात् अङ्गान्तरनिवृत्तिरूपपरिसङ्ख्यायाः असंभवात् उक्तपञ्चमपक्षस्य पूर्वपक्षत्वं इत्यभिप्रेत्य गृहमेधीयाधिकरणपूर्वपक्षरीत्या इत्युक्तम्॥

2. नियतेन अवहननेनैव तण्डुलनिष्पत्तेरुपपत्त्या नखविदलनमन्तराऽनुपपत्तिरूपार्थापत्तेः अप्रसरात्।

3. फलतः- सार्वविभक्तिकः तसिः। फलयोः इत्यर्थः।

4. प्रत्यासन्नत्वं सन्निकृष्टत्वम्; तच्च विधेयस्य समानपदोपात्तत्वात्।

एवं विविक्तासु तिसृषु विधासु किंविधः श्रवणविधिराश्रीयते ।

श्रवणविधेरपूर्वविधित्वोपपादनम्

प्रकटार्थकारादयः[1] केचिदाहुः—अपूर्वविधिरयम् । अप्राप्तत्वात् । न हि 'वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुः' इति अन्वयव्यतिरेकप्रमाणमस्ति[2] । लोके कृतश्रवणस्यापि बहुशस्तदनुत्पत्तेः अकृतश्रवणस्यापि गर्भगतस्य वामदेवस्य तदुत्पत्तेः उभयतोव्यभिचारात्[3] । न वा श्रवणमात्रं श्रोतव्यार्थसाक्षात्कारहेतुः इति शास्त्रान्तरश्रवणे गृहीतः सामान्यनियमोऽस्ति, येनात्र विशिष्य हेतुत्वग्राहकाभावेऽपि सामान्यमुखेनैव हेतुत्वं प्राप्यत इत्याशङ्क्येत । गान्धर्वादिशास्त्रश्रवणस्य षड्जादिसा-

---

इदानीं प्रकृतं श्रवणविधिविचारमारभते - **एवमिति** ।

अप्राप्तत्वादिति । ब्रह्मसाक्षात्कारं प्रति वेदान्तश्रवणस्य साधनतया मानान्तरात् अनधिगतत्वेन अप्राप्तार्थकत्वात्[4] इत्यर्थः । ननु मानान्तरादनधिगतत्वमसिद्धम् । अन्वयव्यतिरेकाभ्यां तदवगतिसम्भवात् । तथा हि- वेदान्तश्रवणे सति ब्रह्मसाक्षात्कारो दृश्यते, असति च तस्मिन् न दृश्यत इति, तत्राह - **न हीति** । **तदनुत्पत्तेरिति** । साक्षात्कारानुत्पत्तेः इत्यर्थः । **वामदेवस्येति** । तथा च श्रुतिः 'गर्भ एवैतच्छयानो वामदेव एवमुवाच' [ऐ. उ. १-५] इति । एवं - पूर्वोक्तप्रकारेण एतद् - ब्रह्मज्ञानजन्मना स्वकीयां शक्तिं उवाच इत्यर्थः । ननु - गान्धर्वशास्त्रश्रवणे षड्जादिस्वरसाक्षात्कारः तदभावे तदभाव इति दृष्टम् । तत्र श्रोतव्यार्थविशेषस्वरसाक्षात्कारं प्रति गान्धर्वशास्त्रविचारात्मकस्य श्रवणविशेषस्य कारणत्वग्रहकाले लाघवात् श्रोतव्यार्थसाक्षात्कारत्वावच्छिन्नं प्रति श्रवणमात्रस्य[5] कारणत्वं गृह्यते । तथा च ब्रह्मसाक्षात्कारवेदान्तश्रवणयोः विशिष्य कार्यकारणभावग्रहणाभावेऽपि ब्रह्मसाक्षात्कारस्यापि श्रोतव्यार्थसाक्षात्कारत्वात् वेदान्तश्रवणस्यापि श्रवणत्वात् उक्तसामान्यरूपेण वेदान्तश्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वं प्राप्तमेव इति नापूर्वविधिः इति - नेत्याह - **न वा श्रवणमात्रमिति** । धर्मश्रवणस्थले अदृष्टरूपस्य अलौकिकश्रेयस्साधनताविशिष्टयागादिरूपस्य वा धर्मस्य साक्षात्कारायोग्यतया साक्षात्कारादर्शनेन उक्तसामान्यकार्यकारणभावस्य व्यभिचारात् न लाघवावतार[6] इति तत्र गान्धर्वशास्त्रश्रवणस्य अन्वयादिना स्वरसाक्षात्कारहेतुत्वग्रहेऽपि वेदान्तश्रवणस्य न ब्रह्मसाक्षात्कारहेतुत्वप्राप्तिः इत्याह - **गान्धर्वादीति** ।

---

1. प्रकटार्थकाराः अनुभूतिस्वरूपाचार्याः । 'आदि' शब्देन स्वातन्त्र्येण अदृष्टद्वारा साक्षात्कारं प्रति वेदान्तश्रवणस्य साधनत्वं मानान्तरेणाप्राप्तं इति वादिनः संगृह्यन्ते ।

2. अन्वयव्यतिरेकसहचारज्ञानसहकृतप्रत्यक्षादिप्रमाणमित्यर्थः ।

3. उभयतोव्यभिचारात्—उभयस्मात्-अन्वयव्यभिचारः व्यतिरेकव्यभिचारश्च इत्युभयविधात् व्यभिचारात् ।

4. 'आत्मा श्रोतव्य' इति वाक्यस्य प्रत्यक्षादिमानान्तरानधिगतत्वरूपमप्राप्तत्वं न संभवति, श्रावणप्रत्यक्षविषयत्वात्; तेन अप्राप्तत्वादिति हेतूक्तिः न सङ्गच्छते इत्याशङ्क्य अप्राप्तार्थकत्वात् इति व्याख्यातम् ।

5. श्रवणमात्रस्य-श्रवणत्वावच्छिन्नस्य ।

6. असत्येव बाधके लाघवन्यायावतारात् ।

क्षात्कारहेतुत्वाभ्युपगमेऽपि कर्मकाण्डादिश्रवणात् तदर्थधर्मादिसाक्षात्कारादर्शनेन व्यभिचारात्[1]। तस्मादपूर्वविधिरेवायम्। भाष्येऽपि 'सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्'

कर्मेति। अत्र 'आदि' पदेन हिरण्यगर्भादिदेवताप्रतिपादकवाक्यजातं गृह्यते। 'धर्मादि' इति 'आदि' पदेन हिरण्यगर्भादिदेवता गृह्यते। **तस्मादिति**। प्राप्त्यभावात् इत्यर्थः।

अत्रार्थे सम्मतिमाह - **भाष्येऽपीति**। भाष्येऽप्यपूर्वविधिरेवाङ्गीकृतः इति सम्बन्धः। अयमर्थः बृहदारण्यके श्रूयते - 'तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' [बृ. उ. ३-५-१] इति। यस्मात् अतिक्रान्ता ब्राह्मणाः श्रवणादिसाधनैरात्मानं विदित्वा जीवन्मुक्तिव्यञ्जकं सकलविक्षेपरहितं[2] परमहंसाश्रमं प्राप्ताः, तस्मात् इदानीन्तनोऽपि ब्राह्मणः - ब्रह्मसाक्षात्कारार्थी पाण्डित्यं निर्विद्य बाल्येन स्थातुमिच्छेत्। विचारप्रयोजकापातरूपा बुद्धिः अविद्यानिवृत्त्यादिकार्याक्षमत्वात् पण्डा, साऽस्य सञ्जाता इति पण्डितः, तस्य कृत्यं पाण्डित्यं-श्रवणं इत्यर्थः। बाल्यं नाम बालस्य - शिशोः कृत्यं दम्भदर्पादिराहित्यम्, न तु बालेप्रसिद्धयथेष्टचेष्टारूपम्। तस्य बहिर्मुखत्वापादकत्वेन विद्याविरोधित्वात्। दम्भादिराहित्यरूपभावशुद्धिवाचकेन बाल्यपदेन भावशुद्धिसाध्यं मननं लक्ष्यते। श्रवणानन्तरभावित्वात् तस्य। बाल्यं च पाण्डित्यं च निर्विद्य - निश्चयेन लब्ध्वा - तदुभयं सम्यगनुष्ठाय इति यावत्[3]। अथ - अनन्तरं मुनिः स्यात् मननशीलो भवेत् इति विधिः। ध्यानं अत्र मननम्। ध्याननिष्ठे व्यासादौ मुनिशब्दप्रयोगदर्शनात्, ध्यानं विना विचारमात्रविश्रान्ते तदप्रयोगाच्च। तथा च अपूर्वत्वात् यथा श्रवणे विधिः, एवं मौनस्य विद्यासहकारिणः - विद्योत्पत्तौ साधनस्य विधिरेवाश्रयितव्यः अपूर्वत्वादेव इति भाष्यार्थः। सूत्रार्थस्तु — तद्वतः - श्रवणमननजनिततत्त्वनिर्णयरूपविद्यावतः तत्त्वसाक्षात्कारार्थिनः सन्न्यासिनः पाण्डित्यबाल्यापेक्षया तृतीयं मौनं 'अथ मुनिः' इति वाक्येन विधीयते। ननु - पाण्डित्यबाल्याभ्यां निर्णीततत्त्वः तत्त्वसाक्षात्कारार्थी ध्याने स्वयमेव प्रवर्तते, रत्नतत्त्वसाक्षात्कारार्थीव रत्नतत्त्वगोचरप्रत्ययसन्ततौ। न च - तत्त्वसाक्षात्कारार्थिनः तत्साधनश्रवणादावपि स्वयमेव प्रवृत्तिस्स्यादिति

---

1. यद्यपि कृतश्रवणस्यापि ब्रह्मसाक्षात्कारादर्शनस्य पूर्वमुक्तत्वात् तत्रापि व्यभिचारः वक्तुं शक्यते, तथाऽपि तस्य विप्रतिपन्नत्वात् संप्रतिपन्नस्थलाभिप्रायेण कर्मकाण्डश्रवणमुदाहृतम्। विप्रतिपन्नत्वे बीजं तु प्रतिबन्धकदुरितसत्त्वेन जन्मान्तरकृतश्रवणादिना च उभयविधव्यभिचारपरिहारसंभावना।

अत एव विशिष्यकार्यकारणभावनिराकरणानन्तरं सामान्यरूपेण कार्यकारणभावाशङ्कनस्याप्युपपत्तिः।

अथ वा - सामान्यतः कार्यकारणभावग्रहोऽपि अपूर्वविधित्वविरोधी। अन्यथा नियम्यावघातव्यक्तिसाध्यापूर्वीयतण्डुलव्यक्तौ मानान्तरेण अवहननस्य कारणत्वज्ञानाभावात् अपूर्वविधिः स्यात्, इत्यभिप्रायेणोपपत्तिः। स्पष्टं चैतत् **परिमले** सहकार्यन्तराधिकरणे।

2. विक्षेपो विद्यत एव। परन्तु न सः अभिमानपूर्वकः। अतः स न सुखदुःखजनकः इति फलतः विक्षेपरहितं परमहंसाश्रमं प्राप्ताः इति भावः। अथ वा योगिपरमहंसाश्रमं प्राप्ताः इत्यर्थः।

3. इति यावत्– 'सम्यगनुष्ठाय' इत्यनेन वाक्येन यावदुक्तं भवति, तावदुक्तं भवति 'निर्विद्य' इत्यनेन इत्यर्थः।

[ब्र. सू. ३-४-४७] इत्यधिकरणे विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवत् विधिरेवाश्रयितव्यः, अपूर्वत्वात्' इति पाण्डित्यशब्दशब्दिते श्रवणे अपूर्वविधिरेवाङ्गीकृतः - इति ।

श्रवणविधेः अपूर्वविधित्वनिराकरणपुरस्सरं नियमविधित्वोपपादनम्

वेदान्तश्रवणस्य नित्यापरोक्षब्रह्मसाक्षात्कारहेतुत्वं न अप्राप्तम् । अपरोक्षवस्तुविषयकप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वस्य प्राप्तेः शाब्दापरोक्षवादे व्यवस्थापनात् । तदर्थमेव हि

तत्रापि विधिवैयर्थ्यशङ्का तुल्या इति - वाच्यम् । विधिं विना वेदान्तश्रवणे प्रवृत्त्यसम्भवस्य साधितत्वात् । तथा च मौनविधिः व्यर्थः - इत्यत्राह - **पक्षेणेति** । मौनस्य सहकार्यन्तरस्य विधिः अङ्गीकर्तव्यः । पक्षेणाप्राप्तिसत्त्वात् । साक्षात्कारार्थं ध्याने स्वयमेव प्रवृत्तस्यापि विषयदर्शनप्राबल्यात् ध्यानस्य कदाचिदप्राप्तिस्सम्भवति । तथा च मौनविधेः अपूर्वविधित्वाभावेऽपि नियमविधित्वं सिद्ध्यत्येव । सति च नियमविधौ तदतिक्रमे नियमादृष्टालाभेन साक्षात्कारानुदयभीत्या स्वभावप्राप्तमपि विषयदर्शनं यत्नेन निवार्य ध्यान एव प्रवर्तते इति 'पक्षेण' इति सूत्रभागाभिप्रायः । ननु - ब्रह्मविद्याप्रधाने प्रकरणे कथं ध्यानादिविधिः वाक्यभेदप्रसङ्गात् इति, नेत्याह - **विध्यादिवदिति**[1] । [प्रधाने] अङ्गविधिवत् इत्यर्थः । यथा प्रधानविधिपरे प्रकरणे अवान्तरवाक्यभेदेन प्रयाजाद्यङ्गविधिः, तथा ब्रह्मविद्याङ्ग[2]ध्यानादिविधिः इत्यर्थः । उक्तरीत्या मौनविधेर्नियमविधित्वे स्थिते भाष्यगतापूर्वत्ववचनं मौनविध्यंशे पाक्षिकाप्राप्त्यभिप्रायं द्रष्टव्यम् । यथासूत्रं पक्षे प्राप्त्यभावात् इत्येव वक्तव्ये भाष्ये अपूर्वत्वात् इति वचनं श्रवणविधिः अपूर्वविधिरेव इति ज्ञापनार्थं, अप्राप्तिमात्रे च दृष्टान्तदार्ष्टान्तिकभावो विवक्षितः, इति प्रकटार्थकारादीनामाशयः ।

अपूर्वविधित्वपक्षं दूषयति - **वेदान्तश्रवणस्येति** । [3]विचारविशिष्टवेदान्त [ज्ञान] रूपस्य श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वं विधिं विनापि प्राप्तं इत्यर्थः । ननु वाक्यस्य कथं साक्षात्कारहेतुत्वम्, इन्द्रियजन्यज्ञानस्यैव साक्षात्कारत्वात्, अत आह - **अपरोक्षवस्त्विति** । अपरोक्षवस्तुविषयकत्वं ज्ञानस्यापरोक्षत्वम्, न तु इन्द्रियजन्यत्वम् । वस्त्वापरोक्ष्यं च वस्तुव्यवहारानुकूलचैतन्याभिन्नत्वं इति शाब्दापरोक्षवादे वक्ष्यते । तथा च नित्यापरोक्षत्वेनश्रुतिसिद्धब्रह्मरूपवस्तुविषयकत्वात् वेदान्तजन्यज्ञानस्य साक्षात्कारत्वसिद्धिः इत्यर्थः । ननु अस्मिन् शास्त्रे शाब्दापरोक्षवादस्य का सङ्गतिः ? अत आह - **तदर्थमेव हीति** । वेदान्तानां

---

1. विध्यादिवदिति - प्रधानमारभ्याङ्गपर्यन्तः विधिः । तत्र प्रधानः क्रतुः विध्यादिः—विधिमुख्यः—प्रधानमिति यावत् । विधेः आदिः इति विग्रहः । अत एव अङ्गं समिदादिः विध्यन्तः ; स हि विधेः - प्रधानविधेः पश्चादिति । विध्यादौ इव विध्यादिवत् ।

2. अङ्गेति । साधनेत्यर्थः ।

3. 'श्रोतव्यः' इति विधीयमानं श्रवणं 'शक्तितात्पर्यविशिष्टवेदान्तशब्दावधारणात् श्रवणशब्दाभिधेयात्' इति विवरणोक्त्या विचारविशिष्टवेदान्तज्ञानरूपं इत्युक्तम् । विचारस्य शक्त्यात्मकतात्पर्यनिर्णयानुकूलमनोव्यापाररूपस्य उक्तश्रवणशब्दार्थकोटिप्रविष्टप्रायस्य विधेयत्वात् श्रवणस्य विधेयत्वव्यवहारः ।

तत्प्रस्तावः । न च - तावता ब्रह्मप्रमाणत्वेन आपातदर्शनसाधारणब्रह्मसाक्षात्कारहेतुत्वप्राप्तावपि अविद्यानिवृत्त्यर्थमिष्यमाणसत्तानिश्चयरूपतत्साक्षात्कारहेतुत्वं श्रवणस्य न प्राप्तं इति वाच्यम् । विचारमात्रस्य विचार्यनिर्णय[1]हेतुत्वस्य ब्रह्मप्रमाणस्य तत्साक्षात्कारहेतुत्वस्य च प्राप्तौ विचारितवेदान्तशब्दज्ञानरूपस्य श्रवणस्य तद्धेतुत्वप्राप्तेः । न च उक्तोभयतोऽव्यभिचारः । सहकारिवैकल्ये-

ब्रह्मापरोक्षप्रमितिजनकत्वसिद्ध्यर्थमेव तद्वादसङ्गतिः[2] नान्यार्थं इत्येतत् प्रसिद्धं इत्यर्थः । ननु अपरोक्षवस्तुविषयकं प्रमाणं स्वविषये साक्षात्कारहेतुः इति शाब्दापरोक्षवादे प्रसाधनेन वेदान्तानामपि स्वविषये नित्यापरोक्षे ब्रह्मणि अपरोक्षज्ञानसामान्यहेतुत्वमेव[3] प्राप्तम्, न तु [4]'सत्तानिश्चयरूपतत्साक्षात्कारहेतुत्वम्[5] । तच्च विचारविशिष्टवेदान्त[ज्ञान]रूपश्रवणस्यैव युक्तम् । अन्यथा विचारात् प्रागपि सत्तानिश्चयप्रसङ्गात् । न च वाक्यजन्यसाक्षात्कारमात्रादेवाविद्यानिवृत्तिलक्षणफलसम्भवात् सत्तानिश्चयरूपत्वं साक्षात्कारस्य नान्वेषणीयं इति वाच्यम् । तत्र तत्र ब्रह्मोपदेशप्रदेशेषु यावत्संशयनिवृत्ति पुनःपुनः प्रश्नप्रतिवचन [रूप] लिङ्गेन 'वेदान्तविज्ञानसुनिश्चितार्थाः' [मु.उ.३-२-६] इत्यादिश्रुत्या श्रुतब्रह्मणोऽपि यथापूर्वं संसारानुवृत्त्यनुमिताविद्यानिवृत्त्यभावरूपलिङ्गेन श्रवणमननध्यानशमदमभक्तिवैराग्यादीनां ज्ञानपरिपाकहेतूनां विधिदर्शन[रूप]लिङ्गेन च सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्यैव अविद्यानिवृत्त्यर्थमिष्यमाणत्वात् । तथा च वेदान्तश्रवणस्य उक्तरूपसाक्षात्कारहेतुत्वं अप्राप्तमेव इति शङ्कते - **न च तावतेति** । वेदान्तानामिति शेषः । अपरोक्षवस्तुविषयकं प्रमाणं स्वविषये साक्षात्कारहेतुः इति प्रसाधनमात्रेणेत्यर्थः । अपरोक्षवस्तुविषयकं प्रमाणं अपरोक्षज्ञानहेतुः इति स्थिते विचारो विचार्यनिर्णयहेतुः इति च स्थिते कार्यकारणभावद्वयमेलनेन[6] प्रकृते विचारविशिष्टवेदान्तज्ञानरूपं श्रवणं सत्तानिश्चयरूपब्रह्मसाक्षात्कारहेतुः इति सिद्ध्यति इत्याह - **विचारमात्रस्येति । सहकारीति** । चित्तैकाग्र्यादिरूपसहकारिवैकल्येन इत्यर्थः । उक्तकार्यकारणभावद्वयरूपप्रमाणबलेन[7] श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वे सिद्धे वामदेवस्य जन्मान्तरीयं श्रवणादिकं कल्प्यते, यथा जातमात्रे जन्तौ दृश्यमानभोगस्य कारणतया प्राग्भवीयं कर्म कल्प्यते तद्वत्, अतो न व्यतिरेकव्यभिचार इत्याह -

1. निर्णयेति—अत्र साक्षात्कारत्वानिवेशात् कर्मकाण्डादिश्रवणे न पूर्वोक्तव्यभिचारः ।
2. निरूपणं अत्र सङ्गतिशब्दार्थः ।
3. अपरोक्षज्ञानत्वावच्छिन्नं प्रति हेतुत्वम् ।
4. सत्तानिश्चयरूपेति - प्रमात्वेननिश्चितेत्यर्थः ।
5. तादृशसाक्षात्कारत्वावच्छिन्नं प्रति हेतुत्वम् ।
6. कार्यकारणभावद्वयमेलनेनेति—एकनिश्चयविशिष्टेन अपरनिश्चयेनेत्यर्थः । उक्तमेलनं विनाऽपि, विचारस्य विचार्यमाणं प्रमात्रव्यवहितं साक्षात्कारयोग्यं च यद्वस्तु तद्विषयकसाक्षात्कारजनकतायाः अन्वयव्यतिरेकज्ञानसहकृतप्रत्यक्षसिद्धतया ब्रह्मविचारेऽपि तन्मूलानुमानात् ब्रह्मसाक्षात्कारहेतुत्वसिद्धिः इत्यपि बोध्यम् ।
7. उक्तकार्यकारणभावद्वयं ज्ञायमानं सत् लिङ्गविधया अनुमानप्रमाणं भवति, तद्बलेन इत्यर्थः ।

नान्वयव्यभिचारस्यादोषत्वात् , जातिस्मरस्य जन्मान्तरश्रवणात् फलसम्भवेन व्यतिरेकव्यभिचाराभावात् । अन्यथा व्यभिचारेणैव हेतुत्वबाधे श्रुत्यापि तत्साधनताज्ञानासम्भवात् । घटसाक्षात्कारे चक्षुरतिरेकेण त्वगिन्द्रियमिव[1] ब्रह्मसाक्षात्कारे श्रवणातिरेकेण उपायान्तरमस्तीति शङ्कायां व्यतिरेकव्यभिचारस्यापि[2] अदोषत्वात्[3] । तथा च प्राप्तत्वान्नापूर्वविधिः ।

अत एव 'आवृत्तिरसकृदुपदेशात्' [ब्र. सू. ४-१-१] इत्यधिकरणभाष्ये 'दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति, यथा अवघातादीनि तण्डुलनिष्पत्ति-

---

जातिस्मरस्येति । पूर्वजातिं स्मरतो वामदेवस्य इत्यर्थः । **अन्यथेति** । उक्तरीत्या द्विविधव्यभिचारपरिहारानुपगमे इत्यर्थः । व्यभिचारनिश्चयेन हेतुत्वाभावरूपबाधनिश्चयात् श्रवणविधेरबोधकतापत्त्या तवाप्यपूर्वविधिर्न स्यात् इत्यर्थः । ब्रह्मसाक्षात्कारे श्रवणमिव तपोविशेषादिकं उत्कृष्टजन्मप्राप्तिरूपं वा कारणान्तरमस्तीति शङ्काकाले वामदेवस्य कारणान्तरात् ज्ञानमुत्पन्नं इति शङ्कासम्भवेन श्रवणस्य वामदेवे व्यतिरेकव्यभिचारज्ञानं श्रवणस्य साक्षात्कारहेतुत्वग्रहप्रतिबन्धकं न भवति । न च - एकस्य पदार्थस्य ज्ञाने परस्परनिरपेक्षकारणद्वयासम्भवेन ब्रह्मसाक्षात्कारे कारणान्तरसत्त्वशङ्कैव न जायत इति - वाच्यम् , लोके तथादृष्टत्वात् इत्याह - **घटेति** । वेदान्तश्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वे विधिं विनैव प्राप्ते फलितमाह - **तथा चेति** । श्रवणादिविधेः नियमविधित्वे सत्येव आवृत्त्यधिकरणं सङ्गच्छते इत्याह - **अत एवेति** । अपूर्वविधित्वाभावादेव इत्यर्थः । अत एव आवृत्त्युपदेश इति सम्बन्धः । 'दर्शनपर्यवसानानि' इत्यारभ्य 'तण्डुलनिष्पत्तिपर्यवसानानि' इत्यन्तस्य भाष्यस्य इयं योजना - दृष्टार्थानि श्रवणादीन्यावर्त्यमानानि सन्ति दर्शनपर्यवसानानि भवन्ति, यथा अवघातादीन्यावर्त्यमानानि तण्डुलनिष्पत्तिपर्यवसानानि भवन्ति - इति । 'दृष्टार्थानि' इत्यत्र दृष्टं फलं आत्मदर्शनमेव । अयं भावः - 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' [बृ. उ. २-४-५] इत्यादिना आत्मदर्शनोद्देशेन श्रवणादीनि विधीयन्ते । तत्र किमेतानि सकृदनुष्ठेयानि, किं वा यावदात्मदर्शनमावर्त्यानि इति संशये - सकृदेवानुष्ठेयानि, तावता विधेश्चारितार्थ्यात्; यथा अग्निचयने 'सर्वौषधस्य पूरयित्वाऽवहन्ति' इति वाक्यविहितं सर्वौषधीनामवहननं उपधेयोलूखलसंस्काररूपं सकृदेवानुष्ठीयते तद्वत्; तथा च सकृदनुष्ठितश्रवणादिजन्यमदृष्टं जन्मान्तरे ब्रह्मदर्शन-

---

1. त्वगिन्द्रियमिव - ननु घटसाक्षात्कारे परस्परनिरपेक्षोक्तकारणद्वयजन्यतावच्छेदकं भिन्नमेव, ब्रह्मसाक्षात्कारे तु न तथा, इति दृष्टान्तवैषम्यं इति चेत्—सत्यम् । अत एव 'शङ्कायां' इत्युक्तम् । अत्रापि कार्यतावच्छेदकवैजात्यशङ्का शङ्कापदेन सङ्गृहीता इति बोध्यम् ।

2. व्यतिरेकव्यभिचारस्यापि— 'श्रवणरूपकारणाभावेऽपि वामदेवस्य ब्रह्मसाक्षात्कारः' इति व्यतिरेकव्यभिचारज्ञानस्य सत्त्वेऽपि इत्यर्थः ।

3. अदोषत्वात् — श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वग्रहप्रतिबन्धकत्वाभावात् । तादृक्शङ्काविरहसहकृतस्यैव व्यतिरेकव्यभिचारज्ञानस्य प्रतिबन्धकत्वात् । यथा वायौ नीलपीतादियावद्रूपविशेषाभाववत्तानिश्चयः अतिरिक्तरूपसद्भावशङ्कायां 'वायू रूपवान् न वा' इति संशयस्य न प्रतिबन्धकः एवम् ।

पर्यवसानानि' इति श्रवणस्य ब्रह्मदर्शनार्थस्य दृष्टार्थतया दार्शपूर्णमासिकावघातन्यायप्राप्तावृत्त्युपदेशः। अपूर्वविधित्वे तु स न सङ्गच्छते सर्वौषधावघातवत्। अग्निचयने 'सर्वौषधस्य पूरयित्वाऽवहन्ति अथैतदुपदधाति' इति उपधेयोलूखलसंस्कारार्थत्वेन विहितस्यावघातस्य दृष्टार्थत्वाभावान्नावृत्तिरिति हि तन्त्रलक्षणे स्थितम् [जै. सू. ११-१-६]।

अतो नियमविधिरेवायम्। तदभावे हि यथा वस्तु किञ्चिच्चक्षुषा वीक्षमाणस्तत्र स्वागृहीते सूक्ष्मे विशेषान्तरे केनचित् कथिते तदवगमाय तस्यैव चक्षुषः पुनरपि सप्रणिधानं व्यापारे प्रवर्तेत, एवं मनसा 'अहं' इति गृह्यमाणे जीवे वेदान्तैरध्ययनगृहीतैरुपदिष्टं निर्विशेषब्रह्मचैतन्यरूपत्वमाकर्ण्य

हेतुः इत्यपूर्वविधित्वं श्रवणादिविधीनामिति प्राप्ते - सिद्धान्तः — श्रवणाद्यावृत्तिः कर्तव्या। कुतः ? असकृदुपदेशात्। तथा हि - भृगुवल्ल्यां भृगुं प्रति पिता असकृत् 'तपसा ब्रह्म विजिज्ञासस्व' [तै. उ. ३-२] इत्युपदिशति। तपः - आलोचनं ब्रह्मविचारः। तथा छान्दोग्यषष्ठाध्याये श्वेतकेतुं पुत्रं प्रति पिता विचारपूर्वकमसकृत् 'तत्त्वमसि' इत्युपदिशति। किं च श्रवणादिभिरात्मदर्शनफले जननीये श्रवणाद्यावृत्तिरूपदृष्टद्वारसम्भवे अदृष्टद्वारकल्पनायोगात् तत्त्वंपदार्थयोः श्रवणाद्यावृत्तिं विना दुर्बोधत्वाच्च तण्डुलनिष्पत्तिफलकावघातवदावृत्तिरेव, न त्वग्निचयनान्तर्गतावघातवदनावृत्तिः, तदन्तर्गतावघातस्यादृष्टार्थत्वेन वैषम्यात् - इति व्युत्पादितं आवृत्त्यधिकरणे। तत् अपूर्वविधिवादिनां न सङ्गच्छते इति भावः। तन्त्रलक्षणं एकादशाध्यायः। **अत इति**। प्राप्तत्वादित्यर्थः। अस्य हेतोः एवकारार्थे[1] अपूर्वविधित्वाभावे अन्वयः। नियमविधित्वे हेतुमाह - **तदभावे हीति**। तदभावे मनस एव सावधानं तत्र प्रणिधाने कदाचित् पुरुषः प्रवर्तेत[2] इति सम्बन्धः। मनसा गृह्यमाणात्मगतविशेषग्रहणाय मनोव्यापार एव यत्नेन प्रवृत्तौ दृष्टान्त[3]माह - **यथेति**। **किञ्चिदिति**। रत्नादीत्यर्थः। **तत्रेति**। रत्नादावित्यर्थः। **तस्यैवेति**। न तु व्यापारान्तर इत्येवकारार्थः[4]। पुनरपि चक्षुषो व्यापारे प्रवर्तत इति सम्बन्धः। प्रणिधानं यथा भवति तथा प्रवर्तत इति प्रवृत्तिक्रियाविशेषणं प्रणिधानम्। तच्च रत्नादिवस्त्वभिमुखतया चक्षुषः स्थापनम्, अनन्तरमुन्मीलनव्यापारानुकूलयत्नः प्रवृत्तिः, इति प्रणिधानप्रवृत्त्योर्भेदः। **वेदान्तैरिति**। 'नेह नानास्ति किञ्चन'[5] [बृ. उ. ४-४-१९] 'प्रज्ञानं ब्रह्म'[6]

---

1. अन्ययोगव्यवच्छेदः एवकारार्थः प्रकृते। एवञ्च 'नियमविधिरेव अयम्' इत्यस्य अयं - श्रवणविधिः, नियमविधिरेव - नियमविधित्ववान् नियमविधित्वान्यापूर्वविधित्वाभाववांश्च इत्यर्थः। तत्र अपूर्वविधित्वाभावे प्राप्तत्वं हेतुः इत्यर्थः।

2. नियमविधित्वपक्षे श्रवणेनैव ब्रह्मसाक्षात्काराङ्गीकारात् मनःप्रणिधानमात्रात् साक्षात्कारानुत्पत्त्या तत्र प्रवृत्तेः निष्फलत्वात् न इष्टापत्तिसंभवः इति भावः।

3. यज्जन्यग्रहविषयगतः यो विशेषः सः प्रणिधानसहकृततज्जन्यग्रहविषयः इति सामान्यनियमे दृष्टान्तमाह इत्यर्थः।

4. 'तस्यैव' इत्येवकारः 'व्यापारे' इत्यनन्तरं संबध्यते इति भावः।

5. अनेन निर्विशेषत्वबोधः। 6. अनेन चैतन्यरूपत्वबोधः।

तदवगमाय तत्र सावधानं मनस एव प्रणिधाने कदाचित् पुरुषः प्रवर्तेतेति वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी[1] स्यात्। '[यतो वाचो निवर्तन्ते] अप्राप्य मनसा सह' [तै. उ. २-४] इति श्रुतिः 'मनसैवानुद्रष्टव्यम्' [बृ. उ. ४-४-१९] 'दृश्यते त्वग्र्यया बुद्ध्या' [क. उ. ३-१२] इत्यपिश्रवणेन अनवहितमनोविषया इतिशङ्कासम्भवात्।

[ऐ. उ. ५-३] 'अहं ब्रह्मास्मि'[2] [बृ. उ. १-४-१०] इत्यादिभिः इत्यर्थः। इह - ब्रह्मणि नाना-ज्ञातृज्ञानज्ञेयरूपेण भिन्नं विशेषजातं किञ्चिदपि नास्ति। प्रकृष्टं ज्ञानं - प्रज्ञानं - नित्यस्वप्रकाशजीवचैतन्यं ब्रह्म। अहं - बुद्ध्यादिसाक्षिभूतश्चिदात्मा ब्रह्म अस्मि - भवामि इति श्रुतीनामर्थः। अध्ययनपदं साङ्गाध्ययनपरम्[3]। आकर्ण्य - परोक्षतया ज्ञात्वा श्रुतौ श्रद्दधानः। **तदवगमायेति**। निर्विशेषस्वरूपत्वाधिगमायेत्यर्थः। **तत्रेति** 'अहं' इतिगृह्यमाणात्मनीत्यर्थः। सावधानं-ऐकाग्र्यं यथा भवति तथा। ननु अहमिति गृह्यमाणे जीवे विशेषाकर्णनानन्तरं वेदान्तश्रवण इव कदाचित् मनोव्यापारे वेदान्तविचारनिरपेक्षेऽपि प्रवृत्तिस्स्यात्[4]इत्ययुक्तम्, श्रुत्या ब्रह्मणि मनोविषयत्वनिषेधात् साङ्गाध्ययनवतस्तन्निषेधावगतिसम्भवात् इति, नेत्याह - **अप्राप्येति**। श्रुतिः अनवहित-मनोविषया इति सम्बन्धः। वाचः - सत्यज्ञानादिशब्दाः अप्राप्य - शक्त्या ब्रह्माप्रतिपाद्य मनसा सह निवर्तन्ते-लक्षणामाश्रयन्ते इत्यर्थः। 'मनसा सह' इत्यनेन मनसोऽपि ब्रह्मणि प्राप्तिर्निषिध्यते इति भावः। ब्रह्मणि मनोविषयत्व-निषेधवत्तद्विषयत्वमपि श्रुत्या उच्यते, तथा च श्रुत्योः विरोधे सति मनश्शब्दितबुद्धिगम्यत्वप्रतिपादकश्रुतौ बुद्धेरग्र्य-त्वविशेषणबलाद्विषयत्वनिषेधश्रुतेरनवहितमनोविषयत्वनिषेधार्थकत्वप्रतीतेः (तथा च) साङ्गाध्ययनवत उक्तव्यवस्था-प्रतीतिसम्भवात् मनस एव व्यापारे प्रवृत्तिः दुर्वारेत्याह - **मनसैवेति**। अनवहितत्वं एकाग्रताशून्यत्वम्। **शङ्कासम्भवादिति**। अग्र्यत्वविशेषणसामर्थ्येन यथोक्तव्यवस्थानिश्चयसम्भवात् इति वक्तव्ये शङ्कासम्भवादित्युक्तेरयमाशयः - निर्गुणब्रह्मसाक्षात्कारे मनसः करणत्वं नास्ति, औपनिषदत्वश्रुतिविरोधात्। सोपाधिकात्मसाक्षात्कारेऽपि न तस्य करणत्वम्, तत्साक्षात्कारस्य नित्यसाक्षिरूपत्वात्। 'मनसैवानुद्रष्टव्यम्' [बृ. उ. ४-४-१९] इत्यादौ तृतीया[5] वाक्योत्थवृत्तिसाक्षात्कारं प्रति साधनत्वाभिप्राया - इत्यादिकं सर्वं शाब्दापरोक्षवादे वक्ष्यते। तथा च [6]वस्तुतो मनसः करणत्वाभावात् मनस एव व्यापारे पुरुषः कदाचित् प्रवर्तेतेत्युत्प्रेक्षितं नियमविधिव्यावर्त्यमसङ्गतमेवेति।

---

1. पाक्षिकी - कादाचित्की।
2. अनेन ब्रह्मरूपत्वबोधः।
3. अन्यथा अधीतवेदस्यापि शिक्षाकल्पव्याकरणादीनां वेदाङ्गानामध्ययनाभावे सति व्युत्पत्तेरभावात् जीवस्य निर्विशेषब्रह्मचैतन्यरूपत्वबोधो न भवेत् इति भावः।
4. इति यदुक्तं तदयुक्तमित्यर्थः।
5. 'मनसा' इति तृतीया न करणे, अपि तु हेतौ।
6. 'न हि वस्तुसत्साधनान्तरप्राप्तावेव नियमविधिः इति कुलधर्मः' इति वक्ष्यमाणरीत्या भ्रमप्राप्तस्यापि व्यावर्त्यत्वसम्भवात् उत्प्रेक्षा नासङ्गता इति प्रतिभाति।

अथवा 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः [मु. उ. ३-१-२] इत्यादिश्रवणात् भिन्नात्मज्ञानान्मुक्तिरितिभ्रमसम्भवेन मुक्तिसाधनज्ञानाय भिन्नात्मविचाररूपे शास्त्रान्तरश्रवणेऽपि पक्षे प्रवृत्तिस्स्यादिति अद्वैतात्मपरवेदान्तश्रवणनियमविधिरयमस्तु । इह आत्मशब्दस्य 'इदं सर्वं यदयमात्मा' [बृ. उ. २-४-६] इत्यादिप्रकरणपर्यालोचनया[1] अद्वितीया-

---

अत एव व्यावर्त्यान्तरमाह - अथवेति । अधीतसाङ्गस्वाध्यायस्य हि 'तरति शोकमात्मवित्' [छा. उ. ७-१-३] इत्यादिश्रुत्या 'आत्मज्ञानं मुक्तिसाधनम्' इति ज्ञानं भवति । न च साङ्गाध्ययनवतोऽपि लोके विचारमन्तरेणात्मतत्त्वज्ञानजन्मास्ति । आत्मप्रतिपादकवेदान्तेषु नानाविधयोजनासम्भावनया[2] तात्पर्यसंशयादेरनुभवसिद्धत्वात् । ततश्च मुक्तिसाधनज्ञानार्थी तज्ज्ञानप्रतिबन्धकतात्पर्यभ्रमसंशयादिनिरासाय वेदान्तविचारे प्रवर्तमानो यथा ब्रह्ममीमांसाशास्त्रे प्रवर्तते, तथैव न्यायसाङ्ख्यादिशास्त्रविचारेऽपि कदाचित् प्रवर्तेत । तत्रापि [3]तदभिमतयोजनया वेदान्तविचारसत्त्वात् । न च साङ्ख्यादितर्कशास्त्रगतात्मविचारस्याद्वितीयात्मविचाररूपत्वाभावेन [4]तादृशात्मनि वेदान्तानां तात्पर्यभ्रमसंशयाद्यनिवर्तकत्वात् [5]विशिष्य स्वयमेव तस्य [6]तात्पर्यभ्रमादिहेतुत्वाच्च न तत्रात्मज्ञानार्थिनां प्रवृत्तिः सम्भवतीति वाच्यम् । जीवभिन्नपरमात्मज्ञानं मुक्तिसाधनमिति भ्रमेण तत्रापि प्रवृत्तिसम्भवात् । न च - साङ्गाध्ययनवतो भिन्नात्मज्ञानं मुक्तिसाधनमितिभ्रमो न सम्भवति 'अहं ब्रह्मास्मि' [बृ. उ. १-४-१०], 'ब्रह्मविदाप्नोति परम्' [तै. उ. २-१-१] इत्यादिवेदान्तेषु जीवाभिन्नपरमात्मज्ञानस्यैव मुक्तिसाधनत्वप्रतीतेरिति - वाच्यम् । 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इतिश्रुतिगतान्यशब्देन[7] भ्रमसम्भवात् । यदा ईशं - सन्निधिमात्रेण बुद्ध्यादिप्रवर्तकम् अन्यं - [8]वस्तुगत्या बुद्ध्यादिभ्यो भिन्नम् । भ्रान्त्या बुद्ध्याद्यभिन्नत्वेन चिदात्मनो गृहीतत्वात् भिन्नत्वोपदेशः सफलः । न तु जीवभिन्नमित्यर्थः । जीवब्रह्मभेदस्य प्रत्यक्षसिद्धतया उपदेशानपेक्षत्वात् । जुष्ट-ऋषिसङ्घैः सेवितम् । 'ऋषिसङ्घजुष्टम्'

---

1. इत्यादिप्रकरणपर्यालोचनया - इत्यादि यत् आत्मप्रकरणस्थं वाक्यं तत्पर्यालोचनया इत्यर्थः ।

2. परस्परविरुद्धनानाप्रकाराकाङ्क्षादिमत्त्वसंशयादिना ।

3. तत्रापि न्यायसाङ्ख्यादिशास्त्रेऽपि तदभिमतार्थबोधौपयिकाकाङ्क्षादिमत्त्वनिर्णयपुरस्सरं तात्पर्यनिर्णायकवेदान्तविचारसत्त्वात् । तात्पर्यविषयकोऽपि वेदान्तविचारः वेदान्तप्रतिपाद्यात्मविषयोऽपि भवति इति वेदान्तविचारस्यात्मविषयत्वोक्तिः न विरुद्ध्यते अस्मिन् प्रकरणे । वस्तुतस्तु नेयमुक्तिः सङ्गता - इति वक्ष्यामः ।

4. तादृशात्मनि वेदान्तानां तात्पर्यभ्रमसंशयाद्यनिवर्तकत्वात् - अत्र तात्पर्यभ्रमशब्दः तात्पर्याभावनिश्चयपरः । अद्वितीयात्मनि वेदान्तानां तात्पर्याभावनिश्चयतात्पर्यसंशयाद्यनिवर्तकत्वात् इत्यर्थः ।

5. विशिष्य - वैपरीत्येन ।

6. तात्पर्यभ्रमादिहेतुत्वाच्च - अत्रापि तात्पर्यभ्रमशब्दः तात्पर्याभावनिश्चयपरः । आदिशब्दार्थः संशयः ।

7. श्रुतिगतान्यशब्देन - अन्यशब्दघटितेन श्रुतिवाक्येन । यदा ईशं अन्यं - द्रष्टुः स्वस्मात् अन्यं पश्यति इति भ्रमसंभवात् इत्यर्थः । भ्रमत्वं उपपादयति यदेत्यादिना ।

8. वस्तुगत्या बुद्ध्यादिभ्यो भिन्नम् - बुद्ध्यादिभ्यो भिन्नत्वेनाज्ञायमानम् ।

त्मपरत्वात् । न हि वस्तुसत्साधनान्तरप्राप्तावेव नियमविधिरिति कुलधर्मः[1]; येन वेदान्तश्रवणनियमार्थवत्त्वाय नियमादृष्टजन्यस्वप्रतिबन्धककल्मषनिवृत्तिद्वारा सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्य वेदान्तश्रवणैकसाध्यत्वस्याभ्युपगन्तव्यत्वेन तत्र वस्तुतः साधनान्तराभावान्न नियमविधिर्युज्यत इति

[श्वे. उ. ६-२१] इति श्रुत्यन्तरात् । पश्यति - ईशोऽहमिति साक्षात्करोति । तदा अस्य - ईशस्य महिमानं-महत्त्वोपलक्षितं स्वरूपं इति - एति - प्राप्नोति वीतशोकश्च भवति इति श्रुतेर्वास्तवार्थः । ननु श्रोतव्यवाक्ये आत्मविचारमात्रं प्रतीयते न तु अद्वैतात्मविचारः; ततश्च कथमनेन विधिना भिन्नात्मविचारव्यावृत्तिलाभः इत्यत आह - **इहेति** । अत्र 'आदिपदेन' 'आत्मनि........दृष्टे............सर्वं विदितम्' [बृ. उ. ४-५-६] इति प्रतिज्ञावाक्यं गृह्यते । आत्मनः सर्वाधिष्ठानतया सर्वात्मकत्वे हि सति आत्मनि विदिते तद्व्यतिरिक्तं सर्वं तत्त्वतो विदितं भवति, सर्वमात्मैवेति सामानाधिकरण्यं[2] च सिद्ध्यति । नान्यथा । तथा च श्रोतव्यवाक्यस्थमात्मपदं अद्वितीयात्मपरमेवेति[3] तद्विचारविधिना भिन्नात्मविचारव्यावृत्तिर्लभ्यते इति भावः । ननु - तण्डुलनिष्पत्तौ अवहननस्येव नखविदलनादेरपि वस्तुतस्साधनत्वात् तन्निवृत्तिफलको नियमविधिर्युक्तः । इह तु अद्वितीयब्रह्मसाक्षात्कारे भिन्नात्मविचारस्य न वस्तुतस्साधनत्वमस्ति, अतस्तन्निवृत्तिफलको नियमविधिर्न युज्यते । न च - मा भूत् भिन्नात्मविचारस्य व्यावर्त्यत्वम्, नैतावता नियमविध्यनुपपत्तिः प्रकृतेऽस्ति, गुरुनिरपेक्षविचारभाषाप्रबन्धेतिहासपुराणादीनामुदाहरिष्यमाणानां सत्तानिश्चयरूपब्रह्मसाक्षात्कारहेतुत्वसत्त्वेन व्यावर्त्यत्वसम्भवात् इति - वाच्यम् । तेषामप्यनन्तरमेव वक्ष्यमाणरीत्या अविद्यानिवर्तकसत्तानिश्चयरूपसाक्षात्कारप्रतिबन्धककल्मषनिवृत्तिद्वारा गुर्वधीनवेदान्तविचारवत् साक्षात्काराहेतुत्वेन वस्तुतस्साधनत्वाभावात् । तथा च न नियमविधिस्सम्भवति इत्याशङ्क्याह— **न हीति । कुलधर्म इति** । कुलक्रमागतधर्मस्य यथा आवश्यकता तथा वस्तुसत्साधनान्तरप्राप्तेरावश्यकत्वं न हीत्यर्थः । **येनेति** । आवश्यकत्वेनेत्यर्थः । **नियमार्थवत्त्वायेति** । विधित्सितगुर्वधीनवेदान्तश्रवणेनेव गुरुनिरपेक्षविचारादिनाऽपि सत्तानिश्चयरूपसाक्षात्कारस्वरूपोत्पत्तिसम्भवे सति गुर्वधीनवेदान्तश्रवणनियमस्य दृष्ट-

---

1. अन्यथा 'व्रीहीनवहन्ति' इत्यस्यापि नियमविधित्वं न स्यात्, अलौकिके तुषविमोके नखविदलनादेर्वस्तुतः साधनत्वाभावात् । यदि तु तुषविमोकजातीयसाधनत्वं नखविदलनादेरस्तीत्युच्येत तदा प्रकृतेऽपि शरीरातिरिक्तात्मज्ञानमात्रे भिन्नात्मविचारशास्त्रस्यापि साधनत्वमस्तीत्यनुसन्धेयम् । स्पष्टं चैतत् विवरणतत्त्वदीपने विवरणभावप्रकाशे च ।

2. इदं सामानाधिकरण्यं बाधायाम् । 'तत्त्वतो विदितं भवति' इत्युक्तेः । तथा चायमर्थः - यदिदं ब्रह्मादि भूतपर्यन्तं 'इदं ब्रह्म' इत्यादिपूर्ववाक्योपात्तं तत् सर्वं 'अयमात्मा' इति । अत्र च 'यः स्थाणुः स पुमान्' इतिवत् पूर्वोक्तसर्वप्रपञ्चाभावरूपा बाधा वाक्यार्थः । तथा च द्वैतप्रपञ्चशून्योऽयमात्मा इति 'इदं सर्वं यदयमात्मा' इति वाक्यस्य अर्थो निष्पन्नः इति भावः :

3. एतेन 'आत्मा श्रोतव्यः' इति वाक्ये अद्वितीयात्मनः पदादनुपस्थितत्वात् अपदार्थनियमे च अतिप्रसङ्गात् अद्वितीयात्मपरवेदान्तश्रवणनियमो न संभवति - इति शङ्काया अप्रसरः । अत्र आत्मशब्दात् वाक्यशेषवशेन अद्वितीयात्मनि गृहीतशक्तिकात् अद्वितीयात्मोपस्थितेः संभवात् ।

शङ्क्येत। किं तु यत्र साधनान्तरतया सम्भाव्यमानस्य पक्षे प्राप्त्या विधित्सितसाधनस्य पाक्षिक्यप्राप्तिर्निवारयितुं न शक्यते तत्र नियमविधिः, तावतैव अप्राप्तांशपरिपूरणस्य तत्फलस्य सिद्धेः।

अथवा - गुरुमुखाधीनादिव निपुणस्य स्वप्रयत्नमात्रसाध्यादपि वेदान्तविचारात् सम्भवति सत्तानिश्चयरूपं ब्रह्मापरोक्षज्ञानम्। किं तु गुरुमुखाधीनवेदान्तवाक्यश्रवणनियमादृष्टं अविद्यानिवृत्तिं प्रति कल्मषनिरासेनोपयुज्यत इति तदभावेन प्रतिबद्धं अविद्यामनिवर्तयत् [1]परोक्षज्ञानकल्पमवतिष्ठते। न च ज्ञानोदये अज्ञानानिवृत्त्यनुपपत्तिः। प्रतिबन्धकाभावस्य सर्वत्रापेक्षितत्वेन सत्यपि प्रत्यक्षविशेष-

---

प्रयोजनाभावान्नियमादृष्टमुपेयम्, तस्य च कल्मषनिवृत्तिद्वारा विद्यासाधनत्वं च कल्पनीयमेवेत्यर्थः। अदृष्टजन्यत्वं कल्मषनिवृत्तेर्विशेषणम्। स्वपदं साक्षात्कारपरम्। **शङ्क्येतेति**। येन शङ्क्येत इति सम्बन्धः। यत्र विधित्सित-साधनस्याप्राप्तिः पाक्षिकी निवारयितुं न शक्यते तत्र नियमविधिः इत्यत्र हेतुमाह—**तावतैवेति**। अप्राप्तांश-लाभमात्रेण इत्यर्थः। विधित्सितसाधनस्य पाक्षिक्यामप्राप्तौ हेतुमाह—**साधनान्तरतयेति**। सत्तानिश्चयरूप-ब्रह्मसाक्षात्कारस्य दृष्टफलतया तत्स्वरूपे वेदान्तविचारवद्भाषाप्रबन्धादेरपि अन्वयव्यतिरेकाभ्यामेव साधनत्वबुद्धि-स्सम्भाव्यते। पूर्वोक्तरीत्या वस्तुतः साधनत्वाभावात् सम्भाव्यमानस्येत्युक्तम्।

व्यावर्त्यान्तरमाह—**अथवेति**। मात्रपदेन गुरुः व्यवच्छिद्यते। तदुक्तब्रह्मापरोक्षज्ञानेनैवाविद्या-निवृत्तिलक्षणफलसिद्धेः किं गुर्वधीनश्रवणविधिना इति शङ्कते - **किंत्विति**। श्रवणनियमविध्यर्थवत्त्वाय नियमा-दृष्टस्य ब्रह्मापरोक्षज्ञानेन स्वफलसिद्ध्यर्थमपेक्षणीयत्वकल्पनात् नोक्तापरोक्षज्ञानादविद्यानिवृत्तिसिद्धिरिति परिहरति - **गुरुमुखेति**। **निरासेनेति**। निरासद्वारेत्यर्थः। इतीत्यनन्तरं कल्पनीयत्वेनेति शेषः। **तदभावेनेति**। कल्मषनिरासाभावेन - कल्मषेणेत्यर्थः। **कल्पमिति**। तुल्यमित्यर्थः। न च - नियमार्थवत्त्वायेत्यादिपूर्वग्रन्थे नियमादृष्टस्य कल्मषनिवृत्तिद्वारा ज्ञानोत्पत्तौ हेतुत्वमुक्तम्, अत्र च उत्पन्नेन ज्ञानेन अविद्यानिवृत्तौ जननीयायां तत्र प्रतिबन्धककल्मषनिरासद्वारा श्रवणनियमादृष्टस्य साधनत्वोक्तौ पूर्वापरविरोध इति - वाच्यम्। [2]मतभेदेन विरोधाभावात्। नन्वेवमपि उत्पन्ना ब्रह्मविद्या स्वकार्याविद्यानिवृत्तये नियमादृष्टसाध्यां कल्मषनिवृत्तिमपेक्षत इत्ययुक्तम्, प्रमात्वात् शुक्त्यादिप्रमावत्, इति मत्वा शङ्कते - **न च ज्ञानोदय इति**। **अनिवृत्त्यनुपपत्तिरिति**। अज्ञाननिवृत्तिरेव स्यादित्यर्थः। शुक्तिप्रमास्थले अन्यापेक्षाभावेऽपि प्रतिबिम्बभ्रमस्थले [3]विशेषदर्शनस्य प्रतिबन्ध-

---

1. परोक्षज्ञानकल्पमिति—सत्तानिश्चयरूपं ब्रह्मापरोक्षज्ञानं इत्यनुषज्यते।

2. सत्तानिश्चयरूपब्रह्मापरोक्षज्ञानोत्पत्तौ साधनत्वेन श्रवणस्य नियमविधिः; श्रवणात्पूर्वं तु न सत्तानिश्चयरूपो ब्रह्मसाक्षात्कारः, अपि तु आपातरूपः, सत्तानवधारणरूपत्वं च तस्य आपातत्वम् इत्येकं मतम्। श्रवणात् प्रागेव सत्तानि-श्चयरूपो ब्रह्मसाक्षात्कारः उत्पन्नः, परन्तु कल्मषप्रतिबन्धात् न स अविद्यानिवृत्तिरूपफलाय कल्पते, श्रवणानन्तरं तु श्रवण-नियमादृष्टेन प्रतिबन्धनिरासात् अप्रतिबद्धः सन् फलाय कल्पते इत्यपरं मतम्। आद्ये मते सत्तानिश्चयरूपब्रह्मसाक्षात्कारः 'द्रष्टव्यः' इत्यत्र दर्शनशब्दार्थः। तदुद्देशेन श्रवणनियमविधिः। द्वितीये अप्रतिबद्धः उक्तसाक्षात्कारः दर्शनशब्दार्थः। तदुद्दे-शेन श्रवणनियमविधिः। इदं च मतद्वयं विवरणभावप्रकाशे आश्रमश्रीचरणैः विवेचितं श्रवणविधिप्रस्तावे।

3. व्यावर्तकधर्मदर्शनस्य व्यावृत्तस्वरूपदर्शनस्य वा इत्यर्थः।

दर्शने उपाधिना प्रतिबन्धात् प्रतिबिम्बभ्रमानिवृत्तिवत् तदनिवृत्त्युपपत्तेः। एवं च लिखितपाठादि[1]नापि स्वाध्यायग्रहणप्रसक्तौ गुरुमुखाधीनाध्ययननियमविधिवत् स्वप्रयत्नमात्रपूर्वकस्यापि वेदान्तविचारस्य सत्तानिश्चयरूपब्रह्मसाक्षात्कारार्थत्वेन पक्षे प्राप्तौ गुरुमुखाधीनश्रवणनियमविधिरस्तु। न च 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' [मु. उ. १-२-१२] इति गुरूपसदनविधिनैव गुरुरहितविचारव्यावृत्ति-

---

काभावापेक्षादर्शनेन ब्रह्मविद्याया अपि तदपेक्षोपपत्तेः इति परिहरति - **प्रतिबन्धकाभावस्येति**। यद्यपि प्रतिबन्धकाभावस्य सिद्धान्ते न कुत्रापि हेतुत्वं[2], तथापि अप्रतिबद्धा सामग्री कार्यहेतुः इत्युपगमादस्त्येवावच्छेदकतया प्रतिबन्धकाभावापेक्षा इति भावः। **तदनिवृत्त्युपपत्तेरिति**। गुरुरहितविचारसाध्यविद्यया अविद्यानिवृत्त्यभावोपपत्तेः इत्यर्थः। श्रवणनियमविधिं सदृष्टान्तमुपपादयति - **एवं चेति**। गुरुरहितविचारस्य व्यावर्त्यस्य लाभे सति इत्यर्थः। **लिखितेति**। अभ्युदयनिश्रेयसकामस्य वेदार्थानुष्ठानं विना नाभ्युदयादिसिद्धिः। तदनुष्ठानं च वेदार्थज्ञानं विना न सम्भवति। तदर्थज्ञानं च स्वाध्यायपदवाच्यवेदावाप्तिं विना न सम्भवति। वेदावाप्तिं प्रति च गुरुमुखोच्चारणानूच्चारणलक्षणमध्ययनं लिखितपाठादि च साधनत्वेन लोके प्रसिद्धम्। तथा चाध्ययनविधिवाक्येन वेदाध्ययनं नियम्यते - अध्ययनेनैवाक्षरावाप्तिं[3] सम्पादयेत् इति। तेन च लिखितपाठादिव्यावृत्तिर्लभ्यते यथा तथा प्रकृतेऽपि इत्यर्थः। ननु - ब्रह्मविज्ञानार्थं गुर्वभिगमनं श्रूयते। न च तस्य श्रुतिजन्ये ब्रह्मज्ञाने साक्षात्साधनत्वमस्ति। अतस्तेन ज्ञाने जननीये द्वारापेक्षायां गुर्वधीनविचार एव योग्यतया द्वारत्वेन कल्प्यते, न त्वदृष्टम्। दृष्टद्वारसम्भवे अदृष्टकल्पनायोगात्। गुर्वभिगमनस्य गुर्वधीनविचारद्वारा ज्ञानसाधनत्वे अभिगमनविधिना सिद्धे तेनैव गुरुरहितविचारव्यावृत्तिसिद्धेर्निष्फलः श्रोतव्यवाक्ये श्रवणनियमविधिः इति शङ्कते - **न चेति**। 'ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन' इति पूर्ववाक्ये निर्दिष्टो ब्राह्मणः स इति परामृश्यते। निर्वेदं - वैराग्यं माप्नुयादिति यावत्। केन प्रकारेणेत्यत आह श्रुतिः - अकृतः - नित्यो मोक्षः कृतेन - कर्मणा नास्तीति। अतो मोक्षं ब्रह्मज्ञानसाध्यं ज्ञात्वा तज्ज्ञानार्थं गुरुमभिगच्छेत् इत्यर्थः। श्रोतव्यवाक्येन गुर्वधीनविचारे[4] नियमिते सति तदङ्गतया गुर्वभिगमनं विधीयते, श्रवणविध्यभावे तु उपगमनविधेरात्मलाभाभावात् न श्रवणविधिवैफल्या-

---

1. अत्र वेदपारायणश्रवणं 'आदि' शब्दार्थः।

2. सामग्रीकालीनः यः कार्यानुत्पादः तत्प्रयोजकत्वं प्रतिबन्धकत्वम्। एतादृशस्य प्रतिबन्धकस्याभावः न कारणं भवितुमर्हति। तथा सति सामग्र्या एव अभावात् उक्तलक्षणप्रतिबन्धकत्वस्य अनुपपत्तेः। 'सत्यामपि सामग्र्यां प्रतिबन्धकवशात् कार्यं न जातम्' इति लोकव्यवहारात् एवंरूपमेव प्रतिबन्धकत्वं युक्तं नान्यादृशमिति भावः।

3. अक्षरावाप्तिः - स्वाध्यायावाप्तिः इत्यर्थः। स्वाध्यायस्यावाप्तिर्नाम स्वाधीनोच्चारणक्षमत्वम्। तच्च पुरुषस्य स्वाध्यायोच्चारणेच्छायां सत्यां अस्खलिततदुच्चारणोपयोगिताल्वमूर्धादिवर्णस्थानवशित्वसहिताविच्छिन्नस्मृतिसन्तानजनकतदन्तर्गतयावद्वर्णपदवाक्यावलीविषयकसंस्कारदार्ढ्यमेव।

4. तथा च विचारत्वेन रूपेण गुर्वधीनविचार एव योग्यत्वात् श्रवणपदादुपस्थाप्यते। अतो न अपदार्थनियम इत्यनुसन्धेयम्।

सिद्धेर्विफलो नियमविधिरिति शङ्क्यम् । गुरूपसदनस्य श्रवणाङ्गतया श्रवणविध्यभावे तद्विधिरेव नास्तीति तेन तस्य वैफल्याप्रसक्तेः । अन्यथा अध्ययनाङ्गभूतोपगमनविधिनैव लिखितपाठादिव्यावृत्तिरिति अध्ययननियमोऽपि विफलः स्यात् ।

अथवा अद्वैतात्मपरभाषाप्रबन्ध[1]श्रवणस्य पक्षे प्राप्त्या वेदान्तश्रवणे नियमविधिरस्तु । न च 'न म्लेच्छितवै' इत्यादिनिषेधादेव तदप्राप्तिः । शास्त्रव्युत्पत्तिमान्द्यात् वेदान्तश्रवणमशक्यमिति पुरुषार्थनिषेधमुल्लङ्घ्यापि भाषाप्रबन्धेनाद्वैतं जिज्ञासमानस्य तत्र प्रवृत्तिसम्भवेन नियमविधेरर्थवत्त्वोपपत्तेः । अभ्युपगम्यते हि कर्त्रधिकरणे [जै. सू. ३-४-१२] व्युत्पादितं पुरुषार्थे

पादकता इति परिहरति - **गुरूपसदनस्येति** । अङ्गविधिना प्रधानविधिवैफल्यापादनेऽतिप्रसङ्गमाह - **अन्यथेति** । **विधिनैवेति** । गुरूपगमनस्य अक्षरावाप्तिं प्रति अध्ययनरूपदृष्टद्वारसम्भवे तत्त्यागायोगादिति भावः ।

[2]व्यावर्त्यान्तरमाह - **अथवेति** । **नियमविधिरस्त्विति** । अद्वैतं जिज्ञासमानेन वेदान्ता एव विचारणीयाः न भाषाप्रबन्धाः इति विचारविषयनियमविधिरस्त्वित्यर्थः । ननु - म्लेच्छशब्दितस्य भाषाप्रबन्धरूपाव्यक्तशब्दस्योच्चारणं पुरुषेण न कर्तव्यम्, अन्यथा पुरुषः प्रत्यवायी भवेत्, इति निषेधबलादेव [3]श्रवणाधिकारिणो भाषाप्रबन्धव्यावृत्तिसिद्धेः किं विधिनेति शङ्कते - **न च नेति** । यदि भाषानिषेधस्य[4] ज्ञानाङ्गत्वं स्यात् तदा तन्निषेधमुल्लङ्घ्य तत्र प्रवृत्तौ ज्ञानानुत्पत्तिभयेन तत्र न प्रवर्तेत । न त्वेतदस्ति । पुरुषार्थत्वात्तन्निषेधस्य । तथा च तन्निषेधमुल्लङ्घ्यापि कदाचित् भाषाप्रबन्धश्रवणे प्रवृत्तिः सम्भवति इति परिहरति - **शास्त्रव्युत्पत्तीति** । उल्लङ्घने हेतुमाह - **अशक्यमितीति** । अशक्यत्वे हेतुः व्युत्पत्तिमान्द्यम् । ननु यस्याधिकारिणो व्युत्पत्तिमान्द्याद्वेदान्तश्रवणमशक्यं तं प्रति वेदान्तविचारे नियमविधिः कथम्, अशक्यार्थे विध्यनुपपत्तेः, इति चेत् —न, भाष्यादिरूपवेदान्तविचारासम्भवेऽपि वेदान्तप्रकरणविचारस्य मन्दाधिकारिणोऽपि सम्भवात् । तदुक्तं पञ्चदश्याम् - 'मन्दप्रज्ञं तु जिज्ञासुं आत्मानन्देन बोधयेत् । बोधयामास मैत्रेयीं याज्ञवल्क्यो निजां प्रियाम् ॥' [पं. द. १२-४, ५] इति । [आत्मानन्देन -] आत्मानन्दनामकप्रकरणेनेत्यर्थः । पुरुषार्थनिषेधमुल्लङ्घ्यापि महाफलसिद्ध्यर्थं निषिद्धे प्रवृत्तिः तन्निवर्तनेन विधेरर्थवत्ता च मीमांसकैरपि स्वीकृतेत्याह - **अभ्युपग-**

---

1. भाषाप्रबन्धः - प्राकृतादिभाषामयी गाथा । अत एव कृष्णालङ्कारे 'भाषाप्रबन्धरूपाव्यक्तशब्दस्य' इति विवृतम् । पाणिनीयव्याकरणासंस्कृतशब्दः अव्यक्तशब्दः ।

2. वक्ष्यमाणरीत्या उक्तव्यावर्त्यासंभवात् व्यावर्त्यान्तरानुधावनम् ।

3. श्रवणाधिकारिण इति - वेदान्तश्रवणाधिकारिण इत्यर्थः । इदं तु वस्तुस्थितिकथनम्, न व्यावर्तकम् ; उक्तश्रवणानधिकारिणोऽपि शूद्रस्य भाषाप्रबन्धश्रवणात् साक्षात्कारोत्पत्तेः शास्त्रेषु निराकृतत्वात् । न च भ्रान्तिप्राप्तं तत् व्यावर्त्यम् । तत् श्रवणाधिकारिणोऽपि तुल्यं इति अव्यावर्तकमेव ।

4. भाषाप्रबन्धोच्चारणनिषेधस्य इत्यर्थः ।

अनृतवदननिषेधे सत्यपि दर्शपूर्णमासमध्ये कुतश्चिद्धेतोरङ्गीकृतनिषेधोल्लङ्घनस्य अविकलां क्रतुसिद्धिं कामयमानस्य अनृतवदने प्रवृत्तिः स्यादिति पुनः क्रत्वर्थतया दर्शपूर्णमासप्रकरणे 'नानृतं वदेत्' इति निषेधः इति क्रत्वर्थतया निषेधस्यार्थवत्वम् ।

यद्वा - यथा 'मन्त्रैरेव मन्त्रार्थस्मृतिः साध्या' इति नियमः, तन्मूलककल्पसूत्रात्मीयग्रहणकवाक्यादीनामपि पक्षे प्राप्तेः, तथा वेदान्तमूलकेतिहासपुराणपौरुषेयप्रबन्धानामपि पक्षे

म्यतेहीति । अङ्गीकृतं निषेधोल्लङ्घनं येन स तथोक्तः । कुतश्चिदित्यनेन सूचितं हेतुमाह - **अविकलामिति** । **अर्थवत्त्वमिति** । व्युत्पादितमिति पूर्वेणान्वयः ।

[1]व्यावर्त्यान्तरमाह - **यद्वेति** । **मन्त्रैरेवेति** । अग्निर्मूर्धेत्यादयो मन्त्राः श्रुत्यादिभिः क्रतौ विनियुक्ताः । ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तः क्रतावुपकारं कुर्वन्ति उत दृष्टेनैवार्थस्मरणेन इति सन्देहे कल्पसूत्रादिनापि अनुष्ठेयाद्यर्थस्मृतिसम्भवाददृष्टार्था मन्त्रा इति प्राप्ते राद्धान्तः - मन्त्राणामर्थप्रकाशनद्वारा क्रतूपकारकत्वम् । दृष्टद्वारसम्भवेऽदृष्टकल्पनानुपपत्तेः । तथा च फलवदनुष्ठानापेक्षितक्रियातत्साधनस्मरणद्वारा मन्त्राणां कर्माङ्गत्वम् । न च क्रियातत्साधनस्मरणस्य मन्त्रैरिव कल्पसूत्रादिभिरपि सम्भवात् न तस्य द्वारत्वमिति वाच्यम् । 'मन्त्रैरेव मन्त्रार्थः स्मर्तव्यः' इति नियमविधिसम्भवात् । नियमस्तु अदृष्टार्थो भविष्यति । तदुक्तम् - 'यत्र दृष्टं न लभ्येत स्यात्तत्रादृष्टकल्पना' इति । तथा च यथा मन्त्रनियमविधिना मन्त्रमूलककल्पसूत्रादिव्यावृत्तिः क्रियते तथा अधीतसाङ्गस्वाध्यायेन ब्रह्म जिज्ञासुना वेदान्ता एव विचार्या इति वेदान्तनियमे कृते तन्मूलकेतिहासादीनां व्यावृत्तिर्लभ्यत[2] इति दृष्टान्तदार्ष्टान्तिकग्रन्थयोरर्थः । याज्ञिकैः प्रणीतं अनुष्ठानसमवेतपदार्थसङ्ग्राहकं वाक्यं ग्रहणकवाक्यम् । इतिहासो महाभारतम् । पौरुषेयप्रबन्धः प्रबोधचन्द्रोदयादिः ।

उदाहृतानि व्यावर्त्यानि उपलक्षणम् । अन्येषामपि व्यावर्त्यानां सम्भवात् । तथा हि 'तत् कारणं सांख्ययोगाभिपन्नम्' [श्वे. उ. ६-१३] इति श्रुतौ ब्रह्मप्रतिपत्तिद्वारा तत्प्राप्ति प्रत्युपायद्वयं निर्दिष्टम् -

---

1. वक्ष्यमाणरीत्या उक्तव्यावर्त्यासंभवात् व्यावर्त्यान्तरानुधावनम् ।

2. ननु 'बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति ।
   इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥'

इति संभवपर्वणि वेदार्थनिर्णयोपायत्वेन इतिहासपुराणयोरपि विचार्यत्वप्रतिपादनात् तयोः व्यावृत्तिः अयुक्त इति चेत्, अत्राहुः—'ब्राह्मणादेः वेदाधिकारिणः पुराणप्राधान्यं व्यावर्त्यम् - इति । अयं भावः—मुमुक्षुणा वैदिकेन कुशलेन वेदान्तवाक्यान्येव विचारणीयानि इति वेदाधिकारिणः प्रत्येव अयं नियमविधिः । न च नियमादृष्टस्य उपयोगाभावः शङ्क्यः । विविदिषावाक्येन 'सर्वं कर्माखिलं पार्थ' इति स्मृत्या 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति न्यायेन च ब्रह्मसाक्षात्कारस्य सर्वादृष्टसाध्यत्वप्रतिपादनात् । एवं च मुमुक्षोर्वेदाधिकारिणः कुशलस्य ब्रह्मसाक्षात्कारोत्पत्तौ विचारितवेदान्तवाक्यमेव प्रमाणम् ; न मनः इतिहासपुराणादि च इति प्रमाणत्वरूपरूपान्तरेण इतिहासपुराणादेः मनसश्च उक्ताधिकारिणं प्रति व्यावर्त्यता । एतेन उपादानतयाऽपेक्षणीयस्य मनसः न व्यावर्त्यता इति शङ्कापि परास्ता । वेदाधिकारिणं प्रत्येव अयं नियमविधिः इत्यत्र किं प्रमाणं इति चेत् इतिहासपुराणश्रवणेन शूद्राणां ब्रह्मविद्योत्पत्तिप्रतिपादकशास्त्रान्येव इति ।

प्राप्तिसम्भवान्नियमोऽयमस्तु । सर्वथा नियमविधिरेवायम्[1] । 'सहकार्यन्तरविधिः' इत्यधिकरणभाष्ये अपूर्वत्वोक्तिस्तु नियमविधित्वेऽपि पाक्षिकाप्राप्तिसद्भावात् तदभिप्राया इति तत्रैव पक्षेणेतिपाक्षिका-प्राप्तिकथनपरसूत्रपदयोजनेन स्पष्टीकृतम् - इति विवरणानुसारिणः[2] ॥

श्रवणमननध्यानात्मकः सांख्यशब्दार्थ एकः । तृतीयपरिच्छेदे वक्ष्यमाणो योगपदोदित उपासनामार्गस्त्वपरः । तत् - प्रकृतं कारणं - जगत्कारणत्वोपलक्षितं ब्रह्म सांख्ययोगाभ्यां ज्ञानद्वारा अभिपन्नम् - आभिमुख्येन प्रत्यक्त्वेन प्राप्तं इति श्रुत्यर्थः । तथा सगुणब्रह्मोपासनं उपासकस्य ब्रह्मलोकं गतस्य तत्त्वसाक्षात्कारद्वारा ब्रह्मप्राप्तिहेतुरिति ब्रह्ममीमांसायां प्रसिद्धम् । तथा तपोविशेषादिकं साक्षात्तत्त्वज्ञानसाधनत्वेन पुराणादिप्रसिद्ध-मुदाहर्तव्यम् । तथा च गुरुवेदान्तेषु श्रद्धावतः कुशलस्य श्रवणाधिकारिणः तत्त्वज्ञानार्थमुक्तेषु योगमार्गसगुण-ब्रह्मोपासनतपोविशेषादिष्वपि वेदान्तश्रवण इव कदाचित् प्रवृत्तिस्स्यादिति तन्निवृत्तिफलको नियमविधिः सम्भवति । नियमविधिपक्षमुपसंहरति - **सर्वथेति** । ननु नियमविधित्वपक्षे 'सहकार्यन्तरविधिः' इत्यधिकरणभाष्यविरोध इत्यत आह - **सहकार्यन्तरेति** । अपूर्वविधित्वस्य निराकृतत्वादिति भावः । **तत्रैवेति** । तदधिकरणभाष्य एवेत्यर्थः ।

---

1. सर्वथा नियमविधिरेवायम् - मनननिदिध्यासनयोरपि नियमविधिरेव ; तुल्यन्यायत्वात् भाष्यप्रामाण्यस्य च तुल्यत्वात् । नियमव्यावर्त्यं च परिसङ्ख्याविधित्वनिरूपणावसरे वक्ष्यते ।

2. विवरणानुसारिणः इति ।

ननु - द्वितीयवर्णके पञ्चपादिकाकृता 'यद्येवं किं विधिना, स्वयमेव विज्ञानहेतौ पुरुषार्थसाधने प्रवर्तते' इति विध्यभावः कण्ठरवेणाङ्गीकृतः । तत्रैव च विवरणाचार्यैः 'निदिध्यासितव्यः' इति च आत्मप्रतिपादनपरे वाक्यभेदाभावाय स्तुतिपरत्वात्' इत्युक्तं इति चेत्, उच्यते - प्रथमवर्णके हि 'कः पुनः अस्य सूत्रस्य प्रसङ्गः' इति प्रश्नस्य, 'साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो विधेः अपेक्षितं अनुबन्धत्रयं आगमिकमपि न्यायेन निर्णेतुं सूत्रयामास' इत्युत्तरमुक्त्वा, 'ननु 'श्रोतव्य' इति विधिः ब्रह्मात्मज्ञानाय वेदान्तवाक्यविचारं विधातुं न शक्नोति श्रवणादीनां विषयावगमं प्रति अन्वयव्यतिरेकसिद्धसाधनत्वात्' इत्याशङ्कायाः 'आत्मतत्त्वापरोक्ष्यस्य सर्वादृष्टसाध्यत्वस्य वक्ष्यमाणत्वात् अवघाता-दिवत् उभयार्थतया विधानोपपत्तेः' इति परिहारमुक्त्वा 'ननु एकस्मिन् आत्मप्रतिपादनपरे वाक्ये कथं श्रवणादिविधानं कल्प्यते' इति आशङ्क्य 'अवान्तरवाक्यभेदेन 'विविदिषन्ति' इति यज्ञादीनां ज्ञानसंयोगविधानवत् दर्शपूर्णमासप्रकरणे मलव-द्वाससो व्रतकलापविधानवच्च इति ब्रूमः' 'अथवा 'तस्मात् ब्राह्मणः पाण्डित्यं' इत्यादिवाक्यं श्रवणादिविधायकमस्तु ; तस्य तत्परत्वात् सूत्रकारेण च वक्ष्यमाणत्वात् । सर्वथा तावत् मनननिदिध्यासनाभ्यां अङ्गभूताभ्यां सह श्रवणविधानमस्त्येव' इत्युक्तम् । अतः नियमविधिरेव विवरणकृतामभिप्रेतः । द्वितीयवर्णकेऽपि 'अथाऽपि कथञ्चित् उपासनविधानं कल्प्येत निदिध्यासनविधेः' इति विधिरङ्गीकृतः ।

यद्येवं पूर्वोत्तरविरोध इति चेत् - न । अपूर्वविधित्वनिराकरणेन नियमविधित्वाङ्गीकरणे च अविरोधात् । तथैव द्वितीयवर्णके विवरणे 'अपरोक्षकामस्य उपासनायां स्वयं प्रवृत्तेः अदृष्टार्थत्वाच्च निदिध्यासनविधानस्य इत्युक्तम्' इति प्रथमवर्ण-कोक्तं नियमविधित्वमेव सिद्धान्तितम् । अत्र च चित्सुखाचार्यैः विवरणतात्पर्यदीपिकायां 'पूर्वं निदिध्यासनविधिरस्तीत्युक्तम् । इदानीं नास्तीत्युच्यमाने पूर्वापरविरोधः' इत्यत आह - अदृष्टार्थत्वाच्चेति । 'व्रीहीनवहन्यात्' इतिवत् नियमविधिरयम्, न केवलं दृष्टार्थः, नापि केवलादृष्टार्थः इत्यर्थः' इति तत्रत्यविवरणवाक्यं विवृतम् ।

शाब्दपरोक्षं प्रति श्रवणस्य शाब्दापरोक्षं प्रति मनननिदिध्यासनयोः नियमविधिः

कृतश्रवणस्य प्रथमं शब्दात् निर्विचिकित्सं परोक्षज्ञानमेवोत्पद्यते । शब्दस्य परोक्षज्ञान-जननस्वाभाव्येन क्लृप्तसामर्थ्यानतिलङ्घनात् । पश्चात् कृतमनननिदिध्यासनस्य सहकारिविशेषस-म्पन्नात् तत एव अपरोक्षज्ञानं जायते । तत्तांशगोचरज्ञानजननासमर्थस्यापीन्द्रियस्य तत्समर्थसंस्कार-साहित्यात् प्रत्यभिज्ञानजनकत्ववत् स्वतोऽपरोक्षज्ञानजननासमर्थस्यापि शब्दस्य विधुरपरिभावितका-मिनीसाक्षात्कारस्थले[1] तत्समर्थत्वेनक्लृप्तभावनाप्रचयसाहित्यादपरोक्षज्ञानजनकत्वं युक्तम् । ततश्च शब्दस्य स्वतस्स्वविषये परोक्षज्ञानजनकत्वस्य भावनाप्रचयसहकृतज्ञानकरणत्वावच्छेदेन विधुरान्तः-

---

श्रोतव्यवाक्येन निर्विचिकित्सपरोक्षशाब्दज्ञानोद्देशेनैव श्रवणं विधीयते, न तु शाब्दसाक्षात्कारोद्देशेन । शब्दस्य स्वतः परोक्षज्ञानजननस्वाभाव्यात् विचारसहकृतस्यापि शब्दस्य क्वापि साक्षात्कारहेतुत्वादर्शनाच्च । परोक्ष-ज्ञानफलकोऽप्ययं नापूर्वविधिः । विधिं विनापि शब्दे शाब्दज्ञानहेतुत्वस्य विचारे विचार्यनिर्णयहेतुत्वस्य च प्राप्तौ तदुभयबलेन विचारविशिष्टवेदान्तरूपश्रवणस्य निर्विचिकित्सशाब्दज्ञानहेतुत्वप्राप्तेः साधितत्वात् । किं तु पूर्वोक्तान्येव व्यावर्त्यान्यादाय नियमविधिरेवेति मतमाह - **कृतश्रवणस्य प्रथममिति** । ननु मनननिदिध्यासने किं निर्विचिकित्सशाब्दपरोक्षज्ञानोद्देशेनैव विधीयेते, किं वा शाब्दापरोक्षं प्रति । नाद्यः, मननाद्यनुष्ठानात् प्राक् श्रवणमात्रादेव तत्सिद्धेः, न द्वितीयः, शब्दस्य परोक्षज्ञानजनन एव सामर्थ्यस्य त्वदभिमतत्वात् इत्याशङ्कां द्वितीयपक्षपरिग्रहेण परिहरति - **पश्चादिति** । शाब्दनिर्विचिकित्सपरोक्षज्ञानानन्तरमित्यर्थः । कृते मनननिदिध्यासने येन स तथोक्तः । **तत एवेति** । शब्दादेवेत्यर्थः । सहकारिवैचित्र्यात् कार्यवैचित्र्यदर्शनादिति भावः । तदेवोदाहरणेन दर्शयति - **तत्तांशेति** । **तत्समर्थेति** । तत्तांशगोचरज्ञानजननसमर्थेत्यर्थः । **शब्दस्येति** । शब्दस्यापरोक्षज्ञानजनकत्वं युक्तमित्युत्तरत्र सम्बन्धः । ननु तत्तासंस्कारस्य इन्द्रियसहकारित्वेन क्लृप्ता-वपि भावनाप्रचयस्य ज्ञानकरणसहकारित्वेन साक्षात्कारजननसामर्थ्यं न क्वापि क्लृप्तं इत्याशङ्क्याह - **विधुरेति** । तत्समर्थेत्यत्र साक्षात्कारजननं तच्छब्दार्थः । नन्वेवमपि शब्दसहकारित्वेन मननध्यानात्मकभावना-प्रचयस्य मानान्तरेण शाब्दसाक्षात्कारं प्रति हेतुत्वाप्राप्तेः मननादिविधेरपूर्वविधित्वप्रसङ्ग इति, नेत्याह - **ततश्चेति** । परोक्षज्ञानजनकत्वस्यापरोक्षज्ञानजनकत्वस्य च प्राप्तत्वादिति सम्बन्धः । परोक्षज्ञानहेतुत्वस्य प्राप्त्यभिधानं श्रवणविधेर्नियमविधित्वार्थमिति द्रष्टव्यम् । **विधुरेति** । भावनासहकृतस्य विधुरान्तःकरणस्य कामिनीसाक्षात्कारहेतुत्वदर्शनस्थले बहिरस्वतन्त्रमप्यन्तःकरणं बाह्यवस्तुभावनासहकृतं सत् तत्साक्षात्कारहेतुरिति विशिष्य कार्यकारणभावे गृहीतव्ये लाघवात् बाधकाभावाच्च [2]भावनाप्रचयसहकृतं ज्ञानकरणत्वावच्छिन्नमपरो-क्षज्ञानं प्रति हेतुरिति कार्यकारणभावो गृह्यत इति भावः । अत्र - शब्दस्य परोक्षज्ञानजननस्वाभाव्यमेवासिद्धम्,

---

1. कामिनीसाक्षात्कारस्थलेक्लृप्तेति संब-धः ।

2. न च एतावतापि भावनाप्रचयात्मके मनने कथं नियमविधिः इति शङ्क्यम् । श्रुतार्थविषयकानुचिन्तनात्मके मननेऽपि भावनाप्रचयरूपत्वमस्तीति भावात् ।

करणवदपरोक्षज्ञानजनकत्वस्य च प्राप्तत्वात् पूर्ववन्नियमविधिरिति तदेकदेशिनः[1] ॥

शाब्दपरोक्षं प्रति श्रवणस्य मानसापरोक्षं प्रति मनननिदिध्यासनयोः नियमविधिः

वेदान्तश्रवणेन न ब्रह्मसाक्षात्कारः, किन्तु (मनसैव ।) 'मनसैवानुद्रष्टव्यम्' [बृ.उ.४-४-१९] **इति श्रुतेः, 'शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्' इति गीताभाष्यवचनाच्च । श्रवणं तु निर्विचिकित्सपरोक्षज्ञानार्थमिति तादर्थ्येनैव नियमविधिः इति** केचित्[2] ।

मानसापरोक्षज्ञानं प्रति श्रवणादीनां त्रयाणामपि नियमविधिः

अपरोक्षज्ञानार्थत्वेनैव श्रवणे[3] नियमविधिः । 'द्रष्टव्य' इति फलकीर्तनात् । तादर्थ्यञ्च

ज्ञानगतपरोक्षत्वादेः करणविशेषप्रयुक्तत्वस्य निराकरिष्यमाणत्वात् । अतः शाब्दापरोक्षं प्रति मननादेरिव श्रवणस्यापि विधिर्नानुपपन्नः इत्यस्वरसं सूचयति - **तदेकदेशिन इति** । विवरणैकदेशिन इत्यर्थः ।

मतान्तरमाह - **वेदान्तश्रवणेन न ब्रह्मसाक्षात्कार इति** । शब्दस्य परोक्षज्ञानजननस्वाभाव्येन क्लृप्तसामर्थ्यानतिलङ्घनात् इति हेतुरत्रापि मते द्रष्टव्यः । किं तर्हि ब्रह्मसाक्षात्कारे करणमिति पृच्छति - **किं त्विति** । मन एव करणमिति मत्वा तत्र मानमाह - **मनसैवेति** । क्वचित् किंत्वित्यनन्तरं मनसैवेति पाठोऽपि पृथगस्ति। तदा नानुपपत्तिः[4]। तत्रैव भाष्यसम्मतिमाह - **शास्त्रेति** । शास्त्रं 'तत्त्वमसि' [छा.उ.६-८-७] इत्यादिवाक्यम् । आचार्योपदेशः आचार्यकर्तृकवाक्यार्थविवरणरूपः । आदिपदं दमतितिक्षादिसङ्ग्रहार्थम् । तथा चात्र ब्रह्मसाक्षात्कारस्य मानसत्वप्रतिपादनेन तत्करणमनस्सहकारितयैव मनननिदिध्यासनयोर्विधिः, न तु पूर्वमत इव शाब्दसाक्षात्कारकरणशब्दसहकारितया इति पूर्वमतादस्य मतस्य विशेषस्सूचितो भवति। श्रवणे तु पूर्वमतादविशेषमाह - **श्रवणं त्विति** । **तादर्थ्येनैवेति** । निर्विचिकित्सशाब्दपरोक्षज्ञानार्थत्वेनैवेत्यर्थः ।

मतान्तरमाह - **अपरोक्षज्ञानेति** । ननु तर्करूपविचारात्मकस्य श्रवणस्य स्वतस्साक्षात्कारफलकत्वा-योगात्तदनुग्राह्यं प्रमाणं वक्तव्यम्, तच्च किं इत्यपेक्षायामाह - **तादर्थ्यं चेति** । साक्षात्कारार्थत्वं चेत्यर्थः । **तस्येति** । वेदान्तश्रवणस्येत्यर्थः । **करणभूतेति** । ब्रह्मसाक्षात्कारकरणभूतेत्यर्थः । न तु ब्रह्मसाक्षात्कारकरण-

---

1. दर्शनोद्देशेन श्रवणस्य विधानात् अपरोक्षज्ञानस्यैव दर्शनशब्दार्थत्वात् परोक्षज्ञानोद्देशेन श्रवणविधिः इत्ययं पक्षः न श्रौतः इत्यस्वरसोऽपि एकदेशिनः इत्यनेन सूचितः । नायं विवरणकृदभिमतः पक्षः इति भावः । आश्रमस्वामिभिः 'स्वानभिमतं स्वयूथ्यमतमाह —'अन्यन्मतमिति' इति अवतारितं एतन्मतप्रतिपादकं विवरणवाक्यम् ।

2. केचिदिति - पूर्वोक्तरीत्या अस्यापि पक्षस्य अश्रौतत्वं केचिदित्यनेन सूचितम् ।

3. श्रवणे इति - अस्मिन् पक्षे विचारमात्रं श्रवणशब्दार्थः, न तु विचारितवेदान्तवाक्यज्ञानम् । अत एव 'शाब्दा-परोक्षज्ञानानङ्गीकारात्' इत्युक्तिः न विरुध्यते ॥

4. तदा नानुपपत्तिः - अन्यथा 'किन्तु' इति करणस्वरूपप्रश्ने 'मनसैवानुद्रष्टव्यम्' इत्यादिना प्रमाणप्रतिवचनं अनुपपन्नं स्यात् इति भावः ।

तस्य करणभूतमनःसहकारितयैव न साक्षात्। शाब्दापरोक्षज्ञानानङ्गीकरणात्। न च तस्य तेन रूपेण तादर्थ्यं न प्राप्तमित्यपूर्वविधित्वप्रसङ्गः। श्रावणेषु षड्जादिषु समारोपितपरस्पराविवेकनिवृत्त्यर्थगान्धर्वशास्त्रश्रवणसहकृतश्रोत्रेण परस्परासङ्कीर्णतद्याथार्थ्यापरोक्ष्यदर्शनेन, प्रकाशमाने वस्तुनि आरोपिताविवेकनिवृत्त्यर्थशास्त्रसद्भावे तच्छ्रवणं तत्साक्षात्कारजनकेन्द्रियसहकारिभावेनोपयुज्यत इत्यस्य क्लृप्तत्वात् इति अपरे ॥

प्रतिबन्धनिरासं प्रति श्रवणादीनां नियमविधिः

वेदान्तवाक्यानां अद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलन्यायविचारात्मकचेतोवृत्तिविशेष-

---

शब्दसहकारितयेत्येवकारार्थः। **न साक्षादिति**। वेदान्तश्रवणस्य स्वातन्त्र्येण साक्षात्कारजनकत्वं नास्ति। तस्य तर्करूपतया स्वतः प्रमाणत्वाभावादिति भावः। मनस्सहकारितयैवेत्येवकारार्थे हेतुमाह - **शाब्देति**। **तस्येति**। वेदान्तश्रवणस्येत्यर्थः। **तेन रूपेणेति**। साक्षात्कारकरणमनस्सहकारित्वेन रूपेणेत्यर्थः। साक्षात्कारकरणमनस्सहकारित्वेन प्राप्त्यभावेऽपि तत्करणेन्द्रियसहकारित्वेन प्राप्तिरस्तीत्याह - **श्रावणेष्विति**। श्रोत्रजन्यप्रत्यक्षविषयेष्वित्यर्थः। **षड्जादिष्विति**। षड्जादयो ध्वनिविशेषाः। तेषु गान्धर्वशास्त्रश्रवणरहितस्य परस्परमविवेकस्समारोपितो वर्तते। परस्परमविवेको नाम परस्परं तादात्म्यरूपः परस्परधर्मवत्तारूपश्च इति बोध्यम्। गान्धर्वशास्त्रविचारवतश्च तद्विचारसहकृतश्रोत्रेन्द्रियेणैव षड्जादयः परस्परं विविक्ततयाऽनुभूयन्ते। एवं मनसाऽन्तरिन्द्रियेण अनुभूयमानेषु चिदात्ममनःप्राणशरीरादिषु परस्परं तादात्म्यादिरूपाविवेकः प्राणिनामनुभवसिद्धः। अत्रापि यद्यारोपनिवर्तकं शास्त्रमस्ति तदा तत्सहकृतमन्तरिन्द्रियमेव बुद्ध्यादिविविक्तमात्मानं ब्रह्मस्वरूपतया वेदान्तैः प्रतीयमानं साक्षात्कारयेत् इति विचारवान् पुरुषः षड्जादिसाक्षात्कारस्थले कार्यकारणभावं कल्पयतीत्याह - **प्रकाशमान इति**। तच्छ्रवणं शास्त्रश्रवणम्। **तत्साक्षात्कारेति**। प्रकाशमानवस्तुसाक्षात्कारेत्यर्थः। उपयुज्यते - विविक्ततयावस्तुसाक्षात्कारहेतुर्भवतीत्यर्थः। **इत्यस्येति**। इति - उक्तप्रकारेण अस्य - साक्षात्कारकरणभूतेन्द्रियसहकारित्वस्य [क्लृप्तत्वात्] - वेदान्तश्रवणे विधिं विनैव प्राप्तत्वात् नापूर्वविधित्वप्रसङ्ग इत्यर्थः।

उक्तेषु पक्षेषु शाब्दापरोक्षोद्देशेन वा शाब्दपरोक्षोद्देशेन वा श्रवणविधिरिति स्थितम्।

इदानीं प्रतिबन्धनिरासोद्देशेनैव तद्विधिरिति मतान्तरमाह - **वेदान्तवाक्यानामिति**। प्रमेयासम्भावनानिवृत्त्यनुकूलन्यायविचारात्मकमननव्यावृत्तये तात्पर्यनिर्णयानुकूलेत्युक्तम्। तन्निर्णयानुकूलन्यायाश्च[1] उपक्रमोपसंहारैकरूप्यादयः इति बोध्यम्। चेतोवृत्तिविशेषपदेन यत्नसाध्यक्रियारूपा वृत्तिः विवक्षिता, न तु तदसाध्या

---

1. व्याप्तिपक्षधर्मताविशिष्टहेतवः अत्र न्यायशब्देन विवक्षिताः। तेषां विचारो नाम सद्धेतुत्वसंपादकः तर्कः।

रूपस्य श्रवणस्य न ब्रह्मणि परोक्षमपरोक्षं वा ज्ञानं फलम् । तस्य शब्दादिप्रमाणफलत्वात् । न च उक्तरूपविचारावधारिततात्पर्यविशिष्टशब्दज्ञानमेव [1]श्रवणमस्तु तस्य ब्रह्मज्ञानं फलं युज्यते इति वाच्यम् । ज्ञाने विध्यनुपपत्तेः श्रवणविधेर्विचारकर्तव्यताविधायकजिज्ञासासूत्रमूलत्वोपगमाच्च ऊहापोहात्मकमानसक्रियारूपविचारस्यैव [2]श्रवणत्वौचित्यात् । न च विचारस्यैव तात्पर्यनिर्णयद्वारा [3]तज्जन्यतात्पर्यभ्रमादिपुरुषापराधरूपप्रतिबन्धकविगमद्वारा वा ब्रह्मज्ञानं फलमस्त्विति वाच्यम् । तात्पर्यज्ञानस्य शाब्दज्ञाने कारणत्वानुपगमात् कार्ये क्वचिदपि प्रतिबन्धकाभावस्य कारणत्वानुप-

---

ज्ञानरूपा वृत्तिः विवक्षिता । ज्ञानस्य विध्ययोग्यताया वक्ष्यमाणत्वात् । ब्रह्मणीति विषयसप्तमी[4] । **तस्येति** । ज्ञानस्येत्यर्थः । शब्दादि - इत्यादिपदं प्रत्यक्षादि[5]सङ्ग्रहार्थम् । 'ज्ञानोद्देशेन श्रवणं विधीयते' इति [6]मताभिमतं श्रवणशब्दार्थमनूद्य निराकरोति - **न चोक्तरूपेति** । ब्रह्मजिज्ञासासूत्रस्य 'साधनचतुष्टयसम्पन्नेन ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः' इत्यर्थः । सौत्रजिज्ञासापदस्य विचारलक्षकत्वात् । तस्य च सूत्रस्य श्रोतव्यवाक्यं मूलम् । ततश्च श्रोतव्यवाक्ये यदि श्रवणं ज्ञानरूपं तदा श्रोतव्य इत्यस्य श्रवणरूपज्ञानकर्तव्यता अर्थः स्यात् । तथा च जिज्ञासासूत्रश्रोतव्यवाक्ययोः मूलमूलिभावो न स्यात् एकार्थत्वाभावात् - इत्याह—**श्रवणविधेरिति** । ऊहः - न्यायाभासेभ्यो निष्कृष्य न्यायानामुपादानम् । न्यायाभासनिराकरणं अपोहः । ननु 'सदेव सोम्य' [छा.उ.६-२-१] इत्यादि 'तत्सत्यं स आत्मा तत्त्वमसि' [छा.उ. ६-८-७] इत्येतदन्तं वाक्यजातं अद्वितीयवस्तुपरम्, तत्प्रतिपादकोपक्रमोपसंहारवत्त्वात्, इत्येवमात्मकस्य[7] विचारस्य अनुमितिरूपं तात्पर्यनिर्धारणं साक्षात्फलम्, तद्द्वारा तात्पर्यभ्रमादिरूपप्रतिबन्धकनिवृत्तिः विचारस्य फलम्, तन्निवृत्तौ च वाक्यमप्रतिबद्धं सदद्वितीयब्रह्मबोधं जनयति, एवं श्रुत्यन्तरेष्वपि इति वस्तुगतिः । तथा च श्रवणस्य साक्षात् ब्रह्मज्ञानफलकत्वाभावेऽपि परम्परया तत्फलकत्वं स्यादिति शङ्कते—**न च विचारस्यैवेति** । अप्यर्थ एवकारः । तथा च यथा ज्ञानं शब्दप्रमाणस्य फलं तथा तद्विचारस्यापि फलमस्तु, शब्दप्रमाणफले ज्ञाने विचारस्यापि तात्पर्यनिर्णयद्वारा तदधीनप्रतिबन्धनिरासद्वारा वा हेतुत्वसम्भवात् इत्यर्थः । तज्जन्यत्वं विगमविशेषणम् । भ्रमादिरेव पुरुषापराधः । तात्पर्यज्ञानस्य द्वारत्वा[8]भावे हेतुमाह – **तात्पर्यज्ञानस्येति** । प्रतिबन्धनिरासोपजननेनान्यथासिद्धत्वादिति भावः । [प्रतिबन्धकाभावस्य] (तात्पर्यज्ञानस्य) शाब्दबोधं प्रति हेतुत्वाभावे विचारस्य तात्पर्यनिर्णयसाध्यप्रतिबन्धकनिवृत्तिद्वारा शाब्दबोधहेतुत्वं दूरापास्तमिति मत्वा प्रतिबन्धकाभावस्याहेतुत्वे हेतुमाह - **कार्ये क्वचिदपीति** । सत्यामपि [9]सामग्र्यां प्रतिबन्धकवशात् कार्यं न जातमिति लोकव्यवहारविरो-

---

1. श्रवणमिति — श्रवणशब्दार्थ इत्यर्थः । 2. श्रवणत्वेति — श्रवणशब्दार्थत्वेत्यर्थः ।
3. तज्जन्येति — तात्पर्यनिर्णयः तच्छब्दार्थः
4. विषयसप्तमीति—सप्तम्यर्थो विषयत्वं ज्ञानेऽन्वेति इति भावः ।
5. प्रत्यक्षादि इति 'आदि' पदं शब्दप्रत्यक्षातिरिक्तसर्वप्रमाणपरम् । 6. मतेति—विवरणमतेत्यर्थः ।
7. इत्येवमात्मकस्य — उक्तपक्षे उक्तसाध्यसिद्ध्यनुकूलस्य, विचारस्य — तर्कस्य इत्यर्थः ।
8. द्वारत्वेति — तद्द्वारत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वम् ।
9. सामग्री — यावत्कारणसमुदायः ।

गमाच्च तयोर्द्वारत्वानुपपत्तेः । ब्रह्मज्ञानस्य विचाररूपातिरिक्तकारणकत्वे तत्प्रामाण्यस्य[1] परतस्त्वापत्तेश्च । तस्मात् तात्पर्यनिर्णयद्वारा पुरुषापराधनिरासार्थत्वेनैव[2] विचाररूपे श्रवणे नियमविधिः । 'द्रष्टव्यः' इति तु दर्शनार्हत्वेन स्तुतिमात्रं न श्रवणफलसङ्कीर्तनं इति संक्षेपशारीरकानुसारिणः ॥

ब्रह्मसाक्षात्कारं प्रति श्रवणमननयोः परिसङ्ख्याविधिः

ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकसुश्रुतादिश्रवणे प्रवृत्तस्येव

धात् प्रतिबन्धकाभावस्य सामग्र्यामन्तर्भावो नाङ्गीक्रियते । किं त्वप्रतिबद्धा सामग्री कार्यहेतुः इति स्वीकृत्य सामग्र्यामवच्छेदकतया दण्डत्वादिवदन्यथासिद्धिरेव स्वीक्रियत इति भावः । तात्पर्यानुमितिहेतु[3]विचारात्मकानुमानस्य शाब्दप्रमितिहेतुत्वे दूषणमाह - **ब्रह्मज्ञानस्येति । अतिरिक्तेति ।** शब्दप्रमाणातिरिक्तेत्यर्थः । **परतस्त्वापत्तेरिति ।** प्रामाण्याश्रयज्ञानस्य अतिरिक्तकारणजन्यत्वरूपं प्रामाण्यस्योत्पत्तौ परतस्त्वं स्यादित्यर्थः । ततश्चापसिद्धान्त इति भावः । यदि श्रवणस्य न ब्रह्मज्ञानं फलं, तर्हि किमुद्देशेन तद्विधिः? अत आह - **तस्मादिति ।** ब्रह्मज्ञानफलकत्वासम्भवादित्यर्थः । ननु तर्हि कथं 'द्रष्टव्यः' इति श्रवणफलकीर्तनम्? तत्राह - **द्रष्टव्य इति त्विति । स्तुतिमात्रमिति ।** आत्मन इति शेषः । स्तुतिश्च तच्छ्रवणादौ प्रवृत्त्यर्था इति भावः ।

परिसङ्ख्याविधिपक्षमाह - **ब्रह्मज्ञानार्थमिति ।** ननु वाचस्पतिमतेवक्ष्यमाणरीत्या वेदान्तश्रवणस्य नित्यप्राप्तिं सिद्धां कृत्वा परिसङ्ख्याविधिपक्षप्रवृत्तिः वाच्या । तथा च सति ज्ञानमुद्दिश्य श्रवणाद्यनुतिष्ठतः कथं व्यापारान्तरं प्रसज्येत, यतस्तन्निवृत्तिफलकः परिसङ्ख्याविधिस्सम्भवेत्, इत्याशङ्क्य ब्रह्मज्ञानसाधनत्वेन व्यापारान्तराप्रसक्तावपि भेदवासनावशाद्व्यापारान्तरं सम्भवतीति सदृष्टान्तमाह - **चिकित्सेति ।** चिकित्सा - औषधं, तज्ज्ञानस्य वैद्यकग्रन्थैकसाध्यत्वेन तज्ज्ञानाय [4]चरकसुश्रुतादिसंज्ञकग्रन्थश्रवणे प्रवृत्तस्य तादर्थ्येन[5] व्यापारान्तराप्रसक्तावपि यथा विषयवासनावशादेव तत्प्रसक्तिः, तद्वदित्यर्थः । ननु सुश्रुतादिग्रन्थश्रवणे प्रवृत्तस्य व्यापारान्तरसत्त्वेऽपि यथा चिकित्साज्ञानं निष्प्रत्यूहमुत्पद्यते तथा प्रत्यहं वेदान्तश्रवणमनुतिष्ठतो मध्येमध्ये लौकिकवैदिकव्यापारसत्त्वेऽपि ब्रह्मज्ञानोदयसम्भवात् निष्फलः परिसङ्ख्याविधिः इत्याशङ्क्य, श्रवणविध्यर्थवत्त्वाय निरन्तरमनुष्ठितश्रवणस्यैव ज्ञान-

---

1. प्रामाण्यस्येति-भावे ल्युट् । प्रमात्वस्येत्यर्थः ।

2. श्रुतौ द्रष्टव्यपदेन नात्मज्ञानमात्रमुद्दिश्यते, आपातात्मज्ञानस्य प्रागेवोत्पन्नत्वात् । किन्तु अप्रतिबद्धमात्मदर्शनम् । एवञ्च तदुद्देशेन विहितो विचारः विशेषण एव पर्यवस्यति । 'स्तुतिमात्रं न श्रवणफलसङ्कीर्तनं' इत्युत्तरग्रन्थस्तु दर्शनमात्रस्य फलत्वाभावप्रतिपादनपरम् इति न पूर्वोत्तरसन्दर्भविरोधः, न वा उक्तपक्षस्य अश्रौतत्वम् ।

3. विचारात्मकानुमानेति - विचारस्य तर्कविधया अनुमित्यनुकूलत्वात् अनुमानत्वमिति ध्येयम् ।

4. चरकसुश्रुतशब्दौ महर्षिनामनी । तत्कृतग्रन्थयोरपि तत्संज्ञाप्रसिद्धिः ।

5. तादर्थ्येन - औषधज्ञानार्थत्वेन ।

मध्ये व्यापारान्तरेऽपि प्रवृत्तिः प्रसज्येत इति तन्निवृत्तिफलकः 'श्रोतव्यः' इति परिसङ्ख्याविधिः। 'ब्रह्मसंस्थोऽमृतत्वमेति' [छा.उ.२-२३-१] इति छान्दोग्ये अनन्यव्यापारत्वस्य मुक्त्युपायत्वावधारणात्, संपूर्वस्य तिष्ठतेः समाप्तिवाचितया ब्रह्मसंस्थाशब्दशब्दिताया ब्रह्मणि समाप्तेः अनन्यव्यापाररूपत्वात्, 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' [मु.उ.२-२-५] इत्याथर्वणे कण्ठत एव व्यापारान्तरप्रतिषेधाच्च, 'आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया' इत्यादिस्मृतेश्च। न च ब्रह्मज्ञानानुपयोगिनो व्यापारान्तरस्य एकस्मिन् साध्ये श्रवणेन सह समुच्चित्य प्राप्त्यभावात् न तन्निवृत्त्यर्थः परिसङ्ख्याविधिर्युज्यत इति वाच्यम्। सहकार्यन्तरविधिः [ब्र.सू.३-४-४७] इत्यादिसूत्रे [1]'यस्मात् पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मान्नियमविधिः' इति तद्भाष्ये च कृतश्रवणस्य

साधनत्वं न कादाचित्कस्येति विधेः अनैष्फल्यं इति परिहारमभिप्रेत्य, यथोक्तार्थे श्रुतिस्मृतिवाक्यान्युदाहरति - **ब्रह्मसंस्थ इति**। न विद्यते अन्यो व्यापारो यस्य पुरुषस्य स तथा, तस्य भावस्तत्त्वं, तस्येत्यर्थः। ब्रह्मविषयकश्रवणादिव्यापारात् शमदमाद्युपबृंहितात् अन्यव्यापारशून्यत्वस्येति यावत्। तथा च सन्न्यासाधिकरण भाष्यम् [ब्र.सू.३-४-२०] - 'शमदमाद्युपबृंहितं ब्रह्मनिष्ठत्वं तस्य स्वधर्मः। तदतिक्रमे च तस्य प्रत्यवायः' इति। अवधारणं निश्चयः। ब्रह्मसंस्थपदेनायमर्थः कथं लभ्यत इत्यत आह - **सम्पूर्वस्येति**। न च ब्रह्मणि समाप्तिर्नाम विदेहकैवल्यरूपो लय एवास्त्विति वाच्यम्। तथा सति पुनः 'अमृतत्वमेति' इति [2]भागवैयर्थ्यापत्तेः। अतोऽमृतत्वप्राप्तिं प्रति ब्रह्मसंस्थता उपायत्वेन विधीयत इति वक्तव्यम्। अतो ब्रह्मणि समाप्तेरनन्यव्यापारत्वे पर्यवसानं भाष्ये कृतम्। तथा च अनन्यव्यापारत्वस्य मुक्त्युपायत्वबोधकवाक्येन अर्थात् मुमुक्षोः व्यापारान्तरनिवृत्तिः क्रियत इति भावः। साक्षान्निवृत्तिबोधकवाक्यमुदाहरति - **तमेवैकमिति**। यस्मिन्नाधारे द्यावापृथिव्यादि समस्तं जगदध्यस्तं, तमेवाधारमेकरूपमात्मानं जानथ हे मुमुक्षवः। ज्ञानसाधनत्वेन च अनात्मप्रतिपादकशब्दोच्चारणादित्यागः कर्तव्य इत्याह श्रुतिः - 'अन्या वाचो विमुञ्चथ' इति॥

नियमविधिवादी शङ्कते - **न च ब्रह्मज्ञानानुपयोगिन इति**। [3]प्रतिबन्द्या समाधत्ते - **सहकार्यन्तरेति**। **न प्राप्नोति**। मौनमिति शेषः। उदाहृतसूत्रभाष्ययोः नियमविधिवादिसम्मतं तात्पर्यं परिसङ्ख्याविधिवादी दर्शयति - **कृतश्रवणस्येति**। मन्वानस्येत्यनन्तरं व्यापारान्तरेऽपि प्रवर्तमानस्य इति शेषः। सूत्रे भाष्ये च अतत्साधनपक्षप्राप्तिमात्रेण नियमविधेरभ्युपगततया इति सम्बन्धः। [वार्तिककारवचने] (वार्तिके) अत्रेत्यस्य श्रोतव्यवाक्ये इत्यर्थः। अत्र नियमो विध्यर्थो भवेत् इत्येकः सम्बन्धः। यदि नित्यप्राप्तत्वात् नियमविधिर्न सम्भवति

---

1. 'यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन् एष विधिः' इति भाष्यानुपूर्वी सर्वत्र कोशेषु दृश्यते। 'यस्मिन् पक्षे' इत्यस्य 'यस्मिन् काले' इत्यर्थश्च व्याख्यानात् ज्ञायते। अतः अयं अर्थतोऽनुवादः इति भाति।

2. अमृतत्वमेतीति श्रुत्यंशेत्यर्थः।

3. समानं विरोध्युत्तरं प्रतिबन्दी।

[1]शाब्दज्ञानमात्रात् कृतकृत्यतां मन्वानस्य अविद्यानिवर्तकसाक्षात्कारोपयोगिनि निदिध्यासने प्रवृत्तिर्न स्यादिति अतत्साधनपक्षप्राप्तिमात्रेण निदिध्यासने नियमविधेरभ्युपगततया तन्न्यायेन असाधनस्य समुच्चित्य प्राप्तावपि तन्निवृत्तिफलकस्य परिसङ्ख्याविधेः सम्भवादिति । 'नियमः परिसङ्ख्या वा विध्यर्थोऽत्र भवेत्, यतः । अनात्मादर्शनेनैव परात्मानमुपास्महे ॥' (नै.सि.१-८८) इति वार्तिक[2]वचनानुसारिणः केचित् आहुः ॥

श्रवणादीनां विध्यभावः

'आत्मा श्रोतव्यः' इति मननादिवत् आत्मविषयकत्वेन निबध्यमानं श्रवणं आगमाचार्योपदेशजन्यमात्मविषयं ज्ञानमेव न तात्पर्यविचाररूपं इति न तत्र कोऽपि विधिः ।

तदा परिसङ्ख्या वा विध्यर्थो भवेत् इति सम्बन्धः । परिसङ्ख्याया विध्यर्थत्वे हेतुः यत इत्यादिः । परात्मोपासने अन्यव्यापाररहिते वयं मुमुक्षवो यतः प्रवृत्ताः इत्यर्थः ।

श्रवणादीनां विधेयत्वपक्षं मतभेदेन दर्शयित्वा तेषां विध्यभावपक्षमाह - **आत्मा श्रोतव्य इत्यादिना । निबध्यमानमिति ।** यथा आत्मविषयकत्वेनोच्यमानं मननं निदिध्यासनं च ज्ञानरूपं तथा श्रवणमपि ज्ञानरूपमेवेत्यर्थः । **नेति ।** विचारस्य[3] अनुष्ठेयक्रियारूपस्य [4]साक्षादात्मविषयकत्वानुपपत्तेरिति भावः ।

ननु मननादिवदिति दृष्टान्तोऽनुपपन्नः । मनननिदिध्यासनयोः ज्ञानत्वाभावात् । मननं हि युक्त्याऽऽलोचनरूपो व्यापारः । 'ध्यै चिन्तायाम्' इत्य[4]नुशासनानुरोधेन निदिध्यासनं ध्यानक्रिया, न ज्ञानम् । अतः कथं मननादिवदिति मनननिदिध्यासनयोः ज्ञानत्वं सिद्धतया निर्दिश्यते - इति चेत्, उच्यते - आत्मा ब्रह्मस्वभावः

---

1. अन्वयव्यतिरेकावगतफलसाधनभावे फलार्थिनां व्यासङ्गमात्रेण कादाचित्काप्रवृत्तेर्निरासाय विध्यनपेक्षणात् 'भेददर्शनवशात् पाक्षिकाप्राप्तौ नियमविधिः' इति भाष्योक्तं अनुपपन्नं इत्याशङ्कानिवृत्यर्थं भाष्यतात्पर्यार्थमाह—शाब्दज्ञानमात्रात् कृतकृत्यतां मन्वानस्येति । यथा दारान्तरपुत्रैः कृतकृत्यतां मन्वानस्य दारान्तरारागेण रोषेण वा अनुगमनाप्राप्तौ 'ऋतावुपेयात्' इति नियमविधिः, तथा इहापीति भावः । एवं च प्रबलभेददर्शनमूलकव्यापारान्तरं निदिध्यासननियमव्यावर्त्यं इत्युक्तं भवति । तच्च व्यापारान्तरं न निदिध्यासनफले साधनम्, प्रत्युत बाधकम् । तादृशं व्यावर्त्यं च 'यस्मिन् पक्षे' इत्यादिभाष्येण अभ्युपगतं इति स्पष्टम् । एवमेव मनननियमस्यापि तदीयफलं प्रति असाधनस्यैव तर्कस्य भेदवासनामूलकस्य व्यावर्त्यत्वमङ्गीकर्तव्यम् । मननशब्दस्यापि श्रुत्यनुग्राहकतर्कबोधकत्वं 'आत्मा श्रोतव्यः' इत्यत्र आत्मपदस्य अद्वितीयात्मबोधकत्ववत् ।

2. वार्तिकवचनेति—वार्तिककृतां नैष्कर्म्यसिद्धिवचनेत्यर्थः ।

3. विचारस्य हि वेदान्ततात्पर्यं विषयः । न आत्मा । तात्पर्यादिद्वारा आत्मनो विषयत्ववर्णनं तु साक्षाद्विषयत्वसंभवे न युक्तम् । किञ्च क्रियारूपस्य विचारस्य क्रियाफलभूतोत्पत्त्याद्यन्यतमसंस्पर्शशून्य आत्मा न साक्षाद्विषयः । विवरणेऽपि चतुर्थवर्णके सविमर्शं तात्पर्यनिर्णयहेतोः विचारस्य प्रतिबन्धनिरासित्वात् उपचारेणैव ब्रह्मविषयत्वमुक्तम् ।

4. अनुशासनम् - धातुपाठः ।

चिद्रूपत्वात् ब्रह्मवत्, बुद्ध्यादिः कल्पितः दृश्यत्वात् शुक्तिरजतादिवत्, इत्याद्यनुमितेरेव मननत्वोपगमात्। तदुक्तं चतुर्थे मैत्रेयीब्राह्मणवार्तिके - 'आगमार्थविनिश्चित्यै मन्तव्य इति भण्यते' (बृ. वा. २-४-२१४), 'वेदशब्दानुरोध्यत्र तर्कोऽपि विनियुज्यते' (बृ. वा. २-४-२१६), 'पदार्थविषयस्तर्कः तथैवानुमितिर्भवेत्' (बृ. वा. २-४-२२६) इति। श्रुतार्थदार्ढ्याय तर्करूपं मननं [1]विधीयते। सोऽपि तर्कः श्रुत्यविरुद्ध एव मननत्वेन विधीयते। तच्च मननं तत्त्वंपदार्थविषयकमेव, न तु वाक्यार्थविषयकम्। तस्य वाक्यैकमेयत्वात्। तथाशब्दः समुच्चयार्थः। यथा मननात्मकतर्कस्य वेदाविरोधित्वं तथा अनुमितिरूपत्वं चेत्यर्थः। अत एव न्यायतन्त्रेऽपि मननस्यानुमितिरूपत्वमिष्यते। निदिध्यासनमपि वार्तिककारमते ज्ञानमेव। तथाहि बृहदारण्यके चतुर्थाध्यायषष्ठाध्यायगतयोः मैत्रेयीब्राह्मणयोराम्नायते - 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति। अनन्तरं चतुर्थे 'मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन' इति। षष्ठे तु 'मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते' इति। तत्रोभयत्राक्षेपवार्तिकम् - 'अनुवादे यथोक्तानां प्रक्रान्ते दर्शनादिषु। विज्ञानेनेत्यथ कथं निदिध्यासनमुच्यते' (बृ. वा. २-४-२३२) इति। अथ 'आत्मा द्रष्टव्यः' इत्यादिना उक्तानामनुवादे प्रक्रान्ते सति दर्शनादिषु मध्ये श्रुतं निदिध्यासनं विज्ञानेनेतिपदेन कथं उच्यते - अनूद्यते। दर्शनादीनां समानपदैरेवानुवाददर्शनेन निदिध्यासनस्यापि तद्वन्निदिध्यासनेनेत्यनुवादः स्यात् न तु विज्ञानपदेन, इत्यर्थः। तस्य समाधानवार्तिकम् - 'ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते। निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः' (बृ. वा. २-४-२३३) इति। निदिध्यासनशब्दस्य ध्यानवाचित्वात् श्रवणमनननानन्तरं अनुभवाङ्गत्वेन ध्यानं 'निदिध्यासितव्यः' इत्यनेन विधीयते इति यतः पूर्ववादिभिराशङ्क्यते, अतः तदाशङ्कानिवृत्त्यर्थं अनुवादावसरे स्थित्वा पूर्ववाक्ये निदिध्यासनं विज्ञानरूपं विवक्षितं न तु ध्यानम्, अतो नात्र ध्यानविधिशङ्कावकाशः, इत्याशयवती श्रुतिः विज्ञानपदेन निदिध्यासनमनुवदतीति वार्तिकार्थः। ध्यानस्यानुभवाङ्गत्वे को दोषः, यतस्तदाशङ्का निरस्यते श्रुत्या, इत्यत आह तदनन्तरं वार्तिकार्धम् - 'विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम्' (बृ. वा. २-४-२३४) इति। ध्यानस्य तन्नियोगस्य वा विज्ञानोत्पत्तिहेतुत्वं प्रति यद्दूषणं वक्तव्यं तत् प्रागेव सम्बन्धग्रन्थादौ[2] उक्तवानस्मीत्यर्थः। तत्र ह्युक्तम् - तत्त्वंपदार्थगोचरश्रवणमननाभ्यामसकृदभ्यस्ताभ्यां तत्त्वंपदलक्ष्यार्थनिर्णये सति वाक्यार्थज्ञानस्यैवावसरप्राप्तत्वेन ध्यानविधेरनवकाशः। न च ताभ्यां प्रमाणप्रमेयासम्भावनानिवृत्तावपि विपरीतप्रत्ययेन प्रतिबन्धात् न वाक्यार्थबोधोत्पत्तिरिति वाच्यम्। श्रवणमनननयोरेवासकृदभ्यासमहिम्ना विपरीतप्रत्ययस्यापि निवृत्तिसम्भवात्, वाक्यार्थबोधनिवर्त्यस्य विपरीतप्रत्ययस्य [3]तदप्रतिबन्धकत्वाच्च। लोके

---

1. विधीयते—साधनत्वेन बोध्यते।
2. संबन्धग्रन्थादौ—संबन्धग्रन्थमारभ्य तत्र तत्र इत्यर्थः।
3. तदप्रतिबन्धकत्वादिति—अन्यथा रज्जुसर्पभ्रमवतः रज्जुतत्त्वदर्शनानुत्पत्तिप्रसङ्गः। न च सति विरोधिज्ञाने विरोध्यन्तरदर्शनं कथं उपपद्यतां इति शङ्क्यम्। लिङ्गादिना तत्र अप्रामाण्यशङ्काजननेन तस्य हीनबलतया विरोध्यन्तरदर्शनोत्पत्त्युपपत्तेः। तद्वत् प्रकृतेऽपि तत्त्वंपदलक्ष्यार्थनिर्णयेनैव वाक्यार्थप्रत्ययविपरीतप्रत्ययस्य हीनबलत्वसंपत्तिः। इयमेव विपरीतप्रत्ययस्य निवृत्तिर्नाम। एवञ्च न ध्यानविधेरवकाश इति।

अत एव समन्वयसूत्रे [ब्र. सू. १-१-४] आत्मज्ञानविधिनिराकरणानन्तरं भाष्यं 'किमर्थानि तर्हि आत्मा वा अरे द्रष्टव्यः' इत्यादीनि वचनानि विधिच्छायानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः' इत्यादि ।

विपर्ययस्य स्वविरोधिदर्शनोत्पत्तिप्रतिबन्धकत्वादर्शनात् - इति । ननु यदि निदिध्यासनं न ध्यानं किं तर्हि तत् इत्यत आह वार्तिकम् - 'अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते' (बृ. वा. २-४-२१७) इति । ध्यानस्यैव पुरुषप्रयत्नानपेक्षत्वं अपरायत्तत्वम् । 'यावद्यथोक्तविज्ञानमाविर्भवति भास्वरम् । श्रवणादिक्रिया तावत् कर्तव्येह प्रयत्नतः' (बृ. वा. २-४-२१८) ॥ मननं आदिपदार्थः । 'श्रुत्वा मत्वाऽथ तं साक्षादात्मानं प्रतिपद्यते' (बृ. वा. २-४-२२०) । अथ - श्रवणमननपरिपाकजनिततत्त्वंपदलक्ष्यार्थनिर्णयानन्तरमेव वाक्येन ब्रह्मात्मानं साक्षात् - अपरोक्षतया प्रतिपद्यते - अनुभवति इत्यर्थः । वाक्यार्थज्ञानवतः कृतकृत्यतामाह - 'अनन्यायत्तविज्ञाने श्रवणादेरुपायतः । जाते नापेक्षते किञ्चित् प्रतीचोऽनुभवात् परम्' (बृ. वा. २-४-२२१) इति । वृत्तिज्ञाने जाते सति तेन प्रतीचो ब्रह्मत्वस्फुरणात् अनन्तरं न किञ्चिदपेक्षते इत्यर्थः । एवं वार्तिककारमते निदिध्यासनस्य ज्ञानत्वाभ्युपगमात् न मननादिवदिति दृष्टान्तासिद्धिः । न च वार्तिककारमते 'निदिध्यासितव्यः' इत्यस्य 'द्रष्टव्यः' इत्यनेन पौनरुक्त्यं स्यादिति वाच्यम् । दर्शनोद्देशेन श्रवणमननविधानानन्तरं पुनः फलकीर्तनस्य तदुपसंहारपरत्वोपपत्तेः । अथवा 'द्रष्टव्यः' इति विचारप्रयोजकापातदर्शनानुवादः, 'निदिध्यासितव्यः' इति तु विचारफलभूतसाक्षात्कारानुवादः, इति पौनरुक्त्यपरिहारसम्भवात् ।

[1]श्रवणादौ विध्यभावे भाष्यसम्मतिमाह - **अत एवेति** । श्रवणमनननिदिध्यासनानां दर्शनवत् ज्ञानरूपत्वेन, क्रियारूपत्वेऽपि वक्ष्यमाणविधया नित्यप्राप्तत्वेन च, विध्ययोग्यत्वादेव इत्यर्थः । **किमर्थानीति** । व्यर्थानि स्युः इति यावत् । 'आदि'पदं 'श्रोतव्यः' इत्यादेः सङ्ग्रहार्थम् । **विधिच्छायानीति** । 'अध्येतव्यः' इति प्रसिद्धविधितुल्यानीत्यर्थः । अत्र तव्यप्रत्ययैः दर्शनश्रवणादिगता प्रशंसा लक्ष्यते । तथा च - यो हि मुमुक्षुः आत्मदर्शनश्रवणादीन्येव मुक्तिसाधनानीति ज्ञात्वाऽपि सन्न्यासब्रह्मचर्यादिसहितश्रवणाद्यनुष्ठानक्लेशमनुसन्धिन्त्य न तत्र सर्वोत्साहेन प्रवर्तते, किंतु यथाप्राप्तान्येव वर्णाश्रमानुरूपाणि कर्माण्युपासनानि चानुतिष्ठन् तत्रापि निर्वृतिं न लभते तैरात्यन्तिकपुरुषार्थालाभानुसन्धानेन, तं प्रत्यात्मदर्शनश्रवणादिप्रशंसार्थं प्रवर्तते 'आत्मा वा'

---

1. श्रवणादौ विध्यभावे भाष्यसंमतिमिति—श्रवणादिविधावपि भाष्यसंमतिर्दर्शिता; तथा च विधिपक्षोऽपि भाष्यसंमत एव । कथं विरुद्धं पक्षद्वयं भाष्याभिप्रेतं स्यात्—उच्यते - विधिवादिनां विध्यभावभाष्यं अपूर्वविधित्वाभावपरम् । विधिभाष्यं नियमविधित्वपरम् । किञ्च विध्यभावभाष्यं ज्ञाने विध्यभावपरं; न श्रवणादिविध्यभावपरं इत्यभिसन्धिः । उक्तं च विवरणे—'......नास्ति श्रवणादिविधानं इति भाष्यकारैरेव दर्शितम् । सत्यम् । ज्ञानविधिः तत्र निराकृतः, न श्रवणादिविधिः' इति ।

विध्यभाववादिनां तु विध्यभावभाष्यं समञ्जसम् । विधिभाष्यन्तु—अर्थवादस्यैव सतो वाक्यस्य प्रशंसाद्वारेण प्रवृत्त्यतिशयकरत्वरूपविधिसरूपत्वपरं 'विष्णुरुपांशु यष्टव्यः' इत्यादिवत् इत्यभिसन्धिः ।

यदि च वेदान्ततात्पर्यविचारः श्रवणं तदा तस्य तात्पर्यनिर्णयद्वारा वेदान्ततात्पर्य-भ्रमसंशयरूपप्रतिबन्धकनिरास एव फलं न प्रतिबन्धकान्तरनिरासो ब्रह्मावगमो वा। तत्फलकत्वं च

इत्यादिवाक्यं तस्य सर्वोत्साहेन श्रवणादावेव प्रवृत्तिर्भवतु इत्याशयेन, अतो न विधिप्रत्ययानां वैयर्थ्यं इति भाष्यकारः परिहरति - **स्वाभाविकेति**। आदिपदेन 'यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टं मे भूयादनिष्टं माभूदिति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविकात् कार्यकरणसङ्घातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि' [ब्र. सू. भा. १-१-४] इत्यन्तं भाष्यं सङ्गृह्यते। स्वाभाविकत्वं विषयविशेषणम्। सङ्ग्रहभाष्यं विवृणोति - यो हीति। **प्रवर्तत इति**। नानाविधकर्मोपासनान्यनुतिष्ठतीत्यर्थः। 'इष्टं मे भूयादनिष्टं मा भूत्' इत्यनेन दुःखसामान्यास्पृष्टसुखकामना ब्रह्मानन्दरूपात्यन्तिकपुरुषार्थगोचरा इह विवक्षिता। अत एवाह - न च तत्रात्यन्तिकं पुरुषार्थं लभते - इति। बाह्यसाधनं तच्छब्दार्थः। स्वाभाविकादिति। स्वभावः - अविद्या, तत्कार्यभूतादित्यर्थः। सङ्घातस्य प्रवृत्तिः - कर्मोपासनयोरनुष्ठानम्, तद्गोचरात् - द्रव्यदेवतामन्त्रादिरूपात् इत्यर्थः। प्रत्यगात्मविषये स्रोतः - चित्तप्रावण्यं यस्य स प्रत्यगात्मस्रोताः, तस्य भावस्तत्ता, तयेत्यर्थः। तं बाह्यसाधनाद्विमुखीकृत्य श्रवणादिष्वेव प्रवर्तयन्तीत्यर्थः।

एवं श्रवणादेः ज्ञानरूपत्वात् न तत्र कोऽपि विधिः इत्युक्तम्। इदानीं श्रवणादेः क्रियारूपत्वमुपेत्यापि न तत्र कोऽपि विधिरित्याह - **यदि चेति**। तस्य क्रियारूपत्वं च वार्तिककारैरेवोक्तम् - 'श्रवणादिक्रिया तावत् कर्तव्येह प्रयत्नतः' इति। आदिपदेन मननस्य सङ्ग्रहः, न ध्यानस्य। वार्तिककारमते श्रवणमननानन्तरं ध्यानानुष्ठानाभावस्योक्तत्वात्।

न च ध्यानस्याननुष्ठेयत्वे 'ओमित्येवं ध्यायथ आत्मानम्' [मु. उ. २-२-६], 'विद्यामेतां योगविधिं च कृत्स्नम्' [क.उ.६-१८] इत्यादिबहुवाक्यविरोध इति वाच्यम्। तेषां 'साङ्ख्ययोगाभिपन्नम्' इतिश्रुतिगतयोगपदोदितमार्गान्तरप्रतिपादकतायाः तृतीयपरिच्छेदे ध्यानदीपोक्तप्रकारेण वक्ष्यमाणत्वात्। न च 'तत् कारणम्' इति श्रुतिगतसाङ्ख्यपदोदितविचारमार्गेऽपि ध्यानान्तर्भावः [1]पूर्वमुक्त इति वाच्यम्। निदिध्यासनपदस्य ध्यानार्थकत्वमताभिप्रायेण तदन्तर्भावस्योक्तत्वात्। ध्यानस्य साङ्ख्यमार्गात् बहिर्भाव एव भाष्यकाराणामपि सम्मतः। तथा च 'एतेन योगः प्रत्युक्तः' [ब्र. सू. २-२-३] इत्यधिकरणभाष्यम् - 'तत् कारणं साङ्ख्ययोगाभिपन्नम्' इत्यत्र वैदिकमेव ज्ञानं ध्यानं च साङ्ख्ययोगशब्दाभ्यामभिलप्येते - इति। ध्यानपदं ज्ञानाभ्यासपरम्। वैदिकं वेदोक्तम्। एतेन - वेदविरोधादिना योगशास्त्रं निराकृतम् इति सूत्रार्थः। साङ्ख्यमार्गे ध्यानाभावमभिप्रेत्यैव सर्वज्ञात्ममुनिभिरपि निदिध्यासनपदस्य ज्ञानार्थकत्वमुक्तम्-'श्रवणमननबुद्ध्योर्जातयोर्यत् फलं तन्निपुणमतिभिरुच्चैरुच्यते दर्शनाय।

---

1. पूर्वमिति - नियमविधिविचारावसाने इत्यर्थः।

अनुभवनविहीना यैवमेवेति बुद्धिः श्रुतमननसमाप्तौ तन्निदिध्यासनं हि' [३-३४५] इति। अस्य श्लोकस्या-श्रमश्रीचरणानां व्याख्यानमिदम् - निदिध्यासने [1]पक्षान्तरमाह - श्रवणेति। श्रवणमननबुद्ध्योः जातयोर्यत् फलं, तत् दर्शनाय निपुणमतिभिरुच्चैरुच्यते इति सम्बन्धः। एतदेव विशदयति - अनुभवनविहीनेति। श्रुतं श्रवणम्। दीर्घ-कालादरनैरन्तर्यानुष्ठानेन श्रवणमननपरिपाके सतीत्यर्थः। अनुभवनविहीना-साक्षात्काररहिता अविद्यानिवर्तकवृत्ति-साक्षात्कारभिन्नेति यावत्। या एवमेवेति बुद्धिः - 'अहं-चिदात्मा ब्रह्मस्वभाव एव, ब्रह्म च चिदेकरसप्रत्यगात्मस्व-भावमेव' इति तत्त्वंपदलक्ष्यनिर्णयात्मिका बुद्धिः, तदेव निदिध्यासनं नाम, न ध्यानम्। अस्मिन् पक्षे श्रवण-मननयोरेवानुष्ठेयत्वम्। निदिध्यासनं तु नानुष्ठेयम्। दीर्घकालमनुष्ठितश्रवणमननफलरूपा बुद्धिर्यदा भवति तदैव साक्षात्कारोत्पत्तेः। [2]पूर्वपक्षे तु निदिध्यासनमपि पृथगनुष्ठेयमिति भेद इति। साङ्ख्यमार्गे ध्यानाभावमभिप्रेत्यैव यावज्ज्ञानोदयं विचारस्यैव कर्तव्यत्वं ध्यानदीपे विद्यारण्यगुरुभिरप्युक्तम् - 'विचार्याप्यापरोक्ष्येण ब्रह्मात्मानं न वेत्ति चेत्। आपरोक्ष्यावसानत्वात् भूयो भूयो विचारयेत्' ॥ 'विचारयन्नामरणं नैवात्मानं लभेत चेत्। जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति' [प.द.९-३२, ३३] ॥ इति ॥ एवमानन्दपञ्चकेऽपि आत्मानन्दावसाने साङ्ख्य-मार्गस्य ध्यानरहितस्यापि ध्यानेन सर्वांशेऽपि तुल्यफलत्वं बहुधा प्रपञ्चितं इति संक्षेपः।

एवकारव्यवच्छेद्यमाह - **नेति**। वाकारो नञनुकर्षणार्थः। विचारस्य प्रतिबन्धनिरासद्वारा ब्रह्मावगमो-पयोगसम्भवेऽपि न साक्षात् तत्फलकत्वम्, ज्ञानस्य प्रमाणफलत्वात्, इत्युक्तत्वादिति भावः। ननु उक्तप्रतिबन्धनि-रासद्वारा विचारस्याविद्यानिवर्तकसाक्षात्कारोपयोगित्वप्राप्तावपि तादृशसाक्षात्कारप्रतिबन्धकपापनिवृत्तिद्वारा साक्षा-त्कारसाधनत्वस्य मानान्तरादप्राप्तत्वात् 'श्रोतव्यः' इत्यत्र श्रवणस्य पापनिवृत्तिद्वारा विद्यासाधनत्वमुपदिश्यते। न च विद्याप्रतिबन्धकपापनिवृत्तेर्यज्ञादिनैव सिद्धत्वाद्विधिवैयर्थ्यमिति वाच्यम्। प्रतिबन्धकपापानामानन्त्येन केषांचिद्य-ज्ञाद्यनुष्ठानेन केषांचित् श्रवणानुष्ठानेन निवृत्तिरिति विभागकल्पनोपपत्तेः। तथा च प्राप्तं पुनरपूर्वविधित्वम्। एवं च 'सहकार्यन्तरविधिः' इत्यधिकरणभाष्ये पाण्डित्यशब्दितश्रवणे अपूर्वत्वोक्तिश्च सङ्गच्छते इति शङ्कां वारयति-**प्रतिबन्धकान्तरनिरास इति**। तात्पर्यभ्रमसंशयरूपप्रतिबन्धकापेक्षया अन्यत् पापरूपं प्रतिबन्धकं प्रतिबन्धकान्तरं, तन्निरासो न श्रवणफलम्, अतो न तद्द्वारा ज्ञानाय श्रवणं विधेयमित्यर्थः। अयं भावः - 'श्रोतव्यः' इत्यस्यापूर्व-विधित्वमयुक्तम्। तस्यावृत्त्यधिकरणे [ब्र.सू. ४-१-१२] निरस्तत्वात्, विवरणाद्युक्तरीत्या वेदान्तश्रवणस्यान्वय-

---

1. पक्षान्तरमिति - इदं च वार्तिककारोक्तम्। तथा हि - वार्तिककाराणामभिमतं पक्षद्वयम्। श्रवणमनननिदिध्या-सनानि ज्ञानरूपाणि; तत्र श्रवणमनने तत्त्वंपदलक्ष्यार्थनिर्णयरूपे, निदिध्यासनं फलभूतः साक्षात्कारः, इत्येकः पक्षः। श्रवणमनने अनुष्ठेयक्रियारूपे, तत्फलभूतः तत्त्वंपदलक्ष्यार्थनिर्णयः निदिध्यासनम्, तदनन्तरं फलभूतः साक्षात्कारः इत्यपरः पक्षः। अनयोः उक्तद्वितीयपक्षरूपं इदं पक्षान्तरं संक्षेपशारीरकोक्तम् इत्यवधेयम्।

2. पूर्वपक्षे इति। संक्षेपशारीरके 'श्रवणमननबुद्ध्योर्जातयोर्यत् फलं तत्' [३-३४५] इति पद्यात् पूर्वतनपद्ये 'चेतसस्तु चिद्विमात्रशेषता' [३ ३४४] इत्यनेनोक्तपक्षे इत्यर्थः। न तु वार्तिकोक्तप्रथमपक्षे इति।

तस्य लोकत एव प्राप्तम्, साधनान्तरं च किञ्चिद्विकल्प्य समुच्चित्य वा न प्राप्तम्, इति न तत्र विधित्रयस्याप्यवकाशः ।

विचारविध्यभावेऽपि विज्ञानार्थतया विधीयमानं गुरूपसदनं दृष्टद्वारसम्भवे अदृष्टकल्पनायोगात् गुरुमुखाधीनवेदान्तविचारद्वारैव विज्ञानार्थं पर्यवस्यतीति, अत एव स्वप्रयत्नसाध्यविचारव्यावृत्तिः । अध्ययनविध्यभावे तु उपगमनं विधीयमानं अक्षरावाप्त्यर्थत्वेनाविधीयमानत्वात् न तदर्थं गुरुमुखोच्चारणानूच्चारणमध्ययनं द्वारीकरोतीति लिखितपाठादिव्यावृत्त्यसिद्धेः सफलोऽध्ययननियमविधिः ।

व्यतिरेकप्रमाणसिद्धं तात्पर्यभ्रमादिलक्षणप्रतिबन्धकनिवृत्तिरूपदृष्टफलकत्वमुपजीव्य, श्रवणेनैव ज्ञानं प्रतिबन्धकनिवृत्तिं च सम्पादयेत् इति नियमविधित्वसम्भवे 'स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः' इत्यादिभाष्यानुसारेण ब्रह्मप्रतिपत्तिसाधनश्रवणादिस्तुतिद्वारा तत्र प्रवृत्तिविशेषकरत्वमात्रेण ब्रह्मप्रकरणनिवेशसम्भवे वा अपूर्वविधित्वायोगात्, भाष्यकारीयापूर्वत्वोक्तेः पाक्षिकाप्राप्त्यभिप्रायकत्वसम्भवाच्चेति । **तत्फलकत्वं चेति ।** भ्रमादिरूपप्रतिबन्धकनिरासफलकत्वं चेत्यर्थः । ननु प्राप्तत्वेऽपि नियमविधित्वादिसम्भवात् कथं विधित्रयाभाव इत्यत आह - **साधनान्तरं चेति ।**

ननु गुर्वधीनविचारेण सह गुरुरहितविचारस्य विकल्पेन प्राप्तिरस्तीत्यत आह - **विचारविध्यभावेऽपीति । अत एवेति ।** उपगमनविधित एवेत्यर्थः । व्यावृत्तिरित्यनन्तरं 'लभ्यत इति श्रोतव्यवाक्ये गुर्वधीनविचारनियमविधिरनर्थकः' इति शेषः । न चोपगमनविधेः विचारविध्यङ्गतया तदभावे उपगमनविधेरात्मलाभ एव नास्तीत्युक्तमिति वाच्यम् । गुरूपसदनस्य ब्रह्मज्ञानं प्रति द्वारापेक्षायां लोकसिद्धस्यैव गुर्वधीनविचारस्य द्वारत्वेन स्वीकारोपपत्तौ श्रोतव्यविध्यपेक्षाभावेन तच्छेषत्वासिद्धेः विचारवदुपगमनस्यापि विद्याङ्गत्वोपपत्तेश्च इति भावः । पूर्वोक्तातिप्रसङ्गं परिहरति - **अध्ययनविध्यभावे त्विति ।** अध्ययनविध्यभावे तु लिखितपाठादिव्यावृत्त्यसिद्धेः सफलोऽध्ययननियमविधिः इति सम्बन्धः । **तदर्थमिति ।** अक्षरावाप्त्यर्थमित्यर्थः । अध्ययनाङ्गोपगमनस्य विद्यार्थोपगमनापेक्षया विशेषार्थकस्तुशब्दः । तमेवाह - **उपगमनमित्यादिना ।** अध्ययनस्याक्षरावाप्तिफलकत्वं विवरणादौ[1] साधितमिति भावः ।

---

1. विवरणादौ साधितमिति—तत्र हि एवं साधितम्—अध्ययनस्य न अर्थज्ञानं फलम्; प्रमाणाभावात् । न च-अध्ययनविधेः प्रयोजनपर्यन्ततासामर्थ्यं अर्थापत्तिरूपं प्रमाणमस्तीति—वाच्यम् । अक्षरग्रहणस्यैव अध्ययनविधिप्रयोजनत्वात् । न च - अक्षरग्रहणस्य स्वयमपुरुषार्थत्वात् न प्रयोजनत्वं इति - शङ्क्यम् । अर्थविबोधेऽपि तुल्यत्वात् । पुरुषार्थरूपफलसाधनमर्थविबोधः पुरुषार्थो भवितुमर्हतीति चेत् - तादृशार्थविबोधहेतुत्वेन अक्षरग्रहणस्यापि पुरुषार्थत्वसंभवात् । फलभूतक्षीरादिहेतूनां गवादीनामपि पुरुषैरर्थ्यमानतादर्शनात् । कर्माभिधायिना तव्यप्रत्ययेन कर्मभूतस्वाध्यायगतप्राप्तिलक्षणभाव्याभिधाने संभवति भाव्यान्तरकल्पनायोगात् । स्वाध्यायस्य कर्माभिधायितव्यप्रत्ययार्थत्वेन प्रत्ययार्थभूतभावनां प्रति अन्तरङ्गत्वाच्च । न च - अध्ययनात् अक्षरग्रहणस्य विशेषाभावात् कथं तयोः हेतुफलभाव इति - वाच्यम् । अक्षरावाप्तिर्नाम स्वाधीनोच्चारणयोग्यत्वाख्योऽक्षरधर्मः; अध्ययनं तु तदर्थो वाङ्मानसव्यापारः, इति विशेषसद्भावात् । एवं तर्हि

न च-तात्पर्यभ्रमादिनिरासाय वेदान्तविचारार्थिनः कदाचित् द्वैतशास्त्रेऽपि प्रवृत्तिः स्यात्, तत्रापि तदभिमतयोजनया वेदान्तविचारसत्त्वात्, इत्यद्वैतात्मपरवेदान्तविचारनियमविधिरर्थवानिति-वाच्यम्। स्वयमेव तात्पर्यभ्रमहेतोस्तस्य तन्निरासकत्वाभावेन साधनान्तरप्राप्त्यभावात्। तन्निरासकत्वभ्रमेण तत्रापि कस्यचित् प्रवृत्तिः स्यात् इत्येतावता श्रोतव्य इति नियमविधेरभ्युपगमः इत्यपि न। ईश्वरानुग्रहलब्धाद्वैतश्रद्धारहितस्य श्रोतव्यवाक्येऽपि पराभिमतयोजनया सद्वितीयात्म-विचारविधिपरत्वभ्रमसम्भवेन भ्रमप्रयुक्ताया अन्यत्र प्रवृत्तेः विधिशतेनाप्यपरिहार्यत्वात्।

व्यावर्त्यान्तरं दूषयति - **न च तात्पर्येति**। ननु वस्तुतस्तन्निरासकत्वाभावेऽपि भिन्नात्मज्ञानं मुक्तिसाधनमिति [1]भ्रमद्वारा तद्भ्रमात् तत्र प्रवृत्तिः सम्भवतीत्युक्तमिति, नेत्याह - **तन्निरासकत्वभ्रमेणेति**। इह जन्मनि जन्मान्तरे वा यज्ञाद्यनुष्ठानजनितदृढविविदिषावतः साधनचतुष्टयसम्पन्नस्य श्रवणविधावधिकारः इत्यविवादम्। यज्ञादिजनितादृष्टं च निष्प्रपञ्चाद्वितीयब्रह्मसाक्षात्कारस्य साङ्गाध्ययनलब्धैर्वेदान्तैः मुक्तिसाधनत्व-निश्चयं सम्पाद्य तादृशब्रह्मसाक्षात्कारे दृढेच्छां च विविदिषाशब्दितां उत्पाद्य तद्द्वारा अद्वितीयात्मसाक्षात्कारसाधन-भूताद्वितीयात्मश्रवणादावेव मुमुक्षुं प्रवर्तयति, न तु जीवभिन्नात्मज्ञानस्य मुक्तिसाधनत्वभ्रमापादनद्वारा भिन्नात्मज्ञानसाधनविचारादाविच्छाप्रवृत्त्यादिकमप्युत्पादयति। तदिच्छादेर्भिन्नात्मविचारद्वारा यज्ञादिफलभूतनिष्प्र-पञ्चब्रह्मसाक्षात्कारहेतुत्वाभावात्। तथा च स्मृतिः-'ईश्वरानुग्रहादेव पुंसामद्वैतवासना' [ख. ख. १-२५] इति। यज्ञादिसम्पादितादीश्वरानुग्रहादेव पुंसामद्वैतब्रह्मज्ञानेच्छारूपा तद्वासना भवतीति तदर्थः। तथा च यथोक्तभ्रमवतः अद्वैतब्रह्मतत्त्वसाक्षात्कारादाविच्छाश्रद्धादिशून्यस्य श्रवणविधावनधिकारात् न तं प्रति नियमविधिरर्थवान् इत्याह—**ईश्वरानुग्रहेति**। **पराभिमतेति**। 'आत्मा श्रोतव्यः' इति श्रुतौ आत्मशब्दस्तावत् जीवपर एव, न परमात्मपरः। 'आत्मनस्तु कामाय सर्वं प्रियं भवति' (बृ. उ. २-४-५) इति पूर्ववाक्ये जीवस्य प्रकृतत्वात्। न च 'इदं सर्वं यदयमात्मा' इति वाक्यशेषे सर्वात्मकस्य परमात्मनः प्रतिपादनात् श्रोतव्यवाक्य-स्थमात्मपदमद्वितीयात्मपरमिति वाच्यम्। तत्रापि तत्प्रतिपादनासिद्धेः। न हि प्रपञ्चपरमात्मनोरभेदः सम्भवति। चेतनाचेतनयोरैक्यस्य विरुद्धत्वात् श्रुतेरभेदध्यानविधिपरत्वोपपत्तेश्च - इत्यादियोजना पराभिमता द्रष्टव्या। **अन्यत्रेति**। भिन्नात्मविचारे इत्यर्थः।

अध्ययनस्य अक्षरग्रहणहेतुत्वं अन्वयव्यतिरेकसिद्धमिति व्यर्थो विधिः इति चेत् - न - अवघातादिवत् अदृष्टोत्पत्तये नियमार्थ-त्वात्। न चैवं दृष्टफलत्वहानिः, दृष्टफलभूताक्षरप्राप्तिसमवेतस्यैव नियमादृष्टस्याङ्गीकारात्; 'दृष्टे सत्यदृष्टं न कल्प्यम्' इति न्यायस्य स्वतन्त्रादृष्टविषयत्वात्, अर्थावबोध एव फलमिति वदतापि नियमविधित्वाङ्गीकारात्। न च - उपपत्तिसाम्ये सति अक्षरग्रहणे एव किमिति पक्षपात इति - वाच्यम्। अध्ययनविधेः फलवदर्थावबोधः प्रयोजनमिति पक्षे यस्य यस्मिन् कर्मणि अधिकारः तस्य तद्वाक्याध्ययनमेव स्यात्, न तु वाक्यान्तराध्ययनम्, तत्र प्रवृत्त्यादिफलाभावात्, ततो न कृत्स्न-वेदाध्ययनसिद्धिः। अस्मत्पक्षे तु कृत्स्नवेदावाप्तिः प्रायश्चित्तजपादावुपयुज्यते - इति॥

1. भ्रमद्वारा तद्भ्रमात् - अदृष्टेन उक्तभ्रमद्वारा जनितात् तात्पर्यभ्रमनिरासकत्वभ्रमात्।

न च व्यापारान्तरनिवृत्त्यर्था परिसङ्ख्येति वाच्यम् । असन्न्यासिनो व्यापारान्तरनिवृत्तेर-शक्यत्वात्, सन्न्यासिनस्तन्निवृत्तः ब्रह्मसंस्थया सह सन्न्यासविधायकेन 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्यन्तरेण सिद्धतया, सन्न्यासविधायकश्रुत्यन्तरमपेक्ष्य श्रोतव्यवाक्येन तस्य व्यापारान्तरनिवृत्त्युपदेशस्य व्यर्थत्वात् ।

न च विचारविध्यसम्भवेऽपि विचारविषयवेदान्तनियमविधिः सम्भवति भाषाप्रबन्धादिव्यावर्त्यसत्त्वात् इति शङ्क्यम् । सन्निधानादेव वेदान्तनियमस्य लब्धत्वेन विधिविषयत्वायोगात्, 'स्वाध्यायोऽध्येतव्यः' इत्यर्थावबोधार्थनियमविधिबलादेव अध्ययनगृहीतवेदोत्पादितं वेदार्थज्ञानं फलपर्यवसायि न कारणान्तरोत्पादितं इत्यस्यार्थस्य [1]लब्धत्वेन वेदार्थे ब्रह्मणि मोक्षाय ज्ञातव्ये भाषाप्रबन्धादीनामप्राप्तेश्च[2] ।

परिसङ्ख्याविधिं[3] दूषयति - **न चेति** । श्रवणविधिना किं गृहस्थादेः व्यापारान्तरनिवृत्तिरुपदिश्यते, किं वा [4]सन्न्यासविधिना सिद्धस्य सन्न्यासिनः ? इति विकल्पं मनसि निधाय क्रमेण दूषयति - **असन्न्यासिन इति** । **अशक्यत्वादिति** । [5]विध्यन्तरविरोधापत्तिरशक्यत्वे हेतुः । तन्निवृत्तेः सिद्धतया उपदेशस्य व्यर्थत्वात् इति सम्बन्धः । 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्यन्तरस्य [6]ब्रह्मसंस्थताधर्मकसन्न्यासाश्रमविधायकत्वं 'परामर्शं जैमिनिः' (ब्र. सू. ३-४-१८) इत्यधिकरणभाष्ये स्फुटमिति भावः ।

विचारविषयत्वेन वेदान्तनियमविधिः इति पक्षं दूषयति - **न च विचारेति** । **सन्निधानादेवेति** । अधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्नब्रह्मात्मजिज्ञासोः जिज्ञासानिवर्तकनिर्णयाय कर्तव्यत्वेन विचारे प्राप्ते सति विचारविषयमन्वेषमाणस्य वेदान्तानां बुद्धिस्थत्वात् 'वेदान्ता एव मया विचारणीयाः' इति बुद्धिरुत्पद्यते । तथा च विधिं विनैव वेदान्तनियमस्य लब्धत्वेन विधिना तन्नियमनं व्यर्थमित्यर्थः । विधिं विनैव वेदान्तनियमलाभे हेत्वन्तरमाह - **स्वाध्याय इति** । **अर्थावबोधेति** । मीमांसकमतमाश्रित्योक्तम् । अक्षरावाप्तिफलकोऽध्ययनविधिरिति सिद्धान्तेऽपि - येषां वाक्यानामध्ययनावाप्तानां अर्थज्ञानद्वारा पुरुषार्थोपयोगः सम्भवति तेषां वाक्यानामर्थज्ञानमध्ययनलब्धैः वाक्यैरेवोत्पादितं फलवत् न तदतिरिक्तभाषाप्रबन्धादिजनितम् - इति रीत्या अध्ययनविधिफलाक्षरावाप्तेः पुरुषार्थपर्यवसानकल्पनात् न भाषाप्रबन्धादिप्रसक्तिः इत्यर्थः । इतिहासपुराणमादिपदार्थः ।

---

1. लब्धत्वेन - निश्चितत्वेन ।
2. वेदार्थे ब्रह्मणि मोक्षाय ज्ञातव्ये भाषाप्रबन्धादीनां अप्राप्तेश्च-मुमुक्षोः मोक्षसाधनीभूतवेदार्थब्रह्मज्ञाने उत्पादनीये भाषाप्रबन्धादीनां असाधनत्वनिश्चयात् इत्यर्थः ।
3. विधिमिति । विधिपक्षमित्यर्थः ।
4. सन्न्यासविधिना सिद्धस्य - सन्न्यासविधायकप्रमाणेन प्रमितसत्ताकस्य इत्यर्थः ।
5. विध्यन्तरेति - गृहस्थाश्रमप्रयुक्तकर्मविधायकश्रुत्यन्तरेत्यर्थः ।
6. ब्रह्मसंस्थाधर्मकेति - ओङ्कारे प्रतीके निर्गुणब्रह्मध्यानं अत्र ब्रह्मसंस्थता ।

न च 'सहकार्यन्तरविधिः' इत्यधिकरणे पाण्डित्यबाल्यमौनशब्दितेषु श्रवणमनननिदिध्यासनेषु विधिरभ्युपगत इति वाच्यम्। विचारे विचार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसिद्ध्यनुकूलयुक्त्यनुसन्धानरूपे मनने तत्प्रत्ययाभ्यासरूपे निदिध्यासने च वस्त्ववगमवैशद्यहेतुत्वस्य च लोकसिद्धत्वेन तेषु विध्यनपेक्षणात्। विधिच्छायार्थवादस्येव प्रशंसाद्वारा प्रवृत्त्यतिशयकरत्वमात्रेण तत्र विधित्वव्यवहारात्।

श्रवणादीनामविधेयत्वे सूत्रभाष्यविरोधं[1] शङ्कते - **न चेति। अभ्युपगत इति।** सूत्रभाष्यकाराभ्यामिति शेषः। विरोधं परिहर्तुं प्रथमं श्रवणादीनां विधियोग्यक्रियारूपत्वेऽपि नित्यप्राप्तत्वात् न विधेयत्वमित्याह- **विचार इति।** तत्प्रत्ययेत्यत्र तत्पदं वस्तुपरम्। अवगमस्य वैशद्यं प्रतिबन्धराहित्यम्। सूत्रभाष्ययोः श्रवणादिविधित्वव्यवहारो गौणः मुख्यासम्भवस्य दर्शितत्वात् इति विरोधं परिहरति - **विधिच्छायार्थवादस्येवेति।** 'विष्णुरुपांशु यष्टव्यः' इत्यादेरिव इत्यर्थः। तथाहि - 'उपांशुयाजमन्तरा यजति' इत्याम्नाय पुनराम्नायते - 'विष्णुरुपांशु यष्टव्यः, प्रजापतिरुपांशु यष्टव्यः, अग्नीषोमावुपांशु यष्टव्यौ' इति। अत्र अन्तरावाक्यं आग्नेयाग्नीषोमीयपुरोडाशयोरन्तरालकालविशिष्टयागविधायकम्, विष्ण्वादिवाक्यत्रयं तु मन्त्रवर्णप्राप्तवैकल्पिकदेवतानुवादेन अन्तरावाक्यविहितयागस्तावकमर्थवादमात्रं इति व्यवस्थापितं पूर्वतन्त्रे। तत् अत्र दृष्टान्तत्वेन उदाहृतमिति द्रष्टव्यम्।

यत्तु - 'तत् कारणं साङ्ख्ययोगाभिपन्नम्' इति श्रुतौ योगपदोपात्तस्य व्यावर्त्यस्य सम्भवात् विचारसमर्थाधिकारिणं प्रति तद्व्यावृत्तिफलको नियमविधिस्सम्भवतीति - तन्न। विचारसमर्थस्याधिकारिणः कालान्तरे स्वोद्भावितानुपपत्तिवशेन अन्योद्भावितानुपपत्तिवशेन वा पुनस्तत्त्वसंशये सति अवधारणात्मकं वेदान्तार्थज्ञानं न सम्भवतीति योग्यतावशेन तं प्रति विधिं विना विचारस्यैव नित्यतया प्राप्तत्वात्।

यत्तु सगुणब्रह्मोपासनं व्यावर्त्यमुक्तम् - तन्न। श्रवणविध्यधिकारिणः सर्वतो निस्स्पृहस्य ब्रह्मलोकप्राप्तिद्वारा मुक्तिसाधनसगुणोपासने पक्षेऽपि प्रवृत्तेरसम्भवेन तस्य व्यावर्त्यत्वासम्भवात्, सगुणोपासनस्यापि श्रवणादिद्वारैव विद्यासाधनत्वेन नखविदलनादेरवघाततुल्यकक्ष्यत्ववत्[2] सगुणोपासनस्य श्रवणादिना सह विकल्पेन प्राप्त्यभावाच्च, न तद्व्यावृत्तिफलको नियमविधिः सम्भवति। न च सगुणोपासनया श्रवणादिकं विनैव सगुणसाक्षात्कारवत् निर्गुणसाक्षात्कारोदयः[3] सम्भवतीति वाच्यम्। प्रमाणप्रमेयासम्भावनादिप्रतिबन्धनिवृत्तिद्वारा श्रवणादेस्सत्तानिश्चयरूपब्रह्मज्ञानोपायत्वग्राहकतया[4]पूर्वोक्तप्रमाणानुरोधेन श्रवणादेः नित्यवदनुवादलिङ्गेन[5] च

---

1. सूत्रभाष्यविरोधमिति - सूत्रविरोधं भाष्यविरोधं च इत्यर्थः।
2. तुल्यकक्ष्यत्वेति - तुल्यकक्ष्यत्वं समबलत्वम्, तच्च साक्षात् तज्जन्यफलजनकत्वेन। [धापत्तेः।
3. सगुणोपासनया निर्गुणब्रह्मसाक्षात्कारोदयः अदृष्टद्वारा इति शङ्कस्याभिमानः। अन्यथा तत्क्रतुन्यायविरो-
4. ग्राहकतयापूर्वोक्तप्रमाणेति - ग्राहकत्वेन पूर्वोक्त 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादिश्रुतिरूपप्रमाणेत्यर्थः।
5. नित्यवदनुवादलिङ्गेन - लोकसिद्धसाधनताकस्य अत एव उक्तरीत्या नित्यप्राप्तस्यापि श्रुत्या अनुवादरूपात् लिङ्गात्।

सगुणोपासनया क्रमेण परममुक्तिप्रतिपादकशास्त्रस्यापि श्रवणादिद्वारकज्ञानोत्पत्त्यविरोधित्वकल्पनात्, श्रवणादिकं विना सगुणोपासनमहिम्नैव तत्त्वज्ञानोदयोपगमे देवताधिकरणविरोधाच्च। तदधिकरणे हि – देवादीनां शरीराद्यभावात् सगुणब्रह्मोपासनेषु निर्गुणब्रह्मविद्यासाधनश्रवणादिषु च नास्ति सामर्थ्यम्, अतो न तेष्वधिकारः, इति पूर्वपक्षयित्वा, मन्त्रार्थवादेतिहासपुराणप्रामाण्यात् तेषामपि शरीरादिसद्भावात् अस्त्यधिकारः - इति सिद्धान्तितम्। तत्रेदं पूर्वपक्षप्रयोजनमुक्तम् - देवादीनां श्रवणाद्यधिकाराभावे क्रममुक्तिफलकब्रह्मोपासनया प्राप्तदेवभावस्यापि श्रवणाद्यसम्भवेन विद्योदयासम्भवात् पुनरावृत्त्यापत्तौ क्रममुक्तिकामस्य सगुणोपासनेषु प्रवृत्त्यभावः इति। सिद्धान्ते तु देवादीनां श्रवणाद्यधिकारसत्त्वादुक्तप्रवृत्तिसिद्धिः इति प्रयोजनं दर्शितम्। इदं च प्रयोजनं देवताधिकरणावसानभाष्ये सङ्ग्रहेण दर्शितम्। तथा च भाष्यं - 'ततश्च अर्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। क्रममुक्तिदर्शनान्यपि एवमेवोपपद्यन्ते' इति। 'एवमेव' इत्यस्य देवादीनां श्रवणाद्यधिकारे सत्येव इत्यर्थः। तेषां श्रवणाद्यधिकारे यानि श्रौतलिङ्गानि पूर्वमुपन्यस्तानि 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथर्षीणाम्' [बृ. उ. १-४-१०] 'एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास' [छा. उ. ८-११-३] इत्येवमादीनि, तानि यथा उपपद्यन्ते तथा इति अपिशब्दस्यार्थः। ननु सगुणब्रह्मोपासकानामपि सर्वेषां श्रवणादिनैव ज्ञानोदयः इति नियमो नास्ति, सगुणोपासकस्यापि हिरण्यगर्भस्य बृहदारण्यकभाष्ये पुरुषविधब्राह्मणव्याख्यानावसरे श्रवणादीनां प्रणिपातादीनां चाभावेऽपि ज्ञानजन्मप्रतिपादनात् इति चेत् - न। हिरण्यगर्भस्यापि वामदेववत् जन्मान्तरीयश्रवणादिनैव ज्ञानजन्मसंभवात्। तत्रैव भाष्ये 'श्रवणमनननिदिध्यासनानां साक्षाज्ज्ञेयविषयत्वात्' इति वाक्ये साक्षात्पदेन श्रवणादेः ज्ञेयब्रह्मव्यञ्जकस्य प्रणिपाताद्यपेक्षया आवश्यकत्व[1]सूचनेन जन्मान्तरीयश्रवणादिकल्पनस्य तद्भाष्यवाक्याभिप्रेतत्वे अवगम्यमाने सति तत्पूर्वभाष्ये श्रवणादिकं विना कार्यकरणशुद्ध्यादिमात्रेण ज्ञानजन्मप्रतिपादनस्य अभ्युपगमवादत्वोपपत्तेः, हिरण्यगर्भस्य वामदेवादेरिव जन्मान्तरीये ज्ञानसाधने कल्पनीये सति क्लृप्तश्रवणादिकल्पनस्यैव न्याय्यत्वाच्च। [2]न च - ज्ञानोत्पत्तिस्थले सर्वत्र श्रवणादि-

---

1. प्रणिपाताद्यपेक्षयाऽऽवश्यकत्वेति - प्रणिपातादीनामभावेऽपि ब्रह्मज्ञाननियतपूर्ववर्तित्वेत्यर्थः।

2. न च हिरण्यगर्भस्य पूर्वजन्मनि सगुणोपासननिष्ठत्वेन निर्गुणविचारो न सम्भवति इति वाच्यम्। हिरण्यगर्भस्य पूर्वकल्पे जन्मभेदेन सगुणनिर्गुणोपासनयोः संभवात्। न ह्येकस्मिन् जन्मनि कृतात् सगुणोपासनामात्रादेव हिरण्यगर्भपदप्राप्तिरस्ति। तथा सति सगुणोपासकानां सर्वेषामेव साक्षात् हिरण्यगर्भत्वप्रसङ्गात्। किन्तु हिरण्यगर्भस्य ब्रह्मलोकस्वामित्वं सरस्वतीभर्तृत्वं जन्मप्रभृतितत्त्वसाक्षात्कारसंपन्नत्वं सर्वज्ञत्वं सकलभौतिकजगत्सृष्ट्यादिसामर्थ्यं भक्तानां त्रैलोक्यैश्वर्यप्रदानसामर्थ्यं कार्यविशेषेषु शिवविष्ण्वादिप्रवर्तकत्वं ललाटात् रुद्रप्रादुर्भावहेतुत्वं महाविष्णुनाभिकमलजातत्वाद्यैश्वर्यं च श्रुत्यादिभ्यो निश्चित्य आगामिकल्पे यथोक्तहिरण्यगर्भत्वाय तत्साधनानि सगुणनिर्गुणोपासनानि तयोर्विशेषरूपाणि च बहुषु जन्मसु ध्रुवप्रह्लादविश्वामित्रागस्त्यभृग्वादिवदनुष्ठितवतो महापुरुषस्य कस्यचिदेव निरतिशयेश्वरप्रसादात् हिरण्यगर्भत्वं सम्पद्यते इति हिरण्यगर्भस्यापि जन्मान्तरीयश्रवणकल्पनं वामदेवस्येव नानुपपन्नम्। हिरण्यगर्भस्य पूर्वजन्मन्यनुष्ठितश्रवणादेः हिरण्यगर्भपदप्राप्तिकामनया प्रतिबद्धत्वेन तदा तत्त्वसाक्षात्कारानुत्पादकत्वोपपत्तेः॥ तदुक्तं वृद्धैः—'ब्रह्मलोकाभिवाञ्छायां सम्यक् सत्यां निरुध्य ताम्। विचारयेद्य आत्मानं न तु साक्षात्करोत्ययम्॥' इत्यधिकः पाठः चौखाम्बा पुस्तके॥

एवं च श्रवणविध्यभावात् कर्मकाण्डविचारवत् ब्रह्मकाण्डविचारोऽप्यध्ययनविधि[1]मूलः

नियमो नास्ति, योगमार्गे प्रवृत्तस्य श्रवणाद्यभावेऽपि तत्त्वसाक्षात्कारोदयस्वीकारात् इति - वाच्यम् 'ओमित्यात्मानं युञ्जीत' [म. ना. उ. १७-१५] 'ओमित्येवं ध्यायथ आत्मानम् [मु. उ. १-२-६] इत्यादिध्यानविधिबलेन 'तत् कारणं साङ्ख्ययोगाभिपन्नम्' 'विद्यामेतां योगविधिं च कृत्स्नम्' [क. उ. ६-१८] इत्यादिश्रौतलिङ्गसहकृतेन विचारासमर्थस्य योगमार्गे अधिकारः इति तृतीयपरिच्छेदे वक्ष्यमाणतया विचारसमर्थस्य विचारं विना ज्ञानोत्पत्त्यनभ्युपगमात्। एवं यद्यत् साधनं अदृष्टद्वारा तत्त्वज्ञानसाधनत्वेन शास्त्रसिद्धं, तत् सर्वं सगुणोपासनवत् दृष्टसामग्रीभूतसाङ्ख्यमार्गेण तदशक्तौ योगमार्गेण वा तत्त्वज्ञानसाधनं इति कल्प्यते। न त्वदृष्टमात्रात् ज्ञानलाभः कल्पयितुं युक्तः। अन्यथा जीवनादृष्टमात्रादेव स्तन्यपानादिप्रवृत्तिकल्पनापत्त्या तत्रापि इष्टसाधनतास्मरणं जन्मान्तरीयसंस्कारहेतुकं सर्वसम्प्रतिपन्नं न कल्पनीयं स्यात्। क्लृप्तदृष्टकारणं विना कार्योत्पत्त्ययोगस्य उभयत्र तुल्यत्वात्। अत एव पञ्चदश्यां तत्त्वज्ञानं प्रति मार्गद्वयनियम उक्तः साङ्ख्ययोगौ प्रकृत्य 'इति मार्गौ विचार्याथ जगाद परमेश्वरः' [प. द. १२-८३] इति। सङ्ग्रहकर्ताऽपि तृतीयपरिच्छेदे साङ्ख्ययोगशब्दितमार्गद्वयमेव विद्यावाप्त्युपायत्वेन वक्ष्यति - 'एवं श्रवणमननादिसाधनानुष्ठानप्रवणस्य विद्यावाप्तिः इत्यस्मिन्नर्थे सर्वसम्प्रतिपन्ने स्थिते भारतीतीर्थाः ध्यानदीपे विद्यावाप्तौ उपायान्तरमप्याहुः' इतिग्रन्थेन। तदयं निष्कर्षः - विद्याधिकारिणो विचारसमर्थस्य प्रतिषेधाभावे वेदान्तश्रवणमनुष्ठेयम्। सति तु प्रतिषेधे[2] इतिहासपुराणभाषाप्रबन्धादिश्रवणमनुष्ठेयम्। विद्याधिकारिणो विचारासमर्थस्य तु त्रैवर्णिकस्य योगशब्दितनिर्गुणोपासनमनुष्ठेयम्। मार्गद्वयासम्भवे च तत्संभवयोग्यजन्मप्राप्त्या तदन्यतरानुष्ठानद्वारा ज्ञानलाभः - इति। तथा च श्रवणाधिकारिणः श्रवणस्य नित्यप्राप्तत्वात् तत्तुल्यकक्ष्यतया साधनान्तरस्य कस्यचित् विकल्प्य समुच्चित्य वा प्राप्त्यभावात् न तत्र विध्यवकाशः इति सिद्धम्।

एवं ब्रह्मसाक्षात्कारं प्रति श्रवणादेः [3]नित्यप्राप्तत्वात् विधिं विनैव श्रवणाद्यनुष्ठानं सिद्ध्यति इति

---

1. ननु अध्ययनविधिः अक्षरग्रहणमात्रपर्यन्ता, विचारस्तु नित्येषु नित्यविधिप्रयुक्तः, काम्येषु कामनाप्रयुक्तः, इति पञ्चपादिकाविवरणे व्यवस्थापितत्वात् विचारस्य अध्ययनविधिमूलत्वोक्तिः असङ्गता इति चेत् - सत्यम्। विवरणमतेन असङ्गतमेव। आचार्यवाचस्पतिपक्षोपपादनं हि प्रकृतम्। तत्पक्षे विचारसाध्यार्थनिश्चयपर्यन्तोऽध्ययनविधिः विचारप्रयोजक इत्येव सिद्धान्तः। स्पष्टश्चायं जिज्ञासाधिकरणभामत्याम्। अनुपदमेव सङ्ग्रहेऽप्युक्तं - 'स्वाध्यायोऽध्येतव्यः' इति अर्थावबोधार्थनियमविधिबलादेव' इत्यादि। न च कृष्णालङ्कारे 'अर्थावबोधेत्यादि मीमांसकमतमाश्रित्योक्तम्' इति व्याख्यानं कथं सङ्गच्छते इति शङ्क्यम्। मीमांसकमतं वाचस्पतेरपि संमतमिति भावेनोपपत्तेः। तस्मात् आचार्यवाचस्पतिपक्षोपपादनावसरे नेदमसङ्गतम् - इति।

2. सति तु प्रतिषेधे इति - अत्र 'प्रतिषिद्धवेदाध्ययनश्रवणस्य शूद्रस्य इतिहासपुराणाभ्यामेव ब्रह्मसाक्षात्कारोत्पत्तिः न भाषाप्रबन्धादिना' इति श्रीमद्दीक्षितेन्द्रैः ग्रन्थान्तरे व्यवस्थापितत्वात् भाषाप्रबन्धादिश्रवणकथनं त्रैवर्णिकशूद्रातिरिक्ताधिकारिपरं इत्यनुसन्धेयम्।

3. नित्यप्राप्तत्वात् - विधिं विना लोकत एव नियतप्रवृत्तिविषयताप्रयोजकप्रतीतिविषयत्वात्।

इति आचार्यवाचस्पतिपक्षानुसारिणः ॥

ब्रह्मलक्षणविचारः

जन्मादिषु एकैकं प्रति कारणत्वं लक्षणम्

विचार्यस्य च ब्रह्मणः जगज्जन्मस्थितिलयकारणत्वं लक्षणमुक्तं 'यतो वा इमानि भूतानि जायन्ते' [तै. उ. ३-१] इत्यादिश्रुत्या । जगज्जन्मस्थितिलयेषु [1]एकैककारणत्वमप्यनन्यगामि-

---

प्रतिपादितम् । इदानीं श्रवणानुष्ठापकविध्यपेक्षायामपि यथा कर्मकाण्डश्रवणं 'कर्मवाक्यविचारः कर्तव्यः' इति पृथग्विध्यभावेऽपि अध्ययनविधिबलादेव सिद्ध्यति एवं वेदान्तश्रवणमपि तद्बलादेव सिद्ध्यतीति न श्रोतव्यवाक्ये पृथग्विचारविध्यपेक्षाऽस्ति इत्याशयेन उपसंहरति - **एवञ्चेति** । लोकत एव श्रवणादेः प्राप्तत्वे सति श्रवणविध्यपेक्षाभावात् इत्यक्षरार्थः ।

श्रोतव्यवाक्यार्थविचारेण प्रथमसूत्रार्थः सङ्गृहीतः । क्रमप्राप्तं द्वितीयसूत्रार्थं सङ्गृह्णाति - **विचार्यस्य चेति** । चकारोऽवधारणार्थस्सन् श्रुत्या इत्यनेन सम्बध्यते । श्रुत्यैव लक्षणमुक्तम् , न तु व्याप्त्यादिलक्षणवत् पुरुषोत्प्रेक्षितमित्यर्थः । 'येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति' [तै. उ. ३-१] इति वाक्यशेषः आदिपदार्थः । श्रुतौ 'यतः' इति यच्छब्देन ब्रह्मवल्ल्यां निरूपितं सत्यज्ञानानन्दानन्तात्मकं ब्रह्म परिगृह्यते । सर्वनाम्नः प्रकृतप्रधानपरामर्शकत्वस्वाभाव्यात् । ततश्च यच्छ्रुतिसामर्थ्यादेव ब्रह्मणस्सच्चिदानन्दस्वरूपात्मकं स्वरूपलक्षणं लभ्यते । पञ्चमी च प्रकृतित्वं हेतुत्वसामान्यं[2] वा वक्ति । हेतुत्वसामान्यं च प्रकृतिकर्त्रुभयसाधारणमिति [3]अविशेषादभिन्ननिमित्तोपादानत्वरूपं लक्षणं लभ्यते । इदंशब्देन प्रत्यक्षाद्युपस्थितं सर्वमुच्यते । भूतशब्दश्च पृथिव्यादिमहाभूतेषु प्राणिषु च रूढः । प्रकृते च विनिगमनाविरहेण रूढ्योरनुन्मेषात् भवन्तीतिव्युत्पत्त्या कार्यमात्रं भूतशब्देनोच्यते । जीवन्ति - स्थितिं लभन्ते । प्रयन्ति - लीयमानानि सन्ति यत् अभिसंविशन्ति - येन तादात्म्यं गच्छन्तीति यावत् । तत्-कारणं ब्रह्म, तत् विजिज्ञासस्व - विशेषेण सच्चिदानन्दैकरसपूर्णप्रत्यग्रूपेण ज्ञातुं-साक्षात्कर्तुम् इच्छ । इच्छामात्रेणोक्तसाक्षात्कारालाभात् सन्प्रत्ययेन विचारो लक्ष्यते । उक्तलक्षणमुखेन ब्रह्म विचारय इत्यर्थः । अत्र यतो भूतानि जायन्ते तत् ब्रह्म, येन जीवन्ति तत् ब्रह्म, यदभिसंविशन्ति तत् ब्रह्म, इति श्रुतिपाठे सति जगज्जन्मकारणत्वं तत्स्थितिकारणत्वं तल्लयकारणत्वं च प्रत्येकमेव श्रुत्या ब्रह्मलक्षणमुक्तं स्यात् । न तु तथा पाठोऽस्ति । अतो जन्मादित्रितयकारणत्वं श्रुत्या लक्षणमुक्तमिति प्रतिभाति, तदाक्षिपति - **जगज्जन्मस्थितिलयेष्विति** । निर्धारणार्था सप्तमी । 'यतो

---

1. एकैककारणत्वमपीति - अपिशब्दः एवकारार्थः । एकैककारणत्वमेव लक्षणं भवितुमर्हतीत्यर्थः । तथा च त्रितयकारणत्वं व्यर्थविशेषणघटितत्वात् लक्षणेन इतरभेदानुमाने व्याप्यत्वासिद्धिसंपादकतया लक्षणत्वविघटकमिति भावः । व्यर्थविशेषणत्वमेव उपपादयति टीकायाम् - 'यत' इत्यादिना ।

2. "'यत' इति कारणनिर्देशः," इति भाष्यस्वारस्यं आश्रित्याह - हेतुत्वसामान्यं वेति ।

3. अविशेषादिति - व्यावर्तकाभावात्, सङ्कोचकाभावात् इत्यर्थः ।

त्वाल्लक्षणं भवितुमर्हतीति चेत्, सत्यम् । लक्षणत्रयमेवेदं परस्परनिरपेक्षम् । अत एव 'अत्ता चराचरग्रहणात्' (ब्र. सू. १-१-९) इत्याद्यधिकरणेषु सर्वसंहर्तृत्वादिकं प्रत्येकं ब्रह्मलिङ्गतया

भूतानि जायन्ते' इत्युपक्रम्य 'तद्ब्रह्म' इति श्रुत्या लक्ष्ये ब्रह्मणि कारणत्वस्य सत्त्वप्रतिपादनात् नासम्भवः, 'तद्ब्रह्म' इत्येकवचनेन लक्ष्यब्रह्मव्यक्तेरेकत्वावगमात् नाव्याप्त्यवकाशः, इति दोषद्वयाभावं सिद्धं कृत्वा अतिव्याप्तिरपि नास्तीत्याह - **अनन्यगामित्वादिति** । ब्रह्मान्यगामित्वाभावादित्यर्थः ।

ननु प्रधानेऽतिव्याप्तिः, तस्य साङ्ख्यैरुपादानत्वाभ्युपगमेन [1]उपादानतया जगज्जन्महेतुत्वस्य आधारतया स्थितिहेतुत्वस्य लयाधारतया लयहेतुत्वस्य च तत्रापि सत्वादिति चेत् । न - तत्तत्कर्तृत्वस्यापि लक्षणे विशेषणत्वेन विवक्षिततया जडे प्रधाने [2]तदयोगात् । न च - तत्तत्कर्तृत्वमेव प्रत्येकं लक्षणमस्तु किं तदुपादानत्वरूपविशेष्येणेति वाच्यम् । अदृष्टद्वारा जगज्जन्मादिकर्तरि जीवे अतिव्याप्तिवारकत्वात्, परिच्छिन्नजीवस्य तदुपादानत्वायोगात् । न च साक्षात् जगज्जन्मकर्तृत्वं नियन्तृतया जगत्स्थितिहेतुत्वं सञ्जिहीर्षया जगत्संहर्तृत्वं च लक्षणमिति विवक्षायां जीवेऽतिव्याप्त्यभावात् उपादानत्वरूपं विशेष्यं व्यर्थमेवेति वाच्यम् । तर्ह्युपादानत्वमपि पृथगेव लक्षणमस्तु । मायाया ब्रह्मोपादानताघटकमात्रत्वेन पृथगुपादानत्वाभावात् प्रधानादिकारणान्तरस्य च अप्रामाणिकत्वेन अतिव्याप्त्यभावात् इति भावः ।

प्रत्येकं लक्षणत्वसम्भवमङ्गीकरोति - **सत्यमिति** । तर्हि श्रुत्या त्रितयकारणत्वं कथं लक्षणमुक्तमित्याशङ्क्य श्रुतेरपि प्रत्येकलक्षण एव तात्पर्यं, मेलनस्य प्रयोजनाभावात् इत्याशयेनाह - **लक्षणत्रयमेवेदमिति** । इदं - जगत्कारणत्वं जन्मादीनां मध्ये एकैकनिरूपितं परस्परनिरपेक्षं सल्लक्षणत्रयमेव श्रुत्यभिमतं, न तु त्रितयनिरूपितकारणत्वरूपमेकं लक्षणं इत्यर्थः । त्रयपदमनेकपरं न तु त्रित्वनियमपरम्, ततोऽप्याधिक्यस्य[3] शङ्कावसरे दर्शितत्वात् इति बोध्यम् । जगत्संहर्तृत्वादेः प्रत्येकं ब्रह्मलक्षणत्वे सूत्रकारादिसम्मतिमाह - **अत एवेति** । अत्र आदिपदेन अन्तर्याम्यधिकरण (ब्र. सू. १ २-५/१८) जगद्वाचित्वाधिकरणयोः (ब्र. सू. १-४-५/१६) सङ्ग्रहः ।

अयमर्थः कठवल्ल्यां पठ्यते - 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' (क. उ. २-२५) इति । अत्र ब्रह्मक्षत्रयोः प्रयुक्त ओदनशब्दस्तावत् न मुख्यः, किं तु गौणः । लोके च ओदनशब्दमुख्यार्थस्य अदनीयत्वप्रसिद्धेः अदनीयत्वेन गुणेन तयोरोदनशब्दः प्रवर्तते । तथा च यस्य ब्रह्मक्षत्रे ओदनवददनीये इत्युक्तौ यच्छब्दार्थस्यात्तृत्वं प्रतीयते । अनेनैवाभिप्रायेणोक्तं सूत्रे अत्तेति ।

---

1. उपादानतया - जगदुपादानतया ।
2. तदयोगादिति । कर्तृत्वस्य ज्ञानरूपत्वात् ज्ञानघटितत्वाद्वा जडे कर्तृत्वायोगात् इत्यर्थः ।
3. उपादानत्वेन साकं चतुष्ट्वस्य ।

ओदनपदवाच्यार्थस्यादनीयत्वं द्विविधमस्ति - भुजिक्रियाकर्मत्वात्मकभोज्यत्वरूपमेकं, विनाश्यत्वरूपमपरम्। परं तु भोज्यत्वगुणः प्रसिद्धः, न तु विनाश्यत्वगुणः। गौणप्रयोगे च प्रसिद्धगुण एव गृह्यते। यथा अग्निर्माणवक इत्यत्र अग्निगतशुचित्वादिगुण एवोपादीयते प्रसिद्धत्वात्, न तु तद्गतोऽपि विनाश्यत्वादिगुणः। एवं प्रकृतेऽपि लोकप्रसिद्धिबलात् भोज्यत्वगुण एवौदनशब्दात् प्रतीयते। अस्ति च ब्रह्मक्षत्रयोरपि स्त्रीपिण्डरूपयोर्भोज्यत्वं पुमांसं प्रति। ब्रह्मक्षत्रयोश्च भोज्यत्वप्रतीतौ सत्यां तत्प्रतिसम्बन्धिनि यच्छब्दार्थे पूर्वं प्रतीतमत्तृत्वं भोक्तृत्वरूपं जीवलिङ्गं पर्यवस्यति। यदा तु ओदनपदस्य मृत्यूपसेचनपदसन्निधानात् ब्रह्मक्षत्रयोः विनाश्यत्वगुणः स्वीक्रियते न तु भोज्यत्वगुणः, स्त्रीपिण्डरूपब्रह्मक्षत्रकर्मकभुजिक्रियायां मृत्योरुपसेचनत्वासम्भवेन 'मृत्युर्यस्योपसेचनम्' इत्यंशस्यानन्वयप्रसङ्गात्, ब्रह्मक्षत्रयोर्विनाशने तु मृत्योः सहायत्वरूपमुपसेचनत्वमस्तीति न तदनन्वयप्रसक्तिः; तदा तत्प्रतिसम्बन्धिनि यच्छब्दार्थे पूर्वं प्रतीतमत्तृत्वं संहर्तृत्वरूपं पर्यवस्यति। विनाश्यत्वगुणग्रहणपक्षे त्वयं विशेषो लभ्यते - लोके हि दध्यादिरूपमुपसेचनं स्वमिश्रितान्नादिनाशे साधनं दृष्टमिति मृत्यूपसेचनपदयोगबलात् सभृत्युकस्य चराचरात्मकस्य जगतो विनाशनं प्रतीयते। तदनुसारात् ब्रह्मक्षत्रपदयोरजहल्लक्षणया कृत्स्नजगत्परत्वं च प्रतीयते। तत्प्रतिसम्बन्धिन्यपि यच्छब्दार्थे कृत्स्नजगत्संहर्तृत्वरूपं ब्रह्मलिङ्गं भाति। एवं स्थिते प्रथमं अदनीयत्वगुणयोगात् प्रतीतः अत्ता किं जीवः उत परमात्मा इति संशयः। तत्र पूर्वपक्षः—जीव एव, लोकप्रसिद्ध्यनुसारेण अत्तृत्वस्य भोक्तृत्वरूपताप्रतीतेः, न परमात्मा, 'अनश्नन्' इति वचनेन तस्य भोक्तृत्वनिषेधात् इति। सिद्धान्तस्तु—अत्ता परमात्मा। कुतः? चराचरग्रहणात्। मृत्यूपसेचनपदानुरोधेन पूर्वोक्तरीत्या अत्तृत्वस्य चराचरात्मकसकलजगत्संहर्तृत्वरूपत्वप्रतीतेः। न च परमात्मनोऽन्यस्य जगत्संहर्तृत्वं सम्भवति। न च लोकप्रसिद्धिबलादत्तृत्वं भोक्तृत्वरूपं भातीत्युक्तमिति वाच्यम्। तत्प्रसिद्ध्यपेक्षया वाक्यशेषाधीनविनाश्यत्वगुणप्रसिद्धेः शीघ्रतरत्वेन बलवत्त्वात्। अतोऽत्ता पर एवेति निर्णयः। स संहर्ता परमेश्वरो यत्र निर्विशेषे भेदकल्पनया वर्तते तं निर्विशेषं परमात्मानं इत्था - इत्थं को वेद - न कोऽपि इति तस्य दुर्विज्ञेयत्वं उदाहृतमन्त्रचतुर्थपादेन विवक्षितमिति बोध्यम्।

'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्' [ब्र. सू. १-२-१८]। 'य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति' [बृ. उ. ३-७-१] इत्युपक्रम्य 'यः पृथिव्यां तिष्ठन्, योऽप्सु तिष्ठन्' [बृ. उ. ३-७-३] इत्यादिना कांश्चित् पर्यायानुक्त्वा 'इत्यधिदैवतं' इत्युपसंहृत्य पुनः 'यः सर्वेषु भूतेषु तिष्ठन्' 'यः सर्वेषु लोकेषु' 'यः सर्वेषु वेदेषु' 'यः सर्वेषु यज्ञेषु' इत्यादयः केचन पर्यायाः काण्वमाध्यन्दिनपाठभेदेनाम्नाताः। तत्र अधिदैवादिषु देवभूतलोकवेदयज्ञादिषु श्रुतोऽन्तर्यामी परमात्मा, कुतः? तद्धर्मव्यपदेशात्, तद्धर्मस्य - परमात्मधर्मस्य अविशेषेण सर्वस्थितिकर्तृत्वरूपसर्वनियन्तृत्वस्य 'येन जातानि जीवन्ति' इति श्रुतिसिद्धस्य वाक्योपक्रमे 'य इमं च लोकम्' इत्यादिना व्यपदेशात्, न जीवादिः अन्तर्यामी, तस्य उक्तधर्मासम्भवात् - इति सूत्रार्थः।

उपन्यस्तं इति कौमुदीकाराः ।

जगज्जन्मादित्रितयं प्रति कारणत्वं लक्षणम्

अन्ये तु जन्मकारणत्वस्य स्थितिकारणत्वस्य च निमित्तसाधारण्यात् उपादानत्वप्रत्यायनाय

'जगद्वाचित्वात्' [ब्र. सू. १-४-१६]। कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे बालाकिं ब्राह्मणं प्रति अजातशत्रोर्वचनं श्रूयते - 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्म स वै वेदितव्यः [1]पुरुषः' [कौ. उ. ४-१९] इति । अत्र वेदितव्यत्वेन श्रुतः पुरुषः जीवः परो वेति संशये जीव इति पूर्वपक्षः। पुरुषपदस्य जीवे रूढत्वात्। 'कर्महैव तदूचतुः' 'पुण्यो वै पुण्येन कर्मणा भवति' [बृ. उ. ३-२-१३] इत्यादौ वेदे, लोके च 'पुण्यकर्माऽयं यतस्सुखी वर्तते' इत्यादौ, कर्मपदस्य धर्मादौ प्रयोगदर्शनेन तत्र रूढत्वाच्च । ऊचतुः आर्तभागयाज्ञवल्क्यावित्यर्थः। कर्मसम्बन्धी पुरुषो जीव एव, न परमात्मा । तस्य धर्माद्यभावात् । न च 'एतेषां पुरुषाणां कर्ता' इति वाक्येन वेदितव्यपुरुषस्य प्रकृतादित्यचन्द्रादिपुरुषकर्तृत्वमुच्यमानं जीवे कथं सम्भवतीति वाच्यम्। भोगोपकरणभूतानादित्यादिपुरुषान् प्रति भोक्तुर्जीवस्य अदृष्टद्वारा कर्तृत्वोपपत्तेः। अत एव 'यस्य वैतत् कर्म' इति वाक्यं सङ्गतम्, अदृष्टद्वारा प्रकृतपुरुषकर्तृत्वोपपादकत्वात्, इत्येवं प्राप्ते सिद्धान्तः - कर्मशब्दस्य न धर्मादौ रूढिः। 'चलनात्मकं कर्म' इति प्रसिद्ध्यनुरोधेन परिस्पन्दे तस्य रूढत्वात्। कथं तर्हि धर्मादौ तत्प्रयोगनिर्वाहः। विहितप्रतिषिद्धरूपदेहादिपरिस्पन्दजन्ये धर्मादौ लक्षणया प्रयोगोपपत्तेः। न च देवताध्यानादिरूपमनोमात्रव्यापारजन्ये धर्मादौ परिस्पन्दजन्यत्वाभावेन लक्षणया प्रयोगायोगे सति परिस्पन्द इव धर्मादावपि रूढिरपरिहार्येति वाच्यम्। तर्हि प्रकृते [2]विनिगमनाविरहेण रूढ्योरनुन्मेषे सति क्रियत इति कर्म इति व्युत्पत्त्या कर्मपदं कार्यमात्रमाह। एतत्पदमपि प्रत्यक्षाद्युपस्थितवस्तुमात्रमाह। प्रकृतस्य तत्परामर्शयोग्यस्य कस्यचिदभावात्। तथा च एतत् - कृत्स्नं जगत् यस्य कर्म - कार्यं इत्यर्थलाभेन वेदितव्यपुरुषस्याशेषजगदुत्पत्तिकर्तृत्वं सिद्ध्यति। तच्च ब्रह्मलिङ्गम्। आदित्यादिपुरुषकर्तृत्वमपि न मुख्यं जीवस्य सम्भवति। 'एतेषां पुरुषाणां कर्ता' इत्यत्र मुख्यकर्तृग्रहणसम्भवे गौणकर्तृग्रहणायोगात्। न च अशेषजगत्कर्तृत्वोक्तौ तत एवादित्यादिकर्तृत्वस्यापि लाभात् पृथक्तदुक्तिर्व्यर्थेति वाच्यम्। मन्त्रार्थवादादिष्वादित्यचन्द्रादिपुरुषाणां महामहिमसङ्कीर्तनेन तेषु सञ्जातपर-

---

1. स वै वेदितव्यः पुरुषः इति। श्रुतिपाठे क्वचित् पुरुषपदं न श्रूयते। अत एव भाष्येऽपि 'वेदितव्यः जीवः परमात्मा वा' इत्येव निर्दिश्यते। वक्ष्यते चैतत् अनुपदमेव कृष्णालङ्कारे - "श्रुतिपाठे क्वचित् पुरुषपदाश्रवणात्" इति। क्वचिदित्युक्त्या क्वचित् श्रवणमस्तीति ज्ञायते। तदभिप्रायेणात्र 'वेदितव्यः पुरुषः' इत्युद्धृतम्। यत्र न श्रूयते तत्रापि पूर्वं वेदितव्यत्वेन पुरुषस्य प्रक्रान्तत्वात् अत्रापि वेदितव्यः पुरुष एव इत्यनुसन्धेयम्।

2. विनिगमनाविरहेण रूढ्योरनुन्मेषे—एकत्र पक्षपातिनी युक्तिः विनिगमना। परस्परप्रतिबन्धात् अकार्यकरत्वं अनुन्मेषः।

ब्रह्मत्वभ्रान्तिनिवर्तकत्वेन[1] पृथगुक्तिसाफल्यात्। पुरुषपदस्यापि न जीवे रूढिः। 'पूरणात् पुरुषः' इति क्लृप्तयोगेनैव कृत्स्नजगद्व्यापिनि ब्रह्मणीव कृत्स्नशरीरव्यापिनि जीवेऽपि प्रयोगोपपत्त्या तत्र रूढेरकल्पनात्, तत्कल्पनेऽपि योगवत् रूढेरपि जीवब्रह्मसाधारणचेतनमात्रे कल्पनोपपत्तेश्च, न पुरुषश्रुतिः जीवपक्षपातिनी। श्रुतिपाठे क्वचित् पुरुषपदाश्रवणाच्च। तथाचायं सूत्रार्थः - वेदितव्यः पुरुषः परमात्मा, कृत्स्नजगत्कर्तृत्वात्। न च हेत्वसिद्धिः। कर्मपदस्य जगद्वाचित्वात्। तस्मात् वेदितव्यः पुरुषः परमात्मेति सिद्धम्।

एवं च सर्वसंहर्तृत्वादिकमित्यत्र आदिपदेन अन्तर्याम्यधिकरणोक्तं सर्वनियन्तृत्वरूपसर्वस्थितिकर्तृत्वं जगद्वाचित्वाधिकरणोक्तं सर्वजगदुत्पत्तिकर्तृत्वं च गृह्यते।

ननु 'यतः' इत्यादिश्रुत्या जीवव्यावृत्तेश्वरस्य तत्पदवाच्यस्य ब्रह्मणो लक्षणमुक्तमिति तात्पर्यवर्णनमयुक्तम्, 'तद्विजिज्ञासस्व तद्ब्रह्म' इतिवाक्यशेषानुसारेण श्रुतेः [2]वाक्यार्थभूताद्वितीयजिज्ञास्यब्रह्मलक्षणप्रतिपादकत्वस्यैवावगमात्, इत्याशङ्क्य श्रुतेस्तथाभूतब्रह्मलक्षणपरत्वमुपगच्छतां मतमाह - **अन्ये त्विति**। चेतनाचेतनात्मककृत्स्नभूतोपादानत्वप्रतिपत्तिर्हि ब्रह्मणोऽद्वितीयत्वबोधहेतुः। न च चेतनानां नित्यत्वात् कथं तदुपादानत्वं ब्रह्मण इति वाच्यम्। तेषां स्वरूपेण नित्यत्वेऽपि शरीरद्वयविशिष्टतया कार्यत्वोपगमात्। न चैवमपि ब्रह्मापेक्षया द्वितीयस्य तत्कार्यजगत एव विद्यमानत्वात् कथं तदुपादानत्वमद्वितीयत्वप्रत्यायकमिति वाच्यम्। कार्यस्य हि उपादानमेव वास्तवं स्वरूपं, न तु तदतिरिक्तं वास्तवं स्वरूपमस्ति, नामरूपात्मकजगद्रूपं तु मिथ्याभूतमिति आरम्भणाद्यधिकरणेषु व्यवस्थापितत्वात्। अतस्सर्वोपादानत्वं, सर्वस्य वास्तवं स्वरूपं ब्रह्मैवेति बोधनद्वारा ब्रह्मणो [3]वास्तवाद्वितीयत्वबोधहेतुर्भवति, अद्वितीयब्रह्मबोधश्च [4]मुक्तिहेतुः, इति मुक्तिप्रयोजकब्रह्माद्वितीयत्वबोधहेतुभूतोपादानत्वप्रत्यायनार्थं 'यत् प्रयन्त्यभिसंविशन्ति' इतिश्रुतिभागेन ब्रह्मणि सर्वभूतलयो दर्शित इत्याह— **उपादानत्वेति**। ननु घटाद्युपादाने मृदादौ घटादिलयाधारत्ववत् [घट] जन्मादिकारणत्वस्यापि सत्त्वेन तद्बलादपि उपादानत्वप्रत्ययः स्यादिति, नेत्याह—**जन्मकारणत्वस्येति**। निमित्त कुलालदण्डचक्रादि। तर्हि श्रुतौ जन्मादिकारणत्वप्रतिपादनं व्यर्थम्, लयमात्रप्रतिपादनादेवेष्टसिद्धेरिति, नेत्याह—**अस्त्विति**। घटजन्मन्युपादान-

---

1. भ्रान्तिनिवर्तकत्वेन पृथगुक्तिसाफल्यात् इति। तथा च वाक्यद्वयस्य एवमर्थः संपद्यते — य एतेषां जगदेकदेशभूतानां कर्ता, किमनेन विशेषणेन, यस्य वा कृत्स्नमेव जगदविशेषितं कर्म इति। 'वा' शब्दः एकदेशावच्छिन्नकर्तृत्वव्यावृत्त्यर्थः।

2. वाक्यार्थभूतेति—वस्तुगत्या तत्त्वमस्यादिमहावाक्यार्थभूतेत्यर्थः। तत्पदलक्ष्यार्थरूपजीवेश्वरानुगचिन्मात्रेति यावत्।

3. वास्तवाद्वितीयत्वं—यः पारमार्थिकत्वेन द्वितीयाभावः तदुपलक्षितस्वरूपत्वम्।

4. मुक्तिहेतुरिति। तत्पदलक्ष्यार्थभूताद्वितीयब्रह्मबोधः लक्षणया महावाक्यघटकतत्पदजन्योपस्थितिद्वारा महावाक्यार्थबोधजननेन परम्परया मुक्तिहेतुः इति भावः। अत एव अनुपदं मुक्तिप्रयोजकब्रह्माद्वितीयत्वबोधेति उक्तबोधस्य मुक्तिप्रयोजकत्वं उच्यते। क्वचित्तु मुक्तिप्रयोजनकेति पाठः। तत्रापि मुक्तिसाधनेत्यनुक्त्वा मुक्तिप्रयोजनकेति निर्देशात् उक्त एवार्थः अभिमतः।

प्रपञ्चस्य ब्रह्मणि लयो दर्शितः। अस्तु ब्रह्म जगदुपादानं, तज्जन्मनि घटजन्मनि कुलालवत् तत्स्थितौ राज्यस्थेमनि राजवत् उपादानादन्यदेव निमित्तं भविष्यति, इति शङ्काव्यवच्छेदाय तस्यैव जगज्जनन-

---

मृदतिरिक्तकुलालवत् जगज्जन्मन्यपि उपादानब्रह्मापेक्षया अन्यत् कर्तृरूपं निमित्तं भविष्यतीति भ्रमव्यवच्छेदाय तस्यैव - ब्रह्मण एव श्रुतौ जगज्जननकर्तृत्वमुक्तम्, तथा राज्यस्थेम्नि पालनरूपे पालनीयप्रजाद्युपादानातिरिक्तराजवत् जगतस्स्थितौ जगदुपादानब्रह्मापेक्षया अन्यत् निमित्तं नियन्तृतया स्थितिहेतूभूतं भविष्यतीति शङ्काव्यवच्छेदाय तस्यैव ब्रह्मणो जगज्जीवननियामकत्वं श्रुत्या उक्तम्, इत्यर्थः। **तथा चेति।** जगज्जननजीवननियामकत्वाभ्यां जगदुपादानब्रह्मण एव तन्निमित्तत्वप्रतीतौ सिद्धायामित्यर्थः। [1]इदं श्रुत्युक्तं लक्षणमेकं सदेव अभिन्ननिमित्तोपादानत्वे पर्यवस्यत् अद्वितीयं ब्रह्म उपलक्षयति - ब्रह्मव्यतिरिक्तवस्त्वस्तित्वशङ्कानिराकरणद्वारेण ज्ञापयति, न तु प्रत्येकं लक्षणं सत् इत्यर्थः। निमित्तं च तदुपादानं चेति निमित्तोपादानम्। अभिन्नं च तन्निमित्तोपादानं चेति पुनः कर्मधारयः। आद्यकर्मधारयादेव निमित्तोपादानयोरभेदे सिद्धेऽपि पुनरभिन्नपदं, कर्मधारयावगताभेदः ऐक्यलक्षण एव, न नीलोत्पलादौ गुणगुणिनोरिव तादात्म्यरूपः - इति ज्ञापनार्थमिति बोध्यम्।

ननु, यत इति पञ्चमीश्रुत्या सर्वभूतलयाधारत्वलिङ्गेन च निश्चितं ब्रह्मण उपादानत्वं प्रधानस्येव परिणामित्वरूपं वा परमाणूनामिवारम्भकत्वरूपं वा रज्ज्वादेरारोपितसर्पाद्युपादानस्येव जगद्रूपविवर्ताधिष्ठानत्वरूपं वा वाच्यम्। तत्र नाद्यः - ब्रह्मणः कूटस्थत्वात्। परिणामवादे हि परिणामपरिणामिनोः वास्तवाभेदस्वीकारेण

---

1. इदं श्रुत्युक्तं लक्षणं एकं सदेव इति। जन्मादिसूत्रमप्यत्रानुकूलम्। तत्र हि समाहारलिङ्गैकवचननिर्देशः कृतः। तेन ज्ञायते जन्मस्थितिभङ्गनिरूपितं एकं कारणत्वं कारणतात्रयं मिलितमेव वा लक्षणमिति। अन्यथा बहुत्वविवक्षायां जन्मादयः इत्येव निर्दिश्येत। स्पष्टश्चायमर्थः विवरणभावप्रकाशिकायाम्।

ननु प्रत्येककारणतायाः पूर्वोक्तरीत्या निर्दुष्टत्वात् लक्षणत्वसंभवात् अधिकस्य व्यर्थत्वात् व्यर्थविशेषणत्वं इति पूर्वमुक्तमिति चेत्, न। धूमतत्प्रागभावयोरिव प्रत्येककारणतायाः त्रितयनिरूपितकारणतायाश्च धर्मिणोर्भेदात्। यदि धर्मिणोर्भेदो नाङ्गीक्रियते तदापि न वैयर्थ्यम्। सिद्धान्ते पूर्वोक्तरीत्या अतिव्याप्तेरभावेऽपि परमतरीत्या अतिव्याप्तेः। प्रत्येककारणतायाः परमते सद्वितीयेऽप्यङ्गीकारात् सद्वितीयत्वेन अन्यथासिद्ध्यापातात्। सद्वितीयत्वविरोधिनोऽद्वितीयस्वरूपस्यैव ब्रह्मणो जिज्ञासितत्वेन लक्ष्यत्वात्। परमतरीत्या अतिव्याप्तेरपि लक्षणेनेतरभेदानुमितेः अन्यथासिद्ध्यपरपर्यायार्थान्तरतासंपादकतया लक्षणदोषत्वेन शास्त्रकृद्भिरुद्भावनदर्शनात्। अत एव भामत्यां अध्यासलक्षणे प्रत्यभिज्ञायामतिव्याप्तिनिरासकत्वेन स्मृतिरूपदलसार्थक्योपपादनं सङ्गच्छते।

यत्तु परमतरीत्या दोषनिरासार्थतया लक्षणेषु दलसार्थक्यवर्णने पराभिमतजगत्कारणस्य सच्चिदानन्दात्मकत्वाभावेन तत्राव्याप्तिप्रसङ्गेन तद्वारणार्थं स्वरूपलक्षणेऽपि तत्परिहारावश्यकता स्यात् इति, तदयुक्तम्—श्रुतौ सूत्रे च ब्रह्मण एव जिज्ञास्यत्वोक्त्या अद्वितीयस्यैव ब्रह्मशब्दात् प्रतीत्या तत्रैव लक्षणाकाङ्क्षायां लक्षणप्रणयनात्। लक्ष्यतावच्छेदकस्य निश्चितत्वेन पराभिमतपरमाण्वादेः लक्ष्यत्वाप्रसक्तेः तत्र अव्याप्तिदोषशङ्काया एव अनुदयात्।

ननु 'यतः' इति लक्षणवाक्ये त्रितयोक्तेः लक्षणवाक्यानां व्यावृत्तिबोधकत्वमते उक्तरीत्या वैयर्थ्यपरिहारेऽपि लक्षणवाक्यानामखण्डार्थत्वं इति सिद्धान्ते कथमुक्तप्रकारेण वैयर्थ्यपरिहारः संभवति इति चेत्-उच्यते। अखण्डार्थत्वं हि लक्षणवाक्यानां असाधारणलक्ष्यस्वरूपमात्रप्रमापकत्वम्। असङ्कीर्णं स्वरूपं असाधारणम्। संशयविपर्ययविरोधिवृत्त्युपहितमेव असङ्कीर्णं अभिमतम्।

जीवननियामकत्वमुक्तम्। तथाचैकमेवेदं लक्षणम् अभिन्ननिमित्तोपादानतया अद्वितीयं ब्रह्म उपलक्षयतीत्याहुः।

उपादानत्वनिर्वचनम्।

[1]ब्रह्मणश्च उपादानत्वम् अद्वितीयकूटस्थचैतन्यरूपस्य न परमाणूनामिवारम्भकत्वरूपम्, न वा प्रकृतेरिव परिणामित्वरूपम्, किं तु अविद्यया वियदादिप्रपञ्चरूपेण विवर्तमानत्वलक्षणम्। वस्तुनः तत्समसत्ताकोऽन्यथाभावः परिणामः तदसमसत्ताको विवर्तः इति वा, कारणसलक्षणोऽन्यथा-

---

ब्रह्मणः परिणामित्वे [2]परिणामजन्मादयोऽपि ब्रह्मणि प्रसज्येरन्। तथा च जन्ममरणादिविकारशून्यत्वलक्षणं श्रुतिसिद्धकूटस्थत्वं तस्य भज्येत। ततश्च कूटस्थत्वात् तस्य परिणामित्वं न सम्भवति। न द्वितीयः—अद्वितीयत्वाद्ब्रह्मणः, ब्रह्मणः सद्वितीयत्वे हि परमाणुद्वयसंयोगवदसमवायिकारणलाभसम्भवात् आरम्भकत्वं भवेत्, इत्याशयेनाह - **ब्रह्मणश्चेति**। तृतीयप्रकारः परिशिष्यत इत्याह - **किंत्वित्यादिना**। ननु ब्रह्मतद्विवर्तप्रपञ्चयोरभेदः सिद्धान्ते उपेयते, आरम्भवादे तु आरभ्यमारम्भकादत्यन्तभिन्नमुपेयते, इति आरभ्यविवर्तयोः भेदः स्पष्टः। सिद्धान्त इव परिणामवादेऽपि साङ्ख्याद्यभिमते परिणामपरिणामिनोरभेदाभ्युपगमात् विवर्तपरिणामयोर्भेदः कथमवगन्तव्य इत्याशङ्क्य लक्षणभेदादित्याह - **वस्तुन** इति। वस्तुनः - उपादानत्वाभिमतस्य, अन्यथा - पूर्वरूपापेक्षया रूपान्तरेण, भावः - भवनं अवस्थानं अन्यथाभावः, अवस्थाविशेष इति यावत्। तत्समसत्ताकः - [3]तेन वस्तुना समा सत्ता यस्य अन्यथाभावस्य स तथा। तथा च उपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वे सति

लक्ष्यस्वरूपविषयिणी तादृशी अखण्डवृत्तिश्च व्यावर्तकधर्मविशिष्टबुद्धिद्वारैव लक्षणवाक्यैः उत्पादनीया। अन्यथा स्वरूपमात्रविषयिण्यास्तस्याः लक्ष्यस्वरूपजिज्ञासाहेतुधर्मिज्ञानसमानविषयकतया संशयविपर्ययाविरोधित्वात्। ततश्च लक्ष्यस्वरूपविषयकयावत्संशयविपर्ययनिवृत्त्युपयोगिद्वारीभूततादृशबुद्ध्युत्पादनार्थतया दलानां सार्थक्यात् लक्षणवाक्यानामखण्डार्थत्वपक्षेऽपि प्रकृते सद्वितीयत्वसंशयविपर्ययनिवृत्त्युपयोगिनां दलानां सद्वितीयत्वविरोध्यद्वितीयस्वरूपप्रमितौ स्वरूपमात्रविषयिण्यामखण्डायामपि द्वारीभूतबुद्ध्युपजननेन सार्थक्यं त्रितयोक्तेः इति बोध्यम्। किञ्च सिद्धान्ते लक्षणवाक्यानां तत्त्वमस्यादिमहावाक्यं प्रति अवान्तरवाक्यत्वात् तत्र जन्मादिहेतुत्वानां एकैकमात्रस्योक्तौ विवक्षायां वा महावाक्यस्थतदादिपदैः एकैकमात्रोपलक्षितस्वरूपैक्यं प्रत्यगात्मनो बोध्येत। तथा च तयोरेव भेदभ्रमो निवर्तेत। न तु हेतुत्रयोपलक्षितेशस्वरूपात् भेदभ्रमो निवर्तेत। तस्मात् त्रितयोपलक्षितस्वरूपैक्यविषयकस्य मूलाज्ञानस्य तादृशैक्यज्ञानं विना उच्छेदासम्भवात् तं विना तादृशाज्ञानमूलकभेदभ्रमोच्छेदासम्भवात् तादृशज्ञानमावश्यकम्। तच्च त्रितयविशिष्टोपस्थितिपूर्वकशुद्धोपस्थितिजन्यमेवेति तादृशोपस्थित्यर्थं एकस्मिन्नेव वाक्ये त्रितयोक्तेः अवश्यम्भावितया अवान्तरवाक्यरूपेषु लक्षणवाक्येषु त्रितयहेतुत्वस्यैव लक्षणत्वं विवक्षितं इत्यप्यनुसन्धेयम्।

1. ब्रह्मणश्च उपादानत्वम्—चस्त्वर्थः उपादानत्वं इत्यनेन संबध्यते। ब्रह्मणः उपादानत्वं तु इत्यर्थः।

2. परिणामजन्मादयः—परिणामस्य जन्मस्थितिविनाशाः।

3. तेन वस्तुना—तद्वस्तुगतसत्तया समा सत्ता। समत्वं च व्यावहारिकत्वप्रातिभासिकत्वान्यतररूपेण। तेन यत्किञ्चिद्रूपेण साम्यमादाय शुक्तिरूप्यस्य न शुक्तिपरिणामत्वप्रसङ्गः।

भावः परिणामः तद्विलक्षणो विवर्तः इति वा, कारणाभिन्नं कार्यं परिणामः तद्भेदं विनैव

तदवस्थाविशेषरूपत्वं तत्परिणामत्वमिति [1]परिणामलक्षणं पर्यवस्यति। तत्र विवर्तवारणाय सत्यन्तम्। घटस्य तन्तुपरिणामत्ववारणाय विशेष्यम्। विवर्तलक्षणमाह - **तदिति**। वस्तुनः तदसमसत्ताकोऽन्यथाभावो विवर्त इति सम्बन्धः। उपादानत्वाभिमतवस्तुसत्ताविषमसत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तद्विवर्तत्वमिति विवर्तलक्षणम्। उपादानत्वाभिमतमृद्वस्तुसत्ताविषमसत्ताकत्वं चैतन्यस्याप्यस्तीति तस्य मृद्वस्तुविवर्तत्ववारणाय विशेष्यम्। परिणामवारणाय सत्यन्तम्। ब्रह्मचैतन्यस्य पारमार्थिकी सत्ता, घटादिप्रपञ्चस्य व्यावहारिकी सत्ता, शुक्तिरजतादेः प्रातिभासिकी सत्ता इति [2]सत्तात्रैविध्याङ्गीकारमते लक्षणभेद उक्तः। ब्रह्मणि घटादौ शुक्तिरजतादौ च सर्वत्र ब्रह्मस्वरूपभूता एकैव सत्ता न तदतिरिक्तेति मतसाधारण्येन लक्षणान्तरमाह - **कारणसलक्षण** इति। उपादानत्वाभिमतवस्तुसलक्षणत्वे सति[3] तदवस्थाविशेषत्वं तत्परिणामत्वमिति परिणामलक्षणम्। अत्र सालक्षण्यं

---

1. परिणामलक्षणमिति। तत्परिणामलक्षणमित्यर्थः। परिणामसामान्यलक्षणन्तु स्वसत्तासमानसत्ताकत्वे सति स्वावस्थाविशेषरूपत्वम्, स्वत्वं चानुगतं इति बोध्यम्। एवं विवर्तलक्षणेऽपि।

2. सत्तात्रैविध्येति। त्रिविधसत्वेत्यर्थः। उक्तं च विवरणे—'त्रिविधं सत्त्वम्। परमार्थसत्त्वं ब्रह्मणः, अर्थक्रियासामर्थ्यसत्त्वं मायोपाधिकमाकाशादेः, अविद्योपाधिकसत्त्वं [शुक्ति] रजतादेः। परमार्थसत्त्वापेक्षया अनिर्वचनीयमिति' इति।

व्याख्यातं चैतत् तत्त्वदीपने – 'परमार्थसत्त्वं नाम कालत्रयबाधाभावोपलक्षितस्वरूपम्। मायाशब्देन व्यावहारिकत्वसंपादनपटीयसी अविद्योच्यते। अविद्याशब्देन प्रातिभासिकत्वनिर्वाहकमज्ञानं [अविद्या] कथ्यते' इति।

इदमत्र बोध्यम्—त्रिविधसत्तावादेऽपि चैतन्यस्वरूपमेव सत्त्वम्; परन्तु उपाधिभेदात् तस्य त्रैविध्यम्। उपाधिश्च तत्त्वदीपनोक्ता। उक्तं च प्राचीनैराचार्यैः–'अविद्यातिरिक्तदोषाजन्यं व्यावहारिकम्, आगन्तुकदोषजन्यं प्रातीतिकम्; तत्संबन्धात् एकमेव सत्त्वं त्रिविधमित्युच्यते। 'त्रीणि सत्त्वानि भिन्नान्येव व्यवहाराय कल्पितानि' इति तु चिन्त्यम्। सर्वत्र सद्बुद्धेः एकाकारत्वात् लाघवाच्च। तस्मादुपाधिभेदादेव सत्त्वस्य त्रैविध्यम्' इति। अत्र तु व्यावहारिकप्रातीतिकपदार्थौपाधिकः भेद उक्तः। तत्त्वदीपने तु मायाविद्यौपाधिकः भेद उक्तः। चन्द्रिकायां तूक्तम्—पल्लवाविद्याकार्यगतं चैतन्यं प्रातीतिकं सत्त्वम्। मूलाविद्याकार्यगतं व्यावहारिकम्, शुद्धचिद्रूपं पारमार्थिकं इत्यादि तत्त्वदीपनाद्युक्तम्' इति। परन्तु चन्द्रिकायामेवान्यत्र 'पल्लवाविद्यावच्छिन्ना चिदाद्या 'सदिदं रजतं' इत्यादि भ्रमे [शुक्ति] रजतादिनिष्ठतया भाति। मूलाविद्यावच्छिन्ना चित् द्वितीया 'घटः सन्' इत्यादिज्ञाने भाति। सदहमित्यादिज्ञाने शुद्धचिद्रूपा तृतीया भाति। अज्ञानैक्ये [मूलाविद्यापल्लवाविद्याभेदाभावे] तु अज्ञानविषयतावच्छेदककिञ्चिदवच्छिन्ना चित् द्वितीया। उक्तावच्छेदकान्यकिञ्चिदवच्छिन्ना चिदाद्या। शुद्धचिद्रूपा तृतीया। शुक्त्यादिकमेवोक्तावच्छेदकम्, नतु शुक्तिरूप्यादिकम्' इति।

एकमेवाधिष्ठानभूतं ब्रह्मसत्त्वं कल्पिततादात्म्यसंबन्धेन सदाकारधीसामान्ये प्रकारः, न तु व्यावहारिकप्रातीतिकपारमार्थिकसत्त्वानां भेदः—इति एकसत्तावादे; 'शुक्तिरूप्यं सत्' इत्यत्र प्रातीतिकसत्त्वं प्रकारः, 'ब्रह्म सत्' इत्यत्र पारमार्थिकसत्त्वं प्रकारः, 'घटःसन्' इत्यादौ उक्तसत्त्वाभ्यामन्यत् सकलव्यावहारिकानुगतं व्यावहारिकसत्त्वं प्रकारः—इति सत्तात्रैविध्यवादे वैलक्षण्यं ध्येयम्। एकसत्तावादिनां व्यावहारिकसत्त्वं प्रातीतिकसत्त्वमित्युक्तिस्तु सत्त्वेन व्यवहारमात्रं, सत्त्वेन प्रतीतिमात्रं इत्यर्थिका।

3. उपादानत्वाभिमतवस्तुसलक्षणत्वे सति इति। सलक्षणत्वं समानधर्मवत्त्वम्। समानत्वमत्र एकत्वम्। तथा च उपादानत्वाभिमतवस्तुवृत्तिधर्मवत्त्वे सति इत्यर्थः। स च धर्मो जडत्वं इति वक्ष्यति।

तद्व्यतिरेकेण दुर्वचं कार्यं विवर्तः इति वा, विवर्तपरिणामयोर्विवेकः ॥

जडत्वरूपं बोध्यम् । परिणामपरिणामिनोः जडत्वनियमात्र क्वाप्यव्याप्तिशङ्का । मृद्वस्तुनो घटपरिणामत्ववारणाय विशेष्यम् । प्रपञ्चस्य संवित्परिणामत्ववारणाय सत्यन्तम् । विवर्तलक्षणमाह—**तदिति** । उपादानत्वाभिमतवस्तुविलक्षणत्वे सति तदवस्थाविशेषत्वं तद्विवर्तत्वं इति विवर्तलक्षणम् । अत्र [1]चित्त्वजडत्वरूपं वैलक्षण्यं विवक्षितम् । वियदादिप्रपञ्चवत् शुक्तिरजतादेरपि तत्तदवच्छिन्नचैतन्ये एवाध्यासाङ्गीकारात् जडमात्रे चैतन्यविवर्ते तद्विलक्षणत्वमस्तीति लक्षणसङ्गतिः । उपादानत्वाभिमतजडविलक्षणे चैतन्ये जडविवर्तत्ववारणाय विशेष्यम् । मृत्परिणामे घटादौ मृद्विवर्तत्ववारणाय सत्यन्तम् । [2]प्रकारान्तरेण विवर्तपरिणामयोः लक्षणमाह—**कारणाभिन्नमिति** । कारणत्वाभिमतवस्त्वभिन्नत्वे सति तत्कार्यत्वं तत्परिणामत्वम् । वियदादौ ब्रह्मकार्यत्वमस्ति तत्परिणामत्वं तु नास्तीति तद्वारणाय सत्यन्तम् । ब्रह्मप्रपञ्चयोरारोपिताभेदसत्त्वेऽपि लक्षणे विवक्षितस्य [3]धर्मिद्वयसमानस्वभावाभेदस्याभावान्नातिव्याप्तिः । परिणामवादे मृदोऽपि घटाद्यभिन्नत्वमस्तीति तस्याः घटादिपरिणामत्ववारणाय विशेष्यम् । **तदभेदमिति** । वस्तुतः तदभेदं विनैवेत्यर्थः । व्यतिरेको भेदः । अस्मिन् लक्षणे कार्यत्वमविवक्षितम् । अनाद्यविद्यादेरपि विवर्तत्वाङ्गीकारात्[4] । यद्वा कार्यरूपस्यैव विवर्तस्येदं लक्षणम् । तथा च उपादानत्वाभिमतवस्तुनस्सकाशाद्वस्तुतो भेदाभेदाभ्यां दुर्निरूपत्वे सति कार्यत्वं कार्यरूपविवर्तलक्षणम् । अत्राविद्यां प्रति उपादानत्वाभिमतचैतन्याद्वस्तुतो भेदाभेदाभ्यां निरूपयितुमशक्यायामविद्यायामतिव्याप्तिवारणाय विशेष्यम् । आरम्भवादे उपादानादभेदेन दुर्निरूपकार्ये अतिव्याप्तिवारणाय भेदेत्युक्तम् । परिणामवादे उपादानात् भेदेन दुर्निरूपकार्ये अतिव्याप्तिवारणायाभेदेत्युक्तम् । सिद्धान्ते कार्यकारणयोरभेदोपगमादसम्भववारणाय वस्तुत इत्युक्तम् ।

ननु कार्यकारणयोः वास्तवौ [5]भेदाभेदौ कथं दुर्निरूपाविति । उच्यते—

तत्र तयोः भेदस्तावत् दुर्निरूपः । निम्नोन्नतत्वादियुक्तमृद्वस्तुव्यतिरेकेण घटानुपलम्भात् संयोग-

---

1. चित्त्वजडत्वरूपं वैलक्ष्ण्यमिति । उपादानत्वाभिमतवस्त्ववृत्तिचित्त्वजडत्वान्यतरधर्मवत्त्वं इत्यर्थः । उपादानत्वाभिमतमृद्वृत्तिघटत्ववति घटे मृद्विवर्तत्वव्यवहारवारणाय चित्त्वजडत्वान्यतरेति ।

2. प्रकारान्तरेणेति । सत्तात्रैविध्यपक्षे इत्यादिः ।

3. धर्मिद्वयसमानस्वभावेति । धर्मिद्वयसत्तासमानसत्ताकेत्यर्थः । आरोपितेऽपि ब्रह्मप्रपञ्चयोरभेदे प्रपञ्चरूपधर्मिसत्तासमानसत्ताकत्वसत्त्वात् अतिव्याप्तितादवस्थ्यं स्यात्, तद्वारणाय धर्मिद्वयेत्युक्तम् । एवञ्च धर्मिद्वयसत्तासमानसत्ताकेत्यनेन कारणत्वाभिमतवस्तुसत्तासमानसत्ताकेत्येव विवक्षितम् । तावतैव उक्तातिव्याप्तेर्वारणात् । कार्यत्वदलेनापि ब्रह्मणः प्रपञ्चपरिणामत्ववारणसंभवात् ।

4. विवर्तत्वाङ्गीकारादिति । तथा च अनाद्यविद्यादौ ब्रह्मविवर्ते उत्पत्तिमत्त्वरूपकार्यत्वस्याभावात् अव्याप्तिः स्यादिति भावः । यदि च अध्यस्तत्वमेव कार्यत्वं विवक्षितं तदा नाव्याप्तिः ॥

5. भेदाभेदौ कथं दुर्निरूपौ इति । कार्यस्य कारणात् भेदाभेदाभ्यां दुर्निरूपत्वं मूलोक्तं कथं इत्यर्थः । अत एव उक्ताक्षेपसमाधानोपसंहारे कारणात् भेदाभेदाभ्यां दुर्निरूपत्वात् तस्य [कार्यस्य] अनृतत्वं सिद्धं इत्युक्तम् ।

विशेषयुक्ततन्त्वतिरेकेण पटानुपलम्भाच्च, 'मृत् घटः, तन्तवः पटः, सुवर्णं कुण्डलम्' इत्यादि[1]सामानाधिकरण्याच्च। न हि वस्तुतो भिन्नयोः सामानाधिकरण्यप्रत्ययः सम्भवति। किञ्च, कारकव्यापारात् पूर्वं मृदादौ घटादेस्सत्त्वमभ्युपगन्तव्यम्। तदसत्त्वे शशशृङ्गादिवदुत्पत्त्यनुपपत्तेः, उत्पत्तिक्षणात् पूर्वमसतः कार्यस्य उत्पत्तिक्रियां प्रति [2]कर्तृत्वानुपपत्तेश्च। पूर्वसिद्धस्यैव कर्तृत्वदर्शनात्। उत्पत्तिक्षणे उपादानेन सह कार्यस्य सम्बन्धानुपपत्तेश्च। पूर्वसिद्धयोरेव हि पश्चात् सम्बन्धसम्भवः। अन्यथा शशशृङ्गादेरपि कारणसम्बन्धस्य दुर्वारत्वात्। कारकव्यापारात् पूर्वं कार्यस्य तुच्छवैलक्षण्यानङ्गीकारे तद्वदेव पश्चादात्मलाभासम्भवस्य दुर्वारत्वाच्च। सिद्धे च प्राक् कार्यस्य सत्त्वे प्राक्काले कार्यकारणयोर्भेदे मानाभावादभेदसिद्धौ पश्चादपि तयोरभेद एव स्वीकर्तव्य इति कार्यकारणाभेदवादिनः साङ्ख्यादयः।

तद्भेदवादिनः तार्किकादयस्तु वदन्ति - कार्यकारणयोरभेदो न सम्भवति। तद्भावविरोधात्। न हि तस्यैव तत्कार्यत्वं तत्कारणत्वं च सम्भवति। अर्थक्रियाभेदाभावप्रसङ्गाच्च। न हि जलाहरणाद्यर्थक्रिया मृद्वस्तुनस्सम्भवति। घटोत्पत्तेः प्रागपि तत्प्रसङ्गात्। नापि मृदोऽर्थक्रिया घटस्य सम्भवति। मृद्वत् घटस्यापि घटोत्पादकत्वप्रसङ्गात्। कार्यस्य कारकव्यापारात् पूर्वं सत्त्वे च कारकव्यापारवैयर्थ्यप्रसङ्गात्, तदा मृद्वदेवोपलम्भप्रसङ्गाच्च। तदुक्तं पञ्चदश्यां—'स घटो न मृदो भिन्नो वियोगे सत्यनीक्षणात्। नाप्यभिन्नः पुरा पिण्डदशायामनवेक्षणात्'॥ [१३-३५] इति। वियोगे सति - मृदस्सकाशात् बुद्ध्या विवेचने क्रियमाणे इत्यर्थः। एवं कार्यकारणयोः भेदवादिभिरभेदवादिभिश्च दर्शितैः परस्परं प्रतिक्षेप्तुमशक्यैः न्यायैः कार्यस्य कारणात् भेदाभेदाभ्यां प्रागुत्पत्तेः सत्त्वासत्त्वाभ्यां च दुर्निरूपत्वात् तस्य अनृतत्वं सिद्धम्। कारणं तु कार्योत्पत्तेः पूर्वकाले कार्यकाले कार्यनाशकाले चानुवर्तमानं कार्यात् भेदेन सत्त्वेन च निरूपयितुं शक्यत्वात् सत्यमेव कार्यापेक्षया। एवं मृदादेरवान्तरकारणस्य तत्तत्कार्यापेक्षया सत्यत्वे सिद्धेऽपि परमार्थसत्यत्वं नोपेयते। श्रुत्या ब्रह्मव्यतिरिक्तस्य सर्वस्यैव बाधितत्वात्। ब्रह्मणस्तु परमार्थसत्यत्वं सर्वात्मना बाधशून्यत्वात् अभ्युपगम्यते। [3]अत एव जगत्कारणस्य सत्यत्वे मृदादिसत्यत्वं जगतो मिथ्यात्वे च मृदादिकार्यस्य घटादेरनृतत्वं च दृष्टान्तत्वेन श्रुत्या उपादीयते। तदुक्तं पञ्चदश्याम्—'एवं मायामयत्वेन विकारस्यानृतात्मताम्। विकाराधारमृद्वस्तुसत्यत्वं चाब्रवीच्छ्रुतिः'॥[१३-३८]इति। श्लोके दृष्टान्तत्वेनेति शेषः, विकारानृतत्वादौ पूर्वोक्तन्यायकलापः एवंशब्दार्थः। उक्तं च भामतीनिबन्धने 'तदनेन प्रमाणेन विकारजातस्यानिर्वाच्यतया सिद्धमनृतत्वं कारणस्य निर्वाच्यतया सिद्धं सत्यत्वं च 'मृत्तिकेत्येव सत्यम्' इत्यादिना प्रबन्धेन दृष्टान्ततयाऽनुवदति श्रुतिः'[२-१-१४] इति। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतिरित्यर्थः। विकारः - घटादिः वाचा - घटशरावादिरस्तीत्यादिशब्देन आरभ्यते व्यवह्रियत इत्यारम्भणम्। वाचा व्यवह्रियत एव

1. सामानाधिकरण्यात्—सामानाधिकरण्यप्रत्ययात्, अभेदसंसर्गकप्रत्ययादिति यावत्।
2. कर्तृत्वानुपपत्तेः—'घटः उत्पद्यते' इत्यत्र प्रतीयमानस्य उत्पत्तिक्रियां प्रति कर्तृत्वस्य अनुपपत्तेः इत्यर्थः।
3. अत एव—स्वस्वकार्यापेक्षया कारणसत्यत्वस्य श्रुत्यभिप्रेतत्वादेव।

॥ शुद्धब्रह्मजीवेश्वराणां मतभेदेन जगदुपादानत्वनिरूपणम् ॥

अथ शुद्धं ब्रह्म उपादानमिष्यते, ईश्वररूपं, जीवरूपं वा। अत्र संक्षेपशारीरकानुसारिणः केचिदाहुः— शुद्धमेवोपादानम्। जन्मादिसूत्रतद्भाष्ययोः उपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेः। तथा च

न वस्तुतोऽस्ति विकारः तस्य दुर्निरूपत्वादिति भावः। कथं तर्हि मृद्वस्तुनः सकाशात् घटादिः जातः इति कार्यकारणयोर्भेदव्यवहारः, इत्यत आह - नामधेयम्। भेदव्यवहारो नाममात्रं - अर्थशून्यम्। यथा 'राहोश्शिरः' 'पुरुषस्य चैतन्यम्' इति व्यवहारः। विकारवत् भेदोऽप्यनिर्वचनीय इति भावः। किं तर्हि सत्यं, तत्राह - मृत्तिकेति। मृत्तिका इत्यनेन - मृत्तिकात्वेन रूपेण घटशरावादिविकारेषु प्रतीयमानं कारणरूपं वस्तु सत्यम्। विकारसत्यत्वमेवकारेण व्यवच्छिद्यते। [1]तत् सिद्धं दुर्वचत्वं कारणात् भेदाभेदाभ्यां कार्यस्येति।

पृच्छति —— अथेति। ननु वाक्यार्थभूतशुद्धब्रह्मण एव श्रुतौ लक्षणमुक्तम्। 'तद्विजिज्ञासस्व' इति वाक्यशेषे लक्षणीयस्य ब्रह्मणो जिज्ञास्यत्वाभिधानात्। तथा च निश्चितेऽर्थे प्रश्नानुपपत्तिरिति चेत्, न—यथा शुद्धस्य जिज्ञास्यत्वं एवं तत्त्वंपदार्थभूतयोः जीवेश्वरयोरपि शुद्धब्रह्मप्रतिपत्तिहेतुत्वेन जिज्ञास्यत्वमस्ति, तथा तयोरपि वक्ष्यमाणरीत्या अभिन्ननिमित्तोपादानत्वं च सम्भवति, इति जिज्ञास्यत्वकारणत्वयोः साधारणत्वेन प्रश्नोपपत्तेः इति भावः। 'जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्यातच्चितोर्योगः षडस्माकमनादयः ॥' इति संप्रदायविद्वचने चैतन्यत्रैविध्यस्यैव प्रसिद्धत्वात् तदनुसारेण त्रेधा प्रश्नः। [2]सामान्यज्ञानस्य विशेषबुभुत्साहेतुत्वात् ब्रह्मणः सामान्यरूपेणोपादानत्वज्ञानानन्तर्यं अथशब्दार्थः। प्रश्नो वा तदर्थः। ईश्वररूपं जीवरूपं वा ब्रह्म नोपादानं इत्येवकारार्थः। 'जन्माद्यस्य यतः' [ब्र. सू. १-१-२] इति सूत्रम्। जन्म आदिरस्येति बहुव्रीहिः। जन्मस्थितिभङ्गमन्यपदार्थः। जन्मादीति नपुंसकैकवचनेन अन्यपदार्थे समाहारद्वन्द्वसूचनात्। अन्यपदार्थभूतजन्मस्थितिभङ्गेषु इतरेतरयोगद्वन्द्वाश्रयणे तु जन्मादयः इति सूत्रापत्तेः। जन्मन आदित्वं च जायमानपदार्थेषु स्थितिभङ्गावपेक्ष्य दृष्टमिति सूत्रे जन्मनः प्राथम्यरूपादित्वनिर्देशः। 'अस्य' इति सर्वनाम्ना सूत्रकर्तुः बुद्धिस्थसकलप्रपञ्चनिर्देशः। षष्ठ्या च जगतो जन्मादेश्च सम्बन्धनिर्देशः। यत इति कारणनिर्देशः। सूत्रे तत्पदाध्याहारः। पूर्वसूत्रात् ब्रह्मपदानुषङ्गः। तथा च यतः कारणात् अस्य – जगतो जन्मादि तत् ब्रह्मेति सूत्रार्थः[3]।

---

1. तस्मादित्यर्थः।

2. सामान्यज्ञानस्य विशेषबुभुत्साहेतुत्वात् इति। सामान्यधर्मप्रकारकज्ञानस्य तद्धर्मावान्तरधर्म[विशेष]प्रकारकज्ञानेच्छायां हेतुत्वात् इत्यर्थः। तच्च हेतुत्वं स्वातन्त्र्येण, तयोः स्वतन्त्रान्वयव्यतिरेकशालित्वात्। अथ वा 'तद्धर्मावान्तरधर्मविशिष्टज्ञानं इष्टसाधनम्' इत्याकारकेष्टसाधनताज्ञानीयधर्मितावच्छेदकज्ञानसंपादकतया हेतुत्वम् इति भावः।

3. सूत्रार्थ इति। पूर्वे केचित् वृत्तिकारास्तु जन्म आद्यस्य-हिरण्यगर्भस्य यतः इति सूत्रे पदविभागं कुर्वन्ति। तन्न युक्तम्। पूर्वोक्तरीत्या जन्मकारणत्वमात्रस्य ब्रह्मलक्षणत्वानुपपत्तेः। किञ्च हिरण्यगर्भस्य चेतनस्य अनादित्वात् न तस्य जन्म। तच्छरीरं च नाद्यम्। न हि आद्यं सूक्ष्माकाशमात्रं हिरण्यगर्भशरीरं भवति। तस्मात् 'भूतानि जायन्ते' इति श्रुतिनिर्दिष्टनिखिलभूतग्रहणमेव सूत्रे उचितमिति सूत्रे भगवत्पादीयपदविभाग एव युक्तः। उक्तश्चायमर्थः आश्रमस्वामिभिः। यदि लक्षणवाक्यस्य हिरण्यगर्भपरत्वशङ्कानिरासार्थत्वेन सूत्रावृत्त्या सोऽर्थो विवक्ष्यते, तर्ह्यस्तु नाम। आद्यत्वं तु हिरण्यगर्भस्य कथञ्चिदुपपादनीयम्।

'आत्मन आकाशस्सम्भूतः' [तै. उ. २-१-१] इत्यादिकारणवाक्येषु शबलवाचिनामात्मादिशब्दानां [1]शुद्धे लक्षणैवेति ॥

विवरणानुसारिणस्तु 'यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतत् ब्रह्म नाम रूपमन्नं

ज्ञेयब्रह्मेति । वाक्यार्थभूतशुद्धब्रह्मण एव प्राधान्येन लक्षणीयत्वात् तस्यैव जन्मादिसूत्रे लक्षणमुच्यते, 'अथातो ब्रह्मजिज्ञासा' [ब्र. सू. १-१-१] इति पूर्वसूत्रे शास्त्रविषयसमर्पकेण ब्रह्मपदेन शुद्धब्रह्मण एवोपात्तत्वेन तस्यैव लक्षणाकाङ्क्षणाच्च, इति भावः । ननु, 'आत्मन आकाशस्सम्भूतः' । [तै. उ. २-१-१] 'सोऽकामयत' [तै. उ. २-६] 'यस्सर्वज्ञस्सर्ववित्' [मु. उ. १-१-९] इत्यादिकारणवाक्येषु ईश्वररूपब्रह्मणः कारणत्वमुच्यते, न शुद्धस्य। तस्य कामयितृत्वसर्वज्ञानकर्तृत्वाद्यनुपपत्तेः । अतस्तद्वाक्यगतात्मपदतत्पदसर्वज्ञादिपदानां शबलवाचित्वात् न कारणवाक्येभ्यश्शुद्धस्योपादानत्वसिद्धिरिति, नेत्याह - तथाचेति । जन्मादिसूत्रतद्भाष्ययोः स्वारस्येन शुद्धस्योपादानत्वावगमे सतीत्यर्थः । लक्षणैव । स्वीक्रियते [इति शेषः] । अतः कारणवाक्येभ्यः शुद्धस्य कारणत्वावगतिर्युक्तेति भावः ।

अथ 'शुद्धं ब्रह्मोपादानम्' इत्यादिप्रश्ने द्वितीयपक्षमादाय प्रतिवचनमुत्थापयति-विवरणेति । यस्य - प्रकृतस्य भूतयोनेः पूर्वमन्त्रोपात्तं तपः ज्ञानमयं - स्वरूपज्ञानविकारः, मायावृत्तिप्रतिबिम्बरूपमिति यावत् । तस्मात् - सर्वज्ञात् भूतयोनेः सकाशात् एतत् - सन्निहितं अपरकालीनम्, कार्यरूपमिति यावत् । ब्रह्म - हिरण्यगर्भाख्यं जायते। इति श्रुतेः ईश्वररूपमेव ब्रह्मोपादानमिति सम्बन्धः । न शुद्धं जीवरूपं वा इत्येवकारार्थः । सर्वज्ञत्वादीत्यादिपदेन सर्ववित्त्वकामयितृत्वसर्वेश्वरत्वादीनि गृह्यन्ते । [2]मायोपाधिनिरूपितबिम्बत्वविशिष्टं सर्वज्ञत्वादिगुणयुक्तं

---

1. शुद्धे लक्षणैवेति । उक्तं च संक्षेपशारीरके - शबलताकबलीकृततावशात् परमचेतनतैव निगद्यते । शबलमात्मपदेन न कथ्यते शबलमात्मनि वृत्तिनिबन्धनम् [१-३२९] इति ।

अयं भावः—'सत्यं ज्ञानमनन्तं ब्रह्म' [तै.उ. २-१-१] इति लक्षणवाक्ये ह्यानन्त्यं ब्रह्मणः प्रतिज्ञातम् । 'यो वेद निहितं गुहायाम्' इत्युत्तरवाक्ये गुहाप्रवेशेन तस्य प्रत्यग्भावं दर्शयन्त्या श्रुत्या आनन्त्योपपादनाय आत्मनो नानात्वं निरस्तम् । अथ तस्य विजातीयगगनादेर्भेदापनिनीषया सृष्टिरुपन्यस्यते । तदा खलु कार्यकारणानन्यत्वन्यायेन कार्यस्य वस्तुतः कारणमात्रत्वं सिद्ध्यतीति उपपन्नं भवति तदानन्त्यम् । एवञ्च यत आकाशादि संभूतं तत् प्रत्यगभिन्नमिति दर्शयन्ती "तस्माद्वेतस्मादात्मनः" इति श्रुतिः अद्वैतमात्मानमेवाभिप्रैतीति ।

2. मूले अस्मिन् मते मायाशबलं उपादानं इत्युच्यते, संक्षेपशारीरके मायाशबलोपादानत्वं निराकृतम्, एवञ्च सति इदं मतं संक्षेपशारीरकविरुद्धमेव, अविरोधस्तु अनुपदं मूले उपपाद्यते, तदिदमसङ्गतमित्याशङ्क्य एतन्मताभिप्रेतं मायाशबलशब्दार्थं संक्षेपशारीरकनिराकृतशबलकारणतापक्षाभिप्रेताद्विलक्षणं आह—मायोपाधीति । एवञ्च अत्र मायोपहितं मायाशबलशब्दार्थः तत्र तु मायाविशिष्टम्, अतो न विरोधः । मायायाः उपाधित्वविशेषणत्वाभ्यां उपादानत्वाश्रयकोटौ निवेशेन अनिवेशेन पक्षयोर्भेदः । "यतः सर्वज्ञात् सर्वशक्तेः कारणात् भवति तत् ब्रह्म" इति जन्मादिसूत्रभाष्यमपि ईश्वररूपब्रह्मोपादानत्वपक्षस्य अनुकूलम् ।

घ जायते' [मु.उ. १-१-९] इति श्रुतेः सर्वज्ञत्वादिविशिष्टं मायाशबलमीश्वररूपमेव ब्रह्म उपादानम्। अत एव भाष्ये 'अन्तस्तद्धर्मोपदेशात्' [ब्र. सू. १-१-२०] 'सर्वत्र प्रसिद्धोपदेशात्' [ब्र. सू. १-२-१]

च यदीश्वररूपं ब्रह्मचैतन्यं तदेवोपादानमित्यर्थः। 'अथ शुद्धं ब्रह्मोपादानमिष्यते' इति प्रश्नस्य प्रतिवचनावसरे 'ईश्वररूपमेव ब्रह्मोपादानं' इत्येतावति वक्तव्ये तस्य मायाशबलत्वविशेषणं ईश्वरोऽपि शुद्धचैतन्यमेवेति भ्रान्तिनिरासार्थम्। तस्य सर्वज्ञत्वाद्यनेकविशेषणोपादानं ईश्वररूपब्रह्मण उपादानत्वे 'यस्सर्वज्ञः' इत्यादिकारणवाक्यानां सर्वेषां ऐककण्ठ्यप्रदर्शनार्थमिति मन्तव्यम्। जीवशुद्धब्रह्मव्यावृत्तेश्वररूपब्रह्मण उपादानत्वे भाष्यसम्मतिमाह—**अत एवेति**। ईश्वररूपब्रह्मण एवोपादानत्वाभ्युपगमादेवेत्यर्थः। इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वं ईश्वरलिङ्गमित्युपवर्णितं भाष्ये इति सम्बन्धः। यस्य सर्वोपादानत्वं तस्य सर्वात्मकत्वम्, उपादानोपादेययोस्तादात्म्यात्, नान्यस्य इत्यविवादम्। यदि प्रतिबिम्बत्वविशिष्टचैतन्यरूपे जीवे बिम्बत्वविशिष्टचैतन्यरूप ईश्वरे च विशेष्यतया अनुस्यूतशुद्धचैतन्यरूपब्रह्मणः सर्वोपादानत्वमिष्यते, तदा तस्यैव सर्वात्मकत्वं स्यात् न ईश्वरस्येति सार्वात्म्यस्य भाष्ये जीवव्यावृत्तेश्वरलिङ्गत्वोपन्यासो न स्यात्। न च विशेष्यभूतशुद्धब्रह्मगतं सर्वात्मकत्वं बिम्बत्वविशिष्टचैतन्यरूपेश्वरलिङ्गतया भाष्ये वर्णितमिति वाच्यम्। तथासति तस्य जीवव्यावृत्तत्वं न स्यात्, विशेष्यधर्मस्य सर्वात्मकत्वस्य ईश्वरधर्मत्ववत् जीवधर्मत्वस्यापि सत्त्वात्, इत्याशयेनाह - **जीवेश्वरानुस्यूतेति** [पृ. ५२]। छान्दोग्ये श्रूयते—'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात् सर्व एव सुवर्णः' [छा. उ. १-६-६] इत्युपक्रम्य 'तस्य ऋक्च साम च गेष्णौ' [छा. उ. १-६-८] इत्युक्त्वा उत्तरत्र 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव ऋक् तत् साम तदुक्थं तद्यजुः तद्ब्रह्म' [छा. उ. १-७-५] इति चोक्त्वा 'तद्य इमे वीणायां गायन्ति एतं ते गायन्ति' [छा. उ. १-७-६] इति। अस्यार्थः—आदित्ये अन्तः यः पुरुषः शास्त्रतो दृश्यते, एष हिरण्मयः-ज्योतिर्मयः, स्वप्रकाशचैतन्यस्वरूपः इत्यर्थः। तस्योपासनार्थं शरीरमाह—हिरण्यश्मश्रुरित्यादिना। हिरण्यसुवर्णशब्दौ ज्योतिःपरौ। प्रणखो नखाग्रम्। आङ् अभिव्याप्तौ। तस्य - हिरण्मयपुरुषस्य ऋक्सामनी गेष्णौ - परिमलोक्तरीत्या स्तुतिसाधनीभूते इत्यर्थः। इदं ऋक्सामगेष्णत्वं समस्तऋक्सामस्तुत्यत्वरूपं हिरण्मयपुरुषविशेषणम्। तस्य वेदे ऋक्सामस्तुत्यतया प्रसिद्धेन्द्राद्यात्मकत्वमादाय पर्यवस्यति। हिरण्मयपुरुषस्य इन्द्रादिभ्यस्सकाशात् भिन्नत्वे तु तद्विशेषणं न सिध्यति। अन्यस्तुतेरन्यविषयकत्वायोगात्। तस्यैव पुरुषस्य आदित्यस्थानवत् उपासनार्थं स्थानान्तरमाह—य एषोऽन्तरक्षिणीति। सैव ऋगित्यादौ विधेयापेक्षया लिङ्गव्यत्यासः। स एव ऋक्। सः - पुरुषः। स साम। स उक्थम्। स यजुः। स ब्रह्म-वेदः। ब्रह्मपदं ऋगाद्यतिरिक्तवेदपरम्। तथा च गेष्णवाक्येन सर्वदेवात्मकत्वमुक्तम्। 'सैव ऋक्....' इति वाक्येन सर्ववेदात्मकत्वमुक्तम्। तथा—ये इमे - प्रसिद्धाः गायकाः वीणायां लौकिकपुरुषं गायन्ति तेऽपि एतं - प्रकृतं हिरण्मयपुरुषं गायन्ति इत्युक्त्या इन्द्राद्यात्मकत्ववत् लौकिकपुरुषात्मकत्वमपि सिद्ध्यति। तथा च सर्वदेवात्मकत्वसर्ववेदात्मकत्वसर्वलौकिकपुरुषात्मकत्वानि

इत्याद्यधिकरणेषु 'सैव ऋक्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म' [छा. उ. १-७-५] 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' [छा. उ. ३-१४-४] इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वं जीवव्यावृत्तमीश्वरलिङ्गमित्युपवर्णितम्। जीवेश्वरानुस्यूतचैतन्यमात्रस्य सर्वोपादानत्वे तु न

मिलित्वा सर्वात्मकत्वे पर्यवस्यन्ति। तिर्यगात्मकत्वस्याप्युक्तप्रायत्वात्। एवं स्थिते संशयः - आदित्ये अक्षिणि चान्तः श्रूयमाणो हिरण्मयपुरुषः मण्डलाभिमानिदेवताविशेषो वा, नित्यसिद्धपरमेश्वरो वेति। तत्र देवताविशेष एव हिरण्मयपुरुषः। तस्य संसारित्वेन हिरण्यश्मश्रुत्वादिरूपवत्त्वोपपत्तेः, सर्वात्मकत्वस्याप्युपासनार्थं तत्रारोपोपपत्तेश्च। न परमेश्वरः तस्य शरीरासम्भवादिति प्राप्तम्। एवं प्राप्ते ब्रूमः—'अन्तस्तद्धर्मोपदेशात्' [ब्र. सू. १-१-२०] इति। आदित्यादावन्तरवस्थितो हिरण्मयपुरुषो नित्यसिद्धपरमेश्वर एव। कुतः? तद्धर्मस्य सर्वात्मकत्वस्य 'सैव ऋक् तत्साम' इत्यादावुपदेशात्। सर्वात्मकत्वं हि ईश्वरस्यैव धर्मः। तस्य सर्वोपादानत्वेन सर्वात्मकत्वोपपत्तेः। न च मुख्यसम्भवे सति आरोपकल्पना न्याय्या। परमेश्वरस्यापि साधकानुग्रहार्थं इच्छावशात् मायागतशुद्धसत्त्वांशपरिणामरूपशरीरसम्भवात्, 'उमासहायं परमेश्वरं प्रभुम्' [कै. उ. ७] इत्यादिश्रुतिषु 'जन्म कर्म च मे दिव्यम्' [भ. गी ४-९] इत्यादिस्मृतिषु च प्रसिद्धत्वाच्च, इति निर्णयः। 'सर्वं खल्विदं ब्रह्म' [छा. उ. ३-१४-१] इति प्रकृत्य 'स क्रतुं कुर्वीत' [छा. उ. ३-१४-१] इति वाक्येन क्रतुशब्दवाच्यमुपासनं विधाय उपास्याकाङ्क्षायां पठ्यते—'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः, एष म आत्माऽन्तर्हृदये' [छा. उ. ३-१४-२, ३] इति। अयमर्थः—मनोमयः - मनःप्रधानः। प्राणः शरीरमस्येति प्राणशरीरः। भाः - चैतन्यं रूपमस्येति भारूपः। सत्याः - अप्रतिहताः सङ्कल्पाः सृष्ट्यादिगोचराः अस्य। आकाशवत् आत्मा - व्यापकत्वनिर्लेपत्वसूक्ष्मत्वादियुक्तं स्वरूपं अस्य। सर्वाणि कर्माणि - क्रियन्त इति व्युत्पत्त्या कार्याणि अस्य। यद्वा भूतगुणगन्धरसादिसन्निधानात् कर्मपदं परिस्पन्दपरम्। सर्वे परिस्पन्दा अस्येत्यर्थः। सर्वे कामाः - इच्छारूपाः सुखविशेषरूपा वा अस्य। सर्वे गन्धाः पुण्यरूपा अस्य। 'पुण्यो गन्धः पृथिव्यां च' [भ. गी. ७-९] इति स्मृतेः। सर्वे रसा अस्य। इदं - दृश्यं सर्वं अभि-आभिमुख्येन - तादात्म्येन आत्तः - व्याप्तः। वागेव वाकः, वाकः अस्यास्तीति वाकी, न वाकी अवाकी - वागिन्द्रियशून्य इति यावत्। वाग्ग्रहणं कर्मेन्द्रियाणां मुख्यप्राणस्य च उपलक्षणम्। क्रियाशक्तिमत्त्वाविशेषात्। आदरः-कामः, सोऽस्य नास्तीत्यनादरः। आदरनिषेधेन तत्परिणामि मनो निषिद्धं भवति। मनोनिषेधेन च ज्ञानेन्द्रियाणां निषेधस्सिद्धो भवति। ज्ञानशक्तिमत्त्वाविशेषात्। अत्र परिस्पन्देच्छागन्धरसवत्त्वं तदाश्रयैः वायुमनःपृथिवीजलैः भूतविशेषैः तादात्म्यं विना न सम्भवतीति सर्वकर्मत्वादिवचनेन, अविशेषेण सर्वतादात्म्यप्रतिपादक 'सर्वमिदमभ्यात्तः' इति वचनेन च, मनोमयत्वादिगुणकस्य सर्वात्मकत्वं प्रतीयते। तच्च ब्रह्मण एवोपपद्यते। तस्य सर्वोपादानत्वेन सर्वात्मकत्वोपपत्तेः। न जीवो मनोमयत्वादिगुणकः। तस्य सार्वात्म्यासम्भवात्। न च मनोमयत्वप्राणशरीरत्वयोः जीवधर्मयोः ब्रह्मण्यसम्भव इति

तत् जीवव्यावृत्तमीश्वरलिङ्गं स्यात् । सङ्क्षेपशारीरके शबलोपादानत्वनिराकरणमपि मायाविशिष्टोपादानत्वनिराकरणाभिप्रायम्[1], न तु निष्कृष्टेश्वररूपचैतन्योपादानत्वनिराकरणपरम् । तत्रैव

वाच्यम् । भूततादात्म्येन गन्धादिमत्त्ववत् जीवतादात्म्येन मनोमयत्वाद्युपपत्तेरिति । सूत्रार्थस्तु — मनोमयत्वादिगुणकं ब्रह्मैवोपास्यत्वेनेह निर्दिश्यते । कुतः ? सर्वत्र - वेदान्तेषु प्रसिद्धस्य ब्रह्मणः 'सर्वं खल्विदं ब्रह्म' इति पूर्ववाक्ये स्वशब्देनैवोपदेशात्, अस्मिन्नपि वाक्ये प्राणः शरीरमस्येत्यादिविग्रहवाक्येषु प्रकृतब्रह्माकर्षकसर्वनामश्रुतीनां सत्त्वाच्च ब्रह्मैव सगुणमुपास्यमत्रेति सिद्धम् ।

सर्वोपादानत्वे त्विति । शुद्धब्रह्मवज्जीवस्य सर्वोपादानत्वोपगमेऽपि सर्वात्मकत्वं जीवव्यावृत्तमीश्वरलिङ्गं न स्यादिति तुशब्दार्थः । ननु सङ्क्षेपशारीरके मायाशबलस्य उपादानत्वं निरस्तमिति तद्विरोध इति, अत आह—**सङ्क्षेपशारीरक इति** । मायाया अपि बिम्बभूतेश्वरविशेषणतया उपादानत्वाश्रयकोटौ निवेश एव तत्र दूषितः, न तु बिम्बत्वविशिष्टचैतन्यरूपेश्वरस्य तन्निरस्तं, इति न तद्विरोध इत्यर्थः । ननु—शबलस्योपादानत्वं निराकृत्य जगदुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वसमर्थनपरस्य सङ्क्षेपशारीरकग्रन्थस्य कथमेवमभिप्रायः कल्पयितुं शक्यते ? [2]स्वरसतस्तस्य बिम्बप्रतिबिम्बानुगतशुद्धब्रह्मोपादानत्वप्रतिपादनपरत्वावगमादिति, नेत्याह — **तत्रैवेति** । सङ्क्षेपशारीरक एवेत्यर्थः । न च - तत्पदार्थवृत्तित्वं तत्पदलक्ष्यार्थवृत्तित्वं विवक्षितं, लक्ष्यार्थश्च शुद्धं ब्रह्म, इति न सङ्क्षेपशारीरकग्रन्थस्य पूर्वापरविरोधः, न वा तेन बिम्बभूतेश्वरस्य उपादानत्वलाभः - इति वाच्यम् । लक्ष्यार्थत्वस्य[3] वाक्यार्थसाधारणतया तत्पदार्थवृत्तित्वविशेषणवैयर्थ्यापत्तेः । अतस्तत्पदार्थवृत्तित्वं तत्पदवाच्यार्थवृत्तित्वमेव वक्तव्यमिति तदविरोधाय सर्वज्ञत्वादिगुणकेश्वरस्यजगत्कारणत्वप्रतिपादकबहुश्रुत्यविरोधाय च शबलोपादानत्वनिराकरणं मायाविशिष्टोपादानत्वनिराकरणरूपमेव वक्तव्यमिति न सङ्क्षेपशारीरकविरोध इति भावः । तर्हि

---

1. मायाप्रकृतित्वब्रह्मप्रकृतित्ववादिश्रुत्योरविरोधेन जगदुपादाननिरूपणे त्रैविध्यं सम्भवति-रज्ज्वाः संयुक्तसूत्रद्वयवत् मायाविशिष्टं ब्रह्म कारणं इति वा, मायाशक्तिमत् ब्रह्म कारणं इति वा जगदुपादानमायाश्रयतया ब्रह्म कारणं इति वा । तत्र आद्यः पक्षः संक्षेपशारीरके निराकृतः इति भावः ।

2. स्वरसत इति । "साभासमेतदुपजीव्य **चिद्द्वितीया** संसारकारणमिति प्रवदन्ति धीराः । साभासमेतदिति संसृतिकारणत्वे **द्वारं परं भवति कारणता दशास्तु**" [१-३२३] इत्युपक्रम्य 'शबलमात्मपदेन न कथ्यते' [१-३२९] इत्यादिना शबलोपादानत्वपक्षं निराकृत्य, '**चैतन्यात्मा** जगदुदयकृत् श्रूयतेऽत्रापि पश्चात् मायादीनां भवति जगति द्वारभावः फलेऽस्मिन्' [१-३३२] इत्युपसंहारे अद्वितीयकूटस्थब्रह्मणः जगदुपादानत्वं उपवर्ण्य,

'कारणत्वमुपलक्षणं चितेः **ब्रह्मणो** न खलु तद्विशेषणम् ।
इत्यपीदमुपपद्यते तदा **चेतनो** भवति कारणं यदा ॥'
'अन्यदेव यदि कारणं भवेत् कारणत्वमुपलक्षणं कथम् ।
चेतनस्य घटते, अन्यगामिना वस्तु नान्यदुपलक्ष्यते यतः ॥

इत्युपपत्त्या शुद्धब्रह्मोपादानत्वं समर्थितम् । ईश्वरोपादानत्वे इयतो ग्रन्थस्य स्फुटं प्रतीयमानं स्वारस्यं भज्येत इति भावः ।

3. लक्ष्यार्थत्वस्य – महावाक्यघटकतत्पदलक्ष्यार्थत्वस्य ।

प्रथमाध्यायान्ते जगदुपादानत्वस्य [1]तत्पदार्थवृत्तित्वोक्तेः। एवञ्च ईश्वरगतमपि कारणत्वं तदनुगत-

जन्मादिसूत्रतद्भाष्ययोः ज्ञेयब्रह्मलक्षणत्वोक्तिविरोध इति, नेत्याह—**एवं चेति।** अभिन्ननिमित्तोपादानत्वरूपलक्षणस्य अन्तस्तद्धर्माद्यधिकरणभाष्यपर्यालोचनया बिम्बभूतेश्वरगतत्वे सिद्धे सतीत्यर्थः। अपिशब्दः चैतन्यमित्यनेन सम्बध्यते। कारणत्वमित्यनन्तरं ईश्वरमितरव्यावृत्ततया बोधयत् सत् इति शेषः। **तदनुगतमिति।** बिम्बत्वविशिष्टचैतन्यरूपेश्वरानुगतमित्यर्थः। **अखण्डचैतन्यमिति।** विशेष्यभूतशुद्धचैतन्यमित्यर्थः। तटस्थत्वं च लक्ष्यस्वरूपबहिर्भूतत्वं वा, [2]लक्ष्यावृत्तिधर्मत्वं वा, [3]उपलक्षणत्वं वा बोध्यम्। 'क चन्द्रः' इति प्रश्ने 'शाखायाम्' इत्युत्तरं भवति। तत्र यथा शाखा दिगन्तरगतनक्षत्रव्यावृत्तं चन्द्रमुपलक्षयति, तथा ईश्वरगतं

---

1. तत्पदार्थवृत्तित्वोक्तेः इति।

'इत्थं जगत्कारणवादिवाक्यं समन्वितं ब्रह्मणि **तत्पदार्थे।**
तल्लक्षणं तस्य तटस्थभूतं आनन्त्यसिद्ध्यै कथयद्यथोक्तम्'॥ [१-५४९]

इति पद्येनोक्तेः इत्यर्थः।

यद्यपि प्रथमाध्यायान्ते अनुपदमेव
'आद्ये सूत्रे त्वंपदस्योदितत्वात् वृत्तेरस्मिन् तत्पदस्योच्यमाना।
वृत्तिर्ज्ञेया **तत्पदार्थेऽद्वितीये** प्रत्यङ्मात्रे त्वंपदस्योदितैव॥ [१ ५५२]

इति पद्येन शुद्धचिद्रूपाद्वितीयतत्पदलक्ष्यार्थनिरूपणपरत्वं द्वितीयसूत्रस्य प्रतिपाद्यमानं प्रतीयते, तथापि ईश्वरगतमपि कारणत्वं तटस्थतया शुद्धब्रह्मोपलक्षणं इति वदतां द्वितीयसूत्रस्य शुद्धब्रह्मनिरूपणपरत्वं अविरुद्धं इत्यनुसन्धेयम्।

एवमेव 'सिद्धं लक्षणमादरेण महता व्यावर्तयद्ब्रह्मणस्तत्त्वं तत्त्वमसीति वाक्यनिलयं **तच्छब्दलक्ष्यं** वचः। [१-५१३] इति पूर्वतनपद्येनापि अविरोधः अनुसन्धेयः।

2. ननु—लक्ष्यावृत्तिधर्मत्वं वा तटस्थत्वं इत्युक्तम्। लक्ष्यावृत्तेः धर्मस्य लक्षणत्वस्यैव असंभवात् कथं तटस्थलक्षणत्वम्। उक्तं च संक्षेपशारीरके—

'लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्थात् निःशेषतो यदतिरिच्य तदर्थवस्तु।
लक्ष्यं निवेदयति लक्षणमेतदाहुः सामान्यलक्षणमिदं त्रिषु लक्षणेषु॥' [१-५१५]

इति—इति चेत्, उच्यते। यत् प्रमितं सत् यस्य तत्सजातीयादिभ्यः सर्वेभ्यो व्यावर्तकं तत् तल्लक्षणम् इत्यस्यैव उक्तपद्येन विवक्षितत्वात् अदोषः। अन्यथा स्वरूपलक्षणस्य स्ववृत्तित्वासंभवात् उक्तस्य लक्षणसामान्यलक्षणस्य स्वरूपलक्षणे अव्याप्त्यापत्तेः। अत एव शाखा चन्द्रस्य तटस्थतया उपलक्षणमिति प्राचां उक्तिः सङ्गच्छते। उक्तं हि सनत्सुजातीये—

यामांशभागस्य तथा हि वेदाः यथा हि शाखा च महीरुहस्य।
संवेदनेऽप्येवमथामनन्ति तस्मिन् हि नित्ये परमात्मनोऽर्थे॥ [२-४४] इति।

3. उपलक्षणत्वं वेति। लक्ष्याविशेषणं सत् यत् अस्वरूपं लक्षणं तत्त्वं उपलक्षणत्वम्, उक्तं च संक्षेपशारीरके—
'स्वानुरक्तमतिजन्महेतुतां लक्ष्यवस्तुनि निरस्य लक्षणम्।
अस्वरूपमपि तस्य यद्भवेत्काकवत्तदुपलक्षणं विदुः'॥ [१-५१८] इति।

एतच्च लक्ष्यवृत्तेऽपि धर्मस्य संभवति।

मखण्डचैतन्यं शाखा चन्द्रमसमिव तटस्थतयोपलक्षयितुं शक्नोतीति तस्य ज्ञेयब्रह्मलक्षणत्वोक्तिरिति मन्यन्ते ।

कारणत्वं ईश्वरमितरव्यावृत्ततया बोधयत् सत् तटस्थतया ईश्वरानुगतमखण्डचैतन्यमपि इतरव्यावृत्ततया उपलक्षयितुं शक्नोत्येवेत्यर्थः । ईश्वरगतेनाभिन्ननिमित्तोपादानत्वेन बिम्बत्वविशिष्टचैतन्यरूपेश्वरस्य जगदुपादानत्वसम्भवशून्यात् जीवात् तत्कर्तृत्वसम्भवरहितात् प्रधानादेश्च सकाशाद्व्यावृत्तौ गम्यमानायां सत्यां विशेष्यभूतज्ञेयब्रह्मणोऽपि प्रधानादि-व्यावृत्तिर्गम्यत इत्यभिप्रेत्य तस्य ज्ञेयब्रह्मलक्षणत्वं जन्मादिसूत्रतद्भाष्ययोस्सङ्क्षेपशारीरके चोक्तमिति भावः । एवं तटस्थलक्षणेन प्रधानादिव्यावृत्तत्वेनावगतं ब्रह्म कीदृक्स्वरूपमिति विशेषजिज्ञासायां सत्यज्ञानानन्दात्मकं ब्रह्मेति [1]स्वरूपलक्षणं प्रवर्तते । अनेनैवाभिप्रायेण भाष्यकारैरुक्तम् - 'तस्य च निर्णयवाक्यं 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' [तै. उ. ३-६] इति' । 'यतो वा' इत्यादिवाक्येन यस्मात् कारणात् इमानि भूतानि जायन्ते इति यदुक्तं तत्[2] वस्तुतस्सत्यज्ञानानन्तस्वरूपादानन्दादेव नान्यस्मात् कारणात् इत्येतत् हि - प्रसिद्धं पूर्ववल्ल्यामिति श्रुत्यर्थः । अनेन स्वरूपलक्षणेन बिम्बभूतेश्वरानुगतं तत्पदलक्ष्यं वस्तुतो वाक्यार्थभूतं ज्ञेयं ब्रह्म विशेषतो निर्धारितं भवति । इयं च स्वरूपलक्षणविवक्षा मूले अखण्डपदेन सूचिता ।

जगत्प्रकृतिभूतमायाप्रतिबिम्ब ईश्वरः, माया चेश्वराश्रिता । न च - प्रतिबिम्बत्वस्य मायाकल्पितत्वात् तद्वि-शिष्टचैतन्याश्रितत्वं मायाया न सम्भवति, प्रतिबिम्बत्वकल्पनात्प्रागेव तस्याश्चैतन्याश्रितत्वस्य वक्तव्यत्वात्-इति वाच्यम् । प्रतिबिम्बत्वस्याप्यनादित्वेन तस्यास्तद्विशिष्टचैतन्याश्रितत्वोपपत्तेः । वस्तुतो निर्विशेषचैतन्ये अनादिकालमारभ्य कल्पितप्रतिबिम्बत्वस्थितेरनिर्वचनीयमायाधीनत्वमात्रेण प्रतिबिम्बत्वस्य [3]तत्कल्पितत्वम्; न तु प्रतिबिम्बत्वस्य वियदादेरिव मायापरिणामत्वमुपेयते । तथा सति प्रतिबिम्बभूतेश्वरस्य सादित्वप्रसङ्गात् । न च - माया अनादि-कालमारभ्य चैतन्ये प्रतिबिम्बत्वं घटयति, तद्विशिष्टमेव च चैतन्यमाश्रयते, इति कथं सम्भावयितुं शक्यम् - इति वाच्यम् । मायाया अघटितघटनापटीयस्त्वात् । न च शुद्धचैतन्याश्रितैव माया तत्र प्रतिबिम्बभावं घटयतीति कुतो नाश्रीयत इति वाच्यम् । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' [श्वे. उ. ४-१०] इति श्रुतिविरोधात्, 'मायिनम्' इतिपदेन मायाया ईश्वराश्रितत्वप्रतीतेः । जीवास्त्वविद्याप्रतिबिम्बाः । 'जीवेशावाभासेन करोति' [नृ. उ. ९-३] इति श्रुतेः । प्रकृता मूलप्रकृतिः जीवेशौ प्रतिबिम्बरूपौ करोतीत्यर्थः । न ह्युपाधिभेदं विना प्रतिबिम्बभेदस्सम्भवति । न चैकस्मिन्नपि दर्पणे अनेकप्रतिबिम्बदर्शनात् प्रतिबिम्बभेद उपाधिभेदव्याप्यो न

---

1. स्वरूपलक्षणं प्रवर्तत इति । ननु उक्तस्वरूपलक्षणेनैव प्रधानादिव्यावृत्तस्वरूपसिद्धेः तटस्थलक्षणं व्यर्थमिति चेत्—उच्यते । लक्ष्यपरब्रह्मशब्दार्थतया प्राप्तस्य निष्प्रपञ्चत्वस्य 'यद्रजतमभात् सा शुक्तिः' इतिवत् अध्यारोपापवादन्यायेन सिद्ध्यर्थं तटस्थलक्षणम्, स्वरूपविशेषप्रतिपत्त्यर्थं स्वरूपलक्षणं इति न कस्यापि वैयर्थ्यम् ।

2. जन्म तच्छब्दार्थः ।

3. तत्कल्पितत्वमिति । मायाकल्पितत्वव्यवहारः इत्यर्थः ।

वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्रेश्वर उपादानम्। अन्तःकरणादिकं तु ईश्वराश्रितमायापरिणाममहाभूतोपसृष्टजीवाविद्याकृतभूतसूक्ष्मकार्यमिति तत्रोभयोरुपादानत्वम्। अत एव 'एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' [प्र. उ. ६-५] इति श्रुतौ कलाशब्दवाच्यानां प्राणमनःप्रभृतीनां विदुषो विदेहकैवल्यसमये

भवतीति वाच्यम्। एकस्मिन् दर्पणे बिम्बभेदेन प्रतिबिम्बभेदेऽपि सूर्यादिबिम्बैक्यस्थले उपाधिभेदं विना प्रतिबिम्बभेदादर्शनात्। बिम्बभूतचैतन्यस्य चैकत्वात्। तस्मात् ईश्वरोपाधिमायापेक्षया भिन्ना एव जीवोपाधिभूता अविद्याः स्वीकर्तव्याः। न च - मूलप्रकृतिं प्रकृत्य प्रवृत्तायां 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' [नृ. उ. ९. ३.] इतिश्रुतौ जीवेशरूपप्रतिबिम्बाधारयोर्मायाविद्ययोः 'स्वयमेव' इत्यनेन प्रकृतमूलप्रकृत्यात्मकत्वप्रतिपादनं मायाविद्ययोर्भेदपक्षे विरुध्यते - इति वाच्यम्। मायाया वियदादिप्रकृतित्वत् अविद्याया अपि लिङ्गशरीरादिप्रकृतित्वस्य वक्ष्यमाणत्वेन मायाविद्ये प्रकृतित्वेनैकीकृत्य स्वयमेवेत्येकप्रकृत्यात्मकत्वप्रतिपादनस्याविरोधात्। 'अविद्या च' इत्येकवचनस्यापि जात्यभिप्रायत्वोपपत्तेः न तन्नानात्वविरोधोऽपि। बिम्बैक्यस्थले उपाधिभेदं विना प्रतिबिम्बभेदासम्भवस्य दर्शितत्वात्। प्रतिबिम्बजीवानां च नानात्वात्। अदृश्यत्वाधिकरणभाष्ये ऽपि 'अव्याकृतमीश्वराश्रयं तस्यैवोपाधिभूतम्' इति मायाया ईश्वरोपाधित्वतदाश्रयत्वयोरुक्तत्वात्। तथा आनुमानिकाधिकरणभाष्ये 'मुक्तानां च न पुनरुत्पत्तिः, तस्या अविद्याबीजशक्तेः विद्यया दाहात्' इत्यत्र जीवनानात्वस्य तदुपाधिभूताविद्यानानात्वस्य च स्पष्टमभिहितत्वात्। भामतीनिबन्धने तद्भाष्यस्य जीवोपाधिभूताविद्यैक्यनिराकरणपरतयैव व्याख्यातत्वाच्च। 'आभास एव च' इति [ब्र॰सू.२-३-५०] सूत्रतद्भाष्ययोः जीवानां प्रतिबिम्बत्वरूपतायाः स्पष्टमभिहितत्वाच्च। तथा च मायाविद्याभेदः श्रुत्यादिसम्मत इति [1]ये मन्यन्ते तेषां मतमुपन्यस्यति—**वियदादिप्रपञ्च इत्यादिना**। पूर्वमते ईश्वररूपं ब्रह्मोपादानमित्युक्तम्। तत् सत्यमेव, परं तु क्वचिज्जगति जीवस्याप्युपादानत्वमभ्युपगन्तव्यम्-इत्यभिप्रायेणास्य मतस्य प्रवृत्तिर्बोध्या। **ईश्वराश्रितमायापरिणाम इति**। 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेरिति भावः। **तत्रेति**। वियदादावीश्वर एव उपादानमित्यर्थः। अन्तःकरणादौ तुशब्दसूचितविशेषं दर्शयति—**ईश्वरेति**। भूतैरुपष्टम्भकलक्षणैस्संसृष्टत्वं भूतोपसृष्टत्वम्। तच्च जीवाविद्याकृतानां भूतसूक्ष्माणां विशेषणम्। भूतानां सूक्ष्मत्वं परिच्छिन्नत्वम्। **अत एवेति**। अन्तःकरणादौ जीवाविद्यापरिणामसूक्ष्मभूतानां तदुपष्टम्भकतया मायापरिणाममहाभूतानां च उपादानतया प्रविष्टत्वादेवेत्यर्थः। यथा गङ्गाद्या नद्यः समुद्रं

---

1. मायाऽविद्याभेदः श्रुत्यादिसंमतः इति। सूत्रं भाष्यं भामती च आदिशब्दार्थः। ननु—अदृश्यत्वाधिकरणभाष्ये 'अक्षरात् परतःपरः' इति श्रुतिव्याख्यानावसरे अव्याकृतशब्दवाच्यमायायाः ईश्वरोपाधित्वमुक्तम्। आनुमानिकाधिकरणभाष्येऽपि अव्यक्तशब्दवाच्यां अविद्यां प्रकृत्य 'तदेतत् अव्यक्तं क्वचिदक्षरशब्दोदितम्—अक्षरात्परतः परः' इति श्रुतेः, क्वचिन्मायेति सूचितं — 'मायां तु प्रकृतिं विद्यात्......' इति मन्त्रवर्णात्, अव्यक्ता हि सा माया' इत्युक्तम्। सोऽयं भाष्यसंदर्भः मायाऽविद्ययोः स्वरसतः अभेदप्रतिपादकः इति स्फुटम्। भामतीनिबन्धनस्यापि मायाऽविद्याऽभेद एवाभिमतः। जीवाश्रिताविद्याविषयीकृतब्रह्मण एव ईश्वरत्वाभ्युपगमात् अविद्यातिरिक्तमायायाः निष्प्रयोजनत्वात् अनङ्गीकाराच्च। तथा च मायाऽविद्याभेदपक्षः न भाष्यभामतीसंमतः इति चेत्, सत्यम्। अत एव 'ये मन्यन्ते' इति अस्वरसः सूचितः।

विद्यानिवर्त्याविद्याकार्यांशाभिप्रायेण विद्ययोच्छेदो दर्शितः। 'गताः कलाः पञ्चदश प्रतिष्ठाः' [मु. उ. ३-२७] इति श्रुत्यन्तरे तदनिवर्त्यमायापरिणाममहाभूतरूपोपष्टम्भककार्यांशाभिप्रायेण तेषां स्वस्वप्रकृतिषु लयो दर्शित इति मायाऽविद्याभेदवादिनः ॥

प्राप्यास्तं गच्छन्ति, एवमेव अस्य-विदुषः परितः-सर्वत्र आत्मानं पूर्णं पश्यतः कलाः-[1]लिङ्गशरीरैकदेशभूताः पुरुषायणाः - पुरुषः-चिदात्मा अयनं-अधिष्ठानं यासां ताः पुरुषायणाः पुरुषं प्राप्य अस्तं गच्छन्ति - पुरुषे लीयन्ते इत्यर्थः। **दर्शित इति।** पुरुषे इति शेषः। प्रतिष्ठा इति द्वितीयाबहुवचनम्। मायापरिणामात्मकमहाभूतानीति [2]द्वितीयाबहुवचनार्थः। पञ्चदश कलाः प्रतिष्ठाः प्रति गताः-तासु लीना इति यावत्। **तदनिवर्त्येति।** ईश्वरोपाधिभूतमायाया जीवगतविद्यानिवर्त्यत्वाभावादिति भावः। यदि कलानां जीवाविद्यामात्रपरिणामत्वं, तदा तासामशेषतः पुरुष एव लयः स्यात्, तथा च तासां भूतेषु लयप्रतिपादकवचनं निर्विषयं स्यात्, अतो मायाकार्यमहाभूतानामपि लिङ्गशरीरोपादानत्वं वाच्यमिति तत्र उभयोरुपादानत्वे श्रुतिद्वयव्यवस्थासिद्धिरेव फलमित्यर्थः।

न च मायायास्तत्त्वज्ञाननिवर्त्यत्वाभावे मिथ्यात्वसिद्धिर्न स्यादिति वाच्यम्। ब्रह्मणि सर्वदृश्यनिषेधश्रुतिबलात् दृश्यत्वादिलिङ्गैश्च तन्मिथ्यात्वसिद्धेः[3]। न च मायाया विद्यया निवृत्त्यभावे निवर्तकान्तराभावात् सर्वमुक्तावपि तदनुवृत्तिप्रसङ्ग इति वाच्यम्। महाप्रलयकाले सर्वप्राणिभोगप्रदकर्मणां युगपदुपरमे सति ईश्वरसङ्कल्पमात्रादेव सर्वप्रपञ्चलयवत् सर्वमुक्तिकाले 'इतः परं सकार्याया मायायाः प्रयोजनं नास्ति' इत्यनुसन्धानवत ईश्वरस्य सत्यसङ्कल्पस्य 'माया स्वकार्यैस्सह मयि वस्तुतश्चिदेकरसे निश्शेषं लयं यातु' इत्येवंरूपादेव मायापरिणामलक्षणसङ्कल्पात् तल्लयोपपत्तेः। श्रुतिस्मृतिपुराणादिषु तत्त्वज्ञानात् मायानिवृत्तिप्रतिपादकग्रन्थजातमविद्यानिवृत्त्यभिप्रायम्। [4]यद्वा तत्त्वज्ञानमात्रं अविद्याया इव मायाया निवर्तनयोग्यमपि नानाप्राणिकर्मप्रतिबन्धात् न तस्या निवर्तकं, चरमं मुच्यमानस्यैव तु तत्त्वज्ञानं प्रतिबन्धकाभावात्तन्निवर्तकं, इत्यादि कल्पनीयमिति सङ्क्षेपः।

---

1. लिङ्गशरीरैकदेशभूता इति। अस्मिन् पक्षे उपष्टम्भकमायापरिणाममहाभूतकार्यांशानां लिङ्गशरीरैकदेशान्तराणां पुरुषे लयानङ्गीकारात् लयासंभवाच्च लिङ्गशरीरैकदेशभूता इति कलाशब्दो व्याख्यातः। एकदेशवाचकत्वं कलाशब्दस्य स्वारसिकमिति एतत्पक्षानुसारिणामभिप्रायः।

2. द्वितीयाबहुवचनार्थ इति। द्वितीयाबहुवचनान्तार्थ इत्यर्थः।

3. तन्मिथ्यात्वसिद्धेरिति। ज्ञाननिवर्त्यत्वरूपमिथ्यात्वासिद्धावपि अनिर्वचनीयत्वरूपमिथ्यात्वस्य निश्चयसंभवात् इति भावः। न चैवं सति मायायां ज्ञाननिवर्त्यत्वस्य मिथ्यात्वलक्षणस्य अव्याप्तिः स्यात् इति वाच्यम्। ज्ञाननिवर्त्यत्वं हि न मिथ्यात्वलक्षणम्, परन्तु प्रमाणम्। अत एव 'ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या मिथ्यात्वसिद्धिः' इति ग्रन्थेषु व्यवहारः। प्रकृते च ब्रह्मणि सर्वदृश्यनिषेधश्रुतेः दृश्यत्वादिलिङ्गानां च मिथ्यात्वप्रमाणानां सत्त्वात् ज्ञाननिवर्त्यत्वार्थापत्तिप्रमाणाप्रवृत्तावपि मायामिथ्यात्वसिद्धौ न काऽप्यनुपपत्तिः इति उक्तकल्पानुसारिणां अभिप्रायः।

4. तत्त्वज्ञानात् मायानिवृत्तिप्रतिपादकश्रुतिस्मृतिपुराणवचनानां सामञ्जस्याय पक्षान्तरमाह-यद्वेति। अत्र च कल्पे मायायां न मिथ्यात्वलक्षणाव्याप्तिः, ज्ञाननिवर्त्यत्वयोग्यताया एव ज्ञाननिवर्त्यत्वपदेन विवक्षितत्वात् इत्यपि बोध्यम्।

यथा वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्र ईश्वर उपादानं, तथा अन्तःकरणादि जीवाश्रिताविद्यामात्रपरिणाम इति तत्र जीव एव उपादानम्। न च अन्तःकरणादौ मायाकार्यमहाभूतानामप्यननुप्रवेशे उदाहृतश्रुतिद्वयव्यवस्थानुपपत्तिः। कलानां विद्ययोच्छेदश्रुतिस्तत्त्वविद्दृष्टिविषया, 'गताः कलाः' इति श्रुतिस्तु तत्त्वविदि म्रियमाणे समीपवर्तिनः पुरुषाः नश्यद्घटवत्तदीयशरीरादीनामपि भूम्यादिषु लयं मन्यन्ते इति तटस्थपुरुषप्रतीतिविषया, इति व्यवस्थायाः कलाप्रलयाधिकरणभाष्ये स्पष्टत्वादिति मायाऽविद्याभेदवादिष्वेकदेशिनः॥

तदभेदवादिष्वपि केचित्—यद्यपि वियदादिप्रपञ्चस्य ईश्वर उपादानं, तथाप्यन्तःकरणादीनां[1] जीवतादात्म्यप्रतीतेः जीव एवोपादानम्। अत एव अध्यासभाष्ये अन्तःकरणादीनां जीव

अन्तःकरणादावुभयोरुपादानत्वमसिद्धम्, श्रुतिद्वयव्यवस्थाया भाष्यकारैरेवान्यथाप्रतिपादितत्वात्- इति मतान्तरं दर्शयति—यथा वियदादीति। तत्त्वविदो दृष्टिः-तत्त्वसाक्षात्कारः। [2]अत्र दृष्टिपदेन तत्फलभूतः कलाक्षयो विवक्षितः, तद्विषया पुरुषे कलाप्रलयश्रुतिः इत्यर्थः। भूतेषु कलाप्रलयवचनं तु कलानामपि मायापरिणाममहाभूतकार्यत्वभ्रमवतां[3] भ्रान्तिसिद्धार्थानुवादकमिति भावः। चूर्णीभावपर्यन्तो घटनाशो यथा भूमौ दृश्यते तद्वन्मन्यन्ते इत्यक्षरार्थः। प्रतीतिविषयेति। प्रतीतिरत्र भ्रान्तिरूपा। [4]तद्विषयविषयकेत्यर्थः। स्पष्टत्वादिति। 'तानि परे तथा ह्याह' [ब्र. सू. ४-२-१५] इति तदधिकरणसूत्रम्। तानि-मनआदीनि परे-पुरुषे निरवशेषं लीयन्ते, तथा हि श्रुतिराह -'एवमेवास्य' इत्यादिश्रुतिः निरवशेषं लयमाह हि इति सूत्रार्थः। अन्तःकरणादीनां मायाकार्यत्वाभावे ईश्वरस्यान्तःकरणाद्युपादानत्वप्रतिपादकश्रुतिविरोध इति दोषं सूचयति—एकदेशिन इति।

मायैवाविद्या। सा चेश्वरस्यैवोपाधिः, जीवानां तु प्रतिबिम्बरूपाणां अन्तःकरणान्येवोपाधयः, इति मायाऽविद्ययोरभेदवादिनोऽपि केचित् अन्तःकरणादौ जीवस्यैवोपादानत्वं तद्भेदवादिन इव वदन्तीत्याह—तदभेदवादिष्वपीति। अपिशब्दः क्वचिदंशे पूर्वमतसाम्यार्थकः। तच्च तत्साम्यं तथापीत्यादिना स्पष्टं भविष्यति। ननु वियदादिप्रपञ्चेऽपि जीव एवोपादानं किं न स्यादित्यत आह—यद्यपीति। ईश्वराश्रितमायापरिणामत्वात् ईश्वर एव वियदादावुपादानं न जीव इत्यर्थः। ननु मायाऽविद्ययोरभेदोपगमे अविद्यापरिणामान्तःकरणादीनामपीश्वराश्रितमायापरिणामत्वाविशेषात् ईश्वर एवान्तःकरणादावप्युपादानमिति वक्तुमुचितमिति, नेत्याह - तथापीत्यादिना। जीवेति। 'अहं कर्ता, अहं प्राणिमि, अहं काणः, अहं मूकः, अहं स्थूलः'

---

1. अन्तःकरणादीनामिति। प्राणज्ञानेन्द्रियकर्मेन्द्रियस्थूलशरीराणि आदिपदार्थः। एतेषां जीवतादात्म्यप्रतीतिश्च 'अहं कर्ता' इत्यादिना व्याख्यायां प्रतिपादिता।

2. कलोच्छेदबोधकस्य वाक्यस्य तत्त्वसाक्षात्कारविषयकत्वोक्तिरनुपपन्ना, इत्यत आह—अत्रेति।

3. भ्रमवतां या भ्रमप्रयुक्ता भ्रान्तिः तद्विषयानुवादकं इत्यर्थः।

4. कलाप्रलयबोधकवाक्यस्य प्रतीतिविषयकत्वोक्तिः अनुपपन्ना, इत्यत आह-तद्विषयेति।

एवाध्यासो दर्शितः, विवरणे च प्रतिकर्मव्यवस्थायां ब्रह्मचैतन्यस्योपादानतया घटादिसङ्गित्वं जीवचैतन्यस्य तदसङ्गित्वेऽप्यन्तःकरणादिसङ्गित्वं च वर्णितम् - इत्याहुः ॥

'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' [मु. उ. २-१-३] इत्यादिश्रुतेः कृत्स्नव्यावहारिकप्रपञ्चस्य ब्रह्मैव उपादानम्। जीवस्तु प्रातिभासिकस्य स्वाप्नप्रपञ्चस्य। 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' [ब्र. सू. २-१-७/२६]

इत्यादिप्रकारेण अन्तःकरणादीनां शरीरान्तानां जीवतादात्म्यं प्रतीयते, तच्च तेषां जीवेऽध्यस्तत्वं विना न सम्भवतीति जीवस्यैव तदधिष्ठानत्वरूपमुपादानत्वं नेश्वरस्येत्यर्थः। **प्रतिकर्मव्यवस्थेति**। ब्रह्मणः स्वरूपचैतन्येन सर्वदा सर्वावभासकत्वरूपे सर्वज्ञत्वे उक्ते 'तर्हि जीवस्यापि स्वरूपचैतन्येनैव सर्वदा सर्वद्रष्टृत्वम्' इति दोषप्रसक्तौ जीवं प्रति विषयव्यवस्थाप्रतिपादकग्रन्थे इत्यर्थः। **ब्रह्मेति**। बिम्बचैतन्यरूपब्रह्मणः सर्वोपादानतया घटादितादात्म्यरूपः संसर्गः वल्सः इत्यर्थः। अविद्याया व्यापकत्वेन तत्प्रतिबिम्बरूपजीवस्य व्यापकत्वेऽपि न घटादिभिस्तस्य तादात्म्यम्, उपादानत्वाभावात्, अन्तःकरणादिभिस्तु जीवस्य तादात्म्यलक्षणः संसर्गोऽस्ति, इति प्रतिपादितं विवरणे इत्यर्थः। अनेन जीवस्यान्तःकरणादावुपादानत्वमुक्तं भवति, अन्यथा घटादिभिरिवान्तःकरणादिभिरप्युक्तसङ्गित्वं जीवस्य न स्यात् उपादानत्वाभावाविशेषात्, इति भावः।

अत्र अन्तःकरणादिपरिणाम्युपादानभूताया अविद्याया ईश्वराश्रितमायया सहाभेदाङ्गीकारे ईश्वरस्यैवान्तःकरणादावुपादानत्वं वक्तुमुचितम्। यदि जीवतादात्म्यप्रतिपत्त्यादिभिरुक्तहेतुभिः जीवस्यैवान्तःकरणादावुपादानत्वं वक्तव्यं, तदा अन्तःकरणादिपरिणामिभूताविद्याया जीवाश्रितत्वं ईश्वराश्रितमायायास्सकाशात् भिन्नत्वं च वक्तव्यम्। कार्यात्मना परिणममानप्रकृत्याश्रयत्वातिरिक्तस्य चैतन्यगतोपादानत्वस्य अभावात्। अतो मायाऽविद्ययोरभेदाङ्गीकारः जीवस्यैवान्तःकरणादावुपादानत्वाङ्गीकारश्च परस्परविरुद्धः—इत्यस्वरसः 'तदभेदवादिष्वपि' इति 'अपि' शब्देन सूचितः।

ईश्वरस्यान्तःकरणादावप्युपादानत्वमुपेत्यापि तस्य कार्यमात्रे उपादानत्वं नास्तीति विशेषं वक्तुं मतान्तरमवतारयति - **एतस्मादिति**। प्रकृतादीश्वरादित्यर्थः। [1]प्रकृतित्वं पञ्चम्यर्थः। जीवस्त्विति तुशब्दः अवधारणार्थः। 'स्वाप्नप्रपञ्चस्य' इत्यनन्तरं 'उपादानम्' इत्यनुषङ्गः। किं कृत्स्नं ब्रह्म जगदाकारेण परिणमते, एक-

---

1. प्रकृतित्वं पञ्चम्यर्थ इति। अन्यथा कारणमात्रार्थकत्वे निमित्तत्वेनाप्युपपत्तेः ईश्वरस्य अन्तःकरणाद्युपादानत्वं न सिद्ध्येत्। न च प्रकृतित्वार्थकत्वे किं मानं इति शङ्क्यम्। यतः प्राणप्रभृतीनां पृथिवीपर्यन्तानां तत्त्वानां सर्गमुक्त्वा 'एतस्मात्' इति प्रकृतस्य सर्वविकारात्मकं रूपं उपन्यस्यमानं दृश्यते—

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः।
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ [मु. उ. २-१-४]

इति। तच्च सर्वविकारतादात्म्यं सर्वोपादानत्वे एव उपपद्यते इत्यतः 'एतस्मात्' इति पञ्चमी प्रकृतित्वार्थैव युक्ता।

इत्यधिकरणे - ब्रह्मणो जगदुपादानत्वे तस्य कात्स्न्येन जगदाकारेण परिणामे विकारातिरेकेण ब्रह्माभावो वा एकदेशेन परिणामे निरवयवत्वश्रुतिविरोधो वा प्रसज्यत इति पूर्वपक्षे 'आत्मनि चैवं विचित्राश्च हि' [ब्र. सू. २-१-२८] इति सूत्रेण विवर्तवादाभिप्रायेण स्वप्नदृशि जीवात्मनि स्वरूपानुपमर्देनानेकाकारस्वाप्नप्रपञ्चसृष्टिवत् ब्रह्मणि वियदादिसृष्टिरुपपद्यत इति - सिद्धान्तितत्वादिति अन्ये ।

जीव एव स्वप्नद्रष्टृवत् स्वस्मिन्नीश्वरत्वादिसर्वकल्पकत्वेन सर्वकारणं इत्यपि केचित् ।

देशेन वा । नाद्य इत्याह - **तस्येति** । यथा दध्याकारेण परिणतस्य क्षीरस्य पूर्वरूपात् प्रच्युतिः, एवं ब्रह्मणोऽपि स्वरूपात् प्रच्युतिः स्यादित्यर्थः । ब्रह्मण एकदेशः परिणमते इति द्वितीयकल्पं दूषयति - **एकदेशेनेति** । **पूर्वपक्षे इति** । उभयथाऽपि ब्रह्मण उपादानत्वं न सम्भवतीति पूर्वपक्षे प्राप्ते सतीत्यर्थः । यदि ब्रह्मण उपादानत्वं क्षीरपृथिव्यादिवत् परिणामित्वरूपमभ्युपगम्येत, तदा कृत्स्नप्रसक्त्यादिदोषः प्रसज्येत । न तु तथा अभ्युपगम्यते । किं तु रज्ज्वादेः सर्पाद्युपादानत्ववत् विवर्तोपादानत्वं ब्रह्मण उपेयते । अतो नोक्तदोषावकाश इति सिद्धान्तयति - **आत्मनि चेति** । एकश्चकारो यथाशब्दसमानार्थकः । द्वितीयश्चकारः तथाशब्दसमानार्थकः । हिशब्दो हेत्वर्थः । ततश्च यथा आत्मनि जीवे स्वप्नद्रष्टरि विचित्रा रथादिसृष्टयो जीवचैतन्यस्वरूपोपमर्दं विनैव भवन्ति, स्वप्नावस्थानिवृत्त्यनन्तरमपि बुद्ध्यादिसाक्षितया जीवचैतन्यस्य यथापूर्वमवस्थानात्, एवं ब्रह्मणि तत्स्वरूपप्रच्युतिं विनैव विचित्रा वियदादिसृष्टयः सम्भवन्ति, [1]सृष्टिस्थितिसंहारेषु सच्चिदानन्दस्वरूपेण ब्रह्मानुवृत्तेः श्रुतिसिद्धत्वात्, इति सूत्रार्थः ।

'अथ शुद्धं ब्रह्मोपादानम्' इत्यादिप्रश्ने तृतीयपक्षमादाय प्रतिवचनमवतारयति - **जीव इति** । परिपूर्णश्चिदात्मा अविद्यया अवच्छेदप्रतिबिम्बभावौ विनाऽपि प्राप्तजीवभावः सन् आत्मानमेव सर्वेश्वरं कल्पयति । प्राप्तेश्वरभावात् स्वस्मादेव गगनादिसृष्टिं कल्पयति । स्वस्य स्वकल्पितादीश्वरात् भेदं तन्नियम्यत्वं च कल्पयति । तथा क्रमेण मनुष्यादिभावं कल्पयति । यथा वियदादिप्रपञ्चो व्यावहारिकसत्यः स्वप्नप्रपञ्चः प्रातिभासिकः इति पक्षे स्वप्नद्रष्टा जीव एव देवतिर्यङ्मनुष्यादिभावेन तन्नियन्तृपरमेश्वररूपेण ततो भिन्नत्वादिरूपेण चात्मानं कल्पयति, तद्वत् । तथा च स्वस्मिन्नेव सर्वप्रपञ्चकल्पकत्वात् जीवभावापन्नं ब्रह्म सर्वोपादानमिति दृष्टिसृष्टिवादिन आहुरित्यर्थः ।

जीवभावापन्नब्रह्मणः सर्वोपादानत्वमित्यस्मिन् पक्षे जीवादधिकस्येश्वरस्य अभावात् ईश्वरस्य सर्वजीवनियन्तृत्वप्रतिपादकश्रुतिस्मृतिन्यायसूत्रभाष्यादिविरोधो बन्धमोक्षव्यवस्थानुपपत्तिश्च - इति दोषं सूचयति - **इत्यपि केचिदिति** ।

---

1. सृष्टीति - जगतः सृष्टिस्थितिसंहारावस्थानिवृत्त्यनन्तरमपि सच्चिदानन्दस्वरूपब्रह्मणः प्रलयसाक्षितया अवस्थानस्य श्रुतिसिद्धत्वात् इत्यर्थः ।

मायायाः जगत्कारणत्वविचारः

अथ 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेः मायाजाड्यस्य घटादिष्वनुगमाच्च माया जगदुपादानं प्रतीयते। कथं ब्रह्मोपादानम्?

अत्राहुः पदार्थतत्त्वनिर्णयकाराः — ब्रह्म माया चेत्युभयमुपादानमित्युभयश्रुत्युपपत्तिः। सत्ताजाड्यरूपोभयधर्मानुगत्युपपत्तिश्च। तत्र ब्रह्म विवर्तमानतया उपादानम्, अविद्या परिणममान-

---

[1]तथा च जीवेऽतिव्याप्त्यभावात् ईश्वररूपमेव ब्रह्म सर्वोपादानमिति स्थितम्॥

इदानीं [2]ब्रह्मलक्षणस्योपादानत्वस्यासम्भवमाशङ्कते - **अथेति**। श्रुतौ तुशब्दो मायायाः प्रकृतित्वमवधारयति। यथा मृदादिगतश्लक्ष्णत्वादेः घटादावनुगमात् घटादौ मृदादेरुपादानत्वं तथा मायागतजाड्यस्य जगत्यनुगमात् तस्यास्तदुपादानत्वमिति युक्तिमप्याह - **मायाजाड्यस्येति**। **कथमिति**। ननु ब्रह्मण उपादानत्वं बहुश्रुत्युदाहरणेन पूर्वं दर्शितम्। सत्यं दर्शितं, तत्तु न सम्भवति, निरवयवस्य तस्य मृदादेरिव परिणाम्युपादानत्वासम्भवात्। न च - विवर्तोपादानत्वं निरवयवस्यापि सम्भवति गगनादौ नैल्याद्यारोपदर्शनात् इति वाच्यम्। परिणामिष्विव विवर्ताधिष्ठानेषु लोके उपादानत्वप्रसिद्ध्यभावेन तत्रोपादानत्वाभ्युपगमस्य परिभाषामात्रत्वात्, इत्याक्षेपाभिप्रायः।

उपादानत्वघटितब्रह्मलक्षणस्यासम्भवं निराचष्टे - **अत्राहुरित्यादिना**। **सत्तेति**। न च बाधायोग्यस्वरूपभूतायास्तस्याः ब्रह्मस्वरूपत्वात् सत्तायास्तद्धर्मत्वोक्तिरयुक्तेति वाच्यम्। 'राहोश्शिरः' इतिवत् भेदकल्पनया तद्धर्मत्वव्यवहारोपपत्तेरिति भावः। ननु उपादानद्वयं व्यर्थमिति, नेत्याह - **तत्रेति**। यद्वा निरवयवस्य ब्रह्मणः उपादानत्वमनुपपन्नमिति, नेत्याह - **तत्रेति**। मायाब्रह्मणोर्मध्ये इत्यर्थः। आक्षेपाभि-

---

1. शुद्धब्रह्मोपादानत्वपरत्वेनप्रतीयमानसंक्षेपशारीरकग्रन्थाविरोधोपपादनपुरस्सरं ईश्वररूपमेव ब्रह्म जगदुपादानमिति विवरणानुसारिणां मतमुपक्रम्य तत्र मतभेदान् तत्र तत्र अस्वरसञ्च सूचयित्वा जीवोपादानत्वपक्षेऽपि उक्तरीत्या अस्वरससूचनेन ईश्वररूपमेव ब्रह्म सर्वोपादानमित्यत्र ग्रन्थकृतां निर्भरः इत्यभिप्रेत्याह—तथा चेति। न च—देहेन्द्रियादिषु तत्तज्जीवानामुपादानत्वात् ब्रह्मणः सर्वोपादानत्वं न संभवति—इति वाच्यम्। शुक्त्यादितादात्म्येन अध्यस्यमानेषु रजतादिषु शुक्त्याद्यवच्छिन्नस्येव जीवतादात्म्येनाध्यस्यमानेषु देहादिषु जीवावच्छिन्नस्य ब्रह्मणः अधिष्ठानतया उपादानत्वोपपत्तेः।

यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।
तथाऽक्षरात् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति॥'

इति ब्रह्मणः चेतनत्वेन सरूपान् जीवान् प्रति उपादानत्वश्रुतेः नित्यानां जीवानां स्वतः कार्यत्वाभावात् तदुपाधिदेहेन्द्रियान्तःकरणाद्युपादानत्वपरतया देहादीनां ब्रह्मोपादानकत्वस्य अवश्याङ्गीकर्तव्यत्वाच्च। तथा जीवोपादानकप्रातिभासिकस्वाप्नप्रपञ्चस्यापि जीवावच्छिन्नस्य ब्रह्मणः अधिष्ठानतया उपादानत्वं इति अनुसन्धेयम्। एवञ्च ईश्वररूपमेव ब्रह्म सर्वोपादानं इति ग्रन्थकृतां आशयो युक्तः।

2. ब्रह्मलक्षणस्येति – अभिन्ननिमित्तोपादानत्वरूपब्रह्मलक्षणघटकस्येत्यर्थः। अतश्च 'उपादानत्वघटितब्रह्मलक्षणस्यासंभवं निराचष्टे' इति असंभवनिराकरणग्रन्थावतरणं समञ्जसं भवति।

तया । न च विवर्ताधिष्ठाने पारिभाषिकमुपादानत्वम् । स्वात्मनि कार्यजनिहेतुत्वस्योपादानलक्षणस्य तत्राप्यविशेषादिति ॥

केचित् उक्तामेव प्रक्रियामाश्रित्य विवर्तपरिणामोपादानद्वयसाधारणमन्यल्लक्षणमाहुः— स्वाभिन्नकार्यजनकत्वमुपादानत्वम् । अस्ति च प्रपञ्चस्य सद्रूपेण ब्रह्मणा विवर्तमानेन, जडेनाज्ञानेन

प्रायमनूद्य निराचष्टे - **न चेति** । मृदादिषु प्रसिद्धस्योपादानलक्षणस्य विवर्ताधिष्ठानेष्वपि सत्त्वात् तेषु उपादानत्वाभ्युपगमस्य परिभाषामात्रत्वं नास्तीत्यर्थः । **स्वात्मनीति** । अत्र स्वशब्दः उपादानत्वाभिमतवस्तुपरः । [1]तथा च कार्याधारत्वे सति कार्यजनिहेतुत्वमुपादानत्वम् । निमित्तकारणवारणाय सत्यन्तम् । भूतलादेरपि कार्याधारत्वात् तद्वारणाय विशेष्यम् । **तत्रापीति** । विवर्ताधिष्ठानेऽपीत्यर्थः ।

उक्तामेवेति । प्रपञ्चे उभयोरपि मायाब्रह्मणोरुपादानत्वम्, तत्र च परिणामितया मायाया उपादानत्वम्, अधिष्ठानतया च ब्रह्मण उपादानत्वम्, उभयोरुपादानत्वे श्रुतिन्याययोरुपपत्तिश्च—इत्येतामित्यर्थः । **स्वाभिन्नेति** । स्वशब्देन घटाद्युपादानमृदादिजगत्परिणाम्युपादानभूतमज्ञानं जगद्विवर्तोपादानभूतं ब्रह्म च गृह्यते । तत्र घटादेः मृदादेस्सकाशात् अभेदः स्फुटः 'मृदेव घटः' इत्यनुभवात् । अज्ञाने ब्रह्मणि च कार्याभेदमनुभवेन दर्शयति—**अस्ति चेति** । ननु 'मृत् घटः' इतिवत् 'ब्रह्म घटः, ब्रह्म पटः' इत्यनुभवो नास्ति । तथा 'अज्ञानं घटः' इत्याद्यनुभवोऽपि नास्ति । अतः प्रपञ्चस्य अज्ञानेन ब्रह्मणा च कथमभेदोऽस्तीति शङ्कानिरासाय ब्रह्मणस्सद्रूपत्वं विशेषणं दत्तम्, अज्ञानस्य च जडत्वम् । तथा च ब्रह्माज्ञानाभ्यां सह ब्रह्मत्वाज्ञानत्वाकारेणाभेदानुभवाभावेऽपि सत्त्वजडत्वरूपेण ताभ्यां सह प्रपञ्चस्याभेदानुभवोऽस्तीत्याह—**सन् घट इत्यादिना** । ननु घटोत्पत्तेः पूर्वं तत्कारणद्रव्यस्य मृत्त्वानुभवात् मृत्त्वस्य कारणधर्मत्वे [2]सिद्धे सति 'मृत् घटः' इति प्रत्यक्षानुभवः कार्यकारणद्रव्ययोरभेदावगाहीति युक्तम् । सत्त्वजडत्वयोस्तु कारणधर्मत्वे किं मानम्, येन 'सन् घटः, जडो घटः' इत्यनुभवबलेन सद्रूपजडरूपाभ्यां ब्रह्माज्ञानाभ्यां प्रपञ्चस्य अभेदः सिद्ध्येत्, इति चेत्-उच्यते—ब्रह्मणस्सद्रूपत्वं 'सदेव' [छा.उ. ६-२-१] इत्यादिश्रुतिसिद्धम् । 'तदेतज्जडं मोहात्मकम्' [नृ. उ. ९-२] इति श्रुत्या अज्ञानस्य जडत्वं सिद्धम् । तथा च घटादौ मृद्द्रव्याभेदात् मृत्त्वानुभववत् सद्रूपत्वादिरूपकारणद्रव्याभेदादेव प्रपञ्चे सत्त्वजडत्वानुभवोपपत्तौ पृथक्सत्त्वादिधर्मो नोपेयते । तथा च 'सन् घटः, जडो घटः' इत्याद्यनुभवोऽपि कार्यकारणद्रव्याभेदावगाहीति भावः । न च जडरूपाज्ञानस्य प्रपञ्चाभेदसिद्धावपि मायायाः किमायातमिति वाच्यम्, तयोरभेदाभ्यु-

---

1. कार्यस्य आद्यक्षणसंबन्धरूपा जनिः न उपादाननिष्ठा, अपि तु कार्यनिष्ठा । अतः स्वात्मनि कार्यजनिहेतुत्वं उपादाने असंभवि इत्याशङ्क्य, विवक्षितमर्थमाह—तथा चेत्यादिना । एवञ्च मूले 'स्वात्मनि' इति सप्तम्यन्तार्थः न कार्यजनौ अन्वेति, अपि तु कार्ये ।

2. सिद्धे सति इति । अन्यथा 'मृद्घट' इति प्रत्यक्षानुभवः कार्यद्रव्यस्यैव स्वाभाविकमृत्त्वधर्मावगाहीति स्यात् इति भावः ।

परिणामिना च, अभेदः। 'सन् घटः, जडो घटः' इति सामानाधिकरण्यानुभवात्। न च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' [ब्र. सू. २-१-१४] इति सूत्रे 'अनन्यत्वं व्यतिरेकेणाभावः' 'न खल्वनन्यत्वमित्यभेदं ब्रूमः किं तु भेदं व्यासेधामः' इति भाष्यभामतीनिबन्धनाभ्यां प्रपञ्चस्य

पगमात् इति भावः। कार्यकारणयोरभेदाभ्युपगमे अपसिद्धान्तं शङ्कते - **न चेति**। तयोः - कार्यकारणयोः अनन्यत्वमुपगन्तव्यम्। कुतः, आरम्भणशब्दादिभ्यः। वाचारम्भणश्रुतिः आरम्भणशब्दार्थः। 'आत्मैवेदं सर्वम्' [छा.उ. ७-२५-२] इत्यादिसार्वात्म्यप्रतिपादकश्रुतिः 'नेह नानास्ति किञ्चन' [बृ. उ. ४-४-१९] इत्यादिनिषेधश्रुतिश्च आदिपदार्थः। वाचारम्भणश्रुतिः विवर्तलक्षणकथनावसरे व्याख्याता। कार्यस्य कारणात्तत्त्वान्तरत्वे जगत्कारणस्य ब्रह्मणः सर्वात्मकत्वश्रुतिरनुपपन्ना स्यात्। तथा ब्रह्मोपादानकस्य जगतः सत्यत्वे ब्रह्मणि जगन्निषेधो न स्यात्। अतः कारणीभूतब्रह्मानन्यत्वं प्रपञ्चस्याभ्युपगन्तव्यमिति भावः। ननु सौत्रानन्यत्वपदेन कार्यकारणयोरैक्यं प्रतीयते, तदनुपपन्नम्, कार्यकारणभावविरोधात्, चिज्जडयोः ब्रह्मप्रपञ्चयोरैक्यायोगाच्च - इति शङ्कां निराकर्तुं सौत्रानन्यत्वपदं व्याचष्टे भाष्यकारः **अनन्यत्वं व्यतिरेकेणाभाव** इति। न च कारणव्यतिरेकेण कार्यस्याभावे कथं कार्यकारणभाव इति वाच्यम्। कारणसत्त्वव्यतिरेकेण कार्यसत्त्वाभावस्य विवक्षिततया कार्यस्वरूपापलापशङ्कानवकाशात्। सौत्रानन्यत्वपदतात्पर्यप्रदर्शकं भामतीनिबन्धनवाक्यमुदाहरति **न खल्विति**। 'अनन्यत्वम्' इतिपदेन कार्यकारणयोरभेदं न ब्रूमः। चेतनाचेतनयोरभेदानुपपत्तिः तन्निषेधहेतुः 'खलु'शब्देन द्योत्यते। तर्हि कारणब्रह्मविज्ञानात् सर्वविज्ञानं श्रुतिसिद्धं न सम्भवेत्, अभेदानभ्युपगमात्, इति शङ्कते **किं त्विति**। परिहरति **भेदमिति**। कार्यकारणयोस्सत्त्वभेदं व्यासेधाम इत्यर्थः। तथा च कारणब्रह्मस्वरूपमेव कार्यस्य वास्तवं स्वरूपमिति तस्मिन् विदिते तद्व्यतिरिक्तं सर्वं तत्त्वतो विदितं भवतीति नैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधः। न च ब्रह्मस्वरूपज्ञानेन सर्वप्रपञ्चस्य वास्तवस्वरूपे विदितेऽपि तत्तदसाधारणरूपज्ञानासम्भवात् प्रतिज्ञाविरोधस्तदवस्थ एवेति वाच्यम्। 'आत्मनि....दृष्टे....सर्वं विदितं भवति' [बृ. उ. ४-५-६] इत्यादिप्रतिज्ञावाक्येषु सर्वपदस्य सर्वतत्त्वपरत्वेन तत्तदसाधारणरूपेण सर्वज्ञानस्याविवक्षितत्वात्[1]। न च तथाकल्पनायां किं विनिगमकमिति वाच्यम्। सर्वप्रपञ्चतत्त्वज्ञानमात्रेण अद्वितीयब्रह्मज्ञानस्य मुक्तिसाधनस्य

---

1. अविवक्षितत्वादिति - मुण्डकोपनिषदि सर्वतत्त्वविज्ञानमेव सर्वविज्ञानं इत्यस्यार्थस्य स्फुटं प्रतीतेश्च इत्यप्यनुसन्धेयम्। तथा हि - 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति शौनकस्य प्रश्नः। तत्प्रतिवचनानुकूलतया विज्ञेयस्य अक्षरब्रह्मरूपपुरुषस्य स्वरूपादिकं विस्तरेण निरूप्य 'तादृशब्रह्मणि विदिते सर्वं विदितं भवति' इत्यनुक्त्वा 'एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य' इति ब्रह्मविज्ञाने सति अविद्यानिवृत्तिमात्रं उक्तम्। न तु सर्वविज्ञानम्। तथाऽपि तत्पर्यन्तोऽर्थो वक्तव्यः। अन्यथा प्रश्नप्रतिवचनयोः वैयधिकरण्यापत्तेः। तद्यथा - ब्रह्माज्ञाननिवृत्तौ हि ब्रह्मतत्त्वं विदितं भवति, कथं सर्वम्। तेन ज्ञायते ब्रह्मतत्त्वज्ञानमेव सर्वविज्ञानं इति। तच्च 'सर्वतत्त्वज्ञानमेव सर्वविज्ञानं इत्युक्तावेव उपपद्यते। न हि सर्वेषां तत्तदसाधारणाकारो भवति ब्रह्मतत्त्वम्। तथा च सर्वेषां वास्तवं रूपं ब्रह्मतत्त्वं, सर्वतत्त्वज्ञानमेव सर्वविज्ञानं, ततश्च ब्रह्मतत्त्वज्ञानात् सर्वं विज्ञातं भवति - इति प्रश्नप्रतिवचनयोरानुरूप्यम्।

ब्रह्माभेदनिषेधात् अभेदाभ्युपगमे अपसिद्धान्त इति वाच्यम्। तयोर्ब्रह्मरूपधर्मिसमानसत्ताकाभेद-निषेधे तात्पर्येण शुक्तिरजतयोरिव प्रातीतिकाभेदाभ्युपगमेऽपि विरोधाभावादिति ॥

संक्षेपशारीरककृतस्तु—**ब्रह्मैवोपादानम्, कूटस्थस्य स्वतः कारणत्वानुपपत्तेः माया**

लाभेन तत्तदसाधारणरूपज्ञाननैष्फल्यस्यैव विनिगमकत्वात्, कारणे ब्रह्मणि विदितेऽपि सर्वप्रपञ्चगततत्तदसाधारण-रूपज्ञानस्यासम्भवेन सर्वविज्ञानश्रुतेस्तत्परत्वे प्रामाण्याभावप्रसङ्गाच्च, भेददर्शनस्यानर्थहेतुतया श्रुतिषु तत्रतत्र निन्दितत्वाच्च, प्रतिज्ञाश्रुतेः न नानारूपज्ञाने तात्पर्यम्। तदुक्तं पञ्चदश्याम् - अद्वैतेऽभिमुखीकर्तुमेवात्रैकस्य बोधतः। सर्वबोधः श्रुतो नैव नानात्वस्य विवक्षया ॥' [१३-६०] इति। अस्यार्थः - अत्र - वेदान्तेषु एकस्य - ब्रह्मणः बोधेन सर्वस्य प्रपञ्चस्य बोधः अद्वैते ब्रह्मणि - मुमुक्षुं अभिमुखीकर्तुमेव - मुमुक्षोरद्वितीयब्रह्मबोधार्थमेव श्रुतः। अद्वितीयब्रह्मबोधश्च 'सर्वस्य ब्रह्मैव वास्तवं स्वरूपम्' इति ज्ञानमात्रात् सिद्ध्यतीति भावः। ननु ब्रह्मणि विदिते सर्वं विदितं भवति[1] इति श्रुतौ स्वरसतः[2] प्रतीयमानं तत्तदसाधारणरूपेण सर्वज्ञानमेव श्रुत्यर्थः किं न स्यादिति, नेत्याह - नैवेति। नानात्वबोधविवक्षया सर्वबोधो नैव श्रुतः इति योजना। प्रयोजनाभावात् बाधितत्वात् निन्दितत्वाच्च इति भावः। **तयोरिति**। भाष्यभामतीनिबन्धनयोरित्यर्थः। न च प्रपञ्चब्रह्मणोः वास्तवाभेदनिषेधे सति वास्तवो भेदः स्यात् इति वाच्यम्। भेदस्य वास्तवत्वं हि धर्मिप्रतियोगिनोः वास्तवत्वापेक्षम्, तत्र ब्रह्मणो वास्तवत्वेऽपि प्रपञ्चस्य आरम्भणशब्दादिभ्यो मिथ्यात्वावगमेन तयोर्भेदस्य [3]सत्यत्वायोगात् इति भावः। **प्रातीति-केति**। यथा 'इदं रजतं' इति भ्रान्तिसिद्धं रजतेदमर्थयोरभिन्नत्वं तथा 'सन् घटः' इत्यादिभ्रान्तिसिद्धाभेदोपगमे सिद्धान्तविरोधाभावादिति भावः।

'मायां तु प्रकृतिं विद्यात्' इति श्रुत्या अवधारणार्थक'तु'शब्दवत्या मायाया एव उपादानत्वावगमेन ब्रह्मण उपादानत्वाभावात् उपादानत्वघटितब्रह्मलक्षणस्यासम्भवशङ्कायां सत्यां - मायाब्रह्मणोरुभयोरपि प्रकृतित्वमस्ति, श्रुति-युक्त्योरविशेषात्, 'मायां तु' इति श्रुतौ 'तु'शब्दो नावधारणार्थः, किं तु सद्रूपब्रह्मापेक्षया मायाया वैलक्षण्य-द्योतनार्थः, तच्च वैलक्षण्यं परिणामित्वरूपं प्रकृतित्वं मायायाः - इत्याशयवतां पदार्थतत्त्वनिर्णयकारादीनां मतेन लक्षणासम्भवशङ्का परिहृता। इदानीं - ब्रह्मैवोपादानं न माया, अतो न लक्षणासम्भवशङ्कावकाशः इति मन्यमानानां मतद्वयं आह - **संक्षेपशारीरककृतस्त्वित्यादिना**। तर्हि व्यर्था मायेति, नेत्याह - **कूटस्थस्येति**। यदि मायां विनैव ब्रह्म उपादानं स्यात्, तदा ब्रह्मणः स्वतःपरिणामित्वमेव स्यात्, तथा च परिणामवादिभिः परिणामपरिणामिनोः वास्तवाभेदाभ्युपगमात् परिणामस्य जन्मादिविकारैः ब्रह्मापि विकारवदेव स्यात्। न चेष्टापत्तिरत्र वक्तुं शक्यते। 'न जायते' [क. उ. २-१८] इत्यादिबहुश्रुतिषु ब्रह्मणो जन्मादिविकारराहित्यरूपकूटस्थत्वप्रति

---

1. इति श्रुतौ - इत्यर्थकश्रुतिवाक्ये।
2. स्वरसत इति - स्वशक्त्येत्यर्थः।
3. सत्यत्वायोगादिति - भेदस्य धर्मिप्रतियोगिसत्तासमानसत्ताकत्वनियमादित्यभिप्रायः।

[1]द्वारकारणम्, अकारणमपि द्वारं कार्येऽनुगच्छति, मृद इव तद्गतश्लक्ष्णत्वादेरपि घटे अनुगमदर्शनात्, इत्याहुः ॥

पादनविरोधात्। अतो[2] मायाद्वारा ब्रह्मणः कारणत्वं वक्तव्यमिति न व्यर्था मायेत्यर्थः। यथा मृद्वस्तुन उपादानत्वेऽपि तद्गतश्लक्ष्णत्वादिसंस्कारो द्वारकारणम्, न ह्यसंस्कृतस्य मृद्वस्तुनः घटाद्युपादानत्वं घटते, तथा कूटस्थचैतन्यरूपे ब्रह्मणि समारोपिता माया तत्र जगत्प्रकृतित्वं घटयन्ती सहकारिकारणमुपेयते, इति भावः। न च मायाया उपादानत्वाभावे 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिविरोध इति वाच्यम्। ब्रह्मगतप्रकृतित्वनिर्वाहकतामात्रेण तस्यां प्रकृतित्वश्रुत्युपपत्तेः। मायायाः प्रकृतित्वनिर्वाहकत्वमात्रं, न स्वतः प्रकृतित्वमस्ति, इत्याशयेनैव तस्यां शक्तित्वव्यवहारः श्रुतौ दृश्यते - 'परास्य शक्तिर्विविधैव श्रूयते' [श्वे. उ. ६-८] इति। न हि मृदादिपदार्थगतशक्तेः किञ्चित्कार्यं प्रत्युपादानत्वं प्रसिद्धं लोके। अत एव विनिगमकाभावात् मायाब्रह्मणोरुभयोरप्युपादानत्वमिति निरस्तम्। मायाया ब्रह्मशक्तित्वेन[3] स्वतः उपादानत्वासम्भवात्। न च - तस्याः प्रकृतित्वानुपगमे जगतः परिणाम्युपादानं न स्यात्, ब्रह्मणः परिणामितायाः कूटस्थत्वविरोधेनासकृत् प्रत्युक्तत्वात् - इति वाच्यम्। वाचस्पतिमत इव प्रपञ्चस्य चिदध्यस्तमायाविषयीकृतब्रह्मविवर्तत्वमात्राङ्गीकारोपपत्तेः। न च संक्षेपशारीरकग्रन्थे तत्रतत्र मायायाः परिणामित्वव्यवहारविरोध इति वाच्यम्। तथाव्यवहारस्य मतान्तराभिप्रायत्वोपपत्तेः। ननु जडभूतमायाप्रकृतिकत्वाभावे प्रपञ्चस्य जाड्यं न स्यादिति, नेत्याह - **अकारणमपीति**। अनुपादानमपीत्यर्थः।

---

1. द्वारकारणमिति। उक्तं च संक्षेपशारीरके—

> चित्रायागः पशुफल इति श्रूयमाणेऽपि चित्राऽपूर्वं द्वारं पशुफलतयाऽऽक्षिप्यते तत्र तद्वत्।
> चैतन्यात्मा जगदुदयकृच्छ्रूयतेऽत्रापि पश्चान्मायादीनां भवति जगति द्वारभावः फलेऽस्मिन्॥ इति।

अत्र च मायायाः द्वारभावः जगद्विवर्तोत्पत्तौ सहकारित्वमेव, न तु चित्राजन्यापूर्वमिव ब्रह्मजन्यत्वम्, अनवस्थापत्तेः। मायोत्पत्तौ मायानपेक्षणे च कार्यान्तरेऽपि सा नापेक्ष्येत। संसारस्य सादित्वापत्तेश्च। अनेनैव अभिप्रायेण माया सहकारिकारणं इति व्याख्यातं कृष्णालङ्कारे।

2. तथा च मिथ्याभूतमायाप्रयुक्तजन्मादिविकाराणां पारमार्थिकनिर्विकारत्वेनाविरोध इति भावः।

3. ब्रह्मशक्तित्वेनेति। ननु - अत्र शक्तिः ब्रह्मणो विशेषणं उपलक्षणं वा। आद्ये विशिष्टस्य कारणत्वे विशेषणस्यापि तदागतमेव, अन्त्ये ब्रह्मणैव जगत्कारणमुच्यतां उपलक्षणेन विशेषाभावात् - इति चेत्, उच्यते—शक्तिः अत्र ब्रह्मण उपाधिः, उपाधिश्च विशेषणोपलक्षणाभ्यां तृतीयः प्रकारः। तेन मायोपहितस्य कारणत्वम्। न च - संक्षेपशारीरकमतेऽपि मायोपहितस्य कारणत्वाभ्युगमे विवरणपक्षाविशेषापत्तिः - इति वाच्यम्। इष्टापत्तेः। अत एव अत्र मायाकारणताविचारे विवरणकृन्मतस्य पृथक् नोक्तिः इति ध्येयम्। विवरणेऽपि हि मायाप्रकृतित्वोपपादने त्रैविध्यमेवोक्तम्। तत्र आद्यः विशिष्टकारणतापक्षः अनुपदोक्तः पदार्थतत्त्वनिर्णयकाराणाम्। अन्त्यः जगदुपादानमायाश्रयतया ब्रह्म कारणमिति पक्षः सिद्धान्तमुक्तावलीकृताम्। स च अनुपदमेव वक्ष्यते। परिशेषात् अत्र सङ्क्षेपशारीरकमतत्वेनोक्तः मायाशक्तिमद्ब्रह्म जगत्कारणमिति द्वितीयपक्ष एव विवरणाभिमत इति पर्यवस्यति। अत एव पूर्वं ब्रह्मणः जगदुपादानत्वविचारावसरे विवरणमतस्य सङ्क्षेपशारीरकग्रन्थाविरोधः तदनुरोधश्च उपपादितो युज्यते इति प्रतिभाति।

वाचस्पतिमिश्रास्तु - जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया उपादानमिति माया सहकारिमात्रम्[1], न कार्यानुगतद्वारकारणम् इत्याहुः ॥

जगत्यनुगतं जाड्यं [2]न कारणगुणः, किं तु जगत एव स्वाभाविकम्, अतस्तत्सिद्धये मायाया उपादानत्वं कार्यानुगतद्वारकारणत्वं वा न कल्पनीयं, इत्याशयेनाह - **वाचस्पतिमिश्रास्त्विति। जीवाश्रितेति।**

नन्वक्षरब्राह्मणे आकाशशब्दिताया मायाया अक्षरशब्दितनित्यचैतन्याश्रितत्वस्य प्रतिपादितत्वात् कथं तस्याः जीवाश्रितत्वमुपेयते, 'मायिनं तु महेश्वरम्' [श्वे. उ. ४-१०] इति श्रुतिविरोधाच्च। अत्र 'मायिनं' इत्यनेन महेश्वरशब्दितब्रह्माश्रितत्वप्रतिपादनात्। किं च जीवस्य मायाश्रयत्वे तस्यैव जगदुपादानत्वं स्यात्, प्रपञ्चस्य मायापरिणामत्वात्। प्रपञ्चपरिणामिमायाश्रयत्वं हि ब्रह्मणः प्रपञ्चोपादानत्वम्। जीवस्य मायाश्रयत्वे तु तस्यैव जगदुपादानत्वं स्यात्, न ब्रह्मणः। किं च 'जीवाश्रितमायाविषयीकृतं ब्रह्म' इति मते ब्रह्मण उपाध्यनङ्गीकारेण नियन्तृत्वजगत्कर्तृत्वादेरभावप्रसङ्गश्च इति चेत्—उच्यते - जीवाश्रितेतिपदेन जीवत्वविशिष्टचैतन्याश्रितत्वं विवक्षितं न भवति, किं तु अक्षरब्राह्मणानुरोधेन चैतन्याश्रितत्वमेव। जीवत्वं तु मायापदवेदनीयाविद्यायाः चैतन्ये वृत्तौ अवच्छेदकमिति जीवाश्रितमायेत्युच्यते। न च - जीवत्वस्यापि चैतन्ये वृत्तौ मायैवावच्छेदिका वाच्या इति परस्पराश्रयप्रसङ्ग - इति वाच्यम्। द्रव्यत्वगुणाश्रयत्वयोरिव[3] परस्परस्थितिप्रयोजकतया परस्परापेक्षत्वलक्षणपरस्पराश्रयत्वस्यादोषत्वात्। परस्पराश्रयो हि उत्पत्तौ ज्ञप्तौ वा दोषो भवेत्। स च प्रकृते नास्ति। अविद्याजीवत्वयोरनादित्वात् नित्यसाक्षिभास्यत्वाच्च। न च जीवत्वस्य अविद्यास्थितिं प्रति नियामकत्वकल्पनं व्यर्थमिति वाच्यम्। ब्रह्मणि तस्यास्थितिनिवारकत्वात्। 'निरवद्यं

---

1. सहकारिमात्रमिति। अज्ञाते ब्रह्मणि प्रपञ्चप्रतीतेः ज्ञाते अप्रतीतेश्च अन्वयव्यतिरेकाभ्यां मायारूपस्य अज्ञानस्य निमित्तत्वं परं अङ्गीकर्तव्यमेव इति भावः।

2. न कारणगुण इति। न उपादानगुण इत्यर्थः तेन—वाचस्पतिमिश्रमते मायायाः सहकारित्वोक्त्या निमित्तकारणत्वाभ्युपगमात् मायायाश्च 'तदेतज्जडं मोहात्मकम्' इति श्रुत्या जडत्वोक्तेः 'जाड्यं न कारणगुणः' इत्युक्तेरनुपपत्ति र्नेशङ्क्या। उपादानगुणताया एव निषिध्यमानत्वात्। तच्च न बाधितम्। जाड्यस्य उपादानभूतब्रह्मगुणत्वाभावात्। न च-सहकारि मायाधर्मजाड्यं जगत्यनुगतं भवतु—इति शङ्क्यम्। निमित्तकारणकार्ययोः अभेदाभावेन अन्यधर्मस्य अन्यत्र अनुगतेः वक्तुं अशक्यत्वात्, असंभवाच्च। नन्वेवं मायायाः आद्यकार्ये आकाशे स्वाभाविकं जाड्यमस्तु, तदीयकार्यपरंपरायां तु जाड्यं उपादानगुणः स्यात्, आकाशादेः उपादानत्वसंभवात् इति चेत्, न। वाचस्पतिमते सर्वत्र कार्ये परिणाम्युपादानानङ्गीकारात् घटादिष्वपि मृदाद्यवच्छिन्नचैतन्यस्यैव विवर्तोपादानत्वाङ्गीकारात् जाड्यस्य उपादानगुणत्वासंभवात् इत्याद्यनुसन्धेयम्।

3. द्रव्यत्वगुणाश्रयत्वयोरिवेति। ननु - आद्यक्षणे घटादौ गुणाश्रयत्वाभावेऽपि द्रव्यत्वस्य स्थितेः परस्परस्थितिप्रयोजकत्वस्याभावात् अयं दृष्टान्तोऽनुपपन्नः—इति चेत्, न, गुणगुणिनोस्तादात्म्यात् गुणगुणिनोः समसमयोत्पत्तेरेव अङ्गीकारात् इति भावः।

सिद्धान्तमुक्तावलीकृतस्तु—**मायाशक्तिरेवोपादानं,**[1] **न ब्रह्म। 'तदेतत् ब्रह्मापूर्वमनपरं' [बृ. उ. २-५-१९] 'न तस्य कार्यं करणं च विद्यते' [श्वे. उ. ६-८] इत्यादिश्रुतेः। जगदुपा-**

निरञ्जनम्' [श्वे. उ. ६-१९] इति श्रुत्या ब्रह्मणो निर्दोषत्वावगमेन तस्य अविद्यारूपदोषाश्रयत्वानुपपत्तेः। न च वस्तुतो निर्दोषत्वपरा सा श्रुतिः इति वाच्यम्। तथासङ्कोचे मानाभावात्, ईश्वररूपब्रह्मवत् [2]जीवस्यापि वस्तुतो निर्दोषत्वाच्च। न च 'मायिनं तु महेश्वरम्' इति श्रुतिविरोधः। 'गृही धनी देवदत्तः' इत्यादौ देवदत्तस्य गृहाद्याश्रयत्वाभावेऽपि प्रत्ययस्य स्वस्वामिभावलक्षणसम्बन्धान्तरबोधकत्ववत् महेश्वरशब्दितब्रह्मणो मायाश्रयत्वाभावेऽपि मायाब्रह्मणोः विषयविषयिभावलक्षणसम्बन्धान्तरबोधकतया 'मायिनं' इति श्रुत्युपपत्तेः[3]। प्रपञ्चस्य च जीवाश्रितमायाविषयीकृतब्रह्मविवर्तत्वमात्राभ्युपगमात् [4]न जीवस्य जगदुपादानत्वप्रसङ्गः। ब्रह्मण उपाध्यभावेऽपि सर्वनियन्तृत्वादि जीवाविद्याविषयीकृतब्रह्मविवर्ततया ब्रह्मधर्मत्वेनैव कल्प्यते, न जीवाविद्यापरिणामतया जीवधर्मत्वेन, अनुभवविरोधात्[5], ब्रह्मणि च सर्वनियन्तृत्वसर्वकर्तृत्वसर्वज्ञत्वादिप्रतिपादकशास्त्रस्य कल्पकस्य सत्त्वाच्च। तस्मात् सिद्धं जीवाश्रितमायाविषयीकृतं ब्रह्म प्रपञ्चाकारेण विवर्तमानतया उपादानमिति। उक्तं च आरम्भणाधिकरणभाष्ये—'मूलकारणमेव आऽन्त्यात् कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते' इति। आऽन्त्यात् कार्यादिति। अन्त्यकार्यपर्यन्तमित्यर्थः। नटो हि द्रष्टृभिरविज्ञातनिजरूप एव तत्तदभिनेयासत्यरूपतां प्रतिपद्यते, एवं जीवैरविज्ञाततत्त्वं सत् ब्रह्म असत्यवियदादिप्रपञ्चाकारतां तद्द्वारा व्यवहारविषयतां च प्रतिपद्यते इति भाष्यार्थः। अत्र नटदृष्टान्तोक्त्या वाचस्पतिमतं भाष्याभिमतं निश्चीयते। तदुक्तं कल्पतरौ—'अज्ञातं नटवत् ब्रह्म कारणं शङ्करोऽब्रवीत्। जीवाज्ञातं जगद्बीजं जगौ वाचस्पतिस्तथा' इति।

इदानीं मायाया एव 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिस्वारस्यानुरोधेन मुख्यमुपादानत्वमिति स्वीकृत्यापि ब्रह्मलक्षणासम्भवं परिहरति-**सिद्धान्तमुक्तावलीकृतस्त्विति**। तत् - प्रकृतम्। एतत्-बुद्ध्यादिसाक्षिरूपम्। पूर्वं-कारणं न विद्यते यस्य तदपूर्वम्। अपरं-कार्यं न विद्यते यस्य तदनपरम्। तस्य-ब्रह्मणः। करणं च-

---

1. न च—शक्तेः उपादानत्वं न क्वचिदपि दृष्टं—इति शङ्क्यम्। पारतन्त्र्यमात्रस्य अत्र शक्तिपदेन विवक्षितत्वात्।

2. जीवस्यापीति। एवञ्च ब्रह्मण एव निरवयवत्वोक्तिः असङ्गता स्यात् इत्यर्थः।

3. उपपत्तेरिति। मायाशब्दाद्धि 'व्रीह्यादिभ्यश्च' इति सूत्रेण 'इनि' प्रत्यये 'मायी' इति रूपम्। स च प्रत्ययः मत्वर्थीयः। मत्वर्थश्च आश्रयः सम्बन्धी च। 'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रात्। अतः मायानाश्रयेऽपि मायासंबन्धिनि 'मायी' इति प्रयोगः न असाधुः। वस्तुतस्तु 'सप्तम्यां च न तौ स्मृतौ' इति इनिठनोः निषेधात् तदस्येति संबन्धसामान्यवत्येव मायीति प्रयोगः साधुः। छान्दसत्वेन, निषेधस्य प्रायिकत्वेन वा, निर्वाहस्तु क्लिष्टः इति ध्येयम्॥

4. न जीवस्येत्यादि। अयमर्थः—जगदुपादानत्वं न जगदाकारेण परिणममानमायाश्रयत्वम्, अपि तु जगदधिष्ठानत्वम्, तत्तु ब्रह्मण एव न जीवस्य—इति।

5. अनुभवविरोधादिति। जीवे सर्वनियन्तृत्वाद्यभावानुभवविरोधात्।

दानमायाधिष्ठानत्वेन तु उपचारात्[1]उपादानम्, तादृशमेवोपादानत्वं लक्षणे विवक्षितम् इत्याहुः[2] ॥

जीवेश्वरयोः मतभेदेन स्वरूपनिरूपणम्

तत्र मतभेदेन उभयोरपि प्रतिबिम्बत्वनिरूपणम्

अथ क ईश्वरः कश्च जीवः। अत्रोक्तं प्रकटार्थविवरणे—**अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसंबन्धिनी माया। तस्यां चित्प्रतिबिम्ब ईश्वरः, तस्या एव परिच्छिन्नानन्तप्रदेशेषु आवरणविक्षेप-**

जगत्सृष्टिसाधनं चेत्यर्थः। इत्यादिश्रुतेः न ब्रह्मोपादानमिति पूर्वेण सम्बन्धः। तर्हि ब्रह्मणो जगदुपादानत्वप्रतिपादकश्रुतिसूत्रभाष्यादिविरोधः, इत्यत आह—**जगदिति**। तुशब्दोऽवधारणे। **तादृशमेवेति**। जगदुपादानमायाधिष्ठानत्वमेवेत्यर्थः।

पूर्वत्र ईश्वरस्य जगदुपादानत्वमुक्तम्। जीवाश्रितमायेत्यादौ जीवोऽपि व्यवहृतः। इदानीं तयोः स्वरूपं[3] निरूपयितुं प्रश्नमवतारयति—**अथेति**। 'मायां तु प्रकृतिम्' इति श्रुतौ या भूतप्रकृतित्वेन माया प्रसिद्धा तस्यां चैतन्यप्रतिबिम्ब ईश्वरः। ननु 'मायिनं तु महेश्वरम्' इति वाक्यशेषे मायाया ईश्वराश्रितत्वप्रतिपादनात् ईश्वरस्य मायाप्रतिबिम्बत्वं न सम्भवति, उपाधेः प्रतिबिम्बाश्रितत्वादर्शनात्, इति शङ्कां निराचष्टे—**चिन्मात्रसंबन्धिनीति**। चिन्मात्राश्रितेत्यर्थः। मात्रपदेन बिम्बत्वादेः[4] व्यवच्छेदः। वाक्यशेषेऽपि महेश्वरपदं चिन्मात्रलक्षकमिति भावः। साङ्ख्याभिमतप्रकृतेरिव मायायास्सत्यत्वं वारयति—**अनिर्वाच्येति**। माया तावत् ब्रह्मचैतन्यात् न वस्तुतो भिन्ना। ब्रह्मव्यतिरिक्तसर्वमिथ्यात्वप्रतिपादकश्रुतिविरोधेन वस्तुतः तस्यास्ततो भेदासम्भवात्। नाप्यभिन्ना। चैतन्यजडयोरैक्यायोगात्। नापि चैतन्याद्भिन्नाभिन्ना। एकत्र भिन्नत्वाभिन्नत्वयोर्विरोधेनासम्भवात्। एवं न तावत् माया सती। अद्वैतश्रुतिविरोधादेव। नाप्यसती। भूतप्रकृतित्वानुपपत्तेः। नापि सदसती। सत्त्वासत्त्वयोरेकत्र विरोधात्। एवं न तावत् माया सावयवा। तस्यास्सादित्वप्रसङ्गेन तत्प्रतिबिम्बभूतेश्वरस्यापि सादित्वप्रसङ्गात्। मायायास्सादित्वे तत्प्रकृतित्वेन मायान्तरापेक्षायामनवस्थाप्रसङ्गाच्च। नापि निरवयवा। प्रकृतित्वाभावप्रसङ्गात्। सावयवपदार्थानामेव लोके प्रकृतित्वदर्शनात्। नाप्युभयरूपा। सावयवत्वनिरवयवत्वयोरेकत्र विरोधात्। तस्मात्

---

1. उपचारादिति—अस्मिन् पक्षे कार्याकारेण परिणामिन एव उपादानशब्दमुख्यार्थत्वं इत्यभिप्रायः। उपचारशब्देन अत्र लक्षणा विवक्षिता।

2. उक्तं हि—ब्रह्माज्ञानात् जगज्जन्म ब्रह्मणोऽकारणत्वतः।
अधिष्ठानत्वमात्रेण कारणं ब्रह्म गीयते ॥ इति।
[वेदान्तसिद्धान्तमुक्तावली-४६]

3. तयोः स्वरूपमिति। यद्यपि जीवेश्वरयोः वास्तवं स्वरूपं ब्रह्मचैतन्यमेव, तथापि जीव इति ईश्वर इति च भेदेन व्यवहारविषयीभूतं स्वरूपं इत्यर्थः।

4. बिम्बत्वादेरिति-बिम्बत्वविशिष्टादेः इत्यर्थः।

शक्तिमत्सु अविद्याभिधानेषु चित्प्रतिबिम्बो जीवः इति ॥

तत्त्वविवेके तु—**त्रिगुणात्मिकाया मूलप्रकृतेः 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' [नृ. उ. ९-३] इति श्रुतिसिद्धौ रूपभेदौ। रजस्तमोऽनभिभूतशुद्धसत्वप्रधाना माया, तदभिभूतमलिनसत्वप्रधाना अविद्या, इति मायाविद्याभेदं परिकल्प्य, मायाप्रतिबिम्ब ईश्वरः अविद्याप्रतिबिम्बो जीवः—इत्युक्तम् ॥**

एकैव मूलप्रकृतिः विक्षेपप्राधान्येन मायाशब्दिता ईश्वरोपाधिः। आवरणप्राधान्येन

---

[1]सर्वप्रकारेण निर्वक्तुमशक्यतया माया अनिर्वाच्येत्यर्थः। तस्याः परिच्छिन्नानन्तप्रदेशेषु चैतन्यप्रतिबिम्बो जीवः, न साक्षात्तस्यामेव चित्प्रतिबिम्बो जीवः इत्येवकारार्थः। प्रदेशानां परिच्छिन्नत्वविशेषणं तत्प्रतिबिम्बरूपजीवानां परिच्छिन्नत्वलाभार्थम्। तथा च भाष्ये तत्र तत्र जीवानां परिच्छिन्नत्वनिरूपणं सङ्गच्छते। तथा हि—'सर्वत्र प्रसिद्धोपदेशात्' [ब्र. सू. १-२-१/१] इत्यधिकरणे सौत्रशारीरपदव्याख्यानरूपं भाष्यम्—'शारीर इति शरीरे भव इत्यर्थः। नन्वीश्वरोऽपि शरीरे भवति। सत्यं शरीरे भवति। न तु शरीर एव भवति.................... 'आकाशवत् सर्वगतश्च नित्यः' इति व्यापित्वश्रवणात्। जीवस्तु शरीर एव भवति। तस्य भोगाधिष्ठानाच्छरीरादन्यत्र [2]वृत्त्यभावात्' इति। तथा द्युभ्वाद्यधिकरण [ब्र.सू. १-३-१/१] गतं भाष्यम्—'न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यक् सम्भवति' इति। प्राणभृतः– जीवस्य द्युभ्वादिशब्दितजगदायतनत्वं मुख्यं न सम्भवति अविभुत्वात् इति भाष्यार्थः। पटस्यारम्भकतन्तव इव मायाया न प्रदेशास्सन्ति। तस्या अनादित्वात्। किं तु मायायां विक्षेपावरणशक्तीनामानन्त्यात् विक्षेपावरणशक्तिमद्भागा एव प्रदेशा विवक्षिता इत्याशयेनाह—**आवरणविक्षेपशक्तिमत्स्विति**। ब्रह्मचैतन्यावरणानुकूला शक्तिरावरणशक्तिः। आवरणं च 'ब्रह्म नास्ति न प्रकाशते' इति व्यवहारयोग्यत्वम्। विक्षेपपदेन तत्तज्जीवासाधारणदुःखादिकं विवक्षितम्। तदनुकूलशक्तिः विक्षेपशक्तिरित्यर्थः। ननु - मायाप्रदेशानां जीवोपाधित्ववर्णनमनुपपन्नम्, आनुमानिकाधिकरणभाष्यादौ अविद्याया जीवोपाधित्वव्यवहारविरोधप्रसङ्गात्, अत आह—**अविद्याभिधानेष्विति**। मायाप्रदेशानामेव भाष्यगताविद्यापदाभिलप्यत्वात् न तद्विरोध इति भावः।

एकस्यामेव मूलप्रकृतौ प्रदेशप्रदेशिभावेन अनिर्वचनीयं भेदं कल्पयित्वा जीवेश्वरयोः प्रतिबिम्बरूपत्वमुक्तम्। इदानीं तस्यामेव प्रकारान्तरेण रूपभेदं कल्पयित्वा तदुपपादयति—**तत्त्वविवेके त्विति**। भेद-

---

1. सर्वप्रकारेणेति। ननु-उक्तरीत्या सत्वादिप्रकारेण निर्वक्तुमशक्यत्वेऽपि सत्वादिप्रकारेण निर्वक्तुमशक्यं इत्येवंरूपेण निर्वक्तुं शक्यत्वात् सर्वप्रकारेण इत्यसङ्गतम् —इति चेत्, न—सर्वस्यापि धर्मस्य धर्मिणः सकाशात् भेदेन अभेदेन भेदाभेदेन वा पूर्वोक्तयुक्तिभिः निर्वक्तुमशक्यत्वेन उक्तरूपेणापि निर्वक्तुमशक्यत्वम्, एवं मिथ्यात्वादिरूपान्तरैरपि, इति भावात्।

2. वृत्त्यभावादिति। अभिव्यक्त्यभावादित्यर्थः। अयं च अन्यत्राभावे हेतुः। अतो न हेतुसाध्ययोरभेदः। यद्यन्यत्रापि भवेत्, तर्हि तत्रापि 'अहं' इति प्रकाशेत इति भावः।

अविद्याऽज्ञानशब्दिता जीवोपाधिः। अत एव तस्या जीवेश्वरसाधारणचिन्मात्रसम्बन्धित्वेऽपि जीवस्यैव 'अज्ञोऽस्मि' इत्यज्ञानसम्बन्धानुभवः नेश्वरस्य - इति जीवेश्वरविभागः क्वचित् **उपपादितः॥**

संक्षेपशारीरके तु - **'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः'** इति **श्रुतिमनुसृत्य - अविद्यायां चित्प्रतिबिम्ब ईश्वरः। अन्तःकरणे चित्प्रतिबिम्बो जीवः। न च—अन्तःकरणरूपेण**

कल्पनावैलक्षण्यद्योतनार्थः 'तु' शब्दः। **रूपभेदाविति**। स्तः इति शेषः। रजस्तमोऽ[1]नभिभूतत्वमेव शुद्धत्वम्। शुद्धसत्वप्रधाना प्रकृतिः माया, मलिनसत्वप्रधाना प्रकृतिः अविद्या, इत्यर्थः। रजस्तमोऽभिभूतत्वमेव सत्वस्य मलिनत्वम्।

[2]सत्वशुद्ध्यशुद्धिभ्यां मायात्वाविद्यात्वाख्यौ श्रुत्युक्तरूपभेदौ निरूप्य विक्षेपावरणशक्तिभेदेन श्रुत्युक्तरूपभेदावेव निरूपयति—**एकैवेति। अत एवेति**। जीवस्यावरणशक्तिमदुपाधिमत्त्वादेवेत्यर्थः। **तस्या इति**। जीवेश्वरोपाधिभूतायाः प्रकृतेः प्रतिबिम्बरूपजीवेश्वरसाधारणबिम्बचैतन्याश्रितत्वेऽपीत्यर्थः। **नेश्वरस्येति**। अत्रापि 'अत एव' इत्यस्य अनुषङ्गः। आवरणशक्तेः ईश्वरोपाधिकोटौ अननुप्रवेशादेव—इति तदर्थः। तथा च जीवेश्वरौ प्रति प्रकृतेस्साधारणत्वात् एकस्य सर्वज्ञत्वं अपरस्याज्ञत्वं इति यद्वैलक्षण्यं श्रुत्यनुभवसिद्धं, तत् कथं सम्भवतीति शङ्काया अनवकाश इति भावः।

मतान्तरमाह—**संक्षेपेति**। श्रुतौ कारणपदमविद्यापरं कार्यपदमन्तःकरणपरं इति मत्वा आह—**अविद्यायामित्यादिना**। ननु 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुतिविरोधः, तस्यां श्रुतौ जीवस्य कारणोपाधिकत्वप्रतीतेः, इति चेत् उच्यते–'जीवेशावाभासेन करोति' इति पूर्वभागेन हि जीवेश्वरयोरुभयोरपि प्रतिबिम्बभावः प्रतीयते। न च बिम्बैक्यस्थले उपाधिभेदं विना प्रतिबिम्बभेदस्सम्भवति। सूर्यादिप्रतिबिम्बस्थले उपाधिभेदं विना प्रतिबिम्बभेदादर्शनात्। तथा च उदाहृतश्रुतौ प्रतिबिम्बरूपयोः जीवेशयोर्यथाक्रमं मायाविद्यापदाभ्यामुपाधी समर्प्येते। मायापदं चात्र मायाकार्यान्तःकरणपरम्। न चैवं मूलप्रकृतिं प्रकृत्य प्रवृत्तायां 'जीवेशौ' इतिश्रुतौ 'माया चाविद्या च स्वयमेव भवति' इति वाक्येन मायाऽविद्ययोरुभयोरपि मूलप्रकृत्यभेदोपपादनविरोधः इति वाच्यम्। मूलप्रकृत्यविद्ययोरिव मायाशब्दितान्तःकरणमूलप्रकृत्योः मुख्याभेदाभावेऽपि प्रकृतिविकारभावप्रयुक्ताभेदसत्त्वेन तावता 'माया चाविद्या च स्वयमेव भवति' इति वाक्यशेषोपपत्तेरिति भावः। **ननु**–अविद्यावच्छिन्नचैतन्यमेव ईश्वरोऽस्तु। तथा अन्तःकरणावच्छिन्नचैतन्यमेव च जीवोऽस्तु। अविद्यान्तःकरणाधिष्ठानचैतन्ययोस्तदवच्छिन्नत्वस्य क्लृप्तत्वात् तदतिरिक्तप्रतिबिम्बकल्पनायां गौरवाच्च - इत्याशयेन शङ्कते—**न चेति**। न तु प्रतिबिम्बचैतन्यमिति एवकारार्थः। जीवग्रहणमीश्वरस्याप्युपलक्षणम्। जीवेश्वरयोः प्रतिबिम्बतायाःश्रुतिसि-

---

1. अनभिभूतत्वम्—अप्रतिबद्धकार्यकत्वम्।

2. सत्वशुद्ध्यशुद्धिभ्यामित्यादि। श्रुत्युक्तरूपभेदौ सत्वशुद्ध्यशुद्धिप्रयुक्तौ इति निरूप्य विभिन्नशक्तिप्रयुक्तौ इति निरूपयति इत्यर्थः।

द्रव्येण घटेनाकाशस्येव चैतन्यस्यावच्छेदसम्भवात् तदवच्छिन्नमेव चैतन्यं जीवोऽस्तु—इति वाच्यम्। इह परत्र च जीवभावेनावच्छेद्यचैतन्यप्रदेशस्य भेदेन कृतहानाकृताभ्यागमप्रसङ्गात्। प्रतिबिम्बस्तु उपाधेर्गतागतयोरवच्छेद्यवत् न भिद्यत इति प्रतिबिम्बपक्षे नायं दोषः—इत्युक्तम्।

एवमुक्तेष्वेतेषु जीवेश्वरयोः प्रतिबिम्बविशेषत्वपक्षेषु, यत् बिम्बस्थानीयं ब्रह्म तत् मुक्तप्राप्यं शुद्धचैतन्यम्॥

चित्रदीपे - 'जीव ईशो विशुद्धा चित्' इति चित्त्रैविध्यप्रक्रियां विहाय यथा घटावच्छिन्ना-

---

द्धत्वात् न [1]कल्पनागौरवदोषोऽस्ति इत्यभिप्रेत्य जीवस्यावच्छिन्नत्वपक्षे दोषमाह—**इहेति**। अस्मिन् लोके ब्राह्मणादिशरीरगतान्तःकरणावच्छिन्नचैतन्यप्रदेशस्य कर्मकर्तृत्वात् लोकान्तरे देवादिशरीरगतान्तःकरणावच्छिन्नचैतन्यप्रदेशस्य चाकर्तुः भोक्तृत्वात् कृतहानादिप्रसङ्गः। येन कर्म कृतं न तस्य भोगः, येन कर्म न कृतं तस्य अकृतकर्मफलाभ्यागमः, इत्यर्थः। न च ब्राह्मणादिशरीरगतस्यैवान्तःकरणस्य लोकान्तरे गमनाभ्युपगमात् तदवच्छिन्नचैतन्यप्रदेशस्यैव तत्रापि गमनमस्तु इति वाच्यम्। घटस्य देशान्तरगमनेऽपि तदवच्छिन्नाकाशप्रदेशस्य [2]गमनादर्शनात् इति भावः। प्रतिबिम्बस्यावच्छेद्यचैतन्यापेक्षया वैलक्षण्यद्योतनार्थः 'तु' शब्दः। **गतागतयोरिति**। गमनागमनयोस्सतोरपि अवच्छेद्यप्रदेशवत् न भिद्यते इत्यर्थः। सूर्यादिप्रतिबिम्बवति जलपूर्णघटादौ देशान्तरं नीयमानेऽपि प्रतिबिम्बभेदादर्शनादिति भावः।

ननु चन्द्रादिप्रतिबिम्बवतां जलपात्राणां मध्ये एकस्य नाशे तद्गततया प्रतीतस्य प्रतिबिम्बस्य बिम्बेनैकीभावः प्रत्यक्षेणानुभूयते, न तथा प्रतिबिम्बान्तरेण, एवं प्रतिबिम्बरूपजीवस्यापि विदेहकैवल्यसमये बिम्बभूतशुद्धब्रह्मभाव एव स्यात्, न तु प्रतिबिम्बेश्वरभावापत्तिः दृष्टविरोधात्, इत्याशङ्कामिष्टापत्त्या परिहरति - **एवमुक्तेष्विति**। **बिम्बस्थानीयमिति**। [3]लोकप्रसिद्धचन्द्रादिरूपबिम्बस्थानीयमित्यर्थः। ननु बिम्बत्वविशिष्टचैतन्यं कथं शुद्धमिति चेत्, न। शुद्धपदेन सर्वज्ञत्वसर्वकर्तृत्वादिधर्मराहित्यस्य विवक्षितत्वात्[4] इति।

चित्रदीपे चित्त्रैविध्यप्रक्रियां विहाय चैतन्यस्य चातुर्विध्यं परिकल्प्य जीवेश्वरविभागो दर्शित इति सम्बन्धः। तथा च चित्रदीपवचनम् - 'कूटस्थो ब्रह्म जीवेशौ इत्येवं चिच्चतुर्विधा। घटाकाश-

---

1. न कल्पनागौरवदोषोऽस्तीति। प्रमाणसिद्धत्वात् न कल्प्यत्वम्; अतो न तत्प्रयुक्तगौरवरूपो दोषोऽस्ति इत्यभिप्रायः।

2. गमनादर्शनादिति। घटस्य देशान्तरगमनेऽपि तत्र पदार्थान्तरावकाशदातृत्वदर्शनेन तदवच्छिन्नकाशस्य गमनकल्पनं अनुभवविरुद्धमिति भावः।

3. ननु 'बिम्बं ब्रह्म' इत्येव वक्तुं युक्तम्, न तु बिम्बस्थानीयमिति, बिम्बत्वाभावप्रतीतिकरत्वात्, इत्याशङ्क्य व्याचष्टे—लोकप्रसिद्धेति।

4. अस्मिन् पक्षे सर्वात्मना अविद्योच्छेदे सत्येव असंकुचितं शुद्धं मुक्तप्राप्यं भवति इति भावः।

काशो घटाकाशः, तदाश्रिते जले प्रतिबिम्बितः साभ्रनक्षत्रो जलाकाशः, अनवच्छिन्नो महाकाशः, महाकाशमध्यवर्तिनि मेघमण्डले वृष्टिलक्षणकार्यानुमेयेषु जलरूपतदवयवेषु तुषाराकारेषु प्रतिबिम्बितो मेघाकाशः, इति वस्तुत एकस्याप्याकाशस्य चातुर्विध्यं, तथा स्थूलसूक्ष्मदेहद्वयस्य अधिष्ठानतया वर्तमानं तदवच्छिन्नं चैतन्यं कूटवन्निर्विकारत्वेन स्थितं कूटस्थम्। तत्र कल्पितेऽन्तःकरणे प्रतिबिम्बितं चैतन्यं संसारयोगी जीवः, अनवच्छिन्नं चैतन्यं ब्रह्म, तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिबिम्बितं चैतन्यं ईश्वरः, इति चैतन्यस्य चातुर्विध्यं परि-

---

महाकाशौ जलाकाशाभ्रखे यथा ॥' [पं. द. ६-१८] इति। एतच्छ्लोकोपात्तदृष्टान्तभागं संगृह्णाति-**यथेत्यादिना। तदाश्रित इति।** घटस्थाकाशाश्रिते इत्यर्थः। अभ्रनक्षत्रसाहित्यविशेषणं आकाशस्य जले प्रतिबिम्बाभावशङ्कानिरासार्थम्। इत्थं च तन्निरासप्रकारो विवक्षितः — यदा जलेऽभ्रनक्षत्राणां प्रतिबिम्बोऽनुभूयते तदा तैस्सह आकाशप्रतिबिम्बोऽप्यनुभूयत एव इति नाकाशप्रतिबिम्बाभावशङ्कावकाश इति। **अनवच्छिन्न इति।** घटानवच्छिन्न इत्यर्थः। मेघमण्डले ये जलरूपास्तदवयवाः तेषु प्रतिबिम्बित इति सम्बन्धः। तच्छब्दो मेघमण्डलपरः। मेघमण्डले जलानि सन्ति चेत् कुतो नोपलभ्यन्ते इत्याशङ्का न कार्या, तेषां तुषारवत् सूक्ष्मरूपत्वात् इत्याशयेनाह—**तुषारेति।** तत्र जलसत्त्वे मानमाह-**वृष्टिलक्षणेति।** श्लोकोपात्तदार्ष्टान्तिकभागं संगृह्णाति—**तथेति। सूक्ष्मेति।** घ्राणरसनचक्षुश्श्रोत्रत्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, प्राणापानादयः पञ्च वायवः, मनो बुद्धिश्च इत्यन्तःकरणं द्विविधम्, आहत्य[1] सप्तदशकं लिङ्गशरीरं घटस्थानीयं (दार्ष्टान्तिके) सूक्ष्मदेहशब्दार्थः। देहद्वयावच्छिन्नं चैतन्यं घटाकाशस्थानीयं कूटस्थशब्दार्थः। चैतन्यस्य देहद्वयावच्छिन्नत्वे हेतुः अधिष्ठानतया वर्तमानत्वम्। काष्ठविशेषलग्नायःपिण्डविशेषः कूटशब्दार्थः[2], तद्वदचलतया तिष्ठतीति कूटस्थः, तत्र कूटस्थे कल्पितं घटगतजलस्थानीयं यदन्तःकरणं तस्मिन् प्रतिबिम्बितमित्यर्थः। कूटस्थचैतन्यातिरिक्तचिदाभास [3]कल्पनायाः प्रयोजनमाह—**संसारेति।** कूटस्थचैतन्यस्य न संसाराश्रयत्वं, तस्य जन्ममरणादिलक्षणसंसाराश्रयत्वे कूटस्थत्वव्याघातात् इति भावः। महाकाशस्थानीयब्रह्माश्रितमेघमण्डलस्थानीये मायाख्यतमसि स्थिताः याः धीवासनाः तासु प्रतिबिम्बितमित्यर्थः। जाग्रत्स्वप्नावस्थाद्वय-

---

1. आहत्य - मिलित्वेत्यर्थः।

2. कूटशब्दार्थ इति। स्वर्णकारेण आभरणविशेषनिर्माणाय तदुपादानद्रव्यस्य दीर्घवर्तुलत्वादिविकारविशेषसंपादनार्थं उपयुज्यमानः आधारभूतः घनभूततिर्यक्काष्ठविशेषलग्नः अयःपिण्डविशेषः कूटमित्युच्यते। तदुपरि हि तत्प्रकृतिद्रव्यं निधाय ताडनादिक्रियाविशेषादिना तस्य दीर्घीभावादिकं संपादयति, तत्तु कूटं दीर्घीभावादिसर्वविकाररहितं अवतिष्ठते। तद्वत् निर्विकारं चैतन्यं कूटस्थचैतन्यं इत्यर्थः। अचलतयेत्यत्र चलनमुपलक्षणं, सर्वविक्रियारहितं इत्यर्थः॥

3. चिदाभासकल्पनाया इति। अतात्विकत्वेऽपि ब्रह्मात्मप्रतिपत्त्युपयोगितया उक्तचिदाभासाभ्युपगमस्य इत्यर्थः। न च कल्पनागौरवदोषः शङ्क्यः। व्युत्पित्सुपुरुषाणां नानारुचित्वात् तत्पुरुषस्य प्रत्यगात्मव्युत्पत्तये अवश्यापेक्षितत्वात्। उक्तं हि वार्तिके—यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि। सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता इति।

कल्प्य अन्तःकरणधीवासनोपरक्ताज्ञानोपाधिभेदेन जीवेश्वरविभागो दर्शितः ।

अयं चापरस्तदभिहितो विशेषः—चतुर्विधेषु चैतन्येषु जीवः 'अहम्' इति प्रकाशमानः कूटस्थे अविद्यातिरोहितासङ्गानन्दरूपविशेषांशे शुक्तौ रूप्यवदध्यस्तः । अत एव इदंत्वरजतत्वयोरिव अधिष्ठानसामान्यांशाध्यस्तविशेषांशरूपयोः स्वयन्त्वाहन्त्वयोः सह प्रकाशः 'स्वयमहं करोमि' इत्यादौ । अहन्त्वं हि अध्यस्तविशेषांशरूपम् । पुरुषान्तरस्य पुरुषान्तरे 'अहम्' इति व्यवहाराभावेन व्यावृत्त-

---

गतानि स्थूलान्तःकरणानि धियः, तासां सुषुप्त्यवस्थागताः सूक्ष्मावस्थाः वासना विवक्षिताः । **अन्तःकरणेति** । अन्तःकरणं च धीवासनोपरक्ताज्ञानं च, ते एव उपाधी, तयोर्भेदेनेत्यर्थः । धीवासनानामानन्त्यात् तासु प्रतिबिम्ब-चैतन्यरूपेश्वरस्य नानात्वशङ्काव्यावृत्त्यर्थं वासनोपरक्ताज्ञानोपाधिकत्वमुक्तम् ।

पूर्वमतेषु बिम्बप्रतिबिम्बयोः भेदमात्रं कल्पितं, स्वतस्तयोरभेद एव, इतीममर्थं सिद्धं कृत्वा अस्मिन् मते ततो विशेषमाह - **अयं चेति** । अस्मिन् मते पूर्वं चिच्चातुर्विध्यलक्षण एको विशेष उक्तः, तदपेक्षया अपरः - अन्यः प्रतिबिम्बमिथ्यात्वरूपो विशेषः तदभिहितः - तत्र चित्रदीपे अभिहितः इत्यर्थः । अपरं विशेषमेव दर्शयति - **चतुर्विधेष्विति** । 'अहम्' इति प्रकाशमानो जीवः शुक्तौ रूप्यवदध्यस्त इति सम्बन्धः । ननु - इदन्त्वेन सामान्यरूपेण ज्ञाते शुक्तित्वादिविशेषरूपेणाज्ञाते शुक्त्यादौ रूप्याद्यध्यासो दृष्टः । इह तु तथा सामान्यरूपेण ज्ञातं विशेषरूपेण चाज्ञातं किञ्चिदधिष्ठानं नोपलभ्यते - इत्याशङ्क्याह - **कूटस्थ इति** । ननु - अविद्यया कूटस्थस्य असङ्गत्वानन्दत्वपूर्णत्वादिविशेषांशस्य आवृततया शुक्तित्वादिवत् अप्रतीतावपि शुक्तेरिदन्त्वेनेव कूटस्थस्य केनचित् सामान्येन रूपेण प्रकाशो न दृश्यते । किञ्च 'इदं रजतम्' इत्यत्र अधिष्ठानसामान्यांशस्य आरोप्यविशेषांशस्य च सहप्रकाशो दृश्यते । प्रकृते तु अहमर्थरूपो विशेष एव 'अहम्' इति प्रकाशते, न तु सामान्यांशः कश्चित् । अतोऽहमर्थस्य रूप्यवदध्यस्तत्वकल्पनं न युक्तं इत्याशङ्क्याह - **अत एवेति** । अहमर्थस्य कूटस्थेऽध्यस्तत्वकल्पनादेव इत्यर्थः । **स्वयन्त्वाहन्त्वयोरिति** । कूटस्थस्य हि स्वयन्त्वं सामान्यरूपं, न कूटस्थत्वम् । तस्य शास्त्रैकगम्यत्वात् । स्वयन्त्वं च कूटस्थस्य अहमर्थारोपकाले तेन सह प्रकाशते । तत्पूर्वकालेऽपि स्वयन्त्वस्य भानमविरुद्धम् । तस्य नित्यचैतन्यात्मककूटस्थस्वरूपत्वाभ्युपगमात् । स्वयन्त्वकूटस्थचैतन्ययोः 'राहोश्शिरः' 'पुरुषस्य चैतन्यम्' इतिवत् भेदकल्पनया धर्मधर्मिभावोपपत्तेः । अतः कूटस्थस्य स्वयन्त्वेन सामान्यरूपेण सदा प्रकाशसत्त्वात् अहमर्थरूपचिदाभासाध्यासाधिष्ठानत्वमविरुद्धं इति भावः । अहमर्थस्य रूप्यवद्विशेषरूपत्वं दर्शयति - **अहन्त्वं हीति** । अहमर्थ इत्यर्थः । **अध्यस्तविशेषांशरूपमिति** । शुक्त्यादावध्यस्तो यो विशेषांशः रूप्यादिः तद्रूपं - तत्सदृशं इत्यर्थः । सादृश्यं च व्यावृत्तत्वम् । **व्यावृत्तत्वादिति** । व्यावृत्तत्वावगमादित्यर्थः । तेन न हेतुसाध्ययोरभेदः[1] । व्यावृत्तत्वा-

---

1. अहमर्थः [शुक्त्याद्यध्यस्तविशेषांशरूप्यादिसदृशः] व्यावृत्तः, व्यावृत्तत्वात्, इत्युक्ते हेतुसाध्ययोरभेदात् हेतुसिद्धौ सिद्धसाधनं हेत्वसिद्धौ स्वरूपासिद्धिः इति दोषमाशङ्क्य-व्याचष्टे-व्यावृत्तत्वादितीति । तथा च व्यावृत्तत्वं साध्यम्, व्यावृत्तत्वावगमः हेतुः, अतो नोक्तदोषः ।

त्वात्। स्वयन्त्वं च अन्यत्वप्रतियोग्यधिष्ठानसामान्यांशरूपम्। 'स्वयं देवदत्तो गच्छति' इति पुरुषान्तरेऽपि व्यवहारेण [1]अनुवृत्तत्वात्। एवं परस्पराध्यासादेव कूटस्थजीवयोरविवेको लौकिकानाम्। विवेकस्तु तयोः बृहदारण्यके 'प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' [बृ. उ. ४-५-१३] इति जीवाभिप्रायेण उपाधिविनाशानुविनाशप्रतिपादनेन 'अविनाशी वा अरेऽयमात्मा' [बृ. उ. ४-५-१४] इति कूटस्थाभिप्रायेणाविनाशप्रतिपादनेन

वगमे हेतुः व्यवहाराभावः। स्वयन्त्वस्य इदंत्ववत् सामान्यरूपत्वं दर्शयति - **स्वयन्त्वं चेति**। 'स्वयम्' 'अन्यः' इति लोकव्यवहारे स्वयन्त्वं अन्यत्वप्रतिद्वन्द्वितया प्रसिद्धं इति दर्शयितुं अन्यत्वप्रतियोगीति स्वयन्त्वस्य विशेषणं इति बोध्यम्। **स्वयमिति**। तदुक्तं चित्रदीपे—'देवदत्तः स्वयं गच्छेत् त्वं वीक्षस्व स्वयं तथा। अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते'॥ [पं.द.६-३९] इति। ननु 'स्वयमहम्' इतिप्रकाशमानयोः कूटस्थजीवयोःशुक्ति-रजतयोरिव[2] भेदसत्त्वे सर्वेषां कुतो भेदो नोपलभ्यते, तत्राह—**एवमिति**। अहमर्थजीवस्य शुक्तौ रूप्यवत्[3] कूटस्था-ध्यस्तत्वे सतीत्यर्थः। **परस्परेति**। तयोः अभेदाध्यासादेव अविवेकः - विवेकाभावः - भेदानुभवाभावः इत्यर्थः। ननु—'इदं रजतम्' इति भ्रमस्थले 'शुक्तिरियम्' इति विशेषदर्शनेन 'इदं रजतम्' इति प्रतीतयोः सामान्यविशेषपदा-र्थयोः शुक्तित्वरजतत्वरूपविरुद्धधर्मवत्त्वनिश्चयात् तयोर्भेद उपेयते। इह तु जीवकूटस्थयोः कथं भेदोऽवगन्तव्यः। तदभावे हि 'स्वयमहम्' इति सामान्यविशेषभावेन प्रकाशमानयोः तयोः सत्यरजतस्थले रजतेदमर्थयोरिव वस्तुत ऐक्यापत्त्या अहमर्थरूपजीवस्य स्वयंशब्दार्थभूतकूटस्थे कल्पितत्वासिद्धेः—इत्याशङ्क्य श्रुत्या तयोः भेदं दर्शयति— **विवेकस्त्विति**। तुशब्दः शङ्काव्यावृत्त्यर्थः। विवेकः - भेदानुभवः। एतेभ्यः - सन्निहितेभ्यः देहादिसङ्घातरूपेण परिणतेभ्यः उपाधिरूपेभ्यो भूतेभ्यः समुत्थाय - साम्येनोत्थाय—उपाधिरूपबुद्ध्याद्युत्पत्त्या[4] उत्पत्तिं प्राप्य इत्यर्थः, यदा तान्युपाधिभूतानि बुद्ध्यादीनि तत्त्वज्ञानेन विनश्यन्ति तदा तान्यनुविनश्यति, इति श्रुत्या[5] औपाधिकस्यात्मनो विनाशित्वं प्रतिपाद्यते। तच्च अन्तःकरणप्रतिबिम्बरूपस्य उपाध्यायत्तस्य जीवस्य मिथ्यात्वे सति सम्भवति। औपाधिकजीवस्य सत्यत्वे तु तस्य विनाशित्वप्रतिपादकवचनं न सङ्गच्छेत। तथा अयं-प्रज्ञानघन आत्मा अरे-मैत्रेयि अविनाशी वा - अविनाश्येव न तु उपाधिनाशान्नश्यतीति कूटस्थचैतन्यस्य श्रुत्या नाशाभावः प्रतिपाद्यते। एतदुक्तं भवति—'अयमात्मा................प्रज्ञानघन एव एतेभ्यो भूतेभ्यस्समुत्थाय' इत्यादिश्रुत्या चिदेकरस

---

1. अनुवृत्तत्वात्—अनुवृत्तत्वावगमात् इत्यर्थः। अत एव स्वत्वमनुगतं इति प्राचां उक्तिरपि सङ्गच्छते।
2. शुक्तिरजतयोरिवेति। भ्रमस्थलीयेदमर्थरजतयोरिवेत्यर्थः।
3. शुक्तौ रूप्यवदिति। भ्रमस्थलीयेदमर्थरजतयोः परस्पराध्यासकाले विद्यमानोऽपि भेदो नावभासते यथा तद्वदिति भावः।
4. बुद्ध्याद्युत्पत्त्येति। प्रयुक्तत्वं तृतीयार्थः। समानकालीनयोरपि प्रयोज्यप्रयोजकत्वसंभवात् बुद्ध्याद्युपाधीनां तद्गतचिदाभासस्य च उत्पत्तेः समसमयत्वेऽपि नानुपपत्तिः।
5. इति श्रुत्या—इत्यर्थकेन 'तान्येवानुविनश्यति' इति श्रुतिवाक्येन इत्यर्थः।

च स्पष्टः । अहमर्थजीवस्य विनाशित्वे कथमविनाशिब्रह्माभेदः । [1]नेदमभेदे सामानाधिकरण्यम्,

आत्मैव उपाध्युत्पत्तिमनु उत्पद्यते तन्नाशमनु नश्यति इति उपाध्युत्पत्तिविनाशव्यतिरेकेण[2] उत्पत्तिविनाशौ चिदात्मनः प्रतिपाद्येते । अनुविनश्यति इत्यनुशब्दप्रयोगात्[3] । न च तस्य स्वतो विनाशादिमत्त्वं सम्भवति । 'अविनाशी वा अरेऽयमात्मा' इति वाक्येन विज्ञानघनात्मनो विनाशाभावप्रतिपादनविरोधात् । अतः चिदात्मनः उत्पत्तिविनाशवता प्रतिबिम्बचैतन्यरूपजीवेन तादात्म्यमादाय विनाशादिवचनमुपपादनीयम् । ततश्च भ्रमस्थलीय-रजतेदमर्थयोरिव अत्रापि विनाशित्वाविनाशित्वरूपविरुद्धधर्मवत्त्वनिश्चयादेव जीवकूटस्थयोः भेदः स्पष्टं भासत इति ततः प्राक् कूटस्थचैतन्ये जीवरूपाहमर्थस्याध्याससिद्धिः इति । उदाहृतश्रुत्या प्रतिबिम्बजीवस्य विनाशित्वोपगमे श्रुत्यन्तरविरोधमाशङ्कते—**अहमर्थेति** । [4]अभेदः इत्यनन्तरं 'अहं ब्रह्मास्मि' [बृ. उ. १-४-१०] इति वाक्येन प्रतिपाद्यत इति शेषः । विनाश्यविनाशिनोरभेदायोगादिति भावः । परिहरति—**नेदमिति** । 'सोऽयं' इत्यादिसमानाधिकरणवाक्यस्य यथाऽभेदो वाक्यार्थो दृश्यते, तथा 'यः स्थाणुः स पुरुषः' इत्यादिसमानाधिकरण-वाक्यस्य बाधारूपो वाक्यार्थो दृश्यते । 'यः स्थाणुः स पुरुषः' इत्यत्र हि पुरुषे आरोपितस्य प्रातिभासिकस्य स्थाणोः व्यावहारिकपुरुषेण सह अभेदो न वाक्यार्थः । बाधितत्वात् । किं तु स्थाण्वारोपाधिष्ठानभूते पुरुषे वस्तुतस्स्थाणुतादात्म्याभावरूपा बाधा वाक्यार्थः । तथा च 'यः स्थाणुः स पुरुषः' इति वाक्येन 'वस्तुतः स्थाणुतादात्म्याभाववान् अयं पुरुषः' इति बोधो जायते, तेन च बोधेन पुरुषे स्थाण्वारोपः सविषयो निवर्तते, एवं 'अहं ब्रह्मास्मि' इति वाक्येन 'अहमर्थभूतजीवतादात्म्यशून्यं ब्रह्मैवास्मि' इति ज्ञानं जायते । तेन ज्ञानेन 'अहं ज्ञाता, कर्ता, सुखी, दुःखी' इत्याद्यारोपः कर्तृत्वादिधर्मविशिष्टाहमर्थेन स्वविषयेण सह निश्शेषं निवर्तते । [5]आरोपिताहमर्थनिवृत्तौ च सत्यां जीवस्य यद्वास्तवं रूपं कूटस्थचैतन्यात्मकं, तत् पूर्णब्रह्मरूपेणावतिष्ठत इति न श्रुत्यन्तरविरोध इति भावः । अक्षरार्थस्तु—इदं - ब्रह्माहंपदयोःसमानविभक्तिमत्त्वरूपं सामानाधिकरण्यं

---

1. नेदं अभेदे सामानाधिकरण्यं, किन्तु बाधायामिति ।

अभेदे—अभेदनिष्ठम् । तन्निष्ठत्वं च बोध्यबोधकभावसंबन्धेन । अथवा - अभेदे इति विषयसप्तमी । अभेदविषय-कत्वं सामानाधिकरण्यस्य स्वप्रयोज्यबोधद्वारकम् । तथा च शुद्धव्यक्तिमात्ररूपैक्यविषयकबोधप्रयोजकं इत्यर्थः ।

बाधायां—बाधानिष्ठं बाधविषयकं वा । तत्त्वं च पूर्ववत् । तथा च आरोपिततादात्म्याभाववदधिष्ठानबोधप्रयोजकं इत्यर्थः । सामानाधिकरण्यम् - समानविभक्तिकमिथस्साकाङ्क्षानेकनामवत्त्वम् ।

2. व्यतिरेकेण—इत्थंभावे तृतीया । व्यतिरिक्तौ इत्यर्थः ।

3. अनुशब्दप्रयोगादिति । 'गच्छन्तमनुगच्छति' इत्यादिप्रयोगेषु च गमनक्रियाभेददर्शनात् इति शेषः ।

4. जीवस्य ब्रह्माभेदः असिद्धः इति शङ्कां निराकर्तुं शेषं पूरयति 'अभेदः इत्यनन्तरं' इत्यादिना ।

5. अहमर्थस्य कूटस्थचैतन्ये आरोपात् तत्रैव तस्य बाधोक्तिर्युज्यते, कथं ब्रह्मणि बाधोक्तिः, इत्याशङ्क्याह - आरोपिताहमर्थनिवृत्तौ इत्यादि । तथा च अहमर्थबाधे कूटस्थचैतन्यब्रह्मणोः कल्पितोऽपि भेदो निवर्तते । तेन कूटस्थचैतन्यं ब्रह्मैवेति तत्र बाधोक्तिः नानुपपन्ना । उक्तं च चित्रदीपे 'कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि' इति ।

किं तु बाधायाम्। यथा 'यः स्थाणुरेष पुमान्' इति पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्त्यते, एवं 'अहं ब्रह्मास्मि' इति कूटस्थब्रह्मस्वरूपत्वबोधेन अध्यस्ताहमर्थरूपत्वं निवर्त्यते। 'योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव। ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्तते ॥ [नै. सि. २-२९] इति नैष्कर्म्यसिद्धिवचनात्।

अभेदरूपेऽर्थे नाभ्युपगम्यते, येन अभेदासम्भवो दोषःस्यात्। ननु यद्यभेदो न वाक्यार्थः कस्तर्हि सः इति शङ्कते—**किं त्विति**। बाधा अत्र वाक्यार्थो विवक्षित इत्याह—**बाधायामिति**। पुरुषत्वपदेन कल्पितस्थाणुतादात्म्याभाववत्त्वं विवक्षितम्। बाधायाः वाक्यार्थत्वस्वीकारात्। 'अहं ब्रह्मास्मि' इत्यत्र इतिपदानन्तरं 'वाक्यजन्येन' इति शेषः[1]। अत्र वाक्यार्थज्ञानस्य 'अहं ब्रह्मास्मि' इत्याकारकत्वाभावात्। कूटस्थब्रह्मरूपत्वपदेनापि वस्तुतोऽहमर्थतादात्म्याभाववत्कूटस्थब्रह्मरूपत्वं विवक्षितम्। बाधाया एव वाक्यार्थबोधविषयत्वाभ्युपगमात्। [2]दृष्टान्तदार्ष्टान्तिकयोः अधिष्ठानस्यारोपितार्थाभाववत्वं आरोपितात्यन्ताभावस्याधिष्ठानातिरिक्तत्वमिति मतमाश्रित्य अस्माभिरुक्तं इति ध्येयम्। **अध्यस्ताहमर्थरूपत्वमिति**। अध्यस्तो योऽहमर्थः तद्रूपत्वं–तत्तादात्म्यं[3] निवर्त्यते, इति बोधफलमुक्तम्। महावाक्यस्य बाधार्थकत्वं न स्वकपोलकल्पितम्, किं तु सुरेश्वराचार्यैरुक्त इत्याह—**योऽयमिति**। मन्दान्धकारे यः स्थाणुर्गृहीतः 'एषोऽयं पुमान्' इत्याप्तवाक्यजन्यया पुंधिया 'वस्तुतो नायं स्थाणुः, किं तु पुमान्' इति धिया 'स्थाणुरयं' इति धीरारोपितस्थाणुतादात्म्येन[4] सह यथा निवर्तते, एवं 'अहं ब्रह्मास्मि' इति वाक्यजन्यया धिया- 'अहमर्थभूतजीवतादात्म्यशून्यं ब्रह्मैवास्मि' इत्याकारया अहंबुद्धिः - 'अहं करोमि भुञ्जे' इत्यादिबुद्धिः अशेषा-आरोपिताहमर्थसहिता निवर्तते। महावाक्यार्थज्ञानादशेषानर्थनिवृत्तिः विदुषामनुभवसिद्धा इति द्योतनार्थो हिशब्दः - इति।

ननु समानाधिकरणवाक्येषु अभेदरूपवाक्यार्थस्य मुख्यतया[5] औत्सर्गिकत्वात् विवरणादिषु प्रकृते अभेदरूपवाक्यार्थस्यैव स्वीकाराच्च भगवत्पादैरपि वाक्यवृत्तौ 'तादात्म्यमात्रं वाक्यार्थस्तयोरेव पदार्थयोः' [वाक्यवृत्तिः २४] इति श्लोकेन महावाक्येषु तत्त्वंपदार्थयोस्तादात्म्यशब्दिताभेदस्यैव वाक्यार्थतया स्वीकाराच्च वार्तिककारवचनस्य

---

1. वाक्यजन्येनेति शेष इति। तथा च 'अहं ब्रह्मास्मि' इति यद्वाक्यं तज्जन्येनेत्यर्थः।

2. ननु—'अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः' इति अभियुक्तोक्तेः आरोपिताभावस्य अधिष्ठानातिरिक्तत्वाभावात् 'स्थाणुः पुमान्,' 'अहं ब्रह्मास्मि' इत्यादेः उक्तरीत्या व्याख्यानमनुपपन्नं इत्यत आह—दृष्टान्तेत्यादि। बाधासामानाधिकरण्यानुरोधाय इत्यादिः।

3. तत्तादात्म्यमिति—अहमर्थसहितं इति शेषः।

4. स्थाणुतादात्म्येनेति—'स्थाणुना च' इति शेषः।

5. मुख्यतया—पदशक्यैकदेशभूतव्यक्तिरूपतया। औत्सर्गिकत्वात्—असत्यपवादे बोध्यत्वनियमात्। बाधायां सामानाधिकरण्यस्थले हि बाधबोधकनञादिपदाभावात् स्थाणुत्वाभाववति लक्षणायां शक्यार्थस्य कार्त्स्न्येन परित्यागात् जघन्यत्वं बाधारूपस्य वाक्यार्थस्य। अतादृशस्य अभेदरूपवाक्यार्थस्य मुख्यत्वम्। न चात्र स्थाणुपुरुषयोरिव अभेदानुपपत्तिः अपवादो वाच्यः। अहंपदलक्ष्याभेदस्य अनुपपत्त्यभावात्। न चैवं लक्षणातौल्यम्। तद्विरुद्धे लक्षणापेक्षया तदात्मके लक्षणायाः प्रथमोपस्थितिकत्वात्, लक्ष्यस्य शक्यैकदेशत्वाच्च इति भावः॥

यदि च विवरणाद्युक्तरीत्या इदमभेदे सामानाधिकरण्यम्, तदा जीववाचिनोऽहंशब्दस्य लक्षणया कूटस्थपरत्वं अस्तु। तस्यानध्यस्तस्य ब्रह्माभेदयोग्यत्वात्।

यस्तु मेघाकाशतुल्यो धीवासनाप्रतिबिम्ब ईश्वर उक्तः सोऽयं 'सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्' [मा. उ. ५] इति माण्डूक्यश्रुतिसिद्धसौषुप्तानन्दमयः। तत्रैव तदनन्तरम् 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्'

बाधाया अपि प्रकृते वाक्यार्थता वक्तुं शक्यत इति प्रौढिमाश्रित्य प्रवृत्त्युपपत्तेश्च 'अहं ब्रह्मास्मि' इत्यत्र अभेदो वाक्यार्थ इति स्थिते विनाशिजीवस्य अविनाशिब्रह्माभेदो न सम्भवतीति चोद्यं तदवस्थमेव, इत्यस्वरसादाह—**यदि चेति**।

'कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा' इति श्लोकसंगृहीतानां कूटस्थब्रह्मजीवेश्वराणां चतुर्णां मध्ये ब्रह्मचैतन्यं तावत् सत्यज्ञानादिवाक्येषु सुप्रसिद्धं इति तत्र वाक्यं प्रमाणत्वेन नोदाहृतम्। कूटस्थचैतन्ये 'अविनाशी वा' इति वाक्यं प्रमाणत्वेन दर्शितम्। उपाध्युत्पत्तिविनाशानुविधाय्युत्पत्तिविनाशवचनं अन्तःकरणगतचैतन्यप्रतिबिम्बरूपे जीवे प्रमाणमुक्तम्। परिशेषात् पूर्वोक्तेश्वरे प्रमाणं वक्तव्यम्, तदाह—**यस्त्विति**॥ तुशब्दोऽवधारणे। य ईश्वर उक्तः सोऽयं श्रुत्युक्तानन्दमय एव, नान्य इत्यर्थः।

सुषुप्तं स्थानं अस्येति सुषुप्तस्थानः। जागरणे हि विज्ञानशब्दितान्तःकरणतादात्म्याध्यासात् विज्ञानमयत्वमनोमयत्वकर्तृत्वादीनि रूपाणि सन्ति। तथा देहे 'स्थूलोऽहम्' इत्याद्यभेदाध्यासात् स्थूलत्वकृशत्वब्राह्मणत्वादीनि रूपाणि सन्ति। तथा चक्षुरादिषु 'काणोऽहम्', 'मूकोऽहम्' इत्यादिरूपादध्यासात् काणत्वमूकत्वादीनि रूपाणि सन्ति। एवमाकाशादिषु पदार्थेषु अध्याससिद्धानि 'आकाशमयो वायुमयः' [बृ. उ. ४-४-५] इत्यादिश्रुतिसंगृहीतान्यनन्तरूपाणि जीवस्य सन्ति। सुषुप्ते तु बुद्ध्याद्युपाधिलयेन सर्वप्रकारभ्रान्तिलयात् भ्रान्तिसिद्धानि सर्वाण्यपि रूपाणि लीयन्ते इत्यभिप्रेत्य एकीभूत इत्युक्तम्। तदुक्तं - 'विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराऽधुना। स लयेनैकतां प्राप्तो बहुतण्डुलपिष्टवत्॥ [पं. द. ११-६९] इति। पुरा-सुप्तात् पूर्वकाले लयेन - रूपाणां लयेन इत्यर्थः। प्रज्ञानं - चैतन्यम्। तच्च जाग्रदादौ वृत्तिभेदेन भेदरूपं शैथिल्यं प्राप्य स्थितम्, सुषुप्ते वृत्तीनां विलयात् पुनरेकत्वं प्राप्तं इत्यभिप्रेत्य प्रज्ञानघनत्वमुक्तम्। आनन्दोऽत्र बिम्बभूतो ब्रह्मानन्दो विवक्षितः। तस्य प्रतिबिम्बभूतो जीवः आनन्दमयः। स च स्वरूपभूतमानन्दं सुषुप्तिकाले अविद्यावृत्तिभिर्भुङ्क्ते इति आनन्दभुक्—इति श्रुत्यर्थः।

ननु—जाग्रत्स्वप्नयोः स्थूलावस्थान्तःकरणप्रतिबिम्बरूपो जीवो विज्ञानमयः, स्थूलान्तःकरणस्य विज्ञानशब्दवाच्यत्वात्। स एव विज्ञानमयो जीवः स्वापकाले सूक्ष्मरूपेणविलीनावस्थान्तःकरणोपाधिकस्सन् आनन्दमय इत्युच्यते। तथा च आनन्दमयस्य जीवत्वात् ईश्वरत्वमसिद्धं - इत्याशङ्क्य, सौषुप्तानन्दमयस्यैव ईश्वरत्वं वाक्यशेषो दर्शयति इत्याह —**तत्रैवेति**। माण्डूक्यश्रुतावेवेत्यर्थः। सर्वेश्वरत्वं सर्वजगदुत्पत्तिकर्तृत्वम्। योनिः—उपादानम्। आनन्दमयस्य सर्वोपादानत्वे हेतुमाह—**प्रभवेति**। हि—यस्मात् भूतानां प्रभवाप्ययौ—जन्मलयौ सौषुप्तादानन्दमयात् भवतः तस्मात् एष सर्वस्य योनिः इत्यर्थः। आनन्दमयस्य श्रुत्युक्त-

[मा. उ. ६] इति श्रुतेः। सर्ववस्तुविषयकसकलप्राणिधीवासनोपाधिकस्य तस्य सर्वज्ञत्वस्य तत एव सर्वकर्तृत्वादेरपि उपपत्तेश्च। न चास्मद्बुद्धिवासनोपहितस्य कस्यचित् सार्वज्ञ्यं नानुभूयत इति वाच्यम्। वासनानां परोक्षत्वेन तदुपहितस्यापि परोक्षत्वात् इति ॥

सर्वज्ञत्वे युक्तिमप्याह—**सर्ववस्त्विति**। एकैका धीः किञ्चित्किञ्चित् विषयीकरोतीति सर्वाभिर्धीभिर्मिलित्वा सर्वं जगत् विषयीक्रियते। एवं च सर्वबुद्धीनां सर्वविषयकत्वे सिद्धे सति सर्वबुद्धिसूक्ष्मावस्थारूपाणां सर्वबुद्धिवासनानामपि सर्वविषयकत्वं सिद्ध्यति। तथा च सर्वप्राणिबुद्धिवासनोपाधिकस्य आनन्दमयस्य सर्वज्ञत्वसिद्धिरित्यर्थः। ननु—धीवासनोपरक्ताज्ञानोपाधिक ईश्वर इति यदुक्तं तत्र किं प्रतिबिम्बेश्वरस्य अज्ञानमेवोपाधिः, किं वा वासनोपरक्ताज्ञानम्, अथवा सर्वाः धीवासनाः, उत प्रत्येकं वासना। नाद्यः—'धीवासनासु प्रतिबिम्बितं चैतन्यमीश्वरः' इत्युक्तिविरोधात्, अज्ञानमात्रस्य ईश्वरोपाधित्वे [1]धीवासनानुसरणवैफल्याच्च। न च अज्ञानोपाधिकस्यैव ईश्वरस्य सर्वज्ञत्वलाभार्थं सर्वविषयकधीवासनानुसरणं इति वाच्यम्। अज्ञानगतसत्त्वांशपरिणामरूपाभिस्सर्वविषयकवृत्तिभिरेव सर्वज्ञत्वोपपादनसम्भवेन तदर्थं धीवासनानामनपेक्षणात्। अत एव न द्वितीयः। अज्ञानमात्रस्य तदुपाधित्वसम्भवात् युगपत् सर्वप्राणिनां सुषुप्त्यसम्भवेन सर्वबुद्धिवासनानां यौगपद्यासम्भवाच्च न तासां अज्ञानविशेषणतया ईश्वरोपाधित्वसम्भवः। तासां यौगपद्यासम्भवादेव न तृतीयोऽपि कल्पस्सङ्गच्छते। सर्वासु धीवासनासु [2]व्यासक्ततया एकस्य ईश्वररूपप्रतिबिम्बस्यासम्भवाच्च। लोके [3]व्यासज्यवृत्तिप्रतिबिम्बादर्शनात्। तस्माच्चतुर्थः कल्पः परिशिष्यते। तत्रानुभवविरोधमाशङ्कते—**न चास्मदिति**। अस्माकं—प्राणिनां एकैकबुद्धिवासनोपहितस्य आनन्दमयस्य कस्यापि स्वापकाले 'अहं सर्वज्ञः' इत्यनुभवो नास्तीत्यर्थः। **वासनानामिति**। जाग्रदादौ स्थूलावस्थान्तःकरणानामिव सुषुप्तौ वासनात्मकान्तःकरणानां [4]साक्षिप्रत्यक्षयोग्यत्वाभावेन तदुपाधिकानन्दमयानामपि न अहमनुभवयोग्यत्वं इत्यर्थः।

माण्डूक्यश्रुत्युक्तानन्दमयस्य सकलधीवासनोपाधिकस्य उक्तरीत्या एकस्य असम्भवात् प्रत्येकमेव

---

1. धीवासनानुसरणम्—धीवासनानां ईश्वरोपाधित्वोक्तिः।

2. व्यासक्ततयेति। इत्थंभावे तृतीया। व्यासक्तत्वविशिष्टस्य - व्यासज्यवृत्तेः - अनेकवृत्तिधर्मावच्छिन्नपर्याप्तिकस्य इत्यर्थः।

3. व्यासज्ज्यवृत्तिप्रतिबिम्बादर्शनात्—प्रतिबिम्बस्य व्यासज्यवृत्तित्वादर्शनात्।

4. साक्षिप्रत्यक्षयोग्यत्वाभावेनेति। धर्माधर्मादिवत् वासनात्मकानां नित्यपरोक्षत्वेन प्रत्यक्षायोग्यत्वात् इत्यर्थः। एवञ्च तदुपाधिकानन्दमयानां प्रत्यक्षयोग्यतैव नास्ति। किञ्च स्थूलान्तःकरणभूताहङ्कारसत्तायाः सर्वत्र सविकल्पकव्यवहारे हेतुत्वस्य सिद्धान्तसिद्धत्वात् सुषुप्तौ तदभावात् 'अहं सर्वज्ञ' इति सविकल्पकप्रत्यक्षापत्तिर्न संभवति। सर्वज्ञत्वं वस्तुतः आनन्दमयनिष्ठमपि सौषुप्तसुखवत् न निर्विकल्पकसाक्षिप्रत्यक्षगोचरं भवति। सार्वज्ञ्याश्रयस्य आनन्दमयस्य नित्यपरोक्षत्वेन अनावृतसाक्षिसम्बन्धाभावात्। तेन 'सुखमहमस्वाप्सं' इतिवत् सुप्तोत्थितस्य 'अहं सर्वज्ञ आसम्' इति न स्मरणापत्तिः सर्वथाऽननुभूतत्वात् इत्याद्यत्र पक्षे ऊहनीयम् ॥

ब्रह्मानन्दे तु सुषुप्तिसंयोगात् माण्डूक्योक्त आनन्दमयो जीव इत्युक्तम्। यदा हि जाग्रदादिषु भोगप्रदस्य कर्मणः क्षये निद्रारूपेण विलीनमन्तःकरणं पुनर्भोगप्रदकर्मवशात् प्रबोधे घनीभवति, तदा तदुपाधिको जीवः विज्ञानमय इत्युच्यते। स एव पूर्वं सुषुप्तिसमये विलीनावस्थोपाधिकः सन् आनन्दमय इत्युच्यते। स एव माण्डूक्ये 'सुषुप्तस्थानः' इत्यादिना दर्शित[1] इति।

एवं सति तस्य सर्वेश्वरत्वादिवचनं कथं सङ्गच्छताम्।

इत्थं - सन्त्यधिदैवतमध्यात्मं च परमात्मनः सविशेषाणि त्रीणि त्रीणि रूपाणि। तत्र

धीवासनोपाधिक आनन्दमयो वाच्यः, स च जीव एव इत्याह - **ब्रह्मानन्दे त्विति**। चित्रदीपे श्रीविद्यारण्यगुरुभिः ईश्वरत्वेनोक्तानन्दमयस्य तैरेव ब्रह्मानन्दाख्यग्रन्थे जीवत्वोक्तिरूपविशेषार्थकः 'तु' शब्दः। सुषुप्तिसंयोगादित्युपलक्षणम्। वासनोपाधिकस्य ईश्वरत्वे जाग्रदादौ ईश्वराभावप्रसङ्गात् एकैकवासनोपाधिकस्य नानात्वेन ईश्वरनानात्वप्रसङ्गात् सकलवासनोपाधिकस्य कस्यचिदसम्भवाच्च इत्यपि द्रष्टव्यम्। [2]तत्रोक्तं प्रकारं दर्शयति **यदा हीति**। जाग्रदादिषु भोगप्रदं यत् कर्म तस्य क्षये सति इत्यर्थः। आदिपदं स्वप्नपरम्। बहुवचनं तु जाग्रत्स्वप्नव्यक्तिभेदापेक्षम्। **निद्रारूपेणेति**। [3]सुषुप्तिरूपेणेत्यर्थः। तदुक्तं पञ्चीकरणे - 'बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिः' इति।

आनन्दमयस्य जीवत्वे तस्य ईश्वरत्वप्रतिपादकवाक्यशेषविरोधं शङ्कते - **एवंसतीति**।

सौषुप्तजीवरूपानन्दमयस्य वस्तुत ईश्वरत्वाभावेऽपि ईश्वराभेदविवक्षया तस्य ईश्वरत्ववचनं सङ्गच्छत इति परिहरति - **इत्थमित्यादिना**। माण्डूक्यश्रुतौ जीवेश्वरयोः अभेदविवक्षां दर्शयितुं [4]पीठिकां करोति - **सन्तीति**। परमात्मनः अधिदैवतं सविशेषाणि त्रीणि रूपाणि सन्ति, तथा परमात्मनोऽध्यात्मं च सविशेषाणि त्रीणि रूपाणि सन्ति इति सम्बन्धः। परमात्मन इत्यस्य निर्विशेषचैतन्यस्य इत्यर्थः। अधिदैवतं इत्यस्य देवतात्मकानि इत्यर्थः। अध्यात्मं इत्यस्य च जीवात्मकानि इत्यर्थः।

---

1. दर्शित इति। इत्युक्तमिति पूर्वेण सम्बन्धः।
   'विलीनघृतवत्पश्चात्स्याद्विज्ञानमयो घनः।
   विलीनावस्थ आनन्दमयशब्देन कथ्यते ॥ [पं द. ११-६३]
   कर्म जन्मान्तरेऽभूद्यत्तद्योगाद्बुध्यते पुनः।
   इति कैवल्यशाखायां कर्मजो बोध ईरितः ॥ [पं द. ११-६३]
   'माण्डूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटम्' [पं द. ११-६७]

इत्यादिना उक्तं इत्यर्थः।

2. तत्रोक्तं प्रकारमिति – ब्रह्मानन्दोक्तं आनन्दमयस्य जीवत्वोपपादकमर्थजातं इत्यर्थः।
3. निद्रायाः स्वप्नसुषुप्त्योः साधारण्यात् अत्र विवक्षितमर्थमाह – सुषुप्तीति। विक्षेपसंस्कारविशिष्टाज्ञानेत्यर्थः।
4. पीठिकां - प्रकृतापेक्षितनिरूपणं।

अधिदैवतं त्रीणि शुद्धं चैतन्यं च इति चत्वारि रूपाणि चित्रपटदृष्टान्तेन चित्रदीपे समर्थितानि। यथा - स्वतश्शुभ्रः पटो धौतः, अन्नविलिप्तो घट्टितः, मष्याकारयुक्तो[1] लाञ्छितः, वर्णपूरितो रञ्जितः, इत्यवस्थाचतुष्टयं एकस्यैव चित्रपटस्य, तथा परमात्मा मायातत्कार्योपाधिरहितः शुद्धः, मायोपहित ईश्वरः, अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः, पञ्चीकृतभूत-

---

'अधिदैवतं, अध्यात्मं' इति च पदद्वयं अव्ययम्। उक्तं प्रपञ्चयति—**तत्रेति**। अध्यात्माधिदैवतरूपाणां मध्ये इत्यर्थः। जीवस्य त्रीणि सविशेषरूपाणि तुरीयपादात्मकं निर्विशेषरूपं च माण्डूक्यश्रुतौ कण्ठतो दर्शितानि। ईश्वरस्य तु निर्विशेषसविशेषरूपाणि तच्छ्रुत्यभिप्रेतान्यपि श्रुत्या कण्ठतो नोक्तानि, तानि तु श्रुतितात्पर्याभिज्ञैः श्रीविद्यारण्यगुरुभिः चित्रदीपे सदृष्टान्तं निरूपितानि इत्याह—**चित्रपटेति**। तत्रायं दृष्टान्तसङ्ग्राहकः श्लोकः—स्वतश्शुभ्रोऽत्र धौतःस्यात् घट्टितोऽन्नविलेपनात्। मष्याकारैर्लाञ्छितःस्याद्रञ्जितो वर्णपूरणात्॥' [पं.द.६-३] इति। एतच्छ्लोकसंगृहीतं दृष्टान्तं विवृणोति—**यथेति**। 'स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः। सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः॥' [पं. द. ६-४] इति श्लोकसंगृहीतं दार्ष्टान्तिकं दर्शयति—**तथेति**। श्लोके परः स्वतः चित् इति सम्बन्धः। अमुमंशं विवृणोति—**परमात्मेति**। श्लोके तुशब्दोऽवधारणे। तथा च पर एव मायावी सन् अन्तर्यामी इत्युच्यत इति सम्बन्धः। अमुमंशमाह—**मायोपहित ईश्वर इति**। श्लोके पर एव सूक्ष्मसृष्टितःसूत्रात्मा इति सम्बन्धः। अमुमंशं व्याचष्टे—**अपञ्चीकृतेति**। अपञ्चीकृतानां भूतानां यत् कार्यं [2]व्यापकं सूक्ष्मशरीरं तदुपहित इत्यर्थः। न च सूत्रात्मनो हिरण्यगर्भशब्दितस्य श्रुतिस्मृत्योर्जीवत्वप्रसिद्धेः कथं तस्य ईश्वररूपत्वमिति वाच्यम्। जीवरूपहिरण्यगर्भस्य समष्टिसूक्ष्मशरीराभिमानविशिष्टस्य सत्यलोकस्वामिनः ईश्वरान्यत्वाभ्युपगमात्। ईश्वरस्य तु समष्टिसूक्ष्मशरीराभिमानाभावेऽपि समष्टिसूक्ष्मशरीरनियन्तृतया तदुपाधिकस्य समष्टिसूक्ष्मोपाध्युपहितत्वगुणयोगेन हिरण्यगर्भसूत्रात्मपदाभ्यां निर्देशस्य विवक्षितत्वात्। तथा च [3]गौणं ईश्वरस्य हिरण्यगर्भत्वं इति भावः। अत एव चित्रदीपे [4]ईश्वररूपहिरण्यगर्भापेक्षया सत्यलोकाधिपतेर्ब्रह्मणःतत्त[5]द्वाद्यभिमतेश्वरपरिगणनावसरे पृथगुपादानं मन्तव्यम्। श्लोके एष एव परः [6]स्थूलसृष्ट्या विराडित्युच्यते इति सम्बन्धः।

---

1. मषीमयैः आकारैः युक्तः – मष्याकारयुक्तः

2. मूलस्थसमष्टिपदस्य छायाव्याख्यानं व्यापकमिति।

3. गौणं....हिरण्यगर्भत्वमिति—हिरण्यगर्भशब्दगौणार्थत्वमित्यर्थः।

4. ईश्वररूपहिरण्यगर्भेति। हिरण्यगर्भशब्दगौणार्थरूपेश्वरेत्यर्थः। 'ईश्वरापेक्षया' इत्येव पाठश्चेत् स साधुतरः।

5. 'ईशसूत्रविराड्वेधोविष्णुरुद्रेन्द्रवह्नयः..............ईश्वराः सर्व एवैते पूजिताः फलदायिनः।' इत्यस्मिन् [६-६-८] तत्तद्वाद्यभिमतानां इयत्तानिरूपणपरे पद्ये इत्यर्थः।

6. स्थूलसृष्ट्येति—सृष्टस्थूलप्रपञ्चेनोपाधिना इत्यर्थः।

कार्यसमष्टिस्थूलशरीरोपहितो विराट्पुरुषः, इत्यवस्थाचतुष्टयं एकस्यैव परमात्मनः। अस्मिन् [1]चित्रपटस्थानीये परमात्मनि चित्रस्थानीयः स्थावरजङ्गमात्मको निखिलप्रपञ्चः। यथा चित्रगतमनुष्याणां चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यन्ते, तथा परमात्माध्यस्तदेहिनां अधिष्ठानचैतन्यसदृशाश्चिदाभासाः कल्प्यन्ते, ते च जीवनामानः संसरन्ति—इति। अध्यात्मं तु विश्वतैजसप्राज्ञभेदेन त्रीणि रूपाणि। तत्र सुषुप्तौ विलीनेऽन्तःकरणे अज्ञानमात्रसाक्षी प्राज्ञः, योऽयमिहानन्दमय उक्तः।

अमुमंशं व्याकुर्वन् [2]संगृह्णाति—**पञ्चीकृतेति**। अयं ईश्वररूपो विराट्पुरुषः [3]पुरुषसूक्तवैश्वानरविद्यावाक्यादिरूपश्रुतिसिद्धो द्रष्टव्यः। सत्यलोकाधिपतेर्हिरण्यगर्भस्य पुत्ररूपो विराट्पुरुषः समष्टिस्थूलाभिमानिजीवो बृहदारण्यकश्रुतिसिद्धः अन्य एव इत्यपि द्रष्टव्यम्। **इत्यवस्थेति**। उक्तप्रकारेण वस्तुत एकस्यैव रूपचतुष्टयं द्रष्टव्यं इत्यर्थः। एवं प्रकृतोपयुक्तं रूपचतुष्टयं दर्शयित्वा प्रसङ्गादाह—**अस्मिन्निति**। ननु - कृत्स्नस्य जगतः चित्रस्थानीयत्वे तद्वदेव सर्वमचेतनं स्यात्, तथा च चेतनाचेतनविभागो न स्यात्, इति शङ्कां दृष्टान्तेन परिहरति—**यथेति**। **वस्त्राभासा इति**। वर्णविशेषात्मकवस्त्राणां चित्राधारेण वस्त्रेण आकृतिसाम्येऽपि शीतादिनिवर्तकत्वाभावात् आभासत्वम्। **देहिनामिति**। [4]स्थूलदेहवतां अहङ्काराणां इत्यर्थः। अन्तःकरणात्मकाहङ्कारेषु चैतन्यस्य प्रतिबिम्बकल्पनस्य प्रयोजनमाह—**ते चेति**। तथा च चिदाभासयुक्ताः कार्यकारणसङ्घाताश्चेतनाः, अन्ये गिरिसमुद्रादयोऽचेतनाः, इति विभागसिद्धिरिति भावः। एवमीश्वरस्य रूपाणि दर्शितानि। जीवस्य श्रुत्युक्तानि सविशेषनिर्विशेषरूपाणि दर्शयति—**अध्यात्मं त्विति**। तुशब्दः ईश्वरस्य सविशेषरूपाण्यपेक्ष्य जीवस्य सविशेषरूपाणां वैलक्षण्यसूचनार्थः। तदेव वैलक्षण्यं दर्शयति—**विश्वेति**। **रूपाणीति**। सविशेषाणीति शेषः[5]। **तत्रेति**। रूपत्रयमध्ये इत्यर्थः। **विलीन इति**। अन्तःकरणे विलीने सति [6]सूक्ष्मरूपेणविलीनान्तःकरणोपाधिकः संपद्यत इति भावः। स्थूलान्तःकरणादिसाक्षित्वव्यवच्छेदार्थं **मात्रेति**। ननु—पूर्वं सौषुप्तजीव आनन्दमय इत्युक्तं, इदानीं कथं स एव प्राज्ञ इत्युच्यते, तत्राह—**योऽयमिति**। **इहेति**। माण्डूक्यश्रुतावित्यर्थः। तत्रैव 'आनन्दभुक्' इत्यनन्तरं 'चेतोमुखः प्राज्ञस्तृतीयः पादः' इतिवाक्यशेषदर्शनात् इति भावः। चेतांसि - चित्प्रतिबिम्बोपेतान्यविद्यावृत्तिरूपाणि मुखानि - स्वापकाली-

---

1. चित्रपटेति। चित्राधारपटेत्यर्थः।

2. सङ्गृह्णातीति। उपक्रान्तं परस्य रूपचतुष्टयनिरूपणं उपसंहरति इतीति संक्षेपेण इत्यर्थः।

3. पुरुषसूक्तेत्यदि। पुरुषसूक्ते वैश्वानरविद्यावाक्यादिषु च स्थूलप्रपञ्चोपहितः पुरुष उक्तः। स च विराट्पुरुष एव। परमात्मप्रतिपादकत्वं च तेषां शास्त्रकृद्भिर्निर्णीतम्। तेन निश्चीयते ईश्वररूपोऽयं विराट्पुरुष इति।

4. स्थूलदेहवतामहङ्काराणामिति। बाह्याभ्यन्तरभावेन स्थूलदेहसंसृष्टानां तैत्तिरीयकोक्तरीत्या स्थूलदेहविधानां अन्तःकरणविशिष्टे स्थूलदेहाध्यासात् तदात्मकानां अन्तःकरणानामित्यर्थः।

5. अध्यात्ममपि तुरीयरूपसद्भावात् 'त्रीणि रूपाणि' इत्यस्य असङ्गतिमाशङ्क्य शेषं पूरयति—सविशेषाणीति शेष इति।

6. सूक्ष्मरूपेणविलीनान्तःकरणेति। स्वकारणतादात्म्यापन्नसूक्ष्मरूपान्तःकरणेत्यर्थः।

स्वप्ने व्यष्टिसूक्ष्मशरीराभिमानी तैजसः। जागरे व्यष्टिस्थूलशरीराभिमानी विश्वः। तत्र माण्डूक्यश्रुतिः अहमनुभवे प्रकाशमानस्यात्मनो विश्वतैजसप्राज्ञतुर्यावस्थाभेदरूपं पादचतुष्टयं 'सोऽयमात्मा चतुष्पात्' [मा. उ. २] इत्युपक्षिप्य [1]पूर्वपूर्वपादप्रविलापनेन निष्प्रपञ्चब्रह्मात्मकतुर्यपादप्रतिपत्ति-

---

नानन्दानुभवसाधनानि यस्य, स चेतोमुखः[2]। ननु सौषुप्तजीवस्य आनन्दभुक्त्वं चेतोमुखत्वं च श्रुतमपि [3]कथमुपपन्नमिति चेत्, उच्यते—सुषुप्तादुत्थितस्य हि 'सुखमस्वाप्सम्' इति स्वापकालीनविशिष्ट[4]सुखस्मरणं दृश्यते। तच्च तदा सुखानुभवमन्तरेण न सम्भवति। अननुभूतस्य सुखस्य स्मरणायोगात्। न च सुषुप्तौ आत्मस्वरूपसुखस्यान्तःकरणवृत्तिभिरेव अनुभवस्सम्भवतीति वाच्यम्। तदा विलीनस्यान्तःकरणस्य वृत्त्युत्पादनयोग्यत्वाभावात्। न च मुक्तिकाल इव स्वापकालेऽपि स्वरूपचैतन्येनैव सुखानुभवसम्भवात् किमविद्यावृत्तिप्रतिबिम्बरूपचेतःकल्पनयेति वाच्यम्। जाग्रत्स्वप्नयोः चैतन्यप्रतिबिम्बोपेतवृत्तिभिः आनन्दानुभवदर्शनेन सुषुप्तावपि तथा सम्भवे परित्यागायोगात्। मुक्तिकाले च [5]उपाधिमात्रविलयाभ्युपगमात् वृत्त्यसम्भव इति वैषम्यसत्त्वात्। सौषुप्तसुखानुभवस्य केवल[6]नित्यसाक्षिरूपत्वे अनुभवनाशरूपसंस्काराभावप्रसङ्गेन 'सुखमस्वाप्सं' इत्यनुसन्धानाभावापत्तेश्च। तस्माद्यथोक्तार्था श्रुतिः उपपन्नैव। **व्यष्टीति**। परिच्छिन्नेत्यर्थः। एते पादास्साक्षाच्छ्रुत्युक्ता इत्याह—**तत्रेति**। उक्तरीत्या पादकल्पनोपपत्तौ सत्यामित्यर्थः। श्रुतिः पादचतुष्टयमुपक्रम्य विश्वादिपादान् न्यरूपदिति सम्बन्धः। पद्यते - गम्यते - अवगम्यते ब्रह्मात्मैक्यं एभिरिति पादा विश्वादयः। इमां व्युत्पत्तिमभिप्रेत्य श्रौतपादकल्पनायाः प्रयोजनमाह—**पूर्वपूर्वेति**। अयमर्थः—'सोऽयमात्मा चतुष्पात्' इति वाक्येन जीवस्य पादचतुष्टयवत्त्वमुपक्रम्य 'जागरितस्थानो वैश्वानरः प्रथमः पादः' इत्युक्तम्। अत्र जीवपादानामेव वक्तुमुपक्रान्तत्वात् 'विश्वः प्रथमः पादः' इति वक्तव्ये वैश्वानरशब्दितस्य विराट्पुरुषरूपेश्वरस्य प्रथमपादत्वोक्तिः विश्वे वैश्वानरस्यान्तर्भावं[7] सूचयति। न च—हिरण्यगर्भेश्वरौ विहाय वैश्वानरस्यैव विश्वान्तर्भावे किं नियामकं श्रुत्यभिमतं इति वाच्यम्। तयोः स्थूलोपाधिक

---

1. पूर्वपूर्वपादप्रविलापनेनेति। तृतीयार्थस्य प्रयुक्तत्वस्य प्रतिपत्तिपदार्थेऽन्वयः

2. 'स्वप्नादिप्रतिबोधं चेतः प्रति द्वारीभूतत्वात् चेतोमुखः, बोधलक्षणं वा चेतः द्वारं मुखं अस्य स्वप्नाद्यागमनं प्रति इति चेतोमुखः'—इति द्वेधा भाष्ये व्याख्यातम्। अविरुद्धत्वात्तु प्रकारान्तरेण अत्र व्याख्यातं आनन्दभुक्त्वोपपादकतया चेतोमुखपदम्।

3. कथमुपपन्नमिति। उपपत्तिजिज्ञासया प्रश्नः, न त्वाक्षेपः, श्रुतिसिद्धे तदनवकाशात्।

4. विशिष्टेति—जाग्रत्स्वप्नावस्थाकालीनात् वैषयिकसुखात् विलक्षणेत्यर्थः। आत्मस्वरूपेति यावत्।

5. उपाधिमात्रेति। कृत्स्नोपाधीत्यर्थः।

6. नित्येति। नाशरूपसंस्कारानुत्पत्तिहेतुगर्भमिदं विशेषणम्।

7. अन्तर्भावमिति। अभेदविवक्षामित्यर्थः। तदुक्तं भाष्ये—'अतो युक्तमेवास्य आध्यात्मिकस्य पिण्डात्मनो द्युलोकाद्यङ्गत्वेन विराडात्मना आधिदैविकेन एकत्वमभिप्रेत्य सप्ताङ्गत्ववचनम्' इति। अनुपदमेव वक्ष्यति टीकायाम्—'एष सर्वेश्वरः' इत्यादेः आनन्दमयेश्वरयोरभेदविवक्षया—इति। सा च तैजसे सूत्रात्मनि तयोः एकत्वचिन्तनद्वारा एकदैव प्रविलापनसौकर्यार्थम्। अनेनैवाभिप्रायेण 'तुर्यपादप्रतिपत्तिसौकर्याय......... विराडादीन् विश्वादिषु अन्तर्भाव्य' इति मूले वक्ष्यति।

स्वरूपसाम्यस्य ईश्वरहिरण्यगर्भव्यावृत्तस्य नियामकतया विवक्षितत्वात्। तथा द्वितीयपादप्रतिपादकवाक्ये 'स्वप्नस्थानः....तैजसो द्वितीयः पादः' [मा. उ. ४] इत्युक्तम्। अत्र सूक्ष्मोपाधिकत्वसाम्येन हिरण्यगर्भस्य तैजसे अन्तर्भावो विवक्षितः[1]। 'वैश्वानरः प्रथमः पादः' [मा. उ. ३] इत्युपक्रमानुसारात्[2]। तथा तृतीयपाद-प्रतिपादकं 'सुषुप्तस्थान एकीभूतः' [मा. उ. ५] इत्यादिवाक्यं प्रागेवोदाहृतम्। अत्रापि तृतीयपादत्वेनोक्ते प्राज्ञशब्दितानन्दमये सूक्ष्मतरोपाधिकत्वसाम्येन ईश्वरस्यान्तर्भावो विवक्षितः। तथा च वाक्यशेषस्य 'एष सर्वेश्वरः' इत्यादेः आनन्दमयेश्वरयोः अभेदविवक्षया प्रवृत्तत्वात् नानुपपत्तिः[3]।

[4]तथा तुरीयपादप्रतिपादकमिदं वाक्यम्—'अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म-प्रत्ययसारं प्रपञ्चोपशमं [शान्तं] शिवमद्वैतं चतुर्थं मन्यन्ते' [मा. उ. ७] इति। अदृश्यं-चक्षुराद्यविषयम्, अव्यवहार्यं-प्रवृत्तिनिवृत्तिलक्षणव्यवहारागोचरम्, अग्राह्यं-कर्मेन्द्रियागोचरम्, अलक्षणम्-असाधारणधर्मशून्यम्, अचिन्त्यं - शुष्कतर्कागोचरम्, अव्यपदेश्यं-शब्दशक्त्यगोचरम्, एकात्मप्रत्ययसारं - एकादिपदचतुष्टयस्य कर्मधारयः। स्वगतभेदशून्यत्वमेकत्वं, सर्वदेहेषु पूर्णत्वमात्मत्वं, प्रत्ययत्वं चिद्रूपत्वं, सारत्वं आनन्दत्वं, 'सारः-आनन्द इत्यर्थः' इत्यानन्दमयाधिकरणभाष्यात्। प्रपञ्चोपशमं-प्रपञ्चाभावरूपं, कल्पितपदार्थाभावस्याधि-ष्ठानानतिरेकात्। यद्वा प्रपञ्चध्वंसरूपम्। ज्ञानसाध्यायाः सकारणद्वैतनिवृत्तेरधिष्ठानात्मकतायाः [5]वक्ष्यमाण-त्वात्। [शान्तं-अविक्रियम्]। शिवं - शुद्धं सर्वदोषरहितम्, अद्वैतं-द्वैतरहितं, चतुर्थं - विश्वतैजसप्राज्ञरूपपाद-त्रयापेक्षया चतुस्सङ्ख्यापूरकं पादं, मन्यन्ते-चिन्तयन्ति इति श्रुत्यर्थः।

अत्र विश्वतैजसप्राज्ञलक्षणपादेषु वैश्वानरहिरण्यगर्भेश्वराणामन्तर्भाववचनं तैः एतेषां एकत्वचिन्तनपरम्। तथा विश्वादिपादानामोङ्कारावयवभूतमात्राणां च एकत्वचिन्तनं अत्र विवक्षितम्। तथा च श्रुतिः—'पादा मात्रा मात्राश्च पादाः [मा.उ. ८] इति। तथा गौडपादीयवचनमपि—'ओङ्कारं पादशो विद्यात् पादा मात्रा न संशयः' [मा. का. १-२४] इति। 'न संशयः' इत्यस्यायमभिप्रायः—विश्वादिपादानां मात्राणां च यावत्संशयनिवृत्ति एकत्वं [6]चिन्तनीयं इति। मात्रास्वरूपं च श्रुत्यैव दर्शितम्—'अकार उकारो मकार इति' [मा. उ. ८] इति। एवं विश्वादिपादानां वैश्वानरादीनां मात्राणां च एकत्वचिन्तनं सर्वेषामेतेषां निष्प्रपञ्चब्रह्मात्मकतुर्यपादे चिन्मात्रे प्रवि

---

1. विवक्षित इति। तदुक्तं भाष्ये—'विराजा एकत्वमुपलक्षणार्थं हिरण्यगर्भाव्याकृतात्मनोः' इति।

2. उपक्रमानुसारादिति। उपक्रमानुसाराय—उपक्रमसमानार्थकत्वाय इत्यर्थः। फलमपि हेतुर्भवति इति पञ्चम्या उपपत्तिः।

3. नानुपपत्तिरिति। आनन्दमयस्य जीवत्वे तस्य ईश्वरत्वप्रतिपादकोक्तवाक्यविरोधो न इत्यर्थः।

4. 'तुर्यपादप्रतिपत्तिसौकर्याय ....विश्वादिपादान् न्यरूरुपत्' इति मूले उक्तम्। तत्र तुर्यपादस्वरूप-जिज्ञासायां तं प्रतिपादयन् प्रसङ्गात् तत्संबद्धं अर्थजातं वक्तुमुपक्रमते—तथेत्यादिना।

5. वक्ष्यमाणत्वादिति। प्रपञ्चध्वंसस्यापि ज्ञानसाध्यस्यापि पूर्वसिद्धाधिष्ठानस्वरूपत्वं वक्ष्यते इति भावः।

6. चिन्तनीयमिति। चिन्तनं आहार्यनिश्चयः। तेनापि संशयनिवृत्तिः। तर्कस्य परैरपि व्यभिचारसंशयनिवर्त-कत्वाङ्गीकारात्।

लापनार्थम्। तत्र चायं क्रमः—विश्ववैश्वानराकाराणामेकत्वं प्रथमं सञ्चिन्त्य पश्चात्तैजसहिरण्यगर्भोकाराणामेकत्वं चिन्तयेत्। तत ईश्वरप्राज्ञमकाराणामप्येकत्वं चिन्तयेत्। तथा चिन्ताक्रमेणैव प्रविलापयेत्। अकारादित्रयमुकारे, उकारादित्रयं मकारे, मकारादित्रयं चिन्मात्रे तुर्यपादे प्रविलापयेत्। चिन्मात्रे प्रविलाप्य च चित्तं तत्रैव स्थापयेत्। उकारादौ[1] प्रविलापनं नाम अकारादित्रयमुकारव्यतिरेकेण नास्ति इत्याद्याहार्यनिश्चयः। एवं प्रत्यहं उक्तप्रकारेण समाधिं[2] कुर्वतो ब्रह्मसाक्षात्कारो भवति, ततश्च ब्रह्मप्राप्त्या कृतकृत्यता, इति माण्डूक्यश्रुत्यभिप्रायः।

इदं सर्वं माण्डूक्यश्रुतेः संग्रहेण तात्पर्यकथनपरस्य भाष्यकृद्भिः कृतस्य पञ्चीकरणस्य व्याख्यानरूपे वार्तिके सुरेश्वराचार्यैरभिहितम् - 'अकारमात्रं[3] विश्वस्स्यादुकारस्तैजसस्स्मृतः। प्राज्ञो मकार इत्येवं परिपश्येत् क्रमेण तु' [पं. वा. ४७]॥ अत्र विश्वादिषु वैश्वानरादीनामन्तर्भावं सिद्धं कृत्वा न पृथगुपादानं कृतमिति मन्तव्यम्। 'समाधिकालात् प्रागेवं विचिन्त्यातिप्रयत्नतः। स्थूलसूक्ष्मक्रमात् सर्वं चिदात्मनि विलापयेत्' [पं. वा. ४८]। 'अकारं पुरुषं विश्वमुकारे प्रविलापयेत्' [पं. वा. ४९]। पुरुषोऽत्र वैश्वानरः। 'उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत्' [पं. वा. ४९]। अत्र समष्टिसूक्ष्मशरीरनियन्तृतया तदुपहितः परमेश्वरः सूक्ष्मशब्दार्थः। 'मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत्' [पं. वा. ४९]। अत्रान्तर्यामी मायामात्रोपाधिकः कारणशब्दार्थः। 'चिदात्माऽहं नित्यशुद्धबुद्धमुक्तसदद्वयः। परमानन्दसन्दोहवासुदेवोऽहमोमिति' [पं. वा. ५०-५१]। 'यतोऽहं चिदात्मा अवशेषितः अतोऽहं नित्यशुद्धादिरूपो वासुदेवः' इत्यर्थे अङ्गीकारार्थः ओङ्कारः इत्यर्थः। इतिशब्दश्चोत्तरश्लोकान्वयी। 'ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत्' [पं. वा. ५१] इति - उक्तप्रकारेण केवलं चिदात्मानं अवशिष्टं ज्ञात्वा विवेचकं - विलापकं चित्तं तत्साक्षिणि यथोक्ते वासुदेवे विलापयेत् - स्थापयेत् इत्यर्थः। चिदात्मनि विलीनं चेत् तच्चित्तं नैव चालयेत्। पूर्णबोधात्मनाऽऽसीत पूर्णाचलसमुद्रवत्' [पं. वा. ५२]। चिरकालं समाधिं कुर्यादिति वार्तिकार्थः। 'एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः। जितेन्द्रियो जितक्रोधः पश्येदात्मानमद्वयम्। आदिमध्यावसानेषु दुःखं सर्वमिदं यतः। तस्मात् सर्वं परित्यज्य तत्त्वनिष्ठो भवेत् सदा' [पं. वा. ५३-५४]। यतः तत्त्वनिष्ठाव्यतिरिक्तं पुरुषार्थसाधनत्वेन लोकशास्त्रसिद्धं सर्वं कालत्रयेऽपि दुःखाविनाभूतं, तस्मात् सर्वं विधिना सन्न्यस्य उक्तरीत्या तत्त्वनिष्ठां समाधिलक्षणां कुर्यात् इत्यर्थः। तदेवाह - 'इमां विद्यां प्रयत्नेन योगी सन्ध्यासु सर्वदा। समभ्यसेदिहामुत्रभोगानासक्तधीस्सुधीः' [पं. वा. ६४] इति। इमां - समाधिलक्षणां विद्यां सुधीः - आस्तिकतमः विरक्तो भूत्वा सन्ध्यासु उपक्रम्य सदा अभ्यसेदित्यर्थः। 'यः पश्येत् सर्वगं शान्तमानन्दात्मानमद्वयम्। न तेन किञ्चिदाप्तव्यं ज्ञातव्यं वाऽवशिष्यते' [पं. वा. ५५]। 'कृतकृत्यो

---

1. उकारादाविति। मकारः चिन्मात्रं च 'आदि' शब्दार्थः।
2. चिन्मात्रे चित्तस्थापनम्।
3. अकारमात्रमिति। अकार एव, नान्यः इत्यर्थः।

सौकर्याय स्थूलसूक्ष्मसूक्ष्मतरोपाधिसाम्यात् विराडादीन् विश्वादिष्वन्तर्भाव्य 'जागरितस्थानो बहिः प्रज्ञः' [मा. उ. ३] इत्यादिना विश्वादिपादान्नचरूरुपत् । अतः प्राज्ञशब्दिते आनन्दमये अव्याकृतस्येश्वरस्यान्तर्भावं विवक्षित्वा तस्य सर्वेश्वरत्वादितद्धर्मवचनमिति । इत्थमेव भगवत्पादैः गौडपादीयविवरणे व्याख्यातम् ।

भवेद्विद्वान् जीवन्मुक्तो भवेत् सदा' [पं. वा. ५६]। 'अविद्यातिमिरातीतं सर्वाभासविवर्जितम्। आनन्दममलं शुद्धं मनोवाचामगोचरम्' [पं. वा. ६१]। वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम्। प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते' [पं वा. ६२] इति । आभासपदं चिदाभासपरम् । वाच्याः विश्वादयः, वाचकाः अकारादयः, प्रकृतत्वात्। हेयं - दुःखम्। उपादेयं - विषयसुखं इत्यर्थः। तथा माण्डूक्यश्रुतौ समाधिनिष्ठाविवक्षामभिप्रेत्य गौडपादीयेऽप्युक्तम् - 'युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्। प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित्' [मा. का. १-२५] इति, इति संक्षेपः।

ननु श्रवणादिरूपेण साङ्ख्यमार्गेणैव तत्त्वप्रतिपत्तिसम्भवात् किं मुमुक्षोर्योगविधिना इत्यत आह - **प्रतिपत्तिसौकर्ययेति**। यस्य मुमुक्षोस्सन्न्यासिनः बुद्धिमान्द्याद्वा कौशलसत्त्वेऽपि न्यायव्युत्पादनकुशलाचार्याद्यभावाद्वा साङ्ख्यमार्गो न सम्भवति तस्य अनायासेन ब्रह्मतत्त्वप्रतिपत्तिसाधनतया बुद्धिपूर्वकप्रविलापनक्रमेण समाधिविधानं माण्डूक्यादौ उक्तम्। माण्डूक्यतापनीयपञ्चीकरणादौ विहितं ब्रह्मोपासनं प्रकृत्य ध्यानदीपे श्रीविद्यारण्यगुरुभिः अधिकारी दर्शितः 'अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाऽप्यसम्भवात्। यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम्' [पं. द. ९-५४] ॥ इति। **अव्याकृतस्येति।** अनभिव्यक्तजगद्वाचिना अव्याकृतपदेन लक्षणया परमेश्वरः तत्रतत्र व्यवहृत इति कृत्वा तेन तन्निर्देशः कृतः। माण्डूक्यश्रुत्युक्तानन्दमयस्य ईश्वरत्ववचनं तदभेदविवक्षया इत्येतत् माण्डूक्यश्रुतिव्याख्यानरूपस्य गौडपादीयस्य विवरणरूपे भाष्ये[1] भाष्यकारैरेवोक्तमित्याह - **इत्थमेवेति।**

---

1. इदमत्रानुसन्धेयम् - श्रीगौडपादाचार्यैः माण्डूक्योपनिषदं पठित्वा तद्व्याख्यानश्लोकावतारणं 'अत्रैते श्लोका भवन्ति' इति कृत्वा 'बहिष्प्रज्ञ' इत्यादिना उपनिषद्व्याख्यानं उपक्रान्तम्। ततश्च गौडपादीयो ग्रन्थः उपनिषदुपक्रमः कारिकात्मकः। इमं उपनिषद्व्याख्याग्रन्थं व्याचिख्यासवः श्रीमद्भाष्यकृतः यथामूलक्रमं गौडपादीयस्य आदिमं उपनिषद्भागं व्याख्याय कारिकाः व्याचख्युः। इदमेव भगवत्पादीयं माण्डूक्यभाष्यम्। स्पष्टञ्चेदमुक्तं श्रीआनन्दगिर्याचार्यैः माण्डूक्यभाष्यव्याख्यायाम्।

'अत्रैते श्लोका भवन्ति' इति गौडपादीयवाक्यात् पूर्वं 'अथ वार्तिककारोक्तं वाक्यम् 'अत्रैते.........' इति भाष्यवाक्यं क्वचित्पठितं दृश्यते। तदपि पूर्वोक्तार्थस्य उपबृंहणं भवति।

किञ्च - यदि भगवत्पादीयं भाष्यं साक्षाच्छ्रुतिव्याख्यानरूपं स्यात् तर्हि कात्स्न्र्येन श्रुतिव्याख्यानानन्तरमेव कारिकाव्याख्यानं भवेत्। न तु तथा दृश्यते। अतोऽपि निश्चीयते गौडपादीयस्य माण्डूक्यविवरणस्यैव भाष्यं भगवत्पादीयं माण्डूक्यभाष्यम्। एवञ्च गौडपादीयस्य विवरणे श्रुतेः व्याख्यातत्वोक्तिः सूपपन्ना - इति।

दृग्दृश्यविवेके तु - **चित्रदीपव्युत्पादितं कूटस्थं जीवकोटावन्तर्भाव्य चित्त्रैविध्यप्रक्रियैवावलम्बिता इति विशेषः। तत्र ह्युक्तम्**[1] **- जलाशयतरङ्गबुद्बुदन्यायेन उपर्युपरिकल्पनात् जीवः त्रिविधः- पारमार्थिको व्यावहारिकः प्रातिभासिकश्चेति। तत्र अवच्छिन्नः पारमार्थिको जीवः। तस्मिन्नवच्छेदकस्य कल्पितत्वेऽपि अवच्छेद्यस्य तस्य अकल्पितत्वेन ब्रह्मणोऽभिन्नत्वात्। तमावृत्य स्थितायां मायायां कल्पितेऽन्तःकरणे चिदाभासः अन्तःकरणतादात्म्यापत्त्या 'अहं' इत्यभिमन्यमानो व्यावहारिकः।**

श्रीविद्यारण्यगुरुभिश्चित्रदीपे स्वोक्तं चिच्चातुर्विध्यं विहाय ग्रन्थान्तरे 'जीव ईशो विशुद्धा चित्' इति वृद्धवचनसिद्धं चित्त्रैविध्यमेवावलम्ब्य जीवस्य त्रैविध्याख्यो विशेष उक्तः इत्याह - **दृग्दृश्यविवेके त्विति।** 'तु' शब्द उक्तविशेषार्थकः। कूटस्थस्य [2]जीवकोटावन्तर्भावमेव दर्शयति - **तत्रेति।** दृग्दृश्यविवेकाख्यग्रन्थे इत्यर्थः। 'हि'शब्दः प्रसिद्धिद्योतकः। **जलाशयतरङ्गेति।** यथा समुद्रादिजलाशये तरङ्गा उपरिभावेन तिष्ठन्ति, तेषु चोपरिभावेन बुद्बुदास्तिष्ठन्ति, [इदं प्रसिद्धमिति हिशब्दार्थः। न्यायः- दृष्टान्तः] एवं कूटस्थस्योपरि व्यावहारिकान्तःकरणप्रतिबिम्बरूपो यावद्व्यवहारमनुवर्तमानो व्यावहारिकजीवः कल्प्यते, तस्य चोपरिभावेन स्वप्नकाले वासनामयप्रातिभासिकरथादिवद्वासनामयान्तःकरणप्रतिबिम्बरूपः प्रातिभासिकजीवः कल्प्यते इत्यर्थः। **तत्रेति।** त्रिविधजीवमध्ये इत्यर्थः। **अवच्छिन्न इति।** देहद्वयावच्छिन्नकूटस्थचैतन्यरूप आत्मा पारमार्थिकजीव इत्यर्थः। 'अहं ब्रह्मास्मि' इति महावाक्येषु जीवब्रह्मणोरभेदः प्रतिपाद्यते। स च पारमार्थिकजीवकल्पने सति निर्वहति। अन्यथा व्यावहारिकप्रातिभासिकजीवयोश्शुक्तिरूप्यादिवत् स्वरूपतो मिथ्यात्वेन सत्यब्रह्माभेदायोगात्। देहद्वयावच्छिन्नकूटस्थरूपपारमार्थिकजीवस्य तु अवच्छेदकीभूतदेहद्वयस्य कल्पितत्वेऽपि स्वतस्सत्यत्वात् सम्भवति ब्रह्माभेदः - इति पारमार्थिकजीवकल्पनायाः प्रयोजनं दर्शयति-**तस्मिन्निति।** अवच्छिन्नजीव इत्यर्थः। व्यावहारिकजीवं निरूपयति—**तमिति।** [3]कूटस्थमात्मानमावृत्य अविद्यायां स्थितायां सत्यां कूटस्थात्मनि कल्पितं यदन्तःकरणं तत्र यश्चिदाभासः सः व्यावहारिकजीव इत्यर्थः। **तदुक्तं**—'कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः' [पं. द. ६-२३]। इति। **अहमित्यभिमन्यमान इति।** 'अहं' इत्येवमाकारकाभिमानकर्तेत्यर्थः। ननु अहमाकारवृत्तिरूपेण परिणममानेऽन्तःकरण एव अहमभिमानवत्त्वं युक्तं, न तु चित्प्रतिबिम्बस्य, अत आह—**अन्तःकरणेति।** तस्य व्यावहारिकत्वे युक्तिमाह—**तस्येति।** न च व्यावहारिकजीवे मानाभाव इति वाच्यम्। 'अहं कर्ता, भोक्ता' इत्यादिरूपाहमनुभवस्य तत्र मानत्वात्, [4]कर्तृत्वभोक्तृत्वाद्यात्मक-

---

1. माधुर्यद्रवशैत्यानि नीरधर्मास्तरङ्गके।
अनुगम्याथ तन्निष्ठे फेनेऽप्यनुगता यथा॥ [४३] इति पद्येनेत्यर्थः।

2. जीवकोटाविति। कोटिः रूपम्। अद्वितीयब्रह्मणः यद्रूपद्वयं जीवेश्वररूपं तत्र जीवरूपे इत्यर्थः। तदन्तर्भावो नाम तदात्मकत्वम्।

3. 'मायायां कल्पिते' इति अन्वयभ्रमं वारयितुं 'मायायां इति सति सप्तमी, कूटस्थात्मनि इति शेषः, तथा च मायायां सत्यां कूटस्थात्मनि कल्पिते' इत्यन्वयेन निष्पन्नं वाक्यार्थं आह—कूटस्थमात्मानमिति।

4. व्यावहारिकजीवे प्रत्यक्षप्रमाणमुक्तम्। अर्थापत्तिप्रमाणमाह—कर्तृत्वेति।

तस्य मायिकत्वेऽपि यावद्व्यवहारमनुवृत्तेः। स्वप्ने तमप्यावृत्य स्थितया मायावस्थाभेदरूपया निद्रया कल्पिते स्वाप्नदेहादौ अहमभिमानी प्रातिभासिकः। स्वाप्नप्रपञ्चेन सह तद्द्रष्टुर्जीवस्यापि प्रबोधे निवृत्तेः इति। एवं एते प्रतिबिम्बेश्वरवादिनां पक्षभेदा दर्शिताः।

बिम्बेश्वरपक्षनिरूपणम्

विवरणानुसारिणस्तु आहुः—**'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते' [वि. पु. ६-७-९६] इति स्मृत्या एकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनात् बिम्बप्रतिबिम्बभावेन जीवेश्वर-**

संसाराश्रयत्वस्य अन्यत्रायोगाच्च। न चान्तःकरणे तत्सम्भवः। तस्य चिदाभासशून्यस्य चेतनधर्मत्वेन-प्रसिद्धकर्तृत्वाद्याश्रयत्वायोगात्। चिदाभासस्य तु चेतनात्मप्रतिबिम्बतया[1] मिथ्याभूतस्यापि चेतनत्वव्यवहार-योग्यत्वेन तद्धर्माणां चेतनधर्मत्वप्रसिद्धिविरोधाभावात्। पारमार्थिकजीवस्य च[2] संसाराश्रयत्वं न सम्भवति, तस्य कूटस्थत्वात् इति भावः। **तमपीति**। व्यावहारिकजीवमपि[3] इत्यर्थः। व्यावहारिकजीवो हि जाग्रद्दशायां आत्मानं ब्राह्मणं देवदत्तनामानं यज्ञदत्तपुत्रं विष्णुभक्तं मन्यते। स्वाप्नजीवस्तु स्वप्नावस्थायां आत्मानं क्षत्रियं विष्णु-शर्मनामानं नारायणपुत्रं महादेवभक्तं मन्यते। अतो जाग्रज्जीवस्य आवरणं सिद्धम्। प्रातिभासिकजीव-कल्पकमाह—**निद्रयेति**। ननु मायायास्सर्वकल्पकत्वाभ्युपगमात् कथं निद्रायाः कल्पकत्वम्, अपसिद्धान्तापत्तेः- इत्याशङ्क्य निद्रायास्तदवस्थारूपत्वाभ्युपगमान्नोक्तदोष इत्याशयेनाह—**मायेति**। न च निद्रायाः मायालक्षणाभावात् कथं तदवस्थाविक्षेपरूपत्वमिति वाच्यम्। आवरणविक्षेपशक्तिमत्त्वं हि मायालक्षणम्। तस्य लक्षणस्य जाग्रज्जीवावारिकायां स्वाप्नजगदात्मकविक्षेपकारिण्यां च निद्रायां अक्षतत्वात् इति भावः। प्राति-भासिकजीवकल्पनायाः प्रयोजनमाह— **स्वाप्नदेहादाविति**। व्यावहारिकजीवस्यावृतत्वेन स्वप्नकाले अहमभिमा-नकर्तृत्वासम्भवात् इति भावः। तस्य प्रातिभासिकत्वे हेतुमाह—**स्वाप्नप्रपञ्चेनेति**। प्रबोधकाले 'ब्राह्मणोऽहं, न क्षत्रियः' इत्यादिरूपेण बोधेन स्वप्नद्रष्टुः क्षत्रियादिरूपस्य बाधानुभवात् इति भावः।

ईश्वरविषये उक्तवक्ष्यमाणप्रकारभेदज्ञानार्थमुपसंहरति—**एवमिति**।

बिम्बचैतन्यमेवेश्वरो न प्रतिबिम्बविशेषः इति वक्ष्यमाणविशेषार्थकः 'तु' शब्दः। विभेदजनकत्वं जीवेश्वरभेदस्थितिप्रयोजकत्वं विवक्षितं, न तु यथाश्रुतम्। तद्भेदस्यानादित्वाभ्युपगमात्। **आत्यन्तिकमिति**।

---

1. चेतनात्मप्रतिबिम्बतयेति। चिदाभासस्य मिथ्यात्वे अथाऽपि चेतनत्वव्यवहारयोग्यत्वे चेतनात्मप्रतिबिम्बत्वं हेतुः। प्रतिबिम्बत्वात् मिथ्यात्वं, चेतनात्मप्रतिबिम्बत्वात् चेतनत्वव्यवहारयोग्यत्वमिति भावः।

अत्र चिदात्मनः प्रतिबिम्बितत्वं श्रुतिमात्रसिद्धम्, श्रुतिश्च प्रतिबिम्बरूपस्य जीवस्य प्रमातृत्वादिचेतनधर्मान् अनुवदति, तेन प्रतिबिम्बस्य स्वातन्त्र्येण चेतनधर्मवत्त्वं लोके अदृष्टमपि न अप्रामाणिकं इति अनुसन्धेयम्। विवेचितं चैतत् आकरे।

2. चोऽवधारणार्थः। नैव सम्भवतीत्यर्थः।

3. पारमार्थिकजीवसमुच्चयार्थः 'अपि' शब्दः, आवृतत्वमात्रे समुच्चयः।

योर्विभागः, न उभयोरपि प्रतिबिम्बभावेन। उपाधिद्वयमन्तरेण उभयोः प्रतिबिम्बत्वायोगात्। तत्रापि प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वरः। तथासत्येव लौकिकबिम्बप्रतिबिम्बदृष्टान्तेन

स्वापप्रलयादौ अज्ञानकार्यनाशेन[1] तत्कारणाज्ञानस्यापि नाशोऽस्ति, परिणामपरिणामिनोरभेदात्। स चाज्ञाननाशो नात्यन्तिकः, पुनरुत्थानात्। मुक्तौ तु तत्त्वज्ञानेन स्वरूपेणापि नाशोऽस्ति, स च आत्यन्तिकः[2] पुनरुत्थानाभावात् इति मत्वा अज्ञाननाशस्य आत्यन्तिकत्वं विशेषणं दत्तम्। यद्वा जीवन्मुक्तिकाले अज्ञानस्य आवरणांशेन नाशेऽपि विक्षेपभावात् अनात्यन्तिकः स नाशः, विदेहमुक्तौ तु आत्यन्तिकोऽज्ञाननाशः, इति [3]तदभिप्रायं तद्विशेषणमिति भावः। **प्रतिबिम्बत्वायोगादिति**। न च 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुत्या उभयोः प्रतिबिम्बत्वप्रतिपादनविरोध इति वाच्यम्। प्रतिबिम्बत्ववत् बिम्बत्वस्यापि कल्पिततया श्रुतिगताभासपदेन प्रतिबिम्बवत् बिम्बस्यापि ग्रहणोपपत्तेः। ननु - लोके प्रतिबिम्बत्वविशिष्टमुखे मुखाभासत्वव्यवहारवत् बिम्बत्वविशिष्टमुखे तथाव्यवहाराभावात् आभासपदं मुख्यवृत्त्या बिम्बचैतन्यं प्रतिपादयितुं न शक्नोति इति खलु प्रतिबिम्बवत् बिम्बस्यापि विशिष्टरूपेण कल्पिततया कल्पितत्वगुणयोगेन [4]बिम्बपरं आभासपदं वक्तव्यम्। तच्च न सम्भवति। सकृदुच्चरितस्याभासपदस्य मुख्यवृत्त्या प्रतिबिम्बपरत्वं गुणवृत्त्या बिम्बपरत्वमिति कल्पनस्य [5]व्युत्पत्तिविरुद्धत्वात्। न च अजहल्लक्षणया आभासपदस्य बिम्बप्रतिबिम्बोभयपरत्वाभ्युपगमे नायं विरोध इति वाच्यम्। उभयोरपि प्रतिबिम्बरूपतामादाय आभासपदस्य मुख्यार्थपरत्वे सम्भवति लक्षणाकल्पनाया एव निर्मूलत्वादिति चेत्-उच्यते—यथाश्रुतं जीवेशयोरुभयोरपि प्रतिबिम्बरूपत्वं न सम्भवति। बिम्बभूतचैतन्यस्य सूर्यवत् एकत्वेन उपाधिभेदं विना प्रतिबिम्बद्वयासम्भवात्। न च 'माया चाविद्या च स्वयमेव भवति' इति वाक्यशेषेण मायाऽविद्यारूपोपाधिद्वयप्रतिपादनात् न प्रतिबिम्बद्वयानुपपत्तिरिति वाच्यम्। तेन स्वयंशब्दोपात्तायाः प्रकृतमूलप्रकृतेः मायात्वाविद्यात्वलक्षणरूपभेदप्रतिपादनेऽपि प्रतिबिम्बद्वयापेक्षितोपाधिद्वयाप्रतिपादनात्, मायाऽविद्ययोः स्वरूपतो भेदस्य सिद्धान्तविरुद्धत्वाच्च। तस्मात् यथाश्रुतासम्भवात् एकस्यैवाज्ञानस्य जीवेशविभागप्रयोजकत्वप्रतिपादकस्मृत्यनुरोधाच्च 'जीवेशावाभासेन करोति' इतिश्रुतौ आभासपदं अजहल्लक्षणया बिम्बप्रतिबिम्बोभयपरं इति विवरणानुसारिणामाशय इति। **तत्रापीति**। बिम्बप्रतिबिम्बयोरुभयोर्मध्येऽपीत्यर्थः। तत्र युक्तिमाह—**तथासत्येवेति**। बिम्बचैतन्यस्यैवेश्वर-

---

1. अज्ञानकार्यनाशेनेति। नाशान्वयी अभेदः प्रयुक्तत्वं ज्ञाप्यत्वं वा तृतीयार्थः।

2. अवस्थितिसामान्यविनाशः आत्यन्तिकविनाशः। अवस्थितिश्च द्वेधा—स्वरूपेण कार्यरूपेण चेति।

3. तदभिप्रायमिति। विदेहमुक्तस्य योऽज्ञाननाशः तद्बोधकमित्यर्थः। तथा च अस्मिन् कल्पे स्वीययावद्धर्मनाशविशिष्टः स्वनाशः आत्यन्तिकविनाशः।

4. बिम्बपरमिति। बिम्बबोधकमित्यर्थः।

5. व्युत्पत्तिविरुद्धत्वादिति। 'सकृदुच्चरितः शब्दः 'सकृदेव [एकया वृत्त्यैव] अर्थं गमयति' इति नियमविरुद्धत्वादित्यर्थः।

स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यं च जीवस्य युज्यते ।

'प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिविक्रियाः ।
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रियाः ॥

इति कल्पतरूक्तरीत्या 'लोकवत्तु लीलाकैवल्यम्' [ब्र. सू. २-१-३३] इति सूत्रमपि सङ्गच्छते । अज्ञानप्रतिबिम्बितस्य जीवस्य अन्तःकरणरूपोऽज्ञानपरिणामभेदः विशेषाभिव्यक्तिस्थानं सर्वतः

त्वाभ्युपगमे सतीत्यर्थः । **स्वातन्त्र्यमिति ।** 'एष सर्वेश्वर एष भूताधिपतिः' [बृ. उ. ४-४-२१] इत्यादिश्रुतिसिद्धमिति शेषः । **तत्पारतन्त्र्यमिति ।** 'एष ह्येव साधु कर्म कारयति' [कौ. उ. २-८] 'य आत्मानमन्तरो यमयति' [बृ. उ. (मा) ३-७] 'ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' इत्यादिश्रुतिस्मृतिसिद्धमिति शेषः । लौकिकदृष्टान्तमेव कल्पतरुश्लोकोदाहरणेन दर्शयति - **प्रतिबिम्बगता इति ।** यथा लोके कश्चित् पुरुषः स्वप्रतिबिम्बगताः ऋजुवक्रादिविक्रियाः बिम्बभूतस्वप्रयुक्ताः पश्यन् क्रीडति तथा ब्रह्मापि जीवस्थविक्रियाः प्राणिकर्मानुसारेण स्वप्रयुक्ताः पश्यन् क्रीडति इति योजना । कल्पतरूक्तरीत्या ईश्वरस्य स्वातन्त्र्य[1]प्रतिपत्त्युपयोगिन्या ईश्वरस्य स्वातन्त्र्यप्रतिपादकं सूत्रमपि सङ्गच्छते इत्यर्थः । सूत्रार्थस्तु - ईश्वरस्य आप्तकामत्वेन प्रयोजनो[2]द्देशाभावात् सृष्ट्यादिव्यापारेषु प्रवृत्तिर्न सम्भवति इतिपूर्वपक्षव्यावृत्त्यर्थः तुशब्दः । ईश्वरस्य सृष्ट्यादिप्रवृत्तिलक्षणक्रिया केवलं प्रयोजनोद्देशं विनैव लीला । लोकवत् । यथा लोके सार्वभौमादेः सर्वैर्मानुषैः भोगैः सम्पन्नतमस्य प्रयोजनाभिसन्धिं विनैव क्रीडा दृश्यते तद्वत् ईश्वरस्य प्रयोजनोद्देशाभावेऽपि स्वभावादेव सृष्ट्यादिप्रवृत्तिरुपपद्यते । दृश्यते हि [3]सुखोद्रेकानुभवप्रयुक्ता हासगानादिरूपा प्रयोजनोद्देशरहिता लीला प्राणिनां स्वाभाविकी । न हि तत्र प्रयोजनमपि[4] सम्भावयितुं शक्यते । दुःखोद्रेके रोदनवत् सुखोद्रेके हासगानादेः प्रयोजनरहितस्य सर्वानुभवसिद्धत्वात् । अत एव हसितरुदितादिषु कारणमेव पृच्छन्ति न प्रयोजनम् । उक्तं च [5]माण्डूक्यश्रुतौ - 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा' [मा. का. १-९] इति । एषः - सृष्ट्यादिव्यवहारः इत्यर्थः । किं च - स्वप्नसृष्टिवत् मायामयी प्रपञ्चसृष्टिः अस्माभिरुपेयते । न च तत्र प्रयोजनप्रश्नो न्याय्यः । स्वप्नसृष्टौ प्रयोजनप्रश्नादर्शनात् इति । ननु यद्यज्ञानं जीवस्योपाधिः, तर्हि व्यर्थमन्तःकरणस्य जीवोपाधित्ववर्णनं सूत्रभाष्यादिषु, तत्राह - **अज्ञानेति । विशेषाभिव्यक्तिस्थानमिति ।** अविद्याप्रतिबिम्बचैतन्यरूपस्य सुषुप्तिसाधार-

---

1. प्रतिपत्त्युपयोगिन्येति । सूत्रेण ईश्वरस्य स्वातन्त्र्यप्रतिपत्तौ कल्पतरूक्ता रीतिः उपयोगिनी इत्यर्थः ।
2. उद्देशः - इच्छा ।
3. सुखोद्रेकेति । सुखोद्रेकः - सुखोत्कर्षः । उत्कृष्टसुखमिति यावत् ।
4. सम्भावयितुं अपि इति संबन्धः ।
5. माण्डूक्यश्रुताविति । गौडपादीयग्रन्थस्य श्रुत्युपक्रमं प्रवृत्तत्वात् श्रुतित्वप्रसिद्ध्या गौडपादीयवाक्यं श्रुतिरिति अत्र व्यवहृतम् । केचित्तु आगमप्रकरणं कारिकासहितं श्रुतिरिति वदन्तः उक्तकारिकायाः श्रुतित्वमुपपादयन्ति । तत्तु 'वेदान्तार्थसारसंग्रहभूतं इदं प्रकरणचतुष्टयम्' इति भाष्यविरुद्धम् ।

प्रसृतस्य सवितृप्रकाशस्य दर्पण इव। अतः तस्य तदुपाधिकत्वव्यवहारोऽपि। न एतावता अज्ञानोपाधिपरित्यागः। अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः। न च - योगप्रभावात् योगिनोऽन्तःकरणं कायव्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति

णस्य[1] प्रमातृत्वकर्तृत्वभोक्तृत्वादिविशेषरूपेण या अभिव्यक्तिः-उपलब्धिः तस्याःस्थानं - उपाधिः इत्यर्थः। एतदुक्तं भवति - कर्तृत्वादिधर्माणां केवलाज्ञानपरिणामत्वाभावेन तदुपाधिमात्रात् न जीवस्य कर्तृत्वादिधर्मरूपविशेषलाभः, किं तु कर्तृत्वादिविशेषवदन्तःकरणतादात्म्याध्यासादेव तल्लाभः, इति न तदुपाधिकत्वनिरूपणं व्यर्थमिति। **अत इति।** अन्तःकरणस्य विशेषाभिव्यक्तिस्थानत्वाभ्युपगमात् इत्यर्थः। **व्यवहारोऽपीति।** 'कार्योपाधिरयं जीवः' इति श्रुतौ सूत्रभाष्यादिषु च इति शेषः। 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥' इति विष्णुपुराणवचने जीवस्य अज्ञानोपाधिकत्वव्यवहारवत् इति अपेः अर्थः। ननु 'कार्योपाधिरयं जीवः' इति श्रुतिबलादज्ञानोपाधिपरित्याग उचितः, कार्योपाधिकत्वविशेषणस्य कारणोपाधिकत्वव्यावर्तकत्वात्, इत्याशङ्क्य स्मृतिविरोधात् न तस्य कारणोपाधिव्यावर्तकत्वमुपेयत इत्याशयेनाह—**न एतावतेति।** श्रुतौ कार्योपाधिकत्वविशेषणमात्रेणेत्यर्थः। ननु - श्रुतिविरोधे स्मृतेरेव अन्यथानयनमुचितम्। तन्नयनप्रकारश्चेत्थम्—स्मृतौ अज्ञानपदं तत्कार्यान्तःकरणपरम्। जीवोपाध्यन्तःकरणस्य नानात्वेऽप्यज्ञाने इत्येकवचनं जात्यभिप्रायम्[2]। तथा च अन्तःकरणावच्छिन्न आत्मा जीवः, तदनवच्छिन्न आत्मा ईश्वरः इति जीवब्रह्मविभागप्रयोजकमन्तःकरणं इति स्मृत्यर्थो भविष्यति—इति इमामाशङ्कां निवर्तयितुं कार्योपाधिमात्रस्य जीवोपाधित्वं निराकरोति—**अन्तःकरणोपाधिपरिच्छिन्नस्यैवेति।** [3]नाज्ञानोपाधिकस्य इत्येवकारार्थः। **अनुपपत्तेरिति।** कायव्यूहाधिष्ठानं हि युगपदनेकशरीरनियन्तृत्वम्। तच्च योगिनो योगप्रभावात् निर्मितेषु सर्वशरीरेषु युगपदवस्थितस्य वक्तव्यम्। न चान्तःकरणावच्छिन्नचैतन्यरूपस्य योगिनस्तत् सम्भवति। तस्य परिच्छिन्नत्वात्। अज्ञानस्य जीवोपाधित्वे तु तत् सम्भवति। तस्य व्यापकत्वेन तदुपाधिकस्य योगिजीवस्य युगपत् सर्वशरीरेषु [4]सन्निधानोपपत्तेः। तथा च श्रुत्यपेक्षया स्मृतेर्दुर्बलत्वेऽपि [5]कायव्यूहाधिष्ठानानुपपत्तिसहितस्मृतेर्बलवत्त्वात् तदनुरोधेन 'कार्योपाधिरयं जीवः'

---

1. सुषुप्तिसाधारणस्य—प्रमातृत्वाद्यभिव्यक्तिशून्ये सुषुप्तिकालेऽपि विद्यमानस्य इत्यर्थः। तथा च अविद्यामात्रं यदि जीवोपाधिः तत्प्रयुक्तं च प्रमातृत्वादिकं तर्हि सुषुप्तावपि तत् प्रकाशेत इति भावः।

2. जात्यभिप्रायमिति। अन्तःकरणत्वरूपजातिगतैकत्वबोधतात्पर्येण उच्चरितं इत्यर्थः।

3. नाज्ञानोपाधिकस्येति। अज्ञानानुपाधिकस्येत्यर्थः।

4. सन्निधानम्—स्थितिः।

5. कायव्यूहाधिष्ठानानुपपत्तिसहितेति। उक्तानुपपत्तिरूपोपपत्तिसहितेत्यर्थः।

तदवच्छिन्नस्य कायव्यूहाधिष्ठानं युज्यते - इति वाच्यम्। 'प्रदीपवदावेशस्तथाहि दर्शयति' [ब्र. सू. ४-४-१५] इति शास्त्रोपान्त्याधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवत् भिन्नस्यैव योगप्रभावात् सृष्टेरुपवर्णनात्। प्रतिबिम्बे बिम्बात् भेदमात्रस्य अभ्य-

---

इति श्रुतौ कार्योपाधिपदं [1]स्वरूपकथनमात्रपरं न कारणोपाधिव्यावर्तकविशेषणपरं इति भावः। **वैपुल्यमिति**। व्यापकत्वमित्यर्थः। **अधिष्ठानमिति**। प्रेरणमित्यर्थः। **प्रदीपवदिति**। यथा एकस्य प्रदीपस्य अनेकवर्तिष्वावेशः, तथा योगिनो योगप्रभावात् अनेकेष्वेकदा आवेशः। यद्यपि प्रदीपस्य वर्त्याविष्टदीपानां च भेदोऽस्ति योगिनस्तु सर्वदेहेष्वैक्यं इति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमस्ति, तथापि दीपत्वजात्यभेदं व्यक्तिष्वारोप्य तयोस्सङ्गतिरवगन्तव्या। तथा हि दर्शयति श्रुतिः एकस्य योगिनोऽनेकधाभावम् - 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा' [छा. उ. ७-२६-२] इत्यादिका। न च योगिनो युगपदनेकशरीरेष्ववस्थानमन्तरेण श्रुतिसिद्धानेकधाभाव उपपद्यते इति सूत्रार्थः। **सृष्टेरुपवर्णनादिति**। तथा च एकस्यैवान्तःकरणस्य कायव्यूहाभिव्यक्तियोग्यवैपुल्याभ्युपगमे भाष्यादिविरोध इति भावः।

अत्र यद्यपि योगिनो निजसिद्धान्तःकरणमेव योगप्रभावात् वैपुल्यं प्राप्य स्वावच्छिन्नचैतन्यरूपस्य योगिनः कायव्यूहाधिष्ठानभोगादिकं घटयति इत्येव भाष्यादीनां तात्पर्यं वक्तुमुचितं, न तु यथाश्रुतनानान्तःकरणसर्गे। आगन्तुकानेकान्तःकरणसृष्ट्युपगमे असत्कार्यवादापातात् कल्पनागौरवाच्च, [3]हिरण्यगर्भादीनां योगप्रभावादेव अण्डव्यापिसमष्ट्यन्तःकरणाभ्युपगमाच्च। न हि हिरण्यगर्भादीनां[4] पूर्वजन्मनि यजमानावस्थायां तदीयान्तःकरणानां व्यापित्वे प्रमाणमस्ति। तथा सति अस्मदाद्यन्तःकरणानामपि व्यापित्वापत्तेः। भाष्यादिषु अन्तःकरणसृष्टिवर्णनस्य मतान्तराभिप्रायत्वोपपत्तेश्च। 'एषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया' इति भाष्य एव मतान्तरत्वोपदर्शनात्। योगशास्त्रेष्वेव च एषा प्रक्रिया इति एवकारान्वयोपपत्तेः। तथापि शास्त्रोपान्त्याधिकरणयथाश्रुतभाष्याद्यभिप्रायेण इदं दूषणमिति मन्तव्यम्।

वस्तुतस्तु 'अन्तःकरणावच्छिन्नचैतन्यं जीवः तदनवच्छिन्नमीश्वरः' इति पक्षे अण्डान्तर्गतचैतन्यस्य सर्वात्मना तदवच्छेदात् अनवच्छिन्नचैतन्यरूपेश्वरस्य अण्डात् बहिरेव सत्त्वं स्यात् इति वक्ष्यमाणे दूषणे तात्पर्यम्। यदि च अनवच्छिन्नचैतन्यमीश्वर इत्यनेन निरुपाधिकं चैतन्यमीश्वर इति विवक्षितं, तदा तस्य सर्वत्र सत्त्वेन

---

1. स्वरूपकथनमात्रपरमिति। कथनमत्र बोधः। तेन न परशब्दवैयर्थ्यम्। कार्योपाधिकत्वबोधमात्रपरं इत्यर्थः। कार्योपाधिकत्वं न व्यावर्तकविशेषणं अपि तु प्रमेयत्वादिवत् उपरञ्जकविशेषणं इति भावः।

2. आवेश इति। प्रवेश इत्यर्थः।

3. हिरण्यगर्भादीनामित्यादि। आदिशब्देन शुकप्रभृतयः गृह्यन्ते; योगशब्देन उपासनमपि गृह्यते; समष्टिः—व्यापकम्; संकुचितव्यापकत्ववारणार्थं अण्डव्यापीति।

4. हिरण्यगर्भादीनामिति यजमानावस्थायां इत्यत्र अन्वेति। तेन तदीयेत्यस्य न वैयर्थ्यम्।

स्तत्वेन स्वरूपेण तस्य सत्यत्वात् न प्रतिबिम्बरूपजीवस्य मुक्त्यन्वयासम्भवः इति न तदतिरेकेण मुक्त्यन्वयाय अवच्छिन्नरूपजीवान्तरं वा (प्रतिबिम्बजीवातिरिक्तं) जीवेश्वरविलक्षणं कूटस्थशब्दितं चैतन्यान्तरं वा कल्पनीयम्। 'अविनाशी वा अरेऽयमात्मा' इति [1]श्रवणं जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि स्वरूपं न विनश्यतीत्येतत्परं, न तदतिरिक्तकूटस्थनामकचैतन्यान्तर-

---

अण्डात् बहिरेव सत्त्वापत्तिदोषाभावेऽपि 'कारणोपाधिरीश्वरः' इति श्रुतिविरोधदोषो दुर्वारः। तस्मात् कारणोपाधिकत्वं ईश्वरवत् जीवस्याप्युपगन्तव्यं स्मृत्यनुसारात् इति स्थितम्।

यत्तु चित्रदीपे प्रतिबिम्बचैतन्यरूपजीवस्य स्वरूपतो मिथ्यात्वात् तस्य मुक्त्यन्वयायोग इति तदन्वययोग्यं कूटस्थनामकं जीवेश्वरविलक्षणं किञ्चित् चैतन्यं परिकल्प्य चिच्चातुर्विध्यं दर्शितं, यदपि च दृग्दृश्यविवेके प्रतिबिम्बमिथ्यात्वमेवाश्रित्य मुक्त्यन्वयाय अवच्छिन्नचैतन्यस्य पारमार्थिकजीवत्वं कल्पितं, तदुभयमप्ययुक्तम्, बिम्बप्रतिबिम्बयोर्भेदमात्रस्य कल्पिततया स्वतस्तयोर्भेदे मानाभावात्, इत्याशयेनाह—**प्रतिबिम्बे बिम्बादिति।** स्वरूपस्य कल्पितत्वव्यवच्छेदो [2]मात्रशब्दार्थः। **न तदतिरेकेणेति।** प्रतिबिम्बजीवातिरेकेण जीवान्तरं वा कूटस्थशब्दितं चैतन्यान्तरं वा न कल्पनीयं इति सम्बन्धः। एवं व्यावहारिकजीवातिरेकेण प्रातिभासिकजीवोऽपि न कल्पनीयः। प्रमाणाभावात्। न च व्यावहारिकजीवस्य स्वप्नकाले आवृतत्वेन तस्य तदा व्यवहर्तृत्वानुपपत्तिः तत्कल्पने प्रमाणमिति वाच्यम्। जीवचैतन्ये आवरणाभावस्य साक्षिनिरूपणावसरे वक्ष्यमाणत्वेन जाग्रज्जीवस्यैव स्वप्नेऽपि व्यवहारकर्तृत्वोपपत्तेः, 'योऽहं स्वप्ने श्रीकृष्णमद्राक्षं स एव इदानीं जाग्रत् पुनस्तं स्मरामि' इति जाग्रत्स्वप्नद्रष्ट्रोः अभेदप्रत्यभिज्ञानाच्च। संस्कारोद्बोधाभावादिकारणवशादेव कदाचित् ब्राह्मणत्वाद्यप्रतीत्युपपत्तेश्च। न च स्वप्नप्रपञ्चेन सह तद्द्रष्टुर्बाधदर्शनं प्रातिभासिकजीवकल्पने प्रमाणमिति वाच्यम्। प्रबोधकाले 'नाहं क्षत्रियः' इत्यादिरूपबाधकप्रत्ययस्य आत्मन्यारोपितक्षत्रियत्वादिमात्रबाधकत्वेन स्वप्नद्रष्टृबाधकत्वाभावात्। अन्यथा पूर्वोदाहृतद्रष्ट्रैक्यप्रत्यभिज्ञानविरोधात्। तस्मात् प्रातिभासिकजीवकल्पनमपि प्रामाणिकं न भवतीति बोध्यम्। यदपि चिच्चातुर्विध्यवादिभिरुक्तं - 'तान्येवानुविनश्यति' 'अविनाशी वा अरेऽयमात्मा' इति वाक्याभ्यां प्रकृते प्रज्ञानघनात्मनि विनाशित्वाविनाशित्वरूपविरुद्धधर्मद्वयप्रतिपादनात् तदुपपत्तये विनाशिप्रतिबिम्बव्यतिरेकेण विनाशरहितकूटस्थचैतन्यं सिद्ध्यतीति- तदपि मन्दम्, अविद्याप्रतिबिम्बचैतन्यरूपे जीव एव प्रतिबिम्बत्वरूपविशेषणांशनाशाभिप्रायेण विनाशवचनस्य विशेष्यचैतन्यांशाभिप्रायेण विनाशाभावप्रतिपादकवचनस्य च उपपत्तौ धर्मिभेदकल्पनस्य [3]गौरवपराहतत्वात्, इत्याशयेनाह- **अविनाशी वेति।** ननु - अविद्याप्रतिबिम्बो जीवः, तद्बिम्ब ईश्वरः, बिम्बप्रतिबिम्बानुगतं चैतन्यं शुद्धचैतन्यं,

---

1. श्रवणम्-श्रुतिवाक्यम्।

2. मात्रशब्दार्थः—अध्यस्तत्वपदसमभिव्याहृतमात्रशब्दलभ्योऽर्थः।

3. गौरवपराहतत्वादिति। 'एवं वा अरेऽयमात्मा' 'अविनाशी वा अरेऽयमात्मा' इति उभयत्र 'अयमात्मा' इति धर्म्यैक्यस्य प्रत्यभिज्ञानाच्च इत्यपि बोध्यम्।

परम्। जीवोपाधिना अन्तःकरणादिना अवच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव। 'यो विज्ञाने तिष्ठन्' [बृ. उ. ३-७-२२] इत्यादिश्रुत्या ईश्वरस्यैव जीवसन्निधानेन तदन्तर्यामिभावेन विकारान्तर-वस्थानश्रवणात् इति।

इति विवरणपक्षे देहद्वयोपादानतया तदवच्छिन्नस्य पारमार्थिकजीवनामकतया कूटस्थनामकतया च चिच्चातुर्विध्य-वादिभिरङ्गीकृतस्य चैतन्यस्य कुत्रान्तर्भाव उपेयते। न तावज्जीवे शुद्धचैतन्ये वा अन्तर्भावः सम्भवति। [1]तयोः उपादानत्वाभावेन देहद्वयोपादानकूटस्थस्य तयोः अन्तर्भावायोगात्। नापि बिम्बभूतेश्वरे तस्य अन्तर्भावः सम्भवति। ईश्वरस्य जीवतदुपाध्यन्तःकरणादि[2]सन्निहिततया देहादिविकारेषु अवस्थाने प्रमाणाभावात्, कूटस्थ-नामकचैतन्यस्य च कूटस्थवादिभिः तथात्वाङ्गीकारात् - इत्यत आह - **जीवोपाधिनेति।** अविद्याप्रतिबिम्बरूप-जीवस्य विशेषाभिव्यक्तिप्रयोजकोपाधिना इत्यर्थः। प्राणचक्षुरादिकमादिपदार्थः। **ईश्वर एवेति।** न शुद्धं ब्रह्म नापि प्रतिबिम्बरूपजीवः इत्येवकारार्थः। चेतनाचेतनात्मकनिखिलप्रपञ्चोपादानत्वप्रतिपादकश्रुतिस्मृति-सहस्रस्य बिम्बभूतेश्वरस्य देहाद्युपादानतया देहादिविकारेषु अन्तरवस्थाने प्रमाणत्वात् कूटस्थस्य च ततो भेदे मानाभावात् इति भावः। न केवलं उपादानत्वप्रतिपादकशास्त्रमेव तत्र प्रमाणं, किं तु चेतनाचेतनात्मक-सकलजगन्नियन्तृत्वप्रतिपादकमन्तर्यामिब्राह्मणमपि बिम्बभूतेश्वरस्य विकारेषु अन्तरवस्थाने प्रमाणं इत्याह - **यो विज्ञाने तिष्ठन्नित्यादिश्रुत्येति।** 'विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयति' [बृ. उ. ३-७-२२] इत्यादिवाक्यं आदिपदेन गृह्यते। अत्र विज्ञानपदं जीवपरम्। बृहदारण्यके [3]माध्यन्दिनपाठे 'य आत्मनि तिष्ठन्' इति पर्यायस्थाने काण्वपाठे 'यो विज्ञाने तिष्ठन्' इति पर्यायाम्नानदर्शनेन काण्वपाठे विज्ञानपदस्य आत्मपदसमानार्थकत्वावगमात्। आत्मपदं च अत्र जीवपरम्, तस्य तत्र रूढत्वात्, आत्म-पदस्य जीवेश्वरसाधारणत्वेऽपि नियम्यत्वलिङ्गेन प्रकृते जीवपरत्वावश्यम्भावात् इति भावः। **जीवसन्निधानेनेति।** ईश्वरस्य जीवादिनियन्तृत्वं हि व्यवहितराजादेः प्रजानियन्तृत्ववत् न भवति, किं तु नियम्यजीवादिसन्निधानेनैव। 'य आत्मनि तिष्ठन्' इति सन्निधानप्रतीतेः इत्यर्थः। अन्तर्यामिब्राह्मणवाक्यग्रहणं स्मृतेरप्युपलक्षणम्। तथा च भगवद्गीतास्मृतिः—'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥' [भ. गी. १८-६१] इति। भूतानि प्राणिनः, यन्त्रं शरीरं, तदारूढत्वं तत्र अहंममाभिमानवत्त्वम्। भ्रामयन्निति। कर्मानुसारेण प्रवर्तयन् निवर्तयंश्च इत्यर्थः। ईश्वरस्य नियन्तृत्वं मायोपाधिकमेव न वास्तवं इत्याशयेन मायया इत्युक्तम्।

---

1. तयोरिति। विवरणपक्षे इत्यादिः।

2. सन्निहिततया अवस्थाने इति संबन्धः। उपादानतया अन्तरवस्थाने इत्यर्थः।

3. माध्यन्दिनपाठे इत्यादि। माध्यन्दिनपठितो यः पर्यायः तत्स्थाने। पर्यायः—क्रमः। लक्षणया क्रमि-केत्यर्थः। तादृशस्य आत्मपदघटितस्य आनुपूर्वीविशेषस्य स्थाने—आम्नानप्रसक्तौ इत्यर्थः। काण्वपाठे आम्नानेति सम्बन्धः।

अवच्छेदपक्षनिरूपणम्

अन्ये तु - **रूपानुपहितप्रतिबिम्बो न युक्तः, सुतरां नीरूपे ।**

गगनप्रतिबिम्बोदाहरणमप्ययुक्तम् । गगनाभोगव्यापिनि सवितृकिरणमण्डले सलिलप्रतिबिम्बिते गगनप्रतिबिम्बत्वव्यवहारस्य भ्रममात्रमूलकत्वात् ।

एवं चैतन्यस्य प्रतिबिम्बमुपगच्छतां मतभेदेन जीवेश्वरविभागो दर्शितः । इदानीं तमनभ्युपगन्तॄणां मतेन जीवादिस्वरूपं दर्शयितुं चैतन्यस्य प्रतिबिम्बं निराकरोति—**अन्ये त्विति । रूपानुपहितेति ।** लोके रूपवत एव चन्द्रादेः प्रतिबिम्बो दृश्यते न रूपरहितस्य वाय्वादेः इति व्याप्तिदर्शनात् नीरूपचैतन्यस्य प्रतिबिम्बासम्भव इत्यर्थः । इतश्च चैतन्यस्य न प्रतिबिम्बसम्भव इत्याह—**सुतरां नीरूपे इति ।** अविद्यान्तःकरणादौ इति शेषः । रूपवत एव द्रव्यस्य प्रतिबिम्ब इति नियमस्य वक्ष्यमाणरीत्या गगने व्यभिचारसत्त्वेऽपि रूपवत्येवोपाधौ प्रतिबिम्ब इति नियमस्य न क्वचिदपि व्यभिचार इति मत्वा सुतरां इत्युक्तम् ।

ननु नीरूपगगनस्य कूपजलतटाकादौ प्रतिबिम्बानुभवात् नीरूपद्रव्यस्य प्रतिबिम्बाभाव इति नियमो नास्ति इत्याशङ्क्याह—**गगनेति ।** कूपजलादौ तावत् आलोकप्रतिबिम्बः सम्प्रतिपन्नः । तस्मिन् गगनप्रतिबिम्बत्वभ्रमो लोकानां इति कल्प्यते । न तु वस्तुतः तत्र गगनप्रतिबिम्बोऽस्ति । उक्तनियमविरोधात् । भ्रमप्रयोजकदोषमाह—**गगनाभोगव्यापिनीति ।** आभोगो विस्तारः । गगनोपरिभागे व्याप्य वर्तमानस्य सवितृकिरणमण्डलादेः जले प्रतिबिम्बदर्शनात् तदनुगतगगनस्य जले प्रतिबिम्बभ्रम इत्यर्थः ।

ननु - यथा बहिः 'नीलं नभः, विशालं नभः' इत्यादिरूपेण गगनमनुभूयते, एवं कूपतटाकादिजलेऽपि 'नीलं नभः, विशालं नभः' इत्यादिरूपोऽनुभवः सर्वसम्प्रतिपन्नः । न च कूपजलादौ प्रतीयमानवैशाल्यादियुक्तं नभो वस्तुतोऽस्ति । अतः प्रतिबिम्बरूपमेव तत्र दृश्यमानं नभ इति वक्तव्यम् । ततश्च कथं गगनप्रतिबिम्बापलापः क्रियते । न च नीरूपस्य प्रतिबिम्बासम्भव इति वाच्यम् । रूपसङ्ख्यापरिमाणादेर्नीरूपस्यापि प्रतिबिम्बदर्शनात् । न च द्रव्यत्वमपि विशेषणं विवक्षितं इति वाच्यम् । सिद्धान्ते द्रव्यगुणादिपरिभाषाया अनभ्युपगमात् । तदभ्युपगमेऽपि गगनप्रतिबिम्बानुभवानुरोधेन 'रूपोपहितद्रव्यस्य प्रतिबिम्बः तदुपहितत्वं च वस्तुतस्स्वगतरूपेण स्वस्मिन्नारोपितरूपेण वा' इति नियमकल्पनोपपत्तेश्च । तथा च [1]बहिरारोपितनैल्यादिविशिष्टगगनस्य जलादौ प्रतिबिम्बाभ्युपगमे न किञ्चित् बाधकम् । न च जलादौ संप्रतिपन्नालोकप्रतिबिम्बातिरिक्तगगनप्रतिबिम्बाभ्युपगमे गौरवमेव बाधकं इति वाच्यम् । आलोकप्रतिबिम्बे गगनप्रतिबिम्बत्वभ्रमाभ्युपगमेऽपि तद्भ्रमविषयस्य आलोकप्रतिबिम्बाधिकरणकस्य शुक्तिरूप्यादिवदनिर्वचनीयस्य गगनप्रतिबिम्बत्वस्याभ्युपगन्तव्यत्वेन तुल्यत्वात्, अनुभवानुसारिगौरवस्य अदोषत्वाच्च । तस्मात् रूपवत एव द्रव्यस्य प्रतिबिम्ब इति नियमस्य गगनप्रतिबिम्बस्थले व्यभिचारो दुर्वार इति चेत् —

---

1. बहिरारोपितेति । उपाधिरूपजलापेक्षया बाह्यदेशावच्छेदेन गगने आरोपितेत्यर्थः ।

ध्वनौ वर्णप्रतिबिम्बवादोऽप्ययुक्तः। व्यञ्जकतयासन्निधानमात्रेण ध्वनिधर्माणामुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तेः ध्वनेर्वर्णप्रतिबिम्बग्राहित्वकल्पनाया निष्प्रमाणकत्वात्।

प्रतिध्वनिरपि न पूर्वशब्दप्रतिबिम्बः। पञ्चीकरणप्रक्रियया पटहपयोनिधिप्रभृतिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्वनेरेवाकाशशब्दत्वेन तस्य अन्यशब्दप्रतिबिम्बत्वायोगात्।

वर्णरूपप्रतिशब्दोऽपि न पूर्ववर्णप्रतिबिम्बः। वर्णाभिव्यञ्जकध्वनिनिमित्तकप्रतिध्वनेः मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेनोपपत्तेः। तस्मात् घटाकाशवत् अन्तःकरणावच्छिन्नं चैतन्यं जीवः, तदनवच्छिन्नं ईश्वरः।

सत्यम्। तथापि चैतन्यस्य प्रतिबिम्बो न सम्भवति, नीरूपान्तःकरणादेः प्रतिबिम्बोपाधित्वासम्भवात्, इत्यत्रैव तात्पर्यम्।

ननु-नीरूपेऽपि ध्वनौ [1]नीरूपद्रव्यात्मकवर्णानां प्रतिबिम्बोऽस्तीति वक्तव्यम्। तथासत्येव दर्पणश्यामताया दर्पणगतप्रतिबिम्बद्वारेण बिम्बमुख इव ध्वनिगतानां तारत्वादीनां ध्वनिगतवर्णप्रतिबिम्बद्वारा वर्णेष्वारोपस्सम्भवति, नान्यथा। एवं नीरूपान्तःकरणादौ नीरूपात्मनः प्रतिबिम्बसम्भवः - इत्याशङ्क्य दृष्टान्तं विघटयति- **ध्वनाविति**।

ननु-पटहाख्यवाद्यविशेषादिशब्दोत्पत्तिकाले पाषाणविशेषादिसन्निहिताकाशप्रदेशेषु प्रतिध्वनिः श्रूयते। स पूर्वशब्दप्रतिबिम्ब एव, न मुख्यध्वनिः। [2]तदुत्पत्तौ कारणाभावात्। तथा च यथा नीरूपाकाशप्रदेशेषु नीरूपध्वनेः प्रतिध्वनिरूपः प्रतिबिम्बः तथा प्रकृते किं न स्यादिति - नेत्याह—**प्रतिध्वनिरपीति**। न च प्रतिध्वनेः उत्पादकाभावः शङ्कनीयः। आकाशस्यैवोपादानस्य सत्त्वात्, पूर्वशब्दस्य निमित्तकारणस्य सत्त्वाच्च। न च प्रतिध्वनेः प्रतिबिम्बत्वेऽप्याकाशगुणत्वं किं न स्यात् इति वाच्यम्। बिम्बप्रतिबिम्बयोर्भेदपक्षे प्रतिध्वनिरूपप्रतिबिम्बस्य प्रातिभासिकत्वेन व्यावहारिकगुणत्वानुपपत्तेः, तदभेदपक्षे बिम्बभूतपृथिव्यादिशब्दापेक्षया प्रतिध्वनिरूपप्रतिबिम्बस्य भेदाभावेन तस्य आकाशगुणत्वानुपपत्तेः इति भावः।

ननु वर्णरूपप्रतिशब्दस्य वर्णप्रतिबिम्बत्वमवश्यं वाच्यं, न तु [3]साक्षाद्वर्णरूपत्वम्। प्रतिवर्णाभिव्यक्तिस्थले वर्णव्यञ्जककण्ठताल्वादेरभावात्। तथा च यथा तत्र पर्वतगुहादिसन्निहितेषु नीरूपेष्वाकाशप्रदेशेषु नीरूपाणां वर्णानां प्रतिबिम्बः तथा प्रकृते किं न स्यादिति - नेत्याह—**वर्णरूपप्रतिशब्दोऽपीति**। प्रतिध्वनिवत् इत्यपिशब्दार्थः। कण्ठताल्वादिस्थलेऽपि न कण्ठादेर्वर्णव्यञ्जकत्वं, किं तु कण्ठाद्यभिघातजन्यध्वनेः। तथा च यथा

---

1. उक्तनिष्कर्षानुसारे नीरूपद्रव्यात्मकेति वस्तुस्थितिकथनमात्रम्। 'नीरूपे नीरूपद्रव्यस्य न प्रतिबिम्बः' इति यथाश्रुतनियमानुसारे व्यभिचारोपपादकत्वेन सार्थकं।

2. तदुत्पत्तौ कारणाभावादिति। मुख्यध्वन्युत्पत्तौ संप्रतिपन्नकारणस्य पटहान्तरादेः अभावात् इत्यर्थः।

3. साक्षाद्वर्णरूपत्वमिति। मुख्यवर्णरूपत्वमित्यर्थः।

न चैवं - अण्डान्तर्वर्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिः सर्वात्मना जीवभावेनावच्छेदात् तदवच्छेदरहितचैतन्यरूपस्य ईश्वरस्य अण्डात् बहिरेव सत्त्वं स्यात् इति 'यो विज्ञाने तिष्ठन्' इत्यादौ अन्तर्यामिभावेन विकारान्तरवस्थानश्रवणं विरुध्येत। प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनात् एकत्र द्विगुणीकृत्य वृत्तिरुपपद्यते - इति वाच्यम्। यतः प्रतिबिम्बपक्षेऽपि उपाधौ अनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यः न तु जलचन्द्रन्यायेन कृत्स्नप्रतिबिम्बः। तदन्तर्गतभागस्य तत्र प्रतिबिम्बासम्भवात्। न हि मेघावच्छिन्नस्य अकाशस्यालोकस्य वा जले प्रतिबिम्बवत् जलान्तर्गतस्यापि तत्र प्रतिबिम्बो दृश्यते। न वा मुखादीनां बहिःस्थितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबिम्बोऽस्ति। अतो जलप्रतिबिम्बं प्रति मेघाकाशादेरिव अन्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदनन्तर्गतस्यैव बिम्बत्वं स्यात् इति बिम्बभूतस्य विकारान्तरवस्थानायोगात् ईश्वरे अन्तर्यामिब्राह्मणसामञ्जस्याभावस्तुल्यः।

मूलध्वनिर्वर्णव्यञ्जकः एवं प्रतिवर्णाभिव्यक्तिस्थले उत्पन्नः प्रतिध्वनिरेव तत्र वर्णानां व्यञ्जकः सम्भवतीति न प्रतिवर्णानां प्रतिबिम्बरूपत्वमभ्युपगन्तव्यमित्यर्थः।

चैतन्यप्रतिबिम्बनिराकरणमुपसंहरति - **तस्मादिति**। चैतन्यप्रतिबिम्बासम्भवादित्यर्थः।

अन्तःकरणानवच्छिन्नचैतन्यस्येश्वरत्वे अन्तःकरणादिषु सर्वविकारेषु परमेश्वरस्यान्तर्यामिभावेनावस्थानप्रतिपादकश्रुतिविरोधं शङ्कते - **न चैवमिति**। **विरुध्येतेति**। तथा च श्रुतिविरोधपरिहाराय प्रतिबिम्बपक्ष एव स्वीकर्तव्य इति भावः। प्रतिबिम्बपक्षाश्रयणेऽपि श्रुतिविरोधमाशङ्क्याह—**प्रतिबिम्बपक्षे त्विति**। तुशब्दसूचितं विशेषमेव दर्शयति - **जलगतेति**। **द्विगुणीकृत्येति**। प्रतिबिम्बरूपजीवभावेन तत्तदुपाध्यन्तर्यामिभावेन च इत्यर्थः। प्रतिबिम्बपक्षेऽपि अन्तर्यामिब्राह्मणविरोधो दुष्परिहर इत्याह - **यत इति**। यत ईश्वरेऽन्तर्यामिब्राह्मणाञ्जस्याभावस्तुल्यः अतो न च वाच्यमिति सम्बन्धः। **तत्रेति**। अन्तःकरणादावित्यर्थः। ननु - यथा जले कृत्स्नस्य चन्द्रमण्डलस्य प्रतिबिम्बः, तथा कृत्स्नस्यैव चैतन्यस्य अन्तःकरणादौ प्रतिबिम्बोऽस्तु, न तु उपाध्यनन्तर्गतचैतन्यभागस्य अण्डाद्बहिर्भूतस्य। तथा च बिम्बभूतेश्वरस्य अण्डान्तरपि सत्त्वात् न अन्तर्यामिब्राह्मणविरोधतौल्यमिति - नेत्याह - **न त्विति**। असम्भवमेव दर्शयति - **न हीति**। **आलोकस्य वेति**। बहिस्स्थितस्येति शेषः। **जलान्तर्गतस्यापीति**। आकाशादेरित्यनुषङ्गः। **तत्रेति**। जलादावित्यर्थः। उदाहरणान्तरमाह - **न वेति**। ततः किं - तत्राह - **अत इति**। उपाध्यन्तर्गतभागस्य तत्र प्रतिबिम्बासम्भवादित्यर्थः। **तदनन्तर्गतस्यैवेति**। चैतन्यस्येति शेषः। दृष्टानुरोधित्वात् कल्पनायाः इति भावः। **विकारान्तरिति**। अण्डान्तर्गतचैतन्यभागस्य उपाध्यन्तर्गतत्वात् तद्बहिस्स्थितस्यैव चैतन्यस्य बिम्बत्वं वाच्यमिति बिम्बभूतेश्वरोऽप्यण्डात् बहिरेव स्यात् इत्यर्थः।

यदि च प्रतिबिम्बपक्षे ईश्वरस्य सर्वान्तर्यामित्वप्रतिपादकश्रुत्याद्यनुसारेण लोकदृष्टिमनादृत्य[1] कृत्स्नचैतन्यप्रतिबिम्बमुपेत्य अन्तर्यामिब्राह्मणाञ्जस्यमुपपाद्यते, तदा अनवच्छिन्नचैतन्यमीश्वर इति पक्षेऽपि 'अन्तःकरणाभावावच्छिन्नचैतन्यमीश्वर इति विवक्षितम्, अन्तःकरणस्य कल्पितत्वेन चैतन्ये अन्तःकरणाद्यवच्छेदेनाप्यन्तःकरणाभावस्य वास्तवस्य सत्त्वेन तदवच्छिन्नचैतन्यरूपेश्वरस्य सर्वविकारान्तरवस्थानसम्भवात् तत्प्रतिपादकब्राह्मणाञ्जस्यं तुल्यम्' इति समाधानं बोध्यम्। अभावस्यापीश्वरोपाधित्वमुक्तं तृप्तिदीपे—

'अन्तःकरणसाहित्यराहित्याभ्यां विशिष्यते।
उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा।
यथा विधिरुपाधिस्स्यात् प्रतिषेधस्तथा न किम्।
सुवर्णलोहभेदेन शृङ्खलात्वं न भिद्यते।
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च।
वेदान्तानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितम्॥ (पं.द.७-८५-८७) इति।

श्लोकानामयमर्थः—जीवत्वब्रह्मत्वयोरुपाधिः अन्तःकरणसाहित्यराहित्याभ्यां विशिष्यते - भिद्यते। तत्साहित्यं जीवत्वोपाधिः, तद्राहित्यं ब्रह्मताया उपाधिः, इति जीवेश्वरोपाधिभेद इत्यर्थः। नान्यथा - न प्रकारान्तरेण जीवभावाद्युपाधिरित्यर्थः। ननु भावस्यैवोपाधित्वं नाभावस्येत्याशङ्क्य विनिगमनाविरहमाह—यथेति। भाववदभावस्य व्यावर्तकोपाधित्वे विशेषो नास्तीत्यत्र दृष्टान्तमाह—सुवर्णेति। शृङ्खलात्वं नाम यथेच्छासञ्चारव्यावर्तकत्वम्। ननु भावरूपान्तःकरणादेः द्रष्टृत्वादिरूपेण जीवोपलब्धिसाधनत्वात् तस्य जीवोपाधित्वं युक्तमित्याशङ्क्य तर्ह्यन्तःकरणनिषेधस्यापि ब्रह्मोपलब्धिसाधनत्वात् तस्य ब्रह्मोपाधित्वं युक्तमित्यभिप्रेत्य तत्तदुपाधिनिषेधस्य ब्रह्मोपलब्धिसाधनत्वं भाष्यकारैरुक्तमित्याह—अतद्व्यावृत्तीति। अत्र तच्छब्देन ब्रह्मोच्यते। तन्न भवतीत्यतत् अन्तःकरणादिरूपमुपाधिजातं, तस्य - अतदो व्यावृत्तिः - निषेधः, तद्रूपेण - तद्बोधनद्वारेणेत्यर्थः। साक्षाद्विधिमुखेन च - 'मनसस्साक्षी बुद्धेस्साक्षी सर्वस्य साक्षी' [नृ. उ.[2]] 'पश्यन् शृण्वन् मन्वानः' [बृ. उ. १-४-७] इत्यादिप्रकारेण च, प्रवृत्तिः- बोधकता-ब्रह्मणि तेषां प्रामाण्यमिति। तथा च उक्तरीत्या प्रतिबिम्बावच्छेदपक्षयोरुभयोरप्यन्तर्यामिब्राह्मणाञ्जस्याभावाञ्जस्ययोः तुल्यत्वे सति 'सुतरां नीरूपे'[2] इत्यादिना चैतन्यप्रतिबिम्बा-

---

1. लोकदृष्टिमनादृत्येति। अत्र लोकदृष्ट्यादरमेवाभिप्रयन्ति आश्रमस्वामिन. - बिम्बत्वं हि यावद्बिम्बस्वरूपव्यापित्वेन मुखादावनुभूयते, न त्ववच्छिन्नत्ववदव्याप्यवृत्ति। तथा च सर्वगतचिन्मात्रस्थं बिम्बत्वं चिन्मात्रव्यापीति भवति बिम्बत्वविशिष्टं ब्रह्म सर्वगतम्, ततश्च उपाधिगतमपि भवति - इति।

2. 'सुतरां नीरूपे' इत्यादिना चैतन्यप्रतिबिम्बासम्भवस्य दर्शितत्वात् प्रतिबिम्बपक्षं त्यक्त्वेति। अत्राहुः—चैतन्यस्य प्रतिबिम्बः सम्भवति। बाधकाभावात्, 'अतएव चोपमा सूर्यकादिवत्' इति सूत्रतद्भाष्योदाहृतब्रह्मप्रतिबिम्बबोधकश्रुतिकलापरूपसाधकसद्भावाच्च। न च 'रूपवत एव प्रतिबिम्बः' इति नियमो बाधकः। गगनप्रतिबिम्बस्थले व्यभिचारेण तथानियमाभावात्। गगनप्रतिबिम्बस्य अनुपदमेव टीकायां प्रसाधितत्वात्। न च रूपवत एव प्रतिबिम्बोपाधित्वं इति नियमो बाधकः।

एतेन - अवच्छिन्नस्य जीवत्वे कर्तृभोक्तृसमययोः तत्रतत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागमप्रसङ्ग इति - निरस्तम् ।

प्रतिबिम्बपक्षेऽपि स्वानन्तर्गतस्य स्वसन्निहितस्य चैतन्यप्रदेशस्य अन्तःकरणे प्रतिबिम्बस्य वक्तव्यतया तत्रतत्र अन्तःकरणस्य गमने बिम्बभेदात् तत्प्रतिबिम्बस्यापि भेदावश्यंभावेन दोषतौल्यात् । न च - अन्तःकरणप्रतिबिम्बो जीव इति पक्षे दोषतौल्येऽपि 'अविद्याप्रतिबिम्बो जीवः, तस्य

सम्भवस्य दर्शितत्वात् प्रतिबिम्बपक्षं त्यक्त्वा अवच्छेदपक्ष एव आदरणीय[1] इति भावः । एवमवच्छेदपक्षे दोषान्तरमपि वक्ष्यमाणदोषतौल्यादिनैव निरस्तमित्याह— **एतेनेति** । **स्वानन्तर्गतस्येति** । [2]प्रागुक्तयुक्तिरत्रानुसन्धेया । स्वसन्निहितस्येतिविशेषणस्य अयमभिप्रायः—यदि सर्वेष्वन्तःकरणेषु तदनन्तर्गतस्य अण्डात् बहिर्विद्यमानस्यैव चैतन्यभागस्य एकस्य प्रतिबिम्बस्सम्भवेत्, तदा बिम्बचैतन्यप्रदेशभेदाभावात् प्रत्यन्तःकरणं बिम्बचैतन्यप्रदेशभेदेन प्रतिबिम्बभेदापादनं न सम्भवेत् । न च तथा सम्भवति । व्यवहितस्य प्रतिबिम्बायोगात् । किं तु तत्रतत्रान्तःकरणे सन्निहितस्यैव [3]चैतन्यप्रदेशस्य बिम्बत्वं वाच्यम् । ततश्चेह परत्र च प्रतिबिम्बभेदापादनं युक्तमिति । **दोषतौल्यादिति** । कृतहानाकृताभ्यागमप्रसङ्गदोषतौल्यादित्यर्थः । अविद्यायां चित्प्रतिबिम्ब ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीवः, इति पूर्वप्रदर्शिते संक्षेपशारीरकपक्षे दोषतौल्येऽपि विवरणादिपक्षे उक्तदोषाप्रसक्तेः तस्योपादेयत्वं स्यादिति शङ्कते— **न चेति** । गत्वरं गमनशीलम् ।

तथानियमेऽपि मानाभावात् । भूयःसहचारदर्शनेऽपि क्वचित् व्यभिचारशङ्कया व्यापकत्वानिश्चयात् । अनुकूलतर्काभावाच्च । न च रूपवत्त्वप्रतिबिम्बोपाधित्वयोः प्रयोज्यप्रयोजकभावोऽनुकूलस्तर्कः । रूपवतोऽपि घटादेः प्रतिबिम्बोपाधित्वादर्शनात् । अस्वच्छत्वात् घटादेः प्रतिबिम्बानुपाधित्वं इति चेत्-तर्हि आवश्यकं स्वच्छत्वमेव प्रतिबिम्बोपाधित्वप्रयोजकं युक्तम् । तस्मात् मरुमरीचिकाजलादिव्यावृत्तं विलक्षणं स्वच्छत्वमेव प्रतिबिम्बोपाधित्वप्रयोजकं, तस्य च अविद्याऽन्तःकरणादौ सद्भावे नास्ति किञ्चित् बाधकम् । अस्ति च साधकं सत्वप्रधानमायापरिणामत्व-तादृशान्तःकरणोपादानत्वयोः प्रतिपादकश्रुत्यादिकम् । तस्मात् न प्रतिबिम्बपक्षत्यागो युक्तः—इति ।

1. अवच्छेदपक्ष एव आदरणीय इति । अत्र प्रतिबिम्बवादानुसारिणो वदन्ति - अभावस्य सर्वज्ञत्वाद्यप्रयोजकस्य ईश्वरोपाधित्वायोगात् 'मायिनं तु महेश्वरम्' इति मायोपहितस्य ईश्वरत्वश्रुतेः मायायाः सर्वज्ञत्वादिप्रयोजकत्वात् प्रतिबिम्बभावस्य श्रुतिस्मृतिन्यायसिद्धत्वाच्च जीवव्यावृत्तबिम्बत्वाकारेण मायोपहित एव ईश्वरः । वक्ष्यते चैतत् अनुपदमेव टीकायाम् । प्रतिबिम्बपक्षे लोकदृष्टयनुसारेण अन्तर्यामिब्राह्मणाञ्जस्यस्य अनुपदमेवोक्तत्वात् अवच्छेदपक्षे तदभावात् न तुल्यत्वम् । 'घटसंवृतं' इत्यादिघटावच्छिन्नाकाशदृष्टान्तोक्तिः असङ्गत्वबोधमात्रपरा । 'नीयेत' 'न नीयेत' इति विकारतदभावोक्तिस्वरसात् । तृप्तिदीपग्रन्थः अभावस्य निरुपाधिकब्रह्मस्वरूपोपलब्धिसाधनत्वाभिप्रायः, न तु ईश्वरत्वनिर्वाहकत्वाभिप्रायः । तस्मात् प्रतिबिम्बपक्षः न अनादरणीय इति ।

2. प्रागुक्तयुक्तिरिति । मूले 'न हि मेघावच्छिन्नस्य' इत्यादिना 'तदनन्तर्गतस्यैव बिम्बत्वं स्यात्' इत्यन्तेन ग्रन्थेन उक्ता 'दृष्टानुसारित्वात् कल्पनायाः' इति युक्तिः ।

3. चैतन्यप्रदेशस्येति । अत्र—निरवयवस्य वास्तविकप्रदेशाभावेन उपाधिकृतप्रदेशभेदस्यैव वाच्यतया उपाधेरैक्ये प्रदेशभेदाभावेन बिम्बभेदाभावात् न युक्तं इह परत्र च प्रतिबिम्बभेदापादनं इत्याहुः प्रतिबिम्बवादिनः ।

च तत्रतत्र गत्वरमन्तःकरणं जलाशयव्यापिनो महामेघमण्डलप्रतिबिम्बस्य तदुपरि विसृत्वरस्फीतालोक इव तत्र तत्र विशेषाभिव्यक्तिहेतुः' इति पक्षे नायं दोषः, अन्तःकरणवत् अविद्याया गत्यभावेन प्रतिबिम्बभेदानापत्तेः इति - वाच्यम्। तथैव अवच्छेदपक्षेऽप्यविद्यावच्छिन्नो जीव इति उपगमसम्भवात्। तत्राप्येकस्य जीवस्य क्वचित् प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृत्वं इत्येवं कृतहानादिदोषापनुत्तये वस्तुतो जीवैक्यस्य आदरणीयत्वेन तन्न्यायात् अन्तःकरणोपाधिपक्षेऽपि वस्तुतश्चैतन्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तन्त्रत्वाभ्युपगमेन तद्दोषनिराकरणसम्भवाच्च।

तदुपरीति। जलाशयोपरीत्यर्थः। **विसृत्वरेति**। यथा तत्रतत्र जलप्रदेशेषु विसृत्वरः - गमनशीलः - मेघच्छिद्रेभ्यो निस्सृतः स्फीतालोकखण्डो महामेघमण्डलप्रतिबिम्बस्य जलाशयव्यापकस्य विशेषेण स्फुरणहेतुः तथा तत्रतत्र - इह परत्र च कर्तृत्वभोक्तृत्वादिविशेषाभिव्यक्तिहेतुः अन्तःकरणं इति पक्षे इत्यर्थः। कृतहानादिदोषाभावे हेतुमाह—**अन्तःकरणवदिति**। यदि प्रतिबिम्बवादिना अन्तःकरणप्रतिबिम्बो जीव इति पक्षं उक्तदोषतौल्येन परित्यज्य अविद्याप्रतिबिम्बो जीव इति पक्षः स्वीक्रियते, तदा अवच्छेदवादिनाऽपि अन्तःकरणावच्छिन्नो जीव इति पक्षं कृतहानादिदोषयुक्तं त्यक्त्वा उक्तदोषरहितं अविद्यावच्छिन्नो जीव इति मतमुपादीयत इत्याह—**तथैवेति**। **जीव इति**। उपलक्षणं चैतत्। अविद्यायाः कल्पितत्वेन वास्तवतदभावावच्छिन्नश्चिदात्मा ईश्वरः इत्युपगमसम्भवाच्च इत्यपि द्रष्टव्यम्। एवं अविद्याप्रतिबिम्बो जीव इति पक्षे कृतहानादिदोषाभावमुपेत्य तत्साम्यं अविद्यावच्छिन्नस्य जीवत्वपक्षे दर्शितम्। इदानीं अन्तःकरणावच्छेदपक्षे कृतहानादिदोषाभावं समर्थयितुमविद्याप्रतिबिम्बो जीव इति पक्षेऽपि कृतहानादिदोषमाशङ्क्य परिहरति—**तत्रापीति**। अविद्याप्रतिबिम्बो जीव इति पक्षेऽपीत्यर्थः। **क्वचित् प्रदेश इति**। ब्राह्मणादिशरीरगतान्तःकरणावच्छिन्नप्रदेशे इत्यर्थः। **प्रदेशान्तर इति**। देवादिशरीरगततदवच्छिन्नप्रदेश इत्यर्थः। **वस्तुत इति**। प्रदेशभेदे सत्यपि इह परत्र च अविद्याप्रतिबिम्बरूपजीवैक्यमात्रेण[1] कृतहानादिदोषः परिहर्तव्यः, प्रतिबिम्बवादिनां गत्यन्तराभावादित्यर्थः। सोऽयं परिहारप्रकारोऽन्तःकरणावच्छेदपक्षेऽपि समान इत्याह—**तन्न्यायादिति**। **वस्तुत इति**। इह परत्र च अन्तःकरणावच्छेद्यचैतन्यप्रदेशभेदेऽपि चैतन्यस्य वस्तुत एकत्वात् न कृतहानादिदोष इत्यर्थः। ननु वास्तवचैतन्यैक्यमात्रस्य जीवान्तरसाधारणत्वात् अन्यकृतकर्मणा अन्यस्य भोगप्रसङ्गः इत्यत आह—**तदवच्छेदकेति**। तत्पदं चैतन्यपरम्। तथा च

---

1. अविद्याप्रतिबिम्बरूपजीवैक्यमात्रेणेति। अत्राप्याहुः — अविद्यया चिन्मात्रादीषद्भिन्नः अविद्याप्रतिबिम्बो जीवः पुनः अन्तःकरणप्रतिबिम्बितः सन् 'प्रमाता, कर्ता, भोक्ता अहम्' इत्यादिस्फुटविकल्पार्हो भवति इति प्रतिबिम्बवादिनां आशयः। तथा च न बिम्बभेदः। अन्तःकरणं च इह परत्र च शरीरभेदेऽप्येकम्। उपाधिगतागताभ्यां प्रतिबिम्बभेदश्च अनुभवविरुद्ध इति पूर्वमुक्तम्। तस्मात् ब्राह्मणदेवादिशरीररूपप्रदेशभेदे सत्यपि इह परत्र च अन्तःकरणप्रतिबिम्बरूपजीवैक्येनापि कृतहानादिदोषः सुपरिहरः। न च 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति आत्मशब्दितशरीरस्यापि भोक्तृकोटिप्रवेशश्रवणात् शरीरभेदे कर्तृभोक्तृभेद एव इति शङ्क्यम्। शरीरेन्द्रिययोः कर्तृभोक्तृकोटौ अप्रवेशस्य सहकारित्वमात्रेण श्रुत्युपपत्तेश्च तृतीयपरिच्छेदे वक्ष्यमाणत्वात् इति।

न च अवच्छेदपक्षे ‘यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा’ ‘अत एव चोपमा सूर्यकादिवत्’ [ब्र. सू. ३-२-१८] इति श्रुतिसूत्राभ्यां विरोधः। ‘अम्बुवदग्रहणात्तु न तथात्वम्’ [ब्र. सू. ३-२-१९] इति उदाहृतसूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यं ततो विप्रकृष्टदेशं रूपवज्जलं गृह्यते, नैवं सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किञ्चिदस्ति ततो विप्र-

---

एकान्तःकरणावच्छिन्नचैतन्यमेको जीवः, अन्तःकरणान्तरावच्छिन्नचैतन्यमन्यो जीवः, इति स्वीकारात् नोक्तातिप्रसङ्ग इति भावः। अस्मिन्नवच्छेदपक्षे प्रागुक्तरीत्या वास्तवान्तःकरणाभावावच्छिन्नचैतन्यमीश्वरः ‘कारणोपाधिरीश्वरः’ इति श्रुत्यनुरोधेन अविद्यावच्छिन्नचैतन्यं वा ईश्वरः इति बोध्यम्।

अस्य पक्षस्य श्रुतिसूत्राभ्यां विरोधं शङ्कते—**न चावच्छेदपक्ष इति**। यथा एको विवस्वान् पात्रभेदेन भिन्ना अपोऽनुगच्छन्—बहुजलपात्रेषु प्रतिबिम्बितः सन्निति यावत्, बहुधा भेदरूपः क्रियते-औपाधिकं नानात्वं प्रतिपद्यते, एवं देवः-स्वप्रकाश आत्मा स्वत एकस्सन् क्षेत्रेषु उपाधिषु प्रतिबिम्बितः भेदरूपः क्रियते-नानात्वं लभते इति यावत्। यथा एकस्य सूर्यस्य बहुषु उपाधिषु - प्रतिबिम्बितत्वप्रयुक्तो भेदः, एवमात्मनोऽपि क्षेत्रेषु प्रतिबिम्बितत्वप्रयुक्तमेव नानात्वं इह विवक्षितं इति वक्तव्यम्। अन्यथा दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वापत्त्या तयोरसामञ्जस्यप्रसङ्गात्। तथा च अवच्छेदपक्षः श्रुतिविरुद्ध इत्यर्थः। एवम् ‘एक एव तु भूतात्मा भूतेभूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥’ ‘रूपंरूपं प्रतिरूपो बभूव’ ‘जीवेशावाभासेन करोति’ इत्यादिश्रुतयोऽपि चैतन्यस्य प्रतिबिम्बगमकत्वेन द्रष्टव्याः। भूतानां ब्रह्मादिस्तम्बपर्यन्तानां आत्मा-स्वरूपभूतः परः। भूतेभूते इति वीप्सा, तया सर्वे प्रतिबिम्बोपाधयो गृह्यन्ते। तेषु प्रतिबिम्बिततया व्यवस्थितः सन् बहुधा दृश्यते। स्वतस्तु शास्त्रादेकधा दृश्यते। रूपशब्द उपाधिपरः। अत्रापि वीप्सा सर्वोपाधिसङ्ग्रहार्था। प्रतिरूपः-प्रतिबिम्बः। पुरुषप्रतिबिम्बे पुरुषप्रतिरूपोऽयमिति प्रयोगदर्शनात्। तृतीयाध्यायगतसूत्रमुदाहरति—**अत एवेति**। यतः चिदात्मनः स्वाभाविकमेकत्वं नानात्वं चौपाधिकं श्रुतिषु विवक्षितम्, अत एव तस्यौपाधिकनानात्वे जलादिषु प्रतिबिम्बितः सूर्यादिः दृष्टान्तत्वेन श्रुतिषूपादीयते इति सूत्रार्थः।

‘रूपंरूपं’ इति श्रुतौ प्रतिरूपशब्दो न प्रतिबिम्बवाचकः। ‘वायुर्यथैको भुवनं प्रविष्टो रूपंरूपं प्रतिरूपो बभूव’ इत्यादौ व्यभिचारात्। अतः सूर्यादिप्रतिबिम्बदृष्टान्तस्वारस्यादेव चैतन्यप्रतिबिम्बो वक्तव्यः। तं प्रतिबिम्बं स्वयमेव सूत्रकृदाक्षिपति-**अम्बुवदिति**। सूत्रे दृष्टान्तभागस्यार्थमाह-**यथेति**। प्रतिबिम्बोदययोग्यत्वं स्वच्छत्वम्। उपाध्यन्तर्गतस्य न तत्र प्रतिबिम्ब इत्याशयेनाह—**तत इति**। बिम्बभूतसूर्यापेक्षयेत्यर्थः। दार्ष्टान्तिकभागं व्याचष्टे—**नैवमिति**। न तथात्वं - चिदात्मनः प्रतिबिम्बितसूर्यादितुल्यत्वं नास्ति। कुतः? अग्रहणात् - अन्तःकरणादेरात्मप्रतिबिम्बोदययोग्यत्वेनाग्रहणात्। न ह्यन्तःकरणं आत्मापेक्षया विप्रकृष्टदेशवत्। सर्वगतत्वादात्मनः। नापि तत् उद्भूतरूपवत्। अनङ्गीकारात्। चिदात्मनोऽपि सूर्यादिवत् बिम्बत्वयोग्यत्वेनाग्रहणाच्च। **तस्य**

कृष्ट इति [1]प्रतिबिम्बासम्भवमुक्त्वा 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्'[ब्र.सू.३-२-२०] इति तदनन्तरसूत्रेण 'यथा जलप्रतिबिम्बितसूर्यो जलवृद्धौ वर्धत इव जलह्रासे ह्रसतीव जलचलने चलतीव इति तस्याध्यासिकं जलानुरोधिवृद्धिह्रासादिभाक्त्वं, तथा आत्मनोऽन्तःकरणादिनाऽवच्छेदेन उपाध्यन्तर्भावात् आध्यासिकं तदनुरोधिवृद्धिह्रासादिभाक्त्वं इत्येवं दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यात् [2]अविरोधः' इति स्वयं सूत्रकृतैव अवच्छेदपक्षे तयोः तात्पर्यकथनात्। [3]'घटसंवृतमाकाशं नीयमाने

नीरूपद्रव्यत्वात्। तस्मात् प्रतिबिम्बितसूर्यचिदात्मनोर्दृष्टान्तदार्ष्टान्तिकभावानुपपत्तिरिति तुशब्दार्थः। दृष्टान्तदार्ष्टान्तिकयोः प्रतिबिम्बितत्वांशेन साम्याभावेऽपि न तद्भावविरोधोऽस्ति, विवक्षितांशेन साम्यस्य तत्रापि सम्भवात्, न हि तयोस्सर्वसाम्यं क्वचिदपि सम्भवति, तथासति दृष्टान्तदार्ष्टान्तिकभावोच्छेदप्रसङ्गात् - इत्यभिप्रेत्य विवक्षितांशसाम्यं सूत्रकृद्दर्शयति—**वृद्धिह्रासेति**। तदनन्तरेत्यत्र तत्पदं अम्बुवदितिसूत्रपरम्। सूत्रं व्याचष्टे-**यथेति**। **आध्यासिकमिति**। भ्रान्तिसिद्धमित्यर्थः। **तथेति**। चिदात्मनो बुद्ध्याद्यवच्छिन्नतया बुद्ध्याद्युपाधावन्तर्भावात् गजादिशरीरे अन्तःकरणवृद्धौ चिदात्मा वर्धत इव मशकादिशरीरेऽन्तःकरणह्रासे ह्रसत इव तच्चलने चलतीव, तद्भेदे भिन्न इव च भाति। तथा च श्रुतिः—'ध्यायतीव लेलायतीव' इति। बुद्धौ ध्यायन्त्यामात्मा ध्यायतीव, तस्यां चलन्त्यामात्मा चलतीव, न तु वस्तुतो ध्यायति चलति वा, इत्यर्थः। एवमध्याससिद्धमन्तःकरणानुरोधिवृद्ध्यादिमत्त्वं आत्मनोऽत्र विवक्षितं साम्यमित्यर्थः। **तयोरिति**। चैतन्यस्य प्रतिबिम्बितत्वगमकश्रुतितन्मूलकसूत्रयोः पूर्वमुदाहृतयोरित्यर्थः।

---

1. प्रतिबिम्बासम्भवमिति। अत्राप्याहुः - 'अत एव चोपमा सूर्यकादिवत्' इति सूत्रतद्भाष्योदाहृतब्रह्मप्रतिबिम्बबोधकश्रुत्यक्षरैः प्रतिबिम्बवादप्रतीतेः, प्रतीयमाने तस्मिन् अतात्पर्ये प्रमाणाभावात्। तात्पर्यवच्छ्रुतिप्रमितालौकिकार्थस्य लोकविरोधेन त्यक्तुमयुक्तत्वात् प्रत्युत अलौकिकार्थतया लोकवैलक्षण्यस्य अदूषणत्वात् बिम्बात्यर्थसन्निकृष्टत्वादिकं न क्षतिकरम्। यत्तु वृद्धिह्रासेतिसूत्रतद्भाष्यादिकं प्रतिबिम्बवादे तात्पर्याभावप्रत्यायकमिति, तन्न—सूत्रस्य अभ्युपगमवादत्वोपपत्तेः। सिद्धान्ते प्रक्रियासु अनभिनिवेशात्। भाष्यमपि उक्तार्थानुकूलम्। तत्र हि दृष्टान्तदार्ष्टान्तिकयोः सर्वसारूप्यासम्भवो दर्शितः। तेन ज्ञायते बिम्बाविप्रकृष्टत्वादिकं अप्रयोजकमिति। 'न चेदं स्वमनीषया जलसूर्यकादिदृष्टान्तप्रणयनम्' इति भाष्यग्रन्थेन श्रुतिसिद्धस्य प्रतिबिम्बवादस्य अनतिशङ्कनीयत्वं च सूचितम्। तथा च प्रतिबिम्बवादः न सूत्रतद्भाष्याद्यसंमतः। प्रत्युत तात्पर्यविषयः। यतः सूत्रे 'अन्तर्भावात्' इत्युक्तम्। उपाध्यन्तर्भावश्च न अवच्छिन्नस्य। उपाध्यन्तर्भावानन्तर्भावाभ्यामेव प्रतिबिम्बावच्छिन्नयोर्भेदस्य प्राचीनैराचार्यैरुक्तत्वात्। तेन ज्ञायते आत्मनः उपाध्यन्तर्भावरूपं प्रतिबिम्बत्वमादायैव 'वृद्धिह्रासभाक्त्वं' उपमावाक्येन बोध्यते, न त्वन्तर्भावं त्यक्त्वा, इति सूत्राभिप्रायः इति। एतेन 'प्रविष्टः' 'अनुप्राविशत्' इत्यादिश्रुतयोऽपि अन्तर्भावघटितार्थकाः प्रतिबिम्बवादस्यैव अनुकूलाः इति व्याख्याताः। 'आभास एव च' इति सूत्रतद्भाष्ययोः सिद्धवदुक्तेश्च। यदि प्रतिबिम्बवादः असङ्गतः स्यात्, तर्हि तत्रैव समनन्तरमेव, भोक्त्रापत्तिसूत्रोक्तसिद्धान्तवत् निराक्रियेत। न तु तथाऽस्ति। तस्मात् न प्रतिबिम्बासम्भवः इति।

2. अविरोधः—दृष्टान्तदार्ष्टान्तिकभावस्य विरोधाभावः - उपपत्तिः।

3. 'लीयमाने' 'तद्वज्जीवः' इति च ब्रह्मबिन्दूपनिषदि। 'नीयमाने', 'तथा जीवे' इति अमृतबिन्दूपनिषदि।

अत्र उभयत्र च 'एक एव हि भूतात्मा........जलचन्द्रवत्' इति प्रतिबिम्बपक्षमुक्त्वा अनुपदं 'घटसंवृतमाकाशम्' इति अवच्छिन्नपक्ष उक्तः। तेन उपनिषदामपि पक्षद्वयमपि अहेयमित्येव तात्पर्यम्।

घटे यथा। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः' 'अंशो नानाव्यपदेशात् ....' [ब्र. सू. २-३-४३] इति श्रुतिसूत्राभ्यां अवच्छेदपक्षस्यैव परिग्रहाच्च।

अवच्छेदपक्षे न केवलं श्रुतिसूत्रविरोधाभाव एव किं तु श्रुतिसूत्रानुग्रहोऽप्यस्तीत्याह—**घटसंवृतमिति**। घटसंवृतं-घटावच्छिन्नं आकाशं प्रसिद्धमस्ति। तच्च घटे नीयमानेऽपि न नीयते। यथा अयं दृष्टान्तः तद्वत् जीवो नभोपमः - नभसा तुल्यः। एतदुक्तं भवति - जीवस्य नभोपमशब्देन घटसंवृताकाशतुल्यत्वमभिदधता अवच्छिन्नचैतन्यरूपत्वमुक्तमिति। एवं प्रवेशश्रुतिरपि चिदात्मनो बुद्ध्याद्यवच्छेदकृतमेव द्रष्टृत्वादिधर्मलाभं दर्शयति, न प्रतिबिम्बभावकृतम्। तथाहि - 'स एष इह प्रविष्ट आनखाग्रेभ्यः' इत्युपक्रम्य 'प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यन् चक्षुः शृण्वन् श्रोत्रं मन्वानो मनः' (बृ.उ. १-४) इति पुरुषविधब्राह्मणे श्रूयते। अयमर्थः - सः - सर्ववेदान्तेषु प्रसिद्धः, एषः - नामरूपव्याकर्तृत्वेन सन्निहितः, इह - कार्यकरणसङ्घाते, नखाग्रमवधीकृत्य प्रविष्टः। ननु - यथा देवदत्तस्य गृहे सर्पस्य वा बिले प्रवेशः प्रसिद्धः न तथा आत्मनः प्रवेशः कल्पयितुं शक्यते। तस्य सर्वगतत्वात्। नापि जलपात्रेषु सूर्यादेरिव प्रतिबिम्बभावलक्षणः प्रवेशः सम्भवति। तस्य तैत्तिरीयकादौ प्रवेशवाक्यविचारावसरे भाष्यकारैरेव निरस्तत्वात्[1]। अतः कीदृशः प्रवेशः प्रविष्टपदेन विवक्षितः - इति जिज्ञासायां यथा जले प्रतिबिम्बभावेन प्रविष्टस्य सूर्यादेस्तद्धर्मवत्तया उपलभ्यमानत्वमस्ति, एवमात्मनः सङ्घाते अधिष्ठानतया प्राक्सिद्धस्यैव प्राणबुद्ध्यादिधर्मवत्तया उपलभ्यमानत्वमेव प्रकृते प्रविष्टपदेन विवक्षितं, न तु मुख्यः प्रवेशः, इति मन्वाना श्रुतिः स्वयमेव प्रविष्टपदं व्याचष्टे— प्राणन्नेवेत्यादिना। प्राणन् - प्राणनचेष्टां प्राणोपाधिद्वारा कुर्वन् 'प्राणस्य प्राणं' इत्यादिश्रुतौ द्वितीयप्राणपदवाच्यो भवति। रूपं पश्यन् - रूपगोचरचाक्षुषवृत्तिं अन्तःकरणतादात्म्यापत्त्या कुर्वन् 'चक्षुषश्चक्षुः' इत्यादिश्रुतौ द्वितीयचक्षुश्शब्दवाच्यो भवति। शृण्वन् - शब्दगोचरां श्रोत्रकरणिकां वृत्तिं अन्तःकरणतादात्म्यापत्त्यैव कुर्वन् 'श्रोत्रस्य श्रोत्रं' इत्यादिश्रुतौ द्वितीयश्रोत्रशब्दवाच्यो भवति। मन्वानः - मननरूपां चक्षुरादिनिरपेक्षां वृत्तिं कुर्वन् 'मनसो मनः' इत्यादिश्रुतौ मनश्शब्दवाच्यो भवति। चक्षुरादिव्यापारग्रहणं कार्यकरणसङ्घातव्यापारमात्रस्योपलक्षणम्। संघातधर्माणां सर्वेषां आत्मन्युपलभ्यमानत्वात्।

नन्वेवमपि अवच्छेदपक्षस्य द्वितीयाध्यायगतेन 'आभास एव च' [ब्र. सू. २-३-५०] इति सूत्रेण तद्भाष्येण च विरोधो दुर्वारः। तयोः चैतन्यप्रतिबिम्बस्य स्पष्टमुक्तत्वात्। सूत्रार्थस्तु - आभास एव - जीवः परमात्मनः प्रतिबिम्ब एव, न निरुपाधिकः परमात्मैव जीवः। नापि न्यायमत इव परमात्मसकाशादत्यन्तभिन्नः। तत्त्वमस्याद्यभेदश्रुतिविरोधात्। प्रतिबिम्बस्य च वस्तुतो बिम्बाभिन्नत्वेन आभासत्वपक्षे उक्तश्रुतिविरोधाभावादिति चशब्दार्थः इति—न - उदाहृतसूत्रतद्भाष्ययोः उक्तप्रतिबिम्बपक्षस्य 'भोक्त्रापत्तेरविभाग-

---

1. संक्षेपशारीरकादौ अवच्छिन्नभावोऽपि निरस्तः। दुर्निरूपतया अनिर्वचनीयत्वपरता तु पक्षद्वयेऽपि तुल्या इति ध्येयम्।

तस्मात् सर्वगतस्य चैतन्यस्य अन्तःकरणादिनाऽवच्छेदोऽवश्यंभावी इति आवश्यकत्वात् अवच्छिन्नो जीवः - इति पक्षं रोचयन्ते ।

श्चेत्स्याल्लोकवत्' [ब्र. सू. २-१-१३] इति सूत्रोक्तसिद्धान्तवत् मतान्तरत्वोपपत्तेः । न च तथाकल्पने किं विनिगमकमिति वाच्यम् । तृतीयाध्याये स्वयं सूत्रकृतैव न्यायपूर्वकं कृतस्य चैतन्यप्रतिबिम्बनिरासस्य नियामकत्वात्, आभाससूत्रे च जीवस्य प्रतिबिम्बत्वे उपपत्त्यादेरनुपन्यासाच्च । भोक्त्रापत्तिसूत्रस्य अयमर्थः—'सर्वं खल्विदं ब्रह्म' [छा. उ. ३-१-४१] इति श्रुत्या प्रपञ्चस्य ब्रह्माभेदः प्रतिपाद्यते । 'अहं ब्रह्मास्मि' [बृ. उ. १-४-१०] इति श्रुत्या अहंशब्दार्थभूतभोक्तृवर्गस्य च ब्रह्माभेदः प्रतिपाद्यते । तथा च श्रुतिद्वयानुसारेण भोक्तृभोग्यप्रपञ्चयोः एकब्रह्माभेदस्वीकारे भोग्यप्रपञ्चस्य भोक्त्रापत्तेः - भोक्त्रभेदापत्तेः, एवं भोक्तुरपि भोग्याभेदापत्तेः, एकब्रह्माभिन्नयोस्तयोः परस्परमप्यभेदावश्यम्भावात् । न चेष्टापत्तिः । तथासत्यविभागः प्रसज्येत - भोक्तृभोग्ययोर्विभागबोधकप्रत्यक्षादिविरोधः प्रसज्येत इति चेत्, उच्यते—श्रुतिसिद्धं भोक्तृभोग्ययोरेकब्रह्माभिन्नत्वं तयोः प्रत्यक्षादिसिद्धं परस्परं विभक्तत्वं चेत्युभयं लोकवत् स्यात् - उपपद्यते । यथा लोके एकसमुद्रविकाराणां फेनबुद्बुदतरङ्गाणामेकसमुद्राभिन्नत्वम्, परिणामानां परिणाम्यभेदस्यानुभवसिद्धत्वात्, तेषामेव फेनादीनां परस्परं भिन्नत्वं चास्ति, भेदस्यानुभवसिद्धत्वात्, एवं एकब्रह्मपरिणामयोर्भोक्तृभोग्ययोरेकब्रह्माभिन्नत्वं परस्परं भिन्नत्वं चोपपद्यत इति न अद्वैतश्रुतीनां प्रत्यक्षादिविरोधप्रसक्तिरिति । अयं च विरोधपरिहारो न सिद्धान्तसम्मतः । कूटस्थनित्यस्य ब्रह्मणः परिणामित्वानभ्युपगमात्, किं तु मतान्तराभिप्रायेण, इति भाष्यादिषु घण्टाघोषः, तथा प्रकृतेऽपीति संक्षेपः । **अंश इति ।** जीव ईश्वरस्यांशः । कुतः । नानाव्यपदेशात् 'य आत्मानमन्तरो यमयति' इत्यादिश्रुतिषु नियम्यनियामकभावादिना जीवेश्वरयोर्नानात्वस्य - भेदस्य व्यपदेशात् इति सूत्रभागस्याक्षरार्थः । अत्र अंशत्वं जीवचैतन्यस्य घटाकाशवदन्तःकरणावच्छिन्नत्वरूपं[1] विवक्षितम्, न तु मुख्यमंशत्वम्, निरवयवस्य ब्रह्मणो मुख्यांशासम्भवात्, इति तदधिकरणभाष्ये स्फुटमिति भावः ।

अवच्छेदपक्षसमर्थनमुपसंहरति—**तस्मादिति ।** प्रतिबिम्बासम्भवात् अवच्छेदपक्षे विरोधाभावात् [2]साधकसत्त्वाच्च इत्यर्थः । अवच्छेद्यचैतन्यस्य प्रतिबिम्बपक्षेऽपि सम्मततया उभयसंप्रतिपन्नस्य तस्यैव जीवत्वादिकल्पनं युक्तं [3]लाघवात् इत्याशयेनाह—**अवच्छेदोऽवश्यंभावीति । अवच्छिन्न इति ।** अन्तः

---

1. वस्तुतस्तु प्रतिबिम्बत्वरूपमंशत्वं विवक्षितं इत्यपि वक्तुं शक्यम् । मुख्यांशत्वनिषेधस्यैव भाष्ये दर्शनात् । अत एव 'ममैवांशो जीवलोके' इति गीतावाक्यव्याख्यानावसरे भाष्यकृद्भिः 'यथा जलसूर्यकः सूर्यांशः जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते, यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते' इत्यनेन ग्रन्थेन अंशत्वं प्रतिबिम्बत्वं अवच्छिन्नत्वं वा इत्युभयथा व्याख्यातम् । अतः 'अंशो नाना...' इति सूत्रं न प्रतिबिम्बवादस्य प्रतिकूलम् ।

2. बाधकसत्त्वाच्चेति पाठस्तु असाधुः ।

3. लाघवादिति । बिम्बचैतन्यं अवच्छेदपक्षेऽपि सम्मतम् । अवच्छेद्यचैतन्यस्य प्रतिबिम्बवादे बिम्बरूपत्वाङ्गीका-

अवच्छेदप्रतिबिम्बभावरहितं ब्रह्म जीवः इति पक्षनिरूपणम्

[1]अपरे तु—**न प्रतिबिम्बः नाप्यवच्छिन्नो जीवः। किं तु कौन्तेयस्यैव राधेयत्ववत् अविकृतस्यैव ब्रह्मणः अविद्यया जीवभावः। व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन 'ब्रह्मैव स्वाविद्यया**

करणावच्छिन्नो जीवः। जीवग्रहणमुपलक्षणम्। अविद्यावच्छिन्न ईश्वरः[2]। 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतेः। 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुतौ च आभासपदमवच्छिन्न-परम्। प्रतिबिम्बासम्भवस्योक्तत्वात्। मायापदं च प्रथमोपात्तजीवोपाधिभूतान्तःकरणपरम्। 'कार्योपाधिरयं जीवः' इति श्रुतेः। एवं मायापदोपात्तान्तःकरणस्य च मूलप्रकृत्यात्मकत्वं [5]प्रकृतिविकारभावप्रयुक्तम्। पूर्वं अनवच्छिन्नस्येश्वरत्वोक्तिः तृप्तिदीपवचनानुसारेण अभावावच्छिन्नस्येश्वरत्वोक्तिश्च सम्भवमात्रेण, न तु तात्पर्यतः। 'कारणोपाधिरीश्वरः' इति श्रुतिविरोधात्, अनवच्छिन्नस्य ईश्वरत्वपक्षे तस्य उपाध्यभावेन सर्वज्ञानकर्तृत्वादेरसम्भवाच्च। अभावस्येश्वरोपाधित्वपक्षेऽपि समानोऽयं दोषः। मायाऽविद्याव्याकृतशक्त्यक्षरा-काशादिशब्दितभावरूपोपाधेरिव तस्य सर्वज्ञत्वादिप्रयोजकत्वायोगात्। अत एव वाक्यवृत्तौ भगवत्पादैः सर्व-ज्ञत्वादिप्रयोजकोपाधित्वं अविद्याया दर्शितं 'मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः' इति—इति भावः।

अथ 'क ईश्वरः कश्च जीवः' इति प्रश्ने प्रतिवचनत्वेन मतान्तरमुत्थापयति—**अपरे त्विति**। कस्तर्हि जीव इति पृच्छति—**किं त्विति**। दृष्टान्तपूर्वकं ब्रह्मैव जीव इत्युत्तरमाह—**कौन्तेयस्यैवेति**। कुन्तीकुमारस्यैव न तु तत्प्रतिबिम्बादेः इत्येवकारार्थः। राधाया अपत्यं राधेयः, तस्य भावस्तत्त्वम्, तद्वदित्यर्थः। किं तु अविकृतस्यैवेति सम्बन्धः। अवच्छेदप्रतिबिम्बभावरहितस्येत्यर्थः। तत्र भाष्यवार्तिक-सम्मतिं हेतुत्वेन दर्शयति—**व्याधेत्यादिना**। यथा राजकुले जातः कर्णो जन्मप्रभृति व्याधकुल एव

रात्। बिम्बमेव च प्रतिबिम्बम्। धर्ममात्रकल्पनं तु पक्षद्वयेऽपि तुल्यम्। अतः प्रतिबिम्बवादेऽपि लाघवानपायः इति बोध्यम्।

1. इष्टसिद्धिकाराः।

2. अन्तःकरणावच्छिन्नो जीवः......अविद्यावच्छिन्न ईश्वर इति। ननु सुषुप्तौ अन्तःकरणस्य 'स्वमपीतो भवति' इत्यादिना नाशावगमात् प्रत्यहं तद्भेदात् जीवभेदापत्तिः। अस्तु अविद्योपादानकमन्तःकरणं आ मोक्षात् स्थूलसूक्ष्मभावेनानुस्यूतं जीवोपाधिः इति चेत्, न, संस्कारात्मकस्य सूक्ष्मरूपस्य अवच्छेदकत्वादर्शनात्। तस्य प्रत्राह्मा-नादिभूतप्रमातृजीवोपाधित्वेऽपि स्वरूपानादिजीवोपाधित्वायोगाच्च। स्वरूपानादिषट्के जीवस्याप्यन्तर्भावात्। तस्मात् तदुपादानानाद्यविद्याया एव आवारकत्वेन क्लृप्तायाः तदुपाधित्वमिति अविद्यावच्छिन्नो जीवः इत्येव युक्तम् इति चेत्—सत्यम्। उक्तं च तथैव भामत्याम् सर्वत्रप्रसिद्धोपदेशात् इत्यधिकरणे "पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिर्विच्छिद्यमानः बालैः शारीर इत्युपचर्यते' इति भाष्यस्य व्याख्याने 'अनाद्यविद्यावच्छेदलब्धजीवभावः पर एवात्मा स्वतो भेदेनावभासते' इति। एवञ्च अविद्यावच्छिन्न ईश्वरः इत्युक्तिः अविद्याविषयत्वोपहितः ईश्वरः इत्यर्थपरा। आश्रयत्वविषयत्वाभ्यां अवच्छे-दस्य अविद्योपाधिकत्वात्। तत्र तत्र 'अन्तःकरणावच्छिन्नो जीवः' इत्युक्तिस्तु प्रमातृत्वाद्याध्यासिकजीवरूपाभिव्यक्त्यु-पाधित्वाभिप्राया। उक्तञ्चैतत् कल्पतरौ तत्रैवाधिकरणे।

संसरति, स्वविद्यया मुच्यते' इति बृहदारण्यकभाष्ये प्रतिपादनात्[1]। [2]'राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते। यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः।' (सं. वा. २३३-२३४) इति। वार्तिकोक्तेश्च। एवं च स्वाविद्यया जीवभावमापन्नस्यैव ब्रह्मणः सर्वप्रपञ्चकल्पकत्वात् ईश्वरोऽपि सह सर्वज्ञत्वादिधर्मैः स्वप्नोपलब्धदेवतादिवत् जीवकल्पितः इत्याचक्षते।

संवर्धितः तज्जातीयैः सहवासादिजनितभ्रान्तिलक्षणाविद्यया स्वात्मानं राधेयं मन्यते, न तु स्वतःसिद्धमपि कौन्तेयत्वमनुभवति। ततश्च कौन्तेयत्वप्रयुक्ताच्छ्रेयसः सकाशात् प्रच्युतः सर्वत्र नानाविधशापावमानादिलक्षणं बहुविधदुःखं प्राप्तवान्। स च कदाचित् भगवता विवस्वता 'कर्ण कौन्तेयोऽसि त्वम्, न राधेयः' इत्युपदेशं कुर्वता स्मारितनिजरूपः सन् तया स्मृत्या व्याधत्वराधेयत्वादेरविद्याकृतस्य निवृत्तौ सत्यां व्याधत्वराधेयत्वकृतं नानाविधदुःखं त्यक्त्वा कौन्तेयत्वस्मृतिप्रयुक्तं श्रेयः प्राप्तवान्, तथा ब्रह्मापि अनादिसिद्धया स्वाविद्यया आवृतनिजरूपं सत् जीवभावं प्राप्य स्वतःसिद्धात् नित्यनिरतिशयानन्दस्वरूपानुभवात् प्रच्युतं भवति। ततश्च संसरति। एवं संसरत् ब्रह्म कदाचित् स्वप्नदशायामिव स्वाविद्याकल्पितेन गुरुणा शास्त्रेण चोत्पादितया स्वगोचरविद्यया जीवभावादिप्रयोजकाविद्यानिवृत्तौ मुच्यते—नित्यसिद्धनिरतिशयानन्दमनुभवति स्वरूपचैतन्येनैव इति भाष्यार्थः। **अज्ञस्येति**। अज्ञानावृतनिजस्वरूपस्येत्यर्थः। **तत्त्वमस्यादीति**। गुरूपदिष्टतत्त्वमस्यादिवाक्यजन्यज्ञानेन अज्ञाननिवृत्तौ जीवभाव आत्मनो निवर्तत इत्यर्थः। एवं जीवं निरूप्य ईश्वरं निरूपयति—**एवं चेति**। भाष्यवार्तिकपर्यालोचनया प्रतिबिम्बभावादिरहितस्य पूर्णब्रह्मण एव जीवत्वे सिद्धे सतीत्यर्थः। ईश्वरोऽपि सर्वज्ञत्वादिधर्मैस्सह जीवकल्पित इति सम्बन्धः। यथोक्तजीवस्यैवेश्वरकल्पकत्वे हेतुमाह—**स्वाविद्येत्यादिना**। अन्यस्यकल्पकस्याभावादितितात्पर्यकं अवधारणम्। जीवस्येश्वरकल्पकत्वे दृष्टान्तमाह—**स्वप्नेति**। यथा स्वप्नद्रष्टा जीव एव परां देवतां सर्वज्ञत्वादिधर्मैस्सहितां कल्पयति, कल्पयित्वा च तामहर्निशमुपास्ते, तदुपासनया चाभ्युदयनिश्रेयसलक्षणं फलं लभते, एवं जागरणेऽपि, इति दृष्टान्तादेः[3] अभिप्रायः।

---

1. भाष्ये प्रतिपादनादिति। बृहदारण्यके अजातशत्रुब्राह्मणे 'अत्र च संप्रदायविदः आख्यायिकां संप्रचक्षते' इत्यादिना भाष्ये अर्थतः प्रतिपादनात् इत्यर्थः।

अत्र भाष्ये कश्चित् राजकुमारः दृष्टान्तत्वेन उक्तः न तु कर्णः। 'राजसूनोः स्मृतिप्राप्तौ' इति वार्तिकटीकयोरपि 'कश्चित् राजसूनुः' इत्येव वार्तिकग्रन्थः व्याख्यातः। ब्रह्मविद्यया अविद्यानिवृत्त्या निरतिशयानन्दानुभवे कर्णो न दृष्टान्तो भवितुमर्हति च। कर्णस्य कौन्तेयत्वानुभवेन श्रेयःप्राप्तेः भारतादिषु अप्रतिपादनात्। अतः 'कश्चित् राजकुमारः' इत्येव युक्तम्। कृष्णालङ्कारे तु आख्यायिकोक्तराजकुमारः कर्ण इति भाष्यार्थत्वेन व्याख्यातः। भाष्ये तथाऽनुपलम्भात् उक्तटीकाग्रन्थः समालोचनीयः इति भाति।

2. राजसूनोः स्मृतिप्राप्ताविति। अत्र आनन्दगिरीयवार्तिकटीकायां च स्मृतिशब्दाः सर्वे आप्तोपदेशजन्यानुभवार्थकाः। भाष्ये विद्यासागरीयवार्तिकटीकायां च अनुभवप्राप्तिरेव प्रतिपादिता। तस्यैव अविद्योच्छेदकत्वसंभवात्।

3. दृष्टान्तादेरिति। स्वप्नोपलब्धदेवतादिवत् इति मूलस्थदृष्टान्तबोधकपदघटकस्य आदिपदस्य इत्यर्थः।

जीवैकत्वनानात्वविचारः

तत्र मतभेदेन एकजीववादनिरूपणम्

अथायं जीव एकः, उतानेकः। अनुपदोक्तपक्षावलम्बिनः केचित् आहुः—**एको जीवः। तेन चैकमेव शरीरं सजीवम्। अन्यानि स्वप्नदृष्टशरीराणीव निर्जीवानि। तदज्ञानकल्पितं सर्वं जगत्। तस्य स्वप्नदर्शनवद्यावदविद्यं सर्वो व्यवहारः। बद्धमुक्तव्यवस्थापि नास्ति जीवस्यैकत्वात्। शुकमुक्त्यादिकमपि स्वाप्नपुरुषान्तरमुक्त्यादिकमिव कल्पितम्। अत्र च सम्भावितसकलशङ्कापङ्कप्रक्षालनं स्वप्नदृष्टान्तसलिलधारयैव कर्तव्यम्**—इति।

अन्ये तु - **अस्मिन्नेकशरीरैकजीववादे [1]मनःप्रत्ययमलभमानाः 'अधिकं तु भेदनिर्देशात्'**

जीवेश्वरनिरूपणप्रसङ्गेन विचारान्तरमारभते— **अथेति। अनुपदोक्तेति।** 'ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यते' इत्यादिग्रन्थोक्तेत्यर्थः। **एक इति।** ब्रह्मण एकत्वात् तत्र च अवच्छेदप्रतिबिम्बभावयोरनङ्गीकाराच्च इत्यर्थः। ननु जीवैक्ये तेन एकमेव शरीरं सजीवं स्यात् न सर्वशरीराणि इत्याशङ्कामिष्टापत्त्या परिहरति—**तेन चेति।** ननु यथा एकशरीरे हिताहितप्राप्तिपरिहारार्थस्पन्दनरूपा चेष्टा दृश्यते तथा सर्वशरीरेषु दृश्यते, तथा च कथमेकमेव शरीरं सजीवं, तत्राह—**अन्यानीति।** स्वप्नदशायां स्वप्नद्रष्टृशरीरं एकमेव सजीवम्, स्वप्नद्रष्ट्रा दृष्टान्यन्यानि शरीराणि तु चेष्टाविशेषवत्तया दृश्यमानान्यपि सजीवानि न भवन्ति, तथा जागरणेऽपि इति द्रष्टव्यम्। ननु स्वाप्नस्य जगतः कल्पिका तावत् निद्रा अन्वयव्यतिरेकसिद्धा यथा वर्तते न तथा जाग्रत्प्रपञ्चस्य कल्पकं अन्वयव्यतिरेकसिद्धं किञ्चिदस्तीति जगत् सत्यमेव स्यात्, नेत्याह—**तदज्ञानेति।** जीवाज्ञानेत्यर्थः। अज्ञानस्य जगत्कल्पकत्वं शास्त्रसिद्धमिति भावः। ननु सर्वव्यवहारस्य स्वप्नव्यवहारवत् कल्पितत्वे तद्वदेव सहसा व्यवहारलोपः प्रसज्येत, तथा च विद्यानर्थक्यमिति, नेत्याह—**तस्येति।** जीवस्येत्यर्थः। यावन्निद्राक्षयं स्वप्नव्यवहारानुवृत्तिवत् विद्यया यावदविद्यानिवृत्ति सर्वव्यवहारानुवृत्तिर्युज्यते इति न विद्यावैफल्यम्, अविद्यानिवृत्त्यर्थमपेक्षितत्वात्, इति भावः। ननु - जीवैकत्वमते एको जीवो बद्धः अन्यो जीवो मुक्तः इति व्यवस्था शुकादिमुक्तिप्रतिपादकशास्त्रसिद्धा न स्यात् - इत्याशङ्क्य इष्टापत्तिरित्याह—**बद्धेति। शुकेति।** यथा स्वप्नादुत्थितः स्वप्नभ्रान्तिसिद्धां पुरुषान्तरमुक्तिं परं प्रति बोधयति, तथा जीवभ्रान्तिसिद्धां शुकादिमुक्तिं तं प्रत्येव बोधयति श्रवणादिषु प्रवृत्त्युपयोगितया, इति भावः। ननु जीवैक्यमते विद्योपदेष्टुरन्यस्याभावात् विद्योदयो न स्यात्, जीवेश्वरविभागाभावेन जीवस्येश्वरोपासनादिव्यवहारश्च न स्यात्, इत्याशङ्क्याह—**अत्र चेति।** यथा स्वप्नदशायां स्वप्नदृक् कंचित् गुरुमीश्वरं च कल्पयित्वा तावुपास्ते, ताभ्यां च विद्यादिकं लभते, तद्वदिति भावः॥

एकजीववादे एव मतान्तरमाह—**अन्ये त्विति। एकशरीरेति।** एकमेव शरीरं सजीवं

---

1. मनःप्रत्ययमिति। मनश्शब्देन मनोवृत्तिः विवक्षिता। प्रत्ययः-प्रमात्वनिश्चयः। तथा च एकशरीरैकजीववादविषयके मनोवृत्तिरूपे ज्ञाने प्रमात्वनिश्चयं इत्यर्थः। अतो न मनश्शब्दवैयर्थ्यम्। उक्तवादे प्रामाणिकत्वनिश्चयं इति तु फलितार्थः। स च टीकायां उक्तः।

[ब्र. सू. २-१-२२] 'लोकवत्तु लीलाकैवल्यम्' [ब्र. सू. २-१-३३] इत्यादिसूत्रैः 'जीवाधिक ईश्वर एव जगतः स्रष्टा, न जीवः, तस्य आप्तकामत्वेन प्रयोजनाभावेऽपि केवलं लीला जगतः सृष्टिः' इत्यादि प्रतिपादयद्भिः विरोधं च मन्यमानाः - हिरण्यगर्भ एको [1]ब्रह्मप्रतिबिम्बो मुख्यो जीवः, अन्ये तु तत्प्रतिबिम्ब[2]भूताः चित्रपटलिखितमनुष्यदेहार्पितपटाभासकल्पाः जीवाभासाः संसारादिभाजः - इति सविशेषानेकशरीरैकजीववादमातिष्ठन्ते ।

यस्मिन्नेकजीववादे स तथोक्तः । **मनःप्रत्ययमिति ।** मनसो विश्वासं, प्रामाणिकत्वनिश्चयं इत्यर्थः । एकमेव शरीरं सजीवं शरीरान्तराणि निर्जीवानि इत्यत्र विनिगमकाभावः, न च जीवैक्यं विनिगमकमिति वाच्यम्, एकोऽपि जीवः कस्मिन् शरीरे वर्तते इत्यत्र विनिगमकस्य वक्तुमशक्यत्वात्, इति भावः । **अधिकं त्विति ।** जीवाभिन्ने ईश्वरे वेदान्तानां प्रथमाध्याये निरूपितस्समन्वयो न घटते । तथा सति ईश्वरगतजगत्स्रष्टृत्वादेर्जीवधर्मत्वप्रसङ्गात् । तथा चानुभवविरोधः इति पूर्वपक्षनिरासार्थः तुशब्दः । अधिकं - जीवादुपाधितो भिन्नं ब्रह्म जगत्स्रष्टृत्वसर्वज्ञत्वादिगुणकमभ्युपगम्यते । अतो न ब्रह्मधर्माणां जीवे प्रसक्तिः । औपाधिकभेदस्यापि धर्मव्यवस्थापकताया लोकसिद्धत्वात् । कल्पितभेदाङ्गीकारे हेतुमाह—**भेदनिर्देशादिति ।** 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति' इत्यादौ नियम्यनियामकभावादिना भेदनिर्देशात् इति सूत्रार्थः । 'लोकवत्' इति सूत्रं पूर्वमेव व्याख्यातम् । अत्र आदिपदेन 'अनुपपत्तेस्तु न शारीरः' [ब्र. सू. १-२-३] इत्यादिसूत्रं गृह्यते । मनोमयत्वादिगुणको न शारीरः । तस्मिन् सर्वकर्मत्वादीनामनुपपत्तेरेव इति सूत्रार्थः । **विरोधं चेति ।** मनःप्रत्ययमलभमानाः विरोधं च मन्यमानाः इति चशब्दार्थः । जीवातिरिक्तेश्वराभाववादेऽस्मिन् जगत्सृष्ट्यादिसमर्थस्य व्यावहारिकभेदवत ईश्वरस्य अस्तित्वजगत्स्रष्टृत्वसर्वात्मकत्वादिगुणप्रतिपादकैः सूत्रैः विरोधमित्यर्थः । **ब्रह्मप्रतिबिम्ब इति ।** अनेन बिम्बभूतं ब्रह्म जीवादधिकमीश्वररूपं अस्मिन् मतेऽस्ति अतो नोदाहृतसूत्रविरोधः इति सूचितम् । **तदिति ।** ब्रह्मप्रतिबिम्बभूतहिरण्यगर्भस्य भौतिकजगत्स्रष्टृतया [3]कारणोपाधितया च मुख्यजीवस्य प्रतिबिम्बभूता अन्ये जीवा जीवाभासाः, तद्वत् सृष्ट्यादिसामर्थ्याभावात् इत्यर्थः । **कल्पा इति ।** तुल्या इत्यर्थः । **संसारादिभाज इति ।** अनेन यथा हिरण्यगर्भशरीरं मुख्यजीवेन सजीवं तथा इतराण्यपि शरीराणि जीवाभासैस्सजीवानीति पूर्वमताद्विशेषस्सूचितः । अत्रादिपदं मुक्तिसङ्ग्रहार्थम् । [4]जीवाभासानां मुक्तिश्च स्वबिम्बभूतहिरण्यगर्भप्राप्तिक्रमेण शुद्धब्रह्मप्राप्तिः इति मन्तव्यम् । **सविशेषेति ।** सविशेषाणि — [मुख्यामुख्यविभागेन] सजीवानि अनेकशरीराणि यस्मिन्नेकजीववादे स तथा । आतिष्ठन्ते—अङ्गीकुर्वन्तीत्यर्थः ।

1. ब्रह्मप्रतिबिम्ब इति । 'अविद्यायां' इति आदिः ।
2. तत्प्रतिबिम्बेति । 'अन्तःकरणेषु' इति आदिः ।
3. कारणेति । कारणं—अविद्या ।
4. जीवाभासानां मुक्तिश्चेत्यादि । जीवाभासानां ज्ञानोदये हिरण्यगर्भभावापत्तिः, तन्मुक्तौ शुद्धब्रह्मरूपतापत्तिः, सा च मुक्तिः इत्यर्थः ।

अपरे तु हिरण्यगर्भस्य प्रतिकल्पं भेदेन कस्य हिरण्यगर्भस्य मुख्यजीवत्वमित्यत्र नियामकं नास्तीतिमन्यमानाः—एक एव जीवोऽविशेषेण सर्वं शरीरमधितिष्ठति। नचैवं शरीरावयवभेद इव शरीरभेदेऽपि परस्परसुखाद्यनुसन्धानप्रसङ्गः। जन्मान्तरीयसुखाद्यनुसन्धानादर्शनेन [1]शरीरभेदस्य तदननुसन्धानप्रयोजकत्वक्लृप्तेः। [2]योगिनस्तु कायव्यूहसुखाद्यनुसन्धानं व्यवहितार्थग्रहणवत् योगप्रभावनिबन्धनमिति न तत् [3]उदाहरणम्—इति अविशेषानेकशरीरैकजीववादं रोचयन्ते।

अत्राप्यस्वरसं वदन्नेकजीववादमेवाह—**अपरे त्विति। एक एवेति।** अविद्यायां ब्रह्मप्रतिबिम्बरूपो जीवस्तावदेकः। अविद्याया एकत्वात्। स एव च सर्वं शरीरं स्वभोगार्थमधितिष्ठति। न तु 'अविद्यायां ब्रह्मप्रतिबिम्बो हिरण्यगर्भशरीरमधितिष्ठति अन्यानि तु शरीराणि तत्प्रतिबिम्बा जीवाभासा अधितिष्ठन्ति'। कुतः, इतरजीवानां तत्प्रतिबिम्बत्वे मानाभावात् इत्येवकारार्थः। **अविशेषेणेति।** मुख्यामुख्यविभागं विनेत्यर्थः। जीवभेदे हि सति कश्चिन्मुख्यो जीवः कश्चिच्चामुख्यो जीवाभासः इति विभागस्सम्भवेत्, न त्वेतदस्ति, तस्यैकत्वाभ्युपगमात्, इति भावः। ननु देवदत्तस्य शिरःपाणिपादानधितिष्ठत एकस्य यथा 'शिरसि मे वेदना पादे मे सुखम्' इत्याद्यनुसन्धानं दृश्यते एवमेकस्यैव जीवस्य सर्वशरीराधिष्ठातृत्वे मम देवदत्तशरीरे सुखं यज्ञदत्तनामकशरीरे दुःखं इत्यादिरूपेण सर्वत्रानुसन्धानप्रसङ्गः, इति शङ्कते - **न चैवमिति।** शरीरभेदस्याननुसन्धानप्रयोजकत्वाभ्युपगमान्नोक्तातिप्रसङ्गः, न च तत्र मानाभावश्शङ्कनीयः, जीवस्य अतीतशरीरेषु वर्तमानशरीरे चैकत्वेऽपि जन्मान्तरीयसुखाद्यननुसन्धानदर्शनेन तद्भेदस्य तत्प्रयोजकतायाः सम्प्रतिपन्नत्वात् इति परिहरति—**जन्मान्तरीयेति।** ननु योगिनो देहभेदे सत्यप्यनुसन्धानदर्शनात् व्यभिचार इत्यत आह— **योगिनस्त्विति।** अस्मदादिवैलक्षण्यार्थकः तुशब्दः। तद्दर्शयति—**कायेति।** नह्यस्मदादीनां व्यवहितार्थसाक्षात्कारोऽस्ति। तत्प्रयोजकादृष्टविशेषाभावात्। तथा च शरीरभेदमात्रं न तत्प्रयोजकं, किंतु अदृष्टविशेषासहकृतशरीरभेदोऽननुसन्धानप्रयोजकः, इति न योग्यनुसन्धानस्थले व्यभिचार इति भावः। योगपदं योगजादृष्टपरम्। **अविशेषेति।** अविशेषेणाधिष्ठितान्यनेकशरीराणि यस्मिन्नेकजीववादे स तथेत्यर्थः॥

---

1. शरीरभेदस्येति। अयं भावः-अस्मिन् एकजीववादे जीवस्य व्यापकत्वेन सर्वशरीरसंबन्धेऽपि तस्य सुखदुःखाद्यभिव्यक्तिप्रयोजकानां तदुपाध्यज्ञानपरिणामानां अन्तःकरणानां प्रतिशरीरं भिन्नत्वेन तत्तच्छरीरेन्द्रियविषयसंपर्ककारिकारणवशात् सुखदुःखेच्छाज्ञानकृत्याद्यात्मना परिणते तत्तदन्तःकरणे एव सर्वतो विसृत्वरस्य सवितृप्रकाशस्य दर्पणे इव तस्याभिव्यक्तौ तत्तच्छरीरावच्छेदेनैव 'अहं सुखी' इत्यादिः नान्यत्रेति व्यवस्थितोऽनुभवः क्लृप्तः - इति।

एतेन—एकजीववादे तदधिष्ठितयज्ञदत्तशरीरात् भिन्नेऽपि देवदत्तशरीरे सुखाद्युत्पत्तिसमये तदवच्छेदेन तस्य 'अहं सुखी' इत्याद्यनुसन्धानदर्शनात् शरीरभेदस्य अननुसन्धानप्रयोजकत्वं मूलोक्तं अनुपपन्नम्—इति शङ्का परास्ता

2. योगिनस्त्विति। ननु-एकजीववादे योग्ययोगिविभागः कथमुपपद्यते—इति चेत्, उच्यते—तत्तच्छरीरस्थान्तःकरणरूपजीवभावाभिव्यक्तिनियामकभेदभिन्नप्रदेशे अन्तःकरणस्य योगयुक्तत्वे योगित्वं, अन्यथा तु अयोगित्वं इति विभागसंभवः—इति।

3. उदाहरणमिति। अननुसन्धानशरीरभेदयोः प्रयोज्यप्रयोजकभावस्य व्यभिचारनिरूपकाधिकरणं इत्यर्थः।

नानाजीववादनिरूपणम्

इतरे तु अत्रापि [1]बन्धमुक्तिव्यवस्थाभावस्य तुल्यत्वेन 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' [बृ. उ. १-४-१०] इत्यादिश्रुतेः 'प्रतिषेधादिति चेन्न शारीरात्' [ब्र.सू. ४-२-१२] इत्यधिकरणे शुकमुक्तत्वप्रतिपादकभाष्यस्य चानाञ्जस्यमित्यपरितुष्यन्तः अन्तःकरणादीनां जीवोपाधित्वाभ्युपगमेन अनेकजीववादमाश्रित्य बन्धमुक्तिव्यवस्थां प्रतिपद्यन्ते।

अनेकजीववादमुत्थापयति—**इतरे त्विति। अत्रापीति।** अव्यवहितमतेऽपीत्यर्थः। यद्येकजीववादे व्यवस्था न सिद्धयति ततः को दोषः, इत्याशङ्क्य श्रुतिस्मृतिभाष्याणामनाञ्जस्यं दोष इत्याह—**तद्योय इति।** देवानां मध्ये यो यो देवः तत्-ब्रह्म प्रत्यबुध्यत साक्षात्कृतवान्, स एव तत्-ब्रह्म अभवत्, नान्यो ब्रह्मबोधरहितः, इति विदुषो मुक्तत्वं अविदुषो बद्धत्वं च प्रतिपादयन्त्या श्रुत्या बन्धमुक्तिव्यवस्था दर्शिता। आदिपदेन 'अजामेकां' इति श्रुतिः बन्धमुक्तिव्यवस्थाप्रतिपादकत्वेन भाष्यकारादिभिरङ्गीकृता गृह्यते। श्रुतिग्रहणं 'यद् गत्वा न निवर्तन्ते तद्धाम परमं मम' [भ.गी.१५.६] इत्यादिस्मृतीनामुपलक्षणम्। **प्रतिषेधादिति।** इदं पूर्वपक्षसूत्रम्। बृहदारण्यके काण्वशाखायां 'न तस्य प्राणा उत्क्रामन्ति' इति वाक्येन परब्रह्मतत्त्वविदः प्राणोत्क्रान्तिप्रतिषेधात् तस्य गत्युत्क्रान्ती न स्तः, उत्क्रान्तिपूर्वकत्वाद्गतेः, इति चेदिति सिद्धान्तिशङ्काभागार्थः। पूर्वपक्षी तां दूषयति—**न शारीरादिति।** बृहदारण्यक एव माध्यन्दिनशाखायां समानप्रकरणे ब्रह्मविदं शारीरं प्रकृत्य 'न तस्मात् प्राणा उत्क्रामन्ति' इति वाक्यं पठ्यते। अत्र तच्छब्देन प्रकृतः शारीरो गृह्यते, न शरीरम्। तस्य शरीरापेक्षया प्रधानत्वात्। तथा च 'न तस्मात्' इति वाक्येन शारीराज्जीवात् प्राणानामुत्क्रमणं निषिध्यते, न शरीरात्। अतः शरीरादुत्क्रमणं विदुषोऽप्यस्तीति तस्यापि गत्युत्क्रान्ती स्त एव। 'न तस्य प्राणाः' इति काण्ववाक्यस्यापि तस्य विदुषः प्राणाः शारीरात् नोत्क्रामन्ति, किं तु तेन सहैव ब्रह्मलोकं गच्छन्ति इत्यर्थो बोध्यः। **अनाञ्जस्यमिति।** आञ्जस्याभावः-उपपन्नत्वाभाव इत्यर्थः। **अन्तःकरणानामिति।** न च नानाजीववादेऽपि 'ब्रह्मैव स्वाविद्यया संसरति, स्वविद्यया मुच्यते' इत्यर्थेन बृहदारण्यकभाष्ये प्रतिपादितेन विरोधस्तुल्य इति वाच्यम्। [तत्प्रतिपादकभाष्यस्य] (तद्भाष्यप्रतिपादनस्य) 'ब्रह्मैव स्वाविद्यया नानान्तःकरणरूपेण परिणतया नानाजीवभावं प्राप्य संसरति, स्वविद्यया [2]क्रमेण मुच्यते' इत्यभिप्रायकत्वोपपत्तेः।

---

1. बन्धमुक्तिव्यवस्थाभावस्येति। एकजीवश्रवणादिसाधनसंपत्त्या यस्यान्तःकरणस्य तत्त्वसाक्षात्कारात्मकः परिणामः तस्य बाधात् तदवच्छेदेन दुःखानुपलब्धिमात्रात् शुकादिषु मुक्तव्यवहारः अन्येषां बद्धव्यवहारः इति यद्यपि बन्धमुक्तिव्यवस्था उपपादयितुं शक्यते उक्तैकजीववादे, एवं तत्तदन्तःकरणशरीराद्यभिमानप्रयुक्ता चैत्रमैत्रादिभेदव्यवस्था च, तथाऽपि अत्र अनाञ्जस्यं ये मन्यन्ते तद्दृष्ट्या बन्धमुक्तिव्यवस्थाभावस्य तुल्यत्वेनेत्युक्तम्।

2. क्रमेणेति। एकजीववादे न क्रमः। नानाजीववादे तु जीवानां ब्रह्मविद्याप्राप्तौ यौगपद्ये जीवनानात्वाभ्युपगमवैयर्थ्यात् बन्धमुक्तिव्यवस्थानुपपत्तेश्च अयौगपद्याद्ब्रह्मविद्याप्राप्तेः यस्य यदा ब्रह्मविद्योत्पत्तिः स तदा मुच्यते नान्यः, अन्यस्तु कालान्तरे ब्रह्मविद्योत्पत्तौ मुच्यते, इत्येवं क्रमेण इत्यर्थः। न तु—एको जीवः क्रमेण मुच्यते—इति।

नानाजीववादे मतभेदेन बन्धमुक्तिव्यवस्थोपपादनम्

तेषु केचिदेवमाहुः—**यद्यपि शुद्धब्रह्माश्रयविषयमेकमेवाज्ञानं, तन्नाश एव च मोक्षः, तथापि जीवन्मुक्तावज्ञानलेशानुवृत्त्यभ्युपगमेन अज्ञानस्य सांशत्वात् तदेव क्वचिदुपाधौ ब्रह्मावगमोत्पत्तौ अंशेन निवर्तते, उपाध्यन्तरेषु यथापूर्वमंशान्तरैरनुवर्तते—इति ।**

श्रुतिस्मृत्युपोद्बलितशुकादिमुक्तिप्रतिपादकभाष्यस्य 'ब्रह्मैव स्वाविद्यया संसरति' इति भाष्यमात्रस्वारस्यमनुसृत्य अन्यथानयनायोगात् । न च उदाहृतश्रुतिस्मृतिभाष्याणां ब्रह्मात्मैकत्वपरत्वेन नानाजीववादे तात्पर्याभावात् तेभ्यो जीवनानात्वं न सिद्ध्यतीति वाच्यम् । एकजीववादेऽपि तात्पर्याभावस्य तुल्यत्वात् । न च जीवत्वोपाधिभूताया अविद्याया एकत्वात् जीवैक्यसिद्धिरिति वाच्यम् । उदाहृतश्रुतिस्मृतिभाष्यानुरोधेन अविद्यानानात्वाभ्युपगमसम्भवात् तदेकत्वश्रुत्यादीनां जात्यभिप्रायकत्वोपपत्तेः । अविद्याया एकत्वेऽपि 'कार्योपाधिरयं जीवः' इति श्रुत्यनुसारेण अन्तःकरणानामेव जीवत्वोपाधित्वोपगमसम्भवाच्च इति भावः ।

नानाजीववादे मतभेदेन बन्धमुक्तिव्यवस्थामुपपादयितुमारभते—**तेष्विति** । नानाजीववादिषु मध्ये इत्यर्थः । **केचिदिति** । ननु नानाजीववादेऽपि जीवस्यान्तःकरणोपाधिकत्वपक्षे मूलाज्ञानस्य एकत्वेन शुकादितत्त्वज्ञानेनैव तस्य निवृत्तत्वात् इदानीं संसारानुपलब्धिप्रसङ्ग इत्याशयेन शङ्कते—**यद्यपीति** । **शुद्धब्रह्माश्रयेति** । जीवेश्वरयोर्विशिष्टरूपयोरज्ञानाश्रयत्वं न सम्भवति । तयोः कल्पितत्वात् । तथा शुद्धस्यैवावृतत्वरूपं विषयत्वं न त्वीश्वरस्यापि, तस्य जीवान्तरवदौपाधिकभेदादेवानुपलब्धिसिद्धौ जीवान् प्रति ईश्वरस्य अज्ञानावृतत्वरूपविषयत्वकल्पनस्य व्यर्थत्वात् इति भावः । **एकमेवेति** । 'अजामेकां' 'मायां तु प्रकृतिं विद्यात्' 'विभेदजनकेऽज्ञाने' इतिश्रुतिस्मृतिषु एकवचनश्रवणेन लाघवेन च तस्यैकत्वावगमात् इति भावः । **तन्नाश एव चेति** । 'भूयश्चान्ते विश्वमायानिवृत्तिः' 'अज्ञाने नाशमात्यन्तिकं गते' इत्यादिश्रुतिस्मृतिषु सर्वानर्थमूलाज्ञाननिवृत्तेर्मोक्षत्वावगमात् इति भावः । एकस्य तत्त्वज्ञानेन कृत्स्नाज्ञाननाशो नाङ्गीक्रियते येन व्यवस्था न स्यात् । किं तु तस्य तस्य ज्ञानेन तत्तदन्तःकरणादिपरिणामिनो मूलाज्ञानांशस्यैव नाश उपेयते । न च तस्य सांशत्वे मानाभाव इति वाच्यम् । जीवन्मुक्तौ आवरणशक्तिमदंशस्य नाशेऽपि विक्षेपशक्तिमदज्ञानांशस्य ज्ञानादनिवृत्तस्य यावद्विदेहकैवल्यमनुवृत्त्युपगमेन तस्य सांशत्वावगमात् । तथा च अज्ञानस्य अनिर्वचनीयस्य अनिर्वचनीयानामेव भागरूपांशानां अनन्तानां सम्भवात् तानादाय बन्धमुक्तिव्यवस्था सूपपादा इति परिहरति—**तथापीत्यादिना** ।

[1]अज्ञानसत्त्वं बन्धः तन्नाशो मोक्षः इति मतमुक्तम् । इदानीं चैतन्यस्याज्ञानसंबन्धो बन्धः, तदसंबन्धो मोक्षः न तु तन्निवृत्तिः । असंबन्धमात्रेणैव बन्धनिवृत्तिसिद्धेः । ज्ञानादज्ञाननिवृत्तिप्रतिपादकशास्त्रस्यापि

---

1. अज्ञानसत्त्वं बन्ध इत्यादि । तदन्तःकरणरूपपरिणामविशिष्टाज्ञानसत्त्वं तदन्तःकरणोपाधिकस्य जीवस्य बन्धः । तन्निवृत्तिः तस्य मोक्षः इत्यर्थः ।

अन्ये तु - यथा [1]न्यायैकदेशिमते भूतले घटात्यन्ताभावस्य वृत्तौ घटसंयोगाभावो नियामक इति अनेकेषु प्रदेशेषु तद्वत्सु संसृज्य वर्तमानघटात्यन्ताभावः क्वचित्प्रदेशे घटसंयोगोत्पत्त्या तदभावनिवृत्तौ न संसृज्यते, एवमज्ञानस्य चैतन्ये वृत्तौ मनो नियामकमिति तदुपाधिना तत्प्रदेशेषु संसृज्य वर्तमानमज्ञानं क्वचिद्ब्रह्मदर्शनोत्पत्त्या 'भिद्यते हृदयग्रन्थिः' इति [2]श्रुत्युक्तरीत्या मनसो निवृत्तौ न संसृज्यते, अन्यत्र यथापूर्वमवतिष्ठते। अज्ञानसंसर्गासंसर्गावेव च बन्धमोक्षौ - इत्याहुः।

तदसम्बन्धे एव तात्पर्योपपत्तेः, [3]अन्यथा मूलाज्ञानस्य विरोधिज्ञानोदये सति तूलपिण्डस्य विरोध्यग्निसंसर्ग इव अवशेषासम्भवेन बन्धमुक्तिव्यवस्थाशास्त्रस्य जीवन्मुक्तिशास्त्रस्य च निरालम्बनत्वप्रसङ्गात्, इति मन्यमानानां मतमाह—**अन्ये त्विति**। प्रथमं प्रकृतोपयोगिदृष्टान्तमाह—**यथेति**। 'भूतले घटो न' इत्यनुभवसिद्धो घटाभावस्त्रैकालिकत्वाभ्युपगमात् घटानयनानन्तरं तदधिकरणेऽपि भूतले वर्तत एव। तथा च घटवत्यपि भूतले घटो नास्तीति प्रतीतिः प्रमा स्यात् इतिदोषप्रसक्तौ तत्परिहाराय नैयायिकाः कल्पयन्ति - घटाधिकरणे तदत्यन्ताभावस्य सम्बन्धाभावेन तत्र तत्प्रतीतेर्भ्रान्तित्वोपपत्तिः। न च घटसंयोगोत्पत्तेः पूर्वं भूतले सम्बन्धवतस्तस्य घटसंयोगकाले कथमवृत्तिरूपस्सम्बन्धाभाव इति वाच्यम्। प्रतीत्यनुसारेण भूतलादौ घटात्यन्ताभाववृत्तौ घटसंयोगस्य प्रागभावप्रध्वंसाभावयोः [4]अन्यतराभावो नियामक इति कल्पनेन घटसंयोगाधिकरणभूतले घटाभावस्यासम्बन्धोपपत्तेरिति। तदेतन्मतं दृष्टान्तीकरोति — **न्यायैकदेशिमत इति**। **तद्वत्स्विति**। घटसंयोगाभाववत्स्वित्यर्थः। [5]**तदुपाधिनेति**। मन एवोपाधिः, तेनेत्यर्थः। **क्वचिदिति**। चैतन्यप्रदेशे इत्यर्थः। ब्रह्मदर्शनोत्पत्त्या मनसो निवृत्ताविति सम्बन्धः। ब्रह्मदर्शनं मनसो निवर्तकमित्यत्र मानमाह—**भिद्यते इति**। हृदयग्रन्थिरित्यत्र हृदयपदमन्तःकरणपरम्, तच्चान्तःकरणं चिदात्मन्यध्यस्ततया तत्तादात्म्यापन्नं सत् ग्रन्थिरिव ग्रन्थिः, स च ब्रह्मदर्शने जाते ब्रह्मण्येव विलीयते इति श्रुत्यर्थः। **अन्यत्रेति**। चैतन्यप्रदेशान्तरेष्वित्यर्थः।

---

1. घटाभाववद्भूतलप्रमाकालस्य संबन्धे घटनेन अधिकरणस्वरूपविशेषस्य अत्यन्ताभावीयसंबन्धत्वं अङ्गीकृत्य घटवति भूतले घटाभावप्रमितिं वारयतां मतात् वैलक्षण्यसूचनार्थं न्यायैकदेशिमते इति।

2. श्रुत्युक्तरीत्येति। हृदयशब्दितस्य अन्तःकरणस्य ग्रन्थिशब्देन चिदात्मरूपे ब्रह्मणि अध्यस्तत्वोक्तिः श्रुत्युक्ता रीतिः, तेनेत्यर्थः। मनसो ब्रह्मण्यध्यस्तत्वस्य श्रुत्युक्तत्वेन इति यावत्।

3. अन्यथेति। अज्ञानतन्निवृत्त्योः बन्धमोक्षस्वरूपत्वे इत्यर्थः।

4. अन्यतराभाव इति। अन्यतरो योऽभावः इत्यर्थः। घटसंयोगात्यन्ताभावस्य नियामकत्वे तस्यापि त्रैकालिकत्वेन उक्तदोषतादवस्थ्यं तत्संबन्धे नियामकान्तरस्योक्तौ तस्यापि त्रैकालिकत्वे उक्तदोषावारणं च आशङ्क्य प्रागभावप्रध्वंसाभावयोः अन्यतरस्य नियामकत्वमुक्तम्।

5. मूले तदुपाधिनेति कर्मधारय इति भावः।

अपरे तु - **नाज्ञानं शुद्धचैतन्याश्रयम्, किं तु जीवाश्रयं ब्रह्मविषयम्। अतश्च अन्तःकरणप्रतिबिम्बरूपेषु सर्वेषु जीवेषु व्यक्तिषु जातिवत् प्रत्येकपर्यवसिततया वर्तमानं उत्पन्नविद्यं कंचिज्जहाति नष्टां व्यक्तिमिव जातिः, स एव मोक्षः, अन्यं यथापूर्वमाश्रयति, इति व्यवस्था - इत्याहुः।**

नाज्ञानमिति। शुद्धचैतन्यस्य [1]वेदान्तशास्त्रप्रतिपाद्यस्य नाज्ञानाश्रयत्वम्, तस्य 'वेदान्तवेद्यं वस्तु न जानामि' इत्यज्ञानविषयत्वेनैवानुभवात् इति भावः। **जीवाश्रयमिति।** 'न जानामि' इत्यज्ञानाश्रयत्वेन जीवस्यैवानुभवात्[2]। न च अज्ञानस्य स्वकार्यान्तःकरणविशिष्टचैतन्यरूपजीवाश्रितत्वमनुपपन्नमिति वाच्यम्। अन्तःकरणे यत् प्रतिबिम्बभूतं चैतन्यं तस्यैव जीवत्वाभ्युपगमेन विशिष्टस्य जीवत्वानुपगमात्। न चान्तःकरणस्य सादितया तद्गतप्रतिबिम्बस्यापि सादित्वात् कथं तस्य अनाद्यज्ञानाश्रयत्वमिति वाच्यम्। अन्तःकरणस्य स्वापादौ लयश्रवणेन जाग्रदादौ जन्मश्रवणेन च सादित्वावगमेऽपि तस्य [3]स्थूलसूक्ष्मरूपेणानादितायाः 'पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्' [ब्र. सू. १-३-३१] इति सूत्रे व्यवस्थापितत्वात्। यथा पुंस्त्वस्त्रीत्वादेः शुक्रशोणितस्तनादिरूपस्य बाल्यादावनभिव्यक्तस्य यौवने प्रादुर्भावः, तथा अस्य अन्तःकरणस्य स्वापादावनभिव्यक्ततया सत एव स्थूलावस्थाप्राप्तिरूपाया अभिव्यक्तेर्युक्तत्वात्, असतश्शशशृङ्गादेरुत्पत्त्यदर्शनात्, इति सूत्रार्थः। [4]अविद्याया अनादिचैतन्यप्रतिबिम्बाश्रितत्वस्य मायाऽविद्याभेदवादनिरूपणावसरे समर्थितत्वात्। **प्रत्येकेति।** द्वित्वबहुत्वादिवत् अज्ञानस्य सर्वजीवव्यक्तिषु व्यासज्ज्यवृत्तित्वे सर्वेषां [5]प्रत्येकं 'अहमज्ञः' इति प्रत्यक्षं न स्यात्, व्यासज्ज्यवृत्तिधर्मप्रत्यक्षस्य यावदाश्रयप्रत्यक्षसापेक्षत्वेन एकैकस्य जीवस्य सर्वजीवप्रत्यक्षाभावात्, इत्यर्थः। [6]वस्तुतस्तु अज्ञानस्य व्यास-

---

1. वेदान्तशास्त्रप्रतिपाद्यस्येति। अज्ञानविषयत्वेनैव अनुभवात् इति संबन्धः। तत्र भासमानं शुद्धमेव इत्यत्र हेतुगर्भमिदं विशेषणं वेदान्तशास्त्रप्रतिपाद्यस्येति। तथा च अज्ञानाश्रयत्वं न आनुभाविकं इत्यर्थः।

2. जीवस्यैवानुभवादिति। 'न जानामि' इत्यनुभवे अहम एव विशेष्यतया भानात् इति भावः।

3. स्थूलसूक्ष्मरूपेण अनादितायाः इति। ननु - स्थूलसूक्ष्मान्तःकरणव्यक्तीनां जाग्रत्स्वापयोः उत्पत्त्या कथं अनादित्वम्, न च प्रवाहोऽनादिः, प्रवाहस्य अवस्तुत्वात् - इति चेत् - उच्यते। स्थूलान्तःकरणत्वसूक्ष्मान्तःकरणत्वजात्यालिङ्गितव्यक्तीनां मध्ये अन्यतमव्यक्त्या विना यत् अनादिकालस्य अवर्तनं - अन्यतमयोगनियमः - तत् स्थूलसूक्ष्मान्तःकरणव्यक्तीनामनादित्वम्। कालत्वव्यापकत्वसजातीयकत्वं इति यावत्। एतदेव प्रवाहानादित्वं नाम। इदमेवोक्तं स्थूलसूक्ष्मरूपेणानादितायाः इति।

4. यद्यपि चैतन्यप्रतिबिम्बस्य अनादित्वसमर्थनेन मायायास्तदाश्रितत्वं समर्थितं, न त्वविद्यायाः, तथाऽपि तुल्ययुक्तिकत्वात् अविद्यायाः अनादिचैतन्यप्रतिबिम्बाश्रितत्वं समर्थितं इत्युक्तम्। मायाऽविद्ययोरभेदाच्च।

5. प्रत्येकमिति। संभूयापि इत्यपि द्रष्टव्यम्।

6. वस्तुतस्त्विति। न चैवं उत्पन्नविद्यं विहाय इतरसकलाश्रितत्वं व्यासज्ज्यवृत्तेरज्ञानस्य कथं सम्भवतीति वाच्यम्। सिद्धान्ते द्वित्वादेः यावद्द्रव्यभावित्वेऽपि अन्यतराश्रयनाशेऽपि स्थित्यङ्गीकारात् व्यासज्ज्यवृत्तिधर्मस्थितौ यावदाश्रयस्थितेः अप्रयोजकत्वात्।

इतरे तु **प्रतिजीवमविद्याभेदमभ्युपगम्यैव तदनुवृत्तिनिवृत्तिभ्यां बन्धमुक्तिव्यवस्थां समर्थयन्ते ।**

नानाऽविद्यावादे प्रपञ्चैकत्वनानात्वविचारः ।

अस्मिन् पक्षे कस्याविद्यया प्रपञ्चः कुतोऽस्त्विति चेत्—

ज्ज्यवृत्तित्वेऽपि तत्प्रत्यक्षस्य नित्यसाक्षिरूपतया यावदाश्रयप्रत्यक्षानपेक्षणात्, उक्तनियमस्य जन्यप्रत्यक्षविषयत्वात् इति मन्तव्यम् । **कश्चिदिति** । उत्पन्नया विद्यया मनसो निवृत्तौ तन्निरूपितप्रतिबिम्बभावस्यापि निवृत्ततया तद्विशिष्टचैतन्यरूपव्यक्तिनाशादिति भावः । तथा च श्रुतिः—'जहात्येनां भुक्तभोगामजोऽन्यः' इति । एनां- अजाशब्दितामविद्यां, जीवेन भुक्ताः भोगाः यस्याः सा भुक्तभोगा, भुज्यन्त इति व्युत्पत्त्या भोगशब्दितानां विषयाणां अविद्यापरिणामत्वादिति भावः । अजः - जन्मरहितः अन्यः - उत्पन्नविद्यो जीवः - इति श्रुत्यर्थः । **स एवेति** । त्याग एवेत्यर्थः । **अन्यमिति** । अज्ञमिति भावः । तथा च श्रुतिः 'अजो ह्येको जुषमाणोऽनुशेते' इति । एकः पुनः अजःविवेकरहितः कार्यकरणसंघातरूपेण परिणतामविद्यां जुषमाणः - सेवमानः- तत्र अहम्ममाभिमानवान् सन् अनुशेते - तामनुसृत्य शेते - वर्तते - न जहातीति यावत् । [1]अत्र अज्ञानं कंचिज्जहाति अन्यमाश्रित्यैव तिष्ठति इत्युक्त्यापि अज्ञानसम्बन्धासम्बन्धावेव बन्धमोक्षौ इत्युक्तं भवति । तदुक्तेरर्थान्तरासम्भवात् ।

अज्ञानसम्बन्धतदभावौ बन्धमोक्षौ इति मतद्वयमपि तस्य ज्ञाननाश्यत्वप्रतिपादकश्रुतिस्मृतिभाष्यादिस्वारस्यविरुद्धं मत्वा तदविरुद्धं मतमाह—**इतरे त्विति । अभ्युपगम्यैवेति** । अविद्याभेदानुपगमे तत्सत्त्वतन्नाशरूपयोः [2]बन्धमोक्षयोरुपपादयितुमशक्यत्वात् । न च तस्या एकत्वेऽपि अंशवत्त्वकल्पनया तन्नाशरूपो मोक्षः प्रागुपपादित इति वाच्यम् । विरोधिविद्योदये तदवस्थानायोगस्याप्युक्तत्वात् । न च जीवन्मुक्तौ तल्लेशानुवृत्त्यभ्युपगमविरोध इति वाच्यम् । अविद्यानाशेऽपि तत्संस्कारस्य यावत्प्रारब्धक्षयमनुवर्तमानस्य अविद्यालेशत्वेन विवक्षिततायाःसदृष्टान्तं वक्ष्यमाणत्वात् इति भावः ।

एवं नानाजीववादे बन्धमोक्षव्यवस्थां बहुप्रकारामुपपाद्य तदुपपादनोपयोगितया प्रसक्तं अविद्यानानात्वं उपजीव्य आक्षेपमवतारयति—**अस्मिन् पक्ष इति** । अविद्यानानात्वपक्षे इत्यर्थः । **कस्येति** । किमेकस्य जीवस्य अविद्यया प्रपञ्चारम्भः, उत सर्वेषामविद्याभिः । नाद्यः विनिगमनाविरहात् । न द्वितीयः, एकाविद्यानाशे सर्वप्रपञ्चनाशापत्त्या मुक्तेतरजीवानां प्रपञ्चानुपलब्धिप्रसङ्गात् इत्याक्षेपाभिप्रायः । द्वितीयपक्षं परिगृह्य तत्रोक्तानुप-

---

1. श्रुतौ जीवो जहाति इत्युक्तम्, मूले जातिस्थानीया अविद्या जहाति इति, तत् कथं मूलोक्तार्थे उक्तश्रुतिः प्रमाणं इत्याशङ्कानिवृत्त्यर्थं मूलाभिप्रेतमर्थं विशदयन् तस्यैव श्रुत्यभिप्रेतत्वमाह—अत्रेत्यादिना ।

2. बन्धमोक्षयोरिति । व्यवस्थितयोरित्यादिः ।

विनिगमकाभावात् सर्वाविद्याकृतः अनेकतन्त्वारब्धपटतुल्यः, एकस्य मुक्तौ तदविद्यानाशे एकतन्तुनाशे पटस्येव तत्साधारणप्रपञ्चस्य नाशः, [1]तदैव विद्यमानतन्त्वन्तरैः पटान्तरस्येव इतराविद्याभिः सकलेतरसाधारणप्रपञ्चान्तरस्योत्पादनम् - इत्येके ।

तत्तदज्ञानकृतप्रातिभासिकरजतवत् न्यायमते तत्तदपेक्षाबुद्धिजन्यद्वित्ववच्च तत्तदविद्याकृतो वियदादिप्रपञ्चः [2]प्रतिपुरुषं भिन्नः । शुक्तिरजते 'त्वया यद्दृष्टं रजतं तदेव मयापि' इतिवत् ऐक्यभ्रममात्रम्—इत्यन्ये ।

पत्तिं परिहरति—**विनिगमकाभावादित्यादिना । सर्वाविद्याकृत इति ।** सर्वेषां जीवानां सर्वाविद्यापरिणामः इत्यर्थः । [3]यद्वा सर्वाविद्याविषयीकृतब्रह्मविवर्तः प्रपञ्चः इत्यर्थः । [4]प्रथमव्याख्याने दृष्टान्तमाह—**अनेकतन्त्वारब्धेति । सकलेतरेति ।** सकलाः समस्ताः मुक्तजीवापेक्षया ये इतरे तेषां साधारणप्रपञ्चान्तरस्येत्यर्थः ।

प्रपञ्चस्य सर्वाविद्याकार्यत्वेऽपि तद्भेदात् प्रपञ्चस्यापि प्रतिपुरुषं भेद एवेति मतं सदृष्टान्तमाह—**तत्तदिति ।** ननु यत्र एकदा बहूनां शुक्तौ रजतभ्रमो भवति तत्र प्रतिपुरुषमज्ञानभेदेन तत्कृतरजतभेदोऽत्र दृष्टान्तत्वेन वक्तव्यः । स च न सम्भवति, तत्रापि तावत्पुरुषाणामज्ञानैः एकस्यैव रजतस्य उत्पत्तिसम्भवात् इति चेत् न तत्र दैवयोगादेकस्य पुरुषस्य प्रथमं [5]शुक्तित्वविशेषदर्शने सति नेदं रजतमिति बाधकप्रत्यक्षेण[6] सोपादानस्य रजतस्य नाशेऽपि तदितरेषां रजतभ्रमानुवृत्त्या रजतभेदस्यावश्यकतया दृष्टान्तसिद्धेरिति भावः । **न्यायमत इति ।** सिद्धान्ते तु एकत्ववत् द्वित्वादिकमपि यावद्द्रव्यभाव्येव, न तु तत्तदपेक्षाबुद्धिजन्यम् । अनन्तद्वित्वादेः तदुत्पत्त्यादीनां च कल्पने गौरवात्, अपेक्षाबुद्धेस्तद्व्यञ्जकत्वाभ्युपगमात् न सदा तत्प्रत्यक्षापत्तिः इति स्वीकारात्, इति भावः ।

---

1. तदैवेति । तदव्यवहितोत्तरक्षणे इत्यर्थः । नाशोत्पत्तिक्षणे खण्डपटोत्पत्तिः न सम्भवति । तत्पूर्वक्षणे खण्डपटोत्पादकसामग्रीघटकस्य महापटनाशस्य अभावात् । न चैवं क्षणैकमात्रं जगतोऽभावात् अभावोपलम्भप्रसङ्ग इति वाच्यम् । अभावोपलम्भसामग्र्या अपि तत्पूर्वं दौर्लभ्यात् । न च तत्क्षणे जगतोऽनुपलम्भः स्यात् इति वाच्यम् । इष्टापत्तेः । क्षणविलम्बेनैवोपलम्भात् । क्षणविलम्बस्य च असर्वज्ञदुर्ज्ञेयत्वात् । नन्वेवमपि ब्रह्माण्डस्य अमितत्वात् अतिविपुलत्वाच्च प्रतिक्षणं कस्यचिदविद्यायाः विनाशसम्भवात् प्रपञ्चावस्थितिः दुर्लभैवेति चेत् - मैवम् । प्रतिकल्पमपि एकस्य तत्त्वज्ञानोत्पादे प्रमाणाभावात्, श्रुतिस्मृतिपुराणादिषु जनकयाज्ञवल्क्यशुकनारदवामदेवसनकादीनां कतिपयानामेव श्रवणात् ।

2. प्रतिपुरुषं भिन्न इति । दृष्टिसृष्टिपक्षादस्य पक्षस्य अयं विशेषः—यत् अत्र पक्षे यावत्तत्वज्ञानं एकस्य जीवस्य एकैव सृष्टिः, दृष्टिसृष्टिपक्षे तु प्रतिदृष्टि सृष्टिभेदः—इति ।

3. जीवाश्रिता ब्रह्मविषयिण्यः जगदाकारेण विवर्तमानब्रह्मसहकारिमात्ररूपाः तत्तज्जीवतत्त्वज्ञाननिवर्त्या अविद्याः इति मतानुसारेण आह—यद्वेति ।

4. प्रथमव्याख्याने इति । एकदा बहूनां शुक्तौ भासमानरजतं द्वितीयव्याख्याने दृष्टान्तः ।

5. शुक्तित्वविशेषदर्शने सतीति । भ्रमसंशयोत्तरं प्रत्यक्षनिश्चये विशेषदर्शनस्य हेतुत्वात् इति भावः ।

6. नेदं रजतमिति बाधकप्रत्यक्षेणेति । 'नेदं रजतं, किन्तु शुक्तिरियम्' इति बाधकप्रत्यक्षेणेत्यर्थः ।

जीवाश्रिताविद्यानिवहाद्भिन्ना मायैव ईश्वराश्रिता प्रपञ्चकारणम्। जीवानामविद्यास्तु आवरणमात्रे प्रातिभासिकशुक्तिरजतादिविक्षेपेऽपि वा उपयुज्यन्ते—इत्यपरे।

ब्रह्मलक्षणघटककर्तृत्वविचारः

अवसितमुपादानत्वम्, तत्प्रसक्तानुप्रसक्तं च।

अथ कीदृशं कर्तृत्वम्।

ननु तर्हि यथा तत्तद्रजतं तस्यतस्यैव प्रत्यक्षं नान्यस्य, तथा तत्तदविद्याकल्पितः प्रपञ्चोऽपि तस्यतस्यैव प्रत्यक्षः स्यात् नान्यस्य। तथा च यः प्रपञ्चः त्वयाऽनुभूयते स एव मयाप्यनुभूयते इति प्रत्यभिज्ञानप्रत्यक्षं न स्यात् इति शङ्कां दृष्टान्तेन परिहरति—**शुक्तिरजत इति**। उपलक्षणमेतत्। यौ द्वौ रामकृष्णौ त्वया दृष्टौ तावेव मयापि दृष्टौ इति प्रत्यभिज्ञानं न्यायमते द्वित्वभेदेऽपि दृश्यते तद्वदिति बोध्यम्।

वियदादिप्रपञ्चो न जीवाविद्यापरिणामः, किं तु जीवाश्रिताविद्यासंघात् भिन्ना माया सर्वजीवान् प्रति साधारणा वियदादिप्रपञ्चपरिणाम्युपादानमुपेयते, अतो वियदादिप्रपञ्चस्यैकत्वात् तदेकत्वप्रतीतिः न भ्रममात्रम्, इति मतं दर्शयति—**जीवाश्रितेति**। मायाया अविद्याभ्यो भिन्नत्वे ईश्वराश्रितत्वे च प्रमाणादिकं प्रागेव दर्शितमिति नात्र तदुच्यते। अविद्यानां प्रपञ्चोपादानत्वाभावे वैयर्थ्यमाशङ्क्याह—**जीवानामिति**। उक्तशङ्कानिवृत्त्यर्थः तुशब्दः। यत्किञ्चित्कार्यं प्रत्यप्युपादानत्वाभावो मात्रशब्दार्थः। न च - 'नाहं प्रकाशस्सर्वस्य योगमायासमावृतः' [भ. गी. ७-२५] इति भगवद्वचने - अहं - परमात्मा सर्वस्य प्राणिजातस्य प्रकाशः - पूर्णानन्दादिरूपेण स्फुरद्रूपः न भवामि, मम सर्वज्ञत्वसर्वेश्वरत्वसर्वात्मकत्वादिधर्मजातं [1]घटयन्त्या मायया आवृतत्वात् - इत्यर्थके ईश्वराश्रितमायाया एव ब्रह्मावारकत्वप्रतिपादनात् तद्विरोध इति - वाच्यम्। 'ब्रह्म तत्त्वतो न जानामि' इति आवारकस्य जीवाश्रितत्वानुभवानुसारेण जीवाश्रिताविद्याया एव तदावारकत्वे वक्तव्ये सति भगवद्वचनगतमायापदस्य जीवचैतन्ये संसारघटकाविद्यालक्षकत्वोपपत्तेः इति भावः। अविद्याया आवरण इव प्रातिभासिकविक्षेपेऽपि परिणाम्युपादानत्वस्वीकारात् न वैयर्थ्यशङ्कावकाशः इत्याशयेनाह—**प्रातिभासिकेति**। ननु जीवाश्रिताविद्यानां जीवचैतन्याध्यस्तप्रातिभासिकस्वप्नप्रपञ्चोपादानतया तत्रोपयोगसम्भवेऽपि शुक्तिरजताद्युपादानत्वं न सम्भवति, शुक्त्याद्यवच्छिन्नचैतन्ये रजताद्यधिष्ठाने तासामभावात् इति चेत्, सत्यम्। आदिपदगृहीतः स्वप्न एवात्र विवक्षितः इत्यदोषः। [2]यद्वा वाचस्पतिमत इव शुक्तिरजतादेरपि जीवाविद्याविषयीकृतशुक्त्याद्यवच्छिन्नचैतन्यविवर्तत्वमभिप्रेत्य जीवाविद्यानां प्रातिभासिकरजतादावुपयोगकथनोपपत्तेः न दोषः।

---

1. घटयन्त्येति। योगमायेत्यत्र योगशब्दार्थोऽयम्।

2. जीवाविद्यानां शुक्तिरजतेऽप्युपयोगं मूलग्रन्थात् स्वरसतः प्रतीयमानं समर्थयितुं आह—यद्वेति। तथा च जीवाविद्यानां न उपादानतया उपयोगः, अपि तु सहकारितया इति मूलाभिप्रायः।

केचिदाहुः—

'तदैक्षत' [छा. उ. ६-२-३] 'सोऽकामयत' [तै. उ. २-६] 'तदात्मानं स्वयमकुरुत' [तै. उ. २-७] इतिश्रवणात् न्यायमत इव कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वरूपमिति ।

अन्ये तु **चिकीर्षाकृतिकर्तृत्वनिर्वाहाय चिकीर्षाकृत्यन्तरापेक्षायां अनवस्थाप्रसङ्गात्**

पूर्वमुक्ते अभिन्ननिमित्तोपादानत्वरूपे ब्रह्मलक्षणे उपादानत्वं विवर्ताधिष्ठानत्वरूपमिति साधितम्, तत्प्रसङ्गाज्जीवेश्वरनिरूपणं प्राप्तम् । तदनु जीवैकत्वनानात्वबन्धमोक्षप्रपञ्चैकत्वनानात्वनिरूपणं प्रसक्तम्, तदेतत् सर्वं निरूपितमिति निरूपयिष्यमाणार्थप्रतिपत्त्युपयोगितया उपसंहरति—**अवसितमिति ।** समाप्तमित्यर्थः । **उपादानत्वमिति ।** तन्निरूपणमित्यर्थः ।

लक्षणान्तर्गतं कर्तृत्वं निरूपयितुमाक्षिपति—**अथेति ।** [1]उदासीनस्य ब्रह्मणः कर्तृत्वधर्मासम्भवादित्यर्थः । स्वतस्तदसम्भवेऽप्यौपाधिकं तत् सम्भवतीति परिहरति—**केचिदाहुरित्यादिना ।**

[2]यद्वा जगदुपादानस्य ब्रह्मणो न तत्कर्तृत्वं सम्भवति, घटाद्युपादानस्य मृदादेः तत्कर्तृत्वादर्शनात्, इत्याक्षिपति—**अथेति ।** घटेश्वरसंयोगादौ उपादानस्यैवेश्वरस्य कर्तृत्वदर्शनात् ब्रह्मण एव कर्तृत्वप्रतिपादकश्रुतिबलाच्च तस्य तत् सम्भवतीति परिहरति—**केचिदाहुरित्यादिना ॥**

[3]अथवा ब्रह्मणः कर्तृत्वं कीदृशमिह लक्षणे विवक्षितम् । किं [4]कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वरूपम्, किं वा कार्यानुकूलज्ञानवत्त्वरूपम्, कार्यानुकूलस्रष्टव्यालोचनात्मकज्ञानवत्त्वरूपं वा । नाद्यः । ब्रह्मणः तादृशकर्तृत्वे मानाभावात् । न द्वितीयतृतीयौ । कार्यानुकूलज्ञानस्य कार्यत्वे तत्कर्तृत्वनिर्वाहाय ज्ञानान्तरापेक्षायामनवस्थाप्रसङ्गात्, तस्याकार्यत्वे च नित्यज्ञानस्वरूपस्य ब्रह्मणः तादृशज्ञानवत्त्वरूपकर्तृत्वायोगात् इति भावः । तत्र प्रथमपक्षं सप्रमाणं दर्शयति—**केचिदाहुरिति ।** श्रुतिषु तच्छब्दाः ब्रह्मपराः । स्वयमित्यस्य अन्यानधिष्ठितमित्यर्थः । आत्मानं जगदात्मना अकुरुत कृतवदित्यर्थः । एताभिः श्रुतिभिःसृष्ट्यनुकूलाः ज्ञानेच्छाकृतयः प्रतिपाद्यन्ते इति भावः । न च ज्ञानादीनामपि कार्यत्वात् तत्कर्तृत्वाय ज्ञानाद्यन्तरापेक्षायामनवस्था स्यादिति वाच्यम् । ज्ञानादित्रितयातिरिक्तकार्ये उक्तरूपकर्तृत्वस्य विवक्षितत्वान्नानवस्थाप्रसङ्गः, ज्ञानादित्रयं प्रति तु अन्यदेव[5] कर्तृत्वं भविष्यतीत्यभिप्रायः ।

---

1. उदासीनस्येति । असङ्गस्येत्यर्थः ।

2. उदासीनत्वं ब्रह्मणः उपादानत्वस्याप्याक्षेपकं, न कर्तृत्वमात्रस्य । समाधिरपि समाना । अतो नोक्तरीत्या व्याख्यानं युक्तं इत्यस्वरसादाह—यद्वेति ।

3. 'कीदृशं कर्तृत्वं' इत्यस्य कर्तृत्वसामान्याक्षेपार्थकत्वं न स्वारसिकं इत्यस्वरसादाह—अथवेति ।

4. कार्यानुकूलेति—उपादानगोचरेत्यपि बोध्यम् ।

5. अन्यदेवेति । ज्ञानादिसूक्ष्मावस्थाश्रयत्वरूपं ज्ञानाद्याश्रयत्वरूपं वा इत्यर्थः ।

कार्यानुकूलज्ञानवत्त्वमेव ब्रह्मणः कर्तृत्वम् । न च ज्ञानेऽप्येष प्रसङ्गः । तस्य ब्रह्मस्वरूपत्वेनाकार्यत्वात् । एवं च—[1]विवरणे जीवस्य सुखादिकर्तृत्वोक्तिः, वीक्षणमात्रसाध्यत्वात् वियदादि वीक्षितं [2]हिरण्यगर्भद्वारा साध्यं वीक्षणाधिकयत्नसाध्यत्वात् भौतिकं स्मितं इति कल्पतरूक्तिश्च सङ्गच्छते—इति वदन्ति ।

प्रथमपक्षं[3] दूषयन् द्वितीयपक्षं साधयति—**अन्ये त्विति । अनवस्थाप्रसङ्गादिति ।** कर्तृत्वलक्षणाननुगमपरिहाराय कार्यमात्रं प्रति ज्ञानादित्रितयवत्त्वरूपे कर्तृत्वे वक्तव्ये सति अनवस्थाप्रसङ्गो भवत्येवेति भावः । **ज्ञानवत्त्वमेवेति ।** इच्छाकृत्योः एवकारेण व्यवच्छेदः क्रियते । तयोः कर्तृत्वलक्षणप्रवेशे गौरवाच्च इति भावः । न चैवमुदाहृतश्रुत्योरिच्छाकृतिप्रतिपादनं व्यर्थं स्यादिति वाच्यम् । ताभ्यां श्रुतिभ्यां तयोः [4]सृष्टिहेतुत्वलाभेऽपि कर्तृत्वनिर्वाहकतया तयोः प्रतिपादनं इत्यत्र मानाभावादिति भावः । **अकार्यत्वादिति ।** नित्यज्ञानस्वरूपस्य ब्रह्मणःतादृशज्ञानवत्त्वं औपाधिकभेदमादाय द्रष्टव्यम् । न चैवमपि सृष्टिकारणज्ञानस्य ' तदैक्षत ' इति श्रुत्या कादाचित्कत्वप्रतिपादनविरोध इति वाच्यम् । ब्रह्मस्वरूपतया नित्यस्यापि ज्ञानस्य प्राण्यदृष्टपरिपाकलक्षणो यः कादाचित्कः सहायः तद्विशिष्टतया कादाचित्कत्वमभिप्रेत्य तच्छ्रुत्युपपत्तेरिति भावः । कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्यत्र गमकमाह—**एवं चेति ।** इच्छाकृत्योः कर्तृत्वलक्षणाननुप्रवेशे विवक्षिते सतीत्यर्थः । **जीवस्येति ।** तस्य सुखदुःखाद्युत्पत्त्यनुकूलज्ञानं साक्षिरूपं यथा विद्यते तथा तदनुकूलेच्छादिकं नास्ति, अननुभवादनभ्युपगमाच्च । न च - इदमनुपपन्नम्, सुखेच्छया तत्साधनानुष्ठानद्वारा सुखोत्पत्तेरनुभवसिद्धत्वादिति-वाच्यम् । सुखाद्युपादानान्तःकरण[5]गोचरचिकीर्षाकृत्योरभावस्यात्र विवक्षितत्वात् । तथा च कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वं इत्यङ्गीकारे सत्येव विवरणोक्तिस्सङ्गच्छते नान्यथा इत्यर्थः । ' निश्वसितमस्य वेदाः वीक्षितमेतस्य पञ्चभूतानि । स्मितमेतस्य चराचरं अस्य सुषुप्तिर्महाप्रलयः ।' इति वाचस्पतिश्लोके महाभूतानां ब्रह्मवीक्षितत्वमुक्तम् । तथा भौतिकस्य चराचरप्रपञ्चस्य ब्रह्मस्मितत्वमुक्तम् । तदुभयतात्पर्यकथनपरे कल्पतरुग्रन्थे ब्रह्मवीक्षणमात्रसाध्यत्वं महाभूतेषु तद्वीक्षितत्वनिर्देशस्यालम्बनं दर्शितम् । तच्च ब्रह्मणो महाभूतसृष्ट्यनुकूलज्ञानवत्तदनुकूलचिकीर्षाकृत्योरप्युपगमे न सङ्गच्छते । वीक्षणातिरिक्तचिकीर्षादिव्यावर्तकमात्रपदविरोधात् । लोके हि मन्दहासरूपं स्मितं ज्ञानाधिकप्रयत्नसाध्यं प्रसिद्धम् । तथा च परब्रह्मणः भौतिकसृष्टिं प्रति यथा वीक्षणमपेक्षितं तथा हिरण्यगर्भोत्प-

---

1. विवरणे जीवस्य सुखादिकर्तृत्वोक्तिरिति । पञ्चपादिकाविवरणे पञ्चमवर्णकस्थः ' इदं जगत् अभिन्ननिमित्तोपादानकं भवितुमर्हति, प्रेक्षापूर्वजनितकार्यत्वात् आत्मगतसुखदुःखरागद्वेषादिवत् ' इति ग्रन्थः इत्यर्थः ।

2. हिरण्यगर्भद्वारा साध्यं भौतिकं वीक्षणाधिकयत्नसाध्यत्वात् स्मितं इति संबन्धः ।

3. प्रथमपक्षमिति । प्रथमपक्षे ज्ञानादयः वृत्तिरूपाः कार्याश्च इति ध्येयम् ।

4. सृष्टीति । आकाशादिप्रपञ्चसृष्टीत्यर्थः । तेन इच्छाकृत्योः स्वसृष्टौ अहेतुत्वात् प्राण्यदृष्टपरिपाकमात्रस्य तत्र हेतुत्वात् न पूर्वोक्तानवस्थातादवस्थ्यम्, नाप्यननुगमः ।

5. गोचरेति । उपादानताख्यविषयताकेत्यर्थः ।

अपरे तु कार्यानुकूलस्रष्टव्यालोचनरूपज्ञानवत्त्वं कर्तृत्वं, न कार्यानुकूलज्ञानवत्त्वमात्रम्। शुक्तिरजतस्वाप्नभ्रमादिषु अध्यासानुकूलाधिष्ठानज्ञानवत्त्वेन जीवस्य कर्तृत्वप्रसङ्गात्। न च-इष्टापत्तिः-'अथ रथान् रथयोगान् पथः सृजते...स हि कर्ता' [बृ. उ. ४-३-१०] इत्यादिश्रुत्यैव जीवस्य स्वप्नप्रपञ्चकर्तृत्वोक्तेः-इति वाच्यम्। भाष्यकारैः 'लाङ्गलं गवादीनुद्वहतीतिवत् कर्तृत्वोपचारमात्रं रथादिप्रतिभाननिमित्तत्वेन' इति व्याख्यातत्वात् इत्याहुः।

तिलक्षणव्यापारोऽप्यधिकोऽपेक्षितः। चराचरसृष्टौ परब्रह्मण इव हिरण्यगर्भस्यापि कर्तृतायाः श्रुतिस्मृतिसिद्धत्वात्। तथा च परब्रह्मणो भौतिकसृष्ट्यनुकूलं यद्वीक्षणं तदधिकव्यापारापेक्षित्वं चराचरस्य ब्रह्मस्मितत्वनिर्देशालम्बनं दर्शितम्। तदपि [1]महाभूतसृष्टावेव वीक्षणाधिकप्रयत्नापेक्षायां न सम्भवति। **हिरण्यगर्भद्वारा** इत्यस्य वाक्यस्य हिरण्यगर्भोत्पत्तिमपेक्ष्येत्यर्थः। न तु हिरण्यगर्भस्साक्षात् कर्ता ब्रह्म च प्रयोजककर्तृ इति यथाश्रुतार्थो ग्राह्यः। द्वितीयाध्यायान्तिमाधिकरणे परमेश्वरस्य भौतिकसृष्टावपि साक्षात्कर्तृतायाः साधितत्वात् इति भावः। [2]वाचस्पतिश्लोकश्च ब्रह्मस्तुतिपरः। ब्रह्म हि अतिप्रशस्तम्। तथाहि-यस्य ब्रह्मणः पुरुषनिश्वासवत् प्रयत्नं विनैव वेदाः सर्वे कार्यभूताः, यस्य च वीक्षणादेव महाभूतानि भवन्ति, यस्य च हिरण्यगर्भेण सह चराचरात्मकं विश्वं मन्दहासमात्रं, यस्य च महाप्रलयोऽपि सुषुप्तिप्रायः, तत्प्राशस्त्ये को विस्मयः इति भावः।

द्वितीयपक्षेऽपि दोषं वदन् तृतीयपक्षं समर्थयते—**अपरे त्विति। स्रष्टव्यालोचनेति।** मयेदं स्रष्टव्यं इत्याकारकमित्यर्थः। **अध्यासेति।** अध्यासस्य-अध्यस्यमानरजतादेः अनुकूलं यदधिष्ठानज्ञानं तद्वत्त्वेनेत्यर्थः। **न चेष्टापत्तिरिति।** न च इत्यस्य वाच्यमित्यनेन सम्बन्धः। अथेत्यस्य स्वप्नकाले इत्यर्थः। जीवस्य रथादिस्रष्टृत्वे हेतुमाह—**स हि कर्तेति।** हि-यस्मात् कारणात् स्वाप्नरथादिहेतुकर्मकर्ता जीवः, तस्मादित्यर्थः। **भाष्यकारैरिति।** 'लाङ्गलं गवादीनुद्वहति' इति प्रयोगे लाङ्गलस्य गवादिस्थितिकर्तृत्वरूपं गवाद्युद्वोढृत्वं मुख्यं नास्ति, किं तु लाङ्गले सति कृषिद्वारा गवादिस्थितिहेतुपलालादितृणलाभोऽस्तीति कृत्वा उपचारादुच्यते गवादीनुद्वहतीति, तद्वत् स्वाप्नरथादिपदार्थोपलब्धिहेतुधर्मादिकर्तृत्वेन रथादिप्रतिभाननिमित्तत्वरूपेण हेतुना तस्य कर्तृत्वमुपचर्यते स हि कर्तेति श्रुतौ-इति भाष्यकारैः कर्तृत्वस्य औपचारिककर्तृत्वरूपताया उक्तत्वादित्यर्थः। एतेन विवरणे सुखादिकर्तृत्वोक्तिरप्युपचारमात्रपरा व्याख्याता। 'मयेदं सुखदुःखादि स्रष्टव्यं' इत्यालोचनरूपज्ञानाभावेऽपि सुखादिदर्शनेन मुख्यकर्तृत्वासम्भवात्। वीक्षणमात्रसाध्यत्वादितिकल्पतरौ स्रष्टव्यालोचनरूपं वीक्षणं विवक्षितमिति न तद्विरोध इति द्रष्टव्यम्।

---

1. महाभूतसृष्टावेवेति। एवकारःअप्यर्थकः।

2. ब्रह्मणः सर्वज्ञत्वसर्वकर्तृत्वचेतनत्वोपपादकतया आदौ व्याख्याय पश्चमिदं 'यद्वा ब्रह्म अनेन स्तुतं' इति व्याख्यातं कल्पतरौ। तत्र यद्वेति व्याख्यां अनुसरति—वाचस्पतिश्लोकश्चेति। स्तुतिपरमपि प्राप्तिबाधयोरसतोः प्रतीयमानार्थे प्रमाणं देवताधिकरणन्यायात् इति भावः।

अनेनैव निखिलप्रपञ्चरचनाकर्तृभावेनार्थसिद्धं सर्वज्ञत्वं ब्रह्मणः 'शास्त्रयोनित्वात्' [ब्र. सू. १-१-४] इत्यधिकरणे वेदकर्तृत्वेनापि समर्थितम् ।

ईश्वरसर्वज्ञत्ववादः

अथ कथं ब्रह्मणः सर्वज्ञत्वं सङ्गच्छते, जीववत् अन्तःकरणाभावेन ज्ञातृत्वस्यैवायोगात् ।

अत्र सर्ववस्तुविषयसकलप्राणिधीवासनोपरक्ताज्ञानोपाधिक ईश्वरः, अतस्तस्य सर्वविषयवासनासाक्षितया सर्वज्ञत्वं इति भारतीतीर्थादिपक्षः **प्रागेव दर्शितः ।**

प्रकटार्थकारास्त्वाहुः - **यथा जीवस्य स्वोपाध्यन्तःकरणपरिणामाश्चैतन्यप्रतिबिम्बग्राहिणः**

जन्मादिसूत्रेण निखिलजगत्कर्तृत्वे सति तदुपादानत्वे ब्रह्मणो लक्षणत्वेन प्रतिपादिते सति तस्य सर्वज्ञत्वमर्थात् सिध्यति, निखिलजगत्सृष्टिस्थितिसंहारकर्तृत्वस्य सर्वज्ञत्वं विना असम्भवादित्याह— **अनेनैवेति** । सर्वज्ञत्वसिद्धौ हेत्वन्तरमाह—**शास्त्रयोनित्वादिति** । अस्य सूत्रस्यार्थमाह—**वेदकर्तृत्वेनापीति** । ननु यथा वेदकर्तृत्वं भाष्यादिषूक्तप्रकारेण सर्वज्ञत्वं साधयति तथा जन्मादिसूत्रोपात्तं सर्वकर्तृत्वमपि तत् साधयति । तथा च पूर्वसूत्रे अर्थसिद्धम् इह तु साध्यते इत्युक्तौ को हेतुः इति - उच्यते— पूर्वसूत्रं लक्षणपरं न तु सर्वज्ञत्वसाधनपरम्, इदं तु तत्साधनपरमिति तात्पर्यसत्त्वासत्त्वाभ्यां तथाव्यवहारः । ततश्च ब्रह्म सर्वज्ञं शास्त्रकर्तृत्वादिति सूत्रयोजना । ननु ब्रह्मणः सर्वज्ञत्वं 'यः सर्वज्ञः सर्ववित्' [मु. उ. १-१-९] 'गुणी सर्ववित् यः' [श्वे.उ.६-२] इत्यादिश्रुत्या कण्ठत एव प्रतिपाद्यते, काऽत्र साधनापेक्षा - इति चेत्, सत्यम् । श्रुत्युक्ते सर्वज्ञत्वे प्रतिपत्तिदार्ढ्याय उपपत्तिसमर्पणात् ।

एवं श्रुत्युपपत्तिसिद्धं सर्वज्ञत्वं निरूपयितुं आक्षेपमवतारयति—**अथेति** । जीवस्य हि स्वोपाध्यन्तःकरणवृत्तिज्ञानाश्रयत्वरूपं ज्ञातृत्वं प्रमाणसिद्धम् । ब्रह्मणश्च अन्तःकरणाभावात् ज्ञातृत्वं न सम्भवति । न च ब्रह्मणोऽप्यन्तःकरणमस्त्विति वाच्यम् । 'कार्योपाधिरयं जीवः' इतिश्रुत्या तस्य जीवोपाधित्वेन नियमितत्वात् । ज्ञातृत्वं च सर्वज्ञत्वव्यापकम् । ज्ञातृत्वविशेषरूपत्वात् सर्वज्ञत्वस्य । तथा च ब्रह्मणः ज्ञातृत्वस्य व्यापकस्य निवृत्त्या व्याप्यसर्वज्ञत्वनिवृत्तिरित्यर्थः । ज्ञातृत्वाभावे सर्वज्ञत्वं दूरापास्तं इत्येवकारार्थः । अन्तःकरणानां जीवोपाधित्वेऽपि तद्वासनानामीश्वरोपाधित्वात् सम्भवति कथञ्चित्तस्य सर्वज्ञत्वमिति परिहरति—**अत्र सर्ववस्त्विति** । अत्रेत्यस्य अस्मिन्नाक्षेपे इत्यर्थः । **सर्वविषयवासनासाक्षितयेति** । स्वोपाधिभूतवासनाविषयसर्ववस्त्ववभासकतयेत्यर्थः ।

अस्मिन् समाधाने [1]प्रागुक्तमस्वरसं मनसि निधाय समाधानान्तरमाह—**प्रकटार्थकारास्त्विति** । यथा अन्तःकरणं ज्ञातृत्वोपाधिः, तथा मायापि ज्ञातृत्वोपाधिर्भवत्येव । तथा च ब्रह्मणि मायोपाधिके सर्वज्ञत्व-

---

1. प्रागुक्तमस्वरसमिति । वासनोपाधिकस्य ईश्वरत्वे जाग्रदादावीश्वराभावप्रसङ्गात् एकैकवासनोपाधिकस्य ईश्वरत्वे तन्नानात्वेन ईश्वरनानात्वप्रसङ्गात् सकलवासनोपाधिकस्य कस्यचिदसम्भवात् इति प्रागुक्तमस्वरसमित्यर्थः ।

[सन्ति] इति तद्योगात् ज्ञातृत्वम्, एवं ब्रह्मणः स्वोपाधिमायापरिणामाश्रितप्रतिबिम्बग्राहिणस्सन्तीति तत्प्रतिबिम्बितैः स्फुरणैः कालत्रयवर्तिनोऽपि प्रपञ्चस्यापरोक्ष्येणाकलनात् सर्वज्ञत्वमिति ।

तत्त्वशुद्धिकारास्तु - उक्तरीत्या ब्रह्मणो विद्यमाननिखिलप्रपञ्चसाक्षात्कारसम्भवः, तज्जनित-तत्संस्कारवत्तया च स्मरणोपपत्तेरतीतसकलवस्त्ववभाससिद्धिः, सृष्टेः प्राक् मायायाः [1]सृज्यमान-निखिलपदार्थस्फुरणरूपेण जीवादृष्टानुरोधेन [2]विवर्तमानत्वात् तत्साक्षितया [3]तदुपाधिकस्य ब्रह्मणो-ऽपि तत्साधकत्वसिद्धेः अनागतवस्तुविज्ञानोपपत्तिः, इति सर्वज्ञत्वं समर्थयन्ते ।

व्यापकस्य ज्ञातृत्वस्य निवृत्त्यभावात् न सर्वज्ञत्वनिवृत्तिशङ्केत्यर्थः । **स्वोपाधिमायेति** । 'मायिनं' इतिश्रुतेः 'मायोपाधिः जगद्योनिः सर्वज्ञत्वादिलक्षणः' इति वाक्यवृत्तिवचनाच्च मायाया ईश्वरोपाधित्वं सिद्धमिति भावः । सर्वज्ञत्वसर्वनियन्तृत्वसर्वात्मकत्वानि लक्षणानि-असाधारणधर्माः यस्य, सः सर्वज्ञत्वादिलक्षणः इत्यर्थः । **आकलना-दिति** । विषयीकरणादित्यर्थः ।

तत्त्वशुद्धिकारास्त्विति । [4]प्रकटार्थकाराणां मते अतीतानागतप्रपञ्चरूपविषयेऽपि ईश्वरीयं मायावृत्ति-प्रतिबिम्बरूपं ज्ञानं अपरोक्षम् । तत्त्वशुद्धिकाराणां मते[5] अतीतादिविषये जीवानामिव ईश्वरज्ञानमपि परोक्षमेव इति विशेषार्थकः तुशब्दः । **विद्यमानेति** । लोके प्रत्यक्षज्ञानस्य वर्तमानवस्तुमात्रविषयकत्वस्वाभाव्यदर्शनेन तस्य कॢप्तस्वभावातिलङ्घने कारणाभावात्, सर्वज्ञत्वप्रतिपादकशास्त्रस्य ईश्वरीयज्ञानगतपरोक्षत्वापरोक्षत्वयोः [6]उदासीनत्वादिति भावः । **तज्जनितेति** । विद्यमानवस्तुसाक्षात्कारजनितेत्यर्थः । अनागतवस्तुज्ञानमुपपादयति—**सृष्टेः प्रागिति** । स्फुरणपदं वृत्तिपरम् । विवर्तमानत्वं परिणममानत्वम् । **तदुपाधिकस्येति** । मायोपाधिकस्येत्यर्थः । कथं तदुपाधिकत्वं अत आह—**तत्साक्षितयेति** । तस्यां मायायां प्रतिबिम्बिततयेत्यर्थः । सृष्टेः पूर्वकाले मायायाः तथापरिणामे कारणमाह—**जीवादृष्टेति** । **तत्साधकत्वसिद्धेरिति** । [7]मायावृत्तिकर्तृत्वसिद्धेरित्यर्थः । **अनागतेति** । अनागतवस्तुविषयकस्य ज्ञानस्य वृत्तिप्रतिबिम्बरूपस्य ब्रह्मण्युपपत्तिरित्यर्थः ।

---

1. सृज्यमानेति - स्रक्ष्यमाणेत्यर्थः ।
2. विवर्तमानत्वात् तत्साधकत्वसिद्धेः इति संबन्धः ।
3. तदुपाधिकस्यापि ब्रह्मणः इति संबन्धः । तथा च मायायाः वृत्तिरूपेण परिणतत्वात् मायासाक्षितया मायोपाधिकस्यापि मायावृत्तिसाधकत्वोपपत्तिरित्यर्थः ।
4. प्रकटार्थकाराणां मते इति । 'यत्प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः किमु वक्तव्यं नित्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यज्ञानं भवतीति' इति भाष्यमत्र प्रमाणमभिमतम् ।
5. विवरणकृन्मतमेव तत्त्वशुद्धिकृतां मतम् । कालत्रयावगाहिनी एकैव वृत्तिः इति तिस्रो वृत्तयः इति च तत्र पक्षद्वयम् ।
6. उदासीनत्वादिति । असाधकत्वादित्यर्थः ।
7. मायावृत्तिकर्तृत्वेति । अनागतवस्तुविषयकमायावृत्त्याश्रयत्वेत्यर्थः ।

कौमुदीकृतस्तु **वदन्ति - स्वरूपज्ञानेनैव ब्रह्मणः स्वसंसृष्टसर्वावभासकत्वात् सर्वज्ञत्वम् । अतीतानागतयोरपि अविद्याचित्रभित्तौ विमृष्टानुन्मीलितचित्रवत् संस्कारात्मना सत्त्वेन तत्संसर्गस्याप्युपपत्तेः । न तु वृत्तिज्ञानैः तस्य सर्वज्ञत्वम् । 'तमेव भान्तमनुभाति सर्वम्' [क.उ. ५-१५] इति सावधारणश्रुतिविरोधात्, सृष्टेः प्राक् 'एकमेवाद्वितीयम्' [छा.उ.६-२-१] इत्यवधारणानुरोधेन महाभूतानामिव वृत्तिज्ञानानामपि प्रलयस्य वक्तव्यतया ब्रह्मणः तदा सर्वज्ञत्वाभावापत्त्या प्राथमिकमाया-**

जीववत् ब्रह्मणोऽपि चैतन्यप्रतिबिम्बोपेतैर्वृत्तिज्ञानैः सर्वज्ञत्वं निरूपितं मतद्वयेन । इदानीं स्वरूपज्ञानेनैव तन्निरूपयति-**कौमुदीकृतस्त्विति** । ननु अतीतानागतप्रपञ्चयोः प्रलयकाले सृष्टिपूर्वकाले च सत्त्वे मानाभावात् तदा ब्रह्मणस्सर्वज्ञत्वं न सिद्ध्यति, असतोस्तयोश्चैतन्यसंसृष्टत्वासम्भवादिति, नेत्याह—**अतीतानागतयोरपीति** । अतीतप्रपञ्चस्य प्रलयकाले संस्कारात्मना सत्त्वस्य देवताधिकरणे सूत्रभाष्यकारादिभिः साधितत्वात्, तथा अनागतस्यापि सृष्टिपूर्वकाले संस्कारात्म[ना]नैव सत्त्वस्य आरम्भणाधिकरणादिषु साधितत्वात्, अतीतादिवस्तुसंसृष्टब्रह्मचैतन्यस्य तदापि सर्वज्ञत्वसिद्धिः इति भावः । चित्रस्यानुन्मीलितत्वम् अनभिव्यक्तत्वम् । [1]तत्र हेतुर्विमृष्टत्वम् । अविद्यैव चित्रभित्तिरिति रूपकमत्र द्रष्टव्यम् । अत्रेदं चिन्त्यम् - स्थूलप्रपञ्चस्थितिकाले संस्कारात्मकसूक्ष्मप्रपञ्चो नास्ति, प्रलयकालादौ च स्थूलः प्रपञ्चो नास्ति, तथा च ब्रह्मचैतन्यस्य सदा सर्वप्रपञ्चसंसृष्टत्वाभावात् सदा तस्य असंकुचितसर्वज्ञत्वं न सम्भवतीति । स्वरूपज्ञानेनैवेत्यत्रत्यस्य अवधारणस्य व्यवच्छेद्यमाह—**न तु वृत्तिज्ञानैरिति** । श्रुतिगतस्यावधारणस्य 'स्वप्रकाशात्मातिरिक्तानवभास्यं आदित्यादिजगत्' इत्यर्थः । अत्रेदं चिन्त्यम् - ब्रह्मचैतन्यस्य जगदवभासनार्थं मायावृत्त्यपेक्षायां यदि श्रौतमवधारणं विरुध्यते, तदा जीवचैतन्यस्य घटाद्यवभासनार्थं अन्तःकरणवृत्त्यपेक्षायामपि तद्विरुध्यत एव, यदि चान्तःकरणवृत्तीनां जडत्वात् तदपेक्षायामपि सर्वं जडवस्तु चैतन्यमात्रावभास्यमिति सावधारणश्रुत्यर्थस्य न बाधः, तदा मायावृत्त्यपेक्षायामपि तुल्यं समाधानमिति । प्रलयकाले सर्वज्ञत्वाभावे को दोषः, तत्राह—**प्राथमिकेति** । तदा सर्वज्ञत्वाभावे सति सर्गादौ 'तदैक्षत' इतिश्रुत्युक्तं भूतसृष्ट्यनुकूलमीक्षणं प्रति कर्तृत्वासम्भवेन ईक्षणपूर्वकभूतादिसर्गं प्रत्यपि ब्रह्मणः कर्तृत्वाभावप्रसङ्गादित्यर्थः । अत्रापि इदं चिन्त्यम् - एवमपि सृष्टिपूर्वकाले ब्रह्मचैतन्यव्यतिरिक्तस्य मायातत्सम्बन्धादेः सत्त्वात् अद्वितीयत्वावधारणं मुख्यं न सम्भवति । यदि च मायादेरनादित्वप्रतिपादकश्रुत्यादिबलात् [2]व्याकृतकार्यात्मकद्वितीयाभावावधारणपरं तद्वचनमित्युच्येत, तदा सर्वदा सर्वविषयकज्ञानकर्तृत्वरूपसर्वज्ञत्वप्रतिपादकश्रुत्यादिबलात् सर्वज्ञत्वघटकमायावृत्तिसन्ततिव्यतिरिक्तकार्याभावावधारणपरमद्वितीयत्ववचनमित्यपि कल्पनं तुल्यम् । मायावृत्तिभिस्सर्वज्ञत्वसमर्थनमेव भाष्यसम्मतम् । तथा च

---

1. तत्र हेतुरिति । वस्तुतस्तु अतीतस्य विमृष्टचित्रं दृष्टान्तः । विमृष्टत्वं - मार्जितत्वम् । अनागतस्य अनुन्मीलितचित्रं दृष्टान्तः इत्यप्यनुसन्धेयम् ।

2. व्याकृतेत्युपरञ्जकं कार्यस्य न तु व्यावर्तकं, वैयर्थ्यात् ।

विवर्तरूपे ईक्षणे तत्पूर्वके महाभूतादौ च स्रष्टृत्वाभावप्रसङ्गाच्च। एवंसति ब्रह्मणस्सर्वविषयज्ञानात्मकत्वमेव स्यात्, न तु सर्वज्ञानकर्तृत्वरूपं सर्वज्ञत्वम्, इति चेत्-सत्यम्। सर्वविषयज्ञानात्मकमेव ब्रह्म, न तु सर्वज्ञानकर्तृत्वरूपं ज्ञातृत्वमस्ति। अत एव 'वाक्यान्वयात्' [ब्र. सू. १-४-६/१९] इत्यधिकरणे विज्ञातृत्वं जीवलिङ्गमित्युक्तं भाष्यकारैः। 'यस्सर्वज्ञः' इत्यादिश्रुतिरपि तस्य [1]ज्ञानरूपत्वाभिप्रायेणैव योजनीया इति।

ईक्षत्यधिकरणभाष्यम् -'अपि च अविद्यादिमतस्संसारिणश्शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य' इति। सृष्टेः पूर्वकाले ब्रह्मणः स्रष्टव्यालोचनरूपमीक्षणं न सम्भवति, वृत्तिज्ञानरूपेक्षणस्य शरीरादिकारकसाध्यताया लोकसिद्धत्वात् ब्रह्मणः तदा शरीराद्यभावात्, इति साङ्ख्यशङ्कानिरासार्थमिदं भाष्यम्—जीवस्यैव वृत्तिज्ञानोत्पत्तिःशरीरादिसाध्या। ईश्वरस्य तु मायावृत्तिरूपज्ञानोत्पत्तिः शरीराद्यनपेक्षा। तथा च सृष्टिपूर्वं प्रलयकालेऽपि तस्य मायावृत्तिरूपमीक्षणं सदा सर्वज्ञत्वं च सम्भवतीति समाधानभाष्याभिप्रायः। इदं भाष्यमित्थमेव व्याख्यातृभिर्नीतम्। [2]भाष्ये ज्ञानप्रतिबन्धकारणमविद्यादीति मन्तव्यम्। ततश्च मायावृत्तिभिस्सर्वज्ञत्वसमर्थनपक्षदूषणं असङ्गतमिति मन्तव्यम्। शङ्कते—**एवंसतीति**। स्वरूपज्ञानेनैव सर्वज्ञत्वसमर्थने सतीत्यर्थः। **न त्विति**। स्वरूपज्ञानस्य नित्यत्वादिति भावः। **न तु सर्वज्ञानकर्तृत्वरूपमिति**। ब्रह्मण इति शेषः। अत्र यद्यपि ज्ञातृत्वं सामान्यरूपं सर्वज्ञानकर्तृत्वं तु विशेषरूपमिति न तयोः अभेदः सम्भवति, तथाऽपि ब्रह्मणो ज्ञातृत्वं नास्ति इत्यत्रैव तात्पर्यम्, न तयोरभेदोक्तावपि, इत्यविरोधः। **अत एवेति**। ब्रह्मणो ज्ञातृत्वाभावादेवेत्यर्थः। **इत्युक्तमिति**। बृहदारण्यके मैत्रेयीब्राह्मणे पठ्यते - 'आत्मनस्तु कामाय सर्वं प्रियं भवति, आत्मा वा अरे द्रष्टव्यः' [बृ. उ. १-४-५] इत्यादि। अत्र किं जीवो द्रष्टव्यत्वेन उपदिश्यते उत प्रत्यगभिन्नपरमात्मा निष्प्रपञ्चस्वभावः इति संशयः। तत्र पूर्वपक्षः-पूर्ववाक्ये भोक्तुर्जीवस्य प्रकृतत्वात् उपसंहारेऽपि 'विज्ञातारमरे केन विजानीयात्' [बृ. उ. २-४-१४] इति विज्ञातृत्वस्य जीवधर्मस्य कीर्तनाच्च जीव एवात्र द्रष्टव्य उपदिश्यते इति। सिद्धान्तस्तु - प्रत्यगभिन्नपरमात्मैव द्रष्टव्यतयोपदिश्यते। कुतः, वाक्यान्वयात्। तथाहि - अत्र आत्मवेदनेन सर्वं विदितं भवतीति प्रतिपाद्यते। तच्च सर्वाधिष्ठानब्रह्मपरिग्रहे घटते,

---

1. ज्ञानरूपत्वेति। विवरणेऽप्युक्तं ब्रह्मस्वरूपलक्षणकथनावसरे—"'यः सर्वज्ञः सर्ववित्' इत्यत्र लक्षणाभिधानावसरे सर्वज्ञशब्देन सर्वविभासनक्षमं विज्ञप्तिमात्रं अविषयोपाधिकं विज्ञानमेव ब्रह्मस्वरूपलक्षणं विवक्ष्यते" इति। 'आनन्दस्य विज्ञानादभेदात् मात्रपदमविरुद्धम्, अविद्यादशायां स्वाध्यस्तसर्वविभासनक्षमं स्वतो विषयानपेक्षं विज्ञानमात्रं स्वरूपलक्षणं इत्यर्थः' इति आश्रमस्वामिभिः व्याख्यातं च। 'ज्ञोऽत एव' इति सूत्रे भाष्यकृद्भिरपि सूत्रस्थस्य ज्ञशब्दस्य चैतन्यस्वरूपार्थकतामभिप्रेत्य चैतन्यस्वरूपत्वं आक्षेपसमाधानाभ्यां उपपादितम्। तदपि सर्वज्ञशब्दस्य विवरणोक्तार्थस्य अनुकूलम्।

2. भाष्यस्थज्ञानप्रतिबन्धकारणपदार्थत्वेन विवक्षितोऽर्थः अविद्यादि इत्यर्थः।

यद्यपि ब्रह्म स्वरूपचैतन्येनैव स्वसंसृष्टसर्वावभासकं, तथापि तस्य स्वरूपेणाकार्यत्वेऽपि दृश्यावच्छिन्नरूपेण ब्रह्मकार्यत्वात् 'यस्सर्वज्ञः' इत्यादिज्ञानजनिकर्तृत्वश्रुतेरपि न कश्चिद्विरोधः इति वाचस्पतिमिश्राः ।

जीवाल्पज्ञत्वनिरूपणम्

[प्रतिकर्मव्यवस्था]

ननु ईश्वरवज्जीवोऽपि वृत्तिमनपेक्ष्य स्वरूपचैतन्येनैव किमिति विषयान्नावभासयति[1] ॥

न जीवपरिग्रहे । तथा इदं सर्वमात्मा इत्यादिवाक्यान्यपि सर्वात्मके ब्रह्मण्येव तात्पर्येण प्रतिपादकतया अन्वितानि लक्ष्यन्ते । 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति पूर्ववाक्ये जीवपरामर्शस्तु लोकसिद्धं भोक्तारमनूद्य तस्य शुद्धब्रह्मरूपेण द्रष्टव्यत्वोपदेशार्थः । विज्ञातारमिति वाक्यं तु जीवस्य विज्ञातृत्वरूपधर्मपरं न भवति । तस्य वाक्यस्य मुक्तजीवपरत्वात्, मुक्तजीवे च निरुपाधिके तस्यासम्भवात् । किं तु भूतपूर्वगत्या विज्ञातृत्वानुवादमात्रं, स्वातन्त्र्येण न कस्यचिदर्थस्य साधकम् । तस्मात् मैत्रेयीब्राह्मणं प्रत्यगभिन्ने निर्विशेषे द्रष्टव्ये समन्वितमिति सिद्धमिति । अत्र विज्ञातृत्वं ब्रह्मसाधारणं चेत् जीवलिङ्गतया भाष्यकारैर्नोपन्यस्येत । उपन्यस्तं च । तस्मात् ज्ञातृत्वं ब्रह्मणो नास्तीति गम्यते इति भावः । ईश्वरस्य सर्वविषयकज्ञानकर्तृत्वानभ्युपगमे श्रुतिविरोधमाशङ्क्याह—**यस्सर्वज्ञ इति** ॥

ननु - नित्यचैतन्यमात्रस्य सर्वत्र लक्ष्यतया ज्ञाधातुवाच्यत्वायोगात् विशिष्टचैतन्यस्य प्रकृत्यर्थत्वं वाच्यम् । तथा च [2]विशिष्टस्य कार्यत्वसम्भवात् प्रत्ययश्रुत्यर्थकर्तृत्वस्य [3]न विरोधः । ब्रह्मणः सर्वज्ञानकर्तृत्वप्रतिपादकश्रुतिविरोधेन[4] ज्ञातृत्वस्य जीवलिङ्गत्वोक्तेः अभ्युच्चयमात्रत्वोपपत्तेः, तदधिकरणसिद्धान्ताभिमतनिर्विशेषब्रह्मव्यावृत्तत्वमात्रेण विज्ञातृत्वस्य पूर्वपक्षलिङ्गत्वोपन्यासोपपत्तेश्च, भाष्यकारैरेव मुख्यस्य सर्वविषयकज्ञानकर्तृत्वस्य ईक्षत्यधिकरणे प्रतिपादितत्वाच्च, प्रत्ययश्रुतेः स्वार्थपरत्वसम्भवे तत्त्यागायोगाच्च - इत्यस्वरसादाह—**यद्यपीत्यादिना । चैतन्येनैवेति** । न मायावृत्तिभिरित्येवकारार्थः । तर्हि प्रत्ययार्थबाधः, नेत्याह—**तथापीति** । तस्य - स्वरूपचैतन्यस्येत्यर्थः । **दृश्यावच्छिन्नेति** । न चानादिमायादिरूपदृश्यावच्छिन्नचैतन्यस्य कथमुक्तप्रकारेणापि कार्यत्वं सिद्ध्येदिति वाच्यम् । मायादेरपि तत्तत्कार्यतादात्म्यापत्त्या मायाद्यवच्छिन्नस्यापि कार्यत्वस्य सुसंपादत्वादिति भावः ।

आक्षिपति—**नन्विति । नावभासयतीति** । न चात्र इष्टापत्तिर्वक्तुं शक्यते । तथासत्यविद्या-

---

1. नावभासयति । न अपरोक्षयतीत्यर्थः । अत एव अपरोक्षस्थले वृत्त्यपेक्षां मतभेदेन प्रदर्शयिष्यति ।

2. विशिष्टस्य - विषयविशिष्टस्य इत्यर्थः । उक्तं च भामत्याम् ब्रह्मणः सर्वज्ञत्वोपपादनावसरे—'चैतन्यस्य शुद्धस्य नित्यत्वेऽपि उपहितं सत् अनित्यं कार्यम्, आकाशमिव घटावच्छिन्नम्'... ... ...विषयावच्छिन्नं प्रकाशः कार्यम्' इति ।

3. न विरोधः—न बाधः ।

4. श्रुतिविरोधेन अभ्युच्चयमात्रेति सम्बन्धः । अभ्युच्चयः - प्रमाणान्तरमपेक्ष्य साधकत्वोक्तिः ।

अत्रोक्तं विवरणे—'ब्रह्मचैतन्यं सर्वोपादानतया सर्वतादात्म्यापन्नं सत् स्वसंसृष्टं सर्वमवभासयति न जीवचैतन्यम्। तस्य अविद्योपाधिकतया सर्वगतत्वेऽपि अनुपादानत्वेन [1]असङ्गित्वात्। यथा [2]सर्वगतं गोत्वसामान्यं स्वभावादश्वादिव्यक्तिसङ्गित्वाभावेऽपि सास्नादिमद्व्यक्तौ संसृज्यते, एवं विषयान्तरासङ्ग्यपि जीवः स्वभावादन्तःकरणेन संसृज्यते। तथा च यदा अन्तःकरणस्य परिणामो वृत्तिरूपो नयनादिद्वारेण निर्गत्य विषयपर्यन्तं चक्षूरश्मिरिव झटिति दीर्घप्रभाकारेण परिणम्य विषयं व्याप्नोति, तदा तमुपारुह्य तं विषयं गोचरयति। केवलाग्न्यदाह्यस्यापि तृणादेः अयःपिण्डसमारूढाग्निदाह्यत्ववत् केवलजीवचैतन्याप्रकाश्यस्यापि घटादेः अन्तःकरणवृत्त्युपारूढतत्प्रकाश्यत्वं युक्तम्।

प्रतिबिम्बचैतन्यरूपजीवस्य व्यापकतया स्वसंसृष्टसकलजगदवभासकत्वापत्त्या सर्वज्ञत्वप्रसङ्गात्, स्वरूपचैतन्यस्य कारकानपेक्षतया चक्षुरादिवैयर्थ्यप्रसङ्गाच्च इति भावः।

अत्रोक्तमिति। अस्मिन्नाक्षेपे समाधानमुक्तमित्यर्थः। **न जीवचैतन्यमिति।** यथा जगत् ब्रह्मसंसृष्टं तथा जीवसंसृष्टं न भवति, अतो न तस्य सर्वज्ञत्वप्रसक्तिरित्यर्थः। ननु - यथा जीवस्य घटादिविषयैस्संबन्धाभावः, तथा अन्तःकरणादिनाऽपि सम्बन्धाभावस्तुल्यः, उपादानत्वाभावादेव। तथा च अन्तःकरणादेः वृत्तिं विनैव जीवचैतन्यरूपसाक्षिभास्यत्वं न स्यात् - इत्याशङ्क्य उपादानत्वाभावेऽपि जीवचैतन्यस्यान्तःकरणादिना तादात्म्यसम्बन्धे दृष्टान्तमाह—**यथा सर्वगतमिति। संसृज्यत इति।** अतो नान्तःकरणादेः [3]साक्षिभास्यत्वविरोध इति भावः। चक्षुरादिवैयर्थ्यप्रसङ्गं परिहरति—**तथा चेत्यादिना।** तथाचेत्यस्य 'जीवस्य स्वतो विषयसम्बन्धाभावे सति' इत्यर्थः। अन्तःकरणपरिणामस्य सहसा विषयव्याप्तौ दृष्टान्तः—**चक्षूरश्मिरिवेति। तमिति।** परिणाममित्यर्थः। **गोचरयतीति।** जीवचैतन्यमिति शेषः। विषयदेशे सतोऽपि जीवचैतन्यस्य स्वतो विषयावभासकत्वं नास्ति तस्यैव तु वृत्त्यारूढस्य तदस्ति इत्यत्र दृष्टान्तमाह - **केवलाग्नीति।** तत्प्रकाश्यत्वमित्यत्र तत्पदं जीवचैतन्यपरम्। ननु 'जीवचैतन्यस्य विषयदेशे सतोऽपि विषयैः संसर्गाभावात् न तत्प्रकाशकत्वं वृत्त्या तयोस्संसर्गलाभे च तत्प्रकाशकत्वम्' इति किमिति परिह्रियते, 'जीवचैतन्यस्य सर्वगतत्वेन सत्यपि विषयसंसर्गे बिम्बभूतब्रह्मचैतन्यवत् तस्यावृतत्वादेव न विषयप्रकाशकत्वम्' इति

---

1. असङ्गित्वात् - तादात्म्यसंबन्धरहितत्वात्।

2. सर्वगतं गोत्वसामान्यमिति। सर्वसर्वगता जातिः इति पक्षमाश्रित्य अयं दृष्टान्तः। व्यक्तिसर्वगता जातिः इति पक्षे नायं दृष्टान्तः, अपि तु प्रदीपप्रभा। सा हि रूपरसगन्धवद्घटादिदेशव्यापिन्यपि रूपेणैव संसृज्यते। अतो रूपमेव प्रकाशयति, तद्वत् जीवचैतन्यं अन्तःकरणेनैव संसर्गि तदेव प्रकाशयति, इति। अविद्याप्रतिबिम्बरूपजीवस्य सर्वासंबन्धेऽपि सर्वोपादानाविद्योपाधिकत्वात् सर्वगतत्वोक्तिः। यद्यप्येवं यः कश्चित्संबन्धः सम्भवति, तथाऽपि विवक्षितः तादात्म्यसंबन्धः न सम्भवति इत्यभिप्रायः।

3. साक्षिभास्यत्वेति—वृत्तिं विनैव इत्यादिः।

यद्वा अन्तःकरणोपाधिकत्वेन जीवः परिच्छिन्नः। अतः संसर्गाभावात् न घटादिकमवभासयति। वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तु तं विषयं प्रकाशयति।

अथवा जीवः सर्वगतोऽप्यविद्यावृतत्वात् स्वयमप्यप्रकाशमानतया विषयान्नावभासयति। विषयविशेषे वृत्त्युपरागादौ आवरणतिरोधानेन तत्रैवाभिव्यक्तः तमेव विषयं प्रकाशयति। [1]एवं च चिदुपरागार्थत्वेन विषयचैतन्याभेदाभिव्यक्त्यर्थत्वेन आवरणाभिभवार्थत्वेन वा वृत्तिनिर्गममपेक्ष्य तत्संसृष्टविषयमात्रावभासकत्वात् जीवस्य किञ्चिज्ज्ञत्वमप्युपपद्यते - इति।

प्रतिपादनेनापि जीवस्य सर्वज्ञत्वप्रसङ्गादेः परिहारसम्भवादिति - चेत् न। 'ब्रह्म न जानामि' इत्यनुभवबलात् तस्यावृतत्वेऽपि 'मां न जानामि' इत्यनुभवाभावेन जीवचैतन्यस्यावृतत्वासम्भवादिति भावः।

जीवचैतन्यस्यान्तःकरणोपाधिकतया परिच्छिन्नत्वपक्षे सर्वज्ञत्वापत्तिशङ्कैव नास्ति, तस्य विषयैस्सह स्वतस्सम्बन्धाभावेन वृत्तिं विना तत्प्रकाशकत्वासम्भवात् - इति परिहारान्तरमाह—**यद्वेति। अत इति।** परिच्छिन्नत्वादित्यर्थः। **तत्संसृष्टेति।** वृत्तिद्वारा वृत्तिमदन्तःकरणसंसृष्टं यत् विषयावच्छिन्नब्रह्मचैतन्यं तस्य अन्तःकरणोपाधिकजीवचैतन्येन सह अभेदाभिव्यक्तौ सत्यां स जीवः तं विषयं प्रकाशयतीत्यर्थः।

'अविद्याप्रतिबिम्बो जीवः' इति प्रथमपक्षमेवाश्रित्य जीवस्योपादानत्वाभावेऽपि घटादिविषयैस्सह संसर्गमभ्युपेत्य परिहारमाह—**अथ वेति। सर्वगतोऽपीति।** उपलक्षणं चैतत्। विषयसंसृष्टोऽपीत्यपि द्रष्टव्यम्। इतरथा विषयसंसर्गाभावादेव जीवस्य विषयप्रकाशकत्वाभावोपपत्तौ तस्यावृतत्वकल्पनवैयर्थ्यप्रसङ्गादिति बोध्यम्। न च - 'मां न जानामि' इत्यनुभवाभावात् कथं तस्यावृतत्वं सिद्ध्येदिति - वाच्यम्। अन्तःकरणोपहितजीवचैतन्यस्यैव मामित्यनुभवविषयतया व्यापकजीवचैतन्ये अन्तःकरणावच्छेदेन तदभावेऽपि विषयदेशे तस्यावृतत्वकल्पने बाधकाभावात्, सर्वगतत्वेन रूपेण 'मां न जानामि' इत्यनुभवसत्त्वाच्च, इति भावः। **स्वयमपीति।** विषयास्तावत् जडत्वात् स्वतो न प्रकाशन्ते, जीवस्तु स्वप्रकाशतया प्रकाशमानोऽपि आवृतत्वादप्रकाशमान इति वक्तुं अपिशब्दः। यद्वा अपिशब्दः [2]अवधारणार्थः। तथा च आवृतत्वात् स्वयं अप्रकाशमानतयैव इत्यर्थः। **वृत्त्युपरागादाविति।** विषयविशेषे वृत्त्युपरागे सति विषयदेशस्थजीवचैतन्यस्यापि वृत्त्युपरागो भवति। तेन च जीवचैतन्यगतस्यावरणस्य तिरोधानं भवति। तथा च जीवचैतन्ये यो वृत्त्युपरागः स आदिपदार्थः। **तत्रैवेति।** विषयविशेषे एवेत्यर्थः। **तमेवेति।** नान्यं विषयम्, अतो न सर्वज्ञत्वप्रसङ्ग इति भावः। इममेव भावं प्रकटयति—**एवं चेति।** जीवचैतन्यस्य वृत्तिं विना विषयानवभासकत्वे सिद्धे सतीत्यर्थः। **तत्संसृष्टेति।** वृत्तिसंसृष्टेत्यर्थः। **किञ्चिज्ज्ञत्वमपीति।** अनुभवसिद्धं किञ्चिज्ज्ञत्वम्। अनुभवसिद्धस्सर्वज्ञत्वाभावः

---

1. एवञ्चेत्यादि। उक्तपक्षत्रये आद्ययोः पक्षयोः अज्ञानं एकमेव। तच्च मूलाज्ञानमेव। नावस्थाज्ञानानां अभ्युपगमः, प्रयोजनाभावात्—इति ध्येयम्।
2. अवधारणार्थ इति। असंसृष्टत्वव्यावर्तनार्थ इत्यर्थः।

सम्बन्धवादः

अत्र प्रथमे पक्षे सर्वगतस्य जीवस्य वृत्त्यधीनः को विषयोपरागः। वृत्त्यापि पूर्वसिद्धयोर्निष्क्रिययोर्विषयजीवचैतन्ययोस्तादात्म्यस्य संयोगस्य वा न संभवत्याधानम्।

अत्र केचिदाहुः—**विषयविषयिभावसम्बन्ध एवेति।**

[1]अन्ये तु—**विषयविषयिभावमात्रे नियामिका वृत्तिश्चेत् अनिर्गताया अपि ऐन्द्रियकवृत्तेः तन्नियामकत्वं नातिप्रसङ्गावहमिति तन्निर्गमाभ्युपगमवैयर्थ्यापत्तेः स नाभिसंहितः, किं तु**

---

[2]तत्सिद्धं चक्षुराद्यनुविधानं च [3]अपिशब्दार्थः।

आक्षिपति—**अत्रेति**। उक्तपक्षेषु मध्ये इत्यर्थः। **क इति**। स्वरूपलक्षणो वा तादात्म्यलक्षणो वा संयोगलक्षणो वेति [4]किंशब्दार्थः। तत्र न तावदाद्यः वृत्त्यधीनः, जीवचैतन्यस्य सर्वगतत्वेन विषयदेशसन्निहितजीवचैतन्यविषययोः स्वरूपात्मकसम्बन्धस्य वृत्तिं विनापि सिद्धत्वात् - इत्याशयेन सर्वगतस्येत्युक्तम्। द्वितीयतृतीयौ क्रमेण दूषयति—**वृत्त्यापीति**। लोके ययोः पदार्थयोस्तादात्म्यमनुभूयते तत् तयोरादित आरभ्यैवानुभूयते, न तु मध्ये आगन्तुकं - इत्याशयेनाह—**पूर्वसिद्धयोरिति**। संयोगस्यान्यतरकर्मजत्वं उभयकर्मजत्वं वा वक्तव्यम्, तदुभयं प्रकृते न सम्भवतीत्याह—**निष्क्रिययोरिति**। न च सुवर्णादौ द्विविधकर्माभावेऽपि तेजःपार्थिवभागयोः संयोगो दृष्ट इति वाच्यम्। तथा विषयजीवचैतन्ययोरादित आरभ्य संयोगाभ्युपगमे तस्य वृत्त्यधीनत्वप्रतिपादनविरोधादिति भावः। वृत्त्याप्याधानं न सम्भवतीति सम्बन्धः। जीवचैतन्यस्य अनुपादानतया निरवयतया च विषयजीवचैतन्ययोस्तादात्म्यसंयोगौ स्वतो न स्त एव, वृत्त्यापि तयोराधानं न सम्भवतीत्यपिशब्दार्थः। आधानं उत्पादनमिति बोध्यम्।

विषयदेशे सन्निहितस्य जीवचैतन्यस्य वृत्त्युत्पत्तेः पूर्वं विषयविषयिभावलक्षणः सम्बन्धो नाभूत्, तदुत्पत्त्यनन्तरं स जायते, तस्यातिरिक्तस्यानिर्वचनीयस्य सम्भवात् - इत्याशयेनाह—**अत्र केचिदाहुरिति**। न तु स्वरूपसम्बन्धस्य वा तादात्म्यस्य वा संयोगस्य वा वृत्त्यधीनत्वमुपेयते, येनोक्तदोषः स्यात्, इत्येवकारार्थः।

परोक्षस्थले अनुमित्यादिवृत्त्युपहितजीवचैतन्यस्य अनुमेयादिविषयैः सह विषयविषयिभावलक्षणसम्बन्धस्य वृत्तिनिर्गमनं विनाऽपि सिद्धान्ते स्वीकारात् वृत्तिनिर्गमनमुपगच्छतां विवरणकाराणामयं सम्बन्धो नाभिप्रेत इत्याह—**विषयविषयिभावमात्र इति**। परोक्षस्थलसाधारणविषयविषयिभावे एवेत्यर्थः। **तन्नियामकत्वमिति**। विषयविषयिभावसम्बन्धः तच्छब्दार्थः। वृत्तिनिर्गमनाभावेऽपि यद्विषया वृत्तिर्जीवस्य स एव

---

1. संयोगद्वारकतादात्म्यं सम्बन्धः इति मतमाह—अन्ये तु इति।
2. तत्सिद्धमिति—अनुभवसिद्धमित्यर्थः।
3. अपिशब्दार्थ इति। ईश्वरस्य सर्वज्ञत्वं अपिशब्दार्थः इत्यपि वक्तुं शक्यम्। तदुक्तिश्च दृष्टान्तार्था।
4. किंशब्दार्थ इति। उक्तविकल्पसूचकः किंशब्द इत्यर्थः।

विषयसन्निहितजीवचैतन्यतादात्म्यापन्नाया वृत्तेर्विषयसंयोगे तस्यापि तद्द्वारकः परम्परासम्बन्धो लभ्यत इति स एव चिदुपरागोऽभिसंहितः - इत्याहुः ।

[1]अपरे तु - साक्षादपरोक्षचैतन्यसंसर्गेणैव सुखादेरापरोक्ष्यदर्शनात् अपरोक्षविषये साक्षात्संसर्ग एष्टव्यः । तस्माद्वृत्तेर्विषयसंयोगे वृत्तिरूपावच्छेदकलाभात् तदवच्छेदेन तदुपादानस्य जीव-

---

तस्य प्रकाश्यो नान्यः इति नियमसिद्धेः विषयान्तरप्रकाशकत्वापत्तिरूपातिप्रसङ्गो नास्तीत्यर्थः । संयोगादेरपि निरस्तत्वात् कस्सम्बन्धस्तदभिमत इति पृच्छति—**किं त्विति** । अभिमतसम्बन्धमाह—**विषयसन्निहितेति** । विषयव्यापितया उत्पन्नां वृत्तिं प्रति विषयसन्निहितजीवचैतन्यस्याधिष्ठानतया वृत्तेस्तत्तादात्म्यं बोध्यम् । **तस्यापीति** । विषयसन्निहितजीवचैतन्यस्यापि विषयावभासकत्वेनाभिमतस्य विषयेण सह [2]वृत्तिविषयसंयोगद्वारकः परम्परासम्बन्धः विषयसंयुक्तवृत्तितादात्म्यलक्षणो लभ्यत इत्यर्थः । उक्तसम्बन्धस्य वृत्तिनिर्गमनं विना असम्भवात् तन्निर्गमनं विवरणाचार्यैरुक्तमिति भावः ।

सुखादेरान्तरपदार्थस्यापरोक्षत्वे तत्प्रकाशकजीवचैतन्येन सह तस्य साक्षात्सम्बन्धः प्रयोजकत्वेन क्लृप्तः । एवं बाह्यघटादीनामापरोक्ष्येऽपि साक्षात्सम्बन्ध एषितव्यः । अन्यथा विषयापरोक्ष्ये क्वचित् साक्षात्सम्बन्धः क्वचित् परम्परासम्बन्धः प्रयोजक इति वैरूप्यापत्तेः, सम्भवति साक्षात्सम्बन्धे परम्परासम्बन्धकल्पनायोगाच्च । तस्मान्नायमप्याचार्याभिमतस्सम्बन्ध इत्याह—**अपरे त्विति** । **तस्मादिति** । परम्परासम्बन्धस्यानभिमतत्वादित्यर्थः । **वृत्तेरिति** । वृत्तेर्विषयेण संयोगे सति वृत्त्युपादानजीवचैतन्यस्यापि विषयेण सह संयोगजसंयोगस्सम्भवति । एतदुक्तं भवति - जीवचैतन्यस्य वृत्तिः कार्यम्, अकार्यं विषयः । वृत्तेर्जीवचैतन्यमुपादानकारणम् । तस्या वृत्तेर्विषयो नोपादानकारणम् । तथा च वृत्तिविषययोर्जीवचैतन्यं प्रति कार्याकार्ययोस्संयोगात् जीवचैतन्यविषययोः वृत्तिं प्रति कारणाकारणयोस्संयोगोऽत्र संयोगजसंयोगो विवक्षित इति । ननु कायं प्रति कारणभूतहस्तस्य तं प्रत्येवाकारणभूततरुणा संयोगात् हस्तकार्यकायस्य हस्ताकार्यतरुणा सह संयोगः उपेयते, हस्ततरुसंयोगदशायां तरौ 'हस्तावच्छेदेन तरुः कायसंयुक्तः' इत्यनुभवात् इत्याशङ्क्य, प्रकृते घटादौ विषये वृत्तिसंयोगदशायां घटे 'वृत्त्य-

---

1. संयोगः सम्बन्धः इति मतमाह—अपरे त्विति ।

2. वृत्तिविषयसंयोगद्वारक इति । गुणगुणिनोरभेदात् गुणेनापि विषयेण गुण्यात्मना वृत्तेः संयोगसम्बन्धसंभवात् न गुणस्य अप्रत्यक्षत्वापत्तिः । अथ वा परंपरायाः सम्बन्धत्वोपगमेन गुणसम्बद्धद्रव्यसंयोगघटितपरम्परायाः सम्बन्धत्वोपगमसंभवः । अन्यैरपि विषयैः उक्तपरम्परासंबन्धसम्भवेऽपि फलबलात् तत्तदिन्द्रियग्राह्यतया संप्रतिपन्नैरेव तत्तद्विषयैः उक्तपरम्परासंबन्धस्य भानप्रयोजकत्वं नान्यस्य इत्यभ्युपगमात् न चक्षुषा रसादेः, न रसनादिभिः द्रव्यरूपादेः ग्रहणप्रसङ्गः इति ध्येयम् । अथ वा संयोगशब्देन आकाराख्यः सम्बन्धविशेषो विवक्षितः अतः सर्वदोषनिरासः । एवमग्रेऽपि ।

स्यापि [1]संयोगजसंयोगः सम्भवति। कारणाकारणसंयोगात् कार्याकार्यसंयोगवत् कार्याकार्यसंयोगात् कारणाकारणसंयोगस्यापि युक्तितौल्येनाभ्युपगन्तुं युक्तत्वात् - इत्याहुः।

[2]एकदेशिनस्तु—अन्तःकरणोपहितस्य विषयावभासकचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्तिद्वारा विषयतादात्म्यसम्पादनमेव चिदुपरागोऽभिसंहितः। सर्वगततया सर्वविषयसन्निहितस्यापि जीवस्य तेन रूपेण विषयावभासकत्वे तस्य साधारणतया पुरुषविशेषापरोक्ष्यव-

---

वच्छेदेन घटः स्फुरति' इति जीवचैतन्यसंसृष्टत्वानुभवात्, इत्याशयेनाह—**कारणाकारणेति**। **युक्तितौल्येनेति**। उभयत्र कल्पकानुभवरूपाया युक्तेःतुल्यत्वेनेत्यर्थः।

ननु - विषयदेशे सन्निहितस्यापि जीवचैतन्यस्य वृत्त्युपादानत्वं विवरणाचार्याणामभिमतं न भवति, जीवस्यान्तःकरणाद्युपादानत्वाभावेऽपि सास्नादिमद्व्यक्तौ गोत्वसामान्यस्येव स्वभावादेव जीवस्यान्तःकरणादौ सम्बन्धः इत्यस्यार्थस्य 'एवं विषयासङ्गःयपि जीवः स्वभावादन्तःकरणेन संसृज्यते' इत्यत्र प्राक् विवरणमतत्वेन प्रतिपादितत्वात्। ततश्च जीवचैतन्यस्य वृत्तिं प्रत्युपादानकारणत्वाभावे सति उक्तसम्बन्धो न सिद्ध्यतीति संयोगजसंयोगोऽपि नाचार्यसम्मतः - इत्यस्वरसादाह—**एकदेशिनस्त्विति**। घटादिविषयावभासकजीवचैन्यस्य घटादिना विषयेण सह तादात्म्यसम्बन्धसम्पादनमेव चिदुपरागत्वेनाभिमतमित्यर्थः। ननु 'वृत्त्यापि पूर्वसिद्धयोर्विषयचैतन्ययोस्तादात्म्यस्य न सम्भवत्याधानम्' इति प्रागुक्तत्वात् कथं तत्सम्पादनम्, अत आह—**विषयतादात्म्यापन्नेति**। विम्बभूतब्रह्मचैतन्यस्य घटादिविषयोपादानतया ब्रह्मविषययोस्तादात्म्यं प्रागेव सिद्धम्। तथा च विषयतादात्म्यापन्नब्रह्मचैतन्येन सह विषयावभासकजीवचैतन्यस्य वृत्तिकृताभेदाभिव्यक्तौ सत्यां जीवचैतन्यस्य विषयतादात्म्यं [3]वृत्त्यधीनतया लभ्यते। अभेदाभिव्यक्तिप्रकारश्च वक्ष्यते। अतो न तादात्म्यसम्पादनानुपपत्तिरिति भावः। विषयावभासकजीवचैतन्यस्य अन्तःकरणोपहितस्येतियद्विशेषणं तस्य प्रयोजनमाह—**सर्वगततयेति**। **तेनेति**। [4]सर्वगतत्वेनेत्यर्थः। **तस्येति**। जीवस्येत्यर्थः। **साधारणतयेति**। सर्वपुरुषसाधारणतयेत्यर्थः। पुरुषपदं प्रमातृपरम्। अविद्याप्रतिविम्बो जीव इति पक्षे जीवभेदाभावात्। [**अयोगेन**] **तस्येति**। जीवस्येत्यर्थः। सर्वगतमपि जीवचैतन्यं यस्य पुरुषस्यान्तःकरणोपहितं सत् यमर्थमवभासयति सोऽर्थस्तस्यैवापरोक्षः नान्यस्य इति व्यवस्थितिसिद्धये अन्तःकरणोपहितत्वविशेषणं वाच्यमित्यर्थः। एकदेशिमते लाभमाह—**एवं चेति**।

---

1. संयोगजसंयोग इति। अस्मिन् पक्षेऽपि गुणगुणिनोरभेदः गुणेनापि गुण्यात्मना संयोगः उपेयः। अन्यथा गुणेन संयोगरूपस्य उक्तचिदुपरागस्य अभावात् गुणस्य प्रत्यक्षं न स्यात् इत्यादि विभावनीयम्।

2. तादात्म्यं संबन्धः इति मतमाह - एकदेशिनस्त्विति।

3. वृत्त्यधीनतयेति। वृत्त्यधीनं इत्यर्थः। इत्थंभावे तृतीया।

4. सर्वगतत्वेनेत्यर्थ इति। सर्वगतत्वसंपादकेन अविद्योपहितत्वेन इत्यर्थ इति भावः।

स्थित्ययोगेन तस्य अन्तःकरणोपहितत्वरूपेणैव विषयावभासकत्वात्। एवं च विषयापरोक्ष्ये आध्यासिकसम्बन्धो [1]नियामक इति सिद्धान्तोऽपि सङ्गच्छते। न चैवं द्वितीयपक्षसाङ्कर्यम्। जीवस्य सर्वगतत्वे प्रथमः पक्षः, परिच्छिन्नत्वे द्वितीयः, इत्येव तयोर्भेदात् - इत्याहुः।

विषयावभासकजीवचैतन्यस्य वृत्त्या विषयतादात्म्यसम्पादनोपगमे सतीत्यर्थः। **आध्यासिकेति**। अध्याससिद्धतादात्म्यसम्बन्ध इत्यर्थः। **न चैवमिति**। सम्बन्धार्था वृत्तिरिति प्रथमपक्षेऽपि वृत्त्या अभेदाभिव्यक्त्युपगमे इत्यर्थः। साङ्कर्यं परिहरति—**जीवस्येति**। जीवस्य सर्वगतत्वमते सम्बन्धार्था वृत्तिरिति प्रथमः पक्षः, जीवस्यान्तःकरणोपाधिकतया परिच्छिन्नत्वमते अभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयः पक्षः, इत्यर्थः।

अयं भावः- प्रथमद्वितीयपक्षयोरुभयोर्वृत्तिकृताभेदाभिव्यक्तिसाम्येऽपि प्रथमपक्षे वृत्तिः अभेदाभिव्यक्तिद्वारा विषयावभासकजीवचैतन्यस्य विषयेण सह तादात्म्यसम्बन्धसम्पादनार्था, द्वितीयपक्षे तु वृत्तिः विषयावभासकजीवचैतन्यस्य विषयावच्छिन्नचैतन्येनाभेदाभिव्यक्त्यर्थैव इति न तयोः पक्षयोस्साङ्कर्यमिति। यद्वा प्रथमपक्षे जीवस्य व्यापकतया विषयदेशे सदा सन्निहितस्यैव विषयावभासकजीवचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्त्यर्था वृत्तिः। द्वितीयपक्षे तु जीवस्य परिच्छिन्नतया वृत्तिः तस्य विषयसन्निधिं सम्पाद्य विषयाधिष्ठानब्रह्मचैतन्याभेदाभिव्यक्तिमपि सम्पादयतीति तयोः पक्षयोः असाङ्कर्यम्। अयं परिहारो मूले सर्वगतत्वपरिच्छिन्नत्वपदाभ्यां सूचितः। पूर्वपरिहारस्तु प्रथमपक्षद्वितीयपक्षपदाभ्यां सूचितः। सम्बन्धार्था वृत्तिरिति प्रथमपक्षे सम्बन्धस्योद्देश्यत्वावगमात्, अभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयपक्षे अभेदाभिव्यक्तेरेवोद्देश्यत्वावगमात् इति। अत्र मते विवक्षितविवेकेन वृत्तेः अभेदाभिव्यक्तिरेव प्रयोजनं प्रथमद्वितीयपक्षयोः पर्यवस्यतीति तयोः साङ्कर्यं दुर्वारं इत्यभिप्रेत्य आदावेव एकदेशिन इत्युक्तमिति मन्तव्यम्।

[2]वस्तुतस्तु सम्बन्धार्था वृत्तिरिति वदतामाचार्याणामयमभिप्रायः - विषयावभासकत्वेनाभिमतस्य जीवचैतन्यस्य विषयेण घटादिना सह व्यङ्ग्यव्यञ्जकतालक्षणः सम्बन्धः तत्तद्विषयसंसृष्टवृत्त्यधीनोऽत्र विवक्षितः। तथा

---

1. नियामक इति। दृग्दृश्ययोः सम्बन्धान्तरस्य अनुपपत्तेः आकरादौ विशदीकरणात् इति भावः।

2. व्यङ्ग्यव्यञ्जकभावः संबन्धः इति सिद्धान्तपक्षमाह—वस्तुतस्त्विति। अयं च व्यापकजीवपक्षे। तथा च व्यापकजीवपक्षे सम्बन्धविशेषार्था वृत्तिः, यथा 'सर्वसर्वगता जातिः' इति पक्षे गोत्वस्य अश्वादिसाधारणः कश्चित् स्वरूपविशेषात्मकः संबन्धः, गोव्यक्तिमात्रे समवायः, एवं सर्वगतस्य जीवस्य सर्वसाधारणः कश्चित् संबन्धः, व्यङ्ग्यव्यञ्जकभावः सम्बन्धविशेषः, तदर्था वृत्तिः इति भावः।

परिच्छिन्नजीवपक्षे अभेदाभिव्यक्त्यर्था वृत्तिः। यद्यपि विषयचैतन्येन जीवचैतन्यस्य अभेदाभिव्यक्तावपि विषयेण सम्बन्धाभावे 'मम घटो भाति' इति घटापरोक्षं न स्यात्, तथाऽपि विषयचैतन्यजीवयोः अभेदे विषयविषयचैतन्ययोः सम्बन्धः विषयजीवचैतन्ययोः सम्बन्धः सम्पन्न इति नोक्तानुपपत्तिः। नन्वेवं अभेदाभिव्यक्तिपक्षः 'परिच्छिन्नजीवपक्षे सम्बन्धार्था वृत्तिः' इत्यर्थे पर्यवस्यति इति चेत्—सत्यम्। अत एव ग्रन्थान्तरे 'परिच्छिन्नजीवपक्षे सम्बन्धार्था वृत्तिः' इत्येव द्वितीयपक्षः उपवर्णितः।

अभेदाभिव्यक्तिवादः

अथ द्वितीयपक्षे केयमभेदाभिव्यक्तिः ?

केचित् आहुः—**कुल्याद्वारा तटाककेदारसलिलयोरिव विषयान्तःकरणावच्छिन्नचैतन्ययोः वृत्तिद्वारा एकीभावोऽभेदाभिव्यक्तिः। एवं च यद्यपि विषयावच्छिन्नं ब्रह्मचैतन्यमेव विषय-**

हि - अन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव चैतन्याभिव्यञ्जनसमर्थम्। घटादिकं तु तथा न भवति। अस्वच्छद्रव्यत्वात्। घटादिविषयव्याप्तया तु वृत्त्या तत्र विद्यमानमस्वाच्छ्यमभिभूय चैतन्याभिव्यञ्जनयोग्यता आधीयते। तदुक्तं विवरणाचार्यैरेव - 'अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयति' इति। दृष्टं च अस्वच्छस्यापि स्वच्छद्रव्यसंसर्गात् प्रतिबिम्बग्राहित्वयोग्यत्वम्। यथा कुड्यादेः जलसंयोगकाले प्रतिबिम्बग्राहित्वम्। घटादेः स्वसन्निहितजीवचैतन्यव्यञ्जकत्वं च तत्प्रतिबिम्बग्राहित्वम्। चैतन्यस्यापि व्यङ्ग्यत्वं तत्र प्रतिबिम्बितत्वमेव। एवंविधव्यङ्ग्यव्यञ्जकतालक्षणसम्बन्धार्थमेव वृत्तेर्निर्गमनमुक्तं विवरणे। तथा च वृत्त्या बहिर्निर्गतया विषयचैतन्ययोर्यथोक्तसम्बन्धे सम्पादिते सति [1]घटादौ प्रतिबिम्बितं तत्रत्यजीवचैतन्यं तमवभासयतीति।

द्वितीयपक्षमाक्षिपति—**अथेति। केयमिति।** अभेदाभिव्यक्त्यर्था वृत्तिरिति द्वितीयपक्षो हि जीवस्य परिच्छिन्नत्वमते इत्युक्तम्। अस्मिन् मते अन्तःकरणोपाधिकस्य जीवस्य विषयावच्छिन्नबिम्बभूतब्रह्मचैतन्यस्य च वृत्त्या अभेदाभिव्यक्तिर्न सम्भवति, अखण्डाकारवृत्तेरिव घटादिगोचरवृत्तेः उपाधिनिवर्तकत्वाभावेन भेदकोपाध्योरन्तःकरणविषययोः सतोः जीवब्रह्माभेदाभिव्यक्तेरयोगात् इत्यर्थः। व्यावर्तकोपाध्योः सत्त्वेऽपि तयोरेकदेशस्थत्वसम्पत्तौ तद्बलादभेदाभिव्यक्तिः सम्भवति, लोके तथा दर्शनात्, इति परिहरति—**केचिदाहुरिति।** केदारः सस्यनिष्पत्तिस्थानम्। तथा च तटाकस्थसलिलस्य कुल्याद्वारा केदारसलिलस्य च अभेदाभिव्यक्तिर्यथा लोके प्रसिद्धा, तथा अन्तःकरणावच्छिन्नचैतन्यरूपजीवस्य विषयावच्छिन्नब्रह्मचैतन्यस्य च वृत्तिद्वारा अभेदाभिव्यक्तिर्भवति, वृत्तेर्विषयदेशस्थत्वे सति वृत्तिवृत्तिमतोरभेदेन जीवोपाध्यन्तःकरणस्यापि विषयदेशस्थत्वसिद्धेरित्यर्थः। **एवं चेति।** अभेदाभिव्यक्तौ सम्भावितायामित्यर्थः। ननु - जीवचैतन्यस्य विषयावभासकत्वं न सम्भवति। तस्य विषयं प्रत्युपादानत्वाभावेन तादात्म्यसम्बन्धाभावात्। न च - ब्रह्मचैतन्यमेव विषयावभासकमस्तु, तस्य उपादानतया साक्षादेव तादात्म्यसम्बन्धलाभादिति - वाच्यम्। तथा सति 'आलोकेन घटः प्रकाशितः' इतिवत् 'मया घटोऽवगतः' इति जीवचैतन्यस्यैव घटप्रकाशकत्वावगमविरोधात्-इति मत्वा पुनश्शङ्कते अभेदाभिव्यक्तिप्रयोजनं वक्तुम्—**यद्यपीति। विषयप्रकाशकमिति।**

---

1. घटादौ प्रतिबिम्बितमिति। न च एवं सति 'आध्यासिकतादात्म्यसंबन्धः विषयापरोक्षे नियामकः' इति सिद्धान्तभङ्गः स्यात् इति वाच्यम्। उपाध्योः एकदेशस्थत्वेन बिम्बभूतजीवचिद्विषयचितोरभेदात् विषयचिद्विषययोः आध्यासिकतादात्म्यात् बिम्बभूतजीवचिद्विषययोः तादात्म्यस्य सम्पत्तेः प्रतिबिम्बस्यापि तादात्म्यात्, बिम्बप्रतिबिम्बयोरभेदात्।

प्रकाशकं, तथाऽपि तस्य वृत्तिद्वारा एकीभावेन जीवत्वं सम्पन्नमिति जीवस्य विषयप्रकाशोपपत्तिरिति ।

अन्ये त्वाहुः—**बिम्बस्थानीयस्य विषयावच्छिन्नस्य ब्रह्मणः प्रतिबिम्बभूतेन जीवेन एकीभावो नाभेदाभिव्यक्तिः। व्यावर्तकोपाधौ दर्पण इव जाग्रति तयोरेकीभावायोगात्, वृत्तिकृताभेदाभिव्यक्त्या विषयावच्छिन्नस्य ब्रह्मणो जीवत्वप्राप्तौ ब्रह्मणस्तदा तद्विषयसंसर्गाभावेन तद्द्रष्टृत्वासम्भवे सति तस्य सर्वज्ञत्वाभावापत्तेश्च । किं तु विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टाया वृत्तेःअग्रभागे विषयप्रकाशकं प्रतिबिम्बमर्पयतीति तस्य प्रतिबिम्बस्य जीवेनैकीभावः।**

इति वक्तव्यं तादात्म्यसम्बन्धलाभात् इति शेषः । न जीवचैतन्यमित्येवकारार्थः । 'तथा च मयाऽयमवगतो घटः' इत्यनुभवविरोध इति भावः । परिहरति—**तथाऽपीति । तस्येति ।** तादात्म्यसम्बन्धेन विषयावभासकब्रह्मचैतन्यस्य वृत्तिद्वारा अन्तःकरणोपहितत्वप्राप्तौ जीवेनैकीभावात् जीवत्वं सम्पन्नमिति ब्रह्मचैतन्यस्य यत् विषयावभासकत्वं तत् जीवस्यैवेति प्राप्त्या नानुभवविरोध इत्यर्थः ।

दर्पण इवेति । यथा दर्पणे प्रतिबिम्बदशायां बिम्बप्रतिबिम्बयोरभेदाभिव्यक्तिर्नास्ति तयोस्तदा भेदानुभवात्, तथा प्रकृतेऽपि विषयादिरूपभेदकोपाधौ सति सा न सम्भवतीत्यर्थः । ननु - तत्त्वसाक्षात्कारेणाशेषोपाधिनिवृत्तौ यादृश्यभेदाभिव्यक्तिः तादृश्यत्र न विवक्षिता । किं तु क्षीरनीरयोरेकपात्रस्थयोरिव वृत्तिद्वारा अन्तःकरणविषययोरेकदेशस्थत्वप्राप्तौ तन्मात्रप्रयुक्ता तदवच्छिन्नचैतन्ययोरौपचारिक्यभेदाभिव्यक्तिः विवक्षिता । अस्यां चाभेदाभिव्यक्तौ न व्यावर्तकोपाधिसत्त्वप्रयुक्तो विरोधोऽस्ति । दर्पणे मुखप्रतिबिम्बदशायामपि 'मम मुखमेव दर्पणे भाति' इति बिम्बप्रतिबिम्बयोरभेदाभिव्यक्तिदर्शनात् । अस्मिन्मतेऽपीत्थमेव निर्वाहः कर्तव्यः । न ह्यन्तःकरणतद्वृत्तिप्रतिबिम्बयोरभेदाभिव्यक्तिर्मुख्या सम्भवति । वृत्तिवृत्तिमतोः कार्यकारणभावापन्नयोः ऐक्यायोगेन तत्प्रतिबिम्बयोरैक्यायोगात् । ऐक्ये वा 'एवं च' इत्यादिना प्रमात्रादीनामस्मिन्मते साङ्कर्याभावोपपादनविरोधात् - इत्यस्वरसादाह—**वृत्तिकृताभेदाभिव्यक्त्येति । तदा तद्विषयेति ।** विषयावच्छिन्नब्रह्मणो जीवत्वप्राप्तौ तस्येश्वरत्वनिवृत्तिरवश्यं वाच्या । चैतन्ये एकावच्छेदेन जीवत्वेश्वरत्वयोरसम्भवात् । तथा च तदा जीवत्वदशायां ब्रह्मणस्तद्विषयसंसर्गाभावेन तद्द्रष्टृत्वं न सम्भवतीत्यर्थः । तस्येत्यनन्तरं तदेत्यनुषङ्गः । ननु - विषयाधिष्ठानचैतन्यस्य वृत्तिसंसर्गदशायामन्तःकरणोपहितत्वप्रयुक्तजीवत्ववदविद्योपहितत्वप्रयुक्तमीश्वरत्वमप्यविरुद्धम् । तथा च बिम्बभूतेश्वरस्य तदापि सर्वज्ञत्वमक्षतम् । अन्यथा अन्तःकरणाद्यधिष्ठानचैतन्यस्य तदुपाधिकत्वप्रयुक्तजीवत्वे सदा स्थिते सति बिम्बभूतब्रह्मणः सदा अन्तःकरणादिसंसर्गाभावेन तद्द्रष्टृत्वासम्भवे सति सदा सर्वज्ञत्वाभावप्रसङ्गदोष इहापि मते तुल्यः - इत्यस्वरसं मनसि निधाय कीदृशी तर्हि त्वदभिमता अभेदाभिव्यक्तिरिति पृच्छति—**किं त्विति ।** तामाह - **विषयावच्छिन्नमिति । अग्रभाग इति ।** वृत्तिर्हि हृदयस्थान्तःकरणमारभ्य विषयपर्यन्तमविच्छिन्ना कौस्तुभमण्यादिप्रभावद्दीर्घीभावमापन्ना तिष्ठति । तस्या वृत्तेः विषयसंसृष्टो भागोऽग्रभाग इति

एवं च अन्तःकरणतद्वृत्तिविषयावच्छिन्नचैतन्यानां प्रमातृ[1]प्रमाणप्रमेयभावेन असङ्करोऽप्युपपद्यते। न च वृत्त्युपहितचैतन्यस्य विषयप्रमातृत्वे तस्य विषयाधिष्ठानचैतन्यस्येव विषयेणाध्यासिकसम्बन्धाभावात् विषयापरोक्ष्ये आध्यासिकसम्बन्धस्तन्त्रं न स्यादिति वाच्यम्। विषयाधिष्ठानचैतन्यस्यैव विषयेणावच्छिन्नस्य वृत्तौ प्रतिबिम्बिततया तदभेदेन तत्सम्बन्धस्यैव तत्सम्बन्धत्वादिति।

अपरे त्वाहुः—**बिम्बभूतविषयाधिष्ठानचैतन्यमेव साक्षादाध्यासिकसम्बन्धलाभात् विषयप्रकाशकमिति तस्यैव बिम्बत्वविशिष्टरूपेण भेदसद्भावेऽपि तदुपलक्षितचैतन्यात्मना एकीभावोऽभेदाभिव्यक्तिः। न चैवंसति जीवब्रह्मसाङ्कर्यम्, न वा ब्रह्मणः सर्वज्ञत्वविरोधः। बिम्बात्मना**

उच्यते। तत्र यो ब्रह्मणः प्रतिबिम्बः तस्य विषयप्रकाशकस्य जीवेनैकीभावः इह अभेदाभिव्यक्तिर्विवक्षिता। वृत्तिवृत्तिमतोस्तादात्म्यरूपाभेदसत्त्वेन तत्प्रतिबिम्बयोरभेदाभिव्यक्तिसम्भवादित्यर्थः। **एवं चेति।** वृत्तिप्रतिबिम्बस्यान्तःकरणप्रतिबिम्बाद्वस्तुतो भिन्नस्यैव सतः [2]तदभेदेनाभिव्यक्तस्य विषयावभासकत्वे स्वीकृते सतीत्यर्थः। **असङ्करोऽपीति।** वृत्तिवृत्तिमतोस्तादात्म्यात् तत्प्रतिबिम्बयोरभेदाभिव्यक्तिवत् असङ्करोऽप्युपपद्यते इत्यपिशब्दार्थः। मुखं दर्पणोपाधिनेव अन्तःकरणेनोपाधिना अवच्छिन्नं तत्प्रतिबिम्बचैतन्यं प्रमाता, वृत्तिप्रतिबिम्बचैतन्यं तयैवावच्छिन्नं प्रमा, विषयावच्छिन्नं ब्रह्मचैतन्यं प्रमेयमिति तेषामसाङ्कर्यमुपपद्यते, व्यावर्तकोपाधिसद्भावादित्यर्थः। अस्मिन्मते असाङ्कर्यमुपपद्यत इत्युक्त्या पूर्वमते विषयावच्छिन्नब्रह्मचैतन्यस्य जीवत्वप्राप्तिस्वीकारात् प्रमातृप्रमेयचैतन्ययोरसाङ्कर्यं नोपपद्यते इति सूचितम्। वस्तुस्तु पूर्वमतेऽपि न साङ्कर्यम्, जीवब्रह्मभेदकोपाधिसद्भावस्य तत्प्रयुक्ततया सर्वज्ञत्वादिव्यवस्थायाश्च प्राग्दर्शितत्वादिति मन्तव्यम्। शङ्कते—**न चेति। तस्येति।** तस्य विषयेणाध्यासिकसम्बन्धाभावात् इति सम्बन्धः। प्रमारूपस्य वृत्तिप्रतिबिम्बस्य विषयोपादानत्वाभावेन तयोस्तादात्म्यासम्भवात्। तथा च विषयापरोक्ष्ये आध्यासिकतादात्म्यसम्बन्धो नियामक इति सिद्धान्तविरोध इति शङ्काभिप्रायः। बिम्बप्रतिबिम्बयोरभेदाभ्युपगमात् बिम्बचैतन्यस्य विषयेण सह यस्तादात्म्यसम्बन्धः स एव प्रमारूपप्रतिबिम्बस्यापीति नापसिद्धान्त इति परिहरति—**विषयाधिष्ठानेति। तदभेदेनेति।** प्रतिबिम्बचैतन्यस्य बिम्बाभेदेनेत्यर्थः।

बिम्बप्रतिबिम्बयोरभेदे सत्यपि कल्पितभेदसत्त्वात् बिम्बसम्बन्धस्य प्रतिबिम्बसम्बन्धत्वं नास्ति इत्यस्वरसं साक्षात्पदेन सूचयन् अभेदाभिव्यक्तिं प्रकारान्तरेणाह—**अपरे त्वाहुरिति। भेदसद्भावेऽपीति।** प्रतिबिम्बत्वविशिष्टचैतन्यरूपजीवेन सहेति शेषः। **तदिति।** बिम्बत्वप्रतिबिम्बत्वाभ्यामुपलक्षितं शुद्धचैतन्यं, तदात्मनेत्यर्थः। **न चैवंसतीति।** उपलक्षितचैतन्यात्मना अभेदाभिव्यक्त्यङ्गीकारे पूर्वोक्तं दोषद्वयं नास्तीत्यर्थः।

---

1. प्रमाणेति। प्रमेत्यर्थः।
2. तदभेदेनाभिव्यक्तस्य—प्रतिभासिकाभेदवतः।

तस्य यथापूर्वमवस्थानादिति ।

आवरणाभिभववादः

अथ तृतीयपक्षे को नामावरणाभिभवः ? अज्ञाननाशश्चेत् घटज्ञानेनैवाज्ञानमूलः प्रपञ्चो निवर्तेत - इति चेत्

अत्र केचित् आहुः — चैतन्यमात्रावारकस्याज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादिप्रकाशेन महान्धकारस्येव ज्ञानेन [1]एकदेशेन नाशो वा कटवत् संवेष्टनं वा भीतभटवदपसरणं वा अभिभव इति ।

अन्ये तु - अज्ञानस्य एकदेशेन नाशे उपादानाभावात् पुनस्तत्र कन्दलनायोगेन सकृदवगते समयान्तरेऽप्यावरणाभावप्रसङ्गात् निष्क्रियस्यापसरणसंवेष्टनयोरसम्भवाच्च न यथोक्तरूपोऽभिभवः सम्भवति । अतः चैतन्यमात्रावारकस्याप्यज्ञानस्य [2]तत्तदाकारवृत्तिसंसृष्टावस्थविषयावच्छिन्नचैत-

---

अत्रेदं चिन्त्यम् - उपलक्षितचैतन्यात्मना एकीभावः न वास्तवाभेदः । तस्य वृत्त्यनपेक्षत्वात् । नापि व्यावहारिकाभेदः । बिम्बप्रतिबिम्बभेदस्य व्यावहारिकत्वेन तत्समसत्ताकाभेदासम्भवात् । नापि प्रातिभासिकाभेदः । उपाध्योरेकदेशस्थत्वमात्रेण बिम्बप्रतिबिम्बचैतन्ययोः प्रातिभासिकाभेदसम्भवेन तदर्थं चैतन्यमात्रोपलक्षणवैयर्थ्यादिति ।

तृतीयं पक्षमाक्षिपति—**अथेति । निवर्तेतेति ।** अज्ञानस्यैकत्वादितिभावः । न तु निवर्तते । अतो नाज्ञाननाशः आवरणाभिभवः, न चान्यः प्रकारः सम्भवति, अनुपलम्भात् इति भावः ।

अज्ञानैक्यमेवावलम्ब्य परिहरति—**अत्र केचिदाहुरिति । चैतन्यमात्रेति ।** मात्रपदं साक्षिव्यतिरिक्तकृत्स्नचैतन्यपरम् । साक्षिण्यावरणाभावस्य वक्ष्यमाणत्वात् । **एकदेशेन नाशो वेति ।** तथा च तन्मूलप्रपञ्चस्य न निवृत्त्यापत्तिरिति भावः । प्रकारान्तरानुपलम्भोऽसिद्ध इत्याशयेनाह—**कटवदित्यादिना ।**

निरुक्तमावरणाभिभवं दूषयन् तं प्रकारान्तरेण निर्वक्ति—**अन्ये त्वित्यादिना । (पुनस्तत्रेति) [तत्र कन्दलनायोगेनेति ।]** विषयावच्छिन्नचैतन्ये आवरणोत्पत्त्ययोगेनेत्यर्थः । **तत्तदिति ।** तत्तद्विषयाकारवृत्ति-

---

1. एकदेशेन नाश इति । वृत्तौ सत्यां अज्ञानस्य स्वकार्याक्षमत्वं एकदेशेन नाशः इति विवक्षायां अपसरणसंवेष्टनपक्षाविशेषप्रसङ्गः । यतः भीरुभटवदपसरणं नाम यथा प्रतिभटागमनक्षणे एव भीरुभटापसरणं तथा वृत्त्युत्पत्तिक्षणे एव आवरणाभिभवः अज्ञानस्य आवरणरूपस्वकार्याक्षमत्वरूपः । कटवत् संवेष्टनं नाम यथा हस्तसंयोगोत्पत्त्यनन्तरं कटस्य वेष्टनं तथा वृत्त्युत्पत्तिक्षणोत्तरं वृत्तिकाले आवरणाभिभवः अज्ञानस्य आवरणरूपस्वकार्याक्षमत्वरूपः । अतः एकदेशनाशो नाम तत्तद्विषयकत्वावच्छेदेन तत्तद्विषयकवृत्तिनिवर्त्यत्वम् विवक्षितमिति ध्येयम् । नन्वेवं सति अस्मिन् मते द्वितीयतृतीयपक्षयोः समनन्तरवक्ष्यमाणदोषाणां अनवकाशः इति चेत्—सत्यम् । यथाश्रुतार्थमादाय दूषणोपन्यास इति ध्येयम् ।

2. तत्तदाकारवृत्तिसंसृष्टेत्यादि । तत्तद्विषयकास्तित्वभातत्वप्रत्ययव्यवहारौ प्रति तत्तद्विषयकवृत्तिविरहविशिष्टाज्ञानत्वेन प्रतिबन्धकत्वमावारकत्वं तदभावः अनावारकत्वं इत्यर्थः । एतादृशमनावारकत्वमेव पूर्वं एकदेशनाशोक्त्या विवक्षितं इत्युक्तौ न कोऽपि दोषः ।

न्यानावरकत्वस्वाभाव्यमेव अभिभवः। न च विषयावगुण्ठनपटवत् विषयचैतन्यमाश्रित्य स्थितस्याज्ञानस्य कथं तदनावारकत्वं युज्यत इति शङ्क्यम्। 'अहमज्ञः' इति प्रतीत्या अहमनुभवे प्रकाशमानचैतन्यमाश्रयत एव तस्य तदनावारकत्वसम्प्रतिपत्तेः—इत्याहुः।

[1]अपरे तु—'घटं न जानामि' इति घटज्ञानविरोधित्वेन, घटज्ञाने सति 'घटाज्ञानं निवृत्तम्' इति तन्निवर्त्यत्वेन च अनुभूयमानं न मूलाज्ञानम्। शुद्धचैतन्यविषयस्य तज्ज्ञाननिवर्त्यस्य च तस्य तथात्वायोगात्। किन्तु घटावच्छिन्नचैतन्यविषयं मूलाज्ञानस्यावस्थाभेदरूपमज्ञानान्तरमिति तन्नाश एवाभिभवः। न चैवमेकेन ज्ञानेन तन्नाशे तत्समानविषयाणां ज्ञानान्तराणां आवरणानभिभावकत्वापत्तिः। यावन्ति ज्ञानानि तावन्ति तन्निवर्त्यानि अज्ञानानि इत्यभ्युपगमात्—इत्याहुः।

संसृष्टावस्थं यत् विषयावच्छिन्नचैतन्यं तदनावारकत्वेत्यर्थः। ननु यथा घटं व्याप्य वर्तमानः पटः तमावृणोत्येव एवं विषयावच्छिन्नब्रह्मचैतन्यं व्याप्य वर्तमानमज्ञानमपि चैतन्यमावृणोत्येवेति तदनावारकत्वकल्पनमयुक्तमिति शङ्कते—**न चेति**। अज्ञाने पटवैलक्षण्यस्यानुभवसिद्धत्वान्नैतच्चोद्यमवतरतीत्याह—**अहमिति**। **तस्येति**। अज्ञानस्येत्यर्थः। जीवचैतन्याश्रितमप्यज्ञानं न तदावृणोति, तस्यावृतत्वे सर्वव्यवहारलोपप्रसङ्गात् इति [2]दहराधिकरणभाष्ये साधितत्वात्, साक्षिचैतन्यस्यानावृतताया वक्ष्यमाणत्वाच्च इति भावः।

प्रपञ्चोपादानमूलाज्ञानापेक्षयाऽन्यदेव विषयावच्छिन्नचैतन्यावारकमज्ञानमिति घटादिज्ञानेन तन्निवृत्तावपि न प्रपञ्चनिवृत्तिप्रसङ्गः, तेन प्रपञ्चमूलाज्ञानानिवृत्तेः-इति मतं[3] दर्शयति—**अपरे त्विति**। अज्ञानभेदे मानमाह—**घटमिति**। **विरोधित्वेनेति**। 'न जानामि' इत्यज्ञानानुभवाभिलापकशब्दे नञो विरोध्यर्थकत्वात् [4]अभिलप्यानु-

---

1. अपरे त्विति। मीमांसकवत् शक्तिपदार्थोपगन्तॄणां वेदान्तिनां उक्तरीत्या प्रतिबन्धकत्वोक्त्यसंभवात् एकाज्ञानपक्षे अनुपदोक्तावरणाभिभवप्रकारः दुर्निरूपः इति अस्वरसेनाह—अपरे त्विति।

2. दहराधिकरणभाष्ये इति। 'दृष्टिश्रुतिमतिविज्ञप्तयो हि जीवस्य स्वरूपम्, तच्च...सदा निष्पन्नमेव दृश्यते।...... सर्वो हि जीवः पश्यन् शृण्वन् मन्वानो विजानन् व्यवहरति। अन्यथा व्यवहारानुपपत्तेः' इति भाष्यमत्रानुसन्धेयम्।

3. इष्टसिद्धिकाराणां मतम्। प्राङ्निरूपितं मतं तु विवरणकृताम्। परन्तु इष्टसिद्धिकाराणां मतमपि 'अथ वा' इति पक्षान्तरतया विवरणे उक्तम्।

4. अभिलप्यमानप्रतीतेः अभिलापजन्यप्रतीतिसमानविषयकत्वनियमात् इति भावः। नन्वेवं पर्वते संयोगेन वह्निसाध्यकानुमितिस्थले पर्वतो वह्निमान् इत्येव अभिलापात् अभिलापजन्यप्रतीतौ तादात्म्येन वह्निमतो विषयत्वात् अनुमितौ च तदभावात् उक्तनियमस्य व्यभिचारः इति चेत्—न। नञ्युक्तवाक्यरूपाभिलापजन्यप्रतीतिसमानविषयकत्वनियमात् इति भावात्।

इमानि च अवस्थारूपाणि अज्ञानानि मूलाज्ञानवदज्ञानत्वात् अनादीनीति केचित्।

व्यावहारिकौ जगज्जीवावावृत्य स्वाप्नौ जगज्जीवौ विक्षिपन्ती निद्रा तावत् आवरण-विक्षेपशक्तियोगात् अज्ञानावस्थाभेदरूपा। तथा सुषुप्त्यवस्थाऽपि अन्तःकरणादौ विलीने 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति परामर्शदर्शनात् मूलाज्ञानवत् सुषुप्तिकालेऽनुभूयमाना अज्ञानावस्था-

---

भवोऽपि ज्ञानविरोधिविषयक एव। न च - 'न जानामि' इत्यनुभवो ज्ञानप्रागभावविषयक एव, न तु भावरूपाज्ञानविषयकः इति - वाच्यम्। प्रागभावस्यैवासंप्रतिपत्तेः इति भावः। **तथात्वायोगादिति।** घटावच्छिन्नचैतन्यविषयकत्वतज्ज्ञाननिवर्त्यत्वयोरयोगादित्यर्थः। किं त्वज्ञानान्तरमिति सम्बन्धः। **अवस्थाभेदरूपमिति।** अस्य विशेषणस्य [1]प्रयोजनं वक्ष्यते। **न चैवमेकेनेत्यादि** ग्रन्थः स्पष्टार्थः।

ननु - अवस्थाऽज्ञानानि किमनादीनि किं वा आदिमन्ति। नाद्यः, मानाभावात्। न द्वितीयः, अज्ञानमनादीति सिद्धान्तविरोधात् - इति चेत्, अत्र केचिदाद्यं पक्षं साधयन्तीत्याह—**इमानि चेति।** अवस्थाऽज्ञानानि अनादीनि, अज्ञानत्वात्, मूलाज्ञानवत्। न च दृष्टान्तासिद्धिः। देवताधिकरणादौ मूलाज्ञानानादित्वस्य श्रुतिन्यायाभ्यां साधितत्वादिति भावः। न च अज्ञानगतानादित्वे मूलाज्ञानत्वं प्रयोजकं न त्वज्ञानत्वमात्रमिति वाच्यम्। लाघवेन तन्मात्रस्यैव प्रयोजकत्वादिति भावः।

अवस्थाऽज्ञानान्यादिमन्तीति द्वितीयपक्षमन्ये साधयन्तीत्याह—**व्यावहारिकावित्यादिना।** न च सिद्धान्तविरोधः, अज्ञानानादित्वाभ्युपगमस्य मूलाज्ञानविषयत्वादिति भावः। विमतानि अवस्थाऽज्ञानानि आदिमन्ति, अवस्थाऽज्ञानत्वात्, निद्रावत्, सुषुप्तिवच्च, इत्यनुमानमभिप्रेत्य दृष्टान्तद्वये साधनसाध्ययोर्वैकल्यं प्रथमं परिहरति—**व्यावहारिकाविति।** हेतौ अवस्थापदं मूलाज्ञाने व्यभिचारवारणार्थम्। **आवृत्येति।** जाग्रत्कालीनौ जगज्जीवौ यादृशौ प्रसिद्धौ न तादृशावेव स्वप्नकाले उपलभ्येते, अतः तयोर्यथावदनुपलम्भादावरणं वक्तव्यमिति भावः। **विक्षिपन्तीति।** सृजन्तीत्यर्थः। **अज्ञानावस्थाभेदरूपेति।** अज्ञानस्य हि आवरणविक्षेपशक्तिमत्त्वं लक्षणम्। तस्य स्वप्नकारणीभूतनिद्रायां सत्त्वादज्ञानत्वं तावत् सिद्धम्। निद्राया [2]वक्ष्यमाणरीत्या सादित्वेन साक्षान्मूलाज्ञानत्वायोगात् तदवस्थाविशेषरूपत्वं सिद्धमिति प्रथमदृष्टान्ते न साधनवैकल्यमिति भावः। सुषुप्तिकाले मूलाज्ञानवदनुभूयमाना सुषुप्त्यवस्थाऽपि तथा अज्ञानावस्थाभेदरूपैवेति सम्बन्धः। ननु सुषुप्तिकाले मूलाज्ञान-सुषुप्त्योरनुभवोऽसिद्धः, तदा 'अहमज्ञः' 'अहं स्वपिमि' इत्यनुभवादर्शनादिति, नेत्याह—**सुखमहमिति।**

---

1. प्रयोजनमिति। ब्रह्मज्ञाननिवर्त्यत्वसिद्धिः प्रयोजनम्। आवरणविक्षेपशक्तियुक्तं ब्रह्मज्ञानान्यज्ञानेनापि नाश्यं मूलाज्ञानतादात्म्यापन्नं अवस्थाज्ञानम्। तथा च मूलाज्ञाननिवर्तकब्रह्मज्ञाननिवर्त्यत्वं सूपपादम्, तदवस्थाविशेषत्वात्। न ह्यवस्थावति विनष्टे अवस्था अविनष्टा भवितुमर्हति इति।

2. वक्ष्यमाणेति। 'जाग्रद्भोगप्रदकर्मोपरमे सत्येव उद्भवात्' इति मूले वक्ष्यमाणेत्यर्थः।

भेदरूपैव। तयोश्च जाग्रद्भोगप्रदकर्मोपरमे सत्येवोद्भवात् सादित्वमिति तद्वत् अन्यदप्यज्ञानमवस्थारूपं सादि इति अन्ये।

ननु - अनादित्वपक्षे घटे प्रथममुत्पन्नेनैव ज्ञानेन सर्वतदज्ञाननाशो भवेत् विनिगमनाविरहात्, तदवच्छिन्नचैतन्यावारकसर्वाज्ञानानाशे विषयप्रकाशायोगाच्च। अतः पाश्चात्त्यज्ञानानां आवरणानभिभावकत्वं तदवस्थमेवेति - चेत्—

परामर्शः स्मरणम्। तथा च उत्थितस्य दृश्यमानपरामर्शान्यथानुपपत्त्या तदा सुषुप्तिमूलाज्ञानयोरनुभवः [1]साक्षिरूपः कल्प्यते। अहमुल्लेखे हि आत्मनि अन्तःकरणसंसर्गः प्रयोजकः, तत्काले तस्य लीनत्वात् नाहमुल्लेखः, इत्याशयेनाह—**अन्तःकरणादौ विलीने इति।** चक्षुरादिकमादिपदार्थः। सुषुप्तिस्वरूपसाधनार्थः परामर्शकल्प्यसुषुप्त्यनुभवोपन्यासः। सुषुप्तिकाले मूलाज्ञानाभावे सुषुप्तेस्तदवस्थारूपत्वं न सिध्येत्, अतः तदनुभवोपन्यासः तदा मूलाज्ञानसत्त्वसाधनार्थः। सुषुप्तेस्तदवस्थारूपत्वं [2]परिशेषादवगन्तव्यम्। सुषुप्तिकाले मूलाज्ञानातिरिक्तानामन्तःकरणादीनां विलीनत्वेन तस्यास्तदवस्थारूपत्वासम्भवादिति सूचनार्थं च अन्तःकरणादिविलयोपन्यासः। तथा च सुषुप्तिदृष्टान्तेऽपि न साधनवैकल्यमिति भावः। दृष्टान्तद्वयेऽपि साध्यवैकल्यं परिहरति—**तयोश्चेति।** निद्रासुषुप्त्योरित्यर्थः। **अन्यदपीति।** घटादिविषयावच्छिन्नचैतन्यावारकाज्ञानमपीत्यर्थः।

अवस्थाऽज्ञानानां सादित्वपक्षे प्रथममुत्पन्नेन घटज्ञानेन तदुत्पत्तेः पूर्वं घटावारकत्वेन स्थिताज्ञानस्य नाशे सति पश्चादुत्पन्नमवस्थाज्ञानं पुनस्तमावृणोतीति व्यवस्था सिद्ध्यति, तेषामनादित्वपक्षे तु सा न सिद्ध्येदिति शङ्कते—**नन्विति।** प्राथमिकघटज्ञानेन तदज्ञानानां सर्वेषां नाशोऽस्ति न वा। द्वितीयकल्पं दूषयति—**घट इति।** प्राथमिकज्ञानेन एकमेवाज्ञानं नश्यति नेतराणीत्यत्र विनिगमकाभावात् सर्वाज्ञाननाशो वक्तव्यः, तथा च द्वितीयकल्पानुपपत्तिरित्यर्थः। द्वितीयकल्पे एव विनिगमकाभाववत् दोषान्तरमाह—**तदवच्छिन्नेति।** एकावरणनाशेऽप्यावरणान्तराणां सत्त्वात् विषयप्रकाशानुपपत्तिरित्यर्थः। एवं प्रथमकल्पं परिशेषयित्वा तं दूषयति—**अत इति।** प्रथमज्ञानेन सर्वाज्ञाननाशादित्यर्थः। **तदवस्थमेवेति।** पाश्चात्त्यज्ञानानामावरणाभिभावकत्वसिद्धये हि यावन्ति ज्ञानानि तावन्ति तन्निवर्त्याज्ञानानीत्युपगम्यते, तदभ्युपगमेऽपि प्रथमज्ञानेनैव सर्वाज्ञाननाशे स दोषस्तदवस्थ एवेत्यर्थः।

---

1. साक्षीति। अविद्यावृत्त्युपहितचैतन्येत्यर्थः। तेन सुप्तोत्थितस्य न स्मरणानुपपत्तिः, अन्यथा साक्षिचैतन्यरूपानुभवस्य नित्यत्वेन अनुभवनाशरूपसंस्कारासंभवात् सुप्तोत्थितस्य सुषुप्त्यादिस्मरणं नोपपद्येत इति ध्येयम्।

2. परिशेषादिति। तदितरविशेषाभाववत्त्वे सति सामान्यवत्त्वरूपो हेतुः परिशेषः। सुषुप्तिः मूलाज्ञानाऽवस्थारूपा, मूलाज्ञानातिरिक्तत्वे सति तदतिरिक्ततादात्म्यशून्यत्वे सति अज्ञानत्वात्; इति परिशेषानुमानप्रकारः। मूलाज्ञानातिरिक्तत्वादिकं च सादित्वादिना।

अत्र केचित् आहुः—यथा ज्ञानप्रागभावानामनेकेषां सत्त्वेऽप्येकज्ञानोदये [1]एक एव प्रागभावो निवर्तते, संशयादिजननशक्ततया तदावरणरूपेषु प्रागभावान्तरेषु सत्स्वपि विषयावभासः; तथा एकज्ञानोदये एकमेवाज्ञानं निवर्तते, अज्ञानान्तरेषु सत्स्वपि विषयावभासः-इति।

अन्ये तु—**आवृतस्यापरोक्षज्ञानं विरुद्धम्, एकज्ञानोदये च प्रागभावान्तरसत्त्वेऽपि यावद्विशेषदर्शनाभावकूटरूपमावरणं विशेषदर्शनान्नास्तीति मन्यमाना वदन्ति—यदा यदज्ञानमावृणोति तदा तेन ज्ञानेन तस्यैव नाशः। सर्वं च सर्वदा नावृणोति। वैयर्थ्यात्। किं तु**

यथा न्यायमते यावन्ति घटज्ञानानि तावन्तो घटज्ञानप्रागभावाः सन्ति। तत्र प्रथमेन ज्ञानेन एक एव ज्ञानप्रागभावो निवर्तते। अन्ये यथापूर्वं सन्त्येव। तेषां सत्त्वेऽपि विषयप्रकाशश्चोपेयते तैः। एवमत्रापि योजनीयमिति परिहरति—**अत्र केचिदाहुरिति**। ननु - दृष्टान्तो विषमः, ज्ञानप्रागभावस्यानावारकत्वात्, भावरूपाज्ञानस्य च विषयावारकत्वात्, आवरणसत्त्वे च न विषयप्रकाशोपपत्तिरिति, नेत्याह—**संशयादीति**। विपर्ययः आदिपदार्थः। सिद्धान्ते भावरूपाज्ञानस्यावारकत्वं हि अज्ञातत्वाभिमते वस्तुनि संशयादिजननसमर्थत्वम्। तच्च परमते ज्ञानप्रागभावरूपाज्ञानस्यापि समानम्। ततो [2]न दृष्टान्तवैषम्यमिति भावः। **एकमेवेति**। फलबलादिति भावः।

'नन्वनादित्वपक्षे' इत्यादिग्रन्थेन कृताक्षेपे प्रकारान्तरेण समाधानमाह - **अन्ये त्विति**। अस्य वदन्तीत्यनेन सम्बन्धः। पूर्वपरिहारे अन्येषामभिप्रेतमस्वरसं स्वयं दर्शयति—**आवृतस्येति**। आवृतस्यापि पर्वतीयदहनादेः सिद्धान्ते परोक्षज्ञानाङ्गीकारात् अपरोक्षज्ञानमित्युक्तम्। **यावदिति**। स्थाण्वादौ [3]संशयादिविरोधिदर्शनप्रागभावमात्रं न संशयादिजननसमर्थम्। 'स्थाणुरयम्' इति निश्चयदशायामपि तत्समानविषयकनिश्चयान्तरप्रागभावसत्त्वेन तदा [4]पुरुषत्वस्मृतिमतः पुनरपि संशयप्रसङ्गात्। किं तु संशयादिसमानविषयकनिश्चयानां यावन्तः प्रागभावाः तावतां समुदायः संशयादिजननसमर्थतया परमते विषयावरणत्वेन वाच्यः। एकनिश्चयकाले च यावद्विशेषदर्शनाभावकूटरूपस्य परमते आवरणत्वेन सम्मतस्य विशेषादर्शनस्य अभावात् न पुनः संशयादिप्रसङ्गः,

---

1. एक एवेति। तद्घटविषयकज्ञानप्रागभावानां सर्वेषां एकेन तद्घटज्ञानेन निवृत्तौ तद्घटविषयकज्ञानान्तरोत्पत्तिर्न स्यात्; तज्ज्ञानप्रागभावरूपकारणाभावात्। तदुत्पत्तौ तत्प्रागभावस्य कारणता च उत्पन्नस्य पुनरनुत्पत्त्यन्यथानुपपत्त्या सिद्धा।

2. न दृष्टान्तवैषम्यमिति। ननु तज्ज्ञानव्यक्तिः तज्ज्ञानप्रागभावस्यैव विरोधिनी, न ज्ञानान्तरप्रागभावानाम्। अतः एकज्ञानेन तद्विषयज्ञानान्तरप्रागभावानां अनिवृत्तिः उपपद्यते। अवस्थाज्ञानस्य तु भावरूपस्य समानविषयकत्वाविशेषात् तद्घटविषयकज्ञानान्तराण्यपि विरोधीनि इति एकेन ज्ञानेन सर्वेषां तद्विषयकावस्थाज्ञानानां अनिवृत्तिः नोपपद्यते इति दृष्टान्तवैषम्यमस्त्येवेति चेत्, सत्यम्। अतोऽप्यस्वरसात् 'अन्ये तु' इति मतान्तरप्रवृत्तिरिति मन्तव्यम्।

3. संशयादिविरोधि यद्दर्शनं तत्प्रागभावमात्रमित्यर्थः।

4. संशये कोटिद्वयोपस्थितेः कारणत्वात् तत्संपादनार्थं पुरुषत्वस्मृतिमतः इत्युक्तम्।

आवारकाज्ञाने वृत्त्या नाशिते तद्वृत्त्युपरमे अज्ञानान्तरमावृणोति । न चैवं सति ब्रह्मावगमोत्पत्तिकालेऽनावारकत्वेन स्थितानामज्ञानानां ततोऽप्यनिवृत्तिप्रसङ्गः । तेषां साक्षात्तद्विरोधित्वाभावेऽपि तन्निवर्त्यमूलाज्ञानपरतन्त्रतया अज्ञानसम्बन्धादिवत् तन्निवृत्त्यैव निवृत्त्युपपत्तेः । एतदर्थमेव तेषां तदवस्थाभेदरूपतया तत्पारतन्त्र्यमिष्यते—इति ।

अपरे तु **'अज्ञानस्य सविषयस्वभावत्वात् उत्सर्गतः** [1]**सर्वं सर्वदा आवृणोत्येव । न च विषयोत्पत्तेः प्रागावरणीयाभावेन आवारकत्वं न युज्यत इति वाच्यम् । तदापि सूक्ष्मरूपेण**

न वा प्रथमघटादिज्ञानकाले परमते विषयप्रकाशानुपपत्तिः । आवरणत्वाभिमतप्रागभावकूटाभावात् । तस्मात् 'आवृतस्यापि विषयस्य प्रथमज्ञानसमये प्रकाशः सम्भवति' इत्यत्र [2]नायं दृष्टान्तस्सम्भवतीत्यर्थः । **न चैवमिति ।** सर्वदा सर्वेषामवस्थाऽज्ञानानामावारकत्वाभावे सतीत्यर्थः । **ततोऽपीति ।** ब्रह्मावगमादपीत्यर्थः । निवृत्त्यभावप्रसङ्गे हेतुः अनावारकत्वेन स्थितिः । यदि ब्रह्मावगमोत्पत्तिकाले मूलाज्ञानवत् अवस्थाऽज्ञानान्यपि ब्रह्मचैतन्यं विषयप्रदेशेष्वावृत्य तिष्ठेयुः तदा ब्रह्मावगमेन तत्समानविषयकमूलाज्ञानस्येव चैतन्यावारकत्वेनस्थितानामवस्थाऽज्ञानानामपि निवृत्तिस्स्यात् । समानविषयकत्वाविशेषात् । तेषां तदनावारकत्वेन स्थितौ तु निवृत्तिर्न सम्भवति तत्समानविषयकत्वाभावादित्यर्थः । ततश्च विदेहकैवल्येऽपि तेषामनुवृत्तिप्रसङ्ग इति भावः । एवंसति अनिवृत्तिप्रसङ्ग इति न च इति सम्बन्धः । तत्र हेतुमाह—**तेषामिति ।** अत्र द्वितीयतृतीयतच्छब्दौ ब्रह्मावगमपरौ । तुर्यतच्छब्दो मूलाज्ञानपरः । यथा अज्ञाननिवृत्तौ चैतन्याज्ञानयोस्सम्बन्धो निवर्तते, तस्य सम्बन्ध्यज्ञानपरतन्त्रत्वात्, तद्वदित्यर्थः । नन्ववस्थाऽज्ञानानां मूलाज्ञानपरतन्त्रत्वमसिद्धमित्याशङ्क्याह—**एतदर्थमेवेति ।** यथा संसारस्य अज्ञाननिवृत्त्या निवृत्तिसिद्धये तन्मूलकतया संसारस्य तत्पारतन्त्र्यं कल्प्यते तद्वत् प्रकृतेऽपीति भावः । 'यदुक्तं अवस्थाभेदरूपमिति विशेषणस्य प्रयोजनं वक्ष्यते' इति तदत्र दर्शितमिति मन्तव्यम् ।

'नन्वनादित्वपक्षे' इत्यादिना कृताक्षेपे एव समाधानं प्रकारान्तरेण दर्शयति—**अपरे त्विति ।** अपरे तु कल्पयन्तीति सम्बन्धः । तेषामाशयं दर्शयति—**अज्ञानस्येति ।** ननु सर्वमज्ञानं (स्वस्थितिकाले) सर्वदा विषयमावृणोतीति नियमो नास्ति, एकज्ञानकाले एकस्याज्ञानस्य नाशः, इतरेषां तदा सत्त्वेऽप्यावरणशक्तिप्रतिबन्धरूपतिरस्कारस्य वक्ष्यमाणत्वेन एकज्ञानकाले तेषामावारकत्वाभावात् इत्यत आह—[3]**उत्सर्गत इति ।** ननु सर्वं सर्वदा आवृणोतीत्युक्तेः घटादिविषयोत्पत्तेः पूर्वकालेऽपि घटाद्यवच्छिन्नचैतन्यावारकत्वमवस्थाऽज्ञानानां

---

1. सर्वमिति प्रथमान्तं कर्तृवाचकं पदम् । अज्ञानमिति शेषः । सर्वमज्ञानमित्यर्थः ।

2. नायं दृष्टान्त इति । प्रथमज्ञानसमये विषये उक्तावृतत्वस्यैव अभावात् इति भावः ।

3. उत्सर्गत इतीति । तद्विषयकज्ञानसामान्याभावकाले सर्वस्याज्ञानस्य आवारकत्वाङ्गीकारात् औत्सर्गिकत्वं अबाधितं इति भावः ।

तत्सत्त्वात्' इति मन्यमानाः कल्पयन्ति—यथा बहुजनसमाकुले प्रदेशे कस्यचित् शिरसि निपतन्नशनिः इतरानप्यपसारयति, यथा वा [1]सन्निपातहरमौषधं एकं दोषं निवर्तयद्दोषान्तरमपि दूरीकरोति, एवमेकमज्ञानं नाशयत् ज्ञानं अज्ञानान्तराण्यपि तिरस्करोति। तिरस्कारश्च यावत् ज्ञानस्थितिः तावत् आवरणशक्तिप्रतिबन्धः—इति।

नन्वेवं सति [2]धारावाहिकस्थले द्वितीयादिवृत्तीनामावरणानभिभावकत्वेन वैफल्यं स्यात्, प्रथमज्ञानेनैव निवर्तनतिरस्काराभ्यामावरणमात्रस्याभिभवादिति—

अत्राहुः—वृत्तितिरस्कृतमज्ञानं तदुपरमे पुनरावृणोति प्रदीपतिरस्कृतं तम इव प्रदीपोपरमे। वृत्त्युपरमसमये वृत्त्यन्तरोदये तु तिरस्कृतमज्ञानं तथैवावतिष्ठते प्रदीपोपरमसमये

प्रतीयते, [3]तदनुपपन्नम्, तदानीमवच्छेदकविषयाभावेन तदवच्छिन्नचैतन्यस्य अवस्थाऽज्ञानैरावरणीयस्य अभावात् इति शङ्कामपनुदति—**न चेत्यादिना। तदाऽपीति।** कार्यमात्रस्य उत्पत्तेः पूर्वकाले नाशोत्तरकाले च अनभिव्यक्तरूपेणावस्थानस्य श्रुतिस्मृतिन्यायैस्तत्र तत्र पूर्वाचार्यैस्साधितत्वादिति भावः। **एवमिति।** ज्ञानं कर्तृ। **यावज्ज्ञानस्थितिरिति।** सर्वं सर्वदा आवृणोतीत्युत्सर्गस्य ज्ञानस्थितिरपवादहेतुरिति भावः।

ज्ञानमात्रमज्ञाननिवर्तकमिति नियममाक्षिपति—**नन्वेवंसतीति।** एकेन ज्ञानेन एकाज्ञानस्य नाशः इतरेषां तिरस्कारः इत्युपगमे सतीत्यर्थः। **वैफल्यं स्यादिति।** अज्ञाननाशादिप्रयोजनवत्त्वं न स्यादित्यर्थः। तत्प्रयोजनस्य प्रथमज्ञानेनैव सिद्धत्वादित्याह—**प्रथमेति।**

प्रथमज्ञानसिद्धस्यापि आवरणतिरस्कारस्य द्वितीयादिज्ञानसाध्यत्वं साध्यलक्षणविशेषानुरोधेन सम्भवति, अतो न द्वितीयादिज्ञानवैफल्यम्, अज्ञाननाशरूपप्रयोजनाभावेऽपि तत्तिरस्करणलक्षणफलस्य सत्त्वात् - इति परिहरति—**अत्राहुरिति।** [4]प्रथमं धारारहितबुद्धिस्थले धारावहनस्थले च सिद्धमर्थं सदृष्टान्तं दर्शयति—**वृत्तितिरस्कृतमिति।** 'घटोऽयम्' इति प्रत्यक्षज्ञानं हि एकमज्ञानं नाशयत् इतरदज्ञानं सर्वं तिरस्करोति। तच्च तिरस्कृतमज्ञानं घटज्ञानोपरमसमये पुनस्तमावृणोति। यदि बुभुत्सादि[5]वशात् प्रथममुत्पन्नघटज्ञाननाशक्षणे घटप्रत्यक्षान्तरमुदेति तदा तिरस्कृतमज्ञानं तथैवावतिष्ठते इत्यर्थः। 'यस्मिन् सति अग्रिमक्षणे यस्य सत्त्वं

---

1. सन्निपातः ज्वरविशेषः। तदुक्तम्—'संसर्गः सन्निपातश्च तद्द्वित्रिक्षयकोपतः' इति।

2. धारावाहिकस्थले इति। अविरलक्रमोत्पन्नत्रितयादिकं धारावाहिकम्। तस्य स्थलम्—आश्रयः, तस्मिन्—तदाश्रितानां इत्यर्थः; द्वितीयादिवृत्तीनां इत्यत्रान्वेति।

3. तदनुपपन्नमिति। न च सर्वं सर्वदा आवृणोति इति नियमस्य औत्सर्गिकत्वस्य उक्तत्वात् घटादिविषयोत्पत्तेः पूर्वं अनावारकत्वेऽपि न दोषः इति शङ्क्यम्। तथा सति तदानीं निर्विषयस्य तस्य अवस्थाऽज्ञानस्य अज्ञानत्वस्यैव असम्भवात् इति भावः।

4. प्रथममिति। उक्ताक्षेपसमाधानात् पूर्वं इत्यर्थः।

5. विषयान्तरज्ञानसामग्रीविरहकालीना ज्ञानसामग्री आदिशब्दार्थः।

प्रदीपान्तरोदये तम इव। तथा च 'यस्मिन् सति अग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत् तज्जन्यम्' इति प्रागभावपरिपालनसाधारणलक्षणानुरोधेन अनावरणस्य द्वितीयादिवृत्तिकार्यत्वस्यापि लाभात् न तद्वैफल्यमिति।

न्यायचन्द्रिकाकृतस्तु आहुः—केनचिज्ज्ञानेन कस्यचिदज्ञानस्य नाश एव, न तु आवारकाणामप्यज्ञानान्तराणां तिरस्कारः। तथा च धारावाहिकद्वितीयादिवृत्तीनामपि एकैकाज्ञाननाशकत्वेन साफल्यम्। न चैवं ज्ञानोदयेऽप्यावरणसम्भवाद्विषयानवभासप्रसङ्गः। अवस्थारूपाण्यज्ञानानि हि तत्तत्कालोपलक्षितस्वरूपावारकाणि, ज्ञानानि च यावत्स्व[1]कालोपलक्षितविषयावारकाज्ञाननाशकानि। तथा च किञ्चिज्ज्ञानोदये तत्कालीनविषयावारकाज्ञानस्य नाशात्

यस्मिन्नसति यस्यासत्त्वं तत् तज्जन्यम्' इति साध्यलक्षणम्। इदं च साधनादिसाधारणम्। तथा हि - (यस्मिन्) दण्डादौ सति उत्तरक्षणे घटादिकार्यसत्त्वं दण्डादावसति च घटादिकार्यासत्त्वं ततो घटादिकं दण्डादिजन्यम्, तथा प्रायश्चित्ते सति उत्तरक्षणे दुःखप्रागभावस्य सत्त्वं प्रायश्चित्ते चासति दुःखस्यैवोदयात् दुःखप्रागभावस्यासत्त्वं इति रीत्या अनादेरपि दुःखप्रागभावस्य [2]प्रायश्चित्तपरिपाल्यतया प्रायश्चित्तसाध्यत्वमुपेयते। एवं प्रकृतेऽपि साध्यत्वं दर्शयति—**तथा चेति**। द्वितीयवृत्त्युदये सति प्रथमज्ञानसिद्धस्यावरणतिरस्कारस्य उत्तरक्षणे सत्त्वं प्रथमज्ञाननाशक्षणे द्वितीयवृत्त्युदयव्यतिरेके च उक्ततिरस्कारस्यासत्त्वं इति प्रथमज्ञानकाल एव सिद्धस्यापि तस्य द्वितीयवृत्तिजन्यतया तत्फलत्वम्, एवं तृतीयादिवृत्तीनामपि आवरणतिरस्कारफलकत्वं योजनीयमित्यर्थः। **अनावरणस्येति**। आवरणतिरस्कारस्येत्यर्थः॥

'ज्ञानमात्रमज्ञाननिवर्तकं न भवति, धाराद्वितीयादिज्ञाने व्यभिचारात्' इत्यत्र प्रकारान्तरेण परिहारं ब्रूते—**न्यायचन्द्रिकाकृतस्त्विति**। **न त्विति**। न चाज्ञानान्तराणां तिरस्काराभावे एकज्ञानकालेऽपि तैरतिरस्कृतैर्विषयस्यावृतत्वाद्विषयानवभासप्रसङ्ग इति वाच्यम्। प्रथमज्ञानोदयसमये एकमेवाज्ञानं विषयावारकम्, इतरेषां तु तदा विषयावारकत्वमेव नोपेयते, अतो न तत्तिरस्करणापेक्षेति भावः। ततः किं तत्राह—**तथा चेति**। आशयमविदुषः शङ्कामनूद्य निराकरोति—**न चैवमित्यादिना**। एवंशब्दस्य प्रथमज्ञानेन आवारकाज्ञानान्तराणामतिरस्करणे सतीत्यर्थः। **तत्तत्कालेति**। अवस्थाऽज्ञानानां सर्वेषां मूलाज्ञानस्येव सर्वदा विषयचैतन्यावारकत्वं नास्ति। वैयर्थ्यात्[3]। किं तु किञ्चिदज्ञानं कञ्चित्कालं विषयचैतन्यमावृणोति किञ्चिच्च कालान्तरे तदावृणोति इत्यनेन प्रकारेण कालविशेषैरुपलक्षितविषयचैतन्यावारकत्वं, ज्ञानानामपि स्वस्वोदयकाले स्वस्वविषयावारकत्वेनप्रसक्ताज्ञाननिवर्तकत्वमित्यर्थः।

---

1. स्वं-ज्ञानम्

2. प्रायश्चित्तपरिपाल्यतया—प्रायश्चित्ताधीनसत्ताकतया। प्रायश्चित्तजन्याग्रिमक्षणसम्बन्धवत्तया इति यावत्। तेन मूले साध्यलक्षणे तज्जन्यमित्युक्तिरपि नानुपपन्ना।

3. वैयर्थ्यादिति। आवरणफलस्य एकाज्ञानकृतावरणेनैव सिद्धेः इति भावः।

विद्यमानानामज्ञानान्तराणामन्यकालीनविषयावारकत्वाच्च न तत्कालीनविषयावभासे काचिदनुपपत्तिः। कारीरीफले वृष्टौ आसन्नसमयस्यैव अज्ञानविषये घटादौ तत्तत्कालस्य उपलक्षणतया विषयकोटावननुप्रवेशेन सूक्ष्मतत्तत्कालभेदाविषयैर्धारावाहिकद्वितीयादिज्ञानैरज्ञानानां निवृत्तावपि न काचिदनुपपत्तिरिति।

केचित्तु—प्रथमज्ञाननिवर्त्यमेवाज्ञानं स्वरूपावारकम्। द्वितीयादिज्ञाननिवर्त्यानि तु देशकालादिविशेषणान्तरविशिष्टविषयाणि। अत एव सत्तानिश्चयरूपे अज्ञाननिवर्तके चैत्रदर्शने सकृज्जाते 'चैत्रं न जानामि' इति स्वरूपावरणं नानुभूयते, किं तु 'इदानीं स कुत्रेति न जानामि' इत्यादि[1]रूपेण विशिष्टावरणमेव। विस्मरणशालिनः क्वचित् सकृत् दृष्टेऽपि 'न जानामि'

एवमाशयमुद्धाट्य इदानीं विषयानवभासप्रसङ्गं परिहरति—तथा चेति। एकज्ञानकालेऽज्ञानान्तराणामनावारकत्वे सिद्धे सतीत्यर्थः। तत्कालीनेति। किञ्चिज्ज्ञानोदयकालीनविषयस्यावारकत्वेन प्रसक्ताज्ञानस्येत्यर्थः। न तदिति। किञ्चिज्ज्ञानकालीनेत्यर्थः। ननु तैस्तैः कालविशेषैर्विशिष्टस्यैव विषयस्य तत्तदज्ञानावरणीयत्वं इत्येवं कालविशेषाणां विशेषणतया आवरणीयकोटावनुप्रवेशं विहाय तेषां किमित्युपलक्षणत्वं स्वीक्रियते इत्याशङ्क्य, तथा सति धारास्थले आवारकत्वेन प्रसक्ताज्ञाननिवर्तकद्वितीयादिवृत्तीनामपि तत्तत्कालविशेषविशिष्टविषयकत्वं वाच्यम्, समानविषयकत्वं विना तन्निवर्तकत्वानुपपत्तेः, तच्च न सम्भवति, क्षणभेदानामप्रत्यक्षत्वात्[2], अतस्तेषामुपलक्षणत्वमाश्रितं इति समाधानमभिप्रेत्य समयविशेषस्योपलक्षणत्वे दृष्टान्तमाह—कारीरीफले वृष्टाविति। कारीरीनामकेष्टिफलभूता वृष्टिः इष्टिसमाप्त्युत्तरक्षण एव वक्तव्या, न तु कालान्तरे। तदानीं शुष्यतः सस्यस्य सञ्जीवने कालान्तरीयवृष्टेरनुपयोगात्। तत्र च आसन्नसमयस्य वृष्टिविशेषणतया फलकोटिप्रवेशो नोपेयते, इष्ट्या विनापि समयविशेषसम्भवात्, किं तु समयान्तरव्यावर्तकतया उपलक्षणत्वमेवाश्रितमित्यर्थः।

धारावहनस्थले द्वितीयादिवृत्तीनामावरणाभिभावकत्वं न स्यादित्याक्षेपे एव परिहारं त्रेधा दर्शयति—केचित्त्विति। प्रथमं वस्तुगतिमाह—प्रथमज्ञानेति। उक्तव्यवस्थायां प्रमाणत्वेनानुभवं दर्शयति—अत एवेति। उक्तविभागाभ्युपगमादेवेत्यर्थः। ननु उक्तविभागो न सिद्ध्यति, क्वचित् सकृद्दृष्टेऽपि वस्तुनि पूर्ववत् स्वरूपावरणानुभवात् इत्याशङ्क्याह—विस्मरणशालिन इति। तत्र तथाऽस्त्विति। पुनः स्वरूपावरणानुभवस्थले द्वितीयादिज्ञाननिवर्त्यमप्यज्ञानं स्वरूपावारकमस्त्वित्यर्थः। तथा च उक्तविभाग औत्सर्गिक इति भावः। अन्यत्रेति। विस्मरणाभावस्थले इत्यर्थः। नन्वज्ञानानां विशिष्टविषयकत्वे तेषामनिवृत्तिप्रसङ्गः, सकृद्दृष्टे वस्तुनि

---

1. 'कदा सोऽत्रेति न जानामि' इत्यज्ञानं आदिशब्दार्थः।

2. अप्रत्यक्षत्वादिति। क्षणविशेषाणां रूपस्पर्शशून्यबाह्यद्रव्यत्वात् तत्क्षणेन्द्रियसन्निकर्षोत्तरक्षणे तत्क्षणस्य अभावात् प्रत्यक्षस्य वर्तमानविषयकत्वनियमाच्च अप्रत्यक्षत्वं इति भावः

इति स्वरूपावरणं दृश्यते चेत् तत्र तथाऽस्तु। अन्यत्र सकृद्दृष्टे विशिष्टविषयाण्येवाज्ञानानि ज्ञानानि च। न च - एवं सति धारावाहिकद्वितीयादिज्ञानानामज्ञाननिवर्तकत्वं न स्यात्। स्थूलकालविशिष्टाज्ञानस्य प्रथमज्ञानेनैव निवृत्तेः, पूर्वापरज्ञानव्यावृत्तसूक्ष्मकालविशिष्टाज्ञानस्य तद्विषयैर्द्वितीयादिज्ञानैर्निवृत्त्ययोगात्—इति वाच्यम्। धारावहनस्थले प्रथमोत्पन्नाया एव वृत्तेस्तावत्कालावस्थायित्वसम्भवेन [1]वृत्तिभेदानभ्युपगमात्। तदभ्युपगमेऽपि बहुकालावस्थायिपश्चषवृत्तिरूपत्वसम्भवेन परस्परव्यावृत्तस्थूलकालादिविशेषणभेदविषयत्वोपपत्तेः। प्रतिक्षणोद्यदनेकवृत्ति-

---

द्वितीयादिज्ञानानामपि प्रथमज्ञानवत् स्वरूपमात्रविषयकत्वेन तत्समानविषयकत्वरहितानां तन्निवर्तकत्वानुपपत्तेरिति, नेत्याह— **ज्ञानानि चेति**। सकृद्दृष्टे विषये ज्ञानान्यपि 'चैत्र इदानीमत्रास्ते' इत्याद्याकाराणि सन्ति विशिष्टविषयाण्येवेति स्वीकारात् नोक्तदोष इति भावः। ननु - ज्ञानानां विशिष्टविषयकत्वं धाराद्वितीयादिवृत्तिषु [2]व्यभिचारपरिहारार्थं कल्प्यते। तथा च तत्र ज्ञानानां किं घटिकार्धघटिकाद्यात्मकस्थूलकालविशिष्टघटादिविषयकत्वं विवक्षितं किं वा क्षणात्मकसूक्ष्मकालविशिष्टघटादिविषयकत्वं विवक्षितमिति विकल्पं मनसि निधाय, उभयथाऽपि धारास्थले द्वितीयादिवृत्तिषु व्यभिचारतादवस्थ्यमिति शङ्कते—**न चैवंसतीति**। द्वितीयादिज्ञानानां तन्निवर्त्याज्ञानानां च उत्सर्गतो विशिष्टविषयकत्वे सतीत्यर्थः। **प्रथमज्ञानेनैवेति**। स्थूलकालविशिष्टविषयेणेति शेषः। **पूर्वापरेति**। धारास्थले हि ज्ञानानि क्षणस्थितिकानि। ततश्च पूर्वापरज्ञानकालेभ्यो व्यावृत्ता ये सूक्ष्मकालाः क्षणात्मकाः तैर्विशिष्टस्य विषयस्य आवारकं यदज्ञानं तस्येत्यर्थः। **तद्विषयैरिति**। सूक्ष्मकालविशिष्टविषयकैरित्यर्थः। यत्र एकस्मिन्नेव श्रीमूर्त्यादौ दीर्घकालं नैरन्तर्येण स्फुरणमस्ति तत्र श्रीमूर्त्यादिगोचरवृत्तिरेकैव। तद्भेदे मानाभावात्। सिद्धान्ते वृत्तेः क्षणस्थितिकत्वानभ्युपगमात्। तथा च न तत्र व्यभिचारशङ्केत्याह—**धारावहनस्थल इति**। ननु-तत्र वृत्तेरेकत्वे धारावहनत्वप्रसिद्धिविरोधः, एकस्यां तदसम्भवात्। ध्यानसमाध्योरपि उक्तरीत्या एकवृत्तिरूपत्वापत्तौ तयोः प्रत्ययसन्ततिरूपत्वप्रतिपादकभाष्यादिविरोधप्रसङ्गाच्च इत्याशङ्क्य, धारायाः अनेकवृत्तिरूपत्वमङ्गीकृत्य व्यभिचारं परिहरति—**तदभ्युपगमेऽपीति**। **सम्भवेनेति**। धाराया इति शेषः। **उपपत्तेरिति**। द्वितीयादिवृत्तीनामज्ञाननिवर्तकत्वदोषो नास्तीति शेषः। धारावाहिकवृत्तीनां [3]न्यायमत इव क्षणस्थितिकत्वमुपेत्यापि व्यभिचारं परिहरति—**प्रतिक्षणोद्यदिति**। प्रतिक्षणमुद्यन्त्यः अनेकाश्च या वृत्तयः तत्सन्तानेत्यर्थः। **अभ्युपगमेऽपीति**। धाराया इति शेषः। **अहानेश्चेति**। ज्ञानमज्ञाननिवर्तकमिति

---

1. वृत्तिभेदेति। वृत्तिनानात्वेत्यर्थः। अनेकवृत्तीति यावत्।

2. व्यभिचारेति। ज्ञानसामान्यं अज्ञाननिवर्तकं इति नियमे अन्वयव्यभिचारेत्यर्थः।

3. न्यायमते ज्ञानानां क्षणद्वयवर्तित्वेऽपि प्रथमक्षणस्य उत्पत्तिक्षणत्वात् द्वितीयक्षणमात्रं स्थितिकालः इत्यभिप्रायेण न्यायमत इव क्षणस्थितिकत्वमित्युक्तम्। अथ वा तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं क्षणस्थितिकत्वं पारिभाषिकं नैयायिकानां मते इति भावः।

सन्तानरूपत्वाभ्युपगमेऽपि द्वितीयादिवृत्तीनामधिगतार्थमात्रविषयतया [1]प्रामाण्याभावेन आवरणानिवर्तकत्वेऽप्यहानेश्च। न हि विषयाबाधमात्रं प्रामाण्यम्। प्रागवगतानवगतयोः पर्वततद्वृत्तिपावकयोरनुमितिविषययोरबाधस्याविशेषेण उभयत्राप्यनुमितेः प्रामाण्यप्रसङ्गात्। न चेष्टापत्तिः। 'वह्नावनुमितिः प्रमाणम्' इतिवत् 'पर्वतेऽप्यनुमितिः प्रमाणम्' इतिव्यवहारादर्शनात्, विवरणे साक्षिसिद्धस्याज्ञानस्य अभावव्यावृत्तिप्रत्यायनार्थानुमाना[2]दिविषयत्वेऽपि प्रमाणावेद्यत्वोक्तेश्च। तस्मात

नियमभङ्गरूपाया हानेरभावादित्यर्थः। हान्यभावे हेतुमाह—**प्रामाण्याभावेनेति**। तत्र हेतुमाह—**अधिगतार्थमात्रेति**। अनधिगतार्थविषयकत्वाभावो मात्रपदार्थः। तथा च द्वितीयादिवृत्तीनां प्रमात्वं नास्ति, स्मृतिवदधिगतार्थमात्रविषयकत्वादित्यर्थः। ननु-अनधिगताबाधितार्थानुभवत्वं प्रमात्वं न भवति, अबाधितानुभवपदव्यावर्त्ययोर्भ्रमस्मृत्योरिवानधिगतपदव्यावर्त्याभावात्। तथाच अबाधितार्थानुभवत्वमात्रं प्रमात्वम्, तच्च द्वितीयादिवृत्तिष्वक्षतमिति तत्र नियमभङ्गरूपा हानिः स्यादेवेति - नेत्याह—**न हीति**। प्रामाण्यमित्यनन्तरं तथासतीति शेषः। नैयायिकः शङ्कते—**न चेष्टापत्तिरिति**। इष्टापत्तिरिति न च इति सम्बन्धः। **व्यवहारादर्शनादिति**। तथा च प्रामाण्याप्रामाण्यव्यवस्थायाः व्यवहारानुसारित्वात् अनुमितेः पर्वतांशे प्रमात्वाभावेन अलक्ष्यत्वे सिद्धे पर्वतांशानुमितौ प्रमालक्षणस्यातिव्याप्तिपरिहाराय अनधिगतत्वविशेषणं तल्लक्षणे देयमेव, ततश्च धाराद्वितीयादिवृत्तीनां न प्रामाण्यमिति भावः। अज्ञातत्वस्य प्रमालक्षणे प्रवेशोऽस्तीत्यत्र हेत्वन्तरमाह—**विवरण इति**। विवरणे अज्ञानस्य प्रमाणावेद्यत्वोक्तेश्चेति सम्बन्धः। अत्रानुमानपदमनुमितिपरम्। प्रमाणपदमपि प्रमितिपरम्। प्रमालक्षणस्य प्रकृतत्वादिति बोध्यम्। नन्वज्ञानस्यानुमितिशाब्दार्थापत्तिरूपवृत्तिविषयत्वे कथं तस्य प्रमाणावेद्यत्वं, अत आह—**साक्षिसिद्धस्येति**। 'अज्ञोऽहम्' इत्यनुभवरूपेण साक्षिणा अज्ञानस्वरूपस्य ज्ञातत्वात् अज्ञानानुमित्यादेरज्ञानस्वरूपे विषये अज्ञातत्वघटितप्रमात्वं नास्तीति मत्वा प्रमाणावेद्यत्वं तस्योक्तम्। न च साक्षिण एव प्रमाणत्वात् कथं सामान्यतः प्रमाणावेद्यत्वमुक्तमिति वाच्यम्। साक्ष्यतिरिक्तप्रमाणावेद्यत्वस्यैव विवक्षितत्वात् साक्षिणो नित्यत्वेन [3]प्रमाकरणाजन्यतया [4]पराभिमतेश्वरज्ञानवत् साक्षिणः प्रमाऽप्रमाबहिर्भूतत्वेन प्रमाणत्वाभावाद्वा तदवेद्यत्ववचनमिति भावः। ननु साक्षिप्रत्यक्षसिद्धं चेदज्ञानं किमर्थं तर्हि तत्रानुमानाद्युपन्यस्यते, तत्राह—**अभावव्यावृत्तीति**। अज्ञानस्य पराभिमताज्ञानादभावरूपात् या व्यावृत्तिः तत्प्रत्यायनं अर्थः प्रयोजनं येषामनुमानादीनां तानि तथेत्यर्थः। एतदुक्तं भवति—'अहमज्ञः' इत्यनुभवसिद्धमज्ञानं भावरूपमिति

1. प्रामाण्येति। प्रमात्वेत्यर्थः। एवमुत्तरत्रापि।
2. अनुमानेति—अनुमितीत्यर्थः।
3. प्रमाकरणाजन्यतया प्रमाणत्वाभावाद्वा इति संबन्धः।
4. ननु साक्षिणो नित्यत्वेन प्रमाकरणाजन्यतया प्रमात्वाभावे, तत एव दोषाजन्यतया अप्रमात्वस्याप्यभावात् साक्षिणः भ्रमप्रमाबहिर्भूतत्वं स्यात् इत्याशङ्कां इष्टापत्त्या परिहरति—पराभिमतेति। परेषां नैयायिकानां मते ईश्वरज्ञानस्य नित्यत्वेन गुणजन्यत्वाभावात् न प्रमात्वं, दोषजन्यत्वाभावात् न अप्रमात्वं तद्वदित्यर्थः।

द्वितीयादिवृत्तीनां प्रामाण्याभावात् उपासनादिवृत्तीनामिवाज्ञानानिवर्तकत्वेऽपि न हानिः। प्रमाणवृत्तीनामेव तन्निवर्तकत्वाभ्युपगमात्।

ननु - नायमपि नियमः, परोक्षवृत्तेरनिर्गमेनाज्ञानानिवर्तकत्वादिति चेत् -

अत्र केचित् आहुः—द्विविधं विषयावारकमज्ञानम्। एकं विषयाश्रितं रज्ज्वादिविक्षेपोपादानभूतं कार्यकल्प्यम्, अन्यत् पुरुषाश्रितं 'इदमहं न जानामि' इत्यनुभूयमानम्। पुरुषाश्रितस्य विषयसंभिन्नविक्षेपोपादानत्वासम्भवेन विषयाश्रितस्य 'इदमहं न जानामि' इति साक्षिरूप-

---

सिद्धान्तिनः। तत् ज्ञानप्रागभावरूपमिति वैशेषिकादयः। ततश्चानुमानादिभिरज्ञानस्याभावप्रतियोगिकभेदः साध्यते इति न तेषां वैयर्थ्यम्। न च तस्य भावरूपत्वसाधने वा किं लभ्यत इति वाच्यम्। 'मायां तु प्रकृतिं विद्यात्' इत्यादिशास्त्रसिद्धस्य प्रपञ्चपरिणाम्युपादानत्वस्य सिद्धेः तत्साधनफलत्वात्। **तस्मादिति।** अनधिगतत्वघटितप्रमालक्षणाभावादित्यर्थः। **उपासनादिवृत्तीनामिवेति।** उपासनारूपा वृत्तिः न ज्ञानम्। क्लृप्ततत्करणाजन्यत्वात्, मनसो ज्ञानकरणत्वस्य निरस्तत्वात् निरसिष्यमाणत्वाच्च, किं तु गमनादिवत् क्रियारूपा, पुरुषकृतिसाध्यत्वात्। अतः सा नोपास्यस्वरूपाज्ञाननिवर्तिका। एवम् इच्छाद्वेषादिवृत्तयोऽपि न [1]स्वविषयाज्ञाननिवर्तिकाः। ज्ञानरूपत्वाभावात्। द्वितीयादिवृत्तीनां तु स्मृतिवत् ज्ञानरूपत्वेऽपि नाज्ञाननिवर्तकत्वमुपेयते प्रमात्वाभावादित्यर्थः। ननु-कथं न हानिः, तासां प्रमात्वाभावेऽपि ज्ञानत्वाभ्युपगमेन 'ज्ञानमात्रमज्ञाननिवर्तकम्' इति नियमस्य व्यभिचाररूपहानेः आवश्यकत्वात्-इत्याशङ्क्याह - **प्रमाणवृत्तीनामेवेति।** न तु अधिगतार्थमात्रगोचरवृत्तीनामपि इत्येवकारार्थः। तथा च 'ज्ञानमात्रमज्ञाननिवर्तकम्' इति नियमो नाङ्गीक्रियते, येनोक्तदोषः स्यात् इति भावः। अभ्युपगमादित्यनन्तरम् इत्याहुरिति शेषः। केचित्त्वित्युपक्रमात्।

'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमस्यापि व्यभिचारं शङ्कते—**नन्विति।** परोक्षज्ञानस्यापि तन्निवर्तकत्वसत्त्वात् न व्यभिचार इति वक्तुमज्ञानस्य द्वैविध्यमाह—**द्विविधमित्यादिना। रज्ज्वादीति।** रज्ज्वादेर्यो विक्षेपः सर्पादिरूपो विवर्तः तदुपादानभूतमित्यर्थः। **कार्यकल्प्यमिति।** विक्षेपाख्यकार्यानुपपत्तिकल्प्यम्, न त्वनुभवसिद्धमित्यर्थः। ननु रज्ज्वादिगताज्ञानस्य 'रज्जुं न जानामि' इत्यनुभवसिद्धत्वात् कथं तस्य कार्यैककल्प्यत्वमित्याशङ्क्य, अनुभवस्य विषयगताज्ञानं न विषय इत्याह—**अन्यदिति।** अत्र 'विषयावारकमज्ञानं द्विविधम्—एकं विषयाश्रितं अन्यत् पुरुषाश्रितम्' इति सम्बन्धः। तथा च 'विषयाश्रितं सप्रमाणं प्रदर्श्य पुरुषाश्रितं सप्रमाणं दर्शयति' इति वा अन्यदित्यस्यावतरणं बोध्यम्। नन्वेकेनैवाज्ञानेन सर्पादिविक्षेपस्य 'न जानामि' इत्यनुभवस्य च सिद्धेः किमज्ञानद्वैविध्येन? अत आह—**पुरुषाश्रितस्येति।** विषयो

---

1. स्वविषयेति—स्वविषयविषयकेत्यर्थः।

प्रकाशसंसर्गायोगेन द्विविधस्याप्यावश्यकत्वात् । एवं च परोक्षस्थले वृत्तेर्निर्गमनाभावात् दूरस्थवृक्षे आप्तवाक्यात् परिमाणविशेषावगमेऽपि तद्विपरीतपरिमाणविक्षेपविशेषदर्शनाच्च विषयगताज्ञानानिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येव । 'शास्त्रार्थं न जानामि' इत्यनुभूताज्ञानस्य तदुपदेशानन्तरं निवृत्त्यनुभवात् । अत एव 'अनुमेयादौ सुषुप्तिव्यावृत्तिः' इति विवरणस्य[1] 'तद्विषयाज्ञाननिवृत्तिरर्थः' इत्युक्तं तत्त्वदीपने इति ।

रज्ज्वादिरधिष्ठानं, तत्सम्भिन्नः - विषयतादात्म्यापन्नः यो विक्षेपः, तदुपादानत्वासम्भवेनेत्यर्थः । **विषयाश्रितस्येति ।** 'न जानामि' इत्याकारको यस्साक्षिरूपः प्रकाशः तत्संसर्गायोगेनेत्यर्थः । इदानीं व्यभिचारं परिहरति—**एवं चेति ।** अज्ञानद्वैविध्ये सतीत्यर्थः । एवं च परोक्षस्थले विषयगताज्ञानानिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येवेति सम्बन्धः । तथा च न व्यभिचार इति भावः । परोक्षज्ञानस्य विषयगताज्ञाननिवर्तकत्वाभावे हेतुद्वयमाह—**वृत्तेरित्यादिना । निर्गमनाभावादिति ।** विषयचैतन्यसंसृष्टाया एव वृत्तेर्विषयचैतन्यगताज्ञाननिवर्तकत्वस्य वक्ष्यमाणतया निर्गमनाभावे वृत्तिविषयचैतन्यसंसर्गो न सिध्यतीति भावः । **तद्विपरीतेति ।** 'दूरे दृश्यमानो वृक्षः संनिहितवृक्ष इव महान्' इत्याप्तवाक्यजन्यपरोक्षज्ञानविषयभूतात् दूरस्थवृक्षगतात् तस्मात् परिमाणविशेषात् विपरीतो यः परिमाणरूपविक्षेपविशेषः तस्य दर्शनादित्यर्थः । यदि परोक्षज्ञानं विषयगताज्ञाननिवर्तकं स्यात्, तदा आप्तवाक्यजन्यावगमेन परिमाणविशेषाज्ञाननिवृत्त्यापत्त्या विपरीतपरिमाणात्मकविक्षेपोत्पत्तिर्न स्यात् उपादानाभावादिति भावः । परोक्षज्ञानेन पुरुषगताज्ञाननिवृत्तौ हेतुमाह—**शास्त्रार्थमिति ।** 'शास्त्रार्थं न जानामि' इत्यनेन प्रकारेण यच्छास्त्रार्थाज्ञानमनुभूतं तस्य शास्त्रार्थोपदेशानन्तरं 'शास्त्रार्थाज्ञानमिदानीं निवृत्तम्' इति निवृत्तिरनुभूयते । तत्र शास्त्रार्थो द्विविधः - धर्मरूपो ब्रह्मरूपश्च । धर्मरूपे शास्त्रार्थे उपदेशजन्यज्ञानं परोक्षमेव, न तु कदाचिदप्यपरोक्षम् । तस्य साक्षात्कारायोग्यत्वात् । तथा च तत्र विषयगताज्ञाननिवृत्तिप्रसक्तिरेव नास्तीति पुरुषगताज्ञानमेव निवर्तत इति वक्तव्यम् । इतरथा तन्निवृत्त्यनुभवविरोधात् । ब्रह्मरूपे च शास्त्रार्थे उपदेशजन्यज्ञानं परोक्षम् । तावन्मात्रात् न विषयावारकं मूलाज्ञानं विषयगतं निवर्तते । मननादिविधिवैयर्थ्यप्रसङ्गात् । अतः पुरुषगताज्ञानमेव निवर्तत इति वक्तव्यम्, अन्यथा तत्रापि तन्निवृत्त्यनुभवविरोधादेव इति भावः । परोक्षज्ञानस्य अज्ञाननिवर्तकत्वे विवरणादिसम्मतिमाह—**अत एवेति ।** उक्तानुभवबलादेवेत्यर्थः । तद्विषयेत्यत्र तत्पदमनुमेयादिपरम् । सुषुप्तिपदमज्ञानपरं व्यावृत्तिपदं निवृत्तिपरमिति व्याख्यातं तत्त्वदीपने । तथा च अनुमेयादौ विषयगताज्ञाननिवृत्त्यभावस्य वक्ष्यमाणतया तत्र पुरुषगताज्ञाननिवृत्तिः अनुमित्यादिपरोक्षज्ञानेन जायत इत्ययमर्थः तत्र विवृत इति प्रतीयत इत्यर्थः ॥

---

1. **विवरणस्येति ।** 'नानुमेयादिष्वपरोक्षत्वम्, स्वज्ञानोत्पत्तौ अव्यापृतत्वात्, लिङ्गादीनामेव कुतश्चित् संबन्धविशेषात् विशिष्टैकार्थज्ञानहेतुत्वात्, प्रमेयस्य च स्वज्ञानोत्पत्तिहेतुत्वे प्रमाणाभावात्' इति पञ्चपादिकायां अहङ्कारटीकान्तर्गतवाक्यस्य विवरणे इत्यर्थः । 'विषयत्वं नाम अनुमेयेषु सुषुप्तिव्यावृत्तिः, सा चाभावः तद्धर्मो न भवति' इति विवरणम् ।

अन्ये तु - **नयनपटलवत् पुरुषाश्रितमेवाज्ञानं विषयावारकम्, न तदतिरेकेण विषयगताज्ञाने प्रमाणमस्ति। न च - पुरुषाश्रितस्य विषयगतविक्षेपपरिणामित्वं न सम्भवति, तत्संभवे वा दूरस्थवृक्षपरिमाणे परोक्षज्ञानादज्ञाननिवृत्तौ विपरीतपरमाणविक्षेपो न सम्भवतीति - वाच्यम्। वाचस्पतिमते सर्वस्य प्रपञ्चस्य जीवाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वेन तद्वत् शुक्तिरजतादेः पुरुषाश्रिताज्ञानविषयीकृतब्रह्मविवर्तत्वोपपत्तेः, परोक्षवृत्त्या एकावस्थानिवृत्तावपि अवस्थान्तरेण विपरीतपरिमाणविक्षेपोपपत्तेश्च** - इत्याहुः।

अज्ञानद्वैविध्याभावेऽपि 'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमस्य न व्यभिचार इति मतं दर्शयति—**अन्ये त्विति**। पुरुषगताज्ञानापेक्षया अन्यत् विषयगतमज्ञानं किं विषयावरणार्थमुपेयते, किं वा शुक्तिरजतादिविक्षेपोत्पत्त्यर्थम्। नाद्य इत्याह—**नयनपटलवदिति**। नयनगतकाचादिवदित्यर्थः। न द्वितीय इत्याह—**न तदतिरेकेणेति**। विषयगताज्ञानाभावेऽपि वक्ष्यमाणविधया विक्षेपोत्पत्तिसम्भवादिति भावः। प्रमाणाभावोऽसिद्ध इति शङ्कते—**न चेति। न सम्भवतीति**। पुरुषगताज्ञानस्य शुक्त्याद्यवच्छिन्नचैतन्ये सत्त्वाभावादिति भावः। पुरुषगतस्यैवाज्ञानस्य विषयगतविक्षेपोपादानत्वे दोषमाह—**तत्सम्भवे वेति**। पुरुषगताज्ञानस्य विषयगतविक्षेपपरिणामित्वं तच्छब्दार्थः। **न सम्भवतीति**। विषयगताज्ञानस्यानभ्युपगमात् पुरुषगताज्ञानस्य च आप्तोपदेशजन्यपरोक्षज्ञानेन निवृत्तत्वाच्चेति भावः। आद्यदोषं परिहरति—**वाचस्पतिमत इति**। शुक्तिरजतादिविक्षेपस्याज्ञानपरिणामत्वपक्षे अज्ञानस्य विषयचैतन्यगतत्वं [1]वक्तव्यम्। तस्याज्ञानपरिणामत्वानङ्गीकारपक्षे तु तस्य विषयचैतन्यगतत्वं नापेक्षितमिति भावः। दार्ष्टान्तिके ब्रह्मपदं शुक्त्याद्यवच्छिन्नचैतन्यरूपब्रह्मपरं, न तु पूर्णब्रह्मपरम्, अवच्छिन्नचैतन्यस्यैव शुक्तिरजताद्यधिष्ठानत्वोपगमादिति भावः। 'विपरीतपरिमाणरूपो विक्षेपो न सम्भवति' इति द्वितीयदोषं परिहरति - **परोक्षवृत्त्येति**। परोक्षज्ञानात् अज्ञाननिवृत्तिर्यथा अनुभूयते, तथा उदाहृतस्थले सत्यपि परोक्षज्ञाने विपरीतपरिमाणोत्पत्तिरनुभूयते। तथा चानुभवद्वयानुरोधेन पुरुषाश्रितस्यैवाज्ञानस्य विषयावारकस्य एकदेशः परोक्षज्ञानेन निवर्तते एकदेशान्तरमनुवर्तते इति कल्प्यते। न त्वज्ञानद्वैविध्यमभ्युपगम्यते, गौरवादिति भावः। अवस्थान्तरेणेत्यनन्तरं पुरुषाश्रिताज्ञानस्यैवेति शेषः।

वस्तुतस्तु परोक्षज्ञानस्याज्ञाननिवर्तकत्वमतेऽपि प्रतिबन्धरहितमेव परोक्षज्ञानमज्ञाननिवर्तकम्। प्रकृते च भ्रमानुरोधेन दूरत्वादिदोषप्रतिबद्धत्वात् आप्तवाक्यजन्यमपि ज्ञानं पुरुषगताज्ञाननिवर्तकं न भवति। अतो न विपरीतपरिमाणोत्पत्त्यनुपपत्तिशङ्कावकाशः। न च तथा सति आप्तोपदेशानन्तरं 'दूरस्थवृक्षगतपरिमाणविशेषं न जानामि' इत्यनुभवापत्तिरिति वाच्यम्। सत्तानिश्चयरूपपरोक्षज्ञानस्य सत्यप्यज्ञाने तदनुभवप्रतिबन्धकत्वोपपत्तेः। न च 'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमस्य प्रतिबद्धपरोक्षप्रमायां व्यभिचार इति वाच्यम्। अप्रतिबद्धत्वस्य प्रमाविशेषणत्वोपपत्तेरिति बोध्यम्।

---

1. वक्तव्यमिति। अज्ञानपरिणामानां स्वोपादानाज्ञानसमानाश्रयकत्वनियमात् इति भावः।

अपरे तु - शुक्तिरजतादिपरिणामोपपत्त्याञ्जस्यात् विषयावकुण्ठनपटवत् विषयगतमेवाज्ञानं तदावारकम् । न च तथासति अज्ञानस्य अन्तःकरणोपहितसाक्ष्यसंसर्गेण ततः प्रकाशानुपपत्तिः परोक्षवृत्तिनिवर्त्यत्वासम्भवश्च दोष इति वाच्यम् । अवस्थारूपाज्ञानस्य साक्ष्यसंसर्गेऽपि तत्संसृष्टमूलाज्ञानस्यैव 'शुक्तिमहं न जानामि' इति प्रकाशोपपत्तेः, शुक्त्यादेरपि मूलाज्ञानविषयचैतन्याभिन्नतया तद्विषयत्वानुभवाविरोधात्, विवरणादिषु मूलाज्ञानसाधनप्रसङ्ग एव 'इदमहं न

एवं 'अप्रतिबद्धप्रमामात्रमज्ञाननिवर्तकम्' इति नियममनुसृत्य तदव्यभिचाराय परोक्षज्ञानस्याज्ञाननिवर्तकत्वमुपपादितम् । इदानीं 'तथा नियमो नास्ति, किं त्वप्रतिबद्धापरोक्षज्ञानमेवाज्ञाननिवर्तकम्, अतो न परोक्षज्ञाने व्यभिचारशङ्का' इति मतमवतारयति—**अपरे त्विति**। लोके घटादेर्मृदादिपरिणामत्वस्य प्रसिद्धत्वात् तद्वत् शुक्तिरजतादेरपि परिणामत्वं सिद्ध्यति। तत्परिणामि च अन्वयव्यतिरेकाभ्यां परिशेषसहकृताभ्यां अज्ञानमेव सिद्ध्यति। शुक्त्यादेः प्रातिभासिकरजतादिपरिणामित्वासम्भवात् । अज्ञानस्य च विषयचैतन्यगतस्य यथा रजतादिविक्षेपपरिणामित्वमाञ्जस्येनोपपद्यते, न तथा पुरुषाश्रितस्योपपद्यते। अतस्तदुपपत्त्याञ्जस्यानुरोधेन विषयगतमेव अवस्थारूपमज्ञानमास्थेयं, न तु पुरुषगतमप्यवस्थारूपमज्ञानान्तरं, वैयर्थ्यात् मानाभावाच्चेति भावः। यद्यपि पुरुषाश्रितस्याप्यज्ञानस्य पुरुषमपरित्यज्यैव दीर्घप्रभान्यायेन वृत्तिद्वारा बहिर्निर्गत्य विषयचैतन्यमाश्रितस्य रजतादिपरिणामित्वमुपपद्यते, तथापि सा उपपत्तिर्नाञ्जसी, मूलाऽज्ञानवदवस्थाऽज्ञानस्यापि निष्क्रियत्वेन प्रभान्यायानवतारात्, इत्यभिप्रेत्य परिणामोपपत्त्याञ्जस्यादित्युक्तम्। **तथा सतीति**। विषयावारकाज्ञानस्य विषयगतत्वे सतीत्यर्थः। तत इति पञ्चमी। साक्षिणः इत्यर्थः। **असम्भवश्चेति**। परोक्षवृत्तेः विषयदेशे निर्गमनाभावादिति भावः। आद्यदोषं परिहरति—**अवस्थारूपाज्ञानस्येति**। 'शुक्तिं न जानामि' इत्याद्यनुभवस्य न अवस्थाऽज्ञानं विषयगतं विषयः, किं तु मूलाज्ञानम्, तस्यैव साक्षिसंसृष्टत्वादित्यर्थः। ननु मूलाज्ञानस्य ब्रह्मविषयकत्वात् कथं तस्य शुक्तिविषयकत्वानुभवस्सम्भवति। अवस्थाऽज्ञानस्य वा कथं शुक्तिविषयकत्वानुभवस्सम्भवति, तस्यापि शुक्त्यवच्छिन्नचैतन्यमात्रविषयकत्वात्। शुक्तेरवस्थाऽज्ञानविषयचैतन्यतादात्म्याच्छुक्तिविषयकत्वानुभवो न विरुद्ध्यत - इति चेत्, तुल्यमुत्तरमित्यभिप्रेत्याह—**शुक्त्यादेरपीति। अभिन्नतयेति**। जडमात्रस्य मूलाज्ञानविषयचैतन्येऽध्यस्ततया शुक्त्यादेरपि तत्तादात्म्यरूपं तदभिन्नत्वमस्तीति भावः। 'शुक्तिं न जानामि' इत्यनुभवस्य मूलाज्ञानविषयकत्वे विवरणादिसम्मतिमाह—**विवरणादिष्विति**। ननु मूलाज्ञानसाधनप्रकरणे 'अहमज्ञः' इत्याकारो योऽनुभवः प्रदर्शितः स एव मूलाज्ञानसाधकः। 'इदमहं न जानामि' इत्यनुभवस्तु अवस्थाऽज्ञानविषयक एव। न च प्रकरणविरोधश्शङ्कनीयः। शुक्तिरजतादिलक्षणपरिणामोपपत्तये अवस्थाऽज्ञानस्यापि साधनीयत्वेन मूलाज्ञानसाधनप्रकरणेऽपि प्रसङ्गात् तत्साधनोपपत्तेः। यथा 'इदं न जानामि' इत्यनुभवः तत्तद्विषयावच्छिन्नचैतन्याज्ञानगोचरः एवम् 'अहमज्ञस्तत्त्वं न जानामि' इत्यनुभवो मूलाज्ञानगोचरः इति दृष्टान्तविधया मूलाज्ञानसाधनप्रस्तावेऽपि

जानामि' इति प्रत्यक्षप्रमाणोपदर्शनाच्च । 'अहमज्ञः' इति सामान्यतोऽज्ञानानुभव एव मूलाज्ञानविषयकः, 'शुक्तिमहं न जानामि' इत्यादिविषयविशेषालिङ्गिताज्ञानानुभवस्त्ववस्थाऽज्ञानविषयकः' इति विशेषाभ्युपगमेऽपि अवस्थाऽवस्थावतोरभेदेन मूलाज्ञानस्य साक्षिसंसर्गाद्वा साक्षिविषयचैतन्ययोः वास्तवैक्याद्वा विषयगतस्याप्यवस्थाऽज्ञानस्य साक्षिविषयत्वोपपत्तेः । परोक्षज्ञानस्याज्ञानानिवर्तकत्वेऽपि ततस्तन्निवृत्त्यनुभवस्य सत्तानिश्चयरूपपरोक्षवृत्तिप्रतिबन्धकप्रयुक्ताननुभवनिबन्धनभ्रान्तित्वोपपत्तेः, अपरोक्षज्ञानस्यैवाज्ञाननिवर्तकत्वनियमाभ्युपगमात् - इत्याहुः ।

ननु नायमपि नियमः । अविद्याऽहङ्कारसुखदुःखादितद्धर्मप्रत्यक्षस्याज्ञाननिवर्तकत्वानभ्युपगमादिति चेत् - न - अविद्यादिप्रत्यक्षस्य साक्षिरूपत्वेन वृत्तिरूपापरोक्षज्ञानस्यावरणनिवर्तकत्व-

---

विषयविशेषालिङ्गिताज्ञानानुभवप्रदर्शनोपपत्तेश्च । तस्मात् 'इदं न जानामि, शुक्तिं न जानामि' इत्याद्यनुभवानां मूलाज्ञानविषयकत्वे प्रमाणाभावात् अवस्थाऽज्ञानविषयकत्वस्यैव [1]तत्साधनार्थतया वक्तव्यत्वाच्च तस्य विषयगतत्वे सिद्धे साक्षिसंसर्गाभावात् न तदनुभवस्संभवति - इत्याशयवतीं शङ्कामनुवदति—**अहमज्ञ इतीति** । विषयगताज्ञानस्य साक्षिणा सह साक्षात्सम्बन्धाभावेऽपि परम्परासम्बन्धसम्भवात् न तदनुभवानुपपत्तिरिति परिहरति—**अवस्थाऽवस्थावतोरिति** । **अभेदेनेति** । तादात्म्यमभेदः । तथा च साक्षिसंसृष्टमूलाज्ञानावस्थात्वात् विषयगताज्ञानस्य मूलाज्ञानद्वारा साक्षिसंसर्ग इत्यर्थः । **साक्षीति** । साक्षिचैतन्यस्य अवस्थाऽज्ञानाश्रयविषयचैतन्यस्य च वस्तुत एकत्वात् वस्तुतस्साक्ष्यभिन्नचैतन्याश्रितत्वं साक्षिणा सह विषयगताज्ञानस्य संसर्ग इत्यर्थः । यदुक्तं—परोक्षवृत्तिनिवर्त्यत्वं विषयगताज्ञानस्य न सम्भवति । परोक्षवृत्तेर्निर्गमनाभावात् । तथा च 'प्रमामात्रमज्ञाननिवर्तकम्' इति नियमो न सम्भवति, परोक्षवृत्तौ व्यभिचारात् - इति-तन्न - परोक्षज्ञानस्याज्ञाननिवर्तकत्वानुपगमेन तथानियमानभ्युपगमात् । तथानियमे ह्यभ्युपगते परोक्षवृत्तौ व्यभिचारो दोषो भवेत् । ननु तर्हि 'शास्त्रार्थं न जानामि' इत्यनुभूताज्ञानस्य तदुपदेशानन्तरं तन्निवृत्त्यनुभवविरोध इति, नेत्याह—**परोक्षज्ञानस्येति** । **तत इति** । परोक्षज्ञानादित्यर्थः । **भ्रान्तित्वोपपत्तेरिति** । न चात्र बाधकाभावात् कथं भ्रान्तित्वकल्पनमिति वाच्यम् । विषयगताज्ञानापेक्षया पुरुषगतानन्तावस्थाऽज्ञानान्तरकल्पनागौरवस्य बाधकस्य सत्त्वादिति भावः । कथं तर्हि प्रमाणवृत्तीनां तन्निवर्तकत्वाभ्युपगमः तत्राह - **अपरोक्षज्ञानस्यैवेति** । न तु परोक्षज्ञानसाधारणप्रमाणज्ञानमात्रस्य, अतो न परोक्षज्ञाने व्यभिचारः इत्येवकाराभिप्रायः ॥

तद्धर्मेति । तच्छब्दोऽहङ्कारपरः । **अनभ्युपगमादिति** । अविद्याऽहङ्कारादीनां स्वसत्ताकाले भाननियमेन तेषामावरणानङ्गीकारादित्यर्थः । [2]नियमस्य सङ्कोचं वदन् परिहरति—**नेति** ।

---

1. तत्साधनार्थतया—अवस्थाऽज्ञानसिद्धिफलकतया ।
2. नियमस्येति । अपरोक्षज्ञानं अज्ञाननिवर्तकं इति नियमस्य इत्यर्थः । सङ्कोचं-अपरोक्षप्रमाविशेषविषयताम् ।

नियमानपायात् ।

साक्षिस्वरूपनिर्णयवादः

अथ कोऽयं साक्षी जीवातिरेकेण व्यवह्रियते ।

अत्रोक्तं कूटस्थदीपे—देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणात् निर्विकारत्वाच्च साक्षीत्युच्यते । लोकेऽपि हि औदासीन्यबोधाभ्यामेव साक्षित्वं प्रसिद्धम् । यद्यपि जीवस्य वृत्तयः सन्ति देहद्वयभासिकाः, तथापि सर्वतः प्रसृतेन स्वावच्छिन्नेन

सुखादिधर्मिणोऽहङ्कारस्य साक्षिप्रत्यक्षविषयत्वोक्त्या अहमर्थजीवापेक्षया भिन्नः तत्साक्षी निर्दिष्टः । सुखादिधर्मिणोऽहङ्कारस्यैव लोके जीवत्वप्रसिद्धेः । तथा च योऽयं जीवभिन्नः साक्षी व्यवह्रियते स नास्ति मानाभावात् इत्याक्षिपति—**अथेति** । यः साक्षी जीवातिरेकेण व्यवह्रियते अयं क इति सम्बन्धः । किंशब्द आक्षेपार्थः ।

मानाभावोऽसिद्ध इत्याशयेनाह—**अत्रोक्तमिति** । **साक्षादीक्षणादिति** । अपरोक्षतया द्रष्टृत्वादित्यर्थः । **निर्विकारत्वाच्चेति** । ननु द्रष्टृत्वं दृष्टिक्रियाकर्तृत्वम्, निर्विकारत्वं च कर्तृत्वादिविकाररहित्यम्, तथा च तयोः परस्परविरोध इति चेत् - न-दृष्टिस्वरूप एव कूटस्थे तत्कर्तृत्वस्य 'साक्षाद्द्रष्टरि संज्ञायाम्' [पा.सू.५-२-९१] इति सूत्रानुसारेण साक्षिशब्दात् प्रतीतस्य सवितरि प्रकाशात्मके 'प्रकाशते' इति प्रकाशकर्तृत्ववत् उपचारमात्रत्वात् । साक्षात्पदात् द्रष्टर्यर्थे इनिप्रत्ययो भवति साक्षिपदस्य संज्ञात्वे इति सूत्रार्थः । ननु साक्षिपदात् साक्षिलक्षणं बोद्धृत्वमात्रं प्रतीयते, न तु निर्विकारत्वरूपमौदासीन्यमपि, तत् कथं साक्षिलक्षणे निर्विकारत्वमपि प्रक्षिप्यते, तत्राह—**लोकेऽपि हीति** । अपिशब्दव्याख्यानमवधारणम् । तच्च औदासीन्यबोद्धृत्वयोः प्रत्येकं लक्षणत्वशङ्काव्यवच्छेदार्थम् । हिशब्दव्याख्यानं प्रसिद्धपदम् । लोके हि द्वयोर्विवदमानयोस्सतोः ताभ्यामन्यः तयोर्विवादस्यापरोक्षतया बोद्धा उदासीनश्च यो भवति स साक्षीत्युच्यते । अतः उदासीनत्वविशेषणमावश्यकम् । औदासीन्यमात्रं उक्तविवादस्थले स्तम्भादेरप्यस्तीति तद्वारणाय बोद्धृत्वविशेषणमिति मन्तव्यम् । स्थूलसूक्ष्मात्मकदेहद्वयावच्छिन्नं स्वावच्छेदकदेहद्वयावभासकं चैतन्यं साक्षीति यदुक्तं न तत् सम्भवति । तथाभूतचैतन्ये मानाभावात् । न च तदभावे देहद्वयावभासासिद्धिरिति वाच्यम् । प्रकाशात्मकान्तःकरणवृत्तिभिरेव तत्सिद्धेः इति मत्वा शङ्कते—**यद्यपीति** । जीवपदमहङ्कारात्मकान्तःकरणपरम्, नित्यचैतन्यस्यानङ्गीकारपक्षे जडाहङ्कारातिरिक्तजीवाभावात् वृत्तीनामन्तःकरणपरिणामतायाः 'कामस्सङ्कल्पः' इत्यादिश्रुतिसिद्धत्वाच्च इति बोध्यम् । वृत्तीनां दीपादिवत् प्रकाशात्मकत्वेऽपि तासां जडत्वाद्देहद्वयावभासकत्वं न भवति, स्वप्रकाशनित्यचैतन्याभ्युपगमे तु तत्प्रतिबिम्बयुक्तानां तासां देहद्वयानुभवरूपत्वं सम्भवति, अतस्तादृशचैतन्यमुपेयमित्यभिप्रायेणाह—**तथापीति** । किं च वृत्तीनामन्तरालदशासु देहद्वयस्यास्पष्टं भानं, देहद्वयगोचरवृत्तीनां सद्भावकाले तु 'अहं कर्ता स्थूलोऽहम्' इत्यादिरूपेण स्पष्टं भानमित्यनुभवसिद्धम् । तत्रास्पष्टभानोपपत्तये वृत्तिज्ञानातिरिक्तं नित्यसाक्षिचैतन्यमुपेयमित्याशयेनाह—**सर्वतःप्रसृतेनेति** । व्याप्तेनेत्यर्थः । देहद्वयं कूटस्थचैतन्येन ईषत् सदा भास्यमानमेव वृत्तिज्ञानैः स्फुटं

कूटस्थचैतन्येन ईषत् सदा भास्यमानमेव देहद्वयं जीवचैतन्यरूपप्रतिबिम्बगर्भादन्तःकरणाद्विच्छिद्य-विच्छिद्योद्गच्छद्भिर्वृत्तिज्ञानैः स्फुटं अवभास्यते। अन्तरालकालेषु तु सह वृत्त्यभावैः कूटस्थचैतन्येनैव अवभास्यते। अत एव अहंकारादीनां [सदा] (सर्वदा) प्रकाशसंसर्गात् संशयाद्यगोचरत्वं अन्यज्ञानधाराकालीनाहंकारस्य 'एतावन्तं कालमिदमहं पश्यन्नेवासम्' इत्यनुसन्धानं च। न च

अवभास्यत इति सम्बन्धः। जीवचैतन्यरूपो यः प्रतिबिम्बः तद्गर्भात् तद्युक्तादित्यर्थः। अनेन अन्तःकरणप्रतिबिम्बो जीवः, बिम्बचैतन्यरूपः कूटस्थः साक्षी, इति जीवसाक्षिणोर्भेदो दर्शितः। यथा अग्नितप्तात् अयःपिण्डात् उद्गच्छन्तो विस्फुलिङ्गाः साग्नय एवोद्गच्छन्ति, एवं चैतन्यप्रतिबिम्बोपेतादन्तःकरणात् उत्पद्यमाना वृत्तयोऽपि तत्प्रतिबिम्बगर्भा एवोत्पद्यन्ते। अतस्तासां देहाद्यनुभवरूपत्वं सम्भवतीति सूचयितुं अन्तःकरणस्य प्रतिबिम्बगर्भत्वमुक्तम्। जाग्रदवस्थायां देहद्वयस्य साक्षिचैतन्यमात्रात् अस्पष्टतया भानावसरं दर्शयितुं विच्छिद्यविच्छिद्येत्युक्तम्। तमेवावसरं स्पष्टमाह—**अन्तरालकालेष्विति**। तुशब्दस्य व्याख्यानमेवकारः। देहद्वयं वृत्त्यभावैः सह अवभास्यते इति सम्बन्धः। वृत्त्यभावैरित्यस्य वृत्तीनां ध्वंसैरित्यर्थः। उपलक्षणं चैतत्। वृत्तीनामुत्पत्तिभिर्वृत्तिभेदैश्च सहेत्यर्थः। अयं भावः—नित्यचैतन्यानभ्युपगमे वृत्त्युत्पत्तिविनाशतद्भेदादेःअपरोक्षतया भानं न स्यात्। स्वोत्पत्तिविनाशयोः स्वग्राह्यत्वासम्भवात्, वृत्तिगोचरापरोक्षवृत्तीनां निरसिष्यमाणतया तयोर्वृत्त्यन्तरग्राह्यत्वासम्भवाच्च। तस्मात् वृत्तिनाशादिसाक्षितयापि नित्यचैतन्यमुपेयमिति। अत्रैव उपपत्त्यन्तरं दर्शयति—**अत एवेति**। नित्यचैतन्यरूपसाक्षिसद्भावादेवेत्यर्थः। अहङ्कारप्राणशरीरादीनां योग्यतद्धर्मसुखदुःखादीनां च सदा अहङ्कारादिसत्ताकाले संशयादिनिवृत्तिलक्षणफलभाक्त्वं तावदनुभवसिद्धम्। न हि कदाचिदपि 'अहमासं न वा, अहं वर्ते न वा, अहं प्राणिमि न वा, अहं ब्राह्मणो न वा' इत्यादिप्रकारेण अहङ्कारादिसत्तासंशयः कस्यचिदप्यस्ति। तच्च तेषां सदाप्रकाशसंसर्गं विना न सम्भवति। घटादीनां प्रकाशसंसर्गदशायामेव संशयाद्यगोचरत्वदर्शनात्। सदाप्रकाशसंसर्गित्वं अहङ्कारादीनां जन्यज्ञानपक्षे न सम्भवति। तेषामुत्पत्तिविनाशवत्त्वात् क्रमिकत्वात् प्रायेण बाह्यविषयगोचरत्वाच्च। तस्मादहङ्कारादीनां सदा संशयाद्यगोचरत्वनिर्वाहाय तेषां सदा साक्षिचैतन्यरूपप्रकाशसंसर्गो वाच्य इति भावः। साक्षिसद्भावे उपपत्त्यन्तरमाह—**अन्यज्ञानेति**। अहङ्कारग्रहणं धारान्तर्गतवृत्तीनामप्युपलक्षणम्। नित्यानुभवरूपसाक्ष्यनङ्गीकारे दिव्यमङ्गलश्रीकृष्णमूर्तिगोचरवृत्तिसन्ततिकालीनाहमर्थस्य तत्कालीनवृत्तीनां च तत्काले जन्यानुभवासम्भवेन संस्कारासम्भवात् उत्तरत्रानुसन्धानं न स्यात्। न हि धाराकाले अहङ्कारगोचरो वा प्रत्येकं वृत्तिगोचरो वा जन्यानुभवः सम्भवति। धाराविच्छेदप्रसङ्गात्। वृत्तिसन्ततेरिच्छाघटितसामग्रीकत्वेन तद्विच्छेदासम्भवाच्च। तस्मादन्यज्ञानधाराकालीनाहमर्थादिसाक्षितया नित्यानुभवो वाच्य इति भावः। **अनुसन्धानं चेति**। सङ्गच्छत इति शेषः। ननु - साक्षिचैतन्येनानुभूताहमर्थतद्वृत्तीनां कथं 'अहं

---

1. अस्पष्टं भानमिति। अविकल्पं इत्यर्थः। विशिष्टव्यवहारानर्हमिति यावत्। स्पष्टत्वं सविकल्पकत्वम्। विशिष्टव्यवहारयोग्यत्वम्। तच्च अन्तःकरणसम्बन्धे सत्येव भवति इति बोध्यम्।

कूटस्थप्रकाशिते कथं जीवस्य व्यवहारस्मृत्यादिकमिति शङ्क्यम्। अन्योन्याध्यासेन जीवैकत्वापत्त्या कूटस्थस्य जीवान्तरङ्गत्वात्। न च जीवचैतन्यमेव साक्षी भवतु किं कूटस्थेनेति - वाच्यम्। लौकिकवैदिकव्यवहारकर्तुस्तस्य उदासीनद्रष्टृत्वासम्भवेन 'साक्षी चेता केवलो निर्गुणश्च' [श्वे. उ. ६-११] इति श्रुत्युक्तसाक्षित्वायोगात्। 'तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति' [श्वे. उ. ४-६] इति कर्मफलभोक्तुर्जीवात् उदासीनप्रकाशरूपस्य साक्षिणः पृथगाम्नानाच्च इति।

पश्यन्नेवासम्' इति स्मरणं जीवस्य सम्भवति। अहमर्थभूतप्रतिबिम्बजीवापेक्षया बिम्बभूतस्य कूटस्थचैतन्यात्मकसाक्षिणो भिन्नत्वात्, अन्यानुभूतेऽर्थे अन्यस्मरणायोगात् - इति शङ्कते—**न च कूटस्थेति**। स्वेन स्वतादात्म्यापन्नेन वा अनुभूतेऽर्थे स्वस्य स्मरणं भवतीत्यङ्गीकारान्नातिप्रसङ्गः, न हि देवदत्तयज्ञदत्तजीवयोः परस्परं तादात्म्यमस्ति, येन देवदत्तानुभूतेऽर्थे यज्ञदत्तस्य स्मरणप्रसङ्ग इति दोषो भवेत् इत्याशयेन परिहरति—**अन्योन्याध्यासेनेति**। तादात्म्याध्यासेनेत्यर्थः। जीवस्य कूटस्थे कल्पितत्वस्य प्रागेव निरूपितत्वादिति भावः। न च - एवमपि सर्वदेहेषु साक्षिण एकत्वात् देवदत्तसाक्षिणाऽनुभूतदेवदत्ताहङ्कारादिषु यज्ञदत्तादेरप्यनुसन्धानप्रसङ्गः, यज्ञदत्तादेरपि देवदत्तसाक्षिण्येवाध्यस्ततया तदेकत्वापत्तेः सत्त्वादिति - वाच्यम्। देहद्वयरूपावच्छेदकभेदेन तत्तज्जीवतादात्म्यापन्नसाक्षिणो भेदाभ्युपगमात्। एवमवच्छेदकभेदेन साक्षिभेदं ज्ञापयितुमेव स्वावच्छेदकस्येति विशेषणं पूर्वमेव दत्तमिति बोध्यम्। ननु अस्तु जीवकूटस्थनामकं चैतन्यद्वयम्, तथापि जीव एव साक्षी किं न स्यादिति शङ्कते—**न चेति। किं कूटस्थेनेति**। किं कूटस्थस्य साक्षित्वेनेत्यर्थः। न तु कूटस्थस्यैव आक्षेपः। तस्य साधितत्वात्। उदासीनस्यैव लोके साक्षित्वस्य प्रसिद्धत्वात् तदनुरोधेन श्रुत्यनुरोधेन च कूटस्थस्यैव साक्षित्वं न जीवस्येति परिहरति - **लौकिकेति**। साक्षिणो लक्षणमाह श्रुतिः—**चेता केवल इति**। चेता बोद्धा। केवलः- अकर्ता-उदासीन इति यावत्। 'ज्ञानादिगुणक आत्मा' इति वैशेषिकादिमतं श्रुतिः स्वयमेव निराकरोति—**निर्गुणश्चेति**। 'मध्यमपरिमाणः सक्रिय आत्मा' इति दिगम्बरमतनिरासार्थश्चकारः। निष्क्रियश्चेत्यर्थः। साक्षिणो जीवात् भिन्नत्वे श्रुतिमप्याह—**तयोरन्य इति**। जीवकूटस्थयोर्मध्ये कूटस्थादन्यो जीवः पिप्पलं - कर्मफलं स्वादु यथाभवति तथा अत्ति - भुङ्क्ते। शरीरस्य अश्वत्थवृक्षत्वेन निरूपितत्वात् कर्मफलस्य पिप्पलत्वेन रूपणमिति द्रष्टव्यम्। स्वाद्वत्तीति विशेषणं पुण्यफलाभिप्रायम्। जीवादन्यः कूटस्थः अनश्नन् - अशनं कर्मफलभोगं अकुर्वन् अभिचाकशीति - अभि - आभिमुख्येन अपरोक्षतया चाकशीति - बुद्ध्यादिसाक्षितया प्रकाशते इति यावत्। अत्र अनश्नन्नित्यनेन भोक्तृत्वे निषिद्धे सति कर्तृत्वमपि निषिद्धं भवति। तथा च अनश्नन्नभिचाकाशीतिपदाभ्यां उदासीनत्वे सति बोद्धृत्वरूपं साक्षित्वं प्रदर्शितमित्यर्थः।

नाटकदीपेऽपि नृत्यशलास्थदीपदृष्टान्तेन साक्षी जीवाद्विविच्य दर्शितः। तथाहि—'नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम्। दीपयेदविशेषेण तदभावेऽपि दीप्यते ॥' [पं. द. १० - ११)। तथा चिदाभासविशिष्टाहंकाररूपं जीवं विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात् नृत्याभिमानिप्रभुतुल्यं तत्परिसरवर्तित्वेऽपि तद्राहित्यात् सभ्यपुरुषतुल्यान् विषयान् नानाविधविकारवत्त्वात् नर्तकीतुल्यां धियं च दीपयन् सुषुप्त्यादावहंकाराद्यभावेऽपि दीप्यमानः चिदाभासविशिष्टाहंकाररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षीति।

कूटस्थदीपे निरूपितः साक्षी अन्यत्रापि दृष्टान्तविशेषपूर्वकं सुषुप्तिसाधारणो निरूपित इत्याह—**नाटकदीपेऽपीति**। दृष्टान्तप्रतिपादकं तत्रत्यश्लोकं पठति—**नृत्यशालास्थित इति**। प्रभुं नृत्याभिमानिनं सभ्यान् तत्परिसरवर्तिनः। **अविशेषेणेति**। दीपो हि वृद्धिं प्राप्य प्रभुं प्रकाशयति, मध्यमावस्थां प्राप्य सभ्यान्, ततो निकृष्टावस्थां प्राप्य नर्तकीं इति प्रकाश्यतारतम्यानुसारेण वृद्ध्यादिविकारं प्राप्य न दीपयेत्, किं तु एकरूपेणैव स्थितः सन् प्रकाशयेदित्यर्थः। इदं च विशेषणं दार्ष्टान्तिके निर्विकारस्य कूटस्थस्य साक्षित्वज्ञापनार्थमिति मन्तव्यम्। **तदभावेऽपीति**। प्रभुसभ्याद्यभावेऽपीत्यर्थः। 'अहङ्कारः प्रभुः सभ्या विषया नर्तकी मतिः। तालादिधारीण्यक्षाणि दीपस्साक्ष्यवभासकः ॥' [पं. द. १०-१४] इति दार्ष्टान्तिकसङ्ग्राहकं श्लोकं मनसि निधायाह—**तथेति**। जीवस्य नृत्याभिमानिप्रभुतुल्यत्वकल्पनाप्रयोजकं साम्यमाह—**विषयेति**। नृत्यसाकल्यवैकल्यप्रयुक्तहर्षादिमत्त्वं प्रभोरभिमानिपदेन सूचितम्। यथा सभ्याः प्रभुपरिसरवर्तिनः तथा रूपादयो विषयाः जीवपरिसरवर्तिनः। तथा च विषयाणां सभ्यसाम्यात् सभ्यत्वकल्पनं युक्तमित्याशयेनाह—**तत्परिसरवर्तित्वेऽपीति**। तत्पदं जीवपरम्। ननु जीवपरिसरवर्तिनामपि विषयाणां जीववत् प्रभुतुल्यत्वमेव कुतो न कल्प्यते इत्याशङ्क्य तत्प्रयोजकाभावादित्याशयेनाह—**तद्राहित्यादिति**। प्रभुतुल्यत्वकल्पकहर्षविषादादेरभावादित्यर्थः। यद्वा विषयाणां सभ्यपुरुषसाम्यमाह—**तद्राहित्यादिति**। बुद्धेर्नर्तकीसाम्यमाह – **नानाविधेति**। यथा तालादिधारिणः पुरुषाः नर्तकीमनुवर्तन्ते, एवमिन्द्रियाण्यपि धियमनुवर्तन्ते, इत्यनेन साम्येन इन्द्रियाणां तालादिधारिपुरुषसाम्यं श्लोकोपात्तं 'धियं च' इत्यत्र चशब्दार्थः। जीवादीनामवभासकस्साक्षी दीपतुल्य इति चरमपादार्थः। तं संगृह्णाति—**दीपयन्नित्यादिना**। प्रकाशयन्नित्यर्थः। दीपयन्नित्यतः प्राक् जाग्रदादाविति शेषः। नाटकदीपे निरूपितः साक्षी कूटस्थदीपोक्तकूटस्थ एव, नान्य इत्याशयेनाह—**चिदाभासविशिष्टेति**। कूटस्थदीपे हि जीवभ्रमाधिष्ठानभूतकूटस्थचैतन्यं जीवादेरवभासकम् इत्युक्तम्। नाटकदीपे च 'चिदाभासविशिष्टाहङ्कारं जीवं कल्पयित्वा तदवभासकं चैतन्यं साक्षीत्युक्तम्। ततश्च तत्रोक्तकूटस्थ एव अत्र साक्षीत्यवगम्यते। अन्तःकरणप्रतिबिम्बरूपजीवाधिष्ठानत्वतदवभासकत्वादिनिर्देशसाम्यात्। तथा च 'नाटकदीपेऽपि नृत्यशालास्थदीपदृष्टान्तेन साक्षी जीवाद्विविच्य दर्शित' इति पूर्वग्रन्थे 'कूटस्थदीपे यःसाक्षी जीवात् भेदेन दर्शितः स एव नाटकदीपेऽपि ततो भेदेन दर्शितः' इति विवक्षितार्थः सिद्ध इति भावः।

एवं जीवाद्विवेचितोऽयं साक्षी न ब्रह्मकोटिरपि, किं त्वस्पृष्टजीवेश्वरविभागं चैतन्यम्, इत्युक्तं कूटस्थदीपे।

तत्त्वप्रदीपिकायामपि **मायाशबलिते सगुणे परमेश्वरे 'केवलो निर्गुणः' इति विशेषणानुपपत्तेः सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षीति प्रतिपद्यते इत्युदितम्।**

कौमुद्यां तु [1]**"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूता-**

साक्षी यथा जीवकोटिर्न भवति, जीवस्य उदासीनत्वाभावात्, तथा ईश्वरकोटिरपि न भवति, जगत्सृष्टिनियमनादिव्यापारकर्तुस्तस्य उदासीनत्वाभावात्, ईश्वरस्य परोक्षतया जीवं प्रति बुद्ध्यादिसाक्षितया नित्यापरोक्षसाक्षिरूपत्वासम्भवाच्च इत्याशयेनाह—**एवं जीवादिति।** ब्रह्मपदमीश्वरपरं, न तूदासीनचैतन्यपरम्। कस्तर्हि साक्षीति पृच्छति-**किंत्विति।** उत्तरम्--**अस्पृष्टेति। उक्तमिति।** 'इति शैवपुराणेषु कूटस्थः प्रविवेचितः। जीवेशत्वादिरहितः केवलस्स्वप्रभश्शिवः' ॥ [पं-द-८-५९] इति श्लोकेनेति शेषः। जगद्रूपत्वमादिपदार्थः। केवलः-उदासीनः शिवः-शुद्धः परमात्मेत्यर्थः।

ईश्वरत्वादिधर्मरहितश्चिदात्मैव अन्यत्रापि साक्षित्वेनोक्त इति संवादार्थमाह—**तत्त्वप्रदीपिकायामपीति।** सर्वेषां जीवानां अन्तःकरणगतचित्प्रतिबिम्बात्मकानां प्रत्यग्भूतं-अधिष्ठानतया आन्तरं स्वरूपं विशुद्धं-जीवत्वेश्वरत्वजगद्रूपत्वरहितं ब्रह्म जीवाभेदेन-तत्तज्जीवाधिष्ठानत्वादेव तत्तज्जीवतादात्म्यापत्त्या प्रतिशरीरं प्राप्तभेदं सत् साक्षीति प्रतिपद्यते। इतिशब्दः प्रकारवाची सन् साक्षित्वमाह, साक्षित्वं प्रतिपद्यते।

परमेश्वरस्यैव कश्चिद्रूपभेदः साक्षी नाम। कुतः, देवत्वादिश्रुतेः। न त्वीश्वरविलक्षणः साक्षी। देवत्वादिश्रुतिविरोधात् इत्येवकारार्थः। देवत्वादीत्यादिपदेन सर्वभूतान्तरात्मत्वादिधर्मा गृह्यन्ते। एतदुक्तं भवति—देवत्वादयो धर्माः श्रुतिस्मृत्यादिषु परमेश्वरधर्मत्वेन प्रसिद्धा इति नान्यस्य साक्षित्वम्। देवत्वादिश्रवणविरोधात्। यद्यपि देवत्वं हिरण्यगर्भेन्द्रादिजीवसाधारणं, तथाऽपि इतरधर्माणामीश्वरासाधारणत्वाद्देवत्वमपीश्वरगतमेव ग्राह्यमिति भावः। परमेश्वरस्य शिवविष्ण्वात्मना प्राप्तं भेदं निराचष्टे—**एक इति।** बिम्बभूतस्य परमेश्वरस्य मूर्तिभेदेन शिवविष्णुसंज्ञा, न त्वीश्वरभेदोऽस्तीत्यर्थः। तथा च श्रुत्यन्तरं—'शाश्वतं शिवमच्युतम्' [महाना. उ. ११-३] इति। अच्युतपदस्य विष्णौ रूढत्वात्। 'आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते' इत्यादिस्मृतयोऽप्यत्र शतशो द्रष्टव्याः। श्रुतौ सर्वभूतेष्वित्यनन्तरं वर्तत इति शेषः। तथा च स्मृतिः—'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' [भ. गी. १८-६१] इति। तर्हि किमिति सर्वेषां नोपलभ्यते, तत्राह—**गूढ इति।** तथा च स्मृतिः—'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' [भ. गी. ७-२५] इति। श्रीकृष्णोऽत्राहंशब्दार्थः। प्रकाशः - प्रकाशमान इत्यर्थः। परमात्मनो भूतेषु अवस्थानाभ्युपगमे अधिकरण-

---

1. एको देव इति। जडत्वनिरासाय देव इति। द्योतनस्वभावः-चिद्रूप इत्यर्थः। तस्य ब्रह्माण्डात् बहिरवस्थितिशङ्कां निराकरोति सर्वभूतेष्विति। शिष्टानि पदानि टीकायां व्याख्यातानि।

धिवासः साक्षी चेता केवलो निर्गुणश्च' [श्वे. उ. ६-११] इति देवत्वादिश्रुतेः परमेश्वरस्यैव रूपभेदः कश्चित् जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीनः साक्षी नाम। स च कारणत्वादिधर्मानास्पदत्वात् अपरोक्षो जीवगतमज्ञानाद्यवभासयंश्च जीवस्यान्तरङ्गः। सुषुप्त्यादौ च कार्यकरणोपरमे जीवगताज्ञानमात्रस्य व्यञ्जकः प्राज्ञशब्दितः। 'तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किंचन

भेदात्तस्यापि भिन्नत्वशङ्का स्यात्, तां वारयति—**व्यापीति**। व्यापित्वेऽपि नभोवत् वस्तुतो जीवभिन्नत्वं वारयति—**सर्वभूतान्तरात्मेति**। सर्वभूतानां—ब्रह्मादिस्तम्बपर्यन्तसङ्घातानां अन्तरवस्थित आत्मा, सर्वजीवस्वरूप इति यावत्। परमेश्वरस्य कर्मकर्तृजीवाभिन्नत्वे तस्यापि तत्कर्तृत्वं स्यादिति, नेत्याह—**कर्माध्यक्ष इति**। जीवकर्तृककर्मणां साक्षी, न स्वयं तत्कर्तेत्यर्थः। जीवपरमात्मनोरौपाधिकभेदेन धर्मव्यवस्था सम्भवतीति भावः। सर्वभूतेष्वित्यादिना परमात्मापेक्षया भेदेन भूतानां निर्देशात्तस्य सद्वितीयत्वमाशङ्क्याह—**सर्वभूताधिवास इति**। अधि उपरि वसन्त्यस्मिन् भूतानीत्यधिवासः अधिष्ठानम्। सर्वेषां भूतानां अधिवासः सर्वभूताधिवासः। न चाधिष्ठानातिरेकेण आरोपितानां पृथक्सत्त्वमस्तीति नाद्वितीयत्वविरोध इति भावः। न केवलं जीवगतकर्मणामेव साक्षी, किं तु जीवानामपि, इत्याशयेनाह—**साक्षीति**। अवशिष्टा श्रुतिः प्रागेव व्याख्याता। **अनुमन्ता**-नैरन्तर्येण[1] बोद्धा। **स्वयमुदासीन इति**। जीवे व्यापारवत्यपि स्वयं तद्रहितः। रूपविशेषे साक्षिलक्षणमुक्त्वा साक्षिपदं तत्र [2]वर्तयति—**साक्षीनामेति**। नामपदं श्रुतिप्रसिद्धिद्योतकम्। ननु-साक्षी जीवस्यापरोक्षः, तस्य अज्ञानान्तःकरणाद्यनुभवरूपत्वाङ्गीकारात्। ईश्वरस्तु नित्यं परोक्षः, कारणत्वसर्वज्ञत्वसर्वनियन्तृत्वादेर्जीवं प्रत्ययोग्यत्वेन तद्विशिष्टबिम्बचैतन्यरूपेश्वरस्यायोग्यत्वात् इति चेत्, न, तस्य रूपविशेषत्वाङ्गीकारेणापरोक्षत्वोपपत्तेः इत्याशयेनाह—**स चेति**। न चेश्वरस्यैतादृशरूपभेदे मानाभावः शङ्कनीयः। 'एको देवः' इति मन्त्रस्य 'अनश्नन्नन्योऽभिचाकशीति' इति मन्त्रभागस्य च उदासीने परमेश्वररूपभेदे मानत्वात्, कारणत्वादिधर्मास्पदे चेश्वरे सृष्टिवाक्यानां सर्वेषामेव मानत्वात्, इति भावः। स च जीवस्यापरोक्षोऽन्तरङ्गश्चेति सम्बन्धः। उभयत्र हेतुमाह—**जीवगतमज्ञानाद्यवभासयन्निति**। अन्तःकरणतद्धर्मसुखदुःखादिसङ्ग्रहार्थमादिपदम्। साक्षिचैतन्यमज्ञानाद्यवभासनद्वारा 'अहमज्ञः, 'अहं सुखी, अहं दुःखी' इत्यादिव्यवहारनिर्वाहकं भवति। अतस्साक्षी जीवस्यान्तरङ्गः, लोके राजादिव्यवहारनिर्वाहकपुरुषे राजान्तरङ्गत्वस्य प्रसिद्धत्वादिति भावः। ननु-सुषुप्त्यादौ साक्ष्यस्यान्तःकरणतद्वृत्त्यादेरुपरतत्वात् तदा चिदात्मनस्साक्षित्वं न स्यात्। तथा च 'तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदा शिवः' [कै. उ. १८] इत्यादौ सुषुप्त्यादावपि तस्य साक्षित्वव्यवहारविरोधः इत्यत आह—**सुषुप्त्यादौ चेति**। तेभ्य इति। भोक्त्रादिभ्य इत्यर्थः। तदापि मूलाज्ञानस्य साक्ष्यस्य सत्त्वात् न विरोध इति भावः। परमेश्वरस्यैव रूपविशेषात्मके साक्षिणि सुषुप्त्युत्क्रान्तिविषयकवाक्यद्वयमपि प्रमाणमित्याशयेनाह—**प्राज्ञशब्दित इति**। सुषुप्तिविषयकवाक्ये उत्क्रान्ति-

---

1. नैरन्तर्येणेति—अनुशब्दार्थोऽयम्। 2. वर्तयति—वृत्तिमत् बोधयति।

वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरं [बृ.उ. ४-३-२१] प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति' [बृ.उ. ४-३-३७] इति श्रुतिवाक्याभ्यां सुषुप्त्युत्क्रान्त्यवस्थयोर्जीवाद्भेदेन प्रतिपादितः परमेश्वर इति सुषुप्त्युत्क्रान्त्यधिकरणे निर्णयोऽपि साक्षिपरः इत्युपवर्णितम् ।

तत्त्वशुद्धावपि **'यथा इदं रजतमिति भ्रमस्थले वस्तुतः शुक्तिकोटयन्तर्गतोऽपीदमंशः प्रतिभासतो रजतकोटिः तथा ब्रह्मकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति जीवस्य सुखादिव्यवहारे तस्योपयोगः' इत्युक्त्या अयमेव पक्षः समर्थितः ।**

विषयकवाक्ये च प्राज्ञशब्देन यथोक्तसाक्षिण एव प्रतिपादितत्वादिति भावः। ननु 'सुषुप्त्युत्क्रान्त्योर्भेदेन' [ब्र. सू. १-३-४२] इत्यधिकरणे सुषुप्त्यादिविषयकश्रुतिगतप्राज्ञशब्दस्य सर्वेश्वरत्वभूताधिपतित्वादिविशिष्टपरमात्मप्रतिपादकताया उक्तत्वात् कथं प्राज्ञशब्दस्य उदासीनेश्वरपरत्वम्, अत आह—**तद्यथेति** । दृष्टान्तवाक्ये बाह्यं-रथ्यादिवृत्तान्तं, आन्तरंगृहकृत्यं, पुरुषः-जीवः, प्राज्ञः-परमात्मा, तेन सम्परिष्वक्तः-सुषुप्तावुपाधिलयादेकीभावं प्राप्तः, [दार्ष्टान्तिकवाक्ये] बाह्यं-जाग्रत्प्रपञ्चम्, आन्तरं-स्वप्नप्रपञ्चं, किञ्चन-किञ्चिदपि । उत्क्रान्तिवाक्यमुदाहरति—**प्राज्ञेनात्मनाऽन्वारूढ इति** । अन्वारूढः - अधिष्ठितः उत्सर्जन्-वेदनावशात् शब्दं कुर्वन् याति-शरीरात् बहिर्निर्गच्छति-उत्क्रामतीत्यर्थः । अवस्थयोरिति सप्तमी । प्रतिपादित इत्यनन्तरं प्राज्ञ इति शेषः । तथा च वाक्याभ्यां जीवात् भेदेन प्रतिपादितः प्राज्ञः परमेश्वर इति निर्णयोऽपि साक्षिपरः इत्युपवर्णितं कौमुद्यामिति सम्बन्धः । बृहदारण्यकषष्ठाध्यायो जीवानुवादमात्ररूपो न तदतिरिक्तेश्वरपर इति पूर्वपक्षे प्राप्ते सिद्धान्तः—'तद्यथा प्रियया' इत्यादिवाक्ययोस्सुषुप्त्यवस्थायामुत्क्रान्त्यवस्थायां च पुरुषशब्दितजीवापेक्षया भेदेन परमेश्वरस्य तृतीयान्तप्राज्ञशब्देन व्यपदेशात् न षष्ठाध्यायो जीवानुवादमात्ररूपः । किं तु तदतिरिक्तेश्वरप्रतिपादनपरः । तत्प्रतिपादनं च लोकसिद्धजीवानुवादेन तस्य ईश्वराभेदप्रतिपादनार्थम् । तथा च वाक्यशेषो दृश्यते—'स वा एष महानज आत्मा योऽयं विज्ञानमयः' [बृ. उ. ४-४-२२] इति । यो विज्ञानमयो जीवः स एष महानात्मा-पूर्णः परमात्मा इत्यर्थः - इति तदधिकरणनिर्णयः । ननु - अस्य निर्णयस्य उदासीनेश्वररूपसाक्षिपरत्वमनुपपन्नम् । 'स वा एष महानज आत्मा' इत्येतदनन्तरं 'एष सर्वेश्वर एष भूताधिपतिः' इत्यादिना तस्य सर्वेश्वरत्वादिगुणजातप्रतिपादनात् - इति चेत्, न - ज्ञेयब्रह्मप्रकरणगतसर्वेश्वरत्वादिवचनस्य स्तुतिमात्रपरत्वादिति भावः ।

कौमुदीकारमतस्य संवादार्थं मतान्तरमुपन्यस्यति—**तत्त्वशुद्धावपीति** । 'इदं रजतम्' इतिभ्रमस्थले रजताभेदेन प्रतिभासमानोऽपि इदमंशः रजतान्तर्भूतो न भवति । रजतवत्तस्य बाधाभावात् । नापि शुक्तावेवान्तर्भवति तस्य शुक्त्यंशवदज्ञातत्वप्रसङ्गात् । अतो यथा इदमंशस्य वस्तुतश्शुक्तिरूपत्वं प्रतिभासतो रजताभिन्नत्वम्, एवं साक्षिणोऽपि वस्तुगत्या ईश्वररूपभेदत्वं कल्पिततत्तज्जीवाधिष्ठानरूपस्य साक्षिणस्सुखाद्यनुभवितुः 'अहं सुखमनुभवामि' इत्यादिप्रतिभासतः तत्तज्जीवाभिन्नत्वम् । अतो जीवस्य सुखादिव्यवहारे तस्य-सुखाद्यनु-

केचित्तु - अविद्योपाधिको जीव एव साक्षाद्द्रष्टृत्वात्साक्षी। लोकेऽपि ह्यकर्तृत्वे सति द्रष्टृत्वं साक्षित्वं प्रसिद्धम्। तच्चासङ्गोदासीनप्रकाशरूपे जीवे एव साक्षात्सम्भवति। जीवस्यान्तःकरणतादात्म्यापत्त्या कर्तृत्वाद्यारोपभाक्त्वेऽपि स्वयमुदासीनत्वात्। 'एको देवः' इति मन्त्रस्तु ब्रह्मणो जीवभावाभिप्रायेण साक्षित्वप्रतिपादकः। 'द्वा सुपर्णा' इति [मु.उ.३-१-३] मन्त्रः गुहाधिकरणन्यायेन जीवेश्वरोभयपरः गुहाधिकरणभाष्योदाहृतपैङ्गिरहस्यब्राह्मणव्याख्यातेन

भवितुः जीवैकत्वमापन्नस्य उपयोगः इत्यर्थः। **अयमेवेति**। साक्षिणो वस्तुतोऽपि जीवान्तर्भावे तस्य ब्रह्मकोटित्वोक्तिविरोधात् तस्य ईश्वररूपभेदत्वं तत्त्वशुद्धिकाराभिमतमिति गम्यत इति भावः।

जीवसाक्षिणोर्भेदपक्षानुपन्यस्य तयोरभेदपक्षावुपन्यस्यति—**केचिदित्यादिना**। जीव एव साक्षीति सम्बन्धः। नत्वीश्वरस्य रूपभेदः साक्षी तत्र मानाभावात् इत्येवकाराभिप्रायः। जीवस्य साक्षित्वाभ्युपगमे हेतुमाह—**साक्षाद्द्रष्टृत्वादिति**। तस्य औदासीन्यं सूचयति—**अविद्योपाधिक इति**। एतदेव प्रपञ्चयितुं इदमेव साक्षिलक्षणं नान्यत् इति पूर्वोक्तं स्मारयति—**लोकेऽपि हीति**। पूर्वं सङ्ग्रहेणोक्तं जीवस्यैव साक्षित्वं प्रपञ्चयति—**तच्चेति**। **साक्षादिति**। अविद्याप्रतिबिम्बरूपजीवस्य स्वतस्सम्भवतीत्यर्थः। अनेन क्लृप्तस्य जीवस्यैव साक्षित्वसम्भवे तदतिरिक्तःसाक्षी न कल्पनीयः गौरवात् इति सूचितम्। ननु लौकिकवैदिकव्यवहारकर्तुरौदासीन्यमसिद्धमित्युक्तं इत्याशङ्क्य, बुद्धितादात्म्यप्रयुक्तमेव कर्तृत्वादिकं स्वतस्तु उदासीनत्वमित्युपगमात् तस्य साक्षित्वं सम्भवतीत्याह—**जीवस्यान्तःकरणेति**। नन्वीश्वरस्य साक्षित्वानुपगमे मन्त्रविरोध इत्यत आह—**एको देव इति मन्त्रस्त्विति**। साक्षी तावत् जीवस्यापरोक्ष इत्युक्तम्। ईश्वरस्य तु उदासीनस्याप्यपरोक्षत्वं न सम्भवति। बिम्बरूपस्येश्वरस्य जीवादौपाधिकभेदसत्त्वेन जीवं प्रति जीवान्तरचैतन्यस्येव अपरोक्षत्वायोगात्। अतो जीवभावापन्नब्रह्माभिप्रायो मन्त्रगतसाक्षिप्रतिपादकभाग इति भावः। ऐश्वररूपभेदस्यापरोक्षत्वानुपपत्तिरूपहेतुः मन्त्रस्त्विति तुशब्देनोक्त इति ध्येयम्। ननु-गुहाधिकरणे यथा 'गुहां प्रविष्टौ' [क. उ. ३-१] इति मन्त्रो जीवेश्वरोभयपरः तथा 'द्वा सुपर्णा' [मु. उ. ३-१-३] इति मन्त्रोऽपि जीवेश्वरोभयपर इत्युक्तं भाष्ये। तथा 'च द्वासुपर्णा' इति मन्त्रे 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति वाक्यं जीवविषयं 'अनश्नन्नन्योऽभिचाकशीति' इति वाक्यं परमेश्वरविषयमिति पर्यवस्यति। ततश्च जीवस्य साक्षित्वमिति पक्षे ईश्वरस्य साक्षित्वप्रतिपादकेन 'अनश्नन्नन्यः' इति मन्त्रभागेन विरोधः—इत्याशङ्क्याह—**द्वा सुपर्णेति मन्त्र इति**। यदा मन्त्रः जीवेश्वरोभयपरः, तदापि न विरोधः कश्चित्। 'एको देवः' इति मन्त्रवत् 'द्वा सुपर्णा' इति मन्त्रस्यापि जीवभावापन्नपरमात्मपरत्वाभ्युपगमादित्यर्थः। ननु—गुहाधिकरणभाष्ये पैङ्गिरहस्यब्राह्मणमुदाहृतम्। तच्चेदं ब्राह्मणं—'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वम्, अनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञः, तावेतौ सत्वक्षेत्रज्ञौ' इति। अनेन ब्राह्मणेन अदनवाक्यमन्तःकरणविषयं अनशनवाक्यं क्षेत्रज्ञविषयं इति व्याख्यातम्। न च ब्राह्मणेनैव

प्रकारेण जीवान्तःकरणोभयपरो वा, इति न कश्चिद्विरोधः-इत्याहुः ।

[1]अन्ये तु - सत्यं जीव एव साक्षी, न तु सर्वगतेन अविद्योपहितेन रूपेण । पुरुषान्तरान्तःकरणादीनामपि पुरुषान्तरं प्रति स्वान्तःकरणभासकसाक्षिसंसर्गाविशेषेण प्रत्यक्षत्वापत्तेः । न चान्तःकरणभेदेन प्रमातृभेदात्तदनापत्तिः । साक्षिभास्येऽन्तःकरणादौ सर्वत्र साक्ष्यभेदे सति प्रमातृभेदस्याप्रयोजकत्वात् । तस्मादन्तःकरणोपधानेन जीवः साक्षी । तथा च प्रतिपुरुषं

सत्वक्षेत्रज्ञपरत्वेन मन्त्रे व्याख्यायमाने कथं भाष्यकारैरस्य मन्त्रस्य जीवेश्वरपरत्वमुक्तमिति वाच्यम् । तदुक्तेः कृत्वाचिन्तामात्रत्वेन विरोधाभावात् । तथा चान्तःकरणप्रतिबिम्बरूपो जीवो यदि पैङ्गिब्राह्मणाभिमतः क्षेत्रज्ञः स्यात्, तदा तस्यैवानश्नन्निति वाक्योक्तं साक्षित्वं स्यात्, नाविद्याप्रतिबिम्बस्य । तथा चाविद्याप्रतिबिम्बरूपस्य ब्रह्मस्वभावस्य जीवस्य साक्षित्वपक्षः पैङ्गिब्राह्मणनिर्णीतार्थकद्वासुपर्णेतिमन्त्रभागविरुद्धः प्रसज्येत—इत्याशङ्क्याह—**गुहाधिकरणभाष्योदाहृतेति । न कश्चिद्विरोध इति ।** पैङ्गिब्राह्मणाभिप्रेतः क्षेत्रज्ञो नान्तःकरणगतचैतन्यप्रतिबिम्बरूपो जीवः । तस्य कर्तृभोक्तृस्वभावत्वेन अनश्नन्निति वाक्योक्तसाक्षित्वासम्भवात् । किं तु [2]असङ्गोदासीनप्रकाशरूपः अविद्याप्रतिबिम्बरूपजीव एव ब्राह्मणाभिप्रेतः क्षेत्रज्ञः । तस्यानशनवाक्योक्तसाक्षित्वसम्भवस्योपपादितत्वात् । अतः अविद्याप्रतिबिम्बरूपजीवस्य साक्षित्वपक्षे न पैङ्गिरहस्यब्राह्मणानुरोधिमन्त्रविरोध इत्यर्थः ।

अविद्यायां चैतन्यप्रतिबिम्बरूपजीवस्यैव साक्षित्वमुपेत्य तत्र कश्चिद्विशेषं वक्तुं मतान्तरमवतारयति—**अन्ये त्विति ।** न त्वविद्यायां चिद्बिम्बभूतेश्वरःसाक्षी, तस्यापरोक्षत्वानुपपत्तेरित्येवकाराभिप्रायः । **रूपेणेति ।** साक्षीत्यनुषङ्गः । सर्वशरीरसाधारणाविद्योपाधिकस्य साधारणरूपेण साक्षित्वाभावे हेतुमाह—**पुरुषान्तरेति ।** यज्ञदत्तान्तःकरणतद्वृत्तीनामित्यर्थः । **पुरुषान्तरं प्रतीति ।** देवदत्तं प्रतीत्यर्थः । **स्वेति ।** स्वस्य देवदत्तस्यान्तःकरणभासको यस्साक्षी तेन साक्षिणा सह देवदत्तान्तःकरणस्येव यज्ञदत्तान्तःकरणादीनामपि संसर्गाविशेषाद्देवदत्तस्य यथा स्वान्तःकणं प्रत्यक्षं तथा यज्ञदत्तान्तःकरणतद्वृत्तयोऽपि देवदत्तस्य प्रत्यक्षाःस्युरित्यर्थः । अत्र पुरुषान्तरं प्रति पुरुषान्तरान्तःकरणादीनामपि प्रत्यक्षत्वापत्तेरिति सम्बन्धः । तत्र हेतुः स्वान्तःकरणेत्यादिः इति विभागः । सर्वशरीरेषु साक्षिण एकत्वेऽपि प्रतिशरीरं प्रमातृभेदान्नोक्तदोष इत्याशङ्कते—**न चेति ।** देवदत्तं प्रति तदन्तःकरणादेः प्रत्यक्षत्वे हि देवदत्तसाक्षिसंसर्गः प्रयोजकः, तथा च यज्ञदत्तान्तःकरणादीनामपि देवदत्तं प्रत्यपरोक्षत्वप्रयोजकस्य देवदत्तसाक्षिसंसर्गस्याविशेषेण तं प्रत्यपरोक्षत्वापादनात्मको दोषः प्रत्यक्षत्वप्रयोजकसाक्षिसंसर्गभेदेनैव परिहर्तव्यः, नाप्रयोजकप्रमातृभेदेन - इति दूषयति—**साक्षिभास्य इति । साक्ष्यभेदे इति ।** साक्षिण एकत्वे सतीत्यर्थः । **अप्रयोजकत्वादिति ।** देवदत्तं प्रति तदीयान्तःकरणादिकमेव प्रत्यक्षं नान्यदीयान्तःकरणादिकमिति व्यवस्थायामिति शेषः । **तस्मादिति ।** अविद्योपाधिकजीवस्य साधारणरूपेण

---

1. अन्ये—आश्रमस्वामिनः । 2. असङ्गेति—साक्षित्वविरोधिसङ्गशून्येत्यर्थः ।

साक्षिभेदात् पुरुषान्तरान्तःकरणादेः पुरुषान्तरसाक्ष्यसंसर्गाद्वा तदयोग्यत्वाद्वा अप्रकाश उपपद्यते। सुषुप्तावपि सूक्ष्मरूपेणान्तःकरणसद्भावात् तदुपहितः साक्षी तदाप्यस्त्येव। न च-अन्तःकरणोपहितस्य प्रमातृत्वेन न तस्य साक्षित्वं, सुषुप्तौ प्रमात्रभावेऽपि साक्षिसत्त्वेन तयोर्भेदश्च अवश्यं वक्तव्यः- इति वाच्यम्। विशेषणोपाध्योर्भेदस्य सिद्धान्तसम्मतत्वेन अन्तःकरणविशिष्टः प्रमाता तदुपहितः साक्षी इति भेदोपपत्तेः - इत्याहुः।

साक्षित्वासम्भवादित्यर्थः। **तथा चेति**। साक्षिभेदप्रयोजकोपाधिभेदविवक्षायां सत्यामित्यर्थः। **तदयोग्यत्वाद्वेति**। पुरुषान्तरं प्रत्ययोग्यत्वकल्पनाद्वा प्रत्यक्षत्वाभाव उपपद्यते इत्यर्थः। ननु-अविद्याप्रतिबिम्बरूपजीवस्य अविद्योपाधिकत्वेनैव रूपेण साक्षित्वे सति तस्य सुषुप्तिसाधारण्यं सम्भवति, प्रतिशरीरं साक्षिभेदसिद्ध्यर्थं तस्यान्तःकरणोपहितत्वेन रूपेण साक्षित्वे तु सुषुप्तिसाधारण्यं तस्य न सम्भवति सुषुप्तावन्तःकरणलयश्रवणात्, इत्याशङ्क्याह—**सुषुप्तावपीति**। शङ्कते—**न चान्तःकरणोपहितस्येति**। अविद्याप्रतिबिम्बरूपजीवस्येति शेषः। **न तस्येति**। अन्तःकरणोपहितजीवस्य साक्षित्वं न सम्भवति, तस्य प्रमातृत्वात्, अन्यथा प्रमातुरेव साक्षित्वापत्त्या साक्षिप्रमात्रोर्भेदो न स्यादिति भावः। इष्टापत्तिमाशङ्क्याह—**सुषुप्ताविति। प्रमात्रभावेऽपीति**। 'अथास्मिन् प्राण एवैकधा भवति [कौ.उ. ३-३] इति श्रुतौ सुषुप्तिकाले प्राणशब्दिते परमात्मनिएकीभावलक्षणस्य प्रमातृलयस्य श्रवणादिति भावः। **साक्षिसत्त्वेनेति**। सुषुप्तिकाले साक्षिणस्सत्त्वमवश्यं वाच्यम्। तत्काले तत्सत्त्वस्य 'त्रिषु धामसु' [कै. उ. १८] इत्यादिबहुश्रुतिसिद्धत्वात्। धामसु-अवस्थासु इत्यर्थः। तत्काले साक्षिणाऽनुभूतानामज्ञानसुखसुषुप्तीनां उत्थितस्य 'न किंचिदवेदिषं सुखमस्वाप्सम्' इति स्मरणदर्शनाच्च। न च 'अहमस्वाप्सम्' इति स्वापादिवदहमर्थस्य प्रमातुरपि सुषुप्तिकालीनत्वेन स्मरणदर्शनात् तस्यापि तदा सत्त्वं वाच्यमेवेति वाच्यम्। सुषुप्तौ प्रमातृलयप्रतिपादकबहुश्रुतिविरोधेन 'अहमस्वाप्सम्' इत्यादिस्मरणस्य अहमर्थांशे अनुभवरूपत्वकल्पनात् न प्रमातुः तदा सत्त्वमावश्यकम्। तथा च सुषुप्तिकाले सदसतोस्साक्षिप्रमात्रोरभेदायोगात् प्रमातुस्सकाशात् साक्षी भिन्न एव वाच्य इत्यर्थः। प्रमातृसाक्षिणोरभेदपक्षे प्रमातुरुदासीनत्वाभावेन साक्षित्वासम्भवरूपदोषसङ्ग्रहार्थश्चकार इति बोध्यम्। न च वाच्यमित्यत्र हेतुमाह—**अन्तःकरणविशिष्ट इति**। अन्तःकरणस्याविद्योपाधिके जीवे विशेषणत्वेन प्रमातृत्वप्रयोजकत्वम्, उपाधित्वेन साक्षित्वप्रयोजकत्वम्। तथा च विशिष्टोपहितयोः प्रमातृसाक्षिणोर्भेदः, विशिष्टस्य प्रमातुः कर्तृभोक्तृस्वभावत्वेऽपि उपहितस्योदासीनत्वात् साक्षित्वं सम्भवतीत्यर्थः। ननु—विशेषणत्वस्य उपाधित्वस्य च भेदे सति एकस्याप्यन्तःकरणस्य विशेषणत्वादिरूपेण भेदं कल्पयित्वा तद्विशिष्टस्य प्रमातृत्वं तदुपहितस्य साक्षित्वमिति व्यवस्था सिद्ध्यति, तयोर्भेद एव कथमिति, अत आह—**विशेषणोपाध्योरिति**। कार्यान्वयित्वे सति व्यावर्तकत्वं विशेषणत्वम्। यथा 'नीलोत्पलमानय' इत्यादौ नैल्यस्य। तस्य रक्तोत्पलादिव्यावर्तकत्वात् उत्पलद्वारा आनयनरूपकार्यान्वयित्वाच्च। लक्षणे कार्यपदं विधेयपरम्। तथा च 'यत् काकवत् तत् देवदत्तगृहम्', इत्यादौ विधेयस्य

साक्षिचैतन्यस्य आवृतत्वानावृतत्वविचारः

ननु - उक्तरूपस्य साक्षिणः चैतन्यमात्रावारकेणाज्ञानेनावरणमवर्जनीयमिति कथमावृतेना-

---

देवदत्तगृहत्वस्य कार्यस्य उपलक्षणे काके नास्त्यन्वयः, गृहान्तरव्यावर्तकत्वं त्वस्तीति तत्रातिव्याप्तिवारणाय सत्यन्तम्। कार्यान्वयिनि विशेष्ये उत्पलादौ अतिव्याप्तिवारणाय विशेष्यदलम्। कार्यानन्वयित्वे सति व्यावर्तकत्वे सति कार्यान्वयकाले विद्यमानत्वं उपाधित्वम्। यथा 'लोहितस्फटिकमानय' इत्यादौ स्फटिकसन्निहितस्य जपाकुसुमस्य उपाधित्वम्, तस्य आनयनलक्षणकार्यान्वयाभावात् स्फटिकान्तरव्यावर्तकत्वात् आनयनान्वयकाले विद्यमानत्वाच्च। तत्र प्रथमसत्यन्तं विशेषणे नैल्यादावतिव्याप्तिवारणाय। न च विशेषणत्वेनाभिमतनैल्यादिकमप्यत्र लक्ष्यमेवेति वाच्यम्। जपाकुसुमादावुपाधित्वव्यवहारवत् नैल्यादौ तथाव्यवहाराभावात्, जपाकुसुमादौ स्फटिकादिविशेषणत्वव्यवहाराभावाच्च। तथा च विशेषणोपाध्योर्भेदावश्यंभावे सति विशेषणत्वाभिमतनैल्यादेरलक्ष्यत्वात् तत्रातिव्याप्तिवारणं युक्तमेव। 'काकवत् गृहं प्रविश' इत्यत्र प्रवेशरूपकार्यान्वयकाले यदि दैवयोगादुपलक्षणभूतकाकस्यान्यत्र गमनं, काकान्तरस्य तद्गृहे आगमनं, तदा तत्रागतकाकस्य पूर्वस्थितकाकवद्व्यावर्तकत्वं नास्ति। तथा च तत्रागतकाके प्रवेशानन्वयिनि विद्यमाने उपाधित्वरहिते अतिव्याप्तिवारणाय द्वितीयसत्यन्तम्। उक्तस्थल एव उपलक्षणीभूतकाके अतिव्याप्तिवारणाय विशेष्यदलम्। न च यत्र उपलक्षणीभूतकाकस्यैव कार्यकालेऽपि दैवात् विद्यमानत्वं तत्रोपलक्षणकाके कृत्स्नं लक्षणमस्तीत्यतिव्याप्तिरिति वाच्यम्। कार्यकाले नियमेन विद्यमानत्वस्य विवक्षितत्वात्। नन्वेवमपि 'लोहितस्फटिकमानय' इत्यत्र क्वचित् वाक्यश्रवणकाले सत एव जपाकुसुमस्य स्फटिकानयनकाले दैवादविद्यमानत्वसम्भवात् जपाकुसुमस्यापि कार्यकाले विद्यमानत्वनियमो नास्तीति चेत्, तर्हीदं लक्षणं श्रोत्रत्वोपाधिकर्णशष्कुल्यां अन्तःकरणादौ च विवक्षितमस्तु। जपाकुसुमस्य अन्यस्य वा तत्तुल्यस्य स्वनिष्ठधर्मासञ्जकत्वरूपं प्रसिद्धमेवोपाधित्वमस्तु। न चाननुगमः। स्वनिष्ठेत्यादिलक्षणोपाधित्वस्य [1]प्रसिद्धोपाधौ कर्णवलये बिम्बप्रतिबिम्बभेदपक्षे दर्पणादौ स्वोपहितबिम्बमुखे स्वधर्मानासञ्जके च बाधितत्वेन तत्सङ्ग्राहकलक्षणान्तरकरणस्यावश्यकतया तस्यादोषत्वात्। अनुगतलक्षणसम्भवे हि [2]तस्य दोषत्वं प्रसिद्धम्। तथा च प्रकृतेऽन्तःकरणस्य उभयविधोपाधित्वसम्भवात् 'कार्यानन्वयित्वे सति' इत्यादिलक्षणानुरोधेन अन्तःकरणोपहितो जीवः साक्षी इत्युपगमे साक्षित्वं जीवचैतन्यमात्रनिष्ठं पर्यवस्यति। जीवचैतन्यमात्रं तु उदासीनमेवेति नोपहितस्य साक्षित्वानुपपत्तिः न वा प्रमातृसाक्षिणोः साङ्कर्यमिति संक्षेपः।

अविद्याहङ्कारादीनां पूर्वोक्तं साक्षिभास्यत्वमाक्षिपति—**नन्विति**। **चैतन्यमात्रेति**। कृत्स्नचैतन्यावारकेणेत्यर्थः। **कथमिति**। न च साक्षिगोचरापरोक्षवृत्त्या तदावरणनिवृत्तौ निवृत्तावरणेन साक्षिणा

---

1. प्रसिद्धोपाधौ कर्णवलये दर्पणादौ च बाधितत्वेन इति संबन्धः। प्रसिद्धोपाधौ—उपाधित्वेन प्रामाणिकव्यवहारविषये। इदं च कर्णवलयस्य दर्पणादेश्च विशेषणम्।

2, तस्येति—अननुगमस्येत्यर्थः।

विद्याहङ्कारादिभानं - इति चेत्—

राहुवदविद्या स्वावृतप्रकाशप्रकाश्येति केचित्।

वस्तुतः अविद्यान्तःकरणतद्धर्मावभासकं साक्षिचैतन्यं विहायैव अज्ञानं चैतन्यमावृणोतीति अनुभवानुसारेण कल्पनात् न कश्चिद्दोषः। अत एव सर्वदा तेषां अनावृतप्रकाशसंसर्गात् अज्ञान-विपरीतज्ञानसंशयागोचरत्वम्।

साक्षिचैतन्यस्यानावृतत्वे तत्स्वरूपभूतस्यानन्दस्यापि प्रकाशापत्तिरिति चेत्, न—इष्टापत्तेः,

---

अविद्यादिभानं सम्भवतीति वाच्यम्। तेषां [1]केवलसाक्षिभास्यत्वसिद्धान्तविरोधप्रसङ्गात्, मनसः करणत्वस्य निरसिष्यमाणतया साक्षिचैतन्यगोचरापरोक्षवृत्त्यसम्भवाच्च, अहङ्कारादीनां स्वसत्ताकाले तत्सत्ताप्रकारकसंशयाद्यभावेन सदा तेषां संशयादिनिवृत्तिप्रयोजकतया सदा प्रकाशसंससर्गे वक्तव्ये सति कादाचित्कवृत्त्या[2] तेषां सदा भाना-सम्भवाच्च, सदा साक्षिगोचरवृत्तिसन्तत्युपगमे युगपद्वृत्तिद्वयानभ्युपगमेन बाह्यघटादिप्रतीत्युच्छेदप्रसङ्गाच्च। तस्मात् साक्षिमात्रभास्यत्वमविद्याहङ्कारादीनां वक्तव्यम्। तच्च न सम्भवति। तस्यावृतत्वात्। न च साक्षिचैतन्यं विहाय अन्यदेव चैतन्यमावृतमिति वाच्यम्। अज्ञानस्य चैतन्यमात्रावारकत्वात्, अन्यथा साक्षिचैतन्यादन्यचैतन्ये-ऽप्यावरणाभावप्रसङ्गात् इत्याक्षेपाभिप्रायः।

आवृतस्यापि साक्षिणोऽविद्याप्रकाशकत्वं दृष्टान्तेन दर्शयन् परिहरति—**राहुवदिति।**

राहुणा सर्वात्मनाऽऽवृतस्य चन्द्रमण्डलादेः स्वावारकराहुमात्रप्रकाशकत्वेऽपि तदतिरिक्तप्रकाशकत्वादर्शनात् अत्राप्यावृतस्य साक्षिणः कथञ्चिदविद्यामात्रावभासकत्वं स्यात्, नाहङ्कारादिभासकत्वं इत्यस्वरसादाह—**वस्तुत इति। अनुभवानुसारेणेति।** अहङ्कारादिषु उक्तरीत्या कादाचित्कज्ञानासम्भवेऽपि सदा प्रकाशसंसर्ग-फलस्य संशयनिवृत्त्यादेः सत्त्वानुसारेणेत्यर्थः। अनुभवफलमेवोपदर्शयति—**अत एवेति।** अज्ञानस्य साक्षि चैतन्यं विहायैव आवारकत्वस्वभावकल्पनादेवेत्यर्थः। **अगोचरत्वमिति।** ननु अविद्यायाः भाव-रूपत्वादौ अहङ्कारस्यानात्मत्वादौ सुखदुःखादिवृत्तीनामनात्मधर्मत्वादौ अज्ञानविपरीतज्ञानसंशयानां सत्त्वेन तेषां सदा संशयाद्यगोचरत्वमसिद्धमिति चेत्, न—अविद्यादिसत्त्वकाले कदाचिदप्यविद्यादिसत्त्वप्रकारकाज्ञानाद्य-भावस्य विवक्षितत्वात्। तथा च तद्गतविशेषगोचराज्ञानविपरीतज्ञानादेरभ्युपगमेऽपि न दोष इति भावः।

शङ्कते—**साक्षिचैतन्यस्येति।** ननु इष्टापत्तेरिति वक्तुं न शक्यते, संसारदशायां स्वरूपानन्दप्रकाश-

---

1. केवलसाक्षीति। विषयाकारवृत्तिस्वाकारवृत्त्यन्यतरानपेक्षेत्यर्थः। एवं उत्तरत्र 'साक्षिमात्रे'त्यत्र मात्रशब्दार्थः।

2. कादाचित्कवृत्त्या—साक्षिगोचरवृत्त्या। प्रयुक्तत्वं तृतीयार्थः भानेऽन्वेति। उक्तवृत्त्या साक्षिगोचरावरण-भङ्गे अनावृतसाक्षिसंसर्गेण अविद्यादीनां भानात् उक्तवृत्तिप्रयुक्तत्वं उक्तभानस्य।

आनन्दरूपप्रकाशप्रयुक्तस्य आत्मनि निरुपाधिकप्रेम्णो दर्शनात्, 'भासत एव परमप्रेमास्पदत्वलक्षणं सुखं' इति विवरणाच्च।

स्यादेतत्—इदानीमप्यानन्दप्रकाशे मुक्तिसंसारयोरविशेषप्रसङ्गः। ननु कल्पितभेदस्य साक्ष्यानन्दस्य प्रकाशेऽपि अनवच्छिन्नस्य ब्रह्मानन्दस्यावृतस्य संसारदशायामप्रकाशेन विशेषोऽस्तीति चेत्, न—आनन्देऽनवच्छेदांशस्यापुरुषार्थत्वात्, आनन्दापरोक्षमात्रस्य च इदानीमपि

प्रयुक्तकार्यादर्शनात् इत्यत आह—**आनन्दरूपेति**। लोके हि तस्य तस्य अनुभूयमाने आनन्दे प्रीतिरनुभवसिद्धा। तथा च प्रीतेः प्रकाशमानानन्दविषयकत्वे सिद्धे प्राणिमात्रस्य स्वात्मनि[1] दुःखदशायामपि प्रीतिदर्शनात् आत्मगोचरप्रीतेरपि प्रकाशमानात्मानन्दविषयकत्वं सिद्ध्यति। पुत्रादिगोचरप्रीतिस्तावदौपाधिकी। उपाधिश्च [2]आत्मसुखाभिव्यक्तिसाधनत्वम्। उपाधिव्यतिरेकदशायां तेषु प्रीतेरदर्शनात्। आत्मनि तु प्रीतिर्निरुपाधिकी। पुत्रादिष्विव आत्मनि प्रीतेरन्यार्थत्वाभावात्। तथा च श्रुतिः- 'आत्मनस्तु कामाय सर्वं प्रियं भवति' [बृ.उ. २-४-५] तथा 'तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं' [बृ. उ. १-४-८] इति। अन्तरतरमित्यनेन सर्वान्तरमुच्यते। तथा च यत् सर्वान्तरमात्मचैतन्यं तत् एतत्- अपरोक्षं प्रीतिविषयत्वेन सम्भावितात् पुत्रादेस्सर्वस्मात् अतिशयेन प्रियं इति द्वितीयश्रुत्यर्थः। तथा च आत्मानन्दो यदि न प्रकाशेत तदा आत्मनि श्रुत्यनुभवसिद्धा निरुपाधिकप्रीतिर्न स्यात्। प्रीतेः प्रकाशमानानन्दविषयकत्वनियमात्। अतः साक्ष्यानन्दप्रकाशापादने इष्टापत्त्यभिधानं युक्तमेव। उक्तार्थे वृद्धसम्मतिमप्याह—**भासत एवेति**। परमप्रेमास्पदत्वं-परमप्रेमविषयत्वं, तत् लक्षणं यस्य सुखस्य तत्तथा। सुखं भासत एव, परमप्रेमास्पदत्वात्, अन्यथा तन्न स्यात् इत्येवकाराभिप्रायः। तच्च सुखं साक्षिचैतन्याभिन्नमिति स्वरूपानन्दप्रकाशे सम्मतिर्भवत्येव।

संसारदशायां स्वरूपानन्दस्फुरणाभ्युपगमे बाधकमाशङ्कते—**स्यादेतदित्यादिना तस्मात्साक्ष्यानन्दस्यानावृतत्वकल्पनमयुक्तमित्यन्तेन**। सिद्धान्ती विशेषं शङ्कते—**नन्विति**। अविद्यायामानन्दप्रतिबिम्बस्साक्ष्यानन्दः। तस्य बिम्बभूतानन्दात् भेदः कल्पितः। तथा च संसारदशायामनावृतसाक्ष्यभिन्नप्रतिबिम्बानन्दप्रकाशेऽपि बिम्बभूतब्रह्मानन्दो न प्रकाशते। तथा प्रकाशमानोऽपि साक्ष्यानन्दः प्रतिशरीरं भिन्न एव प्रकाशते न त्वनवच्छिन्न इति विशेषोऽस्तीत्यर्थः। बिम्बभूतब्रह्मानन्दाप्रकाशे हेतुः—**आवृतस्येति**। अत्र यद्यपि मूलाज्ञानं शुद्धचिन्मात्राश्रयं तद्विषयकं च, न तु बिम्बभूतेश्वरविषयकम्, तस्यानावृतत्वेऽपि जीवापेक्षया कल्पितभेदवत्त्वात् तस्य जीवं प्रति अप्रकाशमानत्वं सम्भवति, तथा मुक्तौ बिम्बभूतब्रह्मानन्दस्फुरणमप्यसिद्धम्, मूलाज्ञाननिवृत्तौ तत्प्रयुक्तप्रतिबिम्बभावस्येव बिम्बभावस्यापि निवृत्त्यवश्यम्भावात्; तथापि पूर्वपक्षिमुखपिधानमात्रे सिद्धान्तिनस्तात्पर्यमिति बोध्यम्। किमनवच्छिन्नानन्दस्फुरणं मोक्षे विशेषः, आनन्दस्फुरणमात्रं वा।

---

1. स्वात्मनि प्रीतिदर्शनात् इति सम्बन्धः।
2. आत्मसुखेति-आत्मरूपसुखेत्यर्थः।

सत्त्वात्। ननु—अवच्छिन्नः साक्ष्यानन्दः सातिशयः, सुषुप्तिसाधारणादनतिस्पष्टात्ततो वैषयिकानन्देष्वतिशयानुभवात्। अनवच्छिन्नो ब्रह्मानन्दस्तु निरतिशयः। आनन्दवल्ल्यां मानुषानन्दाद्युत्तरोत्तरशतगुणोत्कर्षोपवर्णनस्य ब्रह्मानन्दे समापनात्—इति चेत्, न-सिद्धान्ते साक्ष्यानन्दविषयानन्दब्रह्मानन्दानां वस्तुत एकत्वेन उत्कर्षापकर्षासम्भवात्। मानुषानन्दादीनामुत्तरोत्तर-

---

उभयथाऽपि विशेषो वक्तुं न शक्यत इत्याह पूर्ववादी—**नेति**। अवच्छेदो हि भेदः। स च आत्मनि कल्पितः। तथा च अवच्छेदाभावो यद्यानन्दादतिरिक्तः तदा दोषमाह—**अनवच्छेदांशस्येति**। यद्यानन्द एव, कल्पिताभावस्याधिष्ठानात्मकत्वात्, तदाऽस्य द्वितीयप्रकार एवान्तर्भाव इति मत्वा तं प्रकारं दूषयति-**आनन्दापरोक्षमात्रस्य चेति**। तथा च न मुक्तिसंसारयोर्विशेष इति भावः। सिद्धान्ती प्रकारान्तरेण विशेषमाशङ्कते—**नन्ववच्छिन्न इति**। प्रतिशरीरमवच्छिन्नत्वेन प्रकाशमानः साक्ष्यानन्दः सातिशयः - उत्कर्षापकर्षरूपातिशयवानित्यर्थः। साक्ष्यानन्दस्यातिशयवत्त्वे हेतुमाह—**सुषुप्तिसाधारणादित्यादिना**। स्पष्टता-उत्कर्षः। अतिस्पष्टता—अत्युत्कर्षः। सुषुप्तिकाले प्रकाशमानोऽपि साक्ष्यानन्दः स्पष्ट एव। इतरथा तस्य 'सुखमस्वाप्सम्' इति परामर्शनीयत्वाभावप्रसङ्गात्। लोके हि य आनन्दः स्पष्टमनुभूतः स एव पुनः परामर्शयोग्यः न त्वनुभूतानन्दमात्रमिति प्रसिद्धम्। तथा च ततः-साक्ष्यानन्दात् सुषुप्तावतिस्पष्टतारहितात् स्रक्चन्दनादिविषयप्रयुक्तानन्देषूत्कर्षविशेषानुभवादित्यर्थः। **अनवच्छिन्न इति**। कल्पितावच्छेदाभावात्मा ब्रह्मानन्दो मुक्तिकाले प्रकाशमानः अतिशयसामान्यरहित एव इत्यक्षरार्थः। मुक्तौ ब्रह्मानन्द एकरूपेण पूर्णतया च प्रकाशते। इदानीं तादृशब्रह्मानन्दप्रकाशो नास्ति, किं तु उत्कर्षापकर्षोपेतानन्दप्रकाश एवास्ति। अतस्स्वरूपानन्दस्फुरणेऽपि तत्तदुत्कृष्टानन्दाभिलाषरूपपिशाचीग्रस्ततया कस्यापि [1]निर्वृतिर्नास्तीति संसारमोक्षयोर्विशेष इति भावः। अविद्याप्रतिबिम्बरूपसाक्ष्यानन्दस्य लोके विषयानन्दत्वेन गृहीतस्य सातिशयत्वे ब्रह्मानन्दस्यैकरूपत्वे च श्रुतिं प्रमाणयति—**आनन्दवल्ल्यामिति**। मानुषानन्दः-सार्वभौमानन्दः। स च शतगुणितस्सन् मनुष्यगन्धर्वानन्दो भवति। सोऽपि शतगुणितस्सन् देवगन्धर्वानन्दो भवति। एवमेव पित्रानन्दादिषु 'स एको ब्रह्मण आनन्दः' [तै.उ. २-८] इत्युक्तहिरण्यगर्भानन्दान्तेषु उत्कर्षापकर्षयोरुपवर्णनं योजनीयम्। **समापनादिति**। 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' [तै.उ. २-८] इति वाक्येनेति शेषः। पुरुषो मनुष्यः। आद्यचकारस्तिर्यगादिसङ्ग्रहार्थः। आदित्यपदं मण्डलाभिमानिदेवतापरम्। द्वितीयचकारस्तदितरसकलदेवतासङ्ग्रहार्थः। तथा च देवमनुष्यतिर्यक्षु सर्वत्र विद्यमानो ब्रह्मानन्दः एकः एकरूप एव, न तु साक्ष्यानन्दवत् सातिशय इति श्रुत्यर्थः। साक्ष्यानन्दविषयानन्दब्रह्मानन्दानां सति भेदे उक्तरीत्या मुक्तिसंसारयोर्विशेषो वक्तुं शक्यते। स एव तवासिद्ध इति पूर्ववादी दूषयति—**नेति**। **असम्भवादिति**। उत्कर्षापकर्षयोर्जातिविशेषरूपयोः एकस्यां व्यक्तावसम्भवादित्यर्थः। नन्वानन्दव्यक्तेर्वस्तुगत्या एकत्वेऽपि कल्पितभेदवत्यां तस्यां उत्कर्षादिस्सम्भवतीत्यभिसन्धिमान्

---

1. निर्वृतिः—कृतकृत्यता

मुत्कर्षं श्रुतिर्वदतीति चेत्, को वा ब्रूते श्रुतिर्न वदतीति, किं तु अद्वैतवादे तदुपपादनमशक्यमित्युच्यते। नन्वेकस्यैव सौरालोकस्य करतलस्फटिकदर्पणाद्यभिव्यञ्जकविशेषोपधानेनाभिव्यक्तितारतम्यदर्शनात् एकत्वेऽप्यानन्दस्य अभिव्यञ्जकसुखवृत्तिभेदोपधानेनाभिव्यक्तितारतम्यरूपमुत्कर्षापकर्षवत्त्वं युक्तमिति चेत्, न—दृष्टान्तासम्प्रतिपत्तेः। सर्वतः प्रसृमरस्य सौरालोकस्य गगने विना करतलादिसम्बन्धं अस्पष्टं प्रकाशमानस्य निम्नतले प्रसृमरस्य जलस्येव करतलसम्बन्धेन गतिप्रतिहतौ बहुलीभावादधिकप्रकाशः, भास्वरदर्पणादिसम्बन्धेन गतिप्रतिहतौ बहुलीभावात्तदीयदीप्तिसंवलनाच्च ततोऽप्यधिकप्रकाशः, इति तत्राभिव्यञ्जकोपाधिकाभिव्यक्तितारतम्यानभ्युपगमात्। दृष्टान्तसम्प्रतिपत्तौ च गगनप्रसृतसौरालोकवत् अनवच्छिन्नानन्दस्यास्पष्टता, करतलाद्यवच्छिन्न-

सिद्धान्ती शङ्कते—**मानुषानन्दादीनामिति**। अनुभवानुसारिश्रुतिसिद्धानन्दोत्कर्षादेरपलापकरणमयुक्तं पूर्ववादिन इत्यर्थः। अभिसन्धिमविद्वानिव पूर्ववादी दूषयति—**को वेति**। का तर्ह्यनुपपत्तिरिति सिद्धान्ती शङ्कते—**किं त्विति**। तामाह—**अद्वैतवाद इति**। आनन्दैकत्वमते इत्यर्थः। **अशक्यमिति**। औपाधिकभेदेनापि तदुपपादनमशक्यम्, अनुरूपदृष्टान्ताभावात्, इति पूर्ववादिनोऽप्यभिसन्धिः। एकस्यामप्यानन्दव्यक्तौ औपाधिकभेदेन श्रुत्यनुभवसिद्धानन्दोत्कर्षादेरुपपादनं कर्तुं शक्यमिति स्वाभिसन्धिमुद्घाटयन् सिद्धान्ती शङ्कते—**नन्वेकस्यैवेति**। आलोकस्य करतलादिसम्बन्धरहितस्य या अभिव्यक्तिः तदपेक्षया करतले ईषदधिका अभिव्यक्तिः तदपेक्षया स्फटिके अधिका अभिव्यक्तिः तदपेक्षयाप्यधिका दर्पणादावभिव्यक्तिरनुभवसिद्धा, तद्वत् प्रकृतेऽपि स्वरूपानन्दव्यञ्जकवृत्तितारतम्येन तत्तद्वृत्त्युपहितसाक्ष्यानन्दे उत्कर्षादिकमुपपद्यते इत्यर्थः। यद्यालोक एक[1] एकरूपश्च स्वतो भवेत् तदा तथाविधस्वरूपानन्दस्य दृष्टान्तो भवेत्। न त्वालोकस्यैकव्यक्तित्वमस्ति, तस्य नानाकिरणसमूहरूपत्वात्। नाप्येकरूपत्वं तस्यास्ति, तत्रतत्र सौरकिरणानां अल्पत्वबाहुल्यरूपनानारूपत्वावगमात् - इति पूर्ववादी स्वाभिसन्धिं उद्घाटयन् दूषयति—**नेति**। **असम्प्रतिपत्तेरिति**। ममासम्मतत्वादित्यर्थः। **प्रसृमरस्येति**। गमनशीलस्येत्यर्थः। **गतिप्रतिहताविति**। सूर्यकिरणानां गतिप्रतिबन्धे सतीत्यर्थः। अत एव यत्र भूभागे करतलादिकृतप्रतिबन्धवशात् सूर्यकिरणा न प्रसरन्ति तत्र तमोरूपा छाया दृश्यते। आलोकस्य गतिप्रतिहत्या बहुलीभावे दृष्टान्तमाह—**निम्नतल इति**। यथा निम्नतले प्रसृमरस्य जलस्य करतलसम्बन्धेन गतिप्रतिहतौ जलस्य बहुलीभावः तथेत्यर्थः। **अधिकेति**। करतलादिसम्बन्धरहितगगने यः आलोकस्यास्फुटं प्रकाशः तदपेक्षया अधिकेत्यर्थः। **तदीयदीप्तिसंवलनादिति**। दर्पणादेर्या दीप्तिः-प्रभा तया मिश्रणादित्यर्थः। **ततोऽपीति**। करतलगतप्रकाशादपीत्यर्थः। **तत्रेति**। एकरूपस्यालोकस्य उपाधितारतम्यकृताभिव्यक्तितारतम्यासम्प्रतिपत्तेर्न तस्य दृष्टान्तत्वं सम्भवतीत्यर्थः। उक्तदृष्टान्ताङ्गीकारे सिद्धान्तिनो बाधकमप्याह—**दृष्टान्तसम्प्रतिपत्तौ चेति**। **मुक्तित इति**। तथा

1. एक इति। एकव्यक्तिरित्यर्थः। केषुचित् कोशेषु तथैव पाठो दृश्यते। अत एव न त्वालोकस्य एकव्यक्तित्वं अस्ति' इत्यनुपदमेव अनुवादो दृश्यते। परन्तु सिद्धान्तकथनावसरे एकस्य एकरूपस्य स्वरूपानन्दस्य इत्येव अनूद्यते। तेन एकः एकरूपश्चेति पाठः साधीयान्।

सौरालोकवत् सुखवृत्त्यवच्छिन्नानन्दस्याधिकाभिव्यक्तिरिति मुक्तितः संसारस्यैव अभ्यर्हितत्वापत्तेश्च। एतेन-संसारदशायां प्रकाशमानोऽप्यानन्दो मिथ्याज्ञानतत्संस्कारविक्षिप्ततया तीव्रवायुविक्षिप्तप्रदीपप्रभावदस्पष्टं प्रकाशते, मुक्तौ तदभावात् यथावदवभासते इत्यपि—निरस्तम्। निर्विशेषस्वरूपानन्दे प्रकाशमाने तत्र विक्षेपदोषादप्रकाशमानस्य मुक्त्यन्वयिनोऽतिशयस्य असम्भवात्। तस्मात् साक्ष्यानन्दस्यानावृतत्वकल्पनमयुक्तम्।

अत्राहुः अद्वैतविद्याचार्याः—यथा अत्युत्कृष्टस्य एकस्यैव धवलरूपस्य मालिन्यतारतम्ययुक्तेषु अनेकेषु दर्पणेषु प्रतिबिम्बे सति उपाधिमालिन्यतारतम्यात् तत्रतत्र प्रतिबिम्बे धावल्यापकर्षः

च सिद्धान्ते मुक्तिमुद्दिश्य तत्साधनेषु कस्यापि प्रवृत्तिर्न स्यादिति भावः। मुक्तिसंसारयोरविशेषप्रसङ्गचोद्ये समाधानप्रकारविशेषोऽपि वक्ष्यमाणहेतुना निरस्त इत्याह पूर्ववादी—**एतेनेति**। अनात्मनि देहादावात्मत्वज्ञानं वस्तुत आत्मसम्बन्धशून्ये देहादावात्मीयत्वज्ञानं च मिथ्याज्ञानम्। तच्च जाग्रदादिकाले स्वरूपानन्दस्य प्रकाशमानस्यापि विक्षेपकं—अस्पष्टतापादकं, मिथ्याज्ञानजन्यसंस्कारश्च सुषुप्तौ प्रकाशमानस्याप्यानन्दस्य विक्षेपकः-[1]पुरुषार्थत्वविघटकः। भोगप्रदकर्मविशेषेण उद्बोधितमिथ्याज्ञानसंस्कारवशादेव हि सर्वो जन्तुस्सौषुप्तमानन्दानुभवं परित्यजति। ततश्च सौषुप्तानन्दप्रकाशस्याध्रुवस्य मुमुक्ष्वभिलषितत्वाभावात् अपुरुषार्थत्वमिति भावः। दृष्टान्ते प्रभायास्सावयवत्वात् तीव्रवायुना केषाञ्चिदवयवानां नाशरूपाद्वा प्रभारूपगतभास्वरत्वस्य तेन प्रतिबन्धरूपाद्वा विक्षेपात् प्रकाशमानायामपि दीपप्रभायां अस्पष्टप्रकाशता उपपद्यते, अवयवगुणादिविशेषरहितस्य ब्रह्मानन्दस्य तु न तथा विशेष उपपद्यते—इत्याह—**निर्विशेषेति**। प्रकाशमाने इति सतिसप्तमी। तत्रेत्यधिकरणसप्तमी। **मुक्त्यन्वयिन इति**। मुक्तिदशायां प्रकाशमानस्येत्यर्थः। **अतिशयस्येति**। दृष्टान्त इव अवयवरूपस्य जातिविशेषरूपस्य वेत्यर्थः। **तस्मादिति**। मुक्तिसंसारयोरविशेषप्रसङ्गादित्यर्थः।

स्यादेतदित्यादिना प्राप्तं पूर्वपक्षं निराकरोति—**अत्राहुरित्यादिना**। एकस्य एकरूपस्य स्वरूपानन्दस्य अभिव्यक्तितारतम्येऽनुरूपं दृष्टान्तं वदन् स्वरूपानन्दे श्रुत्यनुभवसिद्धं तारतम्यशब्दोक्तमुत्कर्षापकर्षवत्त्वं उपपादयति—**यथेति**। **अत्युत्कृष्टस्येति**। धवलरूपाणां मध्ये सर्वोत्तमस्येत्यर्थः। **एकस्येति**। अनेन वक्ष्यमाणौ उत्कर्षापकर्षौ तत्र स्वतो न स्त इति सूचितम्। 'तत्रतत्र प्रतिबिम्बे' इत्येतानि पदानि [2]समानाधि-

---

1. पुरुषार्थत्वविघटकः—पुरुषार्थत्वविघटकत्वं पुषार्थत्वाभावापादकत्वम्।

अयं भावः-जाग्रत्स्वप्नयोः विक्षेपकत्वं अस्पष्टतापादकत्वं भवितुमर्हति, न सुषुप्तौ। तत्र स्पष्टं अवभासात्। तदुक्तं विवरणे—जागरणे तर्हि किमिति नावभासते। भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्। तीव्रवायुविक्षिप्तप्रदीपप्रभावत् मिथ्याज्ञानविक्षिप्ततया न स्पष्टमवभासते। सुषुप्तौ तु तदभावात् अधिकं व्यज्यते' इति। अतः सुषुप्तौ विक्षेपकत्वं पुरुषार्थत्वविघटकत्वरूपं व्याख्यातम्।

2. समानाधिकरणानि—अभिन्नार्थबोधकानि।

तारतम्येनाध्यस्यते, एवं वस्तुतो निरतिशयस्य एकस्यैव स्वरूपानन्दस्य अन्तःकरणप्रतिबिम्बिततया साक्ष्यानन्दभावे प्राक्तनसुकृतसंपत्त्यधीनविषयविशेषसंपर्कप्रयुक्तसत्त्वोत्कर्षापकर्षरूपशुद्धितारतम्ययुक्तसुखरूपान्तःकरणवृत्तिप्रतिबिम्बिततया विषयानन्दभावे च तमोगुणरूपोपाधिमालिन्यतारतम्यदोषात् अपकर्षःतारतम्येनाध्यस्यते इति संसारदशायां प्रकाशमानेऽप्यानन्दे अध्यस्तापकर्षतारतम्येन सातिशयत्वादतृप्तिः, विद्योदये निखिलापकर्षाध्यासनिवृत्तेः अरोपितसातिशयत्वापायात् कृतकृत्यता, इति विशेषोपपत्तेः निरुपाधिकप्रेमगोचरतया प्रकाशमानः साक्ष्यानन्दोऽनावृत एवेति।

करणानि। **धावल्यापकर्ष इति।** ईषन्मलिनदर्पणप्रतिबिम्बे अपकर्षोऽध्यस्यते। मध्यमविधमलिनदर्पणप्रतिबिम्बे च तदपेक्षया अधिकोऽपकर्षोऽध्यस्यते। अत्यन्तमलिनदर्पणप्रतिबिम्बेचात्यन्तापकर्षोऽध्यस्यते। ततश्च तादृशदर्पणेषु प्रतिबिम्बितं धवलरूपं तारतम्येनाभिव्यज्यते वस्तुत एकरूपमपि स्वरूपेण प्रकाशमानमपि इत्यर्थः। **अन्तःकरणेति।** सुषुप्तावप्यन्तःकरणं सूक्ष्मरूपेण तिष्ठतीति साक्ष्यानन्दस्य सुषुप्तिसाधारण्यं बोध्यम्। मतान्तरेषु तु अविद्यायां प्रतिबिम्बिततया साक्ष्यानन्दभावो द्रष्टव्यः। **आनन्दभाव इति।** प्राप्ते सतीति शेषः। सम्पत्तिः—परिपाकः-फलजननौन्मुख्यमिति यावत्। प्राक्तनसुकृतसम्पत्त्यधीनो यो विषयविशेषसम्पर्कः तत्प्रयुक्तौ यौ सत्त्वस्योत्कर्षापकर्षौ तद्रूपं यच्छुद्धितारतम्यं तद्युक्तासु सुखरूपास्वन्तःकरणवृत्तिषु प्रतिबिम्बिततया विषयानन्दभावे च प्राप्ते सतीत्यर्थः। वृत्तीनां स्वरूपसुखव्यञ्जकतया सुखरूपत्वमुक्तम्। एतदुक्तं भवति—पूर्वजन्मसु सम्पादितपुण्यकर्मपरिपाकवशात् अन्तःकरणस्य स्रक्चन्दनादिरूपविषयविशेषगोचरवृत्तिद्वारा विषयविशेषैः सह सम्बन्धे सति तद्गतसत्त्वगुणस्य उत्कृष्टविषयसम्बन्धादुत्कर्षो भवति। निकृष्टविषयसम्बन्धान्निकर्षो भवति। ततश्च अन्तःकरणगतसत्त्वांशपरिणामरूपाः वृत्तयः स्वरूपानन्दगोचरा जायन्ते। जायमानाश्च ताः उत्कर्षापकर्षोपेता एव जायन्ते। तास्वानन्दप्रतिबिम्बो विषयानन्द इत्युच्यते—इति। ननु - स्वरूपानन्दगोचरसत्त्ववृत्तिगतापकर्षवशात् प्रतिबिम्बरूपे विषयानन्दे अपकर्षाध्यासो वक्तव्यः। मलिनद्रव्यकृतदर्पणोपाधिनिष्ठापकर्षवशात् तत्प्रतिबिम्बे अपकर्षाध्यासदर्शनात्। तथा च स्वरूपानन्दगोचरासु वृत्तिषु सत्त्वगुणपरिणामभूतासु अपकर्षप्रयोजकं मलिनद्रव्यं किञ्चिदवश्यं वक्तव्यम्, साक्षाद्दर्पणसंयुक्तस्यैव मलिनद्रव्यस्य दर्पणेऽपकर्षाधायकत्वदर्शनात्—इत्यत आह—**तमोगुणरूपेति।** अन्तःकरणस्य सत्त्वरजस्तमोगुणात्मकत्वात्, तद्वृत्तिष्वपि तमोगुणरूपोपाधिरनुवर्तते, तत्कृतो यो मालिन्यतारतम्यदोषः - अपकर्षतारतम्यात्मको वृत्तिगतदोष इति यावत्, तस्माद्दोषात् अपकर्षः सत्त्ववृत्तिप्रतिबिम्बरूपे विषयानन्देऽध्यस्यते इत्यर्थः। पूर्वं विषयसम्पर्कः सुखरूपवृत्तिकारणत्वेन निर्दिष्टः। तत्र 'विषयविशेष' इति विशेषपदं विषयगतोत्कर्षतारतम्यपरम्। तत्तारतम्यं च सुखरूपवृत्तिगतोत्कर्षतारतम्यप्रयोजकत्वेन निर्दिष्टम्, इह तु सुखरूपवृत्तिष्वेवापकर्षप्रयोजकतया अपकर्षतारतम्यप्रयोजकतया च तारतम्योपेतं तमोगुणात्मकं मलिनद्रव्यं निर्दिष्टम्—इति विभागो बोध्यः। ततः किं तत्राह—**इति संसारदशायामिति।** प्रकाशमानेऽप्यानन्दे यत् अध्यस्तमपकर्षतारतम्यं तेन सातिशयत्वाद्विषयानन्दस्येत्यर्थः। तथा च

अन्ये तु प्रकाशमानोऽप्यानन्दः 'मयि नास्ति न प्रकाशते' इत्यावरणानुभवात् आवृत एव। एकस्मिन्नपि साक्षिणि अविद्याकल्पितरूपभेदसंभवेन चैतन्यरूपेणानावरणस्य आनन्दरूपे-

---

निकृष्टमानन्दमनुभवतः उत्कृष्टानन्दतृष्णाभिभूतस्य तत्सम्पादनाय प्रयतमानस्य तत्साधनत्वभ्रान्त्या कदाचित् दुःखसाधनेष्वपि प्रवर्तमानस्य देवमनुष्यतिर्यगादियोन्यापत्तिलक्षणो भवत्यनर्थ इति नास्ति निर्वृतिरित्यर्थः। **निवृत्तेरिति।** मूलाज्ञाननिवृत्तौ तत्कार्योपाधिनिवृत्त्या तत्कृतापकर्षाद्यध्यासनिवृत्तेरित्यर्थः। **कृतकृत्यतेति।** कृत्यं - कर्तव्यजातं कृतं येन सः कृतकृत्यः। तस्य भावस्तत्ता। पुरुषस्य हि विद्योदयात्पूर्वं दुःखनिवृत्तये सुखावाप्तये च बहुकर्तव्यजातमासीत्। विद्योदये तु दुःखमात्रस्य निवृत्तत्वात् अत्युत्कृष्टधवलरूपस्य निर्मलदर्पण इव निरतिशयस्वरूपानन्दभानाच्च तन्निवृत्तये तत्प्राप्तये वा न किञ्चित् कर्तव्यमस्तीति कृतकृत्यतेति भावः। तदाह भगवान् श्रीकृष्णः - 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत' इति। [भ.गी. १५-२०] एतत्-निरतिशयानन्दरूपं ब्रह्म अपरोक्षतया बुद्ध्वा बुद्धिमान्-पण्डितो भवति, कृतकृत्यश्च भवति, हे भारत-अर्जुन। यतस्तत्त्वज्ञानं विना पाण्डित्यादिकं न लभ्यते तस्मात्तदेव सम्पादय, अन्यत् सर्वं परित्यज, इति भावः। **विशेषोपपत्तेरिति।** मुक्तिसंसारयोरिति शेषः। ननु ब्रह्मानन्दवत् साक्ष्यानन्दोऽपि आवृतोऽस्तु, तथा च मुक्तिसंसारयोर्विशेषस्सुवच इति, नेत्याह—**निरुपाधिकेति।** एवंभूतः प्रेमा स्वरूपानन्दावरणसत्त्वे न सम्भवति, लोके प्रकाशमानसुख एव प्रीतेरनुभवसिद्धत्वात् इति भावः।

'साक्षिचैतन्यस्यानावृतत्वे तदभिन्नस्यानन्दस्याप्यनावृतत्वापत्त्या मुक्तिसंसारयोरविशेषप्रसङ्गः' इति पूर्वपक्षे प्राप्ते स्वरूपानन्दस्यानावृतत्वेऽपि तयोर्विशेषस्सम्भवतीति सिद्धान्तो दर्शितः। इदानीं तस्यावृतत्वमुपेत्यैव विशेषं मुक्तिसंसारयोर्वदन् सिद्धान्तं दर्शयति—**अन्ये त्विति।** 'वेदान्तप्रतिपाद्यस्वरूपानन्दो मे नास्ति न प्रकाशते' इति व्यवहारदर्शनात् तद्धेतुभूतमावरणं तावदस्त्येव संसारदशायाम्, मुक्तौ तु तदावरणनाशात् स्वरूपानन्दस्फुरणमस्तीति न तयोरविशेषप्रसङ्ग इत्यर्थः। अत्र प्रकाशमानोऽप्यानन्द आवृत एवेति सम्बन्धः। न त्वनावृतः, तस्यानावृतत्वे उक्तव्यवहारविरोधप्रसङ्गात् - इत्येवकाराभिप्रायः। नन्वेवमात्मनि सदा निरुपाधिकप्रेमा न स्यात्, अनावृतस्वरूपानन्दस्फुरणस्याभावात् वृत्तिकृतानन्दस्फुरणस्य च कादाचित्कत्वादिति चेत्, न - फलबलेनावृतस्यापि स्वरूपानन्दप्रकाशस्य निरुपाधिकप्रेमहेतुत्वकल्पनात्, 'भासत एव परमप्रेमास्पदत्वलक्षणं सुखं' इति विवरणस्याप्यत्रैव तात्पर्योपपत्तेश्च। अनेनैवाभिप्रायेण प्रकाशमानोऽपीत्युक्तम्। अन्यथा प्रकाशमानत्वविशेषणस्यावृतत्वकल्पने उपयोगाभावेन वैयर्थ्यप्रसङ्गादिति बोध्यम्। साक्षिचैतन्याभिन्नस्य साक्ष्यानन्दस्य आवृतत्वे साक्षिचैतन्यमप्यावृतं स्यात्, एकत्र आवृतत्वानावृतत्वयोर्युगपद्विरोधात्, इत्यत आह—**एकस्मिन्नपीति।** यथा वस्तुत एकस्मिन्नेव चैतन्ये जीवत्वेश्वरत्वाख्यौ रूपभेदौ कल्प्येते, 'नाहमीश्वरः किं तु संसारी' इति व्यवहारबलात्, तथा 'अहं सुखी' इत्यादिज्ञानं आनन्दो न भवति' इत्यादिरूपेणाहङ्काराद्यवभासकज्ञानस्यानन्दाद्भेदव्यवहारदर्शनात् तदनुरोधेन चित्त्वानन्दत्वाख्यौ

णावरणस्य चाविरोधात्, स्वरूपप्रकाशस्यावरणानिवर्तकतया प्रकाशमाने आवरणस्याविरोधाच्च, 'त्वदुक्तमर्थं न जानामि' इति प्रकाशमान एवावरणदर्शनाच्च। न च तत्र अनावृतसामान्याकारावच्छेदेन विशेषावरणमेवानुभूयत इति वाच्यम्। अन्यावरणस्यान्यावच्छेदेन भानेऽतिप्रसङ्गात्। न च सामान्यविशेषभावो नियामक इति नातिप्रसङ्ग इति वाच्यम्। व्याप्यव्यापकभावातिरिक्तसामान्यविशेषभावाभावेन 'वह्निं न जानामि' इति धूमावारकाज्ञानानुभव-

रूपभेदावनादिसिद्धौ कल्प्येते। यथा च एकस्मिन्नेव चैतन्ये जीवत्वावच्छेदेनाज्ञत्वादिकं ईश्वरत्वावच्छेदेन तदभावश्च कल्प्यते तथैवानन्दत्वावच्छेदेन आवृतत्वं चित्त्वावच्छेदेन अहङ्काराद्यवभासकचैतन्ये तदभावश्च कल्प्यते फलबलात् इति न विरोधः, जीवत्वादेरिव चित्त्वादिरूपभेदस्याप्यविद्याकल्पितत्वाभ्युपगमात् नाद्वैतविरोधश्चेत्यर्थः। नन्वेकस्मिन् साक्षिणि रूपभेदेनावृतत्वतदभावयोर्विरोधाभावेऽपि 'आनन्दः प्रकाशमानोऽप्यावृतः' इति विरुद्धम्, प्रकाशस्यावरणविरोधित्वादिति-नेत्याह— **स्वरूपप्रकाशस्येति**। आगन्तुकवृत्तिरूपप्रकाशस्य आवरणविरोधित्वकल्पनात् न स्वरूपप्रकाशस्तद्विरोधी, तस्यावरणसाधकत्वादित्यर्थः। नन्वेवं 'प्रकाशमानोऽप्यानन्द आवृतः' इति ग्रन्थे प्रकाशमानत्वविशेषणं स्वरूपप्रकाशस्यावरणाविरोधित्वज्ञापनार्थमिति तत्प्रयोजनसम्भवात् तद्विशेषणमात्मनि निरुपाधिकप्रेमसम्भवज्ञापनप्रयोजनकमिति यदुक्तं तत् न सम्भवतीति चेत्, तर्हि विनिगमकाभावेन तद्विशेषणस्योभयप्रयोजनकत्वमस्तु। स्वरूपप्रकाशे आवरणाविरोधित्वस्यैव आनन्दावरणपक्षे आनन्दरूपे आत्मनि निरुपाधिकप्रेमसम्भवस्याप्यवश्यं ज्ञापनीयत्वात्। स्वरूपप्रकाशस्यावरणाविरोधित्वे हेत्वन्तरमाह—**त्वदुक्तमिति**। एवकारानन्तरं आप्तोक्तार्थे इति शेषः। 'श्रीकृष्ण एव वेदान्तवेद्यः परमात्मा दुर्विज्ञेयोऽयमकृतात्मभिः, इत्याप्तोपदेशानन्तरं मन्दस्य वाक्यार्थबोधो न भवति। स च मन्दः 'त्वदुक्तमर्थं न जानामि' [1]इत्यज्ञानमनुभवतीति प्रसिद्धं लोके। तत्र 'त्वद्वाक्यस्यास्तिकश्चिदर्थ इति जानामि, आप्तवाक्यत्वात्, विशेषं तु न जानामि' इति व्यवहारदर्शनात् अवगतो यः त्वद्वाक्यार्थत्वलक्षणस्सामान्याकारः स एव विशेषावारकाज्ञानस्य विशेषणतय प्रकाशते। तथा च 'त्वदुक्तमर्थं न जानामि' इत्यनुभवे अज्ञानविशेषणतया प्रकाशमानस्य सामान्याकारस्य आवरणविषयत्वाभावात् आवरणविषयस्य विशेषस्य प्रकाशमानत्वाभावात् प्रकाशमानस्यावृतत्वे नायमनुभवः प्रमाणमिति शङ्कते—**न च तत्रेति**। अन्यावारकाज्ञानस्यान्यावच्छेदेन प्रकाशाभ्युपगमे 'चैत्रं न जानामि' इत्यनुभूयमानाज्ञानस्य विष्णुमित्रविषयकत्वप्रसङ्ग इति दूषयति—**अन्यावरणस्येति**। ननु—त्वद्वाक्यार्थत्वलक्षण आकारस्तावत् सामान्यरूपः, आप्तोपदिष्टे श्रीकृष्ण इव तदुपदिष्टेषु श्रीकृष्णप्रतिपत्त्युपायेष्वपि त्वद्वाक्यार्थत्वस्य सत्त्वात्। वेदान्तवेद्यत्वादिलक्षणाकारस्तु विशेषरूपः। तस्य श्रीकृष्णस्वरूपमात्रवृत्तित्वात्। तथा च विशेषावारकाज्ञानं सामान्याकारावच्छेदेन प्रकाशत इत्युपगमे नातिप्रसङ्गः, चैत्रत्वविष्णुमित्रत्वयोस्सामान्यविशेषभावाभावात्—इति शङ्कते—**न च सामान्येति**। किं सामान्यविशेषभावः श्रीकृष्णमूर्तित्वविष्णुमूर्तित्वयोरिव व्याप्यव्यापकभावः, तदतिरिक्तो वा? न द्वितीयः, तस्यानिरूपणात्- इत्याशयेनाह—**व्याप्येति**। आद्ये दोषमाह—**वह्निमिति**। तस्मादज्ञानानुभवे

1. इत्यनुभवति इति सम्बन्धः।

प्रसङ्गात्। तस्मात् यदवच्छिन्नमज्ञानं प्रकाशते तदेवावृतमिति प्रकाशमानेऽप्यज्ञानं युज्यते। अज्ञानं च यथा साक्ष्यंशं विहाय चैतन्यमावृणोति, एवमानन्दमपि तत्तत्सुखरूपवृत्तिकबलीकृतं विहायैवावृणोति। स एव वैषयिकानन्दस्यावरणाभिभवः। स चावरणाभिभवः प्रत्यूषसमये बाह्यावरणाभिभववत् कारणविशेषप्रयुक्तवृत्तिविशेषवशात् तरतमभावेन भवति। अतः स्वरूपानन्दविषयानन्दयोः विषयानन्दानां च परस्परं भेदसिद्धिः—इति वदन्ति।

सर्वथाऽपि साक्षिचैतन्यस्यानावृतत्वेन आवरणाभिभवार्थं वृत्तिमनपेक्ष्यैव तेन अहंकारादिप्रकाशनमिति तुल्यमेव।

अज्ञानविशेषणतया यद्वस्तु प्रकाशते तदेवावरणविषय इति वक्तव्यम्। न च 'त्वदुक्तमर्थं न जानामि' इति ज्ञानस्य त्वदुक्तार्थप्रकारकत्वे सति अज्ञानविशेष्यकत्वेन त्वदुक्तार्थो विशेषरूप एवेत्युपगमे तज्ज्ञानस्य[1] विशेषणज्ञानरूपकारणस्य अभावात् तद्विशिष्टाज्ञानानुभवो न स्यादिति वाच्यम्। अज्ञानानुभवस्य नित्यसाक्षिरूपत्वोपगमेन तत्र विशेषणज्ञानानपेक्षणात्। न च प्रकाशमानत्वमावृतत्वं च विरुद्धं प्रकाशस्यावरणविरोधित्वादिति वाच्यम्। अस्य विरोधस्य प्रागेव परिहृतत्वात्—इत्याशयेनोपसंहरति—**तस्मादिति**। अन्यावारकाज्ञानस्यान्यावच्छिन्नतया भानासम्भवादित्यर्थः। **यदवच्छिन्नमिति**। येन वस्तुना विशेषितं इत्यर्थः। नन्वानन्दस्यावृतत्वे विषयसंपर्कदशायां [विशिष्या][विषया]नन्दप्रकाशो न स्यादित्यत आह—**अज्ञानं चेति**। ननु वृत्तेरावरणाभिभावकत्वोपगमादज्ञानस्य [2]सुखवृत्तिविषयीकृतानन्दानावारकत्वमिति कथमुच्यते, तत्राह—**स एवेति**। सुखवृत्तिविषयत्वप्रयुक्तानावारकत्वस्वभाव एव वृत्तिकृतावरणाभिभव इत्यर्थः। ननु सुखरूपवृत्तेरेकरूपत्वात् तत्कृतावरणाभिभवोऽप्येकरूप एव स्यात्, तथा च विषयसम्बन्धदशायामानन्दोऽप्येकरूपतयैव प्रकाशेत, न तूत्कृष्टापकृष्टरूपेणेति - नेत्याह—**स चेति**। यथा प्रत्यूषसमये आलोकतारतम्येन बाह्यतमसः तारतम्ययुक्ताभिभवो भवति, ततश्च तत्तमसाऽऽवृतानां पदार्थानां तारतम्ययुक्तं प्रकाशनं भवति, एवं विषयविशेषरूपकारणविशेषप्रयुक्तो यो वृत्तिषु विशेषः उत्कर्षतारतम्यरूपः तद्वशात् तरतमभावयुक्त एव आवरणाभिभवो भवति, ततश्च आनन्दोऽपि तरतमभावयुक्त एव प्रकाशते इत्यर्थः। एवमप्यानन्दस्यैकत्वाभ्युपगमात्तद्भेदप्रथा कथं सिद्ध्यति, तत्राह-**अत इति**। वस्तुत एकस्मिन्नपि आनन्दे [3]उपाधिप्रयुक्तभेदाभ्युपगमादित्यर्थः। तथा च विद्यया आवरणस्य निवृत्तौ सत्यां प्रकाशमानानन्दः स्वरूपानन्दः, तदनिवृत्तिदशायां वृत्तिसम्बन्धात् प्रकाशमानानन्दो विषयानन्दः, इति स्वरूपानन्दविषयानन्दयोर्भेदो ज्ञातव्यः, तथा वृत्तिभेदेनानन्दभेदाभ्युपगमात् विषयानन्दानां परस्परं भेदप्रसिद्धिश्चावकल्पते, इत्यर्थः। अहंकारादीनां केवलसाक्षिभास्यत्वं परमप्रकृतं सिद्धमित्याशयेनाह—**सर्वथापीति**। स्वरूपानन्दस्यानावृतत्वपक्षे तस्यावृतत्वपक्षे चेत्यर्थः। **तेनेति**। साक्षिचैतन्येनेत्यर्थः।

---

1. तज्ज्ञानस्य कारणस्य इति समानाधिकरणे। 2. सुखवृत्तीति। सुखात्मकवृत्तीत्यर्थः।

3. उपाधीति। सुखात्मकवृत्तिरूपोपाधिः इत्यर्थः।

केवलसाक्षिभास्यानां स्मरणोपपत्तिनिरूपणम्

नन्वेवं कथमहंकारादीनामनुसन्धानम्। ज्ञानसूक्ष्मावस्थारूपस्य संस्कारस्य ज्ञाने सत्ययोगेन नित्येन साक्षिणा तदाधानासम्भवात्—

अत्र केचिदाहुः-स्वसंसृष्टेन साक्षिणा सदा भास्यमानोऽहंकारः तत्तद्घटादिविषयवृत्त्याकारपरिणतस्वावच्छिन्नेनापि साक्षिणा भास्यत इति तस्यानित्यत्वात् सम्भवति संस्काराधानं घटादौ विषय इव। न हि स्वाकारवृत्त्यवच्छिन्नसाक्षिणैव स्वगोचरसंस्काराधानमिति नियमोऽस्ति। तथासति वृत्तिगोचरसंस्कारासम्भवेन वृत्तेरस्मरणप्रसङ्गात्। अनवस्थापत्त्या वृत्तिगोचरवृत्त्यन्तरस्य

ननु सिद्धान्ते संस्कारस्यानुभवनाश[1]रूपत्वोपगमेन संस्कारार्थं साक्षिचैतन्यस्य अहङ्कारादिगोचरवृत्त्यपेक्षा अस्त्येवेति शङ्कते—**नन्वेवमिति**। अहंकारादिसाक्षिणो वृत्त्यनपेक्षत्वे सतीत्यर्थः। अनुसन्धानं स्मृतिः। **तदाधानेति**। संस्कारोत्पादनेत्यर्थः। तदाधानासम्भवे हेतुमाह—**ज्ञानसूक्ष्मावस्थारूपस्येत्यादिना**। ननु यदि साक्षिचैतन्यस्थितिदशायां तत्सूक्ष्मावस्थारूपसंस्कारोत्पत्त्ययोगः तर्हि तन्नाशदशायां तदुत्पत्तिरस्तु, नेत्याह—**नित्येनेति**। तथा च अहङ्काराद्यवच्छिन्नसाक्षिचैतन्यस्यानावृतत्वेन तदभिभवार्थं वृत्त्यनपेक्षणेऽपि संस्कारार्थं तदपेक्षासत्त्वात् 'केवलसाक्षिभास्यत्वमहङ्कारादीनाम्' इति सिद्धान्तव्याकोप इति भावः।

अहङ्कारादिगोचरवृत्तिं विनैव संस्कारोपपत्तेर्न सिद्धान्तविरोध इति समाधत्ते—अत्र **केचिदाहुरिति**। स्वपदद्वयमहङ्कारपरम्। स्वसंसृष्टेनेत्यादिना भास्यत इत्यन्तेन ग्रन्थेन अहङ्कारस्य यथा अहङ्कारावच्छिन्नसाक्षिभास्यत्वं तथा घटपटादिविषयगोचरवृत्त्यवच्छिन्नसाक्षिभास्यत्वमप्यस्तीति दर्शितं भवति। ततः किं, तत्राह-**तस्येति**। घटादिगोचरवृत्त्यवच्छिन्नसाक्षिचैतन्यस्यानित्यत्वात् तेन यथा घटादौ विषये संस्काराधानं सम्भवति तथा तेनैव वृत्त्यवच्छिन्नसाक्षिचैतन्येन अहङ्कारादावपि संस्काराधानं सम्भवतीति नाहङ्कारादिगोचरवृत्त्यपेक्षेति भावः। ननु-अहङ्कारव्यतिरिक्तेषु घटादिषु सर्वत्र स्वाकारवृत्त्यवच्छिन्नचैतन्येनैव घटादिगोचरसंस्काराधानदर्शनात् 'स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानम्' इति नियमोऽवसीयते। तथा च अहङ्कारमात्र एव कथमन्यगोचरवृत्त्या तदाधानं इत्याशङ्क्याह—**न हीति**। तथानियमे मानाभावात् अप्रयोजकत्वाच्च इति भावः। नियमाभ्युपगमे बाधकमाह—**तथासतीति**। ननु ज्ञानरूपवृत्तेस्संस्कारादिलाभाय वृत्तिगोचरवृत्त्यन्तरमप्यस्तु, नेत्याह—**अनवस्थापत्त्येति**। घटादिगोचरवृत्तिस्मरणसिद्ध्यर्थं तद्गोचरवृत्त्यन्तरोपगमे द्वितीयवृत्तिस्मरणाय तृतीयाऽपि तद्गोचरवृत्तिर्वक्तव्या स्यात्। एवं तत्तद्वृत्तिगोचरवृत्त्यभ्युपगमापत्त्या वृत्त्यनवस्था प्रसज्येत। न च द्वितीयतृतीयादिवृत्तीनां मध्ये कासांचित् अज्ञातानामेव नाशाभ्युपगमसम्भवात् नानवस्थाप्रसक्तिरिति वाच्यम्। उत्पन्नाया

---

1. नाशेति। सूक्ष्मावस्थेत्यर्थः। सत्कार्यवादसिद्धान्ते सूक्ष्मरूपेणावस्थानस्यैव नाशरूपत्वात्। साक्षिणो नित्यत्वेन सूक्ष्मावस्थाऽनुपपत्तेः स्फुटप्रतीत्यर्थं नाशशब्देन सूक्ष्मावस्थानिर्देशः।

अनुव्यवसायनिरसनेन निरस्तत्वात्। किं तु यद्वृत्त्यवच्छिन्नचैतन्ये यत् प्रकाशते तद्वृत्त्या तद्गोचरसंस्काराधानं इत्येव नियमः। एवं च ज्ञानसुखादयोऽपि अन्तःकरणवृत्तयः तप्तायःपिण्डाद्व्युच्चरन्तो विष्फुलिङ्गाः स्वावच्छिन्नेन वह्निनेव [1]स्वस्वावच्छिन्नेन अनित्येन साक्षिणा भास्यन्त इति युक्तं तेष्वपि संस्काराधानम्। यस्तु 'घटैकाकारधीस्था चित् घटमेवावभासयेत्। घटस्य

वृत्तेः अवश्यज्ञातव्यत्वात्। अन्यथा सत्यामेव घटाद्याकारवृत्तौ कदाचित् 'मयेदं ज्ञायते न वा' इति घटादिवृत्ति नाशानन्तरं 'मयेदं ज्ञातं न वा' इति वा संशयप्रसङ्गात्। तस्माद्वृत्तेरवश्यज्ञातव्यत्वं वृत्तेर्वृत्त्यैव वेद्यत्वपक्षे प्रापयेदेवानवस्थाम्। [2]अनेनैव न्यायेन निबन्धनेष्वनुव्यवसायो निरस्तः। ततश्च स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधाननियमो नास्ति, वृत्तिष्वसम्भवादित्यर्थः। नन्वन्यगोचरवृत्त्या अन्यगोचरसंकाराधानोपगमे घटगोचरवृत्त्या पटादावपि तदाधानप्रसङ्ग इति शङ्कते—**किं त्विति**। अतिप्रसङ्गपरिहाराय प्रयोजकमाह—**यद्वृत्तीति**। यद्वस्तुगोचरवृत्त्यवच्छिन्नचैतन्ये यावन्तः पदार्थाः प्रकाशन्ते तद्वस्तुगोचरवृत्त्या तावत्सु पदार्थेषु संस्काराधानमिति नियमः। घटगोचरवृत्त्यवच्छिन्नचैतन्ये च पटादेरप्रकाशनात् नातिप्रसङ्गः। न तु स्वगोचरवृत्त्यैवस्वगोचरसंस्काराधानमिति नियमः इत्येवकारार्थः। ननु घटादिवृत्त्यवच्छिन्नचैतन्ये घटादिप्रकाशनं निर्विवादम्। तत्र चैतन्ये अहङ्कारस्यापि प्रकाशनं घटादिविषयवृत्त्याकारपरिणतस्वावच्छिन्नेनापि साक्षिणा भास्यते इति पूर्वग्रन्थे दर्शितम्। तथा च घटादिवृत्त्या अहङ्कारेऽपि संस्काराधानमस्तु। तथापि घटादि ज्ञानरूपाया वृत्तेः स्वावच्छिन्नचैतन्ये प्रकाशनस्य असिद्धत्वात् तस्यास्स्वगोचरसंस्कारजनकत्वं न स्यात्। तथा सुखदुःखेच्छाद्वेषादीनामहङ्कारधर्माणां घटादिवृत्त्यवच्छिन्नचैतन्ये प्रकाशनप्रसक्त्यभावात् तया तेषु संस्काराधानं न स्यात्। न च-सुखादिरूपवृत्तिषु घटादिवृत्त्या संस्कारानाधानेऽपि सुखःदुःखादिगोचरान्तःकरणवृत्तिभिरेव तासु तदाधानमस्तु, ज्ञानरूपासु घटादिवृत्तिषु तदाधानार्थं वृत्त्यन्तरोपगम इव अनवस्थाप्रसक्त्यभावादिति-वाच्यम्। सुखदुःखादिगोचरा वृत्तिरभ्युपगम्यमाना किं ज्ञानरूपा, किं वा इच्छादिवृत्तिवत् क्रियारूपा। नाद्यः—तदुत्पादककारणाभावात्, मनसः करणताया निरसिष्यमाणत्वात्। न द्वितीयः - तस्या अपि वृत्तेः संस्काराधानाय तद्गोचरवृत्त्यन्तरोपगमे सैवानवस्था प्राप्नोति। तस्मात् ज्ञानरूपासु घटादिवृत्तिषु ज्ञानभिन्नासु सुखदुःखादिरूपवृत्तिषु च कथं संस्काराधानं इत्याशङ्क्याह— **एवं चेति**। उक्तनियमे सतीत्यर्थः। अन्तःकरणे या या वृत्तयः उत्पद्यन्ते ज्ञानरूपाः, तद्भिन्ना वा, ताःसर्वा अपि स्वस्वावच्छिन्न[3]नित्यचैतन्यभास्या एव। तथा च

1. स्वस्वावच्छिन्नेनेति—अत एवेति शेषः।

2. अनेनैव न्यायेनेति। अनवस्थापत्तिरूपया अनया युक्त्या इत्यर्थः। भामत्यादिषु निबन्धनेषु अनवस्थापत्त्या अनुव्यवसायो निरस्तः। वृत्तिगोचरवृत्त्यन्तराङ्गीकारेऽपि अनवस्थापत्तिदोषात् तेन दोषेण अनुव्यवसायनिरसनं अयुक्तं स्यात्। अतः अनुव्यवसायनिराकर्तृभिः वृत्तिगोचरवृत्त्यन्तरं नैवाभ्युपगन्तव्यम्। एवञ्च 'अनवस्थाऽऽपत्त्या अनुव्यवसायनिरसनेन वृत्तिगोचरवृत्त्यन्तरस्य निरस्तत्वात्' इति सम्बन्धः। निरस्तत्वात्—अर्थतो निरस्तत्वात् इत्यर्थः।

3. नित्येति। स्वरूपतोनित्येत्यर्थः।

ज्ञातता ब्रह्मचैतन्येनावभास्यते ॥' [पं. द. ८-४] इति कूटस्थदीपोक्तः विषयविशेषणस्य ज्ञानस्य [1]विषयावच्छिन्नब्रह्मचैतन्यावभास्यत्वपक्षः, यश्च तत्त्वप्रदीपिकोक्तो ज्ञानेच्छादीनामनवच्छिन्नशुद्धचैतन्यरूपनित्यसाक्षिभास्यत्वपक्षः, तयोरपि चैतन्यस्य स्वसंसृष्टापरोक्षरूपत्वात् वृत्तिसंसर्गोऽवश्यं वाच्य

चैतन्यस्य नित्यत्वेऽपि तद्भास्यतया तदवच्छेदकतया चोत्पद्यमानानामहङ्कारधर्माणामनित्यतया तद्धर्मविशिष्टस्य तत्तदवभासकस्य चैतन्यस्य नाशरूपः तद्धर्मगोचरस्संस्कारस्संभवतीति न ज्ञानसुखादिषु संस्कारानुपपत्तिरिति भावः। दृष्टान्ते स्वपदं [2]विष्फुलिङ्गपरम्। घटस्य एकस्य आकार इवाकारो यस्याः सा घटैकाकारा, सा चासौ धीश्च, तस्यां स्थिता चित् - चिदाभासः—घटाकारवृत्तिप्रतिबिम्बरूपं घटज्ञानमिति यावत्। घटमेव-न घटस्य ज्ञाततामपि इत्येवकारार्थः। ज्ञातता नाम ज्ञानविषयत्वं - विषयतासम्बन्धेन विषयनिष्ठं ज्ञानमित्यर्थः। तच्च ज्ञानं विषयस्य विशेषणम्, ज्ञातो घट इत्यनुभवादिति भावः। ननु—अनयोः पक्षयोः[3] ज्ञानेच्छादिभासकचैतन्यस्य नित्यत्वात् कथं ज्ञानेच्छादिषु संस्कारः। न च पूर्वोक्तरीत्या ज्ञानेच्छादिवृत्तीनां स्वस्वावच्छिन्नसाक्षिचैतन्यप्रकाश्यत्वमादाय अनयोरपि पक्षयोः संस्काराधानमिति वाच्यम्। घटादिगोचरवृत्तिप्रतिबिम्बरूपज्ञानस्य ज्ञातताशब्दितस्य तद्वृत्त्यनवच्छिन्नविषयाधिष्ठानब्रह्मचैतन्यभास्यत्वोक्तिविरोधात्। तथा द्वितीयपक्षे ज्ञानेच्छादिवृत्तीनामनवच्छिन्नसाक्षिभास्यत्वोक्तिविरोधप्रसङ्गात्। अतः कथं तयोः पक्षयोस्तदाधानम् - अत आह—**तयोरपीति**। विषयावच्छिन्नब्रह्मचैतन्यस्य ज्ञातताावभासकत्वमते तत् ब्रह्मचैतन्यं ज्ञातातायाः अपरोक्षज्ञानरूपमेवोपेयते। 'ज्ञातोऽयं घटः' इति ज्ञातताया अपरोक्षत्वानुभवात्। अनवच्छिन्नशुद्धचैतन्यमपीच्छाज्ञादीनामपरोक्षज्ञानरूपमेवोपेयते। इच्छादिवृत्तीनामप्यपरोक्षत्वानुभवात्। तथा च अपरोक्षज्ञानरूपद्विविधचैतन्यस्य स्वविषयभूतैर्ज्ञानेच्छादिभिस्संसर्गोऽवश्यंभावी। अपरोक्षज्ञानस्य स्वतादात्म्यापन्नविषयानुभवरूपत्वनियमात्। ततश्च स्वविषयभूतज्ञानेच्छादिनाशसमये ज्ञानादिविशिष्टरूपेण द्विविधचैतन्यस्यापि नाशलक्षणसंस्कारोपपत्तिरित्यर्थः। तयोरपीति सप्तमी। **चैतन्यस्येति**। द्विविधस्येति शेषः। [4]तत्पदं ज्ञानेच्छादिरूपवृत्तिपरम्।

यदि च स्वगोचरवृत्त्यैव स्वसंस्काराधानमवश्यं वाच्यं तदापि नानुपपत्तिः। अविद्यावृत्तिभिरहङ्कारतद्धर्मगोचराभिः अहङ्कारादिषु[5] संस्काराधानसम्भवात्। न च वृत्तिगोचरवृत्त्युपगमे प्रागुक्तानवस्थाप्रसक्तिरिति वाच्यम्। [6]अविद्यावृत्तीनामनुभवायोग्यत्वेन तासु ज्ञानाय संस्काराय वा ज्ञानेच्छाद्यनुभवकाले अविद्यावृत्त्यन्तरा-

---

1. विषयावच्छिन्नेति। विषयाधिष्ठानेत्यर्थः।
2. विष्फुलिङ्गपरमिति। वन्ह्युपाध्यंशाः विष्फुलिङ्गा विवक्षिताः।
3. विषयस्य उपाधित्वानुपाधित्वाभ्यां अनयोः पक्षयोः भेदः। सर्वं स्वोपहिते अध्यस्तं इत्यभिप्रायेण आद्यः पक्षः।
4. तत्पदम्—तत्संसृष्टेत्यत्र तत्पदम्।
5. अहङ्कारादिष्विति। सप्तम्यर्थो विषयित्वं संस्कारेऽन्वेति।
6. अविद्यावृत्तीनामनुभवायोग्यत्वेनेति। न च शुक्तौ रूप्यभ्रमानन्तरं 'इदं रजतं जानामि' इति भ्रमरूपाया

इति तत्संसृष्टानित्यरूपसद्भावात् न तेषु संस्काराधाने काचिदनुपपत्तिरिति ।

अन्ये तु सुषुप्तावपि अविद्याद्यनुसन्धान[1]सिद्धये कल्पितां अविद्यावृत्तिं अहमाकारामङ्गीकृत्य अहमर्थे संस्कारमुपपादयन्ति । न चास्मिन् पक्षे 'एतावन्तं कालमिदमहं पश्यन्नेवासं' इति अन्यज्ञानधाराकालीनाहमर्थानुसन्धानानुपपत्तिः । अवच्छेदकभेदेन सुखदुःखयौगपद्यवद्वृत्तिद्वययौगपद्यस्याप्यविरोधेन अन्यज्ञानधाराकालेऽपि अहमाकाराविद्यावृत्तिसन्तानसम्भवादिति ।

नुपगमात् । न च अविद्यावृत्तीनामक्लृप्तसंस्कारजनकत्वकल्पने गौरवमिति वाच्यम् । सुषुप्तौ तासां तज्जनकत्वस्य क्लृप्तत्वात् - इत्याशयेन मतान्तरमाह—**अन्ये त्विति ।** उत्थितस्याविद्याद्यनुसन्धानसिद्धये सुषुप्तौ कल्पितां अविद्यादिगोचरामविद्यादिवृत्तिमिव अहमाकारामविद्यावृत्तिमङ्गीकृत्येति वाक्यं योजनीयम् । यथाश्रुते सुषुप्तौ यदविद्याद्यनुसन्धानं तत्सिद्धये इति भ्रान्तिस्स्यात् सन्निधानात्, तथा सुषुप्तौ कल्पिताया एव वृत्तेः अहमाकारत्वमङ्गीकृतमिति भ्रान्तिस्स्यात् इति बोध्यम् । अविद्यादीत्यादिपदं सुखसुषुप्त्योः संग्रहार्थम् । 'सुखमहमस्वाप्सं न किञ्चिदवेदिषं' इति सुषुप्तिकालीनानां सुखसुषुप्त्यविद्यानां उत्थानानन्तरमनुसन्धानदर्शनात् तत्कालीनाविद्याद्यनुभवस्य नित्यसाक्षिरूपतया तस्याविद्यावृत्तिरूपावच्छेदकाकल्पने संस्कारासंभवेन उक्तानुसन्धानाभावप्रसङ्गात् । नन्वज्ञानाहङ्कारादिगोचराविद्यावृत्त्युपगमे तेषां केवलसाक्षिवेद्यत्वसिद्धान्तव्याकोप इति चेत्, न - अविद्यावृत्तीनां क्लृप्तज्ञानकरणजन्यत्वाभावेन [2]ज्ञानात्मकवृत्तित्वाभावात्, ज्ञानात्मकवृत्त्यनुपहितसाक्षिण एव केवलसाक्षिशब्दार्थत्वाङ्गीकारात् इति भावः । अहमर्थग्रहणं तद्धर्माणामप्युपलक्षणम्, तुल्यन्यायतया बाधकाभावेन च तद्धर्मेष्वपि अविद्यावृत्तिभिस्संस्कारस्योपपादितत्वात् इति ध्येयम् । ननु - अस्मिन् पक्षे अन्यज्ञानधाराकालीनाहमर्थादिषु अहमर्थादिगोचराविद्यावृत्त्यसम्भवेन संस्काराधानं न स्यात्, धाराकाले अविद्यावृत्त्यङ्गीकारे युगपत् वृत्तिद्वयप्रसङ्गात् - इति शङ्कामनूद्य दृष्टान्तेन परिहरति—**न चास्मिन् पक्ष इति ।** अविद्यावृत्तिभिः संस्काराधानपक्षे इत्यर्थः । **अवच्छेदकभेदेनेति ।** 'शिरसि मे वेदना, पादे मे सुखं' इत्यनुभवदर्शनादिति भावः । **वृत्तिद्वयेति ।** अन्यज्ञानधाराकालेऽपि अन्यवस्तुगोचरान्तःकरणवृत्तेः अहमर्थगोचराविद्यावृत्तेश्च युगपत् प्रमातरि [3]अवच्छेदकभेदेन सम्भवो न विरुद्ध्यते इत्यर्थः । **सन्तानेति ।** नन्वन्यज्ञानधाराकाले एकैवाविद्यावृत्तिरिति वक्तुं शक्यते, तदा तन्नानात्वे मानाभावाल्लाघवाच्च - इति चेत्, सत्यम् । तथाप्यन्तःकरणवृत्तिसन्ततिरूपत्वाद्धारायाः तत्कालीनाविद्यावृत्तेरपि सन्ततिरूपत्वं सम्भवतीति सम्भावनामात्रेण तथोक्तम् । अत एवाह—**सन्तानसम्भवादिति ।**

अविद्यावृत्तेः अनुभूयमानत्वात् अनुभवायोग्यत्वोक्तिः अयुक्तेति वाच्यम् । केवलाविद्यावृत्तिविषयत्वादयोग्यत्वोक्तेः, उक्तस्थले च अन्तःकरणवृत्तितादात्म्यापन्नाया एव तस्याः अनुभवात् । अत एव 'जानामि' इत्यभिलापो युज्यते इति भावः ।

1. अनुसन्धानम्—स्मरणम् ।

2. ज्ञानात्मकेति । श्रुत्या धीशब्दवाच्यज्ञानाख्यवृत्तीनां मनःपरिणामत्वोक्तेश्च इति भावः ।

3. अवच्छेदकेति । अविद्यान्तःकरणोपाधिद्वयविशिष्टे प्रमातरि अन्तःकरणावच्छेदेन एका वृत्तिः अविद्यावच्छेदेन अन्या वृत्तिः इति ।

अपरे तु - अहमाकारा वृत्तिरन्तःकरणवृत्तिरेव। किं तु उपासनादिवृत्तिवत् न ज्ञानम्, क्लृप्ततत्करणाजन्यत्वात्। न हि तत्र चक्षुरादि प्रत्यक्षप्रमाणं सम्भवति। न वा लिङ्गादिकम्। लिङ्गादिप्रतिसन्धानशून्यस्याप्यहंकारानुसन्धानदर्शनात्। नापि मनः करणम्। तस्योपादानभूतस्य क्वचिदपि करणत्वाक्लृप्तेः। तर्हि अहमर्थप्रत्यभिज्ञाऽपि ज्ञानं न स्यादिति चेत्, न - तस्या अहमंशे ज्ञानत्वाभावेऽपि तत्तांशे स्मृतिकरणत्वेनक्लृप्तसंस्कारजन्यतया ज्ञानत्वात्, अंशभेदेन ज्ञाने [1]परोक्षत्वापरोक्षत्ववत् प्रमात्वाप्रमात्ववच्च ज्ञानत्वाज्ञानत्वयोरपि अविरोधात् - इत्याहुः।

अहमर्थांशे अन्तःकरणवृत्त्यैव संस्काराधानं सम्भवतीति न तदंशेऽप्यविद्यावृत्तिः कल्पनीया। अन्तः-करणवृत्तिसम्भवे तत्कल्पनायोगात्। न च - अन्यज्ञानधाराकाले अहमर्थगोचरान्तःकरणवृत्तिर्न सम्भवति, सुख-दुःखयौगपद्यवत् [2]ज्ञानद्वययौगपद्यायोगादिति - वाच्यम्। संस्कारार्थाहंवृत्तेर्ज्ञानरूपत्वानुपगमात् - इति मतमाह—**अपरे त्विति**। तर्हि सा वृत्तिः घटादिवृत्तिवत् ज्ञानरूपापि स्यात्, तथा च ज्ञानात्मकवृत्त्युपहितसाक्षि-वेद्यत्वापत्त्या अहमर्थस्य केवलसाक्षिभास्यत्वसिद्धान्तहानिः - इत्याशयेन शङ्कते—**किं त्विति**। परिहरति—**उपासनादीति**। इच्छादिसङ्ग्रहार्थमादिपदम्। अनुसन्धानम् - अनुभवः। **क्वचिदपीति**। वृत्तिज्ञानं प्रत्यु-पादानभूतस्य अन्तःकरणस्य अहमाकारवृत्तेस्सकाशादन्यत्र क्वचिदपि वृत्तौ करणत्वाक्लृप्तेरित्यर्थः। **तर्हीति**। 'योऽहं स्वप्ने साक्षात् भगवन्तं श्रीकृष्णमन्वभूवं सोऽहमिदानीं तं स्मरामि' इति प्रत्यभिज्ञा अहमर्थांशे ज्ञानं न स्यात् ज्ञानकरणाजन्यत्वादित्यर्थः। इष्टापत्त्या परिहरति—**नेति**। तर्हि प्रत्यभिज्ञानं तत्तांशेऽपि ज्ञानं न स्यात्, एकस्यां प्रत्यभिज्ञायां ज्ञानत्वतदभावयोर्विरोधेनायोगादिति, अत आह—**तस्या इति**। प्रत्यभिज्ञाया इत्यर्थः। **अंशभेदेनेति**। विषयैकदेशोऽत्रांशः, स च प्रागेव दर्शितः - अहमंश इति तत्तांश इति च। **परोक्षत्वेति**। पर्वतो वह्निमानित्यनुमितेः सिद्धान्ते वह्न्यंशे परोक्षत्वं सन्निकृष्टपर्वतांशे त्वपरोक्षत्वमुपेयते। [3]मतद्वयसम्मतं दृष्टान्तमाह—**प्रमात्वेति**।

पूर्वोपदर्शितप्रत्यभिज्ञाया अहमर्थांशेऽपि ज्ञानत्वमुपेयम्। [4]अन्यथा हि प्रत्यभिज्ञाप्रामाण्येन अन्तः - करणोपहितचैतन्यरूपस्य जीवस्याहमर्थस्य स्थायित्वसाधनं सूत्रभाष्ययोर्दृश्यमानं विरुद्ध्येत। तथा च सूत्रम्—'अनुस्मृतेश्च' [ब्र. सू. २-२-२५] इति। अनुस्मृतिः प्रत्यभिज्ञा। तथा

---

1. परोक्षशब्देनात्र अनुमितिर्विवक्षिता।

2. ज्ञानद्वययौगपद्यायोगादिति। अवच्छेदकैक्यादिति भावः। अवच्छेदकैक्यस्फोरणार्थमेव वृत्तिद्वयेत्य-नुक्त्वा ज्ञानद्वयेत्युक्तम्। ज्ञानाख्यवृत्तिसामान्यं हि अन्तःकरणपरिणामः।

3. मतद्वयेति। अनुपदोक्तदृष्टान्तः न नैयायिकसम्मतः। अनुमितित्वप्रत्यक्षत्वयोः एकत्राङ्गीकारे साङ्कर्य-प्रसङ्गेन तयोः जातित्वबाधापत्तेः। अयन्तु सम्प्रतिपन्नः। आंशिकभ्रमाङ्गीकारात्, प्रमात्वाप्रमात्वयोरजातित्वाच्च।

4. अन्यथेति। प्रमात्वस्य ज्ञानत्वव्याप्यत्वात् प्रत्यभिज्ञायाः अहमर्थांशे ज्ञानत्वाभावे प्रमात्वस्याप्यभाव-प्रसङ्गात् इति भावः।

इतरे तु - अहमाकाराऽपि वृत्तिर्ज्ञानमेव। 'मामहं जानामि' इत्यनुभवात्। न च करणासम्भवः। अनुभवानुसारेण मनस एवान्तरिन्द्रियत्वस्येव करणत्वस्यापि कल्पनात् - इत्याहुः।

एवंसति बाह्यगोचरापरोक्षवृत्तीनामेव आवरणाभिभावकत्वनियमः पर्यवसन्नः।

भ्रमकारणीभूतेदमाकारवृत्तेरावरणाभिभावकत्वनिरूपणम्

ननु-नायमपि नियमः, शुक्तिरजतस्थले इदमाकारवृत्तेरज्ञानानभिभावकत्वात्, अन्यथा उपादानाभावेन रजतोत्पत्त्ययोगात् इति चेत् -

अत्राहुः—**इदमाकारवृत्त्या इदमंशाज्ञाननिवृत्तावपि शुक्तित्वादिविशेषांशाज्ञानानिवृत्तेः**

च तत्सूत्रस्थं भाष्यं 'य एवाहं पूर्वेद्युरद्राक्षं स एवाहमद्य स्मरामि' इति। तथा च प्रत्यभिज्ञाया अहमंशे ज्ञानत्वाभावाभिधानं अयुक्तं - इति मन्यमानानां मतमाह—**इतरे त्विति। अनुभवादिति।** अहमर्थगोचरवृत्तौ ज्ञानत्वानुभवादित्यर्थः। **मनस इति।** अत एव वियत्पादे [1]भाष्यं 'बुद्धेः करणत्वाभ्युपगमात्' इति। अत एव च अहङ्कारधर्माणां ज्ञानसुखादीनां केवलसाक्षिभास्यत्वेऽपि अहमर्थरूपस्य मनः प्रति असाधारणविषयस्य सत्त्वात् तस्येन्द्रियत्वं प्राणपादे चक्षुरादेरिव भाष्यकारैरेव [2]व्यवस्थापितमिति मन्तव्यम्। केवलसाक्षिभास्यत्वसिद्धान्तोऽपि अत एव अहमर्थव्यतिरिक्तज्ञानसुखादिमात्रविषयः इत्यपि मन्तव्यम्। ननु मनस इन्द्रियत्वपक्षे रूपादौ चक्षुरादेरिव तस्य अहमर्थे प्रमाणत्वं वाच्यम्। तच्च न सम्भवति। अहमर्थस्य अनावृतसाक्षिचैतन्येऽध्यस्तस्य अज्ञातत्वाभावेन मनसः अज्ञातज्ञापकत्वाभावादिति चेत्, न - तद्वति तत्प्रकारकानुभवत्वं अबाधितानुभवत्वं वा प्रमात्वं इतिमतानुरोधेन अहमाकारज्ञानस्य प्रमात्वोपपत्तौ तत्करणस्य मनसोऽपि चक्षुरादेरिव प्रमाणत्वसम्भवादिति भावः।

ननु तर्हि अपरोक्षवृत्तीनामावरणाभिभावकत्वनियमस्याहमाकारापरोक्षवृत्तौ व्यभिचार इत्याशङ्क्य, नियमस्य सङ्कोचं दर्शयति—**एवंसतीति।** अहमाकारापरोक्षवृत्त्युपगमे सतीत्यर्थः।

उक्तनियममप्याक्षिपति—**नन्विति।** 'इदं रजतं' इति भ्रमस्थले प्रथमं इदमाकारा अपरोक्षवृत्तिरुदेति, पश्चात् 'इदं रजतं' इति भ्रमो भवति। तत्र इदमाकारायाः प्रथमोत्पन्नवृत्तेः अज्ञाननिवर्तकत्वं किं नास्ति उतास्ति। आद्ये नियमस्य व्यभिचारमाह—**नायमपीति।** यथा अपरोक्षवृत्तिमात्रमज्ञाननिवर्तकमिति नियमो नास्ति, अहमाकारवृत्तौ व्यभिचारात्, तथा बाह्यगोचरापरोक्षवृत्तिमात्रमज्ञाननिवर्तकमिति नियमोऽपि नास्ति, इदमाकारवृत्तौ व्यभिचारादित्यर्थः। द्वितीये बाधकमाह—**अन्यथेति।** इदमाकारवृत्तेरज्ञानाभिभावकत्वे इत्यर्थः।

इदमाकारवृत्तिनिवर्त्याज्ञानमन्यत्, रजतोपादानभूताज्ञानमन्यत्। तथा च न व्यभिचारः, न वा रजतोत्प-

---

1. भाष्यम्-तक्षाधिकरणभाष्यम् [२-३-४०]
2. व्यवस्थापितमिति। तदिन्द्रियाधिकरणे इत्यादिः।

तदेव रजतोपादानम्, शुक्तित्वाद्यज्ञाने रजताध्यासस्य तज्ज्ञाने तदभावस्य अनुभूयमानत्वात्। अध्यासभाष्यटीकाविवरणे अनुभूयमानान्वयव्यतिरेकस्यैवाज्ञानस्य रजताद्यध्यासोपादानत्वोक्तेः[1]। अत एव शुक्त्यंशोऽधिष्ठानम्, इदमंश आधारः; [2]सविलासाज्ञानविषयोऽधिष्ठानम्, अतद्रूपोऽपि तद्रूपेणारोप्यबुद्धौ स्फुरन् आधारः, इति [3]संक्षेपशारीरकेऽपि विवेचनादिति।

अपरे तु इदंरजतमिति इदमंशसम्भिन्नत्वेन प्रतीयमानस्य रजतस्य इदमंशाज्ञानमेवो-

---

त्त्ययोगः इति परिहरति - **अत्राहुरिति**। शुक्तित्वादिविशेषांशावारकाज्ञानमेव रजतोपादानं इत्यत्र मानमाह- **शुक्तित्वाद्यज्ञान इति**। नीलपृष्ठत्वादिकमादिपदार्थः। रजतमेव अध्यस्यत इत्यध्यासः। प्रथमतत्पदं विशेषांशपरम्। द्वितीयतत्पदमध्यासपरम्। तत्र सम्मतिमाह—**अध्यासेति**। टीका-पञ्चपादिका। अनुभूयमानौ अन्वयव्यतिरेकौ यस्येति विग्रहः। ननु—पुरोवर्तिद्रव्यस्य शुक्तित्वादिविशेषरूपविशिष्टस्यैव रजतकारणाज्ञानावृतत्वाभ्युपगमे तस्यैवाधिष्ठानत्वं स्यात्, न तु इदंत्वरूपविशिष्टस्येदमंशस्य। सविलासाज्ञानविषयस्यैव अधिष्ठानत्वात्। तथा च अधिष्ठानारोप्ययोरेकज्ञानविषयत्वनियमात् शुक्तीरजतमिति भ्रमाकारः स्यात्, न स्याच्च इदं रजतमिति प्रतीत्याकारः इदमंशस्याधिष्ठानात्वभावात्- इत्यत आह—**अत एवेति**। अध्यासोपादानाज्ञानविषयत्वादेवेत्यर्थः। [4]**शुक्त्यंश इति**। शुक्तित्व[5]विशेषरूपेण पुरोवर्त्यवच्छिन्नचैतन्यमित्यर्थः। इदमंशस्याधिष्ठानत्वाभाव इष्ट इत्याशयेनाह—**इदमंश इति**। ननु तस्याधारत्वे आगतमेवाधिष्ठानत्वम्, तयोर्भेदाभावादिति - नेत्याह—**सविलासेति**। विलासो रजतादिविक्षेपः विषयत्वमावृतत्वम्। **अतद्रूपोऽपीति**। तत्पदं अध्यस्तरजतादिपरम्। तथा च अध्यस्तरजताद्यभेदरहितोऽपि तदभिन्नत्वेन स्फुरन् इत्यर्थः। अधिष्ठानस्यैव आरोपितरजततादात्म्यात् वस्तुगत्या इदमंशस्य अतद्रूपत्वमिति बोध्यम्। अस्मिन् मते अधिष्ठानारोप्ययोरेकज्ञानविषयत्वं नास्ति, किं तु आधारारोप्ययोरेव तत् इति न भ्रमस्य शुक्त्यंशोल्लेखापत्तिरिति भावः।

---

1. उक्तेरिति। 'ननु कथं मिथ्याज्ञानं अध्यासस्य उपादानम्? तस्मिन् सति अध्यासस्य उदयात् असति च अनुदयात् इति ब्रूमः' इति ग्रन्थेनोक्तेः इत्यर्थः।

2. सविलासेति। अध्यासोपादानेत्यर्थः।

3. संक्षेपशारीरकेऽपि विवेचनादिति।
   (i) 'संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगीः नाधारेऽध्यसनस्य वस्तुनि.........' [१-३१]
   (ii) '.........सकार्यस्य मोहस्य वस्तुन्यधिष्ठानगीर्गोचरे लोकसिद्धा' [१-३२] इति पद्याभ्यां संक्षेपशारीरकेऽपि विवेचनात् इत्यर्थः।

4. जडस्य अज्ञानविषयतायाः टीकाविवरणयोः निरस्तत्वात् 'शुक्त्यंशोऽधिष्ठानं' इत्युक्तेरयुक्ततामाशङ्क्य व्याचष्टे—शुक्त्यंश इतीति।

5. विशेषरूपेणेति। वैशिष्ट्यं तृतीयार्थः। पुरोवर्तिपदार्थेऽन्वेति। शुक्तित्वविशिष्टपुरोवर्त्यवच्छिन्नचैतन्यं इत्यर्थः।

पादानम्। तस्य च इदमाकारवृत्त्या आवरणशक्तिमात्रनिवृत्तावपि विक्षेपशक्त्या सह तदनुवृत्तेः नोपादानत्वासम्भवः। जलप्रतिबिम्बितवृक्षाधोऽग्रत्वाध्यासे जीवन्मुक्त्यनुवृत्ते प्रपञ्चाध्यासे च सर्वात्मना अधिष्ठानसाक्षात्कारानन्तरभावि [नि, आ] (न्यायमा) वरणनिवृत्तावपि विक्षेपशक्तिसहिताज्ञानमात्रस्योपादानत्वसम्प्रतिपत्तेः इत्याहुः।

नन्वधिष्ठानारोप्ययोः आरोपे प्रकाशमानत्वस्य सम्भावनाभाष्यटीकाविवरणादिषु [1]समर्थितत्वात् तद्विरोधः इत्याशङ्क्य, मतान्तरं तदविरुद्धमाह—**अपरेत्विति**। संभिन्नत्वं-तादात्म्यमिति यावत्। **अज्ञानमेवेति**। न तु विशेषांशाज्ञानं इत्येवकारार्थः। विशेषांशस्य आरोपे स्फुरणाभावेन तस्य अधिष्ठानत्वासम्भवादिति भावः। शुक्तित्वादिरूपविशेषदर्शनस्य अध्यासप्रतिबन्धकत्वात् तदभावविषयौ[2] पूर्वोक्तान्वयव्यतिरेकौ इति भावः। नन्विदमाकारवृत्त्या इदमंशाज्ञानस्य निवृत्तत्वात् कथमिदमंशस्याधिष्ठानत्वम्, अत आह—**तस्य चेति**। इदमंशाज्ञानस्येत्यर्थः। ननु अज्ञानस्यावरणांशमात्रनिवृत्तिः विक्षेपशक्त्या सह अनुवृत्तिश्च क्वापि न दृष्टा, अत आह—**जलप्रतिबिम्बेति**। **प्रपञ्चेति**। जीवन्मुक्तस्याप्यन्तःकरणादिप्रपञ्चप्रतीतेः सत्त्वादिति भावः। **सर्वात्मनेति**। रजतादिभ्रमस्थले हि सर्वात्मना अधिष्ठानसाक्षात्कारो नास्ति। शुक्तित्वादिविशेषरूपेण शुक्तिसाक्षात्काराभावात्। अतस्तत्र इदमंशाज्ञाननिवृत्तावपि विशेषांशाज्ञाननिवृत्त्यभावात् तस्य अध्यासोपादानत्वप्रसक्तिरस्ति। प्रतिबिम्बभ्रमस्थले तु 'जले वृक्षो नास्त्येव, ऊर्ध्वाग्र एवायं वृक्षः इति सर्वात्मना विशेषदर्शनस्य सत्त्वात् 'सामान्यांशाज्ञानं निवृत्तं विशेषांशाज्ञानमनिवृत्तं' इति विभागासम्भवेन विशेषांशाज्ञानमुपादानमिति वक्तुमशक्यम्। तस्मादत्र वृक्षाधोऽग्रत्वाध्यासानुरोधेन एकस्यैवाज्ञानस्य आवरणांशनिवृत्तावपि विक्षेपशक्तिमदज्ञानांशानुवृत्तिरुपेया। तथा जीवन्मुक्त्यवस्थायामपि ब्रह्मतत्त्वसाक्षात्कारात् आवर[णांश](ण)मात्रनिवृत्तिः विक्षेपशक्तिमदज्ञानांशानुवृत्तिश्च वाच्या। तथा रजताध्यासस्थलेऽपि इदमंशाज्ञानस्य उपादानत्वं सम्भवतीति भावः।

एवं बाह्यगोचरापरोक्षवृत्तीनां सर्वासामेव आवरणाभिभावकत्वनियमस्य भ्रमस्थलीयेदमाकारवृत्तौ या व्यभिचारशङ्का सा तत्रापि इदमंशाज्ञाननिवर्तकत्वस्य इदमंशावरणमात्रनिवर्तकत्वस्य वा सत्त्वात् इत्युपपादनेन निरस्ता। इदानीं प्रथममिदमाकारवृत्तिरेव भ्रमस्थले नास्ति तत्र व्यभिचारशङ्कातत्समाधाने तु दूरत एव निरस्ते इत्याह—**कवितार्किकेति**। **भ्रमरूपवृत्तीति**। पूर्वमतद्वये इदमाकारवृत्तेः सत्त्वात्तदभिव्यक्तचैतन्यरूपमेव

---

1. समर्थितत्वादिति। 'अध्यस्यमानेन समानेन्द्रियविज्ञानविषयत्वमेव अधिष्ठानस्य दृष्टम्' इति ग्रन्थेन समर्थितत्वात्। यद्यपि इदं आक्षेपोपपादनावसरे उक्तं, तथाऽपि समाधानावसरे अनिराकरणात् 'एकस्मिन् विज्ञाने द्वयोः संभिन्नतया अवभास एव अपेक्ष्यते विषयतयेति विशेषणायोगात्' इति अङ्गीकाराच्च 'समर्थितत्वात्' इति युक्तमेव।

2. तदभावविषयाविति। न च विवरणे अन्वयव्यतिरेकयोः प्रतिबन्धकाभावविषयत्वस्य निराकृतत्वात् तद्विरोध इति वाच्यम्। अज्ञानसामान्यान्वयव्यतिरेकयोः प्रतिबन्धकाभावविषयत्वस्यैव तत्र निराकरणात् विशेषांशाज्ञानान्वयव्यतिरेकयोः अत्र प्रतिबन्धकाभावविषयत्वोक्त्या विवरणाविरोधात् इति भावः।

भ्रमकारणीभूतेदंवृत्तिसद्भावे विवदमानानां मतनिरूपणम्

कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायास्तु 'इदंरजतं' इति **भ्रमरूपवृत्तिव्यतिरेकेण रजतोत्पत्तेः प्राक् इदमाकारा वृत्तिरेव नास्तीति तस्या अज्ञाननिवर्तकत्वसदसद्भावविचारं निरालम्बनं मन्यन्ते।**

तथाहि—न तावत् भ्रमरूपवृत्तिव्यतिरेकेण इदमाकारा वृत्तिः अनुभवसिद्धा। [1]ज्ञानद्वित्वाननुभवात्।

नापि अधिष्ठानसामान्यज्ञानमध्यासकारणं [2]इति कार्यकल्प्या। तस्याः तत्कारणत्वे मानाभावात्। न चाधिष्ठानसम्प्रयोगाभावे रजताद्यनुत्पत्तिस्तत्र मानम्। ततो दुष्टेन्द्रियसंप्रयोगस्यैवाध्यासकारणत्वप्राप्तेः। न च—संप्रयोगो न सर्वभ्रमव्यापी, अधिष्ठानस्फुरणं तु स्वतः

शुक्तिरजतादिज्ञानं, न तु वृत्तिरूपम्। अस्मिन् मते तदभावात् वृत्तिरूपमेव तज्ज्ञानमिति मन्तव्यम्। एतच्चाग्रे स्फुटं भविष्यति।

धर्मिज्ञानरूपामिदमाकारवृत्तिं निराकरोति—**तथाहीत्यादिना।** सा किमनुभवसिद्धा, उत कार्यकल्प्या, अथवा सामग्रीकल्प्या। नाद्य इत्याह—**न तावदिति। ज्ञानद्वित्वेति।** 'इदमित्येकं ज्ञानम्, इदंरजतमितिज्ञानमपरम्' इत्यनुभवाभावादित्यर्थः।

द्वितीयं निराकरोति—**नाप्यधिष्ठानेति।** अध्यासरूपं कार्यं स्वकारणमधिष्ठानगोचरसामान्यज्ञानमन्तरेणानुपपद्यमानं सत् तत् कल्पयति, ततश्चाधिष्ठानसामान्यज्ञानरूपा इदमाकारवृत्तिस्सिध्यति - इत्यपि न मन्तव्यम्, अधिष्ठानसामान्यज्ञानस्य अध्यासकारणत्वे मानाभावादित्यर्थः। मानाभावोऽसिद्ध इति **शङ्कते—न चेति।** इदमर्थस्य चक्षुरादिभिः सम्प्रयोगे सति रजतादिरूपस्याध्यासस्योत्पत्तिः नान्यथा इत्यनुभवसिद्धम्। तथा च उक्तान्वयव्यतिरेकाभ्यामधिष्ठानसामान्यज्ञानस्य रजताद्यध्यासं प्रति कारणत्वं सिद्ध्यति। न च उक्तान्वयादिना सम्प्रयोगस्यैवाध्यासकारणत्वं सिद्ध्यति न धर्मिज्ञानस्येति वाच्यम्। तथासति अहङ्काराद्यध्यासे सम्प्रयोगासम्भवेन व्यभिचारापत्तेः। अतः सम्प्रयोगस्याध्यासं प्रति कारणत्वग्राहकाभ्यामेवान्वयव्यतिरेकाभ्यां शुक्तिरजताद्यध्यासस्थले धर्मिज्ञानस्यैव सम्प्रयोगसाध्यस्य कारणत्वं कल्प्यते। तथा च अधिष्ठानसामान्यज्ञानस्याध्यासकारणत्वे उक्तान्वयव्यतिरेकौ प्रमाणं भवत एवेति गूढाभिसन्धिः। अभिसन्धिमज्ञात्वा दूषयति—**तत इति।** उक्तान्वयादित इत्यर्थः। सम्प्रयोगमात्रस्य प्रमास्थलसाधारणत्वात् दुष्टेत्युक्तम्। धर्मिज्ञानकारणवादी स्वाभिसन्धिमाविष्करोति—**न च सम्प्रयोग इति।** अधिष्ठानसामान्यज्ञानस्य सम्प्रयोगस्यैव न

---

1. ज्ञानद्वित्वाननुभवात् इति। अत एव-सामान्यप्रत्यासत्त्या सन्निकृष्टांशे लौकिकात्मकं असन्निकृष्टांशे अलौकिकात्मकं च एकमेव ज्ञानं जन्यते, न तु - प्रथमं सन्निकृष्टमात्रविषयकं लौकिकं अनन्तरं सर्वविषयकं अलौकिकं, ज्ञानद्वित्वाननुभवात्-इति नव्यतार्किकैरुक्तं सामान्यलक्षणाप्रकरणे।

2. इति कार्यकल्प्येति। इतिनिश्चयप्रयोज्या अध्यासरूपकार्यहेतुका या अर्थापत्तिरूपा कल्पना तद्विषय इत्यर्थः। उक्तकार्यकारणभावनिश्चयस्य अनुकूलतर्कविधया प्रयोजकत्वं बोध्यम्। अथवा इतिः हेतौ। एतस्मात् कारणात् इत्यर्थः।

प्रकाशमाने प्रत्यगात्मनि अहंकाराद्यध्यासमपि व्याप्नोतीति—वाच्यम्। तस्यापि घटाद्यध्यासाव्यापित्वात्। घटादिप्रत्यक्षात् प्राक् तदधिष्ठानभूतनीरूपब्रह्ममात्रगोचरचाक्षुषवृत्तेरसम्भवात्। स्वरूपप्रकाशस्यावृतत्वात्। आवृतानावृतसाधारण्येनाधिष्ठानप्रकाशमात्रस्याध्यासकारणत्वे शुक्तीदमंशसंप्रयोगात् प्रागपि तदवच्छिन्नचैतन्यरूपप्रकाशस्यावृतस्य सद्भावेन तदाप्यध्यासापत्तेः।

न च—अध्याससामान्ये अधिष्ठानप्रकाशसामान्यं हेतुः प्रातिभासिकाध्यासेऽभिव्यक्ताधिष्ठानप्रकाशः इति नातिप्रसंगः, सामान्ये सामान्यस्य विशेषे विशेषस्य हेतुत्वौचित्यादिति-वाच्यम्। एवमपि प्रातिभासिकशङ्खपीतिमकूपजलनैल्याद्यध्यासाव्यापनात्, रूपानुपहितचाक्षुषप्रत्ययायोगेन

व्यभिचार इत्याह—**अधिष्ठानस्फुरणं त्विति**। सम्प्रयोगवैलक्षण्यार्थः तुशब्दः। अधिष्ठानस्फुरणं कर्तृ। शुक्तिरजताद्यध्यासमिव अहङ्काराद्यध्यासमपि व्याप्नोतीत्यर्थः। **स्वत इति**। बाह्यचैतन्यस्यावृतत्वात् वृत्तिकृतं तत्र अधिष्ठानस्फुरणम्, साक्षिचैतन्यस्यानावृतत्वात् अहङ्काराद्यध्यासे स्वप्नप्रपञ्चाध्यासे च तत् स्वतस्सिद्धमित्यर्थः। अधिष्ठानसामान्यज्ञानस्यापि व्यभिचारमाह—**तस्यापीति**। उक्तज्ञानं तच्छब्दार्थः। घटाद्यध्यासव्यापित्वाभावादित्यर्थः। तथा च धर्मिज्ञानं नाध्यासकारणमिति भावः। अव्यापित्वशब्दितं व्यभिचारमेवोपपादयति—**घटादीत्यादिना**। घटाद्यध्यासस्थले शुक्तिरजताध्यासस्थल इव किं वृत्तिकृतमधिष्ठानस्फुरणम्, अहङ्काराद्यध्यासस्थल इव स्वतस्सिद्धं वा। नाद्य इत्याह—**घटादिप्रत्यक्षादिति**। तत्पदं घटादिपरम्। न द्वितीय इत्याह—**स्वरूपेति**। ननु - अधिष्ठानप्रकाशमात्रमध्यासे कारणं लाघवात्, न त्वभिव्यक्ताधिष्ठानप्रकाशः। तथा च 'सन् घटः, सन् पटः' इत्यादिरूपेष्वध्यासेषु घटाद्यधिष्ठानस्य सद्रूपस्य ब्रह्मणः स्वप्रकाशत्वात् अधिष्ठानप्रकाशमात्रं तत्राप्यस्तीति न व्यभिचारः-इत्याशङ्क्याह—**आवृतानावृतेति**। **तदापीति**। सम्प्रयोगात्प्राक्कालेऽपीत्यर्थः।

धर्मिज्ञानकारणवादी शङ्कते—**नचाध्याससामान्य इति**। **प्रातिभासिकेति**। अभिव्यक्ताधिष्ठानस्फुरणं प्रातिभासिकाध्यासेष्वेव कारणं [1]आचार्याणामभिप्रेतम्। तेष्वेव दोषसम्प्रयोगसंस्काररूपकारणत्रयजन्यताया अध्यासभाष्यटीकाविवरणादिषु व्यवस्थापितत्वेन सम्प्रयोगकारणताग्राहकप्रमाणलभ्याधिष्ठानापरोक्ष्यस्य[2] तेष्वेव कारणत्वसिद्धेरित्यर्थः। प्रकाशपदानन्तरं हेतुपदमनुषञ्जनीयम्। **नातिप्रसङ्ग इति**। न सम्प्रयोगात्प्राक् रजताद्यध्यासप्रसङ्ग इत्यर्थः। रजताद्यध्यासस्य प्रातिभासिकत्वेन तदधिष्ठानापरोक्ष्याय सम्प्रयोगाधीनवृत्तेरपेक्षितत्वादिति भावः। **औचित्यादिति**। तथा च धर्मिज्ञानस्याध्यासकारणत्वे सम्प्रयोगकारणताग्राहकान्वयादेः प्रमाणस्य सत्त्वात् बाधकाभावाच्च तस्याध्यासकारणत्वसिद्धौ इदमाकारा वृत्तिः सिद्धेति भावः। अभिव्यक्ताधिष्ठानप्रकाशस्य प्रातिभासिकाध्यासेष्वपि सर्वत्र व्याप्तिर्नास्तीति कवितार्किकमतानुवर्ती दूषयति—**एवमपीति**। अधिष्ठानापरोक्ष्यस्य प्रातिभासिकाध्यासमात्रहेतुत्वे स्वीकृतेऽपीत्यर्थः। धर्मिज्ञानकारणवादे हि प्रथमं इदमित्येवमा-

---

1. आचार्याणां - मूलकाराणां - सिद्धान्तलेशसङ्ग्रहकर्तॄणाम्।
2. अधिष्ठानापरोक्ष्यस्य - अभिव्यक्ताधिष्ठानस्फुरणस्य। अधिष्ठानविषयकापरोक्षज्ञानस्येत्यर्थः।

तदानीं शङ्खादिगतशौक्ल्योपलम्भाभावेन च अध्यासात् प्राक् शङ्खादिरूपाधिष्ठानगोचरवृत्त्यसम्भवात्।

न च प्रातिभासिकेष्वपि रजताद्यध्यासमात्रे निरुक्तो विशेषहेतुरास्तामिति वाच्यम्। तथासति सम्प्रयोगात् प्राक् पीतशङ्खाद्यध्यासाप्रसङ्गाय तदध्यासे दुष्टेन्द्रियसम्प्रयोगः कारणमित्य-

---

कारा वृत्तिरुदेति, तया च वृत्त्या अभिव्यक्ते शङ्खजलाद्यवच्छिन्नचैतन्ये पीतनीलरूपादेरध्यास :- इति प्रक्रिया। तथा च तत्र इदमाकारा वृत्तिः किं शङ्खादिद्रव्यमात्रं विषयीकरोति, किं वा रूपविशिष्टं द्रव्यम्? नाद्य इत्याह— **रूपानुपहितेति**। रूपाविषयकद्रव्यचाक्षुषवृत्तिर्न सम्भवति, इतरथा वाय्वादेरपि चाक्षुषत्वापत्तेः इति भावः। द्वितीयेऽपि किं शुक्लरूपविशिष्टं द्रव्यं विषयीकरोति, किं वा आरोप्यरूपविशिष्टम्? न द्वितीयः- आरोप्यरूपविशिष्टशङ्खादिवृत्तेरेव भ्रान्तित्वेन तस्याः धर्मिज्ञानत्वाभावात्। नाद्य इत्याह— **तदानीमिति**। अध्यासात्पूर्वकाल इत्यर्थः। तदानीं शौक्ल्योपलम्भे च अध्यासाभावप्रसङ्गादिति भावः। **असम्भवादिति**। तथा च अभिव्यक्ताधिष्ठानस्फुरणस्य तत्रासम्भवात् व्यभिचारेण धर्मिज्ञानं नाध्यासकारणमिति भावः।

ननु-अध्यासात्पूर्वं द्रव्यमात्ररूपेण शङ्खादिगोचरचाक्षुषवृत्तिरुदेत्येव। द्रव्यगोचरचाक्षुषवृत्तौ रूपविषयकत्वनियमस्याप्रयोजकत्वात्। न चैवं वाय्वादेरपि चाक्षुषत्वप्रसङ्गः। द्रव्यचाक्षुषे द्रव्यगतोद्भूतरूपस्य नियामकत्वात्, अध्यासात् पूर्वकाले द्रव्यग्रहणेऽपि शुक्तित्वादेरिव दोषबलात् सन्निकृष्टस्यापि शुक्लरूपमात्रस्य अग्रहणोपपत्तेश्च। [1]तदुक्तं भामत्यां—'शङ्खं च दोषाच्छादितशुक्लिमानं द्रव्यमात्रस्वरूपं गृहीत्वा'इति। शुक्लिमा- शुक्लरूपमित्यर्थः। अस्तु वा तत्र शुक्लरूपविशिष्टशङ्खादिग्रहणम्। तथापि नाध्यासानुपपत्तिः। दोषबलेन रूपगतशुक्लत्वजातिग्रहणप्रतिबन्ध[2]मात्रेणापि तदुपपत्तेः। तथा च प्रातिभासिकाध्यासेषु अभिव्यक्ताधिष्ठानस्फुरणस्य व्यभिचाराभावात् धर्मिज्ञानरूपा इदमाकारवृत्तिः सिद्धा भवति। तत्सिद्धौ च तस्यामावरणनिवर्तकत्वसद- सद्भावचिन्ता सालम्बनैवाचार्याणां न निरालम्बना - इति चेत्, सत्यम्। अस्मिन्मते [3]अयमेवास्वरसः 'उपाध्याया मन्यन्ते' इत्यनेन सूचितः।

पीतशङ्खादिभ्रमस्थले वस्तुतो व्यभिचाराभावेऽपि तमभ्युपगम्य धर्मिज्ञानकारणवादी शङ्कते— **न च प्रातिभासिकेष्वपीति। निरुक्त इति।** अभिव्यक्ताधिष्ठानप्रकाश इत्यर्थः। **तथासतीति।** पीतशङ्खाद्यध्यासेषु अभिव्यक्ताधिष्ठानप्रकाशस्य हेतुत्वानुपगमे सति इत्यर्थः। अधिष्ठानापरोक्ष्यवत् सम्प्रयोगस्यापि पीतशङ्खाद्यध्यासेषु कारणत्वानुपगमे सम्प्रयोगात् प्रागपि पीतश्शङ्ख इत्याद्यध्यासप्रसङ्गः, अतस्तत्परि-

---

1. तदुक्तं भामत्यामिति। 'शङ्खं च दोषाच्छादितशुक्लिमानं अनुभवन्' इति अध्यासलक्षणभाष्यभामत्या- मुक्तम्। 'शङ्खोऽपि दोषवशात् शुक्लगुणरहितः स्वरूपमात्रेण गृह्यते' इति अख्यातिवादभाष्यभामत्यां उक्तम्।

2. शुक्लत्वजातिग्रहणप्रतिबन्धेति। नन्वेवं - शुक्लरूपस्य स्वरूपतो भानं आपद्येत, न चैतद्युक्तम्, जात्यखण्डो- पाध्यतिरिक्तस्य निरवच्छिन्नप्रकारत्वासम्भवात् अननुभवाच्च इति चेत्, मैवम् - स्वाश्रयसंसृष्टपित्तगतेन पीतत्वेन रूपेण शुक्लरूपस्य भानाभ्युपगमात्।

3, अयमेवेति - एवकारः अप्यर्थे। अथ वा-सूचितएवेति सम्बन्धः।

वश्यं वक्तव्यतया तस्यैव सामान्यतः प्रातिभासिकाध्यासमात्रे लाघवात् कारणत्वसिद्धौ तत एव रजताद्यध्यासकादाचित्कत्वस्यापि निर्वाहात् अधिष्ठानप्रकाशस्य सामान्यतो विशेषतो वाऽध्यासकारणत्वस्यासिद्धेः ।

हाराय तत्र सम्प्रयोगस्य कारणत्वमवश्यं वाच्यमित्यर्थः । ततः किं, तत्राह—**तस्यैवेति ।** दुष्टेन्द्रियसम्प्रयोगस्यैवेत्यर्थः । सामान्यत इत्युक्तं सामान्यमेव दर्शयति—**प्रातिभासिकाध्यासमात्र इति ।** प्रातिभासिकाध्यासत्वमेव दुष्टेन्द्रियसंप्रयोगकार्यतावच्छेदकम्, लाघवात्, न तु पीतशङ्खाद्यध्यासत्वम्, [1]गौरवादित्यर्थः । ततोऽपि किं, तत्राह—**तत एवेति ।** सम्प्रयोगात् प्राक् पीतशङ्खाद्यध्यासप्रसङ्गपरिहाराय [2]तत्र सामान्यतः क्लृप्तात् दुष्टेन्द्रियसम्प्रयोगादेवेत्यर्थः । **कादाचित्कत्वस्यापीति ।** सदा रजताद्यध्यासप्रसङ्गपरिहाराय अभिव्यक्ताधिष्ठानप्रकाशस्य रजताद्यध्यासकारणत्वं वाच्यम्, तथासति शुक्त्यवच्छिन्नचैतन्यरूपस्याधिष्ठानप्रकाशस्य आवृततया सदा तदभिव्यक्तेरभावेन सदा रजताद्यध्यासप्रसङ्गपरिहारोपपत्तेः - इति हि धर्मज्ञानकारणतावादिनस्तवाभिप्रायः । स चातिप्रसङ्गपरिहारः पीतशङ्खाद्यध्यासस्थले क्लृप्तात् [3]सम्प्रयोगादेव लभ्यत इत्यर्थः । **सामान्यत इति ।** अधिष्ठानप्रकाशमात्रं अध्यासमात्रे कारणम्, अभिव्यक्ताधिष्ठानप्रकाशः प्रातिभासिकाध्यासे कारणं - इति पूर्वोक्तकार्यकारणभावद्वयमपि न सिध्यतीत्यर्थः ।

ननु - 'तस्यैव सामान्यतः प्रातिभासिकाध्यासमात्रे लाघवात् कारणत्वसिद्धौ' इत्ययुक्तम्, अहङ्काराद्यध्यासे साक्षिचैतन्ये स्वप्नाध्यासे च सम्प्रयोगासम्भवेन व्यभिचारात् । न च अहङ्काराद्यध्यासस्य [4]व्यावहारिकत्वमते तत्र व्यभिचारो न दोष इति वाच्यम् । तथापि तत्प्रातिभासिकत्वमते[5] दोषपरिहारासम्भवात्, साक्षिणि स्वप्नाध्यासे प्रातिभासिकत्वस्य [6]सम्प्रतिपन्नतया तत्र उक्तव्यभिचारस्य दृढत्वाच्च । न च - स्वप्नाध्यासे अभिव्यक्ताधिष्ठानस्फुरणं कारणम्, अन्यथा स्वप्नप्रपञ्चस्यापरोक्ष्याभावप्रसङ्गात्, बाह्यप्रातिभासिकाध्यासेषु तु

---

1. गौरवादिति । पीतशङ्खाध्यासत्वं लोहितस्फटिकाध्यासत्वं कूपजलनैल्याध्यासत्वं इत्यादिकार्यतावच्छेदकभेदेन अनेककार्यकारणभावकल्पने गौरवादित्यर्थः ।

2. तत्र सामान्यतः क्लृप्तात् - पीतशङ्खाद्यध्यासगतप्रातिभासिकाध्यासत्वरूपसामान्यधर्मावच्छिन्नकार्यतानिरूपितकारणतावत्त्वेन निश्चितात् ।

3. सम्प्रयोगादेवेति । अत एव - धूमेन्द्रियलौकिकसन्निकर्षविरहदशायामपि सन्निकृष्टासन्निकृष्टसर्वविषयकस्य लौकिकालौकिकात्मकस्य ज्ञानस्य उत्पत्त्यापत्तिमाशङ्क्य 'अपेक्षणीयं च तदिन्द्रियकरणकतद्धर्मवत्त्वबोधसामग्र्यन्तरम्' इति ग्रन्थेन संप्रयोगकारणत्वेनैव उक्तापत्तिपरिहारः कृतो नव्यतार्किकैः ।

4. व्यावहारिकत्वमते—ब्रह्मज्ञानेतरज्ञानबाध्यत्वं प्रातिभासिकत्वे प्रयोजकं इति वादिनां मते ।

5. प्रातिभासिकत्वमते—केवलसाक्षिभास्यत्वं प्रातिभासिकत्वे प्रयोजकं इति वादिनां मते ।

6. सम्प्रतिपन्नतया—उक्तमतद्वयानुसारं प्रातिभासिकत्वप्रयोजकयोः ब्रह्मज्ञानेतरज्ञानबाध्यत्वकेवलसाक्षिभास्यत्वयोः स्वप्नाध्यासे उभाभ्यां अङ्गीकृतत्वेन ।

ननु—सादृश्यनिरपेक्षे अध्यासान्तरे अकारणत्वेऽपि तत्सापेक्षे रजताद्यध्यासे रजतादिसादृश्यभूतरूपविशेषादिविशिष्टधर्मिज्ञानरूपमधिष्ठानसामान्यज्ञानं कारणमवश्यं वाच्यम्। दुष्टेन्द्रियसम्प्रयोगमात्रस्य कारणत्वे शुक्तिवत् इङ्गालेऽपि रजताध्यासप्रसङ्गात्। न च सादृश्यमपि विषयदोषत्वेन कारणमिति वाच्यम्। विसदृशेऽपि सादृश्यभ्रमे सति अध्याससद्भावात्। जलधिसलिलपूरे दूरे नीलशिलातलत्वा (ध्या) रोपदर्शनात्। न च तद्धेतोरेवेति न्यायात् सादृश्यज्ञान-

---

दुष्टेन्द्रियसम्प्रयोगः कारणमिति न तस्य व्यभिचार इति - वाच्यम्। प्रातिभासिकाध्यासमात्रे [1]त्वदुक्तलाघवेन अभिव्यक्ताधिष्ठानप्रकाशस्य कारणत्वौचित्यात्, बाह्याध्यासेषु सम्प्रयोगस्य अधिष्ठानचैतन्याभिव्यञ्जकवृत्त्युत्पादकतया चारितार्थ्यसम्भवाच्च, पीतशङ्खाद्यध्यासस्थलेऽपि अधिष्ठानचैतन्याभिव्यञ्जकवृत्तिसम्भवस्य दर्शितत्वाच्च - इति चेत्, सत्यम् - सूक्ष्मदृष्ट्या विचार्यमाणे एवमेव। स्थूलदृष्ट्या तु सम्प्रयोगस्य लाघवात् प्रातिभासिकाध्यासमात्रे कारणत्वमुक्तमिति मन्तव्यम्।

शुक्तिरजताद्यध्यासात्प्रागिदमाकारवृत्तिसिद्धये प्रकारान्तरेण धर्मिज्ञानस्य कारणत्वं शङ्कते—**ननु सादृश्येति। अध्यासान्तर इति।** पीतशङ्खाद्यध्यास इत्यर्थः। शङ्खादेः पीतरूपादेश्च सादृश्याभावादिति भावः। तत्पदं सादृश्यपरम्। रजतादिना सह शुक्त्यादेः सादृश्यभूतो यो रूपविशेषादिः तद्विशिष्टधर्मीत्यर्थः। स्थाण्वादौ पुरुषाद्यध्यासापेक्षितमूर्ध्वत्वादिकं आदिशब्दार्थः। **सम्प्रयोगमात्रस्येति।** सादृश्यानपेक्षायामिति मात्रशब्दार्थः। अग्निदग्धं नीलरूपवत्काष्ठं इङ्गालशब्दार्थः। ननु - अपेक्षितमपि सादृश्यं [2]स्वरूपसदेवाध्यासकारणं, तावता उक्तातिप्रसङ्गनिरासात्। न ज्ञातं सत् कारणम्। तथा च न धर्मिज्ञानस्य कारणत्वसिद्धिः इति मत्वा शङ्कते—**न च सादृश्यमपीति।** स्वरूपसतः कारणत्वे सादृश्यभ्रमादध्यासो न स्यात्। सादृश्यभ्रमस्थले स्वरूसतः सादृश्यस्य अभावात्। अतः सादृश्यज्ञानं [3]भ्रमप्रमासाधारणमध्यासकारणं वाच्यमिति तद्विशिष्टधर्मिज्ञानसिद्धिरिति धर्मिज्ञानकारणवादी परिहरति—**विसदृशेऽपीति।** तत्रोदाहरणमाह-**जलधिसलिलपूर इति।** प्रवाहः पूरशब्दार्थः। जलस्य वस्तुतश्शुक्लरूपवत्त्वान्नीलशिलातलसादृश्यं नास्ति। अतस्सादृश्यभ्रमात् नीलशिलातलत्वारोप इति भावः। ननु-धर्मिज्ञानकारणतापक्षेऽपि तत्सामग्रीत्वेन दुष्टेन्द्रियसंप्रयोगोऽवश्यं वाच्यः। तथा च आवश्यकत्वादध्यासविशेषकारणतावच्छेदकं सादृश्यज्ञानसामग्रीत्वमेव, न तु सादृश्यज्ञानत्वम्; ततश्च न धर्मिज्ञानसिद्धिः-इत्याशयेन इङ्गाले रजताध्यासप्रसङ्गं [4]विस्मृत्य शङ्कते—**न च तद्धेतोरेवेति।** [5]'तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किं तेन' इति न्यायादित्यर्थः। धर्मिज्ञानवादी निराकरोति—

---

1. त्वदुक्तलाघवेन प्रातिभासिकाध्यासमात्रे कारणत्वौचित्यादिति संबन्धः। त्वदुक्तलाघवेन—अनुपदं त्वदुक्तेन कार्यतावच्छेदकैकत्वलाघवेन।

2. स्वरूपसदेव - अज्ञायमानमेव। 3. भ्रमप्रमासाधारणम् - भ्रमप्रमान्यतरात्मकम्।

4. विस्मृत्येति। क्षणमात्रविस्मरणमेतत्। अनुपदमेव नचेतिशङ्कावसरे स्मरिष्यति।

5. मध्यवर्तिपदार्थः प्रथमतत्पदार्थः। कार्यं द्वितीयतत्पदार्थः। मध्यवर्ती तृतीयतत्पदार्थः।

सामग्र्येवाध्यासकारणमस्त्विति युक्तम् । ज्ञानसामग्र्या अर्थकारणत्वस्य क्वचिदप्यदृष्टेः, ततः सादृश्यज्ञानस्यैव लघुत्वाच्च । न च - स्वतश्शुभ्रेऽपि शुभ्रकलधौतभृङ्गारगतेऽपि स्वच्छे जल एव नैल्याध्यासः न मुक्ताफले इति व्यवस्थावत् वस्तुस्वभावादेव शुक्तौ रजताध्यासः नेङ्गालादौ इति व्यवस्था, न तु सादृश्यज्ञानापेक्षणात् - इति वाच्यम् । स्वतः पटखण्डे पुण्डरीकमुकुलत्वानध्यासेऽपि तत्रैव कर्तनादिघटिततदाकारे तदध्यासदर्शनेन तदध्यासस्य वस्तुस्वभावमननुरुध्य सादृश्यज्ञानभावाभावानुरोधित्वनिश्चयात् । अन्यथा अन्यदापि तत्र तदध्यासप्रसङ्गात्—

उच्यते—सादृश्यज्ञानस्याध्यासकारणत्ववादेऽपि [1]विशेषदर्शनप्रतिबध्येषु रजताद्यध्यासेष्वेव तस्य कारणत्वं वाच्यम् । न तु तदप्रतिबध्येषु पीतशङ्खाद्यध्यासेषु । असम्भवात् । विशेष-

---

ज्ञानसामग्र्या इति । धर्मिज्ञानकारणतामते हि धर्मिज्ञानं [2]रजतादिरूपार्थोत्पत्तौ कारणमिष्यते । तथा च तद्धेतोरेवेति न्यायेन धर्मिज्ञानसामग्रीभूतसम्प्रयोगस्य कारणत्वमुच्यमानं रजताद्यर्थोत्पत्तावेव भवेत् । तच्च न सम्भवति, सन्निकर्षस्य ज्ञान इव विषयोत्पत्तौ कारणतायाः क्वचिदप्यक्लृप्तत्वात् इत्यर्थः । **तत इति ।** सादृश्यज्ञानसामग्रीत्वापेक्षया सादृश्यज्ञानत्वस्यैव कारणतावच्छेदकत्वे लाघवादित्यर्थः । तथा च धर्मिज्ञानसिद्धिरिति भावः । सादृश्यज्ञानस्याध्यासविशेषे कारणत्वाभावेऽपि व्यवस्थासम्भवात् न धर्मिज्ञानसिद्धिरिति मत्वा पुनश्शङ्कते—**न च स्वत इति ।** जलस्य मुक्ताफलस्य च नैल्येन सादृश्याभावे समानेऽपि जल एव नैल्याध्यासो दृश्यते न मुक्ताफल इति व्यवस्थायां जलादिवस्तुस्वभाव एव हेतुः, नान्यइत्यर्थः । ननु पात्रगतनैल्यसन्निधानं जले तदध्यासे नियामकं न स्वभावः, इत्यत आह—**शुभ्रकलधौतेति ।** निर्मलसौवर्णपात्रविशेषगतेऽपीत्यर्थः । नन्वेवमपि जलगतनीलरूपवद्द्रव्यसंसर्गात्तत्रैव तदध्यास इति, नेत्याह—**स्वतश्शुभ्रेऽपीति ।** जलविशेषणमिदम् । स्वतश्शुभ्रपदव्याख्यानं स्वच्छ इति पदम् । एवं क्वचित् स्वभावस्यैवाध्यासप्रयोजकत्वे क्लृप्ते फलितमाह—**वस्तुस्वभावादेवेति ।** उक्ते पीतशङ्खाध्यास इव भृङ्गारगतजले नैल्याध्यासे सादृश्यज्ञानानपेक्षत्वेऽपि पुण्डरीकमुकुलत्वाध्यासे तदपेक्षाया अन्वयव्यतिरेकसिद्धत्वेन तद्वच्छुक्तिरजताद्यध्यासेऽपि सादृश्यज्ञानभावाभावाभ्यामेव व्यवस्था, न तु वस्तुस्वभावात् । अगतिकगतित्वाद्वस्तुस्वभावाश्रयणस्य । तथा च धर्मिज्ञानकारणतासिद्धिरप्रत्यूहा-इति मत्वा दूषयति-**स्वतः पटखण्ड इति ।** पुण्डरीकस्य-कमलस्य या मुकुलत्वावस्था तस्या अनध्यासेऽपीत्यर्थः । तत्रैव-पटखण्ड एव । कर्तनादिना घटितः - सम्पादितः तदाकारः-पुण्डरीकमुकुलत्वाकारो यस्य पटखण्डस्य स तथा,

---

1. विशेषदर्शनप्रतिबध्येष्विति । नव्यनैयायिकमतेनेदम् । तथा हि मतत्रयमत्र - संशयविपर्ययोत्तरप्रत्यक्षनिश्चये विशेषदर्शनं कारणं-इत्येकं मतम् । प्रत्यक्षनिश्चयनिरूपितायां संशयविपर्ययनिष्ठप्रतिबन्धकतायां विशेषदर्शनं उत्तेजकम्, विशेषदर्शनाभावविशिष्टस्य संशयविपर्ययान्यतरस्य प्रत्यक्षनिश्चयविरोधित्वात्-इत्यपरं मतम् । विशेषदर्शनं संशयविपर्ययोः विरोधि, तेन संशये विपर्यये च ध्वस्ते स्वसामग्रीवशात् प्रत्यक्षनिश्चयो जायते इति नव्यानां मतम् । स्पष्टं चैतत् अनुमिति-प्रकरणे ।

2. रजतादिरूपार्थोत्पत्ताविति । सादृश्यविशिष्टधर्मिज्ञानस्य रजतोपादानाविद्यासहकारिसंस्कारोद्बोधनद्वारा रजतादिरूपार्थोत्पत्तौ कारणत्वमिति भावः ।

दर्शनप्रतिबध्येषु च प्रतिबन्धकज्ञानसामग्र्याः प्रतिबन्धकत्वनियमेन विशेषदर्शनसामग्र्यप्यवश्यं प्रतिबन्धिका वाच्येति तत एव सर्वव्यवस्थोपपत्तेः किं सादृश्यज्ञानस्य कारणत्वकल्पनया। तथाहि-इङ्गालादौ चक्षुःसम्प्रयुक्ते तदीयनैल्यादिरूपविशेषदर्शनसामग्रीसत्त्वात् न रजताध्यासः। शुक्त्यादावपि नीलभागादिव्यापिचक्षुःसम्प्रयोगे तत्सत्त्वात् न तदध्यासः। सदृशभागमात्रसम्प्रयोगे तदभावादध्यासः।

तस्मिन्नित्यर्थः। **तदध्यासेति**। पुण्डरीकमुकुलत्वाध्यासेत्यर्थः। तदध्यासस्यानुरोधित्वनिश्चयात् इति सम्बन्धः। **अन्यथेति**। वस्तुस्वभावस्यैव तदध्यासकारणत्वे इत्यर्थः। **अन्यदापीति**। कर्तनादिना तदाकारसम्पादनात् प्रागपीत्यर्थः।

'ननु सादृश्यनिरपेक्षेऽध्यासान्तरे अकारणत्वेऽपि' इत्यादिना सादृश्यज्ञानस्य अध्यासविशेषे कारणताप्रसाधनद्वारा प्रायं धर्मिज्ञानस्य कारणत्वमावश्यकमिति पूर्वपक्षं कवितार्किकमतानुवर्ती निराकरोति—**उच्यत इत्यादिना। न त्विति**। 'पीतत्वाभावव्याप्यशङ्खत्ववानयं' 'नैल्याभावव्याप्यजलत्ववदिदं' इत्यादिरूपविशेषदर्शनाप्रतिबध्येष्वित्यर्थः। उक्तविशेषदर्शने सत्यपि 'पीतश्शङ्खः' 'नीलं जलं' इत्यध्यासदर्शनादिति भावः। **असम्भवादिति**। वस्तुतस्सादृश्यस्य तत्रासम्भवात् पुण्डरीकमुकुलत्वभ्रमवत् सादृश्यज्ञानाननुरोधित्वाच्च इत्यर्थः। ततः किं, तत्राह—**विशेषदर्शनप्रतिबध्येषु चेति**। प्रतिबन्धकसामग्र्याः प्रतिबन्धकत्वोक्तौ दाहप्रतिबन्धकमण्यादिसामग्र्याः दाहप्रतिबन्धकत्वप्रसङ्गः, तद्वारणाय ज्ञानपदम्। मण्यादेः प्रतिबन्धकज्ञानत्वाभावान्नातिप्रसङ्गः। ज्ञानसामग्र्याः प्रतिबन्धकत्वोक्तौ धर्मिज्ञानसामग्रीभूतसम्प्रयोगस्य अध्यासप्रतिबन्धकत्वप्रसङ्गः, तद्वारणाय प्रतिबन्धकेति ज्ञानविशेषणम्। धर्मिज्ञानस्य च अध्यासानुगुणत्वेन प्रतिबन्धकज्ञानत्वाभावात् नोक्तातिप्रसङ्गः। तथा च पक्षे साध्याभाववत्ताज्ञानं ग्राह्याभावावगाहित्वादनुमितिं प्रति साक्षात् प्रतिबन्धकम्, तत्र साध्याभावव्याप्यवत्त्वज्ञानं प्रतिबन्धकज्ञानसामग्रीत्वेन अनुमितिप्रतिबन्धकमिति व्यवस्था [1]प्रसिद्धेत्यर्थः। **तत एवेति**। प्रतिबन्धकज्ञानसामग्र्याः प्रतिबन्धकत्वस्वीकारादेवेत्यर्थः। **किमिति**। तथा च धर्मिज्ञानरूपा इदमाकारा वृत्तिर्न सिद्ध्यतीति भावः। सादृश्यज्ञानस्याकारणत्वे पूर्वोक्तातिप्रसङ्गं परिहरति—**इङ्गालादाविति**। इङ्गालगतनैल्यादिः विशेषः, तद्दर्शनसामग्री च चक्षुस्संयुक्तेङ्गालतादात्म्यरूपा अत्रास्तीति बोध्यम्। **नीलभागादीति**। त्रिकोणभागसङ्ग्रहार्थमादिपदम्। **तत्सत्त्वादिति**। विशेषदर्शनसामग्रीसत्त्वादित्यर्थः। **न तदिति**। तत्पदं रजतादिपरम्। ननु यदि शुक्तिसंप्रयोगकाले रजताध्यासाभावः तर्हि संप्रयोगोऽप्यध्यासकारणं न स्यादिति, नेत्याह—**सदृशभागमात्रेति। तदभावादिति।**

---

1. प्रसिद्धेति। न्यायसमये प्रसिद्धेत्यर्थः। उक्तं च सत्प्रतिपक्षप्रकरणे - 'दूषकताबीजं तु समानबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वम्' इति। यद्यपि उक्तमणिग्रन्थः साध्याभावव्याप्यवत्ताज्ञानस्यापि तत्त्वेन साक्षादनुमितिप्रतिबन्धकत्वप्रतिपादकत्वेन व्याख्यातो दीधितिकृता, तथाऽपि यथाश्रुतमणिग्रन्थानुसारेण इयमुक्तिः। सामान्यप्रत्यासत्तिजन्यालौकिकप्रत्यक्षस्थले विशेषदर्शनस्थले च दीधितिकृन्मतानुसारिणोऽपि इमे कवितार्किकाः अत्र तन्मतं नानुसरन्ति इति ध्येयम्।

तदापि शुक्तित्वरूपविशेषदर्शनसामग्रीसत्त्वादनध्यासप्रसङ्ग इति चेत्, न - अध्याससमये शुक्तित्वदर्शनाभावेन तत्पूर्वं तत्सामग्र्यभावस्य त्वयाऽपि वाच्यत्वात् ।

मम सादृश्यज्ञानरूपाध्यासकारणदोषेण प्रतिबन्धात् तदा शुक्तित्वदर्शनसामग्र्यभावाभ्युपगमः, तव तथाभ्युपगमे तु [1]घट्टकुटीप्रभातवृत्तान्त इति चेत्, न-समीपोपसर्पणानन्तरं रजतसादृश्यरूपे चाकचक्ये दृश्यमान एव शुक्तित्वोपलम्भेन तस्य तत्सामग्रीप्रतिबन्धकत्वासिद्धौ

नैल्यादिदर्शनसामग्र्यभावादित्यर्थः । शङ्कते—**तदापीति** । सदृशभागमात्रसम्प्रयोगकालेऽपीत्यर्थः । **अनध्यासप्रसङ्ग इति** । तथा चाध्यासाभावप्रसङ्गपरिहाराय सादृश्यज्ञानं दोषत्वेनाध्यासकारणं वाच्यम्, ततश्च उक्तदोषरूपप्रतिबन्धकसत्त्वादप्रतिबद्धा शुक्तित्वदर्शनसामग्री नास्ति, अतो रजताध्यास उपपद्यते इति—धर्मिज्ञानकारणवादिनोऽभिसन्धिः । अनध्यासप्रसङ्गं परिहर्तुं उभयसम्मतमर्थं धर्मिज्ञानापलापी दर्शयति—**नेत्यादिना** । **त्वयापीति** । सादृश्यज्ञानकारणतावादिनापीत्यर्थः । **वाच्यत्वादिति** । सदृशभागमात्रसम्प्रयोगकाले शुक्तित्वदर्शनसामग्र्यां चक्षुस्संयुक्ततादात्म्यलक्षणायां सत्यामपि अध्यासदर्शनेन तदनुरोधात् शुक्तित्वरूपविशेषदर्शनसामग्र्याः प्रतिबन्धको दोषोऽवश्यं वाच्य इति तावत् सत्यम् । स च दोषो न सादृश्यज्ञानं, किं तु दूरत्वादिरेव । अतो दोषत्वेनापि न सादृश्यज्ञानमध्यासकारणमिति न धर्मिज्ञानसिद्धिः—इति तदपलापिनोऽप्यभिसन्धिः । धर्मिज्ञानकारणवादी स्वाभिसन्धिमुद्धाटयन् आशङ्कते—**ममेति** । **तवेति** । धर्मिज्ञानापलापे प्रवृत्तस्य कवितार्किकमतानुवर्तिन इत्यर्थः । सादृश्यज्ञानस्याध्यासकारणत्वं त्वदनिष्टं दूरं गतस्यापि तव प्रसज्येतेति भावः । धर्मिज्ञानापलापवाद्यपि स्वाभिसन्धिमुद्धाटयन् अनध्यासप्रसङ्गं परिहरति—**नेत्यादिना** । **तस्येति** । सादृश्यदर्शनस्येत्यर्थः । **तत्सामग्रीति** । शुक्तित्वदर्शनसामग्रीत्यर्थः । [2]रजतरागादिदोषसंग्रहार्थं आदिपदम् ।

ननु दूरस्थस्यापि पुंसः कदाचित् शुक्तौ शुक्तिप्रमाया दर्शनेन दूरत्वस्यापि सादृश्यज्ञानस्येव व्यभिचारस्तुल्यः । तथा रजतरागवतोऽपि समीपोपसर्पणानन्तरं शुक्तिप्रमादर्शनेन तस्यापि व्यभिचारस्तुल्यः । तथा च दूरत्वादेरपि दोषत्वं न स्यात् । यदि च क्वचिदध्यासे कदाचित् कश्चित् दोष इति रीत्या दूरत्वादेर्दोषत्वेनाध्यासकारणत्वं समर्थ्यते, तदा ज्वालादौ सादृश्यज्ञानरूपेणैव दोषेण 'सेयं दीपज्वाला' इत्यादिभ्रमस्य सर्वानुभवसिद्धतया तस्यापि कदाचिद्रजताध्यासादौ दोषत्वेन कारणत्वं दुर्वारम् । सादृश्यज्ञानस्य दोषत्वं भाष्यसम्मतं च । तथा च देवताधिकरणे भाष्यं—'सादृश्यात् प्रत्यभिज्ञानं केशादिष्विव' इति । तथा बौद्धाधिकरणेऽपि 'सादृश्यनिमित्तं प्रतिसन्धानं' इति । प्रतिसन्धानं-प्रत्यभिज्ञानम् । तथा च सादृश्यज्ञानस्यदोषत्वेनाध्यासकारणत्वमतनिराकरणमयुक्तमिति चेत्, सत्यम् । तथापि स्थूलबुद्धिमाश्रित्येदमिति ध्येयम् ।

---

1. घट्टकुटीप्रभातवृत्तान्त इति । यथा घट्टकुटीस्थेभ्यः करग्राहिभ्यो भीत्या रात्रौ पलायितानां पथित्यजां वणिजां दूरे गत्वाऽपि यथा भ्रान्तिवशात् घट्टकुट्यामेव प्रभातोदय इति लोके प्रसिद्धं तथा प्रकृतेऽपि जातमिति भावः ।

2. रजतरागादिदोषसङ्ग्रहार्थमादिपदमिति । दूरत्वादिदोषेणेत्यत्रत्यं आदिपदं । रजतरागादीत्यादिपदं अदृष्टविशेषसङ्ग्रहार्थम् । अदृष्टविशेषस्यापि अपेक्षा आवश्यकी । दूरस्थस्यापि रजतरागवतोऽपि पुंसः कदाचित् शुक्तिप्रमादर्शनात् ।

दूरत्वादिदोषेण [1]प्रतिबन्धाद्वा [2]व्यञ्जकनीलपृष्ठत्वादिग्राहकासमवधानाद्वा तत्सामग्र्यभावस्य वक्तव्यत्वात्। एवं जलधिजले नियतनीलरूपाध्यासप्रयोजकदोषेण प्रतिबन्धात् दूरे नीरत्वव्यञ्जकतरङ्गादिग्राहकासमवधानेन च शौक्ल्यजलराशित्वादिरूपविशेषदर्शनसामग्र्यभावात् नीलशिलातलत्वाध्यासः।

सहकार्यभावात् सामग्र्यभावमाह—**व्यञ्जकेति।** शुक्तित्वव्यञ्जकेत्यर्थः। ग्राहकपदं नीलभागव्यापिचक्षुस्सम्प्रयोगपरम्। **तत्सामग्रीति।** शुक्तित्वविशेषदर्शनसामग्र्यभावस्य उभाभ्यां वक्तव्यत्वादित्यर्थः। शुक्तिरजतभ्रमस्थलोक्तन्यायं अन्यत्रापि योजयति—**एवमिति।** सादृश्यज्ञानरूपदोषं विना रजताध्यासवत् नीलशिलातलत्वाध्यासस्सम्भवतीत्यर्थः। जले नीलशिलातलत्वाध्यासे हि शुक्लरूपात्मकविशेषदर्शनं जलराशित्वादिरूपविशेषदर्शनं च प्रतिबन्धकम्। ततः शुक्लरूपादिदर्शनसामग्र्यपि तत्र प्रतिबन्धिका। तथा च [3]प्रतिबन्धकज्ञानसामग्र्यभावादेव तत्र नीलशिलातलत्वारोपः, न तु प्रथमं जले नैल्याद्यध्यासेन सादृश्यज्ञानसम्पत्तौ सत्यां तद्दोषात् नीलशिलातलत्वाध्यास इत्यर्थः। ननु—जलधिसलिलपूरे शुक्लरूपात्मकविशेषदर्शनसामग्र्यभावोऽसिद्धः। नीलशिलातलत्वारोपात् [4]पूर्वकाले चक्षुस्संयुक्ते जले शुक्लरूपस्य तादात्म्याभ्युपगमेन चक्षुस्संयुक्ततादात्म्यरूपसन्निकर्षस्य आलोकादेश्च सत्त्वात्। तथा जलराशित्वादिरूपविशेषदर्शनसामग्र्यभावोऽप्यसिद्धः, जलराशित्वव्यञ्जकतरङ्गादिप्रत्यक्षस्यापि तत्र सत्त्वात् - इत्यत आह—**नियतेति।** जलधिसलिले दूरे नैल्याध्यासवत् समीपोपसर्पणानन्तरमपि तदध्यासो दृश्यते। अतस्तस्य नियतत्वम्। एतदुक्तं भवति—शुक्लरूपात्मकविशेषदर्शनसामग्री नियतनीलरूपाध्यासप्रयोजकदोषेण प्रतिबद्धा। अतः सा अप्रतिबद्धा नास्ति। दूरत्वदोषात् जलराशित्वव्यञ्जकतरङ्गादेर्ग्राहकसमवधानं नास्ति। तेन जलराशित्वरूपविशेषदर्शनसामग्री च नास्ति। तथा च द्विविधप्रतिबन्धकज्ञानसामग्र्यभावात् जलधिसलिले नीलशिलातलत्वाध्यास उपपद्यते इति।

अत्रेदं बोध्यम्—जलधिसलिलपूरे नीलशिलातलत्वारोपे उक्तविधया विशेषदर्शनसामग्र्यभावस्यापेक्षितत्वेऽपि न तावन्मात्रात् तदध्यासः। किं तु जले नीलरूपाद्यध्यासेन नीलशिलातलसादृश्यसम्पत्त्यनन्तरमेव तदध्यासः। तथा च दूरे नीलशिलातलत्वाध्यासवतां जलधिसलिलपूरसमीपोपसर्पणानन्तरं व्यवहारः—अस्मिन् जलधिसलिलपूरे मम दूरे नैल्यनैश्चल्यादिसाम्येन नीलशिलातलत्वभ्रम आसीत्, इदानीं स भ्रमो निवृत्तः- इति। एवं तत्र तत्र 'सादृश्यदोषात् मम पूर्वमन्यथाभ्रम आसीत्, इदानीं स निवृत्तः' इति लोकव्यवहार एव सादृश्यज्ञानस्य दोषत्वेनाध्यासविशेषेषु कारणत्वसाधको द्रष्टव्य इति।

---

1. प्रतिबन्धाद्वा तत्सामग्र्यभावस्य इति सम्बन्धः। अप्रतिबद्धतत्सामग्र्यभावस्येत्यर्थः। अथ वा, प्रतिबन्धकाभावरूपकारणाभावप्रयुक्तस्य सामग्र्यभावस्येत्यर्थः।

2. सामग्र्या एवाभावमाह - व्यञ्जकेति। अथ वा, प्रतिबन्धकाभावातिरिक्तकारणाभावेन प्रयुक्तं सामग्र्यभावमाह - व्यञ्जकेति।

3. प्रतिबन्धकज्ञानं - विशेषदर्शनम्।

4. पूर्वकाले सत्त्वात् इति सम्बन्धः।

विस्तृते पटे परिणाहरूपविशेषदर्शनसामग्रीसत्त्वात् न पुण्डरीकमुकुलत्वाध्यासः, कर्तनादिघटित-तदाकारे तदभावात्तदध्यास इति ।

नन्वेवं करस्पृष्टे लोहशकले तदीयनीलरूपविशेषदर्शनसामग्र्यभावात् रजताध्यासः किं न भवेत्, सादृश्यज्ञानानपेक्षणात्—इति चेत्, भवत्येव । किं तु ताम्रादिव्यावर्तकविशेषदर्शनसामग्र्या अप्यभावात् तदध्यासेनापि भाव्यमिति क्वचिदनेकाध्यासे संशयगोचरो भवति, क्वचित्तु रजतप्राये कोशगृहादौ रजताध्यास एव भवति । क्वचित् सत्यपि सादृश्यज्ञाने शुक्तिकादौ कदाचित् करणदोषाद्यभावेनाध्यासानुदयवत् अध्यासानुदयेऽपि न हानिः । तस्मात् न कार्यकल्प्या इदमाकारा वृत्तिः ।

सादृश्यज्ञानस्याध्यासकारणताग्राहकान्वयव्यतिरेकोदाहरणान्तरमप्यन्यथयति—**विस्तृत इति ।** परिणाहः - विस्तारः, तद्दर्शनं पुण्डरीकमुकुलत्वाध्यासप्रतिबन्धकं, तत्सामग्रीसत्त्वादित्यर्थः ।

सादृश्यज्ञानकारणतामते हि चक्षुस्संप्रयोगस्थले चाक्षुषं सादृश्यज्ञानं धर्मिज्ञानत्वेन दोषत्वेन च रजताद्यध्यासोत्पत्तौ कारणम् । त्वगिन्द्रियसम्प्रयोगस्थले च स्पार्शनं सादृश्यज्ञानं उक्तविधया रजताद्यध्यासोत्पत्तौ एव कारणम् । कवितार्किकमते तु धर्मिज्ञानप्रसङ्गभीत्या सादृश्यज्ञानं कुत्राप्यध्यासे कारणं नाभ्युपेयते—इति व्यवस्था । तथा च त्वगिन्द्रियेदमर्थसम्प्रयोगस्थले त्वदभिमताध्यासकारणसत्त्वात् स किं न स्यादिति शङ्कते—**नन्वेवमिति ।** सादृश्यज्ञानं विनाऽपि अध्यासप्रतिबन्धकविशेषदर्शनसामग्र्यभावमात्रेणाध्यासोपगमे इत्यर्थः । किं तत्र रजताध्यास आपाद्यते, किं वा रजताध्यास एव आपाद्यते । आद्ये इष्टापत्तिरित्याह—**भवत्येवेति ।** द्वितीयं शङ्कते—**किं त्विति ।** तत्र विशेषदर्शनसामग्र्यभावस्य ताम्राद्यध्याससाधारणत्वात् रजताध्यास एव स्यात् इत्यत्र आपादकं नास्तीति मत्वा परिहरति—**ताम्रादीति ।** रङ्गसुवर्णशकलादिसंग्रहार्थमादिपदम् । **क्वचिदिति ।** करतलस्पृष्टलोहशकलस्थलेऽपि क्वचिदित्यर्थः । **गोचर इति ।** लोहशकलरूपेदमर्थः 'किमिदं रजतं, किं वा ताम्रं, किं वा सुवर्णादि' इति संशयविषयो भवतीत्यर्थः । ताम्रादिव्यावर्तकविशेषदर्शनस्थले तु रजताध्यास एव भवतीत्याह—**क्वचित्त्विति ।** यस्मिन् कोशगृहादौ प्रायेण रजतशकलानामेवावस्थानं तत्र प्रविष्टस्य दैवात् अयश्शकले करतलस्पृष्टे सति तत्र रजताध्यास एव भवति । रजतकोशगृहमिति बुद्धेः तस्य सत्त्वादित्यर्थः । ननुः - क्वचित् करतलस्पृष्टलोहशकले रजताध्यासाभावोऽपि दृश्यते । स च तव मते न सम्भवति, विशेषदर्शनसामग्र्यभावस्य तत्रापि सत्त्वेन रजताध्यासापत्तेरावश्यकत्वात् । मम तु सादृश्यज्ञानरूपकारणाभावात् स न भवतीति वक्तुं शक्यते, इत्यत आह—**क्वचित् सत्यपीति ।** समीपोपसर्पणानन्तरं सत्यपि सादृश्यज्ञाने यथा रजताध्यासाभावः तव मते उपेयते तथा मन्मतेऽपि क्वचिदध्यासाभावो न दोषावह इत्यर्थः । **तस्मादिति ।** कथमपि धर्मिज्ञानस्याध्यासकारणत्वासिद्धेः इत्यर्थः ।

इदमाकारवृत्तिः अनुभवसिद्धा वा कार्यकल्प्या वा कारणकल्प्या वेति विकल्पत्रये प्रथमद्वितीयौ निरस्य

नाप्यप्रतिबद्धेदमर्थसम्प्रयोगकारणकल्प्या। ततो भवन्त्या एवेदंवृत्तेः दुष्टेन्द्रियसंप्रयोगक्षुभिताविद्यापरिणामभूतस्वसमकालरजतविषयत्वस्यापि अस्माभिरुच्यमानत्वात्। तत्र च ज्ञानसमकालोत्पत्तिके प्रतिभासमात्रविपरिवर्तिनि रजते तत्प्राचीनसंप्रयोगाभावेऽपि तत्तादात्म्याश्रयेदमर्थसम्प्रयोगादेव तस्यापि चक्षुर्ग्राह्यत्वोपपत्तेः। 'चक्षुषा रजतं पश्यामि' इति प्रातिभासिकरजतस्य स्वसम्प्रयोगाभावेऽपि चाक्षुषत्वानुभवात्।

न च—स्वसम्प्रयोगाभावादेव बाधकात् न तत् चाक्षुषं, नापि दुष्टेन्द्रियसम्प्रयोगजन्यं इदंवृत्तिसमकालं; ज्ञानकारणस्येन्द्रियसम्प्रयोगस्यार्थकारणत्वाक्लृप्तेः। किं तु इदंवृत्त्य-

---

तृतीयं निराकरोति—**नाप्यप्रतिबद्धेति**। इदमर्थस्य चक्षुस्सम्प्रयोगकाले अन्यत्र व्यासङ्गे सति इदमर्थगोचरज्ञानानुदयात् अप्रतिबद्धेति विशेषणम्। यथोक्तसम्प्रयोगवशात् जायमाना वृत्तिः भ्रान्तिरूपैव जायते, न तु भ्रान्तेः प्राचीना इदमर्थमात्रगोचरा प्रमारूपा, तत्र मानाभावात्-इत्याशयेनाह—**तत इति**। इदमर्थावच्छिन्नचैतन्ये विद्यमाना रजतपरिणामिनी अविद्या दुष्टेन्द्रियसम्प्रयोगरूपादध्यासनिमित्तकारणभूतात् क्षोभं-कार्याभिमुख्यं प्राप्नोति। उत्तरक्षणे च रजतरूपेण परिणमते। दुष्टेन्द्रियसंप्रयोगात् वृत्तिरपि तदैव जायते। तथा च अप्रतिबद्धात् दुष्टेन्द्रियसम्प्रयोगात् भवन्ती इदमर्थगोचरवृत्तिः स्वकालोत्पन्नरजतविशिष्टेदमर्थं विषयीकरोतीत्यर्थः। स्वपदं वृत्तिपरम्। धर्मिज्ञानपक्षे इदमाकारवृत्तिः अविद्याक्षोभिका तदभावपक्षे धर्मिज्ञानहेतुसम्प्रयोगोऽविद्याक्षोभक इति विभाग इति स्थिते, तत्रान्त्यपक्षो न युक्तः - इदमर्थसम्प्रयोगस्य इदमाकारवृत्ताविव रजतगोचरवृत्तावहेतुत्वात्, ज्ञानसमकालोत्पन्नरजतस्य ज्ञानात् पूर्वं चक्षुस्सन्निकर्षाभावाच्च। तथा च रजतगोचरवृत्तौ सामग्र्यभाव एव इदंवृत्तेर्धर्मिमात्रगोचरतां व्यवस्थापयति इत्याशङ्क्याह—**तत्र चेति**। भ्रमस्थले इत्यर्थः। प्रतिभासकालमात्रे विपरिवर्तनं - सत्ता यस्य तत् प्रतिभासमात्रविपरिवर्ति तस्मिन्, [1]प्रतीतिव्याप्यसत्ताके इति यावत्। इदमर्थसम्प्रयोगस्य रजतगोचरवृत्त्युत्पत्तावपि हेतुत्वं सम्भवति। न च अन्यसम्प्रयोगादन्यगोचरवृत्त्युपगमे घटेन्द्रियसम्प्रयोगात् पटगोचरवृत्त्यापत्तिरिति वाच्यम्। स्वगोचरवृत्तौ स्वस्य स्वतादात्म्याश्रयस्य वा इन्द्रियेण सह सम्प्रयोगः कारणं इति कल्पनात्, तावता उक्तातिप्रसङ्गपरिहारोपपत्तेः - इत्याशयेनाह—**तत्प्राचीनेति**। रजतप्रतिभासात् प्राचीनेत्यर्थः। **तत्तादात्म्येति**। रजतस्येदमर्थे कल्पितत्वात् रजततादात्म्याश्रयत्वमिदमर्थस्य, पटतादात्म्याश्रयत्वं तु न घटेऽस्ति, पटस्य तत्रानध्यस्तत्वात् इति भावः। चक्षुस्संप्रयोगानाश्रयस्यापि रजतस्य चाक्षुषवृत्तिविषयत्वकल्पने हेतुमाह—**चक्षुषेति**।

धर्मिज्ञानवादी चाक्षुषत्वानुभवस्यान्यथासिद्धिं वदन् धर्मीन्द्रियसम्प्रयोगजन्या वृत्तिः धर्मिमात्रगोचरेत्याशयेन शङ्कते—**न चेति**। तत् रजतं इदंवृत्तिसमकालं सत् दुष्टेन्द्रियसम्प्रयोगजन्यमपि न भवतीत्यत्र हेतुमाह—**ज्ञानकारणस्येति**। तथा च प्रातिभासिकस्य रजतस्य ऐन्द्रियकत्वपक्षे अन्य-

---

1, प्रतीतिव्याप्यसत्ताके इति। व्याप्तिरत्र कालिकी ग्राह्या।

नन्तरभावि तज्जन्यं तदभिव्यक्ते साक्षिण्यध्यासात् तद्भास्यम्। चाक्षुषत्वानुभवस्तु स्वभासकचैतन्याभिव्यञ्जकेदंवृत्तिजनकत्वेन परम्परया चक्षुरपेक्षामात्रेणेति—वाच्यम्।

तथासति पीतशङ्खभ्रमे चक्षुरनपेक्षाप्रसङ्गात्। न हि तत्र शङ्खग्रहणे चक्षुरपेक्षा। रूपं

सम्प्रयोगस्यान्यगोचरवृत्तिजनकत्वमेकं कल्पनीयं, तथा ज्ञानकारणस्य सन्निकर्षस्य रजताद्यर्थोत्पत्तौ कारणत्वमपरं कल्पनीयमिति गौरवमिति भावः। यदि सम्प्रयोगो न रजताद्यर्थे कारणं, तर्हि किं तत्र कारणम्, अविद्यामात्रस्य सदा सत्त्वेन रजताद्यध्यासस्य कादाचित्कत्वं प्रति तस्य प्रयोजकत्वानुपपत्तेः - इति शङ्कते—**किंत्विति**। उत्तरमाह—**इदंवृत्त्यनन्तरभावीति**। इन्द्रियसम्प्रयोगात् इदमर्थमात्रगोचरा वृत्तिरुदेति। तया च अध्यासं प्रति निमित्तकारणभूतया क्षुब्धा सती अविद्या रजताकारेण परिणमते। रजतस्य च इदमाकारवृत्त्यभिव्यक्तं इदमर्थावच्छिन्नचैतन्यमधिष्ठानम्। तथा च रजतं स्वगोचरवृत्तिं विनैव चैतन्यभास्यं अहङ्कारादिवदित्यर्थः। 'तज्जन्यम्' इत्यत्र 'तदभिव्यक्ते' इत्यत्र च तत्पदमिदंवृत्तिपरम्। तद्वृत्तेश्च कादाचित्कत्वात् रजताद्यध्यासस्य कादाचित्कत्वमिति भावः। **तद्भास्यमिति**। साक्षिभास्यमित्यर्थः। (न च बाह्यचैतन्यावभास्यस्य शुक्तिरूप्यादेः अहङ्कारादिवत् कथं साक्षिभास्यत्वमिति वाच्यम्। स्वगोचर[1]ज्ञानरूपवृत्त्यनुपहितचैतन्यभास्यस्यैव साक्षिभास्यशब्दार्थत्वात्। तथा च यथा अविद्याहङ्कारतद्धर्माणामवभासकचैतन्यं अविद्यादिगोचरया ज्ञानात्मकवृत्त्या उपहितं न भवति, एवं शुक्तिरजतादिभासकचैतन्यमपि शुक्तिरजतादिगोचरज्ञानात्मकवृत्त्युपहितं न भवतीति, तस्य साक्षिभास्यत्वमुक्तमिति मन्तव्यम्) ननु शुक्तिरजतस्य साक्षिभास्यत्वे चाक्षुषत्वानुभवविरोध इति, नेत्याह—**चाक्षुषत्वानुभवस्त्विति**। स्वं-शुक्तिरजतं, तद्भासकस्य-इदमंशावच्छिन्नचैतन्यस्य अभिव्यञ्जिकामिदंवृत्तिं प्रति चक्षुषो जनकत्वेन शुक्तिरजतस्य चक्षुरपेक्षा वर्तते। सा चापेक्षा परम्परयैव, स्वाधिष्ठानगोचरवृत्त्यर्थमपेक्षितत्वात्। न तु साक्षात्, स्वगोचरवृत्त्यर्थे अनपेक्षितत्वात्। यथाकथञ्चिच्चक्षुरपेक्षामात्रेण तत्र चाक्षुषत्वानुभव उपपद्यत एव - इत्यक्षरार्थः।

ननु - 'चक्षुषा रजतं पश्यामि' इत्यनुभवो हि रजते चाक्षुषवृत्तिविषयत्वमवगाहते, न तु शुक्तिरजतगतं चाक्षुषवृत्त्यभिव्यक्तचैतन्यविषयत्वं, इति वस्तुगतिः। (तथा च) 'परम्परया चक्षुरपेक्षामात्रेण' इति ग्रन्थेन चाक्षुषत्वानुभवस्य चाक्षुषवृत्त्यभिव्यक्तचैतन्यविषयत्वं रजतगतं विषय इति तदनुभवस्य गतिः कल्पितेति प्रतिभाति, तदयुक्तम्, शब्दवदनुभवस्य व्याख्यानानर्हत्वात्-इति चेत्, न - वस्तुत इदमर्थगतस्येदंत्वस्य तत्रानुभूयमानस्य यथा शुक्तिरजते संसर्गारोपः, तथा इदमर्थगतस्य तत्रानुभूयमानस्य चाक्षुषत्वस्य शुक्तिरजते संसर्गारोपः, इत्यस्यार्थस्य प्रकृते विवक्षितत्वात्। तथा च स्वस्मिन्नारोपणीयं यत् चाक्षुषवृत्तिविषयत्वमिदमर्थगतं तल्लाभाय शुक्तिरजतस्य चक्षुरपेक्षा वर्तते इत्ययमर्थः 'परम्परया चक्षुरपेक्षामात्रेण' इतिग्रन्थस्य द्रष्टव्य इति न कश्चिद्दोषः।

प्रातिभासिकरजतादेस्साक्षिभास्यत्वमेव न त्वैन्द्रियकत्वं - इति मतं दूषयति—**तथासतीति**।

---

1. ज्ञानरूपवृत्तीति। अविद्यावृत्तिव्युदासार्थं ज्ञानरूपेति। तेन शुक्तिरूप्याकाराविद्यावृत्तेः आचार्यानुमतत्वेऽपि शुक्तिरूप्यस्य न साक्षिभास्यत्वहानिः।

विना केवलशङ्खस्य चक्षुर्ग्राह्यत्वायोगात्। नापि पीतिमग्रहणे। आरोप्यस्य ऐन्द्रियकत्वानभ्युपगमात्। न च - पीतिमा स्वरूपतो नाध्यस्यते किं तु नयनगतपित्तपीतिम्नोऽनुभूयमानस्य शङ्खे संसर्गमात्रमध्यस्यते इति पीतिमानुभवार्थमेव चक्षुरपेक्षेति—वाच्यम्। तथासति शङ्खतत्संसर्गयोरप्रत्यक्षत्वप्रसङ्गात्। नयनप्रदेशगतपित्तपीतिमाकारवृत्त्यभिव्यक्तसाक्ष्यसंसर्गेण तयोस्तद्भास्यत्वासम्भवात्, पीतिमसंसृष्टशङ्खगोचरैकवृत्त्यनभ्युपगमाच्च। न च - नयनप्रदेशस्थितस्य पित्तपीतिम्नो दोषात् शङ्खे संसर्गाध्यासो नोपेयते, किं तु नयनरश्मिभिः सह निर्गतस्य विषयव्यापिनस्तस्य तत्र संसर्गाध्यासः कुसुम्भारुणिम्न इव कौसुम्भे इति, सम्भवति तदाकारवृत्त्यभिव्यक्तसाक्षिसंसर्गः इति वाच्यम्। तथासति सुवर्णलिप्त इव पित्तोपहतनयनेन वीक्ष्यमाणे शङ्खे तदितरेषामपि पीतिमधी-

---

अधिष्ठानस्यैन्द्रियकत्वलाभायैवेन्द्रियापेक्षा, न त्वारोप्यस्य तदर्थमिन्द्रियापेक्षा, इत्युपगमे सतीत्यर्थः। **न हीति।** इदं चापाततः, पीतशङ्खभ्रमादिस्थलेऽपि अध्यासप्राचीनधर्मिगोचरचाक्षुषवृत्तेः प्रागुपपादितत्वादिति मन्तव्यम्। **नापि पीतिमग्रहण इति।** चक्षुरपेक्षा इत्यनुषङ्गः। रूपं विना केवलशङ्खस्य चक्षुर्ग्राह्यत्वायोगमुपेत्य आरोपितस्य साक्षिभास्यत्ववादी शङ्कते—**न च पीतिमेति।** पीतरूपमित्यर्थः। यथा शुक्तौ रजतं स्वरूपेणाध्यस्यते, तथा शङ्खे पीतरूपं नाध्यस्यत इत्यर्थः। नयनगतं यत् पित्तं - पीतरूपयुक्तद्रव्यविशेषः, तस्य यः पीतिमा, तस्य पित्तद्रव्य एवानुभूयमानस्य शङ्खे संसर्ग एवाध्यस्यते। यथा जपाकुसुमादावनुभूयमानस्य लौहित्यस्य स्फटिकमण्यादौ संसर्गाध्यासः तद्वत्। न चान्यगतस्यान्यत्रारोपाभ्युपगमे अन्यथाख्यातिप्रसङ्ग इति वाच्यम्, अध्यस्यमानसंसर्गस्यानिर्वचनीयस्योत्पत्त्यभ्युपगमेनान्यथाख्यातिवैलक्षण्यसत्त्वात् इति भावः। **पीतिमानुभवार्थमिति।** शङ्खे पीतरूपसंसर्गाध्यासात् प्राचीनो यः पित्तद्रव्ये पीतरूपानुभवः तदर्थमित्यर्थः। तत्र - किं नयनप्रदेशगत एव पित्तद्रव्ये पीतिमानुभवः, किं वा शङ्खदेशं प्राप्य तत्रस्थे पित्तद्रव्ये पीतिमानुभवः? आद्यं दूषयति—**तथासतीति।** नयनगत एव पित्तद्रव्ये पीतरूपानुभवाङ्गीकारे इत्यर्थः। **शङ्खतत्संसर्गयोरिति।** शङ्खस्य शङ्खपीतरूपयोस्संसर्गस्य चेत्यर्थः। शङ्खतत्संसर्गयोर्भानं किं पित्तपीतिमगोचरवृत्त्यभिव्यक्तेन साक्षिणा, किं वा पीतिमसंसृष्टशङ्खगोचरवृत्त्यभिव्यक्तेन साक्षिणा? नाद्य इत्याह—**नयनप्रदेशेति।** नयनप्रदेशगतपित्तपीतिमाकारवृत्त्या तत्प्रदेशस्थं पीतिमावच्छिन्नचैतन्यमभिव्यज्यते, तेन चाभिव्यक्तचैतन्यलक्षणसाक्षिणा सह शङ्खस्य शङ्खे समारोपितपीतरूपसंसर्गस्य च असम्बन्धात् शङ्खतत्संसर्गयोरापरोक्ष्यं न स्यादित्यर्थः। न द्वितीय इत्याह—**पीतिमसंसृष्टेति। अनभ्युपगमाच्चेति।** साक्षिभास्यत्ववादिनेति शेषः। शङ्खदेशं प्राप्ते पित्तद्रव्ये पीतिमानुभव इति द्वितीयं शङ्कते—**न चेति। विषयव्यापिनस्तस्येति।** शङ्खरूपमधिष्ठानं व्याप्तस्य पित्तद्रव्यस्येत्यर्थः। तथा च पित्तपीतिमाकारवृत्त्या शङ्खदेशस्थस्यैव चैतन्यस्याभिव्यक्त्या शङ्खतत्संसर्गयोरापरोक्ष्यं सम्भवतीति भावः। कुसुम्भं - रक्तद्रव्यविशेषः। तद्व्याप्ते पटे यथा कुसुम्भे अनुभूयमानस्य रक्तरूपस्य संसर्गारोपः तथेत्यर्थः। नयनगतपित्तद्रव्यस्य नयने सर्वैरनुभूयमानस्य नयनरश्मिद्वारा निर्गत्य शङ्खव्यापित्वोपगमे बाधकमाह—**तथासतीति।**

प्रसङ्गात्। न च - स पीतिमा समीपे गृहीत एव दूरे ग्रहीतुं शक्यः विहायसि उपर्युत्पतन् विहङ्गम इव, इतरेषां च समीपे न ग्रहणमिति-वाच्यम्। इतरेषामपि तच्चक्षुर्निकटन्यस्तचक्षुषां पीतिमसामीप्यसत्त्वेन तद्ग्रहणस्य दुर्वारत्वात्।

एवमप्यतिधवलसिकतामयतलप्रवहदच्छनदीजले नैल्याध्यासे गगननैल्याध्यासे रक्तवस्त्रेषु निशि चन्द्रिकायां नैल्याध्यासे च अनुभूयमानारोपस्य वक्तुमशक्यत्वेन तत्र नैल्यसंसृष्टाधिष्ठानगोचरचाक्षुषवृत्त्यनभ्युपगमे चक्षुरनुपयोगस्य दुष्परिहरत्वाच्च। अनास्वादिततिक्तरसस्य बालस्य मधुरे तिक्ततावभासो जन्मान्तरानुभवजन्यसंस्कारहेतुकः - इति प्रतिपादयता [1]पञ्चपादिकाग्रन्थेन

पित्तोपहतनयनः पुरुषो यदा शङ्खं पश्यति तदा तदितरेषामपि 'पीतश्शङ्खः' इत्यनुभवप्रसङ्गादित्यर्थः। ननु पित्तद्रव्यस्य नयनप्रदेशाद्विषयदेशं प्रति गमनावसरे यथा पित्तोपहतनयनेन नयनदेशमारभ्य विषयव्याप्तिपर्यन्तं पीतिमा गृह्यते तथाऽन्यैरपि नयनसमीपे मध्ये च पीतिमा गृहीतश्चेच्छङ्खदेशेऽपि ग्रहीतुं शक्यते नान्यथा, इत्यत्र दृष्टान्तमाह—**विहायसीति**। यथा विहङ्गमः - पक्षी गगने उत्पतन् उत्पतनावसरे भूप्रदेशमारभ्य येन पुंसा गृह्यते तेनैव गगनोपरिभागे दूरं गतोऽपि गृह्यते नान्यैः, तथा प्रकृतेऽपीत्यर्थः। दृष्टान्तवैषम्यमाह—**इतरेषामपीति**। दृष्टान्ते हि गगनोपरिभागे दूरे विहङ्गमं पश्यन् कश्चिदन्यं प्रत्युपदिशति—'मम चक्षुर्निकटे त्वच्चक्षुर्न्यस्तं चेत् त्वयापि स विहङ्गमो द्रष्टुं शक्यते' इति। स चान्यस्तथाकृत्वा तं पश्यति, न तथा प्रकृते सम्भवतीत्यर्थः।

अस्तु वा अनुभूयमानारोपस्थले कथञ्चिच्चक्षुरपेक्षा, स्मर्यमाणनैल्याद्यध्यासस्थलेषु तु तदपेक्षा सर्वात्मना वक्तुमशक्येत्याह—**एवमपीति**। जलाधारभूभागे वा जलमिश्रितद्रव्यविशेषे वा यदि नीलरूपमस्ति तदा तत्रैवानुभूयमाननैल्यस्य जले अध्यास इति शङ्का भवेत्, तन्निवृत्तये सिकतामयतलस्यातिधवलत्वं नदीजलस्य चाच्छत्वं विशेषणमुपात्तम्। अच्छत्वं-निर्मलत्वं, निशि-रात्रौ। चन्द्रिकायामित्यस्यापि पूर्वोक्तमेव प्रयोजनं द्रष्टव्यम्। **दुष्परिहरत्वाच्चेति** अत्र - पीतशङ्खजलनैल्याद्यध्यासेषु आरोप्यपीतिमनैल्यादिसंसृष्टाधिष्ठानगोचरचाक्षुषवृत्त्यनुपगमेऽपि चक्षुरनुपयोगो न दुष्परिहरः, शङ्खादिधर्मिमात्रगोचरचाक्षुषवृत्तिसम्भवस्य प्राग्दर्शितत्वादिति मन्तव्यम्। आरोप्यस्येन्द्रियजन्यवृत्तिविषयत्वे सम्मतिमाह—**अनास्वादितेति**। अस्मिन् जन्मनि अनास्वादितः रसनेन्द्रियेणाननुभूतः तिक्तरसो येन बालेन स तथा, तस्येत्यर्थः। मधुरे - स्तन्यादौ तिक्ततावभासः-तिक्ततासाक्षात्कारः। स च जन्मान्तरीयतिक्तरसानुभवजन्यसंस्कारजन्यः। आरोपे आरोप्यसजातीयपूर्वानुभवजन्यसंस्कारस्य कारणत्वात् - इत्यक्षरार्थः। अत्र ग्रन्थे तिक्ततावभासस्य संस्कारसहकृतरसनेन्द्रियजन्यत्वं भाति, तस्य संस्कारमात्रजन्यत्वे स्मृतित्वप्रसङ्गात्। तथा च तिक्ताध्यासाधिष्ठानस्य मधुरद्रव्यस्य रसनेन्द्रियायोग्यतया परिशेषात् स्वरूपतोऽध्यस्यमानस्य तिक्तरसस्यैव रसनेन्द्रियजन्य-

---

1. पञ्चपादिकाग्रन्थेनेति। यद्यप्ययं ग्रन्थः निराकर्तव्यख्यातिमतनिरूपणान्तर्गतः, तथापि तिक्ततावभासे स्मरणत्वमात्रस्य निराकर्तव्यत्वेनाभिप्रेतत्वात् विवक्षितार्थे सम्मतिर्भवत्येवेति ध्येयम्।

स्वरूपतोऽध्यस्यमानस्यैव तिक्तरसस्य ऐन्द्रियकत्वस्फुटीकरणाच्च । अन्यथा तत्र रसनाव्यापारापेक्षानुपपत्तेः ।

तस्मात् उदाहृतनैल्याध्यासस्थलेष्वधिष्ठानसम्प्रयोगादेव तद्गोचरचाक्षुषवृत्तिसमकालोदयोऽध्यासः[1] तस्या वृत्तेर्विषय इति तस्य चाक्षुषत्वमभ्युपगन्तव्यम् । रूपं विना केवलाधिष्ठान-

---

वृत्तिविषयत्वं स्पष्टीकृतमिति, भवति समारोप्यस्यैन्द्रियकत्वे सम्मतिरयं ग्रन्थ इति भावः । **अन्यथेति ।** आरोप्यतिक्तरसस्य ऐन्द्रियकत्वानुपगमे तत्र बालस्य तिक्तताव‌भासस्थले रसनेन्द्रियव्यापारो न स्यात्, मधुरद्रव्यस्य तदयोग्यत्वादित्यर्थः ।

वस्तुतस्तु - तिक्तताव‌भास इत्यत्र तिक्ततापदावभासपदयोः कर्मधारयः । अवभासपदं च अवभास्यते इति व्युत्पत्त्या अध्यस्यमानतिक्तरसपरम् । [2]पञ्चपादिकायामेव अवभासपदस्य अवभास्यमानतापदेन तथाव्याख्यातत्वात् । जन्मान्तरीयसंस्कारोऽपि अध्यस्यमानतिक्तरसोत्पत्तौ हेतुः । प्रातिभासिकाध्यासस्थलेषु दोषसंस्काराधिष्ठानसामान्यज्ञानरूपकारणत्रयस्य अध्यस्यमानपदार्थोत्पत्तावेव कारणतायाः टीकाविवरणादिष्वेव स्पष्टत्वात् । तथा च कथमनेन ग्रन्थेन स्वरूपतोऽध्यस्यमानस्यैव तिक्तरसस्यैन्द्रियकत्वस्पष्टीकरणम् । न च तिक्तरसस्यैन्द्रियकत्वाभावे रसनव्यापारापेक्षानुपपत्तिरिति वाच्यम् । बालस्य अन्येषां वा तिक्तरसाध्यासकाले रसनेन्द्रियव्यापारसत्त्वे मानाभावात् । न च तथासति तिक्तताऽनवभासप्रसङ्ग इति वाच्यम् । त्वगिन्द्रियजन्यमधुरद्रव्यगोचरवृत्त्या अभिव्यक्ते मधुरद्रव्यावच्छिन्नचैतन्ये तिक्तताध्यासाङ्गीकारेण तिक्ततायाःस्वगोचरवृत्तिं विनैव स्वाधिष्ठानचैतन्यभास्यत्वसम्भवात् । अस्तु वा तिक्तताऽध्यासस्थले रसनेन्द्रियापेक्षा । तथापि न अध्यस्यमानतिक्तरसस्यैन्द्रियकत्वसिद्धिः । अध्यस्यमानतिक्ततां प्रति मधुरद्रव्यनिष्ठमधुररसस्याधिष्ठानत्वसम्भवेन तदधिष्ठानभूतमधुररसग्रहणे तदपेक्षोपपत्तेः, पञ्चपादिकागतमधुरपदस्य मधुररससाधारणत्वेन तद्विरोधाभावाच्च । न च मधुररसग्रहणे तिक्तताध्यासानुपपत्तिरिति वाच्यम् । रसग्रहणेऽपि दोषविशेषेण मधुररसत्वजातिसाक्षात्कारप्रतिबन्धे सति तदध्यासोपपत्तेः । तस्मात् आरोप्यस्य साक्षिमात्रभास्यत्वं पूर्वाचार्याणां सार्वत्रिकव्यवहारसिद्धं निरपवादमिति - मन्तव्यम् ।

इतः परं कवितार्किकमतानुसारेण यत् पञ्चपादिकाग्रन्थव्याख्यानं कृतं तदेवानुवर्त्यते । **तस्मादिति ।** अध्यस्यमानपदार्थस्य साक्षिभास्यत्वमते पीतशङ्खाद्यध्यासेषु चक्षुरनुपयोगस्य दुष्परिहरत्वादित्यर्थः । **तद्गोचरेति ।** अधिष्ठानगोचरेत्यर्थः । वृत्तिसमकालमुदयो यस्याध्यासस्य पीतरूपादेः, स तथेत्यर्थः । अधिष्ठानसंप्रयोगजन्याया वृत्तेःआरोपितरूपादिविशिष्टशङ्खादिविषयकत्वानङ्गीकारे आरोपितरूपादेरनवभासप्रसङ्ग इत्यर्थः । **रूपं**

---

1. अध्यास इति । अध्यस्यते अयं इति कर्मणि घञि व्युत्पन्नोऽयं शब्दः । असंज्ञायामपि अकर्तरि कारके घञादीनां प्रयोगदर्शनात् को भवता दायो दत्त इति । तथा च अध्यस्यमानोऽर्थः अध्यासशब्दार्थः । अयमेव अर्थाध्यासशब्देनापि व्यवह्रियते शास्त्रे । स्पष्टश्चैतत् पञ्चपादिकाविवरणे ।

2. पञ्चपादिकायामेवेत्यादि । अध्यासलक्षणभाष्यव्याख्याने 'परत्रेत्युक्ते अर्थात् परस्य अवभास्यमानता सिद्धा' इति भाष्यस्थावभासपदस्थाने अवभास्यमानतापदनिवेशनेन अवभासपदस्य अध्यस्यमानार्थपरतया व्याख्यातत्वात् इत्यर्थः ।

गोचरवृत्त्यभावे च विषयचैतन्याभिव्यक्त्यभावेन जलतदध्यस्तनैल्यादीनां तद्भास्यत्वायोगात्। तिक्तरसाध्यासस्थले तु अधिष्ठानाध्यासयोरेकेन्द्रियग्राह्यत्वाभावात् त्वगिन्द्रियजन्याधिष्ठान-गोचरवृत्त्या तदवच्छिन्नचैतन्याभिव्यक्तौ पित्तोपहतरसनसम्प्रयोगादेव तत्रतिक्तरसाध्यासः तन्मात्रविषयरासनवृत्तिश्च समकालमुदेतीति तिक्तरसस्य रासनत्वमभ्युपगन्तव्यम्। त्वगिन्द्रियजन्याधिष्ठानगोचरवृत्त्यभिव्यक्तचैतन्यभास्ये तिक्तरसे परम्परयापि रसनोपयोगा भावेन तत्र कथमपि प्रकारान्तरेण रासनत्वानुभवसमर्थनासम्भवात्। तथैव रजतस्यापि चाक्षुषत्वोपपत्तेः 'पश्यामि' इत्यनुभवो न बाधनीयः। न च - असम्प्रयुक्तस्य रजतस्य चाक्षुषत्वे 'प्रत्यक्षमात्रे विषयेन्द्रियसन्निकर्षः कारणं' 'द्रव्यप्रत्यक्षे तत्संयोगः कारणं' 'रजतप्रत्यक्षे रजतसंयोगः कारणं' इतिगृहीतानेककार्यकारणभावनियमभङ्गः स्यादिति - वाच्यम्। सन्निकर्षत्वस्य संयोगाद्यनुगतस्यैकस्य अभावेन आद्यनियमासिद्धेः। द्वितीयनियमस्य, नैयायिकरीत्या तमसीव

विना केवलाधिष्ठानगोचरवृत्त्यभावे चेति। आरोप्यपीतिमनैल्यादिसंसृष्टशङ्खादिगोचरवृत्त्यनभ्युपगमे च इति चकारार्थः। तत्पदं चैतन्यपरम्। पञ्चपादिकाग्रन्थोक्तं तिक्तरसस्याध्यस्यमानस्यैन्द्रियकत्वं चाक्षुषाध्यासस्थल इव अधिष्ठानारोप्ययोरेकवृत्तिविषयत्वेन न भवति, किं तु तिक्तरसमात्रगोचररासनवृत्त्या - इत्युपपादयति— तिक्तरसाध्यासस्थले त्विति। तदवच्छिन्नेति। मधुरादिद्रव्यरूपाधिष्ठानावच्छिन्नेत्यर्थः। पित्ताख्य-दोषेण उपहतं यत् रसनं, तेन सह मधुरद्रव्यरूपाधिष्ठानस्य संप्रयोगात् तत्र अधिष्ठानावच्छिन्नचैतन्ये तिक्तरसाध्यास उदेति, तदैव अध्यस्यमानतिक्तरसमात्रगोचररासनवृत्तिश्च उदेतीत्यर्थः। ननु-तिक्तरसाध्यासस्य मास्तु रासनत्वं, तिक्तरसभानं तु केवलसाक्षिरूपमिति मतमेव कुतो नाद्रियते—तत्राह। त्वगिन्द्रियेति। चैतन्यभास्ये तिक्तरस इति। अभ्युपगम्यमाने इति शेषः। परम्परयापीति। रजताद्यध्यासस्थल इव धर्मिमात्रगोचरवृत्त्युत्पादनद्वाराऽपीत्यर्थः। धर्मिणो मधुरद्रव्यादेः रसनेन्द्रियायोग्यत्वादिति भावः। तत्र-तिक्ततारूपे अध्यासे। कथमपीत्यस्य व्याख्या प्रकारान्तरेणेति। यद्यपि स्वप्नकाले केवलसाक्षिभास्येषु रसरूपादिषु रासनत्वचाक्षुषत्वाद्यनुभवस्य आरोपरूपतया [1]वक्ष्यमाणत्वेन प्रकृतेऽपि तथा समर्थनं सम्भवति, स्वाप्नपदार्थानामिव प्रातिभासिकतिक्तरसादेरपि इन्द्रियासन्निकृष्टत्वेन सामग्र्यभावस्य तुल्यत्वात्, तथापि तं प्रकारमजानता 'तत्र कथमपि' इत्याद्युक्तमिति ध्येयम्। तथैवेति। यथा रासनवृत्तिविषयत्वमादाय रासनत्वानुभवस्समर्थितः, तथा चाक्षुषवृत्तिविषयत्वमादायैव चाक्षुषत्वानुभवसमर्थनसम्भवे तदनुभवस्यारोपरूपत्वकल्पनमयुक्तमित्यर्थः। न बाध-नीय इत्ययुक्तम्, बाधके सति तद्बाधस्यावश्यकत्वात् इति मत्वा शङ्कते—न चेति। शङ्कितं बाधकं परिहरति —सन्निकर्षत्वस्येत्यादिना। आद्यनियमासिद्धेरिति। 'जन्यप्रत्यक्षमात्रे इन्द्रियसन्निकर्षः कारणं' इति नियमासिद्धेरित्यर्थः। जन्यपदं नित्यसाक्षिरूपे प्रत्यक्षे व्यभिचारवारणार्थम्। शाब्दापरोक्षमते शाब्दभिन्नत्व-मपि प्रत्यक्षविशेषणं द्रष्टव्यम्।

---

1. वक्ष्यमाणत्वेनेति। द्वितीयपरिच्छेदे स्वाप्नपदार्थानुभवस्वरूपविचारे।

संयोगायोग्ये क्वचिद्द्रव्येऽपि द्रव्यत्वाध्याससम्भवात् व्यवहारदृष्ट्या यत् द्रव्यत्वाधिकरणं तद्विषयत्वेन, प्रातिभासिकरजते द्रव्यत्वस्य अधिष्ठानगतस्यैव इदंत्ववत् अध्यासात् प्रतीत्यभ्युपगमेन च, द्वितीयनियमाविरोधात्। द्वितीयनियमरूपसामान्यकार्यकारणभावातिरेकेण विशिष्यापि कार्यकारणभावकल्पनाया गौरवपराहतत्वेन तृतीयनियमासिद्धेः। 'यत्सामान्ये यत्सामान्यं हेतुः तद्विशेषे तद्विशेषो हेतुः' इति न्यायस्यापि, यत्र बीजाङ्कुरादौ सामान्यकार्यकारणभावमात्राभ्युपगमे बीजान्तरादङ्कुरान्तरोत्पत्त्यादिप्रसङ्गः तद्विषयत्वेन, ततोऽजागलस्तनायमानविशेषकार्यकारणभावा-

---

अत्रेदं बोध्यम् - संयोगाद्यन्यतमत्वमनुगतमस्ति, न्यायमते अभावत्वादिवदखण्डोपाधिरूपं वा सन्निकर्षत्वं सम्भवतीति, आद्यनियमविरोधो दुर्वार इति।

आद्यनियमस्यासिद्धिमुक्त्वा 'जन्यद्रव्यप्रत्यक्षे इन्द्रियसंयोगः कारणं' इति द्वितीयनियममुपेत्य प्रकृते तस्याविरोधमाह—**द्वितीयनियमस्येति**। द्वितीयनियमस्य व्यवहारदृष्ट्या यद्द्रव्यत्वाधिकरणं तद्विषयत्वेन द्वितीयनियमाविरोधादिति सम्बन्धः। नियमस्य व्यावहारिकद्रव्यविषयत्वकल्पनायां नियामकमाह—**संयोगायोग्ये क्वचिदिति**। एकत्वद्वित्वादावित्यर्थः। एकत्वमेकमित्यादिप्रकारेण तत्रापि संख्याश्रयत्वभ्रमेण द्रव्यत्वाध्याससम्भवादित्यर्थः। तथा च द्रव्यप्रत्यक्षमात्रे इन्द्रियसंयोगस्य कारणत्वनियमस्य एकत्वादौ द्रव्यत्वाध्यासकाले तत्प्रत्यक्षे व्यभिचार इत्यर्थः। अद्रव्ये द्रव्यत्वारोपे दृष्टान्तमाह—**तमसीवेति**। सिद्धान्ते तस्य द्रव्यत्वाभ्युपगमादाह—**नैयायिकरीत्येति**। 'प्रौढालोकाभावस्तमः' इति नैयायिकैरुक्तरीत्येत्यर्थः। 'गुणाश्रयत्वं द्रव्यलक्षणं' इति जानतां तमसि रूपवत्त्वभ्रमेण द्रव्यत्वभ्रमस्सम्भवतीत्यर्थः। ननु - शुक्तिरजतादौ घटादाविव स्वभावत एव द्रव्यत्वमस्ति। अन्यथा रजतत्वादिजातिरपि तत्र न स्यात्। न चेष्टापत्तिः। [1]उत्तरत्र तत्र रजतत्वादिजातेस्साधयिष्यमाणत्वात्। ततश्च शुक्तिरजतादिकमपि व्यवहारदृष्ट्या द्रव्यत्वाधिकरणं भवति। व्यवहारदशायां शुक्तौ रजतबाधवत् शुक्तिरजते द्रव्यत्वरजतत्वादिजातिबाधादर्शनात्। तथा च शुक्तिरजतादेरिन्द्रियासंयुक्तस्य ऐन्द्रियकवृत्तिविषयत्वोपगमे द्वितीयनियमविरोधोऽपि दुर्वारः - इति चेत्, सत्यम्। शुक्तिरजतादौ रजतत्वद्रव्यत्वादिजातिर्नास्तीति मतमनुसृत्य तत्र द्रव्यत्वप्रतीतिं घटयति—**प्रातिभासिकरजत इति**। इदमर्थगतेदंत्वस्येव तद्गतद्रव्यत्वस्यापि तत्र संसर्गारोप इत्यर्थः। तथा च शुक्तिरजतं व्यवहारदृष्ट्या द्रव्यत्वाधिकरणं न भवतीति भावः। ननु 'द्रव्यप्रत्यक्षे इन्द्रियसंयोगः कारणं' इत्युपगमे 'रजतचाक्षुषे रजतचक्षुस्संयोगः कारणं' इति तृतीयनियमोऽपि दुर्वारः, रजतस्य द्रव्यविशेषत्वात् रजतचक्षुस्संयोगस्य च इन्द्रियसंयोगविशेषत्वात् द्रव्यविशेषप्रत्यक्षे इन्द्रियसंयोगविशेषः कारणमित्यस्यार्थस्य यत्सामान्यन्यायसिद्धत्वात्-इति शङ्कां परिहरति—**यत्सामान्य इति**। सामान्यकार्यकारणभावो यत्रातिप्रसङ्गावहः तत्रैवायं न्यायो नान्यत्रेत्यर्थः। न्यायस्य तद्विषयत्वेनेति सम्बन्धः। **तत इति**। न्यायादित्यर्थः।

---

1. उत्तरत्र-द्वितीयपरिच्छेदे मिथ्याभूतस्याप्यर्थक्रियाकारित्वनिरूपणावसरे।

सिद्धेः। न चात्रापि द्रव्यप्रत्यक्षे द्रव्यसंयोगः कारणमिति सामान्यनियममात्रोपगमे अन्यसंयोगादन्यद्रव्यप्रत्यक्षापत्तिरिति अतिप्रसङ्गोऽस्तीति वाच्यम्। तत्तद्द्रव्यप्रत्यक्षे तत्तद्द्रव्यसंयोगः कारणमिति नियमाभ्युपगमात्, अन्यथा तृतीयनियमेऽप्यतिप्रसङ्गस्य दुर्वारत्वात्। तस्मान्नास्ति क्लृप्तनियमभङ्गप्रसङ्गः।

किं चात्र क्लृप्तनियमभङ्गेऽपि न दोषः। 'इदं रजतं पश्यामि, नीलं जलं पश्यामि' इत्यादेरनन्यथासिद्धस्यानुभवस्य, प्रथमगृहीतानामपि प्रत्यक्षमात्रे विषयसन्निकर्षः कारणं इत्यादिनियमानां व्यावहारिकविषये संकोचकल्पनमन्तरेणोपपादनासम्भवात्। न चैवंसति 'प्रमायां सन्निकर्षः कारणं न भ्रमे' इत्यपि संकोचकल्पनसम्भवात् असन्निकृष्टस्यैव देशान्तरस्थस्य रजतस्य इहारोपापत्तिरिति अन्यथाख्यातिवादप्रसारिका। अभिव्यक्तचैतन्यावकुण्ठनशून्यस्य देशान्तर-

---

ननु बीजसामान्यस्याङ्कुरसामान्यस्य च कार्यकारणभावोपगमे बीजान्तरादङ्कुरान्तरोत्पत्तिप्रसङ्गवत् इहापि अतिप्रसङ्गसत्त्वात् उक्तन्यायप्रवृत्तिरस्त्येवेति शङ्कते—**न चात्रापीति**। उक्तातिप्रसङ्गपरिहाराय तत्तदङ्कुरव्यक्तिं प्रति तत्तद्बीजव्यक्तेरुक्तन्यायेन हेतुत्वकल्पनवत् प्रकृतेऽपि तत्तद्द्रव्यप्रत्यक्षं प्रति तत्तद्द्रव्यसंयोगस्यैव तेन न्यायेन कारणत्वं सिद्ध्यति, न तु तेन न्यायेन तृतीयकार्यकारणभावस्सिद्ध्यति-इत्याशयेनाह—**तत्तद्द्रव्येति**। ननु तेन न्यायेनातिप्रसङ्गपरिहाराय तृतीयनियम एव कुतो न कल्प्यते, तत्राह—**अन्यथेति**। तृतीयनियमकल्पने इत्यर्थः। **अतिप्रसङ्गस्येति**। अन्यरजतचक्षुस्संयोगात् अन्यरजतचाक्षुषापत्तिः इत्येवंरूपस्येत्यर्थः। न च व्यक्तिनियमवत् तृतीयनियमोऽप्यस्त्विति वाच्यम्, अतिप्रसङ्गपरिहारानुपयुक्तस्य तस्य अजागलस्तनायमानस्य अकल्पनीयताया उक्तत्वादिति भावः। **तस्मादिति**। प्रथमतृतीयनियमयोरसिद्धत्वात् द्वितीयनिमस्य चाविरुद्धत्वादित्यर्थः।

ननु प्रथमद्वितीयनियमविरोधस्य दुर्वारतायाः प्रागुक्तत्वात् तदन्तःपातिव्यक्तिनियमविरोधस्यापि दुर्वारत्वाच्च 'नास्ति क्लृप्तनियमभङ्गः' इत्ययुक्तम्, अत आह—**किं चात्रेति**। शुक्तिरजतादिस्थले इत्यर्थः। **अनन्यथासिद्धस्येति**।

स्वप्नकाले केवलसाक्षिभास्येषु रजतादिषु चाक्षुषत्वाद्यनुभवस्येव अत्रापि आरोपरूपत्वकल्पनसम्भवात् अनन्यथासिद्धत्वमसिद्धम्, क्लृप्तसामग्र्यभावस्य स्वप्न इवात्रापि तुल्यत्वात्, अन्यथा स्वप्नेऽपीन्द्रियव्यापारकल्पनाप्रसङ्गात्, अनुभवविरोधे सति तत्काले तदुपरमश्रवणस्य अन्यथानयनोपपत्तेः-इत्यादिकमत्रानुसन्धेयम्।

अनुभवस्योपपादनासम्भवादिति सम्बन्धः। क्लृप्तनियमानां सङ्कोचकल्पने सति शुक्तिरजतादेरनिर्वचनीयत्वासिद्धिं शङ्कते—**न चैवंसतीति**। देशान्तरस्थं रजतादिकं भ्रमविषय इति न्यायमतम्। तत्र असन्निकृष्टस्य कथं प्रत्यक्षत्वं इत्यनिर्वचनीयख्यातिवादिभिः शङ्कायां कृतायां, सन्निकर्षःप्रत्यक्षेकारणमित्यादिनियमस्य भवतां मते व्यावहारिकपदार्थप्रत्यक्षविषयत्वेन सङ्कोचवत् मम मतेऽपि तस्य प्रत्यक्षप्रमायां सन्निकर्षः कारणमिति प्रत्यक्षप्रमाविषयत्वेन सङ्कोचकल्पनोपपत्तेः अन्यथाख्यातिवादस्य न किञ्चित् बाधकं, इति परिहारस्सुवचः परेषामित्यर्थः। भ्रमरूपे प्रत्यक्षे सन्निकर्षस्याहेतुत्वेऽपि नान्यथाख्यातिवादप्रसक्तिरिति परिहरति—**अभिव्यक्तेति**

स्थस्य रजतस्य आपरोक्ष्यानुपपत्तेः, ख्यातिबाधानुपपत्त्यादिभिर्भ्रमविषयस्यानिर्वचनीयत्वसिद्धेश्च । न चाधिष्ठानसम्प्रयोगमात्रात् प्रातिभासिकस्यैन्द्रियकत्वोपगमे शुक्तिरजताध्याससमये तत्रैव कालान्तरे अध्यसनीयस्य रङ्गस्यापि चाक्षुषत्वं कुतो न स्यादिति वाच्यम् । रजताध्याससमये रङ्गरजतसाधारणचाकचक्यदर्शनाविशेषेऽपि यतो रागादिरूपपुरुषदोषाभावादितस्तत्र तदा न रङ्गाध्यासः तत एव मया तद्विषयवृत्त्यनुदयस्याभ्युपगमात् ।

तस्मात् इदमंशसंभिन्नरजतगोचरा एकैव वृत्तिः इन्द्रियजन्या । न ततः प्रागिदमाकारा

अर्थस्यापरोक्षत्वे इन्द्रियसन्निकृष्टत्वं न प्रयोजकं, किं त्वभिव्यक्तचैतन्याभिन्नत्वमिति वक्ष्यते। तथा च भ्रमविषयस्य रजतादेर्देशान्तरस्थत्वे आपरोक्ष्यं न सम्भवतीति शुक्तितादात्म्यापन्नं रजतं सिध्यतीत्यर्थः। अवकुण्ठनं तादात्म्यम्। नन्वेवमपि शुक्तिरजतं शुक्तिवत् सत्यमेव स्यात्, नानिर्वचनीयम्, मानाभावात् - इत्यत आह—**ख्यातीति**। ख्यातिरपरोक्षप्रतीतिः। तया भ्रमविषयस्य देशान्तरस्थत्वमसत्त्वं च निरस्तं भवति। असतस्संवित्तादात्म्याभावेन प्रत्यक्षत्वायोगात्। 'शुक्तौ कालत्रयेऽपि रजतं नास्ति' इत्यबाधितबाधकप्रत्यक्षबलाद्रजतस्थितिसमयेऽपि शुक्तौ रजताभावस्सिध्यति। शुक्तौ यदि रजतं न स्यात् तदा ख्यात्यनुपपत्तिः। यदि तत्र तत् सत्यं स्यात् तदा शुक्तौ शुक्तित्वमिव न बाध्येत। अतःख्यातिबाधान्यथानुपपत्त्या तस्यानिर्वचनीयत्वं सिध्यति। शुक्तिरजतस्य उत्पत्तिविनाशवत्त्वाच्चानिर्वचनीयत्वसिद्धिः। एतच्च विवर्तलक्षणनिरूपणावसरे प्रपञ्चितमिति नात्र प्रपञ्च्यते। उत्पत्तिमत्त्वादियुक्तिरादिशब्दार्थः। शुक्तिरजतादेस्साक्षिभास्यत्ववादी शुक्तिरजतस्य स्वतादात्म्याश्रयेदमर्थ-संप्रयोगादेव चाक्षुषवृत्तिविषयत्वेऽतिप्रसङ्ग इति शङ्कते—**न चेति**। **तत्रैवेति**। शुक्तावेव कालान्तरे यदध्य-सनीयं तस्येत्यर्थः **कुत इति**। या वृत्तिःशुक्तिरजतं विषयीकरोति सैव वृत्तिःशुक्तौ कालान्तरेऽध्यसनीयं रङ्गमपि कुतो न विषयीकरोति, तस्या वृत्तेः रजततादात्म्याश्रयेदमर्थसम्प्रयोगजन्यत्वस्येव कालान्तरीयरङ्गता-दात्म्याश्रयेदमर्थसम्प्रयोगजन्यत्वस्याप्यविशेषादित्यर्थः। तथा च—सम्प्रयोगो न रजतगोचरवृत्तिहेतुः, किं तु सादृश्यविशिष्टधर्मिज्ञानमेव हेतुः। सादृश्यज्ञानं च दोषत्वेन धर्मिज्ञानत्वेन च रजताद्यध्यासे कारणम्, रजतादिकं च स्वगोचरवृत्तिं विनैव चैतन्यभास्यं - इतिमतमुपेयमिति भावः। तव मतेऽपि शुक्तौ कालान्तरे अध्यसनीयस्य रङ्गस्य रजताध्याससमय एवाध्यासः किं न स्यात्, अधिष्ठानस्य सादृश्यज्ञानस्य च रजतरङ्गाध्याससाधारणत्वात्, इति दोषतौल्यं सूचयति—**रजताध्याससमय इति**। यदि च दृश्यमानसादृश्यरूपविषयदोषाविशेषेऽपि रजता-ध्याससमये रङ्गगोचररागात्मकपुरुषदोषस्याभावाद्रजतरागस्य सत्त्वाच्च न रङ्गाध्यास इति परिहार इष्यते, तदा ममापि तुल्यमुत्तरं इत्याशयेनाह—**यत इति**। रागादिरूपो यः पुरुषदोषः, तदभावादेस्सकाशादित्यर्थः। रागादीत्यादिपदेन रङ्गस्य बुद्धौ विपरिवर्तनं गृह्यते। दोषाभावादित इत्यादिपदेन रजतरागो गृह्यते। **तत एवेति**। रङ्गगोचररागादेरभावाद्रजतरागसत्त्वात् अन्यस्माद्वा कारणात् रजतस्यैव तत्रोत्पत्तिः तत्काले रजतविशिष्टधर्मिगोचरवृत्तेरुदयश्च उपेयते इत्यर्थः। कवितार्किकमतमुपसंहरति—**तस्मादिति**। धर्मिज्ञानस्य

वृत्तिरिति नात्र इयमज्ञाननिवर्तकत्वसदसद्भावचिन्ता कार्येति ।

भ्रमस्थले वृत्त्येकत्वानेकत्वविचार:

[1]अन्ये तु । अधिष्ठानज्ञानमध्यासकारणमिति इदमाकारां वृत्तिमुपेत्य तदभिव्यक्तेनैव साक्षिणा तदध्यस्तस्य रजतस्य अवभाससम्भवात् तद्भासकसाक्ष्यभिव्यञ्जिकया तयैवेदंवृत्त्या रजतविषयसंस्काराधानोपपत्तेश्च रजताकारवृत्तिर्व्यर्थेति - मन्यन्ते ।

[2]ज्ञानद्वयपक्षे इदमित्येका वृत्तिरध्यासकारणभूता, इदंरजतमिति द्वितीया वृत्तिरध्यस्तरजतविषया, न त्विदमंशं विना अध्यस्तमात्रगोचरा सा । 'इदं रजतं जानामि' [3]इति तस्या इदमर्थतादात्म्यापन्नरजतविषयत्वानुभवादिति केचित् ।

अन्ये तु - यथा इदमंशावच्छिन्नचैतन्यस्थाविद्या रजताकारेण विवर्तते, एवमिदमंशविषय-

---

कारणत्वे मानाभावादित्यर्थ: । नात्रेति । इदमाकारवृत्तावित्यर्थ: ।

धर्मिज्ञानस्य कारणत्वे मानाभाववचनमापातत इत्युपपादितं तत्रतत्र । तदेतदभिसन्धाय तस्य तत्कारणत्वमतमेवाह—अन्ये त्वधिष्ठानज्ञानमिति । इदमाकारवृत्तिपक्षेऽपि रजतगोचरवृत्तिरङ्गीकर्तव्येति केचित्, तन्मतं दूषयति—इदमाकारामिति । अन्ये त्विदमाकारां वृत्तिमुपेत्य रजताकारा वृत्तिर्व्यर्थेति मन्यन्त इति सम्बन्ध: । इदमाकारवृत्त्युपगमे हेतु: अधिष्ठानज्ञानमध्यासकारणमितीति । इतिशब्दो हेत्वर्थ: । धर्मिज्ञानस्याध्यासकारणत्वादित्यर्थ: । इदमाकारवृत्तिव्यतिरिक्ता रजताकारवृत्ति: किं रजतभानार्था किं वा तत्संस्कारार्था ? नाद्य इत्याह—तदभिव्यक्तेनैवेति । इदमाकारवृत्त्यभिव्यक्तेनैवेत्यर्थ: । द्वितीयं दूषयति—तद्भासकेति । न चान्यगोचरवृत्त्या कथमन्यगोचरसंस्काराधानमिति वाच्यम् । यद्वृत्त्यवच्छिन्नचैतन्ये यावन्त: पदार्था: प्रकाशन्ते तयैव वृत्त्या तावत्सु पदार्थेषु संस्काराधानमिति प्रागुक्तत्वादिति भाव: ।

ये तु - स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति - मन्यन्ते, तेषां मते अध्यस्तरजतगोचरवृत्तिरप्यस्ति । तत्र किं द्वितीया वृत्ति: अध्यस्तरजतविशिष्टधर्मिगोचरा किं वा रजतमात्रगोचरेति संशये मतद्वयेन निर्णयं दर्शयति—ज्ञानद्वयपक्ष इत्यादिना । द्वितीया वृत्ति: इदंरजतमित्येवमाकारा सती अध्यस्तरजतविषयेति सम्बन्ध: । आकारविशेषोपादानफलमाह—न त्विति । द्वितीयवृत्तेर्विशिष्टविषयकत्वे अनुभवं प्रमाणयति—इदं रजतं जानामीति ।

द्वितीयवृत्तेरध्यस्तमात्रविषयकत्वमितिमतमाह—अन्ये त्विति । ज्ञानद्वयपक्षे द्वितीयवृत्तिरविद्यावृत्तिरिति प्रतिपादयति—यथेत्यादिना । विवर्तते-परिणमत इत्यर्थ: । एवमिति । इदमंशविषयं यत् वृत्तिज्ञानं तदवच्छिन्नेत्यर्थ: । इदमाकारवृत्त्यवच्छिन्नचैतन्यगताविद्या अध्यस्तरजतमात्रगोचरवृत्तिरूपेण परिणमते । सा च

---

1. अन्ये—आश्रमस्वामिन: ।
2. ज्ञानद्वयेति । वृत्तिद्वयेत्यर्थ: ।
3. इति अनुभवादिति सम्बन्ध: ।

वृत्तिज्ञानावच्छिन्नचैतन्यस्थाविद्या रजतज्ञानाभासाकारेण विवर्तते, न त्विदमंशवृत्तिवदनध्यस्तं रजतज्ञानमस्ति। तथा च रजतस्य अधिष्ठानगतेदंत्वसंसर्गभानवत् तज्ज्ञानस्यापि अधिष्ठानगतेदंविषयत्वसंसर्गभानोपपत्तेः न तस्यापि इदंविषयत्वमभ्युपगन्तव्यम्। न च रजतवत् अध्यस्तस्य रजतेदंत्वसंसर्गस्य रजतज्ञानगोचरत्वात् तत्प्रतियोगिन इदंत्वस्यापि तद्विषयत्वं वक्तव्यमिति वाच्यम्। स्वतादात्म्याश्रयस्य इदंत्वविषयत्वादेव तस्य तत्संसर्गविषयत्वे अतिप्रसङ्गाभावात्। न चाधिष्ठानाध्यस्यमानयोः एकस्मिन् ज्ञाने प्रकाशनियमस्य [1]सम्भावनाभाष्यविवरणे प्रतिपादनात् एकवृत्तिविषयत्वं वक्तव्यमिति वाच्यम्। वृत्तिभेदेऽपि इदमाकारवृत्त्यभिव्यक्ते एकस्मिन् साक्षिणि तयोः प्रकाशोपगमात्-इत्याहुः।

वृत्तिर्ज्ञानाभासः। क्लृप्तज्ञानकरणाजन्यत्वादित्यर्थः। **अनध्यस्तमिति**। ज्ञानाभासरूपं रजतज्ञानं रजतवत् प्रातिभासिकमेव, न त्विदमाकारवृत्तिवद्व्यावहारिकम्, ज्ञानाभासस्यापि शुक्तिरजतवदेव शुक्त्यज्ञाननिवर्तकप्रत्यक्षबाध्यत्वादित्यर्थः। ज्ञानाभासस्य रजतमात्रविषयकत्वे तस्य 'इदं रजतम्' इत्याकारो न स्यात् इत्याशङ्क्य, ज्ञानाभासस्य इदमंशविषयकत्वाभावेऽपि तस्य तदाकारः सम्भवतीत्याशयेनाह—**तथा चेति**। ज्ञानाभासं प्रति इदंविषयकवृत्त्यवच्छिन्नचैतन्यस्याधिष्ठानत्वे सतीत्यर्थः। इदमंशज्ञाने ज्ञानाभासं प्रत्यधिष्ठानभूते विद्यमानं यदिदंविषयकत्वं, तत्संसर्गो रजतगोचरज्ञानाभासे भासते। तत्र दृष्टान्तमाह—**रजतस्येति**। रजताधिष्ठानगतस्येदंत्वस्य संसर्गो यथा रजते भासते तथेत्यर्थः। ननु ज्ञानाभासेन रजते गृह्यमाणे इदंत्वसंसर्गो गृह्यते चेत् इदंत्वमपि तेनावश्यं ग्राह्यम्। इदंत्वग्रहणं विना तत्संसर्गग्रहणायोगात्। तथा च ज्ञानाभासस्य रजतविशिष्टेदमंशविषयकत्व[2] सिद्धिरिति शङ्कते—**न चेति**। संसर्गांशस्य रजतज्ञानाभासगोचरत्वे हेतुगर्भं विशेषणम्—**अध्यस्तस्येति**। **वक्तव्यमिति**। अन्यथा घटत्वादिनिरूपितसंसर्गप्रत्यक्षस्य घटत्वादिविषयकत्वं न स्यात् इत्यतिप्रसङ्गापत्तेरिति भावः। ज्ञानाभासस्य इदंत्वरूपप्रतियोगिविषयकत्वाभावेऽपि ज्ञानाभासं प्रत्यधिष्ठानतया ज्ञानाभासतादात्म्यापन्नस्य इदमंशज्ञानस्य प्रतियोगिविषयकत्वात् ज्ञानाभासस्य संसर्गविषयकत्वं सम्भवति, तावतैव उक्तातिप्रसङ्गपरिहारोपपत्तेः-इति परिहरति **स्वतादात्म्याश्रयस्येति**। स्वपदं ज्ञानाभासपरम्। **वृत्तिभेदेऽपीति**। अध्यस्तमात्रगोचराविद्यावृत्तेर्विवरणकारैरेवाभ्युपगमात्[3] तदुक्तनियमे ज्ञानपदं साक्षिपरमेव न वृत्तिपरं इति विवरणकाराणामाशयो लक्ष्यत इति भावः।

---

1. सम्भावनाभाष्येति। 'कोऽयमध्यासो नाम' इत्यारभ्य 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि' इत्यतः प्राक्तनभाष्यम् अध्याससम्भावनाभाष्यं इति पञ्चपादिकाप्रस्थानप्रसिद्धिः।

2. इदमंशविषयकत्वेति। इदन्त्वप्रत्यक्षस्य इदंप्रत्यक्षरूपत्वावश्यंभावात् इति भावः।

3. विवरणकारैरेव अभ्युपगमादिति। 'न रजततत्संभिन्नशुक्तिविषयमेकं ज्ञानं समस्ति। किन्तु अविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यते इति ते मतम्' इति शङ्काग्रन्थोक्तस्य समाधाने अनिराकरणात् इति भावः।

अपरोक्षस्थले वृत्तिनिर्गमप्रयोजननिरूपणम्

ननु सर्वपदार्थानां साक्षिप्रसादादेव प्रकाशोपपत्तेः किं वृत्त्या । घटादिविषयकसंस्काराधानाद्युपपत्तये तदपेक्षणेऽपि तन्निर्गमाभ्युपगमो व्यर्थः । परोक्षस्थल इव अनिर्गतवृत्त्यवच्छिन्नसाक्षिणैव घटादेरपि प्रकाशोपपत्तेः । न च तथासति परोक्षापरोक्षवैलक्षण्यानुपपत्तिः । शाब्दानुमित्योरिव करणविशेषप्रयुक्तवृत्तिवैजात्यादेव तदुपपत्तेः

अत्र केचित् आहुः—प्रत्यक्षस्थले विषयाधिष्ठानतया तदवच्छिन्नमेव चैतन्यं विषयप्रकाशः, साक्षात्तादात्म्यरूपसम्बन्धसम्भवे स्वरूपसम्बन्धस्य वा अन्यस्य वा कल्पनायोगात्, इति तदभिव्यक्त्यर्थं युक्तो वृत्तिनिर्गमाभ्युपगमः । परोक्षस्थले व्यवहिते वह्न्यादौ वृत्तिसंसर्गायोगात् इन्द्रियवदन्वयव्यतिरेकशालिनो वृत्तिनिर्गमद्वारस्य अनुपलम्भाच्च अनिर्गतवृत्त्यवच्छिन्नचैतन्यमेव स्वरूपसम्बन्धेन विषयगोचरं अगत्या अर्थादभ्युपगम्यते—इति ।

एवं बाह्यगोचरापरोक्षवृत्तीनामेवावरणाभिभावकत्वमिति नियमस्य भ्रमस्थलीयेदमाकारवृत्तौ व्यभिचारशङ्कायां सत्यां तद्वृत्त्यभ्युपगमानभ्युपगमाभ्यां तां परिहृत्य, प्रसङ्गात् ज्ञानद्वयपक्षे किञ्चिद्विचार्य पूर्वोक्तं वृत्तिनिर्गममाक्षिपति—**नन्विति** । **किं वृत्त्येति** । वृत्तिरेव मास्तु, तन्निर्गमो दूरापास्त एवेत्याशयः । ननु - केवलसाक्षिण एव विषयानुभवरूपत्वे कालान्तरे विषयानुसन्धानं न स्यात्, अनुभवनाशलक्षणसंस्काराभावात् । तथा आगन्तुकवृत्त्यनङ्गीकारे चक्षुराद्यनुविधानं न स्यात्, नित्यसाक्षिणि चक्षुरादेरनुपयोगात् । अतो वृत्तिरादर्त्तव्या - इत्याशङ्क्य तामङ्गीकरोति—**घटादीति** । ननु विषयप्रकाश एव तन्निर्गमफलमिति, नेत्याह—**परोक्षस्थल इवेति** । ननु प्रत्यक्षपरोक्षज्ञानयोर्वैलक्षण्यमनुभवसिद्धम्, तच्च प्रत्यक्षस्थले वृत्तिनिर्गमाभ्युपगमे निर्वहति - बहिर्निर्गतवृत्त्यवच्छिन्नचैतन्यमपरोक्षज्ञानं, अनिर्गतवृत्त्यवच्छिन्नचैतन्यं परोक्षज्ञानमिति, नेत्याह—**न च तथासतीत्यादिना** । वृत्त्यनिर्गमने सतीत्यर्थः । इन्द्रियजन्यं ज्ञानं प्रत्यक्षं तदजन्यं ज्ञानं परोक्षमिति वैलक्षण्योपपत्तेरित्यर्थः । यथा शाब्दज्ञाने शब्दरूपकरणविशेषप्रयुक्तं शाब्दत्वरूपं वैजात्यं, यथावा अनुमितावनुमितित्वं, तथेत्यर्थः । **करणविशेषः** इन्द्रियं अनुमानादि च, तत्प्रयुक्तं वृत्तिषु वैजात्यं प्रत्यक्षत्वादिजातिरूपमुपाधिरूपं वा, तस्मादेवेत्यर्थः ।

वृत्तिनिर्गमं साधयति—**अत्र केचिदाहुरिति** । विषयाधिष्ठानतया विषयावच्छिन्नं यच्चैतन्यं तदेव विषयप्रकाशः, न जीवचैतन्यम्, तस्य विषयं प्रत्युपादानत्वाभावेन साक्षात्तादात्म्यसम्बन्धाभावादित्यर्थः । **अन्यस्य वेति** । परम्परासम्बन्धस्य वेत्यर्थः । तादात्म्यरूपसंबन्धसम्भवे स्वरूपसम्बन्धकल्पनायोगात्, साक्षात्सम्बन्धसम्भवे अन्यस्य संबन्धस्य कल्पनायोगात्, इति विभागः । ततः किं, तत्राह—**इति तदभिव्यक्त्यर्थमिति** । विषयावच्छिन्नब्रह्मचैतन्यस्यैव विषयप्रकाशकत्वात् तस्य च आवृतत्वात् आवरणाभिभवरूपाभिव्यक्तिसिद्ध्यर्थमित्यर्थः । ननु-उक्तयुक्त्या परोक्षस्थलेऽपि विषयावच्छिन्नब्रह्मचैतन्यमेव विषयावभासकं स्यात्, ततश्च तत्रापि तन्निर्गमः प्रसज्येतेति, नेत्याह—**परोक्षस्थल इति** । वृत्तिनिर्गमनहेतुसन्निकर्षाभावादित्याशयेनाह—**व्यवहित इति** ।

अन्ये तु—अहङ्कारसुखदुःखादिष्वापरोक्ष्यं साक्षाच्चैतन्यसंसर्गिषु क्लृप्तमिति घटादावपि विषयसंसृष्टमेव चैतन्यमापरोक्ष्यहेतुरिति तदभिव्यक्तये वृत्तिनिर्गमं समर्थयन्ते ।

इतरे तु - शब्दानुमानावगतेभ्यः प्रत्यक्षावगते स्पष्टता तावदनुभूयते । न हि रसालपरिमलादिविशेषे शतवारमाप्तोपदिष्टेऽपि प्रत्यक्षावगत इव स्पष्टताऽस्ति । तदनन्तरमपि 'कथं तत्' इति जिज्ञासानुवृत्तेः । न च शब्दान्माधुर्यमात्रावगमेऽपि रसालमाधुर्यादिवृत्त्यवान्तरजातिविशेषवाचिशब्दाभावात् तत्सत्त्वेऽपि श्रोत्रा तस्य अगृहीतसङ्गतिकत्वात् शब्दादसाधारणजातिविशेषावच्छिन्नमाधुर्यावगमो नास्तीति जिज्ञासानुवृत्तिर्युक्तेति शङ्क्यम् । 'रसाले सर्वातिशायिमाधुर्यविशेषोऽस्ति' इत्यस्माच्छब्दात्[1] तद्गतावान्तरजातिविशेषस्याप्यवगमात् । न ह्ययं शब्दः तद्गतं विशेषं

वृत्तिनिर्गमने उपपत्त्यन्तरमाह—**अन्ये त्विति** । **संसर्गिषु क्लृप्तमिति** । संसर्गः-तादात्म्यम् । विषयापरोक्ष्ये क्वचित्क्लृप्तप्रयोजकस्य संसर्गस्यैवान्यत्रापि सम्भवे तत्त्यागायोगादिति भावः। **विषयसंसृष्टमेवेति** । न तु तदसंसृष्टं जीवचैतन्यं इत्येवकारार्थः । **तदभिव्यक्तय इति** । विषयावच्छिन्नब्रह्मचैतन्याभिव्यक्तये इत्यर्थः ।

प्रत्यक्षे वस्तुनि आवरणाभिभवस्यावश्यकताप्रतिपादनपूर्वकं तदभिभवार्थं वृत्तिनिर्गमनं इति प्रतिपादयति—**इतरे त्विति** । ननु शब्दाद्यवगतेऽप्यर्थे स्पष्टता किं न स्यादिति, नेत्याह—**न हीति** । परिमलं-सुगन्धः । आदिपदं रसालगतरससङ्ग्रहार्थम् । 'आम्रफले मधुररसादिरस्ति' इत्येवंरूपादाप्तवाक्याच्छतवारमुक्तादपि मधुरत्वादिसामान्यविशिष्टतयैव रसादिज्ञानं भवति, न तु मधुरत्वव्याप्यजातिविशेषविशिष्टरसादिज्ञानम् । तथा च रसादिगतजातिविशेषज्ञानाभावादेव जातिविशेषे जिज्ञासा उपपद्यते, न तु शब्दादवगतेऽपि स्पष्टत्वाभावात्[2] इत्याशयेन शङ्कते— **न च शब्दादिति** । माधुर्यं-मधुररसः । माधुर्यादिमात्रावगमेऽपि शब्दादसाधारणजातिविशेषावच्छिन्नमाधुर्यावगमो नास्तीति सम्बन्धः । असाधारणो यो जातिविशेषः तदवच्छिन्नतया माधुर्यावगमो नास्तीत्यर्थः । जातिविशेषावगमाभावे उपायाभावं हेतुमाह—**रसालेत्यादिना** । रसालस्य यन्माधुर्यादि तद्वृत्तिर्यः अवान्तरजातिविशेषः तद्वाचकशब्दाभावादित्यर्थः । तद्बोधक[3]शब्दमङ्गीकृत्यापि शक्तिग्रहाभावात्तदवगमो न सम्भवतीत्याह—**तत्सत्त्वेऽपीति** । **तस्येति** । अवान्तरजातिविशेषवाचकशब्दस्येत्यर्थः । न च शङ्क्यमिति सम्बन्धः । तद्वाचकपदाभावेऽपि तद्बोधको वाक्यरूपश्शब्दोऽस्ति । तेन च जातिविशेषावगमोऽप्यस्ति । तथा चावगते जातिविशेषे स्पष्टत्वाभावादेव जिज्ञासा—इत्याशयेनाह—**रसाल इत्यादिना** । अयं शब्दः किं तद्गतं जातिविशेषं बोधयति, किं वा अन्यगतम् ? आद्यमङ्गीकरोति—**तद्गतावान्तरेति** । द्वितीयं दूषयति— **न ह्ययमिति** । **तत्रेति** ।

---

1. शब्दादिति । आप्तोपदिष्टात् इत्यादिः ।
2. स्पष्टत्वाभावादिति । जिज्ञासा इत्यनुषङ्गः । 'शब्दादवगतेऽपि स्पष्टत्वाभावात् जिज्ञासा' इति न तु [इत्यन्वयः ।
3. बोधकेति–वाचकेत्यर्थः ।

विहाय अन्यगतं विशेषं तत्र बोधयति। अप्रामाण्यापत्तेः। न च तद्गतमेव विशेषं विशेषत्वेन सामान्येन रूपेण बोधयति न विशिष्येति जिज्ञासेति वाच्यम्। प्रत्यक्षेणापि मधुररसविशेषणस्य जातिविशेषस्य स्वरूपत एव विषयीकरणेन जातिविशेषगतविशेषान्तराविषयीकरणात् जिज्ञासानुवृत्तिप्रसङ्गात्।

तस्मात् प्रत्यक्षग्राह्येऽभिव्यक्तापरोक्षैकरसचैतन्यावकुण्ठनात् स्पष्टता जिज्ञासानिवर्तनक्षमा, शब्दादिगम्ये तु तदभावादस्पष्टता - इति व्यवस्था अभ्युपगन्तव्या। अत एव साक्षिवेद्यस्य सुखादेः स्पष्टता। शब्दवृत्तिवेद्यस्यापि ब्रह्मणो मननादेः प्राक् अज्ञानानिवृत्तावस्पष्टता, अनन्तरं तन्निवृत्तौ स्पष्टता - इति वृत्तिनिर्गममुपपादयन्ति।

रसालमाधुर्यादावित्यर्थः। तात्पर्यविषय एव शब्दस्य प्रामाण्याभ्युपगमादिति भावः। न चाप्रामाण्ये इष्टापत्तिरिति वाच्यम्, आप्तवाक्यस्य तदङ्गीकारायोगादिति भावः। माधुर्यगतजातिविशेषावगममङ्गीकृत्य शङ्कते—**न च तद्गतमेवेति। सामान्येनेति।** विशेषत्वं रसालमाधुर्यगते जातिविशेष इव फलान्तरमाधुर्यगतेषु जातिविशेषेष्वपि सत्त्वात् सामान्यरूपमिति भावः। **न विशिष्येति।** जातिविशेषगतविशेषविशिष्टतया जातिविशेषं न बोधयति। तथा च रसालमाधुर्यगतजातिविशेषस्य स्वरूपेण शब्दादवगतत्वेऽपि स्वगतासाधारणविशेषविशिष्टतया अनवगतत्वादेव जिज्ञास्यत्वमिति भावः। जातिविशेषगतोऽसाधारणविशेषः किं जातिरूपः, किं वा जातिविशेषाश्रयेतरावृत्तित्वे सतिं जातिविशेषाश्रयवृत्तित्वरूप उपाधिर्वा। नाद्यः। जातौ तदनङ्गीकारात्। न द्वितीयः। रसालमाधुर्यगतजातिविशेषे प्रत्यक्षेणापि [1]तद्ग्रहणेन प्रत्यक्षावगतेऽपि जातिविशेषे जिज्ञासानुवृत्तिप्रसङ्गात्। तस्मात् प्रत्यक्षेणापि स जातिविशेषः स्वरूपेणैव गृह्यत इति वक्तव्यम्, स्वरूपेण तदवगमश्च उक्तशब्दादप्यस्त्येवेति शब्दावगतस्यापि स्पष्टत्वे तत्र जिज्ञासानुवृत्तिर्न स्यात् इत्याशयेनाह—**प्रत्यक्षेणापीति।**

तस्मादिति। प्रत्यक्षावगत इव शब्दादिगम्येऽर्थे स्पष्टत्वाभावादित्यर्थः। अनुभवसिद्धायाः स्पष्टतायाः प्रयोजकमाह—**अभिव्यक्तेति।** अपरोक्षत्वं - स्वप्रकाशत्वम्। एकरसत्वम् - एकरूपत्वम्। अभिव्यक्तं यदपरोक्षैकरसं चैतन्यं - तत्तादात्म्यात् प्रत्यक्षग्राह्ये स्पष्टता विषयताविशेषरूपेत्यर्थः। अनेन विषयगतस्पष्टताप्रयोजकीभूता या विषयचैतन्याभिव्यक्तिः आवरणनिवृत्तिरूपा तस्यास्सिद्धये वृत्तिनिर्गमनमपेक्षितमिति सूचितम्। आवरणनिवृत्तेः स्पष्टताप्रयोजकत्वे अन्वयव्यतिरेकौ दर्शयति—**अत एवेत्यादिना।** अभिव्यक्तचैतन्यसंसर्गादेवेत्यर्थः। **शब्दवृत्तीति।** शब्दजन्या वृत्तिः मननाद्यनुष्ठानात्प्रागसम्भावनाविपरीतभावनाभ्यां प्रतिबद्धत्वात् अज्ञानानिवर्तिका, तदनुष्ठानानन्तरमप्रतिबद्धत्वादज्ञाननिवर्तिकेति भावः।

---

1. तद्ग्रहणेनेति। उक्तोपाधिः तच्छब्दार्थः। जातिविशेषाश्रयेतरेषां अतीतानागतानां वर्तमानमात्रग्राहिप्रत्यक्षेण ग्रहीतुमशक्यत्वात् तद्घटितस्य उक्तोपाधेरपि न प्रत्यक्षग्राह्यत्वमिति भावः।

ननु—एतावतापि विषयावारकाज्ञाननिवृत्त्यर्थं वृत्तिनिर्गम इत्युक्तम्, तदयुक्तम्-विषयावच्छिन्नचैतन्यगतस्य तदावारकाज्ञानस्य अनिर्गतवृत्त्या निवृत्त्यभ्युपगमेऽपि अनतिप्रसङ्गात्। न च-तथासति देवदत्तीयघटज्ञानेन यज्ञदत्तीयघटाज्ञानस्यापि निवृत्तिप्रसङ्गः, समानविषयकत्वस्य सत्त्वात्। अहमर्थविषयचैतन्यनिष्ठयोर्ज्ञानाज्ञानयोर्भिन्नाश्रयत्वेन तयोर्विरोधे समानाश्रयत्वस्यातन्त्रत्वात् - इति वाच्यम्। समानाश्रयविषयत्वं ज्ञानाज्ञानयोर्विरोधप्रयोजकमङ्गीकृत्य वृत्तिनिर्गमनाभ्युपगमेऽपि देवदत्तीयघटवृत्तेः यज्ञदत्तीयघटाज्ञानस्य च घटावच्छिन्नचैतन्यैकाश्रयत्वप्राप्त्या अतिप्रसङ्गतादवस्थ्येन यदज्ञानं यं पुरुषं प्रति यद्विषयावारकं तत् तदीयतद्विषयकज्ञाननिवर्त्यमिति पृथगेव विरोधप्रयोजकस्य वक्तव्यतया समानाश्रयत्वस्यानपेक्षणात्।

अत्राहुः—वृत्तिनिर्गमनानभ्युपगमे ज्ञानाज्ञानयोर्विरोधप्रयोजकमेव दुर्निरूपम्। यदज्ञानं

नन्वेतावतापीति। अत्रकेचिदाहुरित्यादिना मतत्रयोपन्यासात्मकग्रन्थेनापीत्यर्थः। विषयावारकाज्ञानस्य पुरुषगतत्वमते अनिर्गतवृत्त्या निवृत्तिसम्भवेऽपि तस्य विषयावच्छिन्नचैतन्यगतत्वपक्षे तन्निर्गमापेक्षा स्यात् इत्याशङ्क्य, अनिर्गतवृत्त्यैव विषयगताज्ञानस्यापि निवृत्तौ नास्ति बाधकं इत्याशयेन अज्ञानं विशिनष्टि—**विषयावच्छिन्नचैतन्यगतस्येति**। ननु-ज्ञानाज्ञानयोः निवर्त्यनिवर्तकभावलक्षणे विरोधे समानाश्रयत्वे सति समानविषयकत्वं तन्त्रम्। समानाश्रयत्वं च वृत्तिनिर्गमने सति सम्भवति, अज्ञानाश्रये विषयचैतन्ये वृत्तिरूपज्ञानस्यापि स्थितिलाभात्। तन्निर्गमाभावे तु तयोः समानाश्रयत्वासम्भवात् समानविषयकत्वमात्रं विरोधप्रयोजकं पर्यवस्यति, तथा चातिप्रसङ्गः - इति शङ्कते—**न च तथासतीति**। वृत्तिनिर्गमानुपगमे सतीत्यर्थः। **सत्त्वादिति**। देवदत्तीयघटज्ञानयज्ञदत्तीयघटाज्ञानयोरिति शेषः। **अहमर्थेति**। वृत्तिनिर्गमनाभावे सति ज्ञानमहमर्थनिष्ठमेव, न विषयचैतन्यनिष्ठम्। विषयावारकाज्ञानं च विषयचैतन्यनिष्ठमेव, न त्वहमर्थनिष्ठम्। तथा च समानाश्रयत्वं बाधितत्वात् न प्रयोजककोटिप्रविष्टमित्यर्थः। **समानाश्रयविषयत्वमिति**। ज्ञानाज्ञानयोर्विरोधे समानाश्रयत्वे सति समानविषयकत्वं प्रयोजकं परिकल्प्य तन्निर्वाहाय वृत्तिनिर्गमे स्वीकृतेऽपि उक्तदोषतादवस्थ्येन तयोर्विरोधे उक्तप्रयोजकादन्यदेव प्रयोजकं कल्पनीयम्। तच्च वृत्तिनिर्गमं विनैव सिद्ध्यति। अतो विरोधप्रयोजकोपपादकतयाऽपि वृत्तिनिर्गमो न सिद्ध्यतीति समुदायार्थः। **देवदत्तीयेति**। यज्ञदत्तीयघटाज्ञानाश्रये घटावच्छिन्नचैतन्ये देवदत्तीयघटज्ञानरूपवृत्तेर्निर्गमनद्वारा सम्बन्धे सति देवदत्तीयघटज्ञानयज्ञदत्तीयघटाज्ञानयोस्समानाश्रयत्वे सति समानविषयकत्वं लभ्यते, न च देवदत्तीयघटवृत्त्या यज्ञदत्तीयघटाज्ञाननिवृत्तिरस्तीति उक्तदोषतादवस्थ्यमित्यर्थः। यदि इदं प्रयोजकं न भवति किं तर्हि तत्प्रयोजकं वृत्तिनिर्गमननिरपेक्षं पूर्ववादिनस्तवाभिप्रेतम्, तत्राह—**यदज्ञानमिति**। **तदिति**। तदज्ञानं तत्पुरुषीयतद्विषयकज्ञाननिवर्त्यमित्यर्थः। तथा च प्रयोजकशरीरे यं पुरुषं प्रतीत्यनेन तदीयेत्यनेन च यज्ञदत्तं प्रति विषयावारकाज्ञानस्य यज्ञदत्तीयज्ञानेनैव निवृत्तिः न देवदत्तज्ञानेनेति नियमलाभात् नोक्तातिप्रसङ्ग इति सूचितम्।

वृत्तिनिर्गमं साधयितुमुपक्रमते—**अत्राहुरित्यादिना**। **किं तदिति**। अपरोक्षत्वं जातिरुपाधिर्वेति

यं पुरुषं प्रति इत्याद्युक्तमिति चेत्, न—परोक्षज्ञानेनापि विषयगताज्ञाननिवृत्तिप्रसङ्गात्। अपरोक्षत्वमपि निवर्तकज्ञानविशेषणमिति चेत्, किं तदपरोक्षत्वं? न तावज्जातिः। 'दण्ड्ययमासीत्' इति संस्कारोपनीत[1]दण्डविशिष्टपुरुषविषयस्य चाक्षुषज्ञानस्य दण्डांशेऽपि तत्सत्त्वे तत्रापि विषयगताज्ञाननिवृत्त्यापातात्, 'दण्डं साक्षात्करोमि' इति तदंशेऽप्यापरोक्ष्यानुभवापत्तेश्च। अननुभवेऽपि[2] संस्कारं सन्निकर्षं परिकल्प्य इन्द्रियसन्निकर्षजन्यतया तत्र काल्पनिकापरोक्ष्याभ्युपगमे अनुमित्यादावपि लिङ्गज्ञानादिकं सन्निकर्षं परिकल्प्य तदङ्गीकारापत्तेः। दण्डांशे आपरोक्ष्यासत्त्वे तु तस्य जातित्वायोगात्, जातेर्व्याप्यवृत्तित्वनियमात्, तदनियमेऽपि अवच्छेदकोपाधिभेदानिरूपणेन तस्या-

---

किंशब्दार्थः। आद्यं दूषयति—**न तावदिति**। पूर्वं दण्डविशिष्टतया गृहीते विष्णुमित्रे वर्तमानकाले दण्डवियुक्ते [3]प्रत्यक्षप्रत्यभिज्ञानं संस्काररूपोपनायकसहितादिन्द्रियात् जायते 'अयं विष्णुमित्रो दण्ड्यासीत्' इति। तत्र दण्डांशे प्रत्यक्षत्वमस्ति न वा। आद्ये दोषमाह—**दण्डांशेऽपीति**। **निवृत्त्यापातादिति**। न चात्रेष्टापत्तिर्वक्तुं शक्या, 'स दण्ड इदानीं कीदृशः' इति जिज्ञासानुदयप्रसङ्गादिति भावः। ननु-अज्ञाननिवृत्त्यनुभवयोरभावेऽपि दण्डांशे प्रत्यक्षत्वं कल्प्यते। कल्पकं च इन्द्रियसन्निकर्षजन्यत्वम्। सन्निकर्षश्च विषयप्रत्यासत्तिः इति मतमनुसृत्य संस्कारः कल्प्यते-इत्याशङ्क्य, अतिप्रसङ्गमाह—**अननुभवेऽपीत्यादिना**। अनुमितौ लिङ्गज्ञानं सन्निकर्षः, उपमितौ सादृश्यज्ञानं सन्निकर्षः, शाब्दे पदार्थोपस्थितिस्सन्निकर्षः, अर्थापत्तावनुपपद्यमानपदार्थज्ञानं सन्निकर्षः, अभावज्ञाने प्रतियोगिज्ञानं सन्निकर्षः, इति कल्पनया प्रत्यक्षप्रमाणपरिशेषापत्तेरिति भावः। **तदङ्गीकारेति**। अपरोक्षत्वाङ्गीकारापत्तेरित्यर्थः। दण्डांशेऽपि न प्रत्यक्षत्वमस्तीति द्वितीयकल्पं दूषयति—**दण्डांश इति**। **व्याप्यवृत्तित्वनियमादिति**। अन्यथा एकस्यामेव प्रत्यभिज्ञायां तत्तांशे संस्कारजन्यतया स्मृतित्वापत्तौ जातिसंकरापत्तेरिति भावः। **तदनियमेऽपीति**। जातेर्व्याप्यवृत्तित्वनियमाभावेऽपि[4] प्रकृते प्रत्यभिज्ञायां विष्णुमित्रांशे प्रत्यक्षत्वं दण्डांशे तदभावश्चास्तीति वक्तव्यम्। ततश्च अवच्छेदकभेदं विना प्रतियोगितदभावयोरेकत्र वृत्त्ययोगादुपाधिभेदो वाच्यः। स च दुर्निरूपः। तस्मात् अपरोक्षत्वजातेः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपाव्याप्यवृत्तित्वायोगाद्व्याप्यवृत्तिजातित्वमेव वाच्यम्। तत्र च [5]दूषणमुक्तमिति भावः। ननु-प्रकृते उपाधिभेदानिरूपणमसिद्धम्, लौकिकसन्निकर्षजन्यत्वतदभावयोर्वा संस्काराजन्यज्ञानत्वतदभावयोर्वा विष्णुमित्रविषयकत्वतदभावयोर्वा अपरोक्षत्वतदभावौ प्रति उपाधित्वसम्भवात् इति चेत्, न - उक्तोपाधीनामपि भावाभावरूपतया तदर्थमुपाध्यन्तरापेक्षायामनवस्थाप्रसङ्गादिति

---

1. उपनीतेति। उपनयः—उपस्थितिः, उपस्थितेत्यर्थः। उपस्थापकः उपनायकपदार्थः।
2. अननुभवेऽपि आपरोक्ष्याभ्युपगमे इति संबन्धः।
3. प्रत्यक्षप्रत्यभिज्ञानं - प्रत्यभिज्ञानात्मकं प्रत्यक्षमित्यर्थः।
4. जातेः व्याप्यवृत्तित्वनियमाभावेऽपीति। गुणगतस्य साङ्कर्यस्य जातिबाधकत्वं न संप्रतिपन्नमिति इत्यादिः।
5. दूषणमुक्तमिति। साङ्कर्यसामान्यस्य जातिबाधकतायां युक्तत्वादित्यभिप्रायः।

व्याप्यवृत्तिजातित्वायोगाच्च । नाप्युपाधिः—तदनिर्वचनात् । इन्द्रियजन्यत्वमिति चेत्, न—साक्षिप्रत्यक्षाव्यापनात्, अनुमितिशाब्दज्ञानोपनीतगुरुत्वादिविशिष्टघटप्रत्यक्षे विशेषणांशातिव्यापनाच्च, करणान्तराभावेन तदंशे परोक्षेऽपि उपनयसहकारिसामर्थ्यादिन्द्रियस्यैव जनकत्वात्; अनुगतजन्यतावच्छेदकाग्रहेण अनेकेष्विन्द्रियजन्यत्वस्य दुर्ग्रहत्वाच्च । तद्ग्रहे च तस्यैव प्रथमप्रतीतस्यापरोक्षत्वरूपत्वोपपत्तौ प्रत्यक्षानुभवायोग्यस्य[1] इन्द्रियजन्यत्वस्य तद्योग्यापरोक्ष्यरूपत्वकल्पनायोगात् । एतेन - इन्द्रियसन्निकर्षजन्यत्वमापरोक्ष्यम्, उपनयसहकृतेन्द्रियजन्यपरोक्षांशे च न

भावः । अपरोक्षत्वमुपाधिरिति पक्षं दूषयति—**नापीति** । अनिर्वचनमसिद्धमिति चेत्, तत्र वक्तव्यम्—किमिन्द्रियजन्यत्वमपरोक्षत्वं, किं वा तत्सन्निकर्षजन्यत्वं, सिद्धान्त्यभिमतं वा । तत्राद्यमनूद्य दूषयति—**इन्द्रियेति** । सुखादिप्रत्यक्षरूपे नित्यसाक्षिण्यव्याप्तिमुक्त्वा अतिव्याप्तिमप्याह—**अनुमितीति** । यस्मिन् घटे अनुमानेन वा शब्देन वा गुरुत्वमनुभूतं तस्मिन् इन्द्रियसन्निकर्षे सति 'घटोऽयं गुरुः' इति प्रत्यक्षं भवति । तत्र विशेषणीभूतगुरुत्वांशेऽतिव्याप्तेरित्यर्थः । ननु गुरुत्वस्य इन्द्रियायोग्यतया परोक्षे तदंशज्ञाने तज्जन्यत्वमसिद्धमिति, अत आह—**करणान्तरेति । परोक्षेऽपीति** । यथा [2]रुचिदत्तमते अनुमितौ मनसः करणत्वं तथेति भावः । न च - [3]इन्द्रियत्वेनेन्द्रियजन्यत्वमपरोक्षत्वम्, गुरुत्वांशज्ञाने च न तथा तज्जन्यत्वमिति नातिव्याप्तिरिति—वाच्यम्, तथापि साक्षिप्रत्यक्षाव्याप्त्यनिरासादिति भावः । अनेकेषु रूपादिसाक्षात्कारेषु तज्जन्यत्वं दुर्ग्रहम् । अनुगतजन्यतावच्छेदकाभावेन तज्ज्ञानं विना जन्यत्वज्ञानासम्भवादित्याह—**अनुगतेति** । ननु 'साक्षात्करोमि' इत्यनुभवसिद्धः कश्चिदखण्डोपाधिरेव जन्यतावच्छेदकोऽस्तु इत्याशङ्क्य तर्हि स एवापरोक्षत्वं भवेत् नान्यदित्याह—**तद्ग्रहे चेति** । अवच्छेद्यजन्यत्वग्रहात् पूर्वमेव अवच्छेदकग्रहस्यावश्यकत्वात्, 'साक्षात्करोमि' इत्यनुभवयोग्यस्यापरोक्षत्वस्य तदयोग्यधर्मरूपत्वायोगाच्चेत्यर्थः । अस्तु तर्हि उक्तावच्छेदकोपाधेरेवापरोक्षत्वरूपत्वम् । स किं व्याप्यवृत्तिः अव्याप्यवृत्तिर्वा । नाद्यः - 'दण्ड्ययमासीत्' इति प्रत्यक्षे दण्डांशेऽतिव्याप्तेः । न द्वितीयः- अवच्छेदकभेदानिरूपणात् । न च - विष्णुमित्रविषयकत्वावच्छेदेन तत्रापरोक्षत्वरूपोपाधिरस्ति, दण्डविषयकत्वावच्छेदेन तत्रैव तदभावोऽप्यस्तीति - वाच्यम् । तथासति दण्डांशे विष्णुमित्रविषकत्वाभावस्य वक्तव्यतया तत्र प्रत्यक्षे विष्णुमित्रविषयकत्वतदभावयोरविरोधायावच्छेदकान्तरापेक्षायां पूर्वोक्तानवस्थाप्रसङ्गात्, अखण्डोपाधिस्वीकारे जातिमात्रविलयप्रसङ्गाच्च नोक्तोपाधिपक्षस्सम्भवतीति भावः । उपाधिपक्षे द्वितीयविकल्पं निराचष्टे—**एतेनेति** । [4]अव्याप्त्यादिदोषप्रसङ्गेनेत्यर्थः । इन्द्रियजन्यत्वमपरोक्षत्वमिति पक्षे या अतिव्याप्तिरुक्ता सा तत्सन्निकर्षजन्यत्वं तदिति पक्षे नास्तीत्याह शङ्ककः—**उपनयेति** । करणान्तराभावेन इन्द्रियजन्यत्वसत्त्वेऽपि

---

1. प्रत्यक्षानुभवायोग्यस्येति । प्रत्यक्षायोग्येन्द्रियत्वविशिष्टघटितत्वेन इत्यादिः ।
2. रुचिदत्तेति । रुचिदत्तो नाम चिन्तामण्यादिप्रकाशव्याख्याता नैयायिकः ।
3. इन्द्रियत्वेनेन्द्रियजन्यत्वम् — इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यत्वम् ।
4, अव्याप्त्यादीति । साक्षिप्रत्यक्षेऽव्याप्तिः । दुर्ग्रहत्वादिकं वक्ष्यमाणदूषणं च आदिशब्दार्थः ।

सन्निकर्षजन्यत्वम्, अनुमितावप्युपनीतभान[1]सत्त्वेन प्रमाणान्तरसाधारणस्योपनयस्य असन्निकर्षत्वात् इत्यपि शङ्का-निरस्ता। संयोगादिसन्निकर्षाणामननुगमेनाननुगमाच्च। यत्तवाभिमतमापरोक्ष्यं तदेव ममाप्यस्त्विति चेत्, न - तस्य शाब्दापरोक्षनिरूपणप्रस्तावे प्रतिपादनीयस्य तत्रैव दर्शनीयया रीत्या अज्ञाननिवृत्तिप्रयोज्यत्वेन [2]तन्निवृत्तिप्रयोजकविशेषणभावायोगात्।

तत्सन्निकर्षजन्यत्वं नास्ति, उपनयस्य सन्निकर्षत्वासम्भवात् सन्निकर्षान्तराभावाच्चेति भावः। दूषणान्तरमाह—**संयोगादीति।** संयोगसंयुक्तसमवायादिसन्निकर्षाणामननुगमेन - संयोगादिष्वनुगतसन्निकर्षत्वाभावेनेति यावत्। **अननुगमाच्चेति।** इन्द्रियसन्निकर्षजन्यत्वस्येति शेषः। तथा च घटतद्रूपरूपत्वशब्दशब्दत्वसुखादिगोचर-साक्षात्कारेषु 'साक्षात्करोमि' इत्यनुगतप्रत्यक्षं[3] न स्यादिति भावः। उपाधिपक्षे तृतीयमुपाधिमाशङ्कते—**यत्तवाभि-मतमिति।** तव सिद्धान्तिनो यत् ज्ञानगतमपरोक्षत्वं सम्मतं तदेव मम मतेऽप्यस्तु, तथा च अपरोक्षत्वस्या-ज्ञाननिवर्तकज्ञानविशेषणत्वसम्भवात् न परोक्षज्ञानेन तन्निवृत्तिप्रसङ्ग इति भावः। मदभिमतापरोक्षत्वस्य ज्ञाने तन्निवृत्तिप्रयोजकत्वं न सम्भवतीति सिद्धान्ती दूषयति—**न तस्येति।** मदभिमतापरोक्षत्वस्येत्यर्थः। प्रस्तावः—प्रकरणम्। तच्च तृतीयपरिच्छेदावसाने द्रष्टव्यम्। **तत्रैव दर्शनीययेति।** ज्ञानस्यापरोक्षत्वं हि न करणविशेषप्रयुक्तं, किं त्वपरोक्षार्थाभिन्नत्वम्। इदं चापरोक्षत्वं विषयावभासकचैतन्यरूपज्ञाननिष्ठं, न वृत्तिनिष्ठम्। अतो न साक्षिप्रत्यक्षाव्याप्तिः। अर्थापरोक्ष्यं च स्वव्यवहारानुकूलचैतन्याभिन्नत्वम्। स्वपदमर्थपरम्। तद्व्यवहा-रानुकूलं च चैतन्यं निवृत्तावरणं तत्तधिष्ठानचैतन्यमेव। तथा च घटाद्यर्थस्य स्वव्यवहारानुकूलेन स्वाधिष्ठानचैतन्येन स्वगोचरवृत्त्यभिव्यक्तेन तादात्म्यलक्षणाभेदसत्त्वात् स्वव्यवहारानुकूलचैतन्याभिन्नत्वरूपमपरोक्षत्वमुपपन्नम्। तथा अहङ्कारादिषु तदधिष्ठानभूतस्य केवलसाक्षिरूपतत्प्रत्यक्षज्ञानस्य बाह्यघटादिषु तत्तदाकारवृत्त्युपहितस्य घटादि-प्रत्यक्षज्ञानरूपस्य घटाद्यधिष्ठानचैतन्यस्य च तेनतेन विषयेण तादात्म्यसत्त्वात् अपरोक्षार्थाभिन्नत्वरूपमपरोक्षत्वमुप-पन्नमिति हि तत्र दर्शनीया रीतिः। **प्रयोज्यत्वेनेति।** विषयचैतन्यगताज्ञाननिवृत्तौ सत्यां विषयस्य घटा-देःस्वव्यवहारानुकूलचैतन्याभिन्नत्वरूपमपरोक्षत्वं लभ्यते। विषयस्य तल्लाभे सति तज्ज्ञानस्यापरोक्षार्थाभिन्नत्व-रूपमपरोक्षत्वं लभ्यते। तथा च विषयचैतन्यगताज्ञाननिवृत्तेः पूर्वं ज्ञानस्यापरोक्षत्वालाभेन सिद्धान्त्यभिमतस्य ज्ञानगतापरोक्षत्वस्य विषयचैतन्यगताज्ञाननिवृत्तिप्रयोज्यस्य अज्ञाननिवृत्तिं प्रति प्रयोजकत्वासम्भवादित्यर्थः। तन्निवृत्तिं प्रति प्रयोजकतया[4] निवर्तकज्ञानविशेषणत्वायोगादित्यक्षरार्थः।

---

1. उपनीतभानेति। उपनीतं—उपस्थितं तन्निष्ठं उपस्थितिप्रयुक्तञ्च यत् भानं—विषयता तत् उपनीतभानम्। तच्च अनुमितिनिरूपितमपि भवति, अनुमितौ परामर्शोपस्थापितसाध्यस्य विषयत्वात् इत्यर्थः।

2. तन्निवृत्तीति। अज्ञानं तच्छब्दार्थः।

3. अनुगतप्रत्यक्षम्—एकाकारप्रत्यक्षं इत्यर्थः। अनेकव्यक्तिषु एकाकारप्रत्यक्षस्य अनेकानुगतैकधर्मावच्छिन्न-विषयकत्वं विना निर्वाहासंभवात् इन्द्रियसन्निकर्षजन्यत्वस्य च अननुगतत्वात् उक्तसाक्षात्कारेषु एकाकारप्रत्यक्षस्य अनुपपत्तिरिति भावः।

4. प्रयोजकतयेति। विशेषणत्वान्वयी अभेदः तृतीयार्थः।

तस्मात् 'तरति शोकमात्मवित्' इति श्रुतस्य ब्रह्मज्ञानस्य मूलाज्ञानाश्रयभूतसर्वोपादानब्रह्मसंसर्गनियतस्य मूलाज्ञाननिवर्तकत्वात् ऐन्द्रियकवृत्तयः तत्तदिन्द्रियसन्निकर्षसामर्थ्यात्तत्तद्विषयावच्छिन्नचैतन्यसंसृष्टा एव उत्पद्यन्ते इति नियममुपेत्य अज्ञानाश्रयचैतन्यसंसर्गनियतत्वं निवर्तकज्ञानविशेषणं वाच्यम्। तथा च सति यत् अज्ञानं यं पुरुषं प्रति यद्विषयावारकं तत् तदीयतद्विषयतदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञाननिवर्त्यमिति ज्ञानाज्ञानयोर्विरोधप्रयोजकं निरूपितं भवति।

तस्मादिति। 'यत् अज्ञानं यं पुरुषं प्रति' इत्यादिरूपे निरुक्ते विरोधप्रयोजके अपरोक्षत्वस्य निवर्तकज्ञानविशेषणत्वासम्भवादित्यर्थः। तस्मात् अज्ञानाश्रयचैतन्यसंसर्गनियतत्वं निवर्तकज्ञानविशेषणं वाच्यमिति सम्बन्धः। परोक्षज्ञानस्य अज्ञाननिवर्तकत्वप्रसङ्गवारणायेति शेषः। ननु विषयसंसृष्टस्य वृत्तिज्ञानस्य विषयगताज्ञाननिवर्तकत्वं क्वचिदप्यक्लृप्तमित्याशङ्क्य ब्रह्मगोचरवृत्तिज्ञाने क्लृप्तमित्याशयेनाह—**ब्रह्मज्ञानस्येति।** मूलाज्ञानाश्रयभूते सर्वोपादाने ब्रह्मणि संसर्गनियतस्येत्यर्थः। यदा ब्रह्मगोचरवृत्तिज्ञानमुदेति तदा नियमेन ब्रह्मसंसृष्टमेवोदेतीत्यत्र हेतुत्वेन सर्वोपादानत्वमुपात्तम्। कार्यमात्रस्य जन्मप्रभृति उपादानभूतब्रह्मणा सह संसर्गनियमे सति ब्रह्मगोचरवृत्तिज्ञानस्यापि स्वनिवर्त्यमूलाज्ञानाश्रयभूते ब्रह्मणि संसर्गनियमोऽप्यर्थसिद्ध इति भावः। ब्रह्मज्ञानस्याज्ञाननिवर्तकत्वे मानमाह—**तरति शोकमिति।** शोकपदमज्ञानपरम्। आत्मपदं प्रत्यगभिन्नब्रह्मपरम्। श्रुतस्येति पदात् पूर्वं अज्ञाननिवर्तकत्वेनेति शेषः। परोक्षवृत्तीनां विषयचैतन्यसंसर्गाभावादैन्द्रियकवृत्तीनां तत्संसर्गे को हेतुः, तत्राह—**तत्तदिन्द्रियसन्निकर्षसामर्थ्यादिति।** अनेन परोक्षवृत्तीनामज्ञानाश्रयविषयचैतन्यसंसर्गनियतत्वरूपविशेषणाभावात् यदज्ञानं यं प्रतीत्याद्यंशसत्त्वेऽपि न तत्रातिप्रसङ्ग इति सूचितम्। पर्यवसितं प्रयोजकं दर्शयति—**तथा चेति।** उक्तविशेषणे सतीत्यर्थः। घटावच्छिन्नचैतन्ये तदावारकाज्ञानानि बहूनि सन्ति। तेषां मध्ये कानिचिद्देवदत्तं प्रति तदावारकाणि, कानिचिच्च यज्ञदत्तादिकं प्रति तदावारकाणि। एवं प्रतिविषयं पुरुषभेदेन अनेकाज्ञानानि सन्ति। तथा च विषयावारकाज्ञानानां मध्ये यत् अज्ञानं यं पुरुषं-देवदत्तं प्रति यद्विषयावारकं-यस्य विषयस्य घटस्यावारकं, तत् अज्ञानं तदीयेन-देवदत्तीयेन तद्विषयेण-घटविषयकेण तदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञानेन निवर्त्यमित्यर्थः। तदज्ञानेतिपदेन देवदत्तं प्रति घटावारकाज्ञानमभिधीयते। तदज्ञानाश्रयचैतन्यं घटावच्छिन्नचैतन्यं, तत्र यस्संसर्गः, तन्नियतः-तद्व्याप्यः आत्मलाभो यस्य घटगोचरवृत्तिज्ञानस्य, तत् ज्ञानं तदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभम्। तच्च तत् अज्ञानं चेति विग्रहः। आत्मलाभः-उत्पत्तिः। नियमश्च—यदा यदा घटगोचरवृत्तिज्ञानस्य घटेन्द्रियसन्निकर्षजन्यस्य आत्मलाभः, तदा तदा घटावच्छिन्नचैतन्ये तस्य (घटगोचरवृत्तिज्ञानस्य) संसर्गः-इत्येवमात्मकः। तदुक्तं प्राक् 'ऐन्द्रियकवृत्तयस्तत्तद्विषयावच्छिन्नचैतन्यसंसृष्टा एवोत्पद्यन्ते इति नियममुपेत्य' इति। अत्र 'यदा यदा ऐन्द्रियकवृत्तीनामुत्पत्तिः तदातदा विषयचैतन्ये तासां संसर्गः इति हि नियमः स्पष्टं भासते। एवं विषयान्तरेषु पुरुषान्तरेषु

न चैवंसति नाडीहृदयस्वरूपगोचरशाब्दज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसङ्गः। [1]तस्य कदाचिदर्थवश-सम्पन्ननाडीहृदयान्यतरवस्तुसंसर्गसम्भवेऽपि विषयसंसर्गं विनापि शाब्दज्ञानसम्भवेन तत्संसर्ग-नियतात्मलाभत्वाभावात्। तस्मात् ज्ञानाज्ञानविरोधनिर्वाहाय वृत्तिनिर्गमो वक्तव्य इति।

अन्ये तु विषयगताज्ञानस्य लाघवात् समानाधिकरणज्ञाननिवर्त्यत्वसिद्धौ वृत्तिनिर्गमः फलतीत्याहुः।

अज्ञानान्तरेषु ज्ञानान्तरेषु च [2]इदं प्रयोजकं [3]विशिष्यविशिष्य योजनीयम्। ननु 'परोक्षवृत्तीनां विषय-चैतन्यसंसर्गाभावेनोक्तप्रयोजकानाक्रान्तत्वादज्ञाननिवर्तकत्वप्रसङ्गो नास्ति' इत्युक्तमयुक्तम्, क्वचित् परोक्षवृत्तेरपि विषयसंसर्गसत्त्वात्। तथा हि—'हृदयपुण्डरीके नाड्यस्सन्ति' इतिवाक्यात् जायमानाया वृत्तेः कदाचित् अन्तःकरणे हृदयपुण्डरीकस्थे नाडीहृदयान्यतरवस्त्ववच्छेदेन जनने सति तस्या वृत्तेः तदन्यतरवस्त्ववच्छिन्न-चैतन्यसंसर्गसत्त्वात् तदावरणनिवर्तकत्वप्रसङ्गः। न चेष्टापत्तिः। तदा तदन्यतरवस्तुनि जिज्ञासानुदयप्रसङ्गात्-इति शङ्का नियतपदेन निरस्तेत्याह—**न चैवंसतीति**। विरोधप्रयोजकस्य नियमगर्भत्वे सति शाब्दज्ञानस्याप्य-ज्ञाननिवर्तकत्वप्रसङ्गो न चेति सम्बन्धः। 'यदायदा हृदयादिगोचरशाब्दवृत्तेरुदयः तदातदा तस्या वृत्तेर्हृदयाद्यन्यतरवस्त्ववच्छिचैतन्ये संसर्गः'इति नियमो नास्तीति हेतुमाह—**तस्येति**। तादृशशाब्दज्ञान-स्येत्यर्थः। ऐन्द्रियकवृत्तीनां हि तत्तदिन्द्रियगोलकावच्छिन्नान्तःकरणप्रदेशेषूत्पत्तिनियमःसम्भाव्यते। इन्द्रिय-निरपेक्षवृत्तीनां तु अन्तःकरणे जायमानानां प्रदेशनियमे कारणाभावात् हृदयादिगोचरशाब्दवृत्तिः कदाचिद्दैवयोगाद्धृ-दयाद्यवच्छेदेनान्तःकरणे जायते कदाचित्तु हृदयादिप्रदेशं विहाय प्रदेशान्तरावच्छेदेन सा तत्र जायत इति, निरुक्त[4]नियमो नास्तीत्यर्थः। अत्र तस्येति षष्ठ्याःसप्तम्या पञ्चम्या च सम्बन्धः। **तस्मादिति**। वृत्तिज्ञानस्य अज्ञानाश्रयविषयचैतन्यसंसर्गं विना तन्निवर्तकत्वासम्भवादित्यर्थः।

एवं ज्ञानाज्ञानयोर्विरोधप्रयोजकनिर्वाहकत्वेन वृत्तिनिर्गमनं प्रसाध्य तत्रैव हेत्वन्तराणि मतभेदेनाह—**अन्ये त्वित्यादिना। लाघवादिति।** विषयगताज्ञानस्य अन्वयव्यतिरेकाभ्यां ज्ञाननिवर्त्यत्वग्रहदशायां लाघवात् समानाधिकरणज्ञाननिवर्त्यत्वं गृह्यते, न तु व्यधिकरणज्ञाननिवर्त्यत्वं इत्यर्थः। एतदुक्तं भवति—अज्ञानस्य विषय-

---

1. तस्येत्यादि। तस्य संसर्गेति सम्बन्धः। कदाचित् सम्भवेऽपि इति संबन्धः। सम्भवस्य कादाचित्कत्वे हेतुगर्भं अर्थवशसंपन्नेति संसर्गविशेषणम्। सामग्र्यन्तरमेलनप्रयुक्तजन्यतावदिति तदर्थः। मेलनस्य कादाचित्कत्वात् सम्भवस्य कादाचित्कत्वमिति।

2. इदं प्रयोजकम्—विरोधप्रयोजकम्। विरोधप्रयोजकस्य विरुद्धोभयवृत्तित्वावश्यम्भावात् ज्ञानाज्ञानोभयमपि निर्दिष्टम्।

3. विशिष्येति। विषयविशेषं पुरुषविशेषं अज्ञानव्यक्तिविशेषञ्च घटयित्वेत्यर्थः। अन्यथा व्यभिचारेण प्रयोजकत्वभङ्गापत्तेरिति भावः।

4. नियमो नास्तीति। अन्तःकरणस्य इन्द्रियत्वं हृदयपुण्डरीकस्य तद्गोलकत्वं च अप्रामाणिकमिति भावः।

अपरे तु बाह्यप्रकाशस्य बाह्यतमोनिवर्तकत्वं सामानाधिकरण्ये सत्येव दृष्टमिति दृष्टान्तानुरोधात् वृत्तिनिर्गमः सिद्ध्यतीत्याहुः ।

केचित्तु आवरणाभिभवार्थं वृत्तिनिर्गमानपेक्षायामपि चिदुपरागार्थं प्रमातृचैतन्यस्य विषयप्रकाशकब्रह्मचैतन्याभेदाभिव्यक्त्यर्थं वा तदपेक्षेत्याहुः ।

अथ किंप्रमाणकोऽयं जीवब्रह्मणोरभेदः, यो वृत्त्याऽभिव्यज्येत । वेदान्तप्रमाणक इति घण्टाघोषः । सर्वेऽपि वेदान्ताः उपक्रमोपसंहारैकरूप्यादितात्पर्यलिङ्गैर्विमृश्यमानाः प्रत्यगभिन्ने

चैतन्यगतत्वात्तन्निवृत्तिलक्षणं ज्ञानकार्यमपि [1]तद्गतमेव । तथा च अज्ञाननिवृत्तिरूपकार्यस्य स्वकारणभूतज्ञानेन सह इन्द्रियसन्निकर्षसामर्थ्यात् सामानाधिकरण्यलक्षणसम्बन्धसम्भवे तत्त्यागायोगात्, कार्यकारणयोस्सामानाधिकरण्यस्यौत्सर्गिकत्वात् - इति । **बाह्यतम इति ।** अन्धकारेत्यर्थः । **सत्येवेति ।** अन्यत्र विद्यमानादालोकात् अन्यत्र तमोनाशो न दृष्ट इत्येवकारार्थः । अज्ञानस्यापि विषयावारकत्वेन बाह्यतमस्सदृशत्वात् वृत्तिरूपस्य वृत्त्यारूढचैतन्यरूपस्य वा प्रकाशस्य आवरणनिवर्तकत्वेनालोकसदृशत्वात् ज्ञानाज्ञानयोरप्यन्धकारालोकयोरिव समानाधिकरणयोरेव निवर्त्यनिवर्तकभावः कल्प्यते । तच्च सामानाधिकरण्यं अज्ञानाश्रये विषयचैतन्ये वृत्तिज्ञानस्य संसर्गरूपम्, स च संसर्गो वृत्तिनिर्गमाधीन इति भावः ।

एवं विषयचैतन्यगताज्ञाननिवृत्तिरनिर्गतवृत्त्यापि सम्भवति, अतो वृत्तिनिर्गमनाभ्युपगमो व्यर्थः इत्याक्षेपे तन्निर्गमं विना तन्निवृत्तिर्न सम्भवतीति तदभ्युपगमस्सफल इति समाधानं दर्शितम् । इदानीं 'विषयचैतन्यगताज्ञाननिवृत्त्यर्थं वृत्तिनिर्गमनं नापेक्षितम्' इति पूर्वपक्ष्युक्तमङ्गीकृत्यापि वृत्तिनिर्गमनं साधयति— **केचित्त्विति ।** इदं च प्रकारद्वयं प्रागेव प्रपञ्चितमिति नेह प्रपञ्च्यत इति बोध्यम् ।

प्रमातृचैतन्यशब्दितजीवस्य ब्रह्माभेदे नास्ति प्रमाणमिति शङ्कते—**अथेति ।** अयमभेदः किं वेदान्तप्रमाणकः किं वा तदन्यप्रमाणकः । तत्र न तावदाद्यः कल्पःसम्भवति—वेदान्तानामुपासनादिपरत्वप्रतीतेः, न द्वितीयः—जीवब्रह्माभेदस्यौपनिषदत्वश्रुतिविरोधात् इति भावः । तत्राद्यं कल्पं परिगृह्य समाधत्ते— **वेदान्तेति ।** तेषामुपासनादिपरत्वं दूषयति—**सर्वेऽपीति ।** वेदान्तानां क तात्पर्यमिति विमृश्यमानास्सर्वेऽपि वेदान्ता अद्वये जीवाभिन्ने ब्रह्मणि समनुयन्ति - समन्वयं - तात्पर्यं लभन्ते । तात्पर्यज्ञापकानि लिङ्गानि कथयति—**उपक्रमेति ।** आदिपदमभ्यासादिसङ्ग्रहार्थम् । के ते वेदान्ताः ? कथं वा तेषु उक्तलिङ्गानां

---

1. तद्गतमेवेति । ध्वंसात्मकनिवृत्तेः प्रतियोगिसमानाधिकरणत्वनियमात् इति भावः ।

ब्रह्मण्यद्वितीये समनुयन्ति। यथा चायमर्थः तथा [1]शास्त्र एव समन्वयाध्याये प्रपञ्चितः। विस्तरभयान्नेह प्रतन्यत इति ॥

इति शास्त्रसिद्धान्तलेशसंग्रहे प्रथमःपरिच्छेदः

सत्त्वं? को वा तैर्लिङ्गैस्तात्पर्यावगमप्रकारः ? इत्याकाङ्क्षायामाह—**यथा चेति**। सर्वेषां वेदान्तानां अयमेव परमतात्पर्यविषयीभूतोऽर्थः न तूपासनादिरिति प्रपञ्चितमित्यर्थः। अत्रापि कुतो न प्रपञ्च्यते, तत्राह—**विस्तरेति**। ग्रन्थविस्तरभयादित्यर्थः।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्द-
सरस्वतीचरणारविन्दसंलग्नरजोभूतस्य अच्युत-
कृष्णानन्दतीर्थस्य कृतौ शास्त्रसिद्धान्त-
लेशसंग्रहव्याख्यायां कृष्णालङ्काराख्यायां
प्रथमः परिच्छेदःसमाप्तः

श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं सम्प्रणम्य च।
व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

॥ श्रीः ॥

---

1. शास्त्रम्—ब्रह्मसूत्र-तद्भाष्य-तट्टीकाभामती-तट्टीकाकल्पतरु-तट्टीकापरिमलान्तं वेदान्तमीमांसाशास्त्रं, तत्रेत्यर्थः। उपलक्षणमिदं न्यायरक्षामणिग्रन्थस्यापि। तस्मिन्नपि हि ग्रन्थे अयमर्थः प्रपञ्चितः।

शिवाभ्यां नमः

द्वितीयः परिच्छेदः

अथ - कथमद्वितीये ब्रह्मणि वेदान्तानां समन्वयः, [1]प्रत्यक्षादिविरोधात् इति चेत्,

न - आरम्भणाधिकरणोदाहृतश्रुतियुक्तिभिः प्रत्यक्षाद्यधिगम्यप्रपञ्चस्य ब्रह्मविवर्ततया मिथ्यात्वावगमात् ।

नन्दहस्तमवलम्ब्य पाणिना मन्दमन्दमरविन्दलोचनः ।
सञ्चरन् कनककिङ्किणीरवःसन्ततं मम तनोतु मङ्गलम् ॥

योे मे विश्वेश्वरक्षेत्रे विश्वेश्वरसमो गुरुः ।
समध्यास्ते स्वयंज्योतिर्वाणीसंज्ञो भजामि तम् ॥

स्वयंप्रकाशसरस्वतीसंज्ञक इत्यर्थः ।

आचार्यचरणद्वन्द्वस्मृतिर्लेखकरूपिणम् ।
मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्यतः ॥

अत्र - व्याख्याने प्रभुः-समर्थ इत्यर्थः ।

[2]प्रथमपरिच्छेदे ब्रह्मलक्षणविचारावसरे लक्षणस्य मतभेदेन ज्ञेयब्रह्मनिष्ठत्वनिरूपणेन ईश्वररूपब्रह्मनिष्ठत्वनिरूपणेन च तत्पदलक्ष्यार्थवाच्यार्थौ निरूपितौ । तथा तदनन्तरं जीवतत्साक्षिणोर्निरूपणेन त्वंपदवाच्यार्थलक्ष्यार्थौ निरूपितौ । तथा च अर्थात् वाक्यार्थरूपाभेदोऽपि निरूपितो भवति । वाक्यार्थस्य तत्त्वंपदलक्ष्यार्थानतिरेकात् । तथा च जीवाभिन्ने निर्विशेषे ब्रह्मणि वेदान्तसमन्वयरूपः प्रथमाध्यायार्थः तात्पर्यतः पूर्वपरिच्छेदे निरूपितो भवति । इदानीं द्वितीयाध्यायार्थरूपं वेदान्तसमन्वयस्य मानान्तराविरोधं निरूपयितुं परिच्छेदान्तरमारभते— **अथ कथमिति** । समन्वयः-तात्पर्यम् । **प्रत्यक्षेति** । ब्रह्मापेक्षया द्वितीयस्य प्रपञ्चस्य प्रत्यक्षसिद्धत्वात् अद्वितीयत्वं तस्य बाधितम्, तथा च बाधितेऽर्थे कथं श्रुतेस्तात्पर्यम्, अप्रामाण्यप्रसङ्गादिति भावः । प्रपञ्चस्य रज्जुसर्पा-

---

1. प्रत्यक्षादीत्यादिपदेन द्वैतग्राहिप्रमाणान्तराणि सङ्गृह्यन्ते ।

2. प्रथमपरिच्छेदेन द्वितीयपरिच्छेदस्य सङ्गतिमाह-**प्रथम** परिच्छेदे इत्यादिना **आरभते** इत्यन्तेन । अयमर्थः-समन्वयरूपस्य प्रथमपरिच्छेदार्थस्य अत्र परिच्छेदे विरोधतत्परिहाराभ्यां आक्षेपसमाधानकरणात् अनयोः विषयविषयिभावः सङ्गतिः । प्रथमपरिच्छेदार्थो हि विषयः, तद्गोचरत्वात् आक्षेपसमाधानयोः, द्वितीयपरिच्छेदार्थश्च विषयी-इति । आक्षेपः एककार्यकारित्वं वा सङ्गतिरिति भावः ।

भिन्नविषयकत्वोपपादनेन श्रुतिप्रत्यक्षयोर्विरोधनिरासः

ननु - न श्रुतियुक्तिभिः प्रपञ्चस्य मिथ्यात्वं प्रत्याययितुं शक्यते, 'घटः सन्' इत्यादिघटादिसत्त्वग्राहिप्रत्यक्षादिविरोधात्—

अत्राहुः तत्त्वशुद्धिकाराः—**न प्रत्यक्षं घटपटादि तत्सत्त्वं वा गृह्णाति, किं तु अधिष्ठानत्वेन घटाद्यनुगतं सन्मात्रम्। तथा च प्रत्यक्षमपि सद्रूपब्रह्माद्वैतसिद्ध्यनुकूलमेव। तथासति 'सत्' 'सत्' इत्येव प्रत्यक्षं स्यात्, न तु 'घटः सन्' इत्यादिप्रत्यक्षमिन्द्रियान्वयव्यतिरेकानुविधायि[1] इति चेत्, न - यथा-भ्रमेषु इदमंशस्याधिष्ठानस्य प्रत्यक्षेण ग्रहणं, इन्द्रियान्वयव्यतिरेकयोः तत्रैवोपक्षयः, रजतांशस्य त्वारोपितस्य भ्रान्त्या प्रतिभासः, तथा-सर्वत्र सन्मात्रस्य प्रत्यक्षेण ग्रहणं, तत्रैवेन्द्रियव्यापारः, घटादिभेदवस्तुप्रतिभासो भ्रान्त्या, इत्यभ्युपगमात्। ननु तद्वदिह बाधादर्शनात्**

दिवत् ब्रह्मणि कल्पितत्वात् [2]वास्तवमद्वितीयत्वमबाधितमिति समाधत्ते—**नेति। श्रुतियुक्तिभिरिति।** एता श्रुतियुक्तयो विवर्तलक्षणनिरूपणावसरेऽस्माभिर्दर्शिता इति नात्र प्रदर्श्यन्ते।

प्रत्यक्षविरोधे श्रुतियुक्तीनामेव बाधो न्याय्य इति मन्यमान आक्षिपति—**ननु नेति। 'घटस्सन्'** इत्यादिना घटादिसत्त्वग्राहिप्रत्यक्षेण सह प्रपञ्चमिथ्यात्वप्रत्यायकश्रुतियुक्तीनां विरोधसत्त्वादित्यर्थः।

श्रुत्यादिगम्यमिथ्यात्वविरुद्धं सत्त्वं प्रत्यक्षग्राह्यमेव न भवति, अतस्तद्विरोधशङ्कैव निरालम्बनेति **पञ्चभिर्मतैः** प्रतिपादयति—**अत्राहुरित्यादिना।** प्रत्यक्षं घटादि न गृह्णाति तस्य-घटादेः सत्त्वं वा न गृह्णाति चेत्, तर्हि निर्विषयं तत् प्रसज्येतेति शङ्कते—**किन्त्विति।** उत्तरम्—**अधिष्ठानेति। सन्मात्रमिति।** सद्रूपं ब्रह्मैव प्रत्यक्षप्रमेयमित्यर्थः। एवंस्थिते न केवलं प्रत्यक्षविरोधाभावः, किं तु लाभोऽप्यस्तीत्याह—**तथा चेति।** घटादेरैन्द्रियकत्ववादी शङ्कते—**तथासतीति।** तस्य सन्मात्रविषयकत्वे सतीत्यर्थः। **इन्द्रियेति।** न च सन्मात्रप्रत्यक्ष एव इन्द्रियान्वयाद्यनुविधानोपपत्तेः 'प्रत्यक्षस्य घटादिविषयकत्वाभावे तदनुविधानं न स्यात्' इत्येतदभिप्रायकं [3]विशेषणमयुक्तमिति वाच्यम्। स्वप्रकाशस्य सन्मात्रस्य प्रकाशाय इन्द्रियापेक्षानुपपत्तेरिति भावः। अत्र आक्षेप्ता किं सिद्धान्त्येकदेशी, किं वा भेदवादी। आद्ये तत्सम्मतदृष्टान्तेन सन्मात्रस्य प्रत्यक्षप्रमेयत्वमाह—**यथेति। तत्रैवेति।** अधिष्ठानग्रहण एवेत्यर्थः। **भ्रान्त्येति।** साक्षिरूपयेत्यर्थः। **सन्मात्रस्येति।** तस्य स्वप्रकाशत्वेऽप्यावृतत्वात् [4]आवरणनिवर्तकवृत्त्युत्पत्तये इन्द्रियापेक्षेति भावः। **घटादीति।** घटादेस्तद्भेदरूपस्य च वस्तुनः प्रतिभासो भ्रान्त्या - ऐन्द्रियकवृत्त्यभिव्यक्तसन्मात्ररूपसाक्षिचैतन्यलक्षणया इत्यभ्यु-

---

1. इन्द्रियान्वयव्यतिरेकानुविधायीति। इन्द्रियान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकवत् इत्यर्थः।

2. वास्तवमिति। वस्तु-परमार्थसत्। वस्त्वेव वास्तवम्। तथा च प्रपञ्चस्य मिथ्यात्वेन प्रपञ्चाभावस्य सत्यत्वेन च ब्रह्मणि प्रपञ्चतदभावयोः विषमसत्ताकत्वात् अविरोध इति भावः।

3. विशेषणम्—इन्द्रियान्वयव्यतिरेकानुविधायि इति प्रत्यक्षविशेषणम्।

4. आवरणनिवर्तकेति। आवरणमत्र अज्ञानावस्थारूपं, न तु मूलाज्ञानम्। तेन ऐन्द्रियकवृत्त्या न मुक्त्यापत्तिः।

तथाभ्युपगम एव निर्मूल इति चेत्, न-बाधादर्शनेऽपि देशकालव्यवहितवस्तुवत् घटादिभेद-वस्तुनः प्रत्यक्षायोग्यत्वस्यैव तत्र मूलत्वात्। तथाहि—इन्द्रियव्यापारानन्तरं प्रतीयमानो घटादिः [1]सर्वतो भिन्न एव प्रतीयते, तदा तत्र घटादिभेदे संशयविपर्ययादर्शनात्। यत्रापि स्थाण्वादौ पुरुषत्वादिसंशयः तत्रापि तद्व्यतिरिक्तेभ्यो भेदोऽसन्दिग्धाविपर्यस्तत्वात् प्रकाशत एव। भेदस्य च प्रतियोगिसहोपलम्भनियमवतो न प्रत्यक्षेण ग्रहणं सम्भवति। देशकालव्यवधानेन असन्निकृष्टानामपि प्रतियोगिनां सम्भवात्। भेदज्ञानं प्रतियोग्यंशे संस्कारापेक्षणात् स्मृतिरूपमस्तु

पगमादित्यर्थः। एतेन सत्सदित्येव प्रत्यक्षं स्यादित्याक्षेप्ता भेदवाद्यपि निरस्तः। सिद्धान्तिना घटादौ तत्सत्त्वे च प्रत्यक्षस्य प्रामाण्यानङ्गीकारेऽपि घटादेः प्रत्यक्षज्ञाने साक्षिरूपे भानाङ्गीकारात्। भेदवादी शङ्कते—**नन्विति**। शुक्तिरजतादेर्बाधदर्शनात् युक्तं तस्य भ्रान्त्या प्रतिभासाङ्गीकरणम्, (तथा) घटादिद्वैतस्य बाधादर्शनात् तस्य भ्रान्तिमात्रसिद्धत्वमनुपपन्नमित्यर्थः। किं श्रौतबाधादर्शनं विवक्षितं, किं वा प्रत्यक्षबाधादर्शनं, यौक्तिकबाधादर्शनं वा। आद्यमसिद्धम्, दृश्यमात्रस्य ब्रह्मणि 'नेह नानास्ति' इत्यादिश्रुत्या बाधदर्शनात्-इत्याशयेनाह—**नेति**। द्वितीयमङ्गीकरोति—**बाधादर्शनेऽपीति**। तृतीयमप्यसिद्ध्या दूषयति **देशकालेति। घटादीति।** घटादेस्तद्धर्मिकभेदरूपस्य च वस्तुन इत्यर्थः। प्रत्यक्षायोग्यत्वमेव दर्शयितुं प्रथमं सम्मतमर्थं दर्शयति—**इन्द्रियेति**। [2]तत्रेतिपदव्याख्या—**घटादिभेद इति**। घटादिधर्मिकभेदे इत्यर्थः। सर्वतो भिन्न एव प्रतीयत इत्ययुक्तम्, इन्द्रियसन्निकृष्टे स्थाण्वादौ क्वचित् पुरुषादिप्रतियोगिकभेदस्याप्रतीतेः, प्रतीतौ वा संशयाभावापत्तेः, अत आह—**यत्रापीति**। ततः किं, तत्राह—**भेदस्य चेति। प्रतियोगि-सहोपलम्भनियमवत इति।** ससम्बन्धिकपदार्थप्रत्यक्षे यावत्सम्बन्धिविषयकत्वस्य यावत्सम्बन्धिप्रत्यक्षजन्यतायाश्च संयोगादिप्रत्यक्षे क्लृप्तत्वात् भेदप्रत्यक्षेऽपि यावत्प्रतियोगिविषयकत्वं यावत्प्रतियोगिप्रत्यक्षजन्यत्वं च वाच्यम्; भेदप्रत्यक्षस्यापि ससम्बन्धिकपदार्थप्रत्यक्षत्वात्। तथा च यावन्तः प्रतियोगिनः तावतां प्रतियोगिनां प्रत्यक्षासम्भवेन क्लृप्तसामग्र्यभावात् न भेदः प्रत्यक्षप्रमायोग्य इति तस्य भ्रान्तिमात्रसिद्धत्वं युक्तम्। [3]सिद्धान्ते तु भेदप्रत्यक्षस्य नित्यसाक्षिरूपत्वात् न कारणापेक्षेति भावः। सहोपलम्भनियममात्रस्य[4] भेदसत्यत्वमते कथञ्चित् [5]उद्धारं शङ्कते—**भेदज्ञानमिति। संस्कारापेक्षणादिति।** तज्जन्यत्वसम्भवादित्यर्थः। भेदज्ञाने हि प्रतियोगिनां

---

1. सर्वतः—स्वातिरिक्तात् सर्वस्मात्।

2. 'तत्र घटादिभेदे' इति मूलपाठमनुसृत्य व्याचष्टे-'तत्रेति-पदव्याख्या-घटादिभेद इति' इति। स्वरसतः प्रतीयमाने 'घटादिप्रतियोगिकभेदे' इत्यस्यार्थस्य प्रकृतासङ्गतत्वात् व्याचष्टे-घटादिधर्मिकभेदे इत्यर्थ इति। घटादौ तदितर-प्रतियोगिकभेदो हि उपपादनीयत्वेन प्रकृतः। 'तत्र पटादिभेदे' इति पाठश्चेत् सुगमः। तत्र-घटादौ पटादिप्रतियोगिक-भेदे इत्यर्थः।

3. सिद्धान्ते इति। सिद्धान्तोऽत्र तत्त्वशुद्धिकृतां मतम्।

4. नियममात्रस्येति। मात्रपदेन भेदप्रत्यक्षे प्रतियोगिप्रत्यक्षजन्यत्वनियमस्य व्यवच्छेदः।

5. उद्धारमिति। उद्धारः- अनुपपत्तिपरिहारः, उपपत्तिर्वा।

प्रत्यभिज्ञानमिव तत्तांशे-इति चेत्, न-तथापि भेदगतप्रतियोगिवैशिष्ट्यांशे तदभावात्। न च कनकाचलो भेदप्रतियोगी [1]वस्तुत्वात् इति भेदे प्रतियोगिवैशिष्ट्यगोचरानुमित्या तत्संस्कारसम्भवः। भेदज्ञानं विना अनुमित्यभावेन (अनुमानप्रवृत्त्ययोगेन) आत्माश्रयापत्तेः। पक्षसाध्यहेतुसपक्षाद्य-भेदभ्रमे सति सिद्धसाधनादिना [2]अनुमानाप्रवृत्त्या तदभेदज्ञानविघटनाय तद्भेदज्ञानस्यापेक्षितत्वात्। अस्तु तर्हि भेदांश इव प्रतियोगिवैशिष्ट्यांशेऽपि प्रत्यक्षमिति चेत्, न-प्रतियोगिनोऽप्रत्यक्षत्वे तद्वैशिष्ट्यप्रत्यक्षायोगात्। सम्बन्धिद्वयप्रत्यक्षं विना सम्बन्धप्रत्यक्षासम्भवात्। तस्मात् प्रत्यक्षायो-ग्यस्य प्रतियोगिनो भ्रान्तिरूप एव प्रतिभास इति तदेकवित्तिवेद्यत्वनियतस्य भेदस्य भेदैकवित्तिवेद्यत्व-नियतस्य घटादेश्च [3]भ्रमैकविषयत्वात् प्रत्यक्षं [4]निर्विशेषसन्मात्रग्राहि अद्वैतसिद्ध्यनुकूलमिति।

प्रतियोगितावच्छेदकरूपेणैव भानं परैरुपेयते। तेन रूपेण सकलप्रतियोगिगोचर[5]पूर्वानुभवासम्भवेन संस्कारासम्भ-वात् असन्निकृष्टप्रतियोग्यंशे स्मृतिरूपत्वमपि न सम्भवति। तदभ्युपगम्याप्याह सिद्धान्ती— **न तथापीति।** कनकाचलादिपदार्थानां सन्निकृष्टघटनिष्ठभेदप्रतियोगित्वेन पूर्वमननुभूतत्वादिति भावः। वैशिष्ट्यांशे पूर्वानुभवं शङ्कते—**कनकाचल इति।** एवमितरपदार्थेष्वपि अनुमानं द्रष्टव्यमिति भावः। **आत्माश्रयापत्तेरिति।** भेदज्ञानस्य भेदज्ञानाधीनत्वे न किञ्चित् भेदज्ञानं सिद्ध्येदिति भावः। **अप्रवृत्त्येति।** तथा च पक्षाद्यभेदज्ञानस्य अनुमितिप्रतिबन्धकतया तद्विघटकपक्षादिभेदज्ञानमावश्यकमिति भावः। **तर्हीति।** प्रतियोगिवैशिष्ट्यांशज्ञानस्य स्मृतिरूपत्वासम्भवे सतीत्यर्थः। **तदेकेति।** तत्पदं प्रतियोगिपरम्। नियमेन प्रतियोगिज्ञाने विषयस्येत्यर्थः। वित्तिपदं प्रत्यक्षपरम्, भेदपदजन्यभेदज्ञानस्य प्रतियोगिविषयकत्वादर्शनादिति बोध्यम्। **भ्रमैकविषयत्वादिति।** अधिष्ठानस्यापि भ्रमविषयत्वात् कल्पितत्वप्रसङ्गवारणाय एकपदम्। अधिष्ठानस्य च सम्यग्दर्शनं प्रत्यपि विषयत्वात् भ्रान्त्येकविषयत्वमसिद्धम्। तथा च प्रत्यक्षं सद्वस्तुन्येव प्रमाणं सत् श्रुत्यनुकूलमित्यर्थः।

---

1. वस्तुत्वादित्यविवक्षितम्। अनुमितेः हेत्वविषयकत्वस्य शास्त्रेषु सिद्धान्तितत्वात्। अथ वा 'इत्यादिन्याय-प्रयोज्यया' 'उक्तपक्षसाध्यहेतुकथा' इति वा अर्थविवक्षणात् न दोषः।

2. अनुमानेति - अनुमितीत्यर्थः।

3. भ्रमैकेति। भ्रममात्रेत्यर्थः।

4. अत्रेदं बोध्यम्—निर्विशेषसन्मात्रविषयमपि ऐन्द्रियकं प्रत्यक्षं न मूलाज्ञानं उपमृद्गाति। महावाक्यजन्यं तु प्रत्यक्षं मूलाज्ञानं उपमृद्गाति। दृष्टा हि देवदत्तैक्ये अभिज्ञाप्रत्यक्षेणापरोक्षीकृते देशकालोपाधिकृतभेदविभ्रमानुवृत्तिः, तन्मात्रविषयेणापि प्रत्यभिज्ञाप्रत्यक्षेण भेदभ्रान्तिनिवृत्तिश्च। तस्मादिहापि प्रमेयविशेषाभावेऽपि प्रमाणविशेषादेव ज्ञान-वैलक्षण्यात् इन्द्रियेण अपरोक्षगृहीतेऽप्यद्वैते न मूलाज्ञाननिवृत्तिः, आगमेनापरोक्षीकृते तु तन्निवृत्तिः—इति। वस्तुतस्तु मूला-ज्ञानोपहितमेव चैतन्यं प्रत्यक्षविषयः। अतो न पूर्वोक्तदोषः। उक्तं चैतत् तत्त्वशुद्धौ।

5. पूर्वानुभवासंभवेनेति। घटः इतरेभ्यः सर्वेभ्यो भिन्नः-इति भेदज्ञाने सर्वनामपदाभिलप्यप्रतीतिविषयाणां प्रतियोगिनां तत्तदसाधारणरूपेण भानात् तेन रूपेण पूर्वानुभवासंभवः इति भावः।

न्यायसुधाकृतस्त्वाहुः—घटादेरैन्द्रियकत्वेऽपि "सन् घटः" [1]इत्यादिः अधिष्ठानसत्तानुवेध इति न विरोधः । एवं नीलो घट इत्यादिः अधिष्ठाननैल्यानुवेधः किं न स्यादिति चेत्, न-श्रुत्या सद्रूपस्य वस्तुनो जगदुपादानत्वमुक्तं अविरोधात् सर्वसंमतमिति तदनुवेधेनैव "सन् घटः" इत्यादिप्रतिभासोपपत्तौ घटादावपि सत्ताकल्पने गौरवम्, तस्य रूपादिहीनत्वान्नैल्यादिकं घटादावेव कल्पनीयमिति वैषम्यादिति ।

संक्षेपशारीरकाचार्यास्त्वाहुः—प्रत्यक्षस्य घटादिसत्त्वग्राहित्वेऽपि पराग्विषयस्य प्रत्यक्षादेस्तत्त्वावेदकत्वलक्षणप्रामाण्याभावात् न तद्विरोधेनाद्वैतश्रुत्यादिबाधशङ्का । अज्ञातबोधकं हि प्रमाणम् । न च प्रत्यक्षादिविषयस्य घटादेरज्ञातत्वमस्ति । जडे आवरणकृत्याभावेन अज्ञानविषयत्वानुपगमात् । स्वप्रकाशतया प्रसक्तप्रकाशं ब्रह्मैव अज्ञानविषय इति तद्बोधकमेव तत्त्वावेदकं

अस्तु वा घटादेश्चाक्षुषत्वाद्यनुभवानुरोधेन चक्षुरादिगम्यत्वं, तथापि प्रपञ्चमिथ्यात्वसाधकश्रुतियुक्तीनां न प्रत्यक्षविरोधः, प्रत्यक्षस्यापि घटादौ पृथक्सत्त्वग्राहित्वाभावात इत्याह—**न्यायसुधाकृतस्त्वाहुरिति** । सन् घट इत्यादिः घटादेःसत्त्वप्रतिभासः अधिष्ठानसत्तासम्बन्धविषयक एव, अतो न विरोध इत्यर्थः । घटादौ प्रतीयमानसत्त्वस्य अधिष्ठानगतत्वस्वीकारेऽतिप्रसङ्गं शङ्कते—**एवमिति** । नीलो घट इत्यादिः घटादौ नैल्यप्रतिभासोऽप्यधिष्ठाननैल्यसम्बन्धगोचरः किं न स्यादित्यर्थः । तथा च ब्रह्म रूपवत् स्यादिति भावः । नैल्यादेः सत्ता-[2]वैषम्येण परिहरति—**नेति । श्रुत्येति** । सदेवेत्यादिश्रुत्येत्यर्थः । **अविरोधादिति** । रज्ज्वादेस्सर्पाद्युपादानत्ववत् कूटस्थब्रह्मणोऽप्युपादानत्वाविरोधादित्यर्थः । **सर्वसम्मतमिति** । सर्वैरेव स्वीकर्तव्यमित्यर्थः । न तु यथाश्रुतम्, वैशेषिकादिभिरनङ्गीकारात् । **तदन्विति** । तत्पदमधिष्ठानसत्तापरम् । **तस्येति** । जगदधिष्ठानभूतब्रह्मण इत्यर्थः । **घटादावेवेति** । न ब्रह्मणि तत् कल्पयितुं शक्यम्, श्रुतिविरोधादिति भावः ।

प्रत्यक्षस्य घटादौ पृथक्सत्त्वग्राहित्वेऽपि तस्य प्रमाणाभासत्वात् न तेन श्रुतेर्बाधशङ्कावकाश इत्याह **संक्षेपशारीरकाचार्यास्त्विति । पराग्विषयस्येति** । जडमात्रविषयकस्येत्यर्थः । **तत्त्वेति** । [3]अनधिगतत्वे सत्यबाधितं-तत्त्वं, तदावेदकं-तद्बोधकं, तत्त्वं प्रमाणलक्षणमिति बहुवादिसम्मतम् । तच्च प्रत्यक्षस्य नास्तीति प्रमाणाभासरूपं प्रत्यक्षमिति भावः । **घटादेरिति** । तस्य अबाधितत्वे सत्यप्यज्ञातत्वं नास्तीत्यभिप्रायः । अन्यथा तदभावादपि प्रत्यक्षस्य प्रमाणाभासत्वप्रतिपादनसम्भवे अज्ञातत्वाभावमात्रप्रतिपादनायोगात् । अतो बाधितत्वाभावमुपेत्य तस्याभासत्वप्रतिपादनमिह विवक्षितमिति बोध्यम् । कृत्यं-कार्यं-फलमिति यावत् । स्वप्रकाशात्मन एव

---

1. इत्यादिः—इत्याद्याकारकः प्रत्ययः ।
2. वैषम्येण परिहरति—वैषम्यनिरूपणेन उक्तातिप्रसङ्गशङ्कां परिहरति ।
3. अनधिगतत्वे सति अबाधितमिति । अनधिगतत्वसमानाधिकरणं यत् अबाधितत्वं तद्वत् इत्यर्थः ।

प्रमाणम्। तदेव प्रमितिविषयः[1]। अत एव श्रुतिरपि 'आत्मा वा अरे द्रष्टव्यः' इत्यात्मन एव प्रमेयत्वप्रमिति नियच्छति। न हि द्रष्टव्य इत्यनेन दर्शनं विधीयते, प्रमाणपरतन्त्रस्य तस्य विध्यगोचरत्वात्, किं तु 'आत्मा दर्शनार्हः' इति अज्ञातत्वादात्मन एव प्रमेयत्वमुचितं नान्यस्येति नियम्यते[2]-इति।

केचित्तु - घटादिसत्त्वग्राहिणः प्रत्यक्षस्य प्रामाण्ये ब्रह्मप्रमाणन्यूनतानवगमेऽपि तद्ग्राह्यं सत्त्वमनुगतप्रत्ययात् सत्ताजातिरूपं वा, इहेदानीं घटोऽस्तीति देशकालसम्बन्धप्रतीतेः तत्तद्देशकालसम्बन्धरूपं वा, नास्ति घट इति स्वरूपनिषेधप्रतीतेर्घटादिस्वरूपं वा पर्यवस्यति। तच्च स्वमिथ्यात्वेन न विरुध्यते। न हि मिथ्यात्ववादिनापि घटादेः स्वरूपं वा तस्य देशकालसम्बन्धो वा

प्रमेयत्वे श्रुतिमपि प्रमाणयति—**अत एवेति**। अज्ञातत्वादेवेत्यर्थः। ननु 'द्रष्टव्यः' इति श्रुतिरात्मदर्शनं विधत्ते, नेत्याह—**न हीति**। **अगोचरत्वादिति**। पुरुषयत्नसाध्यक्रियाया एव विधियोग्यत्वादिति भावः। विधिप्रत्ययस्य गतिं पृच्छति—**किं त्विति**। अर्हार्थस्तव्यप्रत्यय इत्याह—**आत्मेति**।

प्रत्यक्षविषयजडस्याज्ञातत्वमुपेत्य जडबोधकप्रत्यक्षस्य श्रुतितुल्यप्रमाणत्वस्वीकारेऽपि प्रत्यक्षग्राह्यघटादिसत्त्वस्य मिथ्यात्वाविरुद्धत्वात् न मिथ्यात्वबोधकश्रुत्यादीनां प्रत्यक्षविरोधशङ्केत्याह—**केचित्त्विति**। प्रत्यक्षग्राह्यं सत्त्वं सत्ताजातिरूपं वा, तत्तद्देशकालसम्बन्धरूपं वा, घटादिस्वरूपं वा पर्यवस्यतीति सम्बन्धः। जातिरूपत्वे मानमाह—**अनुगतेति**। 'सन् घटः, सन् पटः' इत्यादिरूपेत्यर्थः। द्वितीये मानमाह—**इहेति**। 'इह इदानीं घटोऽस्ति' इति प्रतीतिर्घटे प्रतीयमानदेशकालसम्बन्धमेव सत्तारूपतया विषयीकरोतीति भावः। तृतीये मानमाह—**नास्ति घट इतीति**। घटो नास्तीति घटास्तितानिषेधत्वेन रूपेण घटस्वरूपनिषेधस्यैवानुभवात् घटास्तित्वं घटस्वरूपं पर्यवस्यतीत्यर्थः। ततः किं, तत्राह—**तच्चेति**। **न हीति**। तुच्छविलक्षणप्रपञ्चस्वरूपाङ्गीकारादिति भावः। 'घटादेः स्वरूपं वा नाभ्युपगम्यते' इति न हीति सम्बन्धः। तथा 'तस्य देशकालसम्बन्धो वा नाभ्युपगम्यते' इति न हीति सम्बन्धः 'तत्र जात्यादिकं वा नाभ्युपगम्यते' इति न हीति सम्बन्धः। एतत् सर्वं जगन्मिथ्यात्ववादिना अभ्युपगम्यत एव विरोधाभावात् इति भावः। तर्हि कीदृशं सत्त्वं

---

1. (i) अज्ञातमर्थमवबोधयदेव मानं तच्च प्रकाशकरणक्षममित्यभिज्ञाः।
न प्रत्यगात्मविषयादपरस्य तच्च मानस्य संभवति कस्यचिदत्र युक्त्या॥ [२-८]
(ii) सर्वं पराग्विषयमेव हि मानजातं वेदान्तसानवचनानि तु वर्जयित्वा। [२-९]
(iii) एवं न तत्त्वविनिवेदनशक्तियोगः संभाव्यतेऽनधिगताधिगतेरयोगात्।
मानान्तरस्य सकलस्य, ततश्च तेन बाधस्त्रयीशिरसि वर्णयितुं न शक्यः॥ [२-४४]
इति पद्यैः अयमर्थः प्रपञ्चितः।

2. स्पष्टीकृतश्चायमर्थः अनेन पद्येन—
द्रष्टव्य इत्यपि विधिर्न, विधिः प्रमेयमात्मानमेव विनियच्छति तत्कुतश्चेत्।
अज्ञातता च परमात्मन एव यस्माद्यस्माच्च कर्तृवशवर्ति न दर्शनं तत्॥ [२-५०]

तत्र जात्यादिकं वा नाभ्युपगम्यते, किं तु तेषामबाध्यत्वम्। न चाबाध्यत्वमेव सत्त्वं प्रत्यक्षग्राह्यमस्त्विति वाच्यम्। 'कालत्रयेऽपि नास्य बाधः' इति वर्तमानमात्रग्राहिणा प्रत्यक्षेण ग्रहीतुमशक्यत्वात् - इत्याहुः।

अन्ये तु - अबाध्यत्वरूपसत्त्वस्य प्रत्यक्षग्राह्यत्वेऽपि 'प्राणा वै सत्यं तेषामेष सत्यं' इतिश्रुत्या प्रधानभूत[1]प्राणग्रहणोपलक्षितस्य कृत्स्नस्य प्रपञ्चस्य ब्रह्मणश्च सत्यत्वोत्कर्षापकर्षप्रतीतेः, सत्यत्वे चाबाध्यत्वरूपे सर्वदैवाबाध्यत्वं किञ्चित्कालमबाध्यत्वं इत्येवंविधोत्कर्षापकर्षं विना राजराजो मन्मथमन्मथ इत्यादिशब्दतात्पर्यगोचरनियन्तृत्वसौन्दर्यादीनामिव भूयोविषयत्वाल्पविषयत्वादि-

---

मिथ्यात्वविरोधि यत्त्वया नाभ्युपेयते जगति-इति पृच्छति—**किंत्विति**। उत्तरं—**तेषामिति**। घटादीनामित्यर्थः। किं तु तेषामबाध्यत्वं नाभ्युपगम्यत इति सम्बन्धः। मिथ्यात्वस्य बाध्यत्वरूपत्वात् तद्विरुद्धं सत्त्वमबाध्यत्वरूपमेव चेत्, तर्हीदमेव सत्त्वं प्रत्यक्षविषयोऽस्तु तथा च प्रत्यक्षविरोधशङ्का स्यादेव—इत्याशयवतीं शङ्कामुद्भाव्य निराचष्टे—**न चेत्यादिना**। **अस्येति**। जगत इत्यर्थः।

अबाध्यत्वरूपमेव सत्त्वं प्रत्यक्षविषयः - इत्युपेत्यापि प्रत्यक्षविरोधाभावमाह— **अन्ये त्विति**। अबाध्यत्वरूपसत्त्वस्य प्रत्यक्षग्राह्यत्वेऽपि न मिथ्यात्वश्रुतिविरोधः इति सम्बन्धः। कालत्रयाबाध्यत्वरूपं सत्त्वं मिथ्यात्वविरोधि, तच्च ब्रह्मण एव, प्रपञ्चस्य तु यावत्तत्त्वज्ञानमबाध्यत्वरूपं सत्त्वम्, एतच्च न मिथ्यात्वविरोधीति न प्रत्यक्षविरोधः-इति वक्तुं प्रपञ्चब्रह्मणोस्सत्त्ववैलक्षण्ये प्रमाणमाह—**प्राणा इति**। प्राणग्रहणं कृत्स्नप्रपञ्चोपलक्षणार्थम्। एषः - परमात्मा तेषां सत्यं - तानपेक्ष्य सत्य इत्यर्थः। तथा च श्रुतौ प्रपञ्चस्य सत्यत्वं निकृष्टं ब्रह्मणस्सत्यत्वमुत्कृष्टमित्युक्तं भवति। तत्र प्राणपदेन प्रपञ्चोपलक्षणे नियामकमाह—**प्रधानभूतेति**। सूत्रात्मरूपस्य प्राणस्य जगद्विधारकत्वात् प्राधान्यं द्रष्टव्यम्। न चोपलक्षणे मानाभावश्शङ्कनीयः। ब्रह्मस्वरूपप्रतिपादनपरे वाक्ये प्रपञ्चैकदेशभूतप्राणग्रहणे प्रयोजनाभावात्, कृत्स्नोपलक्षणे तु, सत्यत्वेनप्रसिद्धप्रपञ्चाधिष्ठानतया ब्रह्मैव परमार्थसत्यं न तु प्रपञ्चः तस्य श्रुतिबाधितत्वेन परमार्थसत्यत्वायोगादिति ब्रह्मप्रमितिरूपप्रयोजनसत्त्वादिति भावः। ततः किं, तत्राह—**सत्यत्वे चेति**। **राजेति**। राजत्वं पालकत्वरूपं नियन्तृत्वम्। तच्च पाल्यदेशसापेक्षम्। तथा च 'विष्णुशर्मा राजराजः' इति प्रयोगे विष्णुशर्मण इतरराजापेक्षया उत्कर्षः प्रतीयते, इतरेषां च निकर्षः। तौ च पालनस्य भूयोदेशविषयकत्वाल्पदेशविषयकत्वरूपौ। मन्मथस्तावन्नारायणपुत्रस्सुन्दर इति प्रसिद्धिः पुराणेषु। तथा च अतिसुन्दरोऽयमितितात्पर्येण मन्मथमन्मथः श्रीराम इति प्रयोगो दृश्यते। तत्र सौन्दर्यं नाम उत्कृष्टरूपादिमत्त्वम्, अतिसौन्दर्यं ततोऽप्युत्कृष्टरूपादिमत्त्वमिति बोध्यम्। **असम्भवादिति**। नियन्तृत्वसौन्दर्यादिविलक्षणे बाधाभावरूपे सत्त्वे भूयोविषयत्वाल्पविषयत्वरूपोत्कर्षापकर्षयोर्जातिविशेषरूपयोश्चासम्भवादित्यर्थः। ननु-अबाधितत्वरूपेऽपि सत्त्वे प्रकारान्तरेण उत्कर्षापकर्षौ सम्भवत एव।

---

1. प्राणग्रहणोपलक्षितस्य-प्राणवाचकशब्देन अजहल्लक्षणया बोधितस्य।

रूपोत्कर्षापकर्षासम्भवात्, विधान्तरेण तत्सम्भवेऽपि प्रपञ्चस्य [1]ब्रह्मज्ञानबाध्यत्वश्रुत्यन्तरैकार्थ्यात् उक्तोत्कर्षापकर्ष एव पर्यवसानाच्च, प्रत्यक्षग्राह्यं घटादिसत्त्वं यावद्ब्रह्मज्ञानमबाध्यत्वरूपमिति न मिथ्यात्वश्रुतिविरोधः—इत्याहुः।

प्रत्यक्षविरोधेऽपि मिथ्यात्वश्रुतेः प्रबलत्वात् प्रत्यक्षबाधकत्वनिरूपणम्

अपरे तु - **प्रपञ्चस्य मिथ्यात्वसत्यत्वग्राहिणोः श्रुतिप्रत्यक्षयोः विरोधेऽपि दोषशङ्काकलङ्कितात् प्रथमप्रवृत्तात् प्रत्यक्षात् [2]निर्दोषत्वात् अपच्छेदन्यायेन परत्वाच्च श्रुतिरेव बलियसी। 'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्' इति स्मरणाच्च। न च वेदैकगम्यार्थविषयमिदं स्मरणम्। तत्र प्रत्यक्षविरोधशङ्काया अभावेन शङ्कितप्रत्यक्षविरोध एव वेदार्थे वेदस्य प्राबल्योक्त्यौचित्यात्।**

तथा हि–प्रपञ्चब्रह्मणोः कालत्रयाबाध्यत्वरूपे सत्त्वे समानेऽपि ब्रह्मगतं सत्त्वं श्रुतिगम्यत्वादुत्कृष्टं इतरत्तु लौकिकप्रमाणगम्यत्वात् निकृष्टमिति श्रुत्यर्थोपपादनसम्भवात्। तथा च मिथ्यात्वविरुद्धसत्त्वग्राहिलौकिकप्रमाणविरोधशङ्का स्यादेवेति, नेत्याह—**विधान्तरेणेति**। 'प्राणा वै सत्यं' इति श्रुतौ सत्यशब्दः प्रपञ्चस्य यदि कालत्रयाबाध्यत्वरूपं सत्यत्वं प्रतिपादयेत्, तदा निखिलप्रपञ्चस्य ब्रह्मज्ञानबाध्यत्वप्रतिपादकश्रुत्यन्तरेण सह 'प्राणा वै सत्यं' इति श्रुतेर्विरोधः स्यात्। न च अविरोधेन श्रुतिद्वयप्रामाण्यसम्भवे विरोधेन प्रामाण्यं हातव्यम्। तस्माच्छ्रुत्युक्तसत्त्वोकर्षापकर्षयोः कालत्रयाबाध्यत्वादावेव पर्यवसानं वाच्यं नान्यत्रेत्यर्थः।

एवं 'अत्राहुः' इत्यादिना प्रपञ्चमिथ्यात्वसाधकश्रुतियुक्तीनां प्रत्यक्षं विरोधि न भवतीति प्रतिपादितम्। इदानीं प्रत्यक्षस्य कालत्रयाबाध्यत्वरूपसत्त्वग्राहित्वेन श्रुतिविरोधित्वेऽपि न मिथ्यात्वसिद्ध्यनुपपत्तिः, श्रुत्या प्रत्यक्षस्य बाधोपपत्तेः इत्याह—**अपरेत्विति**। श्रुतिरेव प्रत्यक्षात् बलीयसीति सम्बन्धः। श्रुतेः प्राबल्ये हेतुद्वयमाह—**निर्दोषत्वादिति**। अपच्छेदन्यायो वक्ष्यते। प्रत्यक्षस्यापि निर्दोषत्वादिकं तुल्यमिति शङ्कां वारयति—**दोषेति**। एतच्चाग्रे स्पष्टं भविष्यति। श्रुतेः प्राबल्ये [3]मनुवचनमपि नियामकमित्याह—**प्राबल्यमिति**। जात्या-आगमत्वेनैव तेषु-प्रकृतेषु त्रिषु-प्रत्यक्षानुमानागमेषु स्मृतं-वैदिकेषु प्रसिद्धमित्यर्थः। **ननु** वेदैकगम्ये स्वर्गसाधनत्वादौ वेदस्य प्राबल्यप्रतिपादकं तद्वचनम्। मिथ्यात्वं तु न वेदैकगम्यम्। तस्यानुमानादिनापि सिद्ध्युपगमात्। अतस्तत्र श्रुतेः प्राबल्ये तद्वचनं न प्रमाणमिति मत्वा शङ्कते—**न चेति**। निराकरोति—**तत्रेति**। वेदैकगम्यार्थ इत्यर्थः। तथा च वचनस्य तद्विषयत्वे वैयर्थ्यं स्यादिति भावः। वचनस्य मिथ्यात्वप्रतिपादकश्रुतिप्राबल्यपरत्वे तु सार्थक्यमित्याह—**शङ्कितेति**। शङ्कितः-प्रत्यक्षेण सह विरोधो यस्य मिथ्यात्वरूपस्य वेदार्थस्य स तथा। एतदुक्तं भवति—यस्मिन्नर्थे वेदतदितरप्रमाण-

---

1. ब्रह्मज्ञानबाध्यत्वश्रुतिः—'विद्वान् नामरूपाद्विमुक्तः' इत्यादिश्रुतिः।
2. निर्दोषत्वादिति। निर्दोषत्वाद्बलीयसी, परत्वादपच्छेदन्यायेन बलीयसी इत्यर्थः।
3. मनुवचनमपीति। द्वैतिनां ग्रन्थे इदं ब्रह्मतर्कवचनत्वेन निर्दिष्टम्।

'तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव। न तलं विद्यते व्योम न खद्योतो हुताशनः ॥
तस्मात् प्रत्यक्षदृष्टेऽपि युक्तमर्थे परीक्षितुम्। परीक्ष्य ज्ञापयन्नर्थान् न धर्मात् परिहीयते' ॥
इति नारदस्मृतौ साक्षिप्रकरणे प्रत्यक्षदृष्टस्यापि प्रत्यक्षमविश्वस्य प्रमाणोपदेशादिभिः परीक्षणीयत्वप्रतिपादनाच्च। न हि नभोनैल्यप्रत्यक्षं नभसः शब्दादिषु पञ्चसु शब्दैकगुणत्वप्रतिपादकागमोपदेशमन्तरेण प्रत्यक्षादिना शक्यमपवदितुम्। नच नभसि समीपे नैल्यानुपलम्भात् दूरे तद्धीर्दूरत्वदोषजन्येतिनिश्चयेन तद्बाधः। दूरे नैल्यदर्शनात् समीपे तदनुपलम्भः तुहिनावकुण्ठनानुपलम्भवत्

योर्विरोधः प्रसक्तः तस्मिन्नर्थे द्वयोः प्रामाण्यायोगात् अन्यतरबाधे कर्तव्ये सति तत्र प्रबलेन दुर्बलस्य बाध इति (च) स्थिते कस्य प्राबल्यमिति भवत्यपेक्षा। तथा च वचनस्य अपेक्षितार्थसमर्पकत्वात् सार्थक्यमिति। ननु-प्रत्यक्षस्य क्वचिदप्रामाण्ये दृष्टे सति प्रपञ्चसत्त्वग्राहिप्रत्यक्षेऽपि मिथ्यात्वरूपविरोधिकोट्यनुसन्धानवतां स्यादप्रामाण्यरूपदोषशङ्का। ततश्च शङ्कितदोषं प्रत्यक्षं मिथ्यात्वश्रुत्या निर्दोषत्वेन प्रबलया बाध्यत इति वक्तव्यम्। तच्च न सम्भवति। क्वचिदपि प्रत्यक्षाप्रामाण्यादर्शनात् - इति सत्ख्यातिवादिनः शङ्कां नारदवचनोदाहरणेन निराकरोति—**तलवदिति**। तलं—इन्द्रनीलमणिमयकटाहाकारम्। **तस्मादिति**। सर्वजनसिद्धस्यापि व्योमादौ तलादिप्रत्यक्षस्याप्रामाण्यदर्शनादित्यर्थः। **अर्थ इति**। प्रत्यक्षदृष्टेऽप्यर्थे इत्यर्थः। **ज्ञापयन्निति**। आचार्यः शिष्यान् प्रति शास्त्रार्थान् बोधयन् धर्मात्-श्रेयस्साधनभूतात् न प्रच्यवत इत्यर्थः। 'आत्मनः श्रुत्युक्तं साक्षित्वमनुपपन्नम्, तस्य बोद्धृत्वेऽपि कर्तृत्वेनोदासीनत्वाभावात्' इति पूर्वपक्षे प्राप्ते 'अहं करोमि' इति प्रत्यक्षमात्रेण आत्मनि कर्तृत्वं वास्तवमिति सहसा विश्वासो न कर्तव्यः। लोके प्रत्यक्षदृष्टस्यापि बाधदर्शनात्। अतः प्रत्यक्षदृष्टमप्यात्मनि कर्तृत्वं किं चैतन्यवद्वास्तवं किं वा कल्पितमिति सम्यग्विचार्य [1]श्रुतिन्यायाभ्यां 'कल्पितमेव तत् अतो न साक्षित्वस्यानुपपत्तिः' इति शिष्यान् प्रति बोधयन् आचार्यो धर्मान्न परिहीयते इत्येतद्विषयकं नारदवचनद्वयमिति [2]सूचयति—**साक्षिप्रकरण इति**। एवं प्रत्यक्षदृष्टमपि प्रपञ्चसत्त्वं किं तस्य वास्तवं किं वा काल्पनिकमिति परीक्षा युक्तेत्याशयेन नारदवचनस्य प्रकृतसाधारणं तात्पर्यं कथयति—**प्रत्यक्षदृष्टस्यापीति**। प्रमाणपदमागमपरम्। अनुमानार्थापत्त्यादयः आदिपदग्राह्याः। प्रतिपादनाच्च प्रत्यक्षापेक्षया श्रुतिरेव बलीयसीति सम्बन्धः। प्रत्यक्षस्य दोषशङ्काकलङ्कितत्वं प्रदर्श्य तस्यागमेन बाधं प्रकृतोपयोगितया प्रतिपादयति—**न हीत्यादिना**। नभोनैल्यप्रत्यक्षं प्रत्यक्षादिना न हि शक्यमपवदितुमिति सम्बन्धः। आगमं विनापि 'नीलं नभः' इति प्रत्यक्षस्य बाधकमस्तीति शङ्कते—**न चेति**। समीपे गगने रूपानुपलम्भेन समीपे रूपाभावनिश्चये सति दूरेऽपि तत्र रूपं नास्तीति निश्चीयते, रूपस्य व्याप्यवृत्तित्वनियमेन तदेकदेशवृत्तित्वायोगादित्यर्थः। कथं तर्हि दूरे 'नीलं

---

1. श्रुतिन्यायाभ्यां विचार्येति संबन्धः।

2. सूचयतीति। प्रकरणस्य साक्षिविषयकत्वोक्तिमन्तराऽपि प्रकृतनिर्वाहसम्भवेन तदुक्तिः उक्तमर्थं सूचयतीत्यर्थः।

सामीप्यदोषजन्यः इत्यपि सम्भवात्, अनुभवबलात् नभोनैल्यमव्याप्यवृत्तीत्युपपत्तेश्च। नापि दूरस्थस्य पुंसो यत्र भूसन्निहिते नभःप्रदेशे नैल्यधीः, तत्रैव समीपं गतस्य नैल्यबुद्धेः अभावप्रत्यक्षेण बाधः। उपरिस्थितस्यैव नैल्यस्य अभ्रनक्षत्रादेरिव दूरत्वदोषात् भूसन्निधानावभास इत्युपपत्तेः। पृथिव्यादिषु सङ्कीर्णतया प्रतीयमानानां गन्धादीनाम् 'उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणाः। पृथिव्यामेव तं विद्यात् अपो वायुं च संश्रितम्॥' [म-भा-शा-238-78] इत्यादिभिरागमैरेव व्यवस्थाया वक्तव्यत्वेन प्रत्यक्षादागमप्राबल्यस्य निर्विशङ्कत्वाच्च। न हि[1] आजानसिद्धजलोपष्टम्भादिगतं गन्धादि 'पृथिवीगुण एव गन्धः, न जलादिगुणः' इत्यादिरूपेण अस्मदादिभिः प्रत्यक्षेण शक्यं विवेचयितुम्। पृथिव्यादीनां प्रायः परस्परसंसृष्टतया अन्यधर्मस्यान्यत्रावभासः सम्भाव्यत इति शङ्कितदोषं

नभः' इति धीः, तत्राह—**दूरे तद्धीरिति**। **तद्बाध इति**। तस्य-नभोनैल्यप्रत्यक्षस्य। इति निश्चयेन बाधो न चेत्यत्र हेतुमाह—**दूरे नैल्यदर्शनादिति**। तुहिनावकुण्ठनं-हिमरूपमावरणम्। तद्धि समीपे सदपि न दृश्यते। दूरे तु वृक्षाद्यावरणरूपत्वेन दृश्यते। तद्वत् सर्वत्र गगने विद्यमानमपि रूपं समीपे न दृश्यत इत्यर्थः। **दोषजन्य इति**। दोषाधीनस्थितिक इत्यर्थः। यथाश्रुते अनुपलम्भस्य उपलम्भप्रागभावरूपस्य जन्यत्वाभावादसङ्गतिः स्यात्। सामीप्यदोषेण तदुपलम्भे निरुद्धे तत्प्रागभावस्य नाशाभावात् दोषाधीनस्थितिकत्वमस्तीति नासङ्गतिरिति मन्तव्यम्। रूपस्य व्याप्यवृत्तित्वनियममुपेत्य समीपे तदनुपलम्भस्य गतिरुक्ता। इदानीं व्याप्यवृत्तित्वनियमस्यासिद्धिमाह—**अनुभवबलादिति**। नभोनैल्यप्रत्यक्षस्य यौक्तिकनिश्चयबाध्यत्वं निरस्य प्रत्यक्षबाध्यत्वमाशङ्क्य निराकरोति—**नापीत्यादिना**। भूसन्निहितगगनभागे कुत्रापि नैल्यं नास्त्येव, तत्र तत्प्रतीतिस्तु दूरस्थत्वदोषात् सम्भवति इत्याह—**उपरिस्थितस्येति**। तथा च गगननैल्यप्रत्यक्षमागमैकबाध्यमिति स्थितम्। प्रत्यक्षस्यागमेन बाधे उदाहरणान्तरमाह—**पृथिव्यादिष्विति**। अप्सु वायौ च पृथिव्यामिव गन्धमुपलभ्य केचिदनैपुणाः ब्रूयुः—तयोरपि गन्धः स्वाभाविक इति, तत् न तथा ग्राह्यं, किं त्वपो वायुं च संश्रितं गन्धं तदन्तर्गतपृथिव्यामेव स्थितं विद्यात् - इति वचनार्थः। **इत्यादिभिरिति**। आदिपदेन - रसो जलमात्रगुणः, रूपं तेजोमात्रगुणः, स्पर्शो वायुमात्रगुणः, शब्दः आकाशमात्रगुणः, पृथिव्यादिषु रसाद्युपलब्धिरपि पृथिव्याद्यन्तर्गतजलाद्याश्रितरसादिविषया - इति व्यवस्थाप्रतिपादकपुराणवचनानि ग्राह्याणि। ननु—जले पुष्पादिरूपपार्थिवांशसंसर्गे सति गन्धोपलब्धिरस्ति नान्यथा इत्यन्वयव्यतिरेकाभ्यामेव गन्धस्य पृथिवीमात्रगुणत्वस्य निर्णयसम्भवात् किमागमेनेति चेत्, नेत्याह—**न हीति**। आजानसिद्धो यो जलोपष्टम्भः पार्थिवः द्रव्यविशेषः तदादिगतमित्यर्थः। जल एव गन्धः क्वचित् स्वाभाविकः क्वचिदौपाधिक इति कल्पनोपपत्तेश्चेति भावः। ननु—जलादौ गन्धादिप्रत्यक्षं अप्रामाण्यरूपदोषशङ्काकलङ्कितत्वादागमेन शिक्ष्यत इति युक्तम्, प्रपञ्चसत्त्वग्राहिप्रत्यक्षं

---

1. आजानसिद्धजलोपष्टम्भेति। आजानसिद्धः - जले स्वजन्मप्रभृतिसिद्धः - सहजः उपष्टम्भः—उपष्टम्भकः, विलक्षणसंयोगविशिष्ट इत्यर्थः।

प्रत्यक्षम्, अतस्त(त्वा)[दा]गमेन [1]शिक्ष्यते-इति चेत्, तर्हीहापि ब्रह्मप्रपञ्चयोः उपादानोपादेयभावेन परस्परसंसृष्टतया अन्यधर्मस्यान्यत्रावभासः सम्भाव्यत इति शङ्कितदोषं प्रत्यक्षं 'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥' [दृग्दृश्यविवेकः-20] इति वृद्धोक्तप्रकारेणागमेन व्यवस्थाप्यतामिति तुल्यम्। न चैवमुपजीव्यविरोधः। आगमप्रमाणेन वर्णपदवाक्यादिस्वरूपांशप्रत्यक्षमुपजीव्य अनुपजीव्यतत्सत्यत्वांशोपमर्दनात् - इत्याहुः।

ननु-आगमस्य प्रत्यक्षात् बलीयस्त्वे 'यजमानः प्रस्तरः' इत्यत्र प्रत्यक्षाविरोधाय यजमानशब्दस्य

तु तच्छङ्काशून्यमिति कथं तस्यागमेन बाधः—इत्याशयेन शङ्कते—**पृथिव्यादीनामिति**। तस्य तच्छङ्काशून्यत्वमसिद्धमिति तस्याप्यागमबाध्यत्वं युक्तमित्याह—**तर्हीति**। **संसृष्टतयेति**। संसर्गस्तादात्म्यम्। **अन्यधर्मस्येति**। जगदुपादानत्वेन श्रुतिसिद्धस्य सद्वस्तुनो धर्मः सत्ता। तस्या एव प्रपञ्चे प्रतीतिः सम्भाव्यते। अतः प्रपञ्चसत्त्वग्राहिप्रत्यक्षं अन्यसत्ताविषयकत्वेन भ्रान्तिरूपं वा प्रपञ्चस्य स्वाभाविकसत्ताविषयकत्वेन प्रमारूपं वा इति शङ्काकलङ्कितमित्यर्थः। प्रत्यक्षबाधप्रकारं वृद्धवचनेन दर्शयति—**अस्तीति**। 'अस्ति घटः, भाति घटः, प्रियो घटः' इति घटे सत्त्वचैतन्यानन्दास्तावदनुभूयन्ते। प्रियशब्दस्यानन्दे मुख्यत्वात् घटस्यानन्दतादात्म्यप्रतीतिरुपपद्यते। एवं पटादिष्वपि द्रष्टव्यम्। नाम-घटशब्दादि। कम्बुग्रीवाद्यात्मकं वस्तु - रूपम्। अंशपञ्चकम् - अंशाः पञ्च यस्य जगतः तत् अंशपञ्चकमनुभूयते। न च-कृत्स्नेऽपि जगति पञ्चात्मकत्वानुभवो नास्ति, दुःखं प्रियमित्यनुभवादर्शनादिति - वाच्यम्। केषांचित् परकीये दुःखे तदनुभवस्यापि सत्त्वात्। तथा च 'सर्वत्रानुगतं सच्चिदानन्दरूपं वस्तु ब्रह्मैव, ब्रह्मणस्तद्रूपतायाः श्रुतिसिद्धत्वात्। नामरूपात्मकरूपद्वयं जगत्, तस्य नामरूपमात्रतायाः 'सर्वाणि रूपाणि विचित्य धीरः इत्यादिश्रुतिसिद्धत्वात्' इत्यनेन प्रकारेण, प्रपञ्चसत्त्वग्राहिप्रत्यक्षं जगतस्स्वाभाविकसत्ताविषयकं न भवति किं त्वधिष्ठानतया जगत्यनुगतब्रह्मसत्ताविषयकमेव - इति व्यवस्थाप्यते श्रुत्येत्यर्थः। एवं प्रत्यक्षस्यागमापेक्षया स्वतः प्राबल्यं निरस्य उपजीव्यत्वप्रयुक्तं तन्निरस्यति—**न चैवमिति**। प्रत्यक्षस्यागमेन बाधाङ्गीकारे इत्यर्थः। वर्णपदवाक्यात्मकशब्दप्रत्यक्षं हि श्रुतिजन्यमिथ्यात्वबोधं प्रत्युपजीव्यम्। शब्दज्ञानं विना शाब्दबोधानुदयात्। तथा च श्रुत्या प्रत्यक्षमात्रबाधे शब्दप्रत्यक्षस्यापि बाधः प्रसज्येत। तथा च [2]उपजीव्यबाधः स्यादित्यर्थः। श्रोत्रेन्द्रियेण जायमानं प्रत्यक्षं शब्दस्वरूपं तस्य सत्त्वं च विषयीकरोति। श्रुत्या च सत्त्वांशप्रत्यक्षमेव बाध्यते। तच्च न श्रुतेरुपजीव्यम्। कल्पितशब्दस्यापि बोधकत्वसम्भवेन शाब्दबोधार्थं तत्सत्त्वस्यानपेक्षितत्वात्। यच्च शब्दस्वरूपांशप्रत्यक्षमुपजीव्यं तत् न बाध्यते। विरोधाभावात्। अतो नोपजीव्यविरोध इति परिहरति—**आगमप्रमाणेनेति**।

आगममात्रस्य प्रत्यक्षात् प्राबल्यमुक्तमाक्षिपति—**नन्वागमस्येति**। **गौणीति**। क्रतुनिर्वर्तकत्वं

---

1. शिक्ष्यते—बाध्यते।
2. उपजीव्यबाध इति। अत्र विषयस्य तात्त्विकत्वाभावबोधद्वारा ज्ञानस्याप्रमात्वबोधो बाधः।

प्रस्तरे गौणी वृत्तिर्न कल्पनीया। तथा 'सोमेन यजेत' इत्यत्र, वैयधिकरण्येनान्वये यागे इष्टसाधनत्वं सोमलतायां यागसाधनत्वं च बोधनीयमिति व्यापारभेदेन वाक्यभेदापत्तेः सामानाधिकरण्येनान्वये वक्तव्ये, प्रत्यक्षाविरोधाय सोमवता यागेनेति मत्वर्थलक्षणा न कल्पनीया। उभयत्रापि सत्यपि प्रत्यक्षविरोधे तदनादृत्य आगमेन बलीयसा प्रस्तरे यजमानाभेदस्य यागे सोमाभेदस्य च सिद्धिसम्भवात् - इति चेत् -

तात्पर्यस्य श्रुतिप्राबल्यप्रयोजकत्वनिरूपणम्

अत्रोक्तं भामतीनिबन्धे—तात्पर्यवती श्रुतिः प्रत्यक्षात् बलवती, न श्रुतिमात्रम्। मन्त्रार्थवादानां तु स्तुतिद्वारभूतेऽर्थे वाक्यार्थद्वारभूते पदार्थ इव न तात्पर्यम्। तात्पर्याभावे मानान्तरा-

---

गुणः। **तथेति**। सिद्धान्ते इष्टसाधनत्वं विध्यर्थः। ततश्च सोमपदयजिपदयोर्वैयधिकरण्येनान्वये[1] स्वीक्रियमाणे 'याग इष्टसाधनं सोमो यागरूपेष्टस्य साधनं' इति सकृच्छ्रुतस्य विधिप्रत्ययस्य व्यापारभेदापत्त्या[2] तद्घटितवाक्यस्यापि व्यापारभेदापत्तेः तत्परिहाराय तयोस्सामानाधिकरण्येनान्वयो[3] वक्तव्यः इति सिद्धान्ते स्थिते सतीत्यर्थः। **प्रत्यक्षाविरोधायेति**। सामानाधिकरण्यपक्षे सोमयागयोरभेदो वक्तव्यः। सोऽयमित्यादिस्थले समानाधिकरणपदद्वयस्य पदार्थद्वयाभेदार्थकतायाः क्लृप्तत्वात्। स च प्रत्यक्षविरुद्ध इति तत्परिहारायेत्यर्थः। **सोमवतेति**। सोमपदस्य मत्वर्थे लक्षणा। तथा च सोमवता यागेनेष्टं भावयेदिति मीमांसकरीत्या वाक्यार्थः। सिद्धान्तरीत्या तु सोमवदभिन्नो याग इष्टसाधनमिति वाक्यार्थो द्रष्टव्यः। सोमस्य यागेन सह मत्वर्थसम्बन्धश्च वस्तुगत्या क्रियाकारकभावलक्षण इति [4]ज्ञापनाय सोमेनेति तृतीया। **भामतीति**। भामतीसंज्ञकग्रन्थे वाचस्पतिमिश्रैः [5]उक्तमित्यर्थः। **न श्रुतिमात्रमिति**। तथा च 'सोमेन यजेत' इत्यत्र सोमयागसम्बन्धे श्रुतेस्तात्पर्याभावात् श्रुत्यपेक्षया प्रत्यक्षमेव बलवदिति तदविरोधाय लक्षणाकल्पनमुचितम्। तथा 'यजमानः प्रस्तरः' इत्याद्यर्थवादानामपि स्वार्थे तात्पर्याभावात् प्रत्यक्षप्राबल्यमिति तत्रापि तदविरोधाय गौण्यादिकल्पनं युक्तम्। प्रपञ्चमिथ्यात्वबोधकश्रुतीनां तु स्वार्थे तात्पर्यसत्त्वात् प्रत्यक्षापेक्षया प्राबल्यमिति तासां तद्बाधकत्वं निष्प्रत्यूहमिति समाधानग्रन्थार्थः। ननु [6]मन्त्रार्थवादादीनामपि स्वार्थे तात्पर्यं किं न स्यात्, तत्राह—**मन्त्रेति**। तेषां

---

1. वैयधिकरण्येनान्वये–भिन्नार्थबोधकत्वे।

2. व्यापारभेदापत्त्या–बोधनव्यापारानेकत्वापत्त्या। न चेष्टापत्तिः। 'सकृदुक्तः शब्दः सकृदेव अर्थं गमयति' इति नियमविरोधात्। न च क्रमेण बोधनं सम्भवति। शब्दबुद्धिकर्मणां विरम्यव्यापारायोगात्। न च विध्यावृत्तौ नोक्तदोषः। आवृत्तेरेव दोषत्वात् - इति भावः।

3. सामानाधिकरण्येनान्वयः–अभिन्नार्थबोधकत्वम्। इदं च पदयोः। अर्थयोः सामानाधिकरण्येनान्वयो नाम अभेदसंसर्गः, वैयधिकरण्येनान्वयस्तु अभेदातिरिक्तसंसर्गः।

4. ज्ञापनायेति। अन्यथा प्रथमोपस्थितप्रथमाप्रयोगेनैव पदसाधुत्वस्य संभवात् तृतीयावैयर्थ्यापत्तिः इति भावः।

5. उक्तमिति। देवताधिकरणे इति शेषः।

6. मन्त्रार्थवादादीनामित्यादिपदेन इतिहासपुराणानां सङ्ग्रहः।

विरुद्धदेवताविग्रहादिकं न तेभ्यः सिद्ध्येत् तात्पर्यवत्येव शब्दस्य प्रामाण्यनियमात् इति चेत्, न— 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' [ता. ब्रा. १७-७-१] इति विशिष्टविधेः तात्पर्यागोचरेऽपि विशेषणस्वरूपे प्रामाण्यदर्शनेन उक्तनियमासिद्धेः। अत्र हि रेवती-ऋगाधारं वारवन्तीयं साम विशेषणम्। न चैतत् सोमादिविशेषणवल्लोकसिद्धम्, येन तद्विशिष्टयागवि-

स्वार्थे फलाभावात् गौरवाच्च तात्पर्यं न कल्प्यत इति भावः। 'देवस्यत्वा' इत्यादिमन्त्रैः 'यजमानः प्रस्तरः' इत्याद्यर्थवादैश्च विधेयगता स्तुतिर्लक्षणीया। ततश्च मन्त्रादिवाक्यार्थस्य द्रव्यदेवतादिरूपस्य लक्षणीयया स्तुत्या सह सम्बन्धो वाच्यः। इतरथा मन्त्रादीनां स्वज्ञाप्यसम्बन्धाभावेन स्तुतिलक्षकत्वानुपपत्तेः। अतः स्तुतौ लक्षणीयायां मन्त्रादिवाक्यार्थो द्वारभूतः। यथा गङ्गापदेन तीरे लक्षणीये प्रवाहः। अतोऽपि न तत्र तेषां तात्पर्यम्, लक्षणास्थले द्वारभूतार्थे तात्पर्यादर्शनात् - इत्याशयेनाह—**स्तुतिद्वारभूत इति**। तत्र स्वयं दृष्टान्तमाह—**वाक्यार्थद्वारभूत इति**। वाक्यार्थतात्पर्येण प्रयुक्तानां पदानां वाक्यार्थप्रतिपत्तिद्वारभूतेषु स्मारितपदार्थेषु यथा तात्पर्यं नास्ति तथेत्यर्थः। विधिपरमन्त्रार्थवादानां स्वार्थे तात्पर्याभावे देवताविग्रहादिप्रतिपादकानां 'वज्रहस्तः पुरन्दरः' इत्यादीनामपि देवताविग्रहादौ स्वार्थे तात्पर्याभावापत्त्या तेषां देवताविग्रहादिप्रमितिजनकत्वं न स्यात्। वेदतात्पर्यविषयत्वस्य वेदजन्यप्रमितिविषयत्वं प्रति व्यापकत्वात्, व्यापकनिवृत्त्या तन्निवृत्तेरावश्यकत्वात्। तदाहुः—'यत्परः शब्दः स शब्दार्थः' [ ] इति। तथा च देवताधिकरणविरोधः। तत्र अन्यपरेभ्योऽपि मन्त्रादिभ्यो देवताविग्रहादिसिद्धिप्रतिपादनात् - इत्याशयेन शङ्कते—**तात्पर्याभाव इति**। मानान्तराविरुद्धत्वविशेषणं 'यजमानः प्रस्तरः' इत्यादिवारणाय। इदमुपलक्षणं मानान्तराप्राप्तत्वस्यापि। एतच्च विशेषणं 'अग्निर्हिमस्य भेषजम्' इत्यादिवारणाय। अग्नेर्हिमभेषजत्वस्य प्रत्यक्षसिद्धत्वेन तस्यार्थवादतस्सिद्ध्यनपेक्षणात्। तथा च मानान्तरेण विरोधप्राप्त्योरभावे सत्यन्यपरेभ्योऽपि मन्त्रादिभ्योऽवगम्यमानोऽर्थस्सिद्ध्यत्येव, देवताविग्रहादिश्च तथाविध इति तत्सिद्धिरप्रत्यूहेति प्रतिपादितं देवताधिकरण इति भावः। परिहरति—**नेति**। **एतस्यैवेति**। इदमेतत्पदं [1]प्रकृताग्निष्टुद्धर्मातिदेशकम्[2]। तथा च रेवत्याधारकं वारवन्तीयाख्यं साम अग्निष्टोमसाम कृत्वा प्रकृताग्निष्टुद्धर्मकेणानेन यागेन पशून् भावयेत् - इति श्रुत्यर्थः। **विशिष्टविधेरिति**। रेवत्याधारकवारवन्तीयसामादिविशेषणविशिष्टक्रतुभावनाविधेरित्यर्थः। **उक्तेति**। शब्दतात्पर्यविषयत्वस्य शाब्दप्रमितिविषयत्वं प्रति व्यापकत्वरूपनियमासिद्धेरित्यर्थः। उक्तमर्थं विवृणोति - **अत्र हीति**। **न चैतदिति**। यदि वारवन्तीयं साम रेवतीषु ऋक्षु अध्ययनसिद्धं भवेत्, तदा तस्य विशेषणस्य दध्यादिवल्लोकत एवावगतत्वाद्वाक्यस्य तद्व्यतिरिक्तार्थ एव प्रमितिजनकत्वरूपं प्रामाण्यं भवेत्। न त्वेतदस्ति।

1. प्रकृतेति - पूर्वतनयोः पञ्चमषष्ठखण्डयोः अग्निष्टुतो विधानात् प्रकृतत्वम्।
2. अतिदेशकमिति। तथा च एतत्पदं गौणमिति भावः।

धिमात्रे प्रामाण्यं वाक्यस्य स्यात्। नापि विशिष्टविधिना विशेषणाक्षेपः। आक्षेपाद्विशेषणप्रतिपत्तौ विशिष्टगोचरो विधिः, तस्मिंश्च सति तेन विशेषणाक्षेपः, इति परस्पराश्रयापत्तेः। अतो विशिष्टविधिपरस्यैव वाक्यस्य विशेषणस्वरूपेऽपि प्रामाण्यं वक्तव्यम्। अथ च न तत्र तात्पर्यम्। उभयत्र तात्पर्ये वाक्यभेदापत्तेः। एवमर्थवादानामपि विधेयस्तुतिपराणां स्तुतिद्वारभूतेऽर्थे न तात्पर्यमिति तेभ्यः प्रत्यक्षस्यैव बलवत्त्वात् तदविरोधाय तेषु वृत्त्यन्तरकल्पनम्। 'सोमेन यजेत' इत्यत्र विशिष्टविधिपरे वाक्ये सोमद्रव्याभिन्नयागरूपं विशिष्टं विधेयमित्युपगमे तस्य विधेयस्य 'दध्ना जुहोति' इत्यादौ विधेयस्य दध्यादेरिव लोकसिद्धत्वाभावेन विधिपराद्वाक्यादेव रेवत्याधारवारवन्तीयविशेषणस्येव विना तात्पर्यं सिद्धिरेष्टव्या। न हि तात्पर्यविरहितादागमाद्यागसोमलताभेदग्राहिप्रत्यक्षविरुद्धार्थः सिद्ध्यतीति तत्रापि तदविरोधाय मत्वर्थलक्षणाश्रयणम्। अद्वैतश्रुतिस्तु उपक्रमो-

---

वारवन्तीयसाम्नः ऋगन्तरेष्वेवाध्ययनसिद्धत्वात्[1]। अतो वाक्यादेव रेवत्याधारकवारवन्तीयाख्यविशेषणस्य प्रमितिर्वक्तव्येत्यर्थः। ननु विशिष्टविषयको विधिः अप्रसिद्धविशेषणस्वरूपप्रमितिजनकं रेवतीषु वारवन्तीयं साम कुर्यात् इत्येवमात्मकं विशेषणविधिं आक्षिपति, तथा च तस्य विशेषणस्य नैतद्वाक्यप्रमेयत्वमिति-नेत्याह—**नापीति**। विशेषणगोचरविधिकल्पनात् पूर्वं विशिष्टविधिना विशेषणस्वरूपं प्रमितं वा, न वा। आद्ये तत्कल्पनं व्यर्थम्। द्वितीये विध्याक्षेपो न सिद्ध्यति। प्रमितस्यैव द्रव्यदेवतासम्बन्धस्य यागविध्याक्षेपकत्वदर्शनात्। तथा च विशिष्टविधिना विशेषणविधिराक्षिप्यत इति वदता आक्षेपात् प्राग्विशेषणस्य प्रमितत्वं वाच्यम्, तत्प्रमापकश्च कल्पितविधिरिति च वक्तव्यम्। ततश्च आक्षिप्तविधिना विशेषणस्वरूपे प्रमिते सति प्रकृतविधिर्विशिष्टगोचरस्सिद्ध्यति, तस्मिंश्च प्रकृतविधौ विशिष्टगोचरे सति तेन विशिष्टविधिना विशेषणविध्याक्षेपः, इति परस्पराश्रयापत्त्या विशेषणविध्याक्षेपासिद्धेरित्यर्थः। **अत इति**। रेवत्याधारकवारवन्तीयसामाख्यविशेषणस्य प्रकृतवाक्यादन्यतः प्रमित्यसम्भवादित्यर्थः। तर्हि तत्रापि तात्पर्यमस्तु, नेत्याह—**अथ चेति**। गौरवादिति भावः। न च 'यत्परश्शब्दस्स शब्दार्थः' इति न्यायविरोधश्शङ्कनीयः। तस्यौत्सर्गिकत्वोपपत्तेः। प्रकृते च गौरवलक्षणबाधकसत्त्वान्न तस्येह प्रवृत्तिः। **एवमिति**। विशिष्टविधेर्विशेषणस्वरूप इवेत्यर्थः। **न तात्पर्यमिति**। तथा च तात्पर्याविषयेऽपि रेवतीवारवन्तीयविशेषणस्वरूपे श्रुतेः प्रमितिजनकत्ववत् अन्यपराणामपि मन्त्रादीनां देवताविग्रहादिप्रमितिजनकत्वं सम्भवतीति न देवताधिकरणविरोध इति भावः। प्रकृतमाह—**तेभ्य इति**। मन्त्रार्थवादेभ्यः - तात्पर्यरहितश्रुतिवाक्येभ्य इति यावत्। 'सोमेन यजेत' इत्यत्र सामानाधिकरण्येनान्वय इति सिद्धान्ते कथं प्रत्यक्षविरोधः कथं वा तदविरोधाय लक्षणाकल्पनं इत्याकाङ्क्षायामाह—**सोमेनेति**। **तत्रापीति**। 'यजमानः प्रस्तरः' इत्यत्रेवेत्यपिशब्दार्थः। प्रत्यक्षाविरोधाय वृत्त्यन्तरकल्पनमात्रे दृष्टान्तः, न तु मत्वर्थलक्षणां-

---

1. अध्ययनसिद्धत्वादिति। न च ऊहग्रन्थाध्ययनसिद्धत्वं रेवतीऋक्षु वारवन्तीयस्य अस्त्येवेति वाच्यम्। एतद्विधिमूलकत्वात् ऊहगानस्य। अत एव ऊहगानस्य पौरुषेयत्वं व्यवस्थापितं निदानसूत्रे पूर्वतन्त्रे च।

पसंहारैकरूप्यादिषड्विधलिङ्गावगमिताद्वैततात्पर्या प्रत्यक्षाद्बलवतीति ततः प्रत्यक्षस्यैव बाधः, न तद्विरोधाय श्रुतेरन्यथानयनमिति ।

तात्पर्यस्य श्रुतिप्राबल्यप्रयोजकत्वदूषणम्

विवरणवार्तिके तु प्रतिपादितं—

न तात्पर्यवत्त्वेन श्रुतेः प्रत्यक्षात् प्राबल्यम् । 'कृष्णलं श्रपयेत्' इति विधेः श्रपणस्य कृष्णलार्थत्वप्रतिपादने तात्पर्येऽपि कृष्णले रूपरसपरावृत्तिप्रादुर्भावपर्यन्तमुख्यश्रपणसम्बन्धः

शेऽपीति बोध्यम् । ननु-द्वैतमिथ्यात्वबोधकाद्वैतश्रुतेरपि न स्वार्थे मिथ्यात्वे तात्पर्यम् । मानाभावात् । तथा च द्वैतसत्यत्वग्राहिप्रत्यक्षविरोधपरिहारायाद्वैतश्रुतेरप्यन्यथानयनमेव न्याय्यमिति, नेत्याह—**अद्वैतश्रुतिस्त्विति** । तात्पर्यलिङ्गानि च शास्त्रे व्यक्तानि । **तत इति** । अद्वैतश्रुतेस्सकाशादित्यर्थः ।

वाचस्पत्युक्तं तात्पर्यस्य प्राबल्यप्रयोजकत्वं दूषयति—**विवरणवार्तिके त्विति** । कृष्णलाः-सुवर्णविकारभूताः माषाः । कृष्णलशेषत्वेन श्रपणं विधीयत इति श्रुतेस्तत्र तात्पर्यं सिद्धमिति भावः । रूपरस-परावृत्तिप्रादुर्भावो नाम पूर्वरूपरसादिनाशपूर्वकं रूपरसाद्यन्तरोत्पत्तिः, तत्पर्यन्तो[1] योऽधिश्रयणादिः व्यापारः स एव श्रपणशब्दस्य मुख्योऽर्थः, तत्सम्बन्ध इत्यर्थः । कृष्णलानां अधिश्रयणज्वालादिसम्पादनरूपे [2]पाके कृतेऽपि रूपरसादिपरावृत्तिप्रादुर्भावो नास्तीति प्रत्यक्षसिद्धमिति भावः । ननु अत्र श्रपणं विधीयते, तच्च न प्रत्यक्ष-बाधितम् । ज्वाला[दिसंपादना]धिश्रयणादिक्रियारूपपाकस्यैव श्रपणशब्दार्थत्वेन तस्य तत्रापि सम्भवात् । रूपरसादि-परावृत्तिप्रादुर्भावस्तु न धात्वर्थः[3] । तस्य पाकफलस्य [4]कर्मत्वरूपस्य द्वितीयार्थत्वात्, फलस्य विध्ययोग्यत्वेन विधेयश्रपणरूपत्वायोगाच्च । तथा च विधेयश्रपणस्य दृष्टप्रयोजनाभावात् अदृष्टार्थो विधिः पर्यवस्यतीति श्रुति-

---

1. तत्पर्यन्त इति । रूपरसपरावृत्तिप्रादुर्भावोऽपि श्राधात्वर्थव्यापारः, स्पन्दाद्यनात्मकस्यापि तस्य ज्ञानादेरिव धातुवाच्यतावच्छेदकपारिभाषिकक्रियात्वसम्भवात् इति भावः ।

2. पाके इति । न च-श्राधातुः पाकार्थकः, श्राधात्वर्थश्च रूपरसपरावृत्तिप्रादुर्भावपर्यन्त इति अनुपदमुक्तम्, तथा च 'पाके कृतेऽपि' इति 'रूपरसादिप्रादुर्भावो नास्ति' इति च विप्रतिषिद्धं—इति वाच्यम् । श्राधात्वर्थैकदेशस्य अत्र पाकशब्देन विवक्षितत्वात् । अथ वा-रूपरसपरावृत्तिप्रादुर्भावघटितक्रियासमुदायः श्राधात्वर्थः, तदघटितक्रियासमुदायः पाकः, इति भेदस्य विवक्षितत्वाददोषः ।

3. न धात्वर्थ इति । श्राधात्वर्थव्यापारफलत्वात्, फलस्य च द्वितीयया लाभात्, अनन्यलभ्यस्यैव शब्दार्थत्वात्, रूपरसपरावृत्तिप्रादुर्भावो न श्राधात्वर्थः इत्यर्थः । व्यापारमात्रं सर्वत्र धात्वर्थः इति भावः ।

4. फलस्य कर्मत्वरूपस्य द्वितीयार्थत्वात् इति । अयमर्थ —'कर्मणि द्वितीया' इत्यनुशासनात् कर्मत्वं द्वितीयार्थः । तत्र कर्मपदस्य धर्ममात्रपरत्वात्, सप्तम्या वाचकतार्थकत्वात् । कर्मणश्च न द्वितीयार्थत्वम । कर्मणि नामार्थस्य अभेदान्वयसम्भवेऽपि धात्वर्थेन तदन्वयासम्भवात्, स्वनिष्ठकर्मतानिरूपकत्वसम्बन्धेन अन्वयसम्भवेऽपि अनेकेषु शक्ति-कल्पनागौरवात् । कर्मत्वं च धातुवाच्यक्रियाजन्यफलाश्रयत्वम । तत्र च क्रिया धातुत एव लभ्यते । जन्यजनकभावस्य च विनैव पदार्थत्वं संसर्गमर्यादया भानं संभवति एवं च फलमात्रं कर्मप्रत्ययार्थः इति । पदविशेषसमभिव्याहारेण फल-विशेषबोधकत्वात् द्वितीयायाः कृष्णलं श्रपयतीत्यत्र अदृष्टरूपफलबोधकत्वं इति भावः ।

प्रत्यक्षविरुद्ध इति तदविरोधाय श्रपणशब्दस्य उष्णीकरणमात्रे लक्षणाभ्युपगमात्, तत्त्वमसीति-वाक्यस्य जीवब्रह्माभेदप्रतिपादने तात्पर्येऽपि त्वंपदवाच्यस्य तत्पदवाच्याभेदः प्रत्यक्षविरुद्ध इति तदविरोधाय निष्कृष्टचैतन्ये लक्षणाभ्युपगमाच्च। अर्थवादानामपि प्रयाजाद्यङ्गविधिवाक्यानामिव [1]स्वार्थप्रमितावनन्यार्थता, प्रमितानामेवार्थानां प्रयोजनवशादन्यार्थता, इति प्रयाजादिवाक्यवत्तेषा-मप्यवान्तरसंसर्गे तात्पर्यमस्त्येव, वाक्यैकवाक्यत्वात्, पदैकवाक्यतायामेव परं अवान्तरतात्पर्या-

---

तात्पर्यविषयश्रपणस्य प्रत्यक्षबाधाभावात् उष्णीकरणमात्रे श्रपणशब्दस्य लक्षणा न सम्प्रतिपन्ना इत्यस्वरसादाह—**तत्त्वमसीतिवाक्यस्येति। निष्कृष्टेति।** निष्कृष्ट-विशिष्टरूपाद्वाच्यार्थात् पृथक्कृतं विशेष्यमात्रं यच्चैतन्यं, तत्रेत्यर्थः।

अत्रेदं बोध्यं—महावाक्यानामखण्डैकरसचैतन्यरूपवस्तुमात्रबोधने तात्पर्यम्। कुतः। 'तमेवैकं जानथ आत्मानं' 'तमेव विदित्वा तमृत्युमेति' 'एकधैवानुद्रष्टव्यं' इत्यादिश्रुतिसहस्रेण मुक्तिसाधनीभूतमहावाक्यार्थज्ञानं प्रति तादृशवस्तुमात्रस्यैव विषयत्वेन नियमनात्। श्रुतीनामेषोऽर्थः—यस्मिन् कृत्स्नं जगदध्यस्तं, तमात्मानं जानथ हे मुमुक्षवः। अत्र आधेयस्य कृत्स्नस्य जगतः ज्ञेयत्वनिषेधार्थमवधारणम्। एकपदं च एकरसत्वप्रतिपादन-परम्। मुमुक्षुज्ञेयस्यात्मनो नानारसत्वे एकपदमनर्थकं स्यात्, आत्मन एकत्वसङ्ख्यायोगस्य एकवचनादेव सिद्धत्वात्। अस्याः श्रुतेरिदं तात्पर्यं द्युभ्वाद्यधिकरणभाष्ये स्फुटं प्रदर्शितम्। तमेव - प्रकृतं परमात्मानमेव, न तु तद्व्यतिरिक्तमण्वपीत्येवकारार्थः। विदित्वा-साक्षात्कृत्य मृत्युशब्दितं संसारं अत्येति। एकधैव एकरूपेणैव शास्त्रा-चार्योपदेशमनु द्रष्टव्यं इति। तच्च अखण्डैकरसवस्तुमात्रबोधने तात्पर्यं महावाक्येषु तत्त्वमादिपदानां लक्षणां विना न निर्वहतीति तेषु तात्पर्यानुसारेणैव लक्षणाभ्युपगमः, न तु प्रत्यक्षविरोधपरिहाराय। परं तु तत्त्वंपदयोश्चैतन्यमात्रे लक्षणां स्वीकृत्य वाक्यार्थबोधाभ्युपगमे प्रत्यक्षविरोधोऽपि परिहृतो भवतीत्येतावन्मात्रेण प्रत्यक्षविरोधपरिहाराय महावाक्येषु लक्षणेति निबन्धनेषु व्यवहारः। तथा च - सत्यपि तात्पर्ये तदनादृत्य प्रत्यक्षविरोधपरिहारायैव महावाक्येषु लक्षणाभ्युपगमात् तात्पर्यस्य प्राबल्यप्रयोजकत्वं नास्तीति प्रतिपादनं-मन्दमिति।

यत्तु मन्त्रार्थवादानां स्तुतिद्वारभूते स्वार्थे तात्पर्यं नास्तीत्युक्तं, तद्दूषयति—**अर्थवादानामपीति।** अनन्यार्थता-स्वार्थपरतेत्यर्थः। तर्हि अर्थवादानां विधिशेषत्वं न स्यादित्याशङ्क्याह—**प्रमितानामेवेति।** मानान्तरसंवादविसंवादरहितार्थवादादिभिरिति शेषः। तेषां स्वार्थप्रमितिमात्रेण फलाभावात् विधेयस्तावकत्वेन विध्येक-वाक्यत्वं कल्प्यत इत्यर्थः। यथा प्रयाजादिकर्मणां प्रयोजनाकाङ्क्षावशेन प्रयाजादिवाक्यानां फलवद्दर्श-पूर्णमासादिविधिवाक्यैरेकवाक्यत्वं तथेति भावः। **अवान्तरसंसर्ग इति।** अर्थवादानामपि विध्यन्वयात् प्राक् स्वरसतः प्रतीयमाने देवताया विग्रहादिसंसर्गे अवान्तरतात्पर्यमस्तीत्यर्थः। प्रयाजादिवाक्यानामर्थवादादि-वाक्यानां च स्वार्थप्रमितौ तात्पर्ये हेतुमाह—**वाक्यैकवाक्यत्वादिति।** वाक्यानां सतामेव तेषां विधि-

---

1. स्वार्थप्रमितौ अनन्यार्थतेति। स्वार्थप्रमित्यनुकूलं तात्पर्य-शक्तिः अस्ति इत्यर्थः।

नभ्युपगमः—इति विवरणाचार्यैर्न्यायनिर्णये[1] व्यवस्थापनेन 'यजमानः प्रस्तरः' इत्यादीनामपि मुख्यार्थतात्पर्यप्रसक्तौ प्रत्यक्षाविरोधायैव लक्षणाभ्युपगमाच्च ।

निर्दोषत्वपरत्वयोः औत्सर्गिकश्रुतिप्राबल्यप्रयोजकत्वनिरूपणम्

कथं तर्हि श्रुतेः प्राबल्यम् । उच्यते—निर्दोषत्वात् परत्वाच्च श्रुतिमात्रस्य प्रत्यक्षात् प्राबल्यं इत्युत्सर्गः । किं तु श्रुतिबाधितमपि प्रत्यक्षं कथंचित् स्वोचितविषयोपहारेण सम्भावनीयम्,

---

वाक्यैरेकवाक्यत्वाभ्युपगमात् वाक्यानां च वाक्यार्थे तात्पर्यस्य सामान्यतस्सिद्धत्वादित्यर्थः । यत्तु वाक्यार्थद्वारभूते पदार्थ इवेति स्तुतिद्वारभूतेऽर्थे तात्पर्याभावे दृष्टान्तप्रदर्शनं, तद्विघटयति—**पदैकवाक्यतायामेवेति** । पदानां सतामेव एकवाक्यार्थबोधनेनैकवाक्यत्वे इत्यर्थः । तत्र पदार्थानां वाक्यार्थस्येव [2]अपूर्वत्वाभावात् न तेष्ववान्तरतात्पर्यमपि स्वीक्रियत इत्यर्थः । एतेन-रेवत्याधारकवारवन्तीयसामाख्यविशेषणेऽपि तात्पर्य-व्याख्यातम् । वाक्यस्य वाक्यार्थे तात्पर्यस्य उत्सर्गतस्सिद्धत्वात् विशिष्टविधेर्विशिष्टभावनायां तात्पर्यवत्त्वाच्च तस्य विशेषणेषु तात्पर्यं सिद्ध्यति । विशिष्टविधितात्पर्यविषयत्वस्य विशेष्यमात्रवृत्तित्वे तत्तात्पर्यस्य विशिष्टविषयकत्वानुपपत्तेः । मीमांसकानां विशिष्टविधेर्विशेषणेषु तात्पर्याभावव्यवहारस्य विशेषणेषु प्रत्येकं तात्पर्याभावपरत्वात् । (तस्मात्) [**व्यवस्थापनेनेति**] [3]तात्पर्यविषय एव वेदस्य प्रमितिजनकत्वम् - इति नियमस्य न्यायनिर्णये विवरणाचार्यैर्व्यवस्थापितत्वेनेत्यर्थः । ततः किं, तत्राह—**यजमानः प्रस्तर इत्यादीनामिति** । उक्तरीत्या तेषामपि यजमानप्रस्तराभेदादौ तात्पर्यं स्यादेव । तच्च प्रत्यक्षेण बाध्यत इति वक्तव्यम् । अतस्तात्पर्यवत्त्वं श्रुतेः प्राबल्यप्रयोजकं न भवतीत्यर्थः ।

अत्र-मन्त्रार्थवादानामपि प्रयाजादिवाक्यानामिव स्तुतिद्वारभूतेऽर्थे यद्यवान्तरतात्पर्यमवश्यं कल्पनीयं, तर्ह्यस्तु तत् । तावता तात्पर्यस्य न प्राबल्यप्रयोजकत्वक्षतिः । [4]महातात्पर्यस्य तत्प्रयोजकत्वसम्भवात् । अद्वैतश्रुतीनां प्रपञ्चमिथ्यात्वे महातात्पर्याभ्युपगमेन तत्र प्रपञ्चसत्त्वग्राहिप्रत्यक्षस्य मिथ्यात्वश्रुत्या बाधोपपत्तेः-इत्यादिकमालोचनीयम् ।

तर्हीति । तात्पर्यस्य प्राबल्यप्रयोजकत्वाभावे सतीत्यर्थः । ननु श्रुतिमात्रस्य प्राबल्ये सिद्धे तस्यौत्सर्गिकत्वं वक्तव्यं स्यात्, तदेव कुत इति चेत् - न —'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् ।' इति वचनेन श्रुतिमात्रस्य प्रत्यक्षाद्यपेक्षया आगमत्वादेव सिद्धत्वात् । तन्मात्रस्य प्राबल्ये अन्यदपि हेतुद्वयं दर्शयति —**निर्दोषत्वात् परत्वाच्चेति । उत्सर्ग इति** । श्रुतितदितरप्रमाणयोर्विरोधे सति श्रुतिरेव बाधिका भवति, यत्र च श्रुतिबाधितं प्रत्यक्षादि निरवकाशं भवति तत्र निरवकाशेन तेन श्रुतिरेव बाध्यते, 'सावकाशनिरवकाशयोर्निरवकाशं बलवत्' इति न्यायादित्यर्थः । ननु श्रुतिबाधितस्य प्रत्यक्षादेः निरवकाशत्वस्थले तेन श्रुतेर्बाधः

---

1. न्यायनिर्णये—शारीरकन्यायनिर्णयाख्यग्रन्थे । अस्य शारीरकन्यायसङ्ग्रह इत्यपि संज्ञा ।
2. अपूर्वत्वाभावादिति । अपूर्वत्वं अज्ञातत्वम् ।
3. तात्पर्यविषय एवेति । प्रमितिजननानुकूलशक्तेरेव तात्पर्यरूपत्वात् इति भावः ।
4. महातात्पर्यस्येति । अनन्यशेषभूतस्वार्थे तात्पर्यं महातात्पर्यम्, अन्यशेषभूतस्वार्थे तात्पर्यं अवान्तरतात्पर्यं इति विवेकः । प्रपञ्चमिथ्यात्वस्य अनन्यशेषत्वन्तु कथञ्चिदुपपादनीयम् ।

निर्विषयज्ञानायोगात् । अत एव अद्वैतश्रुतिविरोधेन तत्त्वावेदनात् प्रच्यावितं प्रत्यक्षं अर्थक्रिया-समर्थव्यावहारिकविषयसमर्पणेनोपपाद्यते । किं बहुना—'नेदं रजतं' इति सर्वसिद्धप्रत्यक्षबाधितमपि शुक्तिरजतप्रत्यक्षं अनुभवानुरोधात् पुरोदेशे शुक्तिसंभिन्नरजतोपगमेन समर्थ्यते, न तु तद्विरोधेन व्यवहितमान्तरमसदेव वा रजतं विषय इति परिकल्प्यते । एवं च प्रस्तरे यजमानभेदग्राहिणो यावद्ब्रह्मज्ञानमनुवर्तमानस्य प्रत्यक्षस्य अर्थक्रियासंवादेन प्रातिभासिकविषयत्वाभ्युपगमेनोपपादना-योगात् 'यजमानः प्रस्तरः' इति श्रुतिबाध्यत्वे सर्वथा निर्विषयत्वं स्यादिति तत्परिहाराय उत्सर्गमपोद्य

किमर्थमुपेयते, तत्राह—**किं त्वित्यादिना ।** सम्भावनीयम् - उपपादनीयमित्यर्थः । **अत एवेति ।** निर्विषय-प्रत्यक्षायोगादेवेत्यर्थः । **प्रच्यावितमिति ।** श्रुतिबाधितस्य द्वैतस्य तत्त्वरूपत्वायोगात् द्वैतबोधकप्रत्यक्षस्य तत्त्वा-वेदकत्वरूपात् प्रामाण्यात् प्रच्यावितत्वं बोध्यम् । **उपपाद्यते ।** [1]भाष्यादिष्विति शेषः । श्रुतिबाधित-प्रत्यक्षादीनां सिद्धान्ते व्यावहारिकप्रामाण्योपगमेन प्रत्यक्षज्ञानस्य निर्विषयत्वरूपं निरवकाशत्वं सिद्धान्तसम्मतं न भवतीत्युपपाद्य तत्र कैमुतिकन्यायमाह—**किं बहुनेति ।** अद्वैतश्रुतिबाधितघटादिप्रत्यक्षस्य निर्विषयत्वोपगमे सर्वव्यवहारोच्छेदप्रसङ्गलक्षणं बाधकं यथा विद्यते, न तथा शुक्तिरजतादिप्रत्यक्षस्य निर्विषयत्वोपगमे बाधकमस्ति । कैश्चित् असतोऽपि रजतादेर्भानोपगमात् । तथापि तस्य तत्कालोत्पन्नरजतादिविषयकत्वं सिद्धान्ते स्वीक्रियते, अनुभवस्य निर्विषयत्वायोगात् । तस्मात् श्रुतिबाधितस्य प्रत्यक्षस्य निरवकाशत्वं यत्र प्रसज्यते तत्र तेन श्रुतिबाधो युक्तस्सिद्धान्तसम्मतश्चेति श्रुतेः प्राबल्यमौत्सर्गिकं इत्येतत् सिद्धमिति भावः । **शुक्तिसम्भिन्नेति ।** शुक्तितादात्म्यापन्नेत्यर्थः । **व्यवहितमिति ।** बाह्यदेशान्तरस्थमित्यर्थः । **आन्तरमिति ।** ज्ञानाकाररूप-मित्यर्थः । न कल्प्यत इत्यत्र हेतुः—**तद्विरोधेनेति ।** रजतस्य इदमर्थाभिन्नत्वानुभवविरोधेनेत्यर्थः । व्यवहित-रजतादीनामिदमर्थतादात्म्यासम्भवादिति भावः । **एवं चेति ।** विरोधस्थले निरवकाशमानान्तरेण श्रुतिबाधे न्याय्ये सतीत्यर्थः । ननु प्रस्तरयजमानयोरभेदश्रुतिबाधितस्य तयोर्भेदप्रत्यक्षस्य शुक्तिरजतप्रत्यक्षवत् प्रातिभासिकविषयत्वसम्भवात् न तत्र तेन श्रुतिबाधः कल्पनीय इति, नेत्याह—**प्रातिभासिकविष-यत्वाभ्युपगमेनेति ।** प्रत्यक्षविषयस्य प्रस्तरे यजमानभेदस्य प्रातिभासिकत्वासम्भवे युक्तिं सूचयति—**यावदिति ।** यथा शुक्तिरजतस्य ब्रह्मज्ञानात् प्रागेव 'नेदं रजतं' इति प्रत्यक्षेण निवृत्तिः स्वोचितार्थ-क्रियाभावश्च तस्य प्रातिभासिकत्वहेतुरस्ति, न तथा प्रस्तरे यजमानभेदस्य ब्रह्मज्ञानात् प्राग्बाधः अर्थक्रिया-सामर्थ्याभावश्च प्रातिभासिकत्वहेतुरस्तीत्यर्थः । यावद्ब्रह्मज्ञानमनुवर्तमानस्येत्यस्य ब्रह्मज्ञानात् प्राक् बाधरहितस्ये-त्यर्थः । अर्थक्रियासंवादेनेत्यस्यार्थक्रियासमर्थभेदविषयकत्वेनेत्यर्थः । **बाध्यत्व इति ।** प्रस्तरे यजमानभेदग्राहिणः प्रत्यक्षस्येत्यनुषङ्गः । **सर्वथेति ।** अयमर्थः—प्रातिभासिकभेदविषयकत्वं तस्य प्रत्यक्षस्य न सम्भवतीत्युक्तम् । तथा व्यावहारिकभेदविषयकत्वं तस्य न सम्भवतीत्यनुपदमेव [2]वक्ष्यते । पारमार्थिकभेदश्च अद्वैतश्रुतिविरोधादेव

---

1. भाष्यादिषु-तदनन्यत्वाधिकरणभाष्यादिषु । 2. वक्ष्यत इति । अस्माभिरित्यादिः ।

श्रुतिरेव तत्सिद्ध्यधिकरणादिप्रतिपादितप्रकारेण अन्यथा नीयते। न च अद्वैतश्रुतिप्रत्यक्षयोरिव इह श्रुतिप्रत्यक्षयोस्तात्विकव्यावहारिकविषयत्वोपगमेन प्रत्यक्षोपपादनं कर्तुं शक्यम्। ब्रह्मातिरिक्त सकलमिथ्यात्वप्रतिपादकषड्विधतात्पर्यलिङ्गोपपन्नानेकश्रुतिविरुद्धेन एकेनार्थवादेन प्रस्तरे यजमा-

---

नाभ्युपगन्तुं शक्यते। तथा च तस्य निर्विषयत्वरूपं निरवकाशत्वं स्यादेवेति श्रुतिरेवान्यथा नीयत इति सम्बन्धः। अन्यथानयनप्रकारमाह—**तत्सिद्धीति**। मुख्यार्थस्याभेदस्य प्रत्यक्षविरोधेनासम्भवात् प्रस्तरे यजमानशब्दस्य गौणवृत्तौ कल्पनीयायां को गुण इत्याकाङ्क्षायां सूत्रकारेण गुणो दर्शितः—तत्सिद्धीति। तस्य - क्रतोस्सिद्धिः- उपकारः यजमानप्रस्तरसाध्यो गुणः, तयोः क्रतुनिर्वर्तकत्वरूपं सादृश्यं गुण इति यावत्। एवमन्येषा- मप्यर्थवादानां प्रत्यक्षविरोधपरिहाराय यथासम्भवं आलम्बनानि जैमिनिना भगवता अधिकरणान्तरेषु कल्पिता- नीत्यर्थः। ननु अद्वैतश्रुतिप्रत्यक्षयोर्विरोधस्थले पारमार्थिकमद्वैतं श्रुतिविषयः व्यावहारिकद्वैतं प्रत्यक्षविषय इति व्यवस्था यथा कल्प्यते, तथा प्रकृतेऽपि यजमानप्रस्तरयोर्वास्तवाभेदः श्रुतिविषयः कल्पितभेदः प्रत्यक्ष- विषय इति व्यवस्था कल्प्यतामिति, नेत्याह—**न चेति**। **इहेति**। 'यजमानः प्रस्तरः' इत्यत्रेत्यर्थः। यजमानः प्रस्तर इत्यर्थवादेन तयोस्तात्त्विकं तादात्म्यं प्रतिपादयितुं न शक्यम्। ब्रह्माद्वैत- श्रुतिभिः विरोधात्। न चाद्वैतश्रुतीनामपि विधिरूपत्वाभावेनार्थवादत्वाविशेषात् विनिगमनाविरह इति वाच्यम्। तथापि तासां बहुत्वेन विनिगमनाविरहानवतारादित्याशयेनाह—**अनेकेति**। किं च यजमानप्रस्तराभेदे तस्यार्थवादस्य तात्पर्यं नास्ति, तद्ग्राहकलिङ्गाभावात्। अद्वैतश्रुतीनां च स्वार्थे तात्पर्यग्राहकलिङ्गानि षड्विधान्यपि सन्ति। तथाहि—छान्दोग्ये षष्ठाध्याये 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इत्युपक्रम्य 'ऐतदात्म्यमिदं सर्वं' इति सर्वात्मकमद्वितीयं वस्तूपसंहरति श्रुतिः। अत उपक्रमोपसंहारयोरैकरूप्यलक्षणेन लिङ्गेन तस्याध्यायस्य अद्वितीये वस्तुनि तात्पर्यं निश्चीयते। हे सोम्य इदं-परिदृश्यमानं जगत् सृष्टेः प्राक् अद्वितीयमेकरूपं ब्रह्मैव आसी- दिति श्वेतकेतुं पुत्रं प्रति उद्दालकवचनम्। इदं सर्वं ऐतदात्म्यम्—एतदात्मकं - प्रकृतसद्वस्त्वात्मकमित्यर्थः। भाव- प्रत्ययोऽविवक्षितः। 'ऐतदात्म्यमिदं सर्वं' इतिवाक्यस्य असकृत्पाठादभ्याससिद्धिः। अद्वितीयवस्तुनो मानान्तरा- योग्यत्वात् अपूर्वत्वसिद्धिः। 'आचार्यवान् पुरुषो वेद' इति वाक्येन प्रकृताद्वैतसद्वस्तुज्ञानं प्रकृत्य सम्पत्तिवाक्येन तस्य मुक्तिलक्षणफलश्रवणात् फलमपि तत्र तात्पर्यग्राहकमस्ति। पितृपुत्राख्यायिकादिरूपार्थवादश्च तत्तात्पर्य- ग्राहकस्तत्रास्ति। मृदादिदृष्टान्तैः प्रपञ्चस्य ब्रह्मकार्यत्वप्रतिपादनपूर्वकं ब्रह्मानन्यत्वप्रतिपादनं उपपत्तिस्तत्रास्ति। तथा च षड्विधैस्तात्पर्यलिङ्गैरद्वितीयवस्तुपरत्वं तस्याध्यायस्य सिद्धम्। एवं अध्यायान्तरेषु श्रुत्यन्तरेषु च तात्पर्यलिङ्गानि द्रष्टव्यानि। तथा च उक्ततात्पर्यलिङ्गैरुपेतत्वादद्वैतश्रुतीनां प्राबल्यमित्याशयेनाह—**षड्विधेति**। ननु-तर्हि व्यावहारिको यजमानप्रस्तरयोरभेदः श्रुत्यर्थोऽस्तु। ततश्च व्यावहारिकतदभेदप्रतिपादकश्रुतिबाधितं तयोर्भेदप्रत्यक्षमपि व्यावहारिकभेदविषयकमस्तु। तथा च प्रत्यक्षस्य निरवकाशत्वाभावान्न श्रुतिबाधकत्वमिति चेत्, न—समानसत्ताकयोर्भेदाभेदयोरेकत्रासम्भवेन तथाकल्पनायोगात्। अस्तु तर्हि प्रातिभासिकस्तयोरभेदः

नतादात्म्यस्य तात्त्विकस्य प्रतिपादनासम्भवात्। एवं तत्त्वमसिवाक्येन त्वंपदवाच्यस्य सर्वज्ञत्वाभोक्तृत्वाकर्तृत्वादिविशिष्टब्रह्मस्वरूपत्वबोधने तत्र असर्वज्ञत्वभोक्तृत्वादिप्रत्यक्षमत्यन्तं निरालम्बनं स्यादिति, तत्परिहाराय अहंकारशबलितस्य भोक्तृत्वादि ततो निष्कृष्टस्य शुद्धस्य उदासीनब्रह्मस्वरूपत्वमिति व्यवस्थामाश्रित्य भागत्यागलक्षणा आश्रीयते। एवं 'कृष्णलं श्रपयेत्' इत्यादावपि प्रत्यक्षस्यात्यन्तनिर्विषयत्वप्रसक्तौ तत्परिहाराय श्रुतौ लक्षणा। कथंचिद्विषयोपपादनसम्भवे तु न प्रबलायाः श्रुतेरन्यथानयनमिति न कश्चिदप्यव्यवस्थाप्रसङ्गः।

अस्यार्थः - न—शुक्तौ रजताभेदस्येव प्रस्तरे यजमानाभेदस्य [1]प्रत्यक्षप्रतिभासाभावादिति भावः। श्रुतेः प्रत्यक्षात् प्राबल्यं इत्युत्सर्गस्य 'यजमानः प्रस्तरः' इत्यपवादस्थलं दर्शयित्वा अपवादस्थलान्तरमाह—**एवं तत्त्वमसीति।** तत्त्वमसीतिवाक्येन हि स्वरसतः किञ्चिज्ज्ञत्वकर्तृत्वभोक्तृत्वादिविशिष्टचैतन्यरूपजीवस्य तद्विपरीतेन सर्वज्ञत्वाभोक्तृत्वाकर्तृत्वादिविशिष्टचैतन्यरूपेण ब्रह्मणा सह अभेदः सार्वकालिकः प्रतिपाद्यते। तदनुरोधेन जीवे सदा सर्वज्ञत्वादिधर्माङ्गीकारे जीवे तद्विरुद्धासर्वज्ञत्वकर्तृत्वादिरूपसंसारावगाहिप्रत्यक्षं निरालम्बनं स्यात्। अतो निरवकाशसंसारप्रत्यक्षेण श्रुतेर्बाधः स्वीकर्तव्यः। स च बाधः विशेष्यचैतन्यांशमात्राभेदप्रतिपादकत्वेन श्रुतेस्सङ्कोचरूप एव, न तु यजमानः प्रस्तर इत्यत्रेव कात्स्न्येन मुख्यार्थं त्यक्त्वा गौणार्थकल्पनरूपः, इति विशेष इत्यर्थः। **अहङ्कारशबलितस्येति।** अन्तःकरणविशिष्टचैतन्यस्येत्यर्थः। **भागत्यागेति।** त्वंपदवाच्यार्थस्य द्वौ भागौ स्तः—विशेषणभागो विशेष्यभागश्चेति। तत्र विशेषणरूपस्य भागस्य त्यागपूर्वकं त्वंपदस्य विशेष्यभागे चैतन्यमात्रे लक्षणा स्वीक्रियते। एवं तत्पदार्थेऽपि द्रष्टव्यम्। अपवादस्थलान्तरमाह—**एवं कृष्णलमिति। प्रसक्ताविति।** श्रुतिबलात् कृष्णलेषु रूपरसपरावृत्तिप्रादुर्भावपर्यन्तपाकरूपस्य श्रपणस्याङ्गीकारे तेषु श्रपणाभावप्रत्यक्षस्य विषयो न लभ्यते। अद्वैतश्रुतिविरोधेन तेषु पारमार्थिकस्य श्रपणाभावस्यासम्भवात्, श्रुत्युक्तश्रपणस्य तेषु व्यावहारिकस्यैव वक्तव्यतया तेषु तदभावस्यापि व्यावहारिकस्यासम्भवात्, व्यवहारकाले बाधरहितस्य श्रपणाभावस्य प्रातिभासिकत्वासम्भवाच्च। तस्मात् प्रत्यक्षं निर्विषयं स्यादित्यर्थः। एवं 'सोमेन यजेत' इत्यत्रापि सोमेन यागेनेष्टं भावयेदिति [2]वाक्यार्थे स्थिते श्रुतिबलात् सोमयागयोरभेदाङ्गीकारे तयोर्भेदग्राहिप्रत्यक्षं निरवकाशं स्यादिति तद्विरोधपरिहाराय सोमपदस्य मत्वर्थलक्षणा स्वीक्रियते इत्यपि द्रष्टव्यम्। एवं निरवकाशप्रत्यक्षेण श्रुतिबाधं उत्सर्गस्यापवादरूपं दर्शयित्वा औत्सर्गिकं श्रुतिप्राबल्यं प्रकृताभिप्रायेण दर्शयति—**कथञ्चिदिति।** द्वैतमिथ्यात्वश्रुतीनां तत्सत्यत्वग्राहिप्रत्यक्षस्य च विरोधस्थले प्रत्यक्षस्य श्रुतिबाधितस्यापि न निरवकाशत्वम्। कल्पितद्वैततद्गतसत्ताजात्यादिविषयकत्वेन सावकाशत्वात्। अतोऽत्र श्रुत्या प्रत्यक्षस्यैव

---

1. प्रत्यक्षप्रतिभासाभावादिति। न च परोक्षप्रतिभासेऽपि भ्रमानुमितिविषयस्यैव प्रातिभासिकत्वं संभवतीति शङ्क्यम्। तद्बोधनेन प्रयोजनाभावात्, श्रुतिप्रमितत्वे प्रातिभासिकत्वस्यैव असम्भवाच्च।

2. वाक्यार्थे स्थिते इति। अन्यथा वाक्यभेदापत्तेः इति भावः।

अथवा कृष्णलं 'श्रपयेत्' 'सोमेन यजेत' इत्यादौ न प्रत्यक्षानुरोधेन लक्षणाश्रयणं, किं त्वनुष्ठानाशक्त्या। न हि कृष्णले उष्णीकरणमिव मुख्यः पाकोऽनुष्ठातुं शक्यते। न वा सोमद्रव्यकरणको याग इव तदभिन्नो यागः केनचिदनुष्ठातुं शक्यते। न चानुष्ठेयत्वाभिमतस्य प्रत्यक्षविरोध एव अनुष्ठानाशक्तिरिति शब्दान्तरेण व्यवह्रियत इति वाच्यम्। 'शशिमण्डलं कान्तिमत् कुर्यात्' इति विधौ अनुष्ठेयत्वाभिमतस्य शशिमण्डले कान्तिमत्त्वस्य प्रत्यक्षाविरोधेऽप्यनुष्ठानाशक्तिदर्शनेन तस्यास्ततो भिन्नत्वात्। तथा च तत्र तत एव लक्षणाश्रयणम्।

तस्मात् अपच्छेदन्यायादिसिद्धस्य श्रुतिबलीयस्त्वस्य न कश्चित् बाध इति।

अथ कथमत्रापच्छेदन्यायप्रवृत्तिः, उच्यते—यथा ज्योतिष्टोमे बहिष्पवमनार्थं प्रसर्पतां

बाध इति भावः। कथञ्चिदित्यस्य कल्पितद्वैतादिसमर्पणेनेत्यर्थः। कथञ्चिच्छब्दात् पूर्वं प्रत्यक्षस्येति शेषः। **न कश्चिदपीति**। तात्पर्यस्य प्राबल्यप्रयोजकत्वपक्षे यथा तात्पर्यविषयस्यापि श्रपणादेः बाधदर्शनरूपा अव्यवस्था प्रसक्ता, न तथा श्रुतिप्राबल्यौत्सर्गिकत्वपक्षे सा प्रसज्यते, अनुपलम्भादित्यर्थः।

ननु प्रत्यक्षेण श्रुतिबाधे बहून्युदाहरणानि दर्शितानि। श्रुत्या प्रत्यक्षबाधोदाहरणं त्वेकमेव दर्शितम्। तथा च प्रत्यक्षस्य श्रुत्यपेक्षया प्राबल्यमित्युत्सर्ग इति वक्तव्यं न तु वैपरीत्यं - इत्यस्वरसादाह—**अथवेति**। **तदभिन्न इति**। सोमाभिन्न इत्यर्थः। **तस्या इति**। अनुष्ठानाशक्तेरित्यर्थः। **तत इति**। प्रत्यक्षविरोधादित्यर्थः। **तत एवेति**। अनुष्ठानाशक्तेरेव, न तु प्रत्यक्षविरोधात्। अतो न प्रत्यक्षप्राबल्यस्यौत्सर्गिकत्वम्, आगमबाध्यानां गगननैल्यप्रत्यक्षादीनां भूयसां प्राक् दर्शितत्वादित्यर्थः। **तस्मादिति**। आगमप्राबल्यस्यौत्सर्गिकत्वसम्भवादित्यर्थः। **न कश्चिद्बाध इति**। आगमस्य प्रत्यक्षात्प्राबल्ये यजमानः प्रस्तर इत्यादावपि यजमानप्रस्तराभेदादिसिद्धिप्रसङ्ग इति यो बाध आशङ्कितः पूर्वं स नास्ति, तस्य बहुभिः प्रकारैः परिहृतत्वादित्यर्थः।

अपच्छेदन्यायं प्रकृते योजयितुमाक्षिपति—**अथ कथमिति**। कथंशब्दसूचितस्याक्षेपस्य विवरणं तन्निराकरणं च यत्वित्यादिना भविष्यति। प्रथमं तन्न्यायं प्रकृते योजयति—**उच्यत इति**। बहिष्पवमानस्तोत्रमुद्दिश्य [1]अन्वारब्धतया गच्छतामृत्विजां मध्ये उद्गातुः [2]अपच्छेदे सति आरब्धं क्रतुमदक्षिणतया समाप्य पुनस्स एव क्रतुरनुष्ठेय इति तदपच्छेदनिमित्तकं आरब्धक्रतोरदक्षिणतया समापनं प्रायश्चित्ततया विहितम्। तथा प्रतिहर्त्रपच्छेदनिमित्तकं सर्वस्वदानरूपदक्षिणादानविशिष्टतया आरब्धस्य क्रतोः समापनरूपं प्रायश्चित्तं विहितम्। तथा च एकस्मिन् प्रयोगे दैवात् क्रमेणोभयोरपच्छेदे सति विरुद्धयोरुक्तप्रायश्चित्तयोरनुष्ठातुमशक्यत्वात् अन्यतरस्यानुष्ठेयत्वे स्थिते सति किं पूर्वनिमित्तकप्रायश्चित्तमनुष्ठेयं किं वा उत्तरनिमित्तकमिति विशये निर्णयमाह

---

1. अन्वारब्धतया गच्छताम्-प्रातःसवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः शालाया बहिः प्रसर्पन्ति, तदानीं एकस्य पृष्ठतोऽन्यः इत्येवं पिपीलिकावत् पङ्क्त्याकारेण गन्तव्यम्। तत्र पुरतो गन्तुः कच्छं गृहीत्वैव पृष्ठतोऽन्यो गच्छेत्। एवं गच्छतामित्यर्थः। 2. अपच्छेदे सतीति। अपच्छेदः - विभागः, गृहीतकच्छविमोकः इति यावत्।

उद्गातुरपच्छेदे सति 'यद्युद्गाताऽपच्छिद्येत अदक्षिणं तं यज्ञं इष्ट्वा तेन पुनर्यजेत' इति श्रुतिनिरीक्षणेन जाता उद्गात्रपच्छेदनिमित्त(प्रायश्चित्त)कर्तव्यताबुद्धिः पश्चात् प्रतिहर्त्रपच्छेदे सति 'यदि प्रतिहर्तापच्छिद्येत सर्ववेदसं दद्यात् इति श्रुतिनिरीक्षणेन जातया तद्विरुद्धप्रतिहर्त्रपच्छेदनिमित्त(प्रायश्चित्त)कर्तव्यताबुद्ध्या बाध्यते, एवं पूर्वं घटादिसत्यत्वप्रत्यक्षं परया तन्मिथ्यात्वश्रुतिजन्यबुद्ध्या बाध्यते। न च-उदाहृतस्थले पूर्वनैमित्तिककर्तव्यताबुद्धेः परनैमित्तिककर्तव्यताबुद्ध्या बाधेऽपि पूर्वनैमित्तिककर्तव्यताबुद्धिजनकं शास्त्रं यत्रोद्गातृमात्रापच्छेदः उभयोरपि युगपदपच्छेदो वा उद्गात्रपच्छेदस्य परत्वं वा, तत्र सावकाशम्। प्रत्यक्षं तु अद्वैतश्रुत्या बाधे विषयान्तराभावान्निरालम्बनं स्यादिति वैषम्यं—शङ्कनीयम्। यत्र घटादौ श्रुत्या बाध्यं प्रत्यक्षं प्रवर्तते तत्रैव व्यावहारिकं विषयं लब्ध्वा [1]कृतार्थस्य तस्य [2]परापच्छेदस्थले सर्वथा बाधितस्य पूर्वापच्छेदशास्त्रस्येव विषयान्तरान्वेषणाभावात्,

---

उद्गातुरपच्छेद इत्यादिना। यत्र प्रयोगे प्रथममुद्गातुरपच्छेदो भवति तत्प्रयोगाभिप्रायोऽयं ग्रन्थः। **श्रुतिनिरीक्षणेनेति।** निमित्तोपजननानन्तरमेव नैमित्तिकशास्त्रस्य बुद्धिस्थत्वादिति भावः। **अपच्छेदनिमित्तकर्तव्यताबुद्धिरिति।** उद्गात्रपच्छेदो निमित्तं यस्य प्रायश्चित्तस्य तत् उद्गात्रपच्छेदनिमित्तं तस्य कर्तव्यताबुद्धिरित्यर्थः। **तद्विरुद्धेति।** उद्गात्रपच्छेदनिमित्तकर्तव्यता तच्छब्दार्थः। तद्विरुद्धत्वं च कर्तव्यताविशेषणम्। **एवमिति।** एकस्मिन् प्रयोगे अदक्षिणत्वसर्वस्वदक्षिणाकत्वयोरिव एकत्र घटादिप्रपञ्चे सत्यत्वमिथ्यात्वयोरपि विरुद्धत्वात् तद्बुद्ध्योर्बाध्यबाधकभाव इति भावः। **न चोदाहृतस्थल इति।** यत्र प्रथममुद्गात्रपच्छेदः तत्रेत्यर्थः। **शास्त्रमिति।** 'यद्युद्गातापच्छिद्येत' इति शास्त्रमित्यर्थः। **युगपदिति।** उद्गातृप्रतिहर्त्रपच्छेदयोर्यौगपद्यस्थले [3]उद्गात्रपच्छेदनिमित्तकमेव प्रायश्चित्तमनुष्ठेयमित्यापस्तम्बाचार्यैरुक्तत्वादिति भावः। **प्रत्यक्षं त्विति।** द्वैतसत्यत्वप्रत्यक्षमित्यर्थः। **अद्वैतश्रुत्येति।** द्वैतमिथ्यात्वश्रुत्येत्यर्थः। **विषयान्तराभावादिति।** द्वैतप्रपञ्चे प्रतीयमानसत्त्वस्य श्रुत्या बाधे सति तत्र सत्त्वान्तराभावात् सत्त्वप्रत्यक्षं निर्विषयं स्यात्, न चैतद्युज्यते, (प्रत्यक्ष) ज्ञानस्य निर्विषयत्वादर्शनात् तदनुपगमाच्चेति भावः। द्वैतप्रपञ्चे पारमार्थिकस्य सत्त्वस्य श्रुत्या अपहृतत्वेऽपि व्यावहारिकस्य सत्त्वस्य तया अनपहृतत्वात् सत्त्वप्रत्यक्षस्य न निरवकाशत्वमिति परिहरति—**यत्रेति। विषयमिति।** सत्त्वरूपमिति शेषः। ननु—ब्रह्मणि सत्त्वं पारमार्थिकं घटादिप्रपञ्चे सत्त्वं व्यावहारिकं शुक्तिरजतादौ सत्त्वं प्रातिभासिकमिति सत्तात्रैविध्यपक्षे घटादिसत्त्वप्रत्यक्षस्य विषयान्तरं नान्वेषणीयम्। व्यावहारिकसत्त्वस्य घटादौ विद्यमानस्यैव तद्विषयस्य लाभात्। एकैव सर्वत्र सत्ता इति पक्षे व्यावहारिकसत्त्वप्रातिभासिकसत्त्वयोरभावात्

---

1. कृतार्थस्य-सावकाशस्य। लब्धविषयकस्येत्यर्थः।
2. परापच्छेदस्थले-परापच्छेदरूपनिमित्तवति क्रतौ।
3. उद्गात्रपच्छेदनिमित्तकमेवेति। यद्यपि यौगपद्यस्थले विकल्प इति 'तत्र विप्रतिषेधात् विकल्पः स्यात्' इत्यधिकरणे निर्णीतम्, यद्यपि च वैकल्पिकानुष्ठानेनापि सावकाशत्वसंभवः यवशास्त्रस्येव, तथाऽपि मूलोक्तस्थलत्रयसाम्यार्थं सूत्रोक्तमनुसृतम्।

[1]इहापि सर्वप्रत्ययवेद्यब्रह्मसत्तायां सावकाशं प्रत्यक्षमिति वक्तुं शक्यत्वाच्च ।

यत्तु - एकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ताभ्यां क्रतौ तत्तन्नैमित्तिककर्तव्यतयोर्बदरफले श्यामरक्तरूपयोरिव क्रमेणोत्पादात् रूपज्ञानद्वयवत् कर्तव्यताज्ञानद्वयमपि प्रमाणमेवेति न परेण पूर्वज्ञानबाधे अपच्छेदन्याय उदाहरणम् । अत एवापच्छेदाधिकरणे 'नैमित्तिक[शास्त्राणां] (शास्त्रस्य) ह्ययमर्थः निमित्तोपजननात् प्रागन्यथाकर्तव्योऽपि क्रतुः निमित्ते सत्यन्यथाकर्तव्यः' इति शास्त्रदीपिकावचनमिति - तन्न--अङ्गस्य सतः कर्तव्यत्वम् । न च पश्चाद्भाविप्रतिहर्त्रपच्छेदवति क्रतौ पूर्ववृत्तोद्गात्रपच्छेदनिमित्तकस्य प्रायश्चित्तस्य अङ्गत्वमस्ति । आहवनीयशास्त्रस्य पदहोमातिरिक्तहोम-

---

सत्त्वप्रत्यक्षस्य विषयान्तरमन्वेषणीयमेव । यथा उत्तरभाविविरुद्धापच्छेदस्थले सर्वथा बाधितस्य पूर्वापच्छेदनिमित्तकप्रायश्चित्तशास्त्रस्य - इत्याशङ्कयाह —**इहापीति ।** द्वैतसत्त्वप्रत्यक्षं घटादिद्वैते सत्तामलभमानमपि न निरवकाशम् । पूर्वापच्छेदनिमित्तकप्रायश्चित्तशास्त्रस्य प्रयोगान्तरे सावकाशत्ववत् इहापि घटादिद्वैतादन्यत्र तदधिष्ठानभूतब्रह्मसत्तायां सावकाशत्वसम्भवादित्यर्थः । ब्रह्मस्वरूपसत्तायाः प्रत्यक्षविषयत्वे कैमुतिकन्यायमभिप्रेत्याह— **सर्वेति ।** सर्वप्रत्ययवेद्यत्वं सत्ताविशेषणम् । लोके हि यद्यद्वस्तु मनसि स्फुरति तत् सर्वं सदित्येव प्रतीयते । अतः सर्वस्य जगतः सत्ता सर्वप्रत्ययवेद्या । सा च सर्वाधिष्ठानभूतब्रह्मसत्तैव, न तु तदतिरिक्ता, कल्पनागौरवादिति भावः ।

पूर्वं कथंशब्दसूचितमाक्षेपमिदानीमुद्भावयति **यत्त्विति । बदरफल इति ।** यथा - तत्र पूर्वं श्यामरूपमुत्पद्यते, तत्रैव पश्चात् पूर्वरूपनाशपूर्वकं रक्तरूपमुत्पद्यते, तथा - पूर्वनिमित्तेन जातमात्रेण पूर्वनैमित्तिककर्तव्यता जायते पाश्चात्येन च निमित्तेन पूर्वकर्तव्यतानाशपूर्वकमुत्तरनैमित्तिककर्तव्यता उत्पाद्यते इत्यर्थः । ततः किं, तत्राह —**रूपज्ञानद्वयवदिति ।** तथा च उत्तरभाविविरुद्धापच्छेदवत्यपि क्रतौ पूर्वनैमित्तिकशास्त्रस्य नाप्रामाण्यमिति तत्प्रामाण्यसंरक्षणमेव तथा कल्पकमिति भावः । उत्तरनिमित्तोपजननात् प्राक् पूर्वनैमित्तिककर्तव्यता वस्तुत आसीत्-इत्यत्र सम्मतिमाह—**अत एवेति ।** पूर्वं वस्तुतस्तदभ्युपगमादेवेत्यर्थः । उत्तरभाविप्रतिहर्त्रपच्छेदजननात् प्राक् अन्यथा-अदक्षिणतया वस्तुतः कर्तव्योऽपि क्रतुः पश्चात् प्रतिहर्त्रपच्छेदरूपे निमित्ते सति अन्यथा-सर्ववेदसदक्षिणतया कर्तव्यः इति शङ्काभिप्रायानुसारेण वचनार्थः । क्रमेण विरुद्धापच्छेदद्वयवति क्रतौ पूर्वनैमित्तिकस्य कर्तव्यतानिष्पत्तौ मानं नास्ति । तत्र पूर्वप्रायश्चित्तस्यानङ्गत्वात् । अनङ्गत्वं च तद्बोधकमानाभावात् । न च पूर्वनैमित्तिकशास्त्रं तत्र मानम् । तस्य प्रयोगान्तरेषु सावकाशत्वेन तत्राप्यङ्गत्वबोधकत्वाभावात् - इत्याशयेन दूषयति—**तन्नेति । आहवनीयेति ।** 'आहवनीये जुहोति' इति होममात्रे आहवनीयं विधातुं प्रवृत्तस्य सामान्यशास्त्रस्य होमविशेषे पदरूपाधिकरणविधायक[2]विशेषशास्त्रवशेन पदहोमातिरिक्तहोमेषु

---

1. इहापि प्रत्यक्षं इत्यन्वयः । द्वैतसत्त्वविषयकप्रत्यक्षमपि इत्यर्थः ।
2. विशेषशास्त्रेति । 'अश्वस्यैव मेध्यस्य पदे पदे जुहोति' [तै. ब्रा. ३-९-२३] इति श्रुतिरूपेत्यादिः ।

विषयत्ववत् 'यद्युद्गाताऽपच्छिद्येत' इति शास्त्रस्य पश्चाद्भाविप्रतिहर्त्रपच्छेदरहितक्रतुविषयत्वात्। उक्तं हि न्यायरत्नमालायाम् 'साधारणस्य शास्त्रस्य विशेषविषयादिना। संकोचः क्लृप्तरूपस्य प्राप्तबाधोऽभिधीयते॥' इत्युक्तलक्षणप्राप्तबाधविवेचने—तत्रैवंसति शास्त्रार्थो भवति-पश्चाद्भाव्युद्गात्रपच्छेद-विधुरप्रतिहर्त्रपच्छेदवतः क्रतोस्सर्ववेदसदानमङ्गम्, एवमुद्गात्रपच्छेदेऽपि द्रष्टव्यम्-इति। यत्तु शास्त्रदीपिकावचनमुदाहृतं तदपि 'तेनोत्पन्नमपि पूर्वप्रायश्चित्तज्ञानं मिथ्या भवति, बाधितत्वात्, उत्तरस्य तु न किञ्चिद्बाधकमस्ति' इति पूर्वकर्तव्यताबाध्यत्वप्रतिपादकग्रन्थोपसंहारपठितत्वात् 'निमित्तोपजननात्प्राक्-निमित्तोपजननं विना-निमित्तोपजननाभावे सति अन्यथा कर्तव्योऽपि' इति [1]कृत्वाचिन्तामात्रपरं, न तु 'उत्तरनिमित्तोपजननात्प्राक्पूर्वनैमित्तिककर्तव्यता वस्तुत आसीत्' इत्येवंपरम्। [2]पूर्वग्रन्थसन्दर्भविरोधापत्तेः।

आस्तां मीमांसकमर्यादा। श्यामतदुत्तररक्तरूपन्यायेन क्रमिककर्तव्यताद्वयोत्पत्त्युपगमे

आहवनीयविधायकत्ववदित्यर्थः। **क्रतुविषयत्वादिति**। तादृशक्रतावेव उद्गात्रपच्छेदनिमित्तकप्रायश्चित्तस्याङ्गत्वबोधकत्वादित्यर्थः। उक्तार्थे सम्मतिमाह—**उक्तं हीति**। क्लृप्तरूपस्य प्रत्यक्षसिद्धस्य साधारणस्य होममात्रे प्राप्तस्य 'आहवनीये जुहोति' इतिशास्त्रस्य विशेषशास्त्रेण यस्सङ्कोचः, स प्राप्तबाधोऽभिधीयते। यथा सामान्यशास्त्रस्य विशेषशास्त्रं बाधकं, तथा सामान्यशास्त्रयोरेव क्वचिद्विषये विरोधे सति पूर्वं प्राप्तस्य पश्चात् प्राप्तं परत्वात् बाधकं भवति। यथा विरुद्धापच्छेदनिमित्तकशास्त्रयोः। तथा च विशेषविषयादिनेत्यादिपदं परत्वादि-सङ्ग्रहार्थं इति श्लोकार्थः। **तत्रैवंसतीति**। अपच्छेदस्थले उत्तरज्ञानेन पूर्वज्ञानबाधे सतीत्यर्थः। **द्रष्टव्यमिति**। पश्चाद्भाविप्रतिहर्त्रपच्छेदविधुरस्य उद्गात्रपच्छेदवतः क्रतोरदक्षिणतया क्रतुसमापनमङ्गमिति ज्ञातव्यमित्यर्थः। शास्त्रदीपिकावचनमपि न त्वदभिमतार्थपरम्, तत्पूर्वग्रन्थविरोधात् पूर्वग्रन्थार्थनिगमनरूपस्य त्वदुदाहृतवचनस्य पूर्वग्रन्थानुसारेणैव नेतव्यत्वाच्च-इत्याह—**तदपीति**। तदपि कृत्वाचिन्तामात्रपरमिति सम्बन्धः। कृत्वाचिन्तापरत्वे हेतुमाह—**तेनेत्यादिना**। तेनेत्यस्य क्लृप्तपूर्वप्रवृत्तनैमित्तिकशास्त्रेणेत्यर्थः। परोदाहृतवचनस्य शास्त्रदीपिकागत-[3]पूर्वग्रन्थानुसारिणमर्थमाह—**निमित्तोपजननं विनेति**। क्रमेण विरुद्धापच्छेदद्वयवति क्रतौ यदि द्वितीय-निमित्तोपजननं न स्यात्, तदा पूर्वनिमित्तवशादन्यथाकर्तव्यो भवेदप्ययं क्रतुः, न त्वेतदस्तीत्येतदर्थपरोऽयं ग्रन्थ इत्यर्थः। [4]पराभिमतं तद्वचनार्थं निषेधति—**न त्विति**।

तिष्ठन्तु मीमांसकाः दर्शितदर्शिनः। कुशलैरस्माभिः कल्पितस्य श्रुत्यर्थस्य का अनुपपत्तिरिति शङ्कते—**आस्तामिति**। उत्तरनैमित्तिककर्तव्यतोत्पत्त्या नाश्यत्वेन पराभिमतं पूर्वनैमित्तिकस्य कर्तव्यत्वमेव

---

1. कृत्वाचिन्ता—अभ्युपगमवादः—आहार्यनिश्चयेनव्यवहारः 2. पूर्वग्रन्थः—'तेनोत्पन्नमपि' इत्यादिर्ग्रन्थः।
3. पूर्वग्रन्थानुसारिणं - द्वितीयनिमित्तशून्यत्वे इत्येवंरूपम्।
4. पराभिमतं - द्वितीयनिमित्तोत्पत्तिप्राक्काले - इत्येवंरूपम्।

को विरोधः। उच्यते—तथाहि-किं तत् कर्तव्यत्वं, यत् परनैमित्तिककर्तव्यतोत्पत्त्या निवर्तेत। न तावत् पूर्वनैमित्तिकस्य कृतिसाध्यत्वयोग्यत्वम्। तस्य पश्चादप्यनपायात्। नापि फलमुखं कृतिसाध्यत्वम्। तस्य पूर्वमप्यजननात्। नापि यदननुष्ठाने क्रतोर्वैकल्यं तत्त्वम्, अङ्गत्वं वा। अननुष्ठाने क्रतुवैकल्यप्रयोजकत्वस्य नियमविशेषरूपत्वेन, कर्माङ्गत्वस्य फलोपकारितया सन्निपातितया वा कारणत्वविशेषरूपत्वेन च, तयोः कादाचित्कत्वायोगेन स्वाभावि-

---

तावद्दुर्निरूपम्। तथा हि—तत् किं कृतिसाध्यत्वयोग्यत्वं, किं वा फलमुखं कृतिसाध्यत्वं, क्रतुवैकल्यप्रयोजकाननुष्ठानप्रतियोग्यनुष्ठानशालित्वं वा, अङ्गत्वं वा, अन्यद्वा किञ्चित् इति विकल्पं मनसि निधाय आद्यं दूषयति—**न तावदिति। अनपायादिति।** तथा च उत्तरनैमित्तिककर्तव्यताकालेऽपि अनुवर्तमानायाः पूर्वकर्तव्यतायाः तन्नाश्यत्वायोगेन बदरफलगतश्यामतारक्ततयोरिव तयोः क्रमिकत्वाभ्युपगमविरोध इति भावः। द्वितीयं दूषयति—**नापि फलेति। अजननादिति।** तथा च पूर्वनैमित्तिककर्तव्यताज्ञानस्य मीमांसकमर्यादासिद्धं भ्रान्तित्वमेवायाति, न त्वदभिमतं श्यामताज्ञानस्येव प्रमात्वं इति भावः। तृतीयचतुर्थावनुवदति—**नापि यदिति।** यस्यानुष्ठानाभावे क्रतोर्वैकल्यं भवति तत् क्रतुवैकल्यप्रयोजकाननुष्ठानप्रतियोग्यनुष्ठानशालि पर्यवस्यति, तत्त्वमित्यर्थः। 'यत्र प्रथममुद्गात्रपच्छेदः पश्चात् प्रतिहर्त्रपच्छेदः तत्र उद्गात्रपच्छेदप्रायश्चित्ताननुष्ठानं क्रतुवैकल्यप्रयोजकं, तत्प्रायश्चित्तं तस्य क्रतोरङ्गं' इति च वदता वक्तव्यं - पूर्वप्रायश्चित्ताननुष्ठानस्य क्रतुवैकल्यप्रयोजकत्वं किं वैकल्योत्पादकत्वं किंवा तद्व्यापकत्वं, तद्व्याप्यत्वं वा। नाद्यः। अभावरूपस्याननुष्ठानस्योत्पादकत्वासम्भवात्, क्रतुवैकल्यस्यापि[1]क्रतूपकारप्रागभावरूपतया तदुत्पाद्यत्वायोगाच्च। न द्वितीयः। यत्रोद्गातृमात्रापच्छेदवति क्रतौ तत्प्रायश्चित्तं कृतं कारणान्तराद्वैकल्यं च, तत्र क्रतुवैकल्यसत्त्वेऽपि उद्गात्रपच्छेदप्रायश्चित्ताननुष्ठानाभावेन व्यभिचारात्। तस्मात् तृतीयः परिशिष्यते - इत्याशयेनाह—**नियमविशेषरूपत्वेनेति।** व्याप्यत्वरूपत्वेनेत्यर्थः। फलोपकारित्वं परमापूर्वरूपफलं प्रत्यदृष्टद्वारा कारणत्वम्। यथा प्रयाजादीनाम्। सन्निपत्योपकारकत्वं च यागस्वरूपोत्पादकत्वम्। यथा द्रव्यदेवतादेः। अस्तु तयोरुक्तरूपत्वमिति चेत्, तत्र वक्तव्यं—क्रमिकविरुद्धापच्छेदद्वयवति क्रतौ पूर्वप्रायश्चित्ताननुष्ठानगतं क्रतुवैकल्यव्याप्यत्वरूपं क्रतुवैकल्यप्रयोजकत्वं पूर्वप्रायश्चित्तगतमङ्गत्वं च द्वितीयनिमित्तजननानन्तरमप्यनुवर्तते न वेति। आद्ये क्रतुवैकल्यप्रयोजकाननुष्ठानप्रतियोग्यनुष्ठानशालित्वरूपायाः पूर्वप्रायश्चित्तकर्तव्यतायाः तत्प्रायश्चित्तगताङ्गत्वरूपकर्तव्यतायाश्च उत्तरनैमित्तिककर्तव्यतानाश्यत्वाभ्युपगमभङ्गापत्तिः। द्वितीयकल्पे च पूर्वप्रायश्चित्ताननुष्ठानस्य क्रतुवैकल्यव्याप्यत्वं द्वितीयनिमित्तजननात् प्रागेवास्ति तज्जननानन्तरं तु नास्तीति पर्यवस्यति। तथा पूर्वप्रायश्चित्तगताङ्गत्वरूपा कर्तव्यता पूर्वप्रायश्चित्तस्य द्वितीयनिमित्तजननात्प्रागेवास्ति पश्चात्तु नास्तीति पर्यवस्यति। तथा च व्याप्यत्वकारणत्वयोः स्वाश्रये कादाचित्कत्वमभ्युपगतं स्यात्। तच्च न सम्भवतीत्यनुपदमेव वक्ष्यति नहीत्यादिना। तस्मात्तयोः

---

1. क्रतूपकारेति। क्रतुगतसामर्थ्योद्बोधेत्यर्थः।

कत्वनिर्वाहाय 'पश्चाद्भाविविरुद्धापच्छेदाभाववतः क्रतोः पूर्वापच्छेदनैमित्तिकमङ्गं तत्रैव तदननुष्ठानं क्रतुवैकल्यप्रयोजकं' इति विशेषणीयतया पाश्चात्त्यापच्छेदान्तरवति क्रतौ पूर्वापच्छेदनैमित्तिके क्रत्वङ्गत्वस्य तदननुष्ठाने क्रतुवैकल्यप्रयोजकत्वस्य वा पाश्चात्त्यापच्छेदोत्पत्तेः पूर्वमसम्भवात्[1]। न हि—वस्तु किञ्चिद्वस्त्वन्तरं प्रति कञ्चित्कालं व्याप्यं पश्चान्नेति वा, कञ्चित्कालं कारणं पश्चान्नेति वा, क्वचिद्दृष्टं युक्तं वा। नापि कर्तव्यत्वं नाम धर्मान्तरमेव आगमापाययोग्यं कल्प्यम्। मानाभावात्, विरुद्धापच्छेदशास्त्रयोः पदाहवनीयशास्त्रवद्व्यवस्थोपपत्तेः। तस्मात् निरालम्बनं क्रमिककर्तव्यताद्वयोत्पत्तिवचः।

उपक्रमन्यायेनप्रत्यक्षप्राबल्यशङ्काया निराकरणम्।

ननु चोपक्रमाधिकरणन्यायेन असञ्जातविरोधित्वात् प्रत्यक्षमेव आगमात् बलीयः किं न स्यात्।

यावदाश्रयभावित्वरूपस्वाभाविकत्वनिर्वाहाय क्रमिकविरुद्धापच्छेदवत्क्रतुव्यावर्तकविशेषणमुभयत्रापि देयमित्याह—**पश्चाद्भावीति। असम्भवादिति।** तथा च क्रमिकविरुद्धापच्छेदवति क्रतौ पूर्वनैमित्तिककर्तव्यताज्ञानं भ्रान्तिरेवेति भावः। तयोः कादाचित्कत्वायोगे हेतुमाह—**न हीति।** धूमादौ वह्न्यादिव्याप्यतायाः वह्न्यादौ धूमादिकारणतायाश्च कादाचित्कत्वादर्शनादित्यर्थः। नन्वदृष्टमपि युक्तं चेत् सङ्ग्राह्यमेव, नेत्याह—**युक्तं वेति।** वाकारो नञनुकर्षणार्थः। तयोः कादाचित्कत्वपक्षे धूमादेः कदाचित् वह्निव्याप्यत्वाभावापत्त्या तदभावप्रयोजकोपाधिमत्त्वप्रसङ्गः[2] स्यात्, वह्न्यादेः कदाचित् धूमादिकारणत्वाभावापत्त्या धूमादिकार्यार्थिनो वह्न्याद्युपादाने तत्कारणत्वाभावशङ्कया [3]निष्कम्पप्रवृत्तिश्च न स्यात्। अतस्तयोः कादाचित्कत्वमयुक्तमित्यर्थः। पञ्चमं निराकरोति—**नापीति।** प्रथमनिमित्तजननानन्तरमेवागमयोग्यं द्वितीयनिमित्तजननानन्तरमेवापाययोग्यं चेत्यर्थः। पूर्वनैमित्तिकशास्त्रस्य आहवनीयादिशास्त्रवदन्यत्र सावकाशताया उक्तत्वेन तस्यैतादृशधर्मे मानत्वायोगादित्याशयेनाह—**विरुद्धेति।** क्रमिकविरुद्धापच्छेदवति क्रतौ पूर्वनैमित्तिककर्तव्यत्वज्ञानस्याप्रमात्वसम्भवात् सति विरोधे उत्तरज्ञानेन पूर्वज्ञानबाधे अपच्छेदन्यायः उदाहरणं भवत्येवेत्याशयेनोपसंहरति—**तस्मादिति।**

नन्वपच्छेदन्यायेन श्रुतेः प्रत्यक्षापेक्षया प्राबल्यावगतिवत् उपक्रमाधिकरणन्यायेन प्रत्यक्षस्यापि श्रुत्यपेक्षया प्राबल्यावगमात्तयोर्बाध्यबाधकभावे विनिगमनाविरह इत्याशयेन शङ्कते—**ननु चेति। असञ्जातेति।** यथा उपक्रमवाक्यार्थज्ञानकाले उपसंहारवाक्यार्थज्ञानाभावेन विरोधस्फुरणाभावात् उपक्रमस्यासञ्जातविरोधित्वं, तथा द्वैतसत्यत्वप्रत्यक्षप्रवृत्तिकाले द्वैतमिथ्यात्वबोधकश्रुत्यर्थानुभवाभावेन विरोधस्फूर्त्यभावात् प्रत्यक्षस्यासञ्जातविरोधित्वमित्यर्थः।

---

1. असम्भवादिति। कारणताविशेषरूपस्याङ्गत्वस्य योग्यत्वफलमुखत्वाभ्यां विकल्पे पूर्वोक्तदोषानतिवृत्तेः—इत्यपि बोध्यम् 2. प्रसङ्ग इति। तथा च सोपाधिकत्वात् व्याप्यत्वमेव न स्यात् इति भावः।

3. निष्कम्पप्रवृत्तिः—असन्दिग्धप्रवृत्तिः—फलवत्तासंशयरहितप्रवृत्तिरित्यर्थः।

उच्यते—यत्रैकवाक्यता प्रतीयते तत्रैकस्मिन्नेवार्थे पर्यवसानेन भाव्यम्, अर्थभेदे प्रतीतैकवाक्यताभङ्गप्रसङ्गात्। अतस्तत्र प्रथममसंजातप्रतिपक्षेण 'प्रजापतिर्वरुणायाश्वमनयत्' [तै-सं. २-३-१२] इत्याद्युपक्रमेण परकृतिसरूपार्थवादेन दातुरिष्टौ बुद्धिमधिरोपितायां तद्विरुद्धार्थं 'यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणान् चतुष्कपालान्निर्वपेत्' इत्युपसंहारगतपदजातं उपजातप्रतिपक्षत्वात् यथाश्रुतार्थसमर्पणेन तदेकवाक्यतामप्रतिपद्यमानं एकवाक्यतानिर्वाहाय णिजर्थमन्तर्भाव्य तदानुगुण्येनैवात्मानं लभत इति उपक्रमस्य प्राबल्यम्। यत्र तु परस्परमेकवाक्यता न प्रतीयते तत्र पूर्ववृत्तमविगणय्य लब्धात्मकं विरुद्धार्थकं वाक्यं स्वार्थं बोधयत्येवेति न तत्र पूर्ववृत्तस्य प्राबल्यम्। अत एव षोडशिग्रहणवाक्यं पूर्ववृत्तमविगणय्य तदग्रहणवाक्यस्यापि स्वार्थबोधकत्वमुपेयते। किंतु उभयोर्विषयान्तराभावात् अगत्या तत्रैव विकल्पानुष्ठानमिष्यते। एवं च अद्वैतागमस्य प्रत्यक्षेणैकवाक्यत्वशङ्काभावात् पूर्ववृत्तमपि तदविगणय्य स्वार्थबोधकत्वमप्रतिहतम्। तदर्थबोधजनने च 'पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्यथोत्पादात् नाद्याबाधेन सम्भवः॥' [तन्त्रवा-३-३-१४] इत्यपच्छेदन्यायस्यैव प्रवृत्तिः, नोपक्रमन्यायस्य। अत एव लोकेऽपि प्रथमप्रवृत्तं शुक्ति-

---

दृष्टान्तवैषम्येण परिहरति—**उच्यत इति**। **अश्वमनयदिति**। अश्वं दत्तवानित्यर्थः। परस्य प्रजापतेः कृतिरनुष्ठानं परकृतिः, परकृतिपदं तत्प्रतिपादकवाक्यपरं, तत्सदृशार्थवादेनेत्यर्थः। प्रजापतेः कर्माधिकाराभावेन वस्तुतस्तत्प्रतिपादकत्वाभावादिति सरूपेत्युक्तम्। **दातुरिति**। 'स एतं वारुणं चतुष्कपालमपश्यत्तन्निरवपत्' इत्युपक्रमे श्रवणादिति भावः। स इत्यनेन प्रकृतः प्रजापतिः परामृश्यते। उपक्रमोपसंहारयोर्वारुणेष्टिरूपैकार्थस्पर्शित्वात्तयोरत्रैकवाक्यत्वमवगतम्। तत्संरक्षणायानयोरेकार्थपर्यवसानं वक्तव्यम्। उपक्रमो दातुरिष्टिं विधत्ते उपसंहारः प्रतिग्रहीतुरिति यथाश्रुतवाक्यार्थाभ्युपगमे प्रतीतैकवाक्यत्वं न स्यादित्यर्थः। **णिजर्थमिति**। प्रतिगृह्णीयादित्यस्य प्रतिग्राहयेदित्यर्थः। एकवाक्यत्वप्रतीतिस्थल एव उत्तरस्य पूर्वापेक्षा—इत्युक्तार्थदार्ढ्याय एकवाक्यत्वप्रतीत्यभावस्थले उत्तरेण पूर्वं नादर्तव्यमित्याशयेनाह—**यत्र त्विति**। नन्वेकस्मिन्नतिरात्रक्रतौ षोडशिग्रहणतदभावयोर्विरुद्धत्वात् वाक्यद्वयं कथं प्रमाणं स्यादिति शङ्कते—**किंत्विति**। प्रयोगभेदेन विरोधसमाधानमाह—**उभयोरिति**। ननु ग्रहणवाक्यं तन्निषेधवाक्यं च क्रतुभेदेन व्यवस्थितं किं न स्यादित्यत आह—**विषयान्तराभावादिति**। तयोर्वाक्ययोरेकप्रकरणगतत्वादित्यर्थः। **अगत्येति**। समुच्चयस्याप्यसंभवेनेत्यर्थः। **तत्रैवेति**। अतिरात्र एवेत्यर्थः। **एवं चेति**। उपक्रमन्यायस्य प्रतीतैकवाक्यताकग्रन्थविषयत्वे सतीत्यर्थः। **शङ्काभावादिति**। तथा च न प्रत्यक्षस्य श्रुत्यपेक्षया प्राबल्यशङ्केति भावः। अपच्छेदन्यायप्रवृत्तिं प्रकृते शङ्कासमाधानाभ्यां निरूप्य निगमयति—**तदर्थेति**। **पूर्वमिति**। क्रमिकविरुद्धापच्छेदवति क्रतौ प्रथमापच्छेदनिमित्तकप्रायश्चित्तकर्तव्यताज्ञानं पूर्वशब्दार्थः। उत्तरनैमित्तिककर्तव्यताज्ञानं परशब्दार्थः। पूर्वेण परस्य बाधाभावे हेतुमाह—**अजातत्वादिति**। परस्य अन्यथा—पूर्वज्ञानबाधमन्तरा उत्पत्तुमयोग्यत्वात् आद्यस्याबाधेन परस्य सम्भवो नास्तीति श्लोकार्थः। पूर्वप्रवृत्तस्य प्रत्यक्षस्यापि परेण शब्देन बाधे उदाहरणमाह—**अत**

रूप्यप्रत्यक्षं आप्तोपदेशेन [1]बाध्यते इति ।

प्रपञ्चमिथ्यात्वश्रुतेः उपजीव्यप्रत्यक्षविरोधपरिहारः

ननु—तथाप्युपजीव्यत्वेन प्रत्यक्षस्यैव प्राबल्यं दुर्वारम् । अपच्छेदशास्त्रयोर्हि न पूर्वं परस्योपजीव्यमिति युक्तः परेण पूर्वस्य बाधः । इह तु वर्णपदादिस्वरूपग्राहकतया मिथ्यात्वबोधकागमं प्रति प्रत्यक्षस्योपजीव्यत्वात् आगमस्यैव तद्विरुद्धमिथ्यात्वाबोधकत्वरूपो बाधो युज्यते । न च मिथ्यात्वश्रुत्या वर्णपदादिसत्यत्वांशोपमर्देऽपि उपजीव्यस्वरूपांशोपमर्दाभावात् नोपजीव्यविरोध इति वाच्यम् । 'नेह नानास्ति किञ्चन' [क.उ-४-११] इत्यादिश्रुतिभिः स्वरूपेणैव प्रपञ्चाभावबोधनात् ।

अत्र केचिदाहुः—वृषमानयेत्यादिवाक्यं श्रवणदोषात् वृषभमानयेत्यादिरूपेण शृण्वतोऽपि शाब्दप्रमितिदर्शनेन शाब्दप्रमितौ वर्णपदादिप्रत्यक्षं प्रमाभ्रमसाधारणमेवापेक्षितमिति अद्वैतागमेन वर्णपदादिप्रत्यक्षमात्रमुपजीव्यं न तत्प्रमा । तथा च वर्णपदादिस्वरूपोपमर्देऽपि नोपजीव्यविरोध इति ।

अन्ये त्वाहुः—शाब्दप्रमितौ वर्णपदादि[2]स्वरूपसिद्ध्यनपेक्षायामपि अयोग्यशब्दात् प्रमित्य-

---

एवेति । परत्वादेवेत्यर्थः ।

नन्विति । यद्यपीयं शङ्का 'न चैवमुपजीव्यप्रत्यक्षविरोधः' इत्यादिना पूर्वं निराकृता, तथापि तत्रोक्तं परिहारमाक्षेप्तुं तच्छङ्कापरिहारौ पुनर्लिखति—तथापीति । आगमवत् प्रत्यक्षस्य स्वतःप्राबल्याभावेऽपीत्यर्थः । ननु—अपच्छेदन्यायेन श्रुतेरपि प्राबल्यं दुर्वारम्, तथा च बाध्यबाधकभावे विनिगमनाविरह एवेति शङ्ककस्य नेष्टसिद्धिः, प्रत्यक्षेण श्रुतिबाधस्य तदिष्टत्वात्—इत्याशङ्क्य अपच्छेदन्यायानवतारं शङ्ककः प्रकृते दर्शयति—अपच्छेदशास्त्रयोर्हीति । उपजीव्यविरोधशङ्कायां पूर्वोक्तं परिहारं स्मारयति—न च मिथ्यात्वश्रुत्येति । श्रुत्या प्रपञ्चसत्यत्वमात्रनिषेधे सति तथापरिहारो युज्यते । सा तु प्रपञ्चस्वरूपमेव निषेधति । तथा च वर्णपदादिस्वरूपस्यैवाभावादुपजीव्यविरोधो दुर्वार इत्याह—नेहेति । इह—ब्रह्मणि नाना—भिन्नं वस्तु किञ्चिदपि नास्तीत्यर्थः ।

स्वरूपोपमर्दमुपेत्यैव उपजीव्यविरोधं परिहरति—अत्र केचिदाहुरिति । प्रपञ्चसत्यत्वपक्षेऽपि वृषमानयेत्युदाहरणानुरोधेन भ्रमप्रमासाधारणमेव शब्दप्रत्यक्षं शाब्दबोधोपजीव्यमिति वक्तव्यम्, अस्माकं तु निषेधश्रुतिप्रामाण्यात् सर्वत्र भ्रमरूपमेव प्रत्यक्षं शाब्दबोधे व्यवहारान्तरेषु च कारणमिति विशेषः, इति नोपजीव्यविरोधः, शब्दस्वरूपस्यानुपजीव्यत्वादित्यर्थः ॥

उपजीव्यविरोधं प्रकारान्तरेण परिहरति—अन्ये त्वाहुरिति । प्रथमं पूर्वमते अस्वरसं दर्शयति—

---

1. बाध्यते इति । बाधोऽत्र अप्रमात्वनिश्चयः । 2. स्वरूपसिद्धोति । स्वरूपसत्तेत्यर्थः ।

नुदयात् योग्यतास्वरूपसिद्ध्यपेक्षाऽस्ति। तदपेक्षायामपि नोपजीव्यविरोधः। 'नेह नानास्ति' इति श्रुत्या [1]निषेधेऽपि यावद्ब्रह्मज्ञानमनुवर्तमानस्यार्थक्रियासंवादिनोऽसद्विलक्षणप्रपञ्चस्वरूपस्याङ्गीकारात्। अन्यथा प्रत्यक्षादीनां व्यावहारिकप्रमाणानां निर्विषयत्वप्रसङ्गात्। न च—स्वरूपेण निषेधेऽपि कथं प्रपञ्चस्वरूपस्यात्मलाभः, निषेधस्य [2]प्रतियोग्यप्रतिक्षेपरूपत्वे व्याघातात्-इति वाच्यम्। शुक्तौ 'इदं रजतं' 'नेदं रजतं' इति प्रतीतिद्वयानुरोधेन अधिष्ठानगताध्यस्ताभावस्य[3] बाधपर्यन्तानुवृत्तिकासद्विलक्षणप्रतियोगिस्वरूपसहिष्णुत्वाभ्युपगमात्। एतेन प्रपञ्चस्य स्वरूपेण निषेधे शशशृङ्गवदसत्त्वमेव स्यादिति निरस्तम्। ब्रह्मज्ञाननिवर्त्यस्वरूपाङ्गीकारेण वैषम्यात्। न च-अस्याध्यस्तस्य अधिष्ठाने स्वरूपेण निषेधे अन्यत्र तस्य स्वरूपेण [4]निषेधःस्वतस्सिद्ध इति तस्य

शाब्दप्रमिताविति। अनपेक्षायामपीति। अत्र अपिशब्देन वस्तुतोऽपेक्षास्तीति सूचितम्। तथा हि—पूर्वमते प्रत्यक्षज्ञानमात्रमुपजीव्यं विषयो वर्णपदादिलक्षणो नोपजीव्य इत्युक्तं, तदयुक्तम् निर्विषयप्रत्यक्षज्ञानायोगात्। अतो वर्णपदादिस्वरूपमपि स्वीकर्तव्यमेव। तथा च उपजीव्यविरोधे पूर्वसमाधानं न साध्विति भावः। **अस्तीति।** तथा च योग्यताया उपजीव्यत्वमवर्जनीयमिति तद्विरोधः पूर्वमते आवश्यक इति भावः। न चैतावता पूर्ववाद्यभिमतस्य कृत्स्नप्रपञ्चस्य स्वरूपं न सिध्यतीति वाच्यम्। शाब्दप्रमितिलक्षणकार्यानुरोधेन ब्रह्मातिरिक्तयोग्यतास्वरूपसिद्धौ तद्वदेव जलाहरणादिकार्यानुरोधेन घटादिस्वरूपमपि सिध्यत्येवेत्याशयात्। ननु यदि चैतन्यव्यतिरिक्तं कृत्स्नं जगदुपेयते तर्हि तद्ग्राहिप्रत्यक्षादेस्सविषयस्योपजीव्यत्वात् तद्विरोध इत्यत आह—**तदपेक्षायामपीति।** निषेधश्रुत्यर्थाविरुद्धस्य प्रपञ्चस्वरूपस्यास्माभिरप्यङ्गीकारान्नास्माकं मते उपजीव्यविरोध इति भावः। असद्विलक्षणस्वरूपानङ्गीकारे बाधकं पूर्वमतानुवर्तिनं प्रत्याह—**अन्यथेति।** प्रपञ्चसत्यत्ववादी शङ्कते **न चेति।** ननु ब्रह्मणि प्रपञ्चस्तन्निषेधश्च युगपदास्तां, को दोष इत्याशङ्क्याह—**निषेधस्येति।** भूतलादौ घटाद्यभावस्य प्रतियोगिस्थितिविरोधित्वदर्शनादिति भावः। **व्याघातादिति।** निषेधत्वव्याघातादित्यर्थः। कल्पितपदार्थप्रतियोगिकाभावस्य अधिष्ठानादन्यत्र सदा प्रतियोगिविरोधित्वेऽप्यधिष्ठाने कञ्चित्कालं प्रतियोगिस्थितिसहिष्णुत्वस्वभावः कल्प्यते। न च तथाकल्पकाभावः। द्वैतग्राहिप्रत्यक्षादेर्निषेधश्रुतेश्च मानत्वात्। यथा परमते घटाद्यत्यन्ताभावस्य स्वाधिकरणमात्रे प्रतियोगिप्रतिक्षेपकत्वेऽपि संयोगाद्यत्यन्ताभावस्य क्वचित्[5] स्वाधिकरणे प्रतियोग्यप्रतिक्षेपकता प्रतीतिबलात् स्वीक्रियते तद्वत्-इति समाधानाभिप्रायं मनसि निधाय स्वमतसिद्धं दृष्टान्तं सोपपत्तिकमाह—**शुक्ताविति।** एतच्छब्दार्थमाह—**ब्रह्मज्ञानेति। वैषम्यादिति।** शशशृङ्गादिवैषम्यादित्यर्थः। **अन्यत्रेति।**

---

1. निषेधे—स्वरूपेण निषेधे।
2. प्रतियोग्यप्रतिक्षेपेति। प्रतियोग्यविरोधीत्यर्थः।
3. अध्यस्ताभावस्य—अध्यस्तप्रतियोगिकत्रैकालिकाभावस्य।
4. निषेधः स्वतस्सिद्ध इति। अभावः श्रुत्यतिरिक्तप्रमाणेन निश्चित इत्यर्थः।
5. क्वचित्—द्रव्ये।

सर्वदेशकालसम्बन्धिनिषेधप्रतियोगित्वापत्त्या असत्त्वं दुर्वारम्। 'सर्वदेशकालसम्बन्धिनिषेधप्रतियोगित्वमसत्त्वं' इत्येवासत्त्वनिर्वचनात्, विधान्तरेण तन्निर्वचनायोगादिति—वाच्यम्। असतः सर्वदेशकालसम्बन्धिनिषेधप्रतियोगित्वमुपगच्छता तस्य तथात्वे, प्रत्यक्षस्य सर्वदेशकालयोः प्रत्यक्षीकरणायोगेन आगमस्य तादृशागमानुपलम्भेन च प्रमाणयितुमशक्यतया, अनुमानमेव प्रमाणयितव्यमिति तदनुमाने यत् सद्व्यावृत्तं लिङ्गं वाच्यं तस्यैव प्रथमप्रतीतस्य असत्त्वनिर्वचनत्वोपपत्तेः—इति।

अपरे तु—**नेह नानास्तीति श्रुतेः सत्यत्वेन प्रपञ्चनिषेध एव तात्पर्यं न स्वरूपेण। स्वरूपेण निषेधस्य स्वरूपाप्रतिक्षेपकत्वे तस्य तन्निषेधत्वायोगात्। तत्प्रतिक्षेपकत्वे प्रत्यक्षविरोधात्।**

अधिष्ठानादन्यत्र देशे काले वेत्यर्थः। ननु प्रकारान्तरेणासत्त्वनिर्वचनमस्तु, तथा च प्रपञ्चे तदभावात् न तस्यासत्त्वप्रसक्तिरिति, नेत्याह—**विधान्तरेणेति**। प्रसिद्धासतः शशशृङ्गादेः उक्तलक्षणे सिद्धे सति प्रपञ्चेऽपि तल्लक्षणसत्त्वात् तस्याप्यसत्त्वापत्त्या तद्विलक्षणत्वाभ्युपगमपूर्वकवैषम्योक्तिरयुक्तेति शङ्कितुं शक्यम्। तदेवासिद्धम्-मानाभावात्। कथं मानाभाव इति चेत्, तत्र वक्तव्यं—किमसत उक्तलक्षणयोगे प्रत्यक्षं प्रमाणं किं वा आगमः अथवा अनुमानमिति विकल्पं मनसि निधाय आद्यद्वितीययोर्निराकरणपूर्वकं तृतीयं परिशेषयति—**असत इत्यादिना**। प्रत्यक्षस्य आगमस्य च प्रमाणयितुमशक्यतया इति सम्बन्धः। **तादृशेति**। 'शशशृङ्गादिकं सर्वदेशकालसम्बन्धिनिषेधप्रतियोगि' इत्येवमाकारकागमानुपलम्भेन चेत्यर्थः। अस्तु तर्हि परिशिष्टं अनुमानमेव तत्र मानमिति, नेत्याह—**तदनुमान इति**। **यदिति**। [1]निस्स्वरूपत्वमित्यर्थः। **वाच्यमिति**। त्वयेति शेषः। विनिगमनाविरहं परिहरति—**प्रथमप्रतीतस्येति**। **उपपत्तेरिति**। तथा च प्रपञ्चस्य ज्ञाननिवर्त्यस्वरूपाङ्गीकारात् निस्स्वरूपत्वलक्षणासत्त्वं नास्तीति तस्य शशशृङ्गादिवैषम्योक्तिर्युक्तेति भावः।

उपजीव्यविरोधं प्रकारान्तरेण परिहरति—**अपरे त्विति**। **अयोगादिति**। तथा चाभावाधिकरणमात्रे प्रतियोगिस्थित्ययोगात् प्रपञ्चाधिकरणे ब्रह्मणि तदभावो न निषेधश्रुतिगम्य इति भावः। **ननु—सत्यत्वेन** ब्रह्मणि प्रपञ्चनिषेध इति मतेऽपि किं सत्यत्वविशिष्टप्रपञ्चाभावो ब्रह्मणि विवक्षितः, किं वा सत्यत्वधर्मावच्छिन्नप्रतियोगिताकः प्रपञ्चमात्र[2]प्रतियोगिको निषेधो ब्रह्मणि विवक्षितः। नोभयथापि सम्भवति। प्रतियोग्यधिकरणे तदभावानङ्गीकारात्, प्रपञ्चे सत्यत्वस्य अनङ्गीकारेण तस्य प्रतियोगिकोटिप्रवेशप्रतियोगितावच्छेदकत्वयोरसम्भवाच्च[3]

---

1. निस्स्वरूपत्वं—सत्त्वेन प्रतीत्यनर्हत्वं। सत्तादात्म्यशून्यत्वमिति यावत्। सदसतोः संसर्गाभावेन असतः उक्तनिस्स्वरूपत्वं, न तु प्रपञ्चस्य इति भावः।

2. मात्रपदेन सत्यत्वविशिष्टप्रपञ्चव्यवच्छेदः।

3. असम्भवाच्चेति। सत्यत्वविशिष्टप्रपञ्चरूपः प्रतियोगी प्रपञ्चे सत्यत्वाभावे अप्रसिद्धः। अतः न सत्यत्वस्य प्रतियोगिकोटिप्रवेशः सम्भवति। प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितानवच्छेदकत्वात् प्रपञ्चे सत्यत्वाभावे सत्यत्वस्य प्रपञ्चाभावप्रतियोगितावच्छेदकत्वं न सम्भवति, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य अप्रामाणिकत्वात् इत्यर्थः।

न च सत्यत्वस्यापि 'सन् घटः' इत्यादिप्रत्यक्षसिद्धत्वात् न तेनापि रूपेण निषेधो युक्त इति वाच्यम्। प्रत्यक्षस्य श्रुत्यविरोधाय सत्यत्वाभासरूपव्यावहारिकसत्यत्वविषयत्वोपपत्तेः। न चैवंसति पारमार्थिकसत्यत्वस्य ब्रह्मगतस्य प्रपञ्चे प्रसक्त्यभावात् तेन रूपेण प्रपञ्चनिषेधानुपपत्तिः। यथा शुक्तौ रजताभासप्रतीतिरेव [1]सत्यरजतप्रसक्तिरिति तन्निषेधः, अत एव 'नेदं रजतं किं तु तत्' 'नेयं मदीया गौः किं तु सैव' 'नात्र वर्तमानश्चैत्रः किं त्वपवरके' इति निषिध्यमानस्यान्यत्र सत्त्वमवगम्यते; एवं सत्यत्वाभासप्रतीतिरेव सत्यत्वप्रसक्तिरिति तन्निषेधोपपत्तेः। अतो वर्णपद-योग्यतादिस्वरूपोपमर्दशङ्काभावान्नोपजीव्यविरोध इत्याहुः।

अन्ये तु-ब्रह्मणि पारमार्थिकसत्यत्वं, प्रपञ्चे व्यावहारिकसत्यत्वं सत्यत्वाभासरूपं, शुक्तिरज तादौ प्रातिभासिकसत्यत्वं ततोऽपि निकृष्टं, इति सत्तात्रैविध्यं नोपेयते। अधिष्ठानब्रह्मगतपारमार्थिक-

---

इति चेत्, उच्यते—प्रपञ्चे धर्मिणि सत्यत्वनिषेधे श्रुतेस्तात्पर्यमिति एतन्मताभिप्रायः, न तु यथाश्रुतार्थे तात्पर्यमस्य मतस्य। अत एव वक्ष्यति—सत्यत्वाभासप्रतीतिरेव सत्यत्वप्रसक्तिरिति तन्निषेधोपपत्तेः - इति। अत्र हि वाक्ये प्रपञ्च एव सत्यत्वनिषेधः स्पष्टं प्रतीयते। अतो नास्मिन्मते प्रतियोगितदभावयोरेकाधिकरणत्वशङ्का-वकाशः। ननु ब्रह्मणि प्रपञ्चस्वरूपं यथा प्रत्यक्षादिसिद्धमस्ति, तथा प्रपञ्चे सत्यत्वमपि प्रत्यक्षादिसिद्धमस्त्येवेति तन्निषेधेऽपि श्रुतेस्तात्पर्यं कल्पयितुं न शक्यमिति शङ्कते—**न चेति**। प्रत्यक्षादिग्राह्यं प्रपञ्चसत्यत्वं ब्रह्मसत्यत्व-वत् परमार्थं न भवति। तथासति उपक्रमाद्यवगतस्वार्थतात्पर्यवतीनां भूयसीनां निषेधश्रुतीनां निर्विषयत्वप्रसङ्गात्। किं तु व्यावहारिकसत्यत्वादिरूपं तत् कल्प्यते। ततो न सत्यत्वनिषेधानुपपत्तिः-इति परिहरति—**प्रत्यक्षस्येति। न चैवंसतीति**। प्रपञ्चसत्यत्वस्य व्यावहारिकत्वाङ्गीकार इत्यर्थः। दृष्टान्तपूर्वकं प्रसक्तिमाह—**यथा शुक्ताविति**। नेदं रजतमिति निषेधप्रत्यक्षस्य सत्यरजतनिषेधविषयकत्वं वक्तव्यम्। प्रातिभासिकरजताधि-करणे शुक्तिशकले कल्पितरजताभावस्य अस्मिन्मतेऽनङ्गीकारेण[2] बाधप्रत्यक्षस्य तद्विषयत्वायोगादिति भावः। शुक्त्यादौ निषिध्यमानस्य देशान्तरस्थत्वे नियामकमाह—**अत एवेति**।

प्रपञ्चे पारमार्थिकसत्यत्वस्य प्रसक्त्यभावान्निषेधानुपपत्तिरिति शङ्कायां सत्त्वत्रैविध्यमतमालम्ब्य परिहारो दर्शितः। इदानीं सर्वत्र सत्तैक्यपक्षे प्रसक्त्यभावशङ्कां परिहरति—**अन्ये त्विति**। प्रथमं सत्तात्रैविध्यपक्षं दूषयति—**ब्रह्मणीत्यादिना। ब्रह्मगतेति**। पारमार्थिकसत्तायाः ब्रह्मस्वरूपत्वेऽपि भेदकल्पनया तद्गतत्वोक्तिः।

---

1. सत्यरजतप्रसक्तिरिति। सद्रजतमिदं इत्येवंरूपेण रजताभासस्य प्रतीयमानत्वात् रजताभासप्रतीतेः सत्यरज-तप्रसक्तित्वं इति भावः

2. अनङ्गीकारेणेति। प्रतिभासकाले शुक्तिशकले विद्यमानस्य कल्पितरजतस्य त्रैकालिकाभावप्रतीतिविषयत्वायोगः, अत एव 'लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वात् रजते त्रैकाल्याभावज्ञानस्य' इति विवरणग्रन्थोऽपि सङ्गच्छते इति भावः।

सत्तानुवेधादेव घटादौ शुक्तिरजतादौ च सत्त्वाभिमानोपपत्त्या सत्यत्वाभासकल्पनस्य निष्प्रमाणकत्वात्। एवं च प्रपञ्चे सत्यत्वप्रतीत्यभावात् तत्तादात्म्यापन्ने ब्रह्मणि तत्प्रतीतेरेव अविवेकेन प्रपञ्चे तत्प्रसक्तित्वोपपत्तेश्च सत्यत्वेन प्रपञ्चनिषेधे नोपजीव्यविरोधः, न वा अप्रसक्तनिषेधनम्। न च ब्रह्मगतपारमार्थिकसत्तातिरेकेण प्रपञ्चे सत्त्वाभासानुपगमे व्यवहितसत्यरजतातिरेकेण शुक्तौ रजताभासोत्पत्तिः किमर्थमुपेयत इति वाच्यम्। व्यवहितस्यासन्निकृष्टस्यापरोक्ष्यासम्भवात् तन्निर्वाहाय तदुपगमात् इत्याहुः।

प्रतिबिम्बस्य बिम्बभेदाभेदाभ्यां मिथ्यात्वसत्यत्वविचारः

नन्वेवं प्रतिबिम्बभ्रमस्थलेऽपि ग्रीवास्थमुखातिरेकेण दर्पणे मुखाभासोत्पत्तिः उपेया स्यात्। स्वकीये ग्रीवास्थमुखे नासाद्यवच्छिन्नप्रदेशापरोक्ष्यसम्भवेऽपि नयनगोलकललाटादिप्रदेशापरोक्ष्यायोगात्, प्रतिबिम्बभ्रमे नयनगोलकादिप्रदेशापरोक्ष्यदर्शनाच्च। न च बिम्बातिरिक्तप्रतिबिम्बाभ्युपगमे इष्टापत्तिः। ब्रह्मप्रतिबिम्बजीवस्यापि ततो भेदेन [1]मिथ्यात्वापत्तेः।

अनुवेधादेवेति। प्रतीतेरेवेत्यर्थः। **एवं चेति।** 'सन् घटः' इत्यादिप्रतीतेः घटादितादात्म्यापन्ने सन्निति प्रतीयमाने सद्रूपत्वंशरूपे ब्रह्मण्येव सत्ताविषयकत्वं, 'मृद्घटः' इति प्रतीतेरिव मृदंशे मृत्त्वविषयकत्वं, ब्रह्मणि सत्ताप्रतीतिवशादेव घटादौ सत्त्वव्यवहारः, इति स्थिते सतीत्यर्थः। यत्तु भेदवादिभिरुच्यते—प्रपञ्चे श्रुत्या सत्यत्वनिषेधो न सम्भवति, प्रपञ्चे सत्यत्वगोचरप्रत्यक्षप्रतीतिविरोधादिति तन्न-हेत्वसिद्धेरित्याह—**प्रपञ्च इति।** यच्चोक्तं तर्ह्यप्रसक्तप्रतिषेध इति, तत्राह—**तत्तादात्म्येति।** तत्पदं घटादिपरम्। प्रपञ्चब्रह्मणोर्भेदाग्रहेण ब्रह्मणि या सत्ताप्रतीतिः, सैव प्रपञ्चे सत्त्वप्रसक्तिर्भवति, तन्मूलश्च तत्र सत्त्वव्यवहार इत्यर्थः। **नोपजीव्यविरोध इति।** श्रौतमिथ्यात्वबोधं प्रत्युपजीव्यस्य वर्णपदादिप्रत्यक्षस्य सालम्बनत्वाभ्युपगमात् तदबाधाच्च इति भावः। ननु यदि घटादिप्रपञ्चे ब्रह्मसत्तयैव सत्त्वव्यवहारसिद्धौ पृथक्सत्त्वं न कल्प्यते, तत्कल्पने मानाभावाल्लाघवाच्च, तर्ह्यतिप्रसङ्ग इति शङ्कते—**न चेति। किमर्थमिति।** तत्कल्पने गौरवात्। तथाच अनिर्वचनीयरजताद्यसिद्धिरिति शङ्काभिप्रायः। गौरवं प्रामाणिकत्वात् न दोषाय इत्याशयेन परिहरति—**व्यवहितस्येति। असन्निकृष्टस्येति।** अभिव्यक्तचैतन्यतादात्म्यशून्यस्येति यावत्।

नन्वेवमिति। आपरोक्ष्याय रजताभासोत्पत्त्युपगमे इत्यर्थः। प्रतिबिम्बस्य बिम्बाभिन्नत्वेऽपि प्रतिबिम्बापरोक्ष्यं सम्भवतीति न सा स्वीकार्येत्यत आह—**स्वकीय इति। मुख इति।** प्रतिबिम्बत्वेनोपेत इति शेषः। **नासादीति।** तदंशे सन्निकर्षसम्भवादित्यर्थः। यदि बिम्बप्रतिबिम्बयोरभेदे प्रतिबिम्बापरोक्ष्यं स्वमुखप्रतिबिम्बस्थले न सम्भवति, तर्हि प्रतिबिम्बो बिम्बात् भिन्नो मिथ्याभूत एवास्तु का हानिरद्वैतवादिनः—इति शङ्कते—**न चेति।** तस्य हानिं पूर्ववादी दर्शयति—**ब्रह्मप्रतिबिम्बेति।** जीवो ब्रह्मणस्सकाशात्

---

1. मिथ्यात्वापत्तेरिति। ततश्च जीवस्य ब्रह्मभावापत्तिरूपमुक्तिभाक्त्वानुपपत्तिरित्यर्थः।

अत्र विवरणानुसारिणः प्राहुः—ग्रीवास्थ एव मुखे दर्पणोपाधिसन्निधानदोषात् दर्पणस्थत्वप्रत्यङ्मुखत्वबिम्बभेदानामध्याससम्भवेन न दर्पणे मुखस्याप्यध्यासः कल्पनीयः। गौरवात्। 'दर्पणे मुखं नास्ति' इति संसर्गमात्रबाधात्। मिथ्यावस्त्वन्तरत्वे 'नेदं मुखं' इति स्वरूपबाधापत्तेः 'दर्पणे मम मुखं भाति' इति स्वमुखाभेदप्रत्यभिज्ञानाच्च। न च ग्रीवास्थमुखस्याधिष्ठानस्यापरोक्ष्यासम्भवः। उपाधिप्रतिहतनयनरश्मीनां परावृत्य बिम्बग्राहित्वनियमा-

---

स्वरूपतो भिद्यते, ब्रह्मप्रतिबिम्बत्वात्, सामान्यव्याप्तौ मुखप्रतिबिम्बवत्। ततश्च जीवो मिथ्या, ब्रह्मभिन्नत्वात्, घटादिवदित्यर्थः।

बिम्बप्रतिबिम्बयोःलोके भेदाभावात् नोक्तदोष इति परिहरति—**अत्र विवरणेति**। ननु—दर्पणे मुखस्याप्यध्यासो न कल्पनीयो गौरवादित्ययुक्तम्, प्रतिबिम्बमुखे 'दर्पणे मुखं' इति दर्पणस्थत्वानुभावात्, ग्रीवास्थमुखस्य दपणस्थत्वायोगात्, तथा प्रतिबिम्बमुखस्य ग्रीवास्थमुखं प्रत्याभिमुख्यानुभवात्, मुखप्रतिमुखयोरभेदपक्षे तस्येव तदाभिमुख्यायोगात्, तयोर्भेदस्यैव स्फुटमनुभवाच्च। तस्मादनुभवत्रयानुरोधेनोपाधावनिर्वचनीयप्रतिबिम्बाध्यास उपेयः, गौरवं च प्रामाणिकत्वान्न दोषावहं - इत्याशङ्क्य तदनुभवत्रयस्यान्यथासिद्धिमाह—**ग्रीवास्थ एवेति**। धर्मिकल्पनापेक्षया बहुधर्मकल्पनमपि लघ्वेवेति भावः। ननु प्रतिबिम्बस्य बाधदर्शनात् मिथ्यात्वमित्याशङ्क्य हेत्वसिद्धिमाह—**दर्पण इति**। मात्रपदं प्रतिबिम्बस्वरूपबाधाभावार्थकम्। बाधादित्यनन्तरं दर्पणस्थत्वरूपसंसर्गस्य मिथ्यात्वं प्रतिबिम्बस्य सत्त्वञ्चेति शेषः। विपक्षे दोषमाह—**मिथ्यावस्त्वन्तरत्व इति**। नन्वेवं भूतले घटो नास्तीत्यत्रापि घटसंसर्गाभाव एव प्रतीयेतेति चेत्, न - इष्टापत्तेः। ननु तर्हि भूतले घटाभावो न सिद्ध्येदिति चेत्, न- 'घटाभाववत् भूतलं' इति प्रतीत्या तत्सम्भवादिति भावः। बिम्बप्रतिबिम्बयोर्भेदमात्रकल्पनायां स्वरूपाभेदप्रत्यभिज्ञानमप्यनुकूलयति—**दर्पणे ममेति**। लाघवसमुच्चयार्थश्चकारः। यद्वा प्रतिबिम्बस्य सत्यत्वे बिम्बाभिन्नत्वं हेतुमभिप्रेत्य तत्र मानमाह—**दर्पणे ममेति**। चकारो बाधाभावसमुच्चयार्थः। तथा च प्रतिबिम्बस्य न मिथ्यात्वं बाधाभावात् बिम्बाभिन्नत्वाच्चेत्यर्थः। एवं लोके प्रतिबिम्बस्य बिम्बाभिन्नत्वसत्यत्वयोः प्रसाधनेन ब्रह्मप्रतिबिम्बजीवस्य ब्रह्मभिन्नत्वमिथ्यात्वप्रसङ्गो निरस्तः। यत्तु तयोरभेदपक्षे ग्रीवास्थमुखस्य नयनगोलकादिप्रदेशेषु स्वचक्षुस्सन्निकर्षाभावेन प्रतिबिम्बस्य साकल्येन प्रत्यक्षत्वं न सम्भवतीत्युक्तं, तदनूद्य निराकरोति—**न चेत्यादिना**। **अधिष्ठानस्येति**। [बिम्बत्वप्रतिबिम्बत्व] प्रत्यङ्मुखत्वदर्पणस्थत्वबिम्बभेदानां कल्पनाधिष्ठानस्येत्यर्थः। असम्भवो न चेत्यत्र हेतुमाह—**उपाधिप्रतिहतेति**। नयनरश्मयः चक्षुर्गोलकात् बहिर्निर्गत्य दर्पणाद्युपाधिं प्राप्य तेन प्रतिहताः पुनः परावृत्य ग्रीवास्थमुखतदवयवैःसंसृज्यन्ते। ततश्च अभिमुखपुरुषान्तरमुखसाक्षात्कारवत् साकल्येन स्वग्रीवास्थमुखसाक्षात्कारः सम्भवति। न च परावृत्तनयनरश्मीनां गोलकद्वारा [1]अन्तःप्रवेशस्यैवान्यत्र क्लृप्तत्वादत्र तथाकल्पनं गौरवग्रस्तमिति वाच्यम्। प्रतिबिम्बोत्पत्तिवादिनापि चक्षुस्सन्निकृष्टस्यैव बिम्बतायाः वक्तव्यत्वेन उक्तनियमस्य तेनापि स्वीकार्यत्वात्। अतस्सम्प्रतिपन्नत्वात् गौरवं न दोषायेति भावः। ननु - प्रतिबिम्बाध्यास-

---

1. अन्तःप्रवेशस्य - शरीरान्तःप्रवेशस्य

भ्युपगमात्*। तन्नियमानभ्युपगमे परमाणोः कुडयादिव्यवहितस्थूलस्यापि चाक्षुषप्रतिबिम्बभ्रमप्रसङ्गात्। न चाव्यवहितस्थूलोद्भूतरूपवत एव चाक्षुषप्रतिबिम्बभ्रमः नान्यस्येति नियम इति वाच्यम्। बिम्बस्थौल्योद्भूतरूपयोः क्लृप्तेन चाक्षुषज्ञानजननेन उपयोगसम्भवे विधान्तरेणोपयोगकल्पनानुपपत्तेः। कुडयादिव्यवधानस्य प्रतिहतनयनरश्मिसम्बन्धविघटनं विनैव इह प्रतिबन्धकत्वे तथैव घटप्रत्यक्षादिस्थलेऽपि तस्य प्रतिबन्धकत्वसम्भवेन चक्षुःसन्निकर्षमात्रस्य कारणत्वविलोपप्रसङ्गाच्च, दर्पणे मिथ्यामुखाध्यासवादिनापि कारणत्रयान्तर्गतसंस्कारसिद्ध्यर्थं नयन-

---

वादिना सन्निकृष्टस्यैव बिम्बत्वं नाङ्गीक्रियते, अतो ग्रीवास्थमुखस्य बिम्बत्वनिर्वाहाय स्वचक्षुस्सन्निकर्षापेक्षाभावात् नायं नियमस्तेनादर्तव्य इति, अत आह—**तन्नियमानभ्युपगम इति**। बिम्बसन्निकर्षस्य चाक्षुषप्रतिबिम्बाध्यासाहेतुत्वे व्यवहितस्यापि चाक्षुषप्रतिबिम्बप्रसङ्गः, किमनेन विशेषणेन, यस्य कस्यापि प्रतिबिम्बापत्त्या परमाणोर्वाय्वोश्च तत्प्रसङ्गादित्यर्थः। प्रतिबिम्बाध्यासे बिम्बसन्निकर्षस्य हेतुत्वं विनैव उक्तातिप्रसङ्गं परिहरति प्रतिबिम्बाध्यासवादी—**न चाव्यवहितेति**। तथा च कुड्यादिव्यवहितमुखादेः परमाणोर्वाय्वोश्च न चाक्षुषप्रतिबिम्बापत्तिरिति भावः। द्रव्यचाक्षुषं प्रति द्रव्यगतमहत्त्वोद्भूतरूपयोः कारणत्वं क्लृप्तम्। तथा कुड्यादेस्सन्निकर्षविघटनद्वारा बाह्यवस्तुगोचरप्रत्यक्षप्रतिबन्धकत्वं क्लृप्तम्। तथा च बिम्बप्रतिबिम्बयोरभेदपक्षे बिम्बचाक्षुषस्यैव प्रतिबिम्बचाक्षुषत्वात् बिम्बभूतमुखादिगतयोः स्थूलत्वोद्भूतरूपयोः क्लृप्तचाक्षुषप्रत्यक्षादन्यत्र कारणत्वं न कल्पनीयमिति लाघवम्। शुक्तिरजतादिवत् साक्षिभास्यप्रतिबिम्बाध्यासोत्पत्तिपक्षे तु बिम्बसन्निकर्षस्य प्रतिबिम्बाध्यासहेतुत्वानुपगमेन वायुपरमाण्वोश्चाक्षुषप्रतिबिम्बवारणाय बिम्बभूतद्रव्यगतयोर्महत्त्वोद्भूतरूपयोः स्वाश्रयगोचरचाक्षुष इव स्वाश्रयद्रव्यरूपबिम्बहेतुकप्रतिबिम्बाध्यासोत्पत्तावपि हेतुत्वं कल्पनीयमिति गौरवम्। तथा बिम्बप्रतिबिम्बाभेदपक्षे नयनरश्मीनां परावृत्य बिम्बसम्बन्धाभ्युपगमेन प्रतिबिम्बभ्रमस्थलेऽपि बिम्बसन्निकर्षस्य हेतुत्वसत्त्वात् घटादिचाक्षुष इव प्रतिबिम्बचाक्षुषेऽपि कुड्यादेस्सन्निकर्षविघटनद्वारैव प्रतिबन्धकत्वं न त्वन्यत्राक्लृप्तं साक्षात्प्रतिबन्धकत्वं कल्प्यमिति लाघवम्। प्रतिबिम्बाध्यासपक्षे तु बिम्बसन्निकर्षस्य हेतुत्वानभ्युपगमेन कुड्यादेस्सन्निकर्षविघटकत्वस्य क्लृप्तस्य प्रतिबिम्बभ्रमस्थले वक्तुमशक्यतया प्रतिबिम्बाध्यासं प्रति साक्षादेव प्रतिबन्धकत्वं व्यवहितस्य प्रतिबिम्बवारणाय कल्पनीयमिति गौरवंइत्याशयेन दूषयति—**बिम्बस्थौल्येति। विधान्तरेणेति**। स्वाश्रयभूतबिम्बद्वारा प्रतिबिम्बाध्यासोत्पत्तावुपयोगकल्पनानुपपत्तेरित्यर्थः। **इहेति**। प्रतिबिम्बभ्रमस्थल इत्यर्थः। न केवलं अक्लृप्तकल्पनागौरवं दोषः, दोषान्तरमपि प्रसज्यत इत्याह—**तथैवेति**। सन्निकर्षविघटनं विनैवेत्यर्थः। तथा च उक्तगौरवादिदोषपरिहाराय परावृत्त्येतिनियम उपेयो बिम्बसन्निकर्षाय इति भावः। चाक्षुषप्रतिबिम्बभ्रमस्थले बिम्बसन्निकर्षस्य त्वयापि

---

* लतादिवत् इत्युत्तरदेशपाठः। लता यथा उपरिष्टाद्गच्छन्ती प्रतिघाते सति अधः परावर्तते, तद्वदित्यर्थः।

रश्मीनां कदाचित् परावृत्त्य स्वमुखग्राहकत्वकल्पनयैव पूर्वानुभवस्य समर्थनीयत्वाच्च। न च नासादिप्रदेशावच्छिन्नपूर्वानुभवादेव संस्कारोपपत्तिः। तावता नयनगोलकादिप्रतिबिम्बाध्यासानुपपत्तेः, तटाकसलिले तटविटपिसमारूढादृष्टचरपुरुषप्रतिबिम्बाध्यासस्थले कथमपि पूर्वानुभवस्य दुर्वचत्वाच्च। [1]एवं च उपाधिप्रतिहतनयनरश्मीनां बिम्बं प्राप्य तद्ग्राहकत्वेऽवश्यं वक्तव्ये फलबलात् - दर्पणाद्यभिहतानामेव बिम्बं प्राप्य तद्ग्राहकत्वं, न शिलादिप्रतिहतानाम्, अनतिस्वच्छताम्रादिप्रतिहतानां मलिनोपाधिसम्बन्धदोषात् मुखादिसंस्थानविशेषाग्राहकत्वं, साक्षात्सूर्यं प्रेप्सूनामिव उपाधिं प्राप्य निवृत्तानां न तथा सौरतेजसा प्रतिहतिरिति न प्रतिबिम्बसूर्यावलोकने साक्षात्तदवलोकन इव अशक्यत्वम्, जलाद्युपाधिसन्निकर्षे केषांचित् उपाधिप्रतिहतानां बिम्बप्राप्तावपि केषांचित् तदन्तर्गमनेनान्तरसिकतादिग्रहणं-इत्यादिकल्पनान्न कश्चिद्दोष इति।

अद्वैतविद्याकृतस्तु प्रतिबिम्बस्य मिथ्यात्वमभ्युपगच्छतां त्रिविधजीववादिनां विद्यारण्य-

---

वाच्यत्वात् परावृत्त्येतिनियमो नाप्रयोजक इत्याह—**दर्पणेमिथ्येति**। **कारणत्रयेति**। दोषसम्प्रयोगसंस्कार-रूपकारणत्रयेत्यर्थः। स्वमुखस्य स्वचक्षुस्सन्निकर्षानुपगमे दर्पणादावारोप्यप्रतिमुखसजातीयस्वमुखसाक्षात्कारस्य कदाप्यसम्भवेन अध्यासकारणभूतस्यारोप्यसजातीयगोचरपूर्वानुभवजन्यसंस्कारस्यालाभात् प्रतिबिम्बरूपाध्यासस्योत्पत्तिर्न स्यात्। अतः स्वमुखस्य स्वचक्षुस्सन्निकर्षलाभाय उक्तनियम आदर्तव्य इति भावः। **तावतेति**। नासादिप्रदेशावच्छिन्नपूर्वानुभवमात्रेणेत्यर्थः। इदमपि क्वचिद्दुर्लभमित्याह—**तटाकेति**। **अदृष्टचरेति**। कदाप्यदृष्टेत्यर्थः। **एवं चेति**। उक्तप्रकारेणेत्यर्थः। उक्तनियमस्यातिप्रसङ्गं परिहरति—**फलबलादिति**। दर्पणादौ प्रतिबिम्बभ्रमदर्शनलक्षणफलानुरोधादित्यर्थः। एवकारव्यवच्छेद्यमाह—**न शिलादीति**। शिलादौ प्रतिबिम्बादर्शनादिति भावः। ननु अस्वच्छताम्रादेः प्रतिबिम्बग्राहित्वेन शिलादिवैलक्षण्यसत्त्वात्तत्प्रतिहतानां दर्पणादिप्रतिहतानामिव नयनरश्मीनां साकल्येन मुखादिग्राहकत्वं स्यात्, अत आह—**मलिनोपाधीति**। संस्थानविशेषो नयनगोलकादिः। फलबलानुसारिपदार्थस्वभावकल्पनेन दोषान्तराण्यपि निरस्तानीत्याह—**साक्षादित्यादिना**। **साक्षात्तदिति**। साक्षात्सूर्यावलोकन इत्यर्थः। ननु प्रतिबिम्बोपाधिभूतजलेन प्रतिहतानां नयनरश्मीनां बिम्बदेशप्राप्त्युपगमे जलान्तर्गतसिकतादिप्रत्यक्षं न स्यात्, सन्निकर्षाभावात्—इति दूषणमपि निरस्तमित्याह—**जलाद्युपाधीति**। ननु उपाधिप्रतिहतानां बिम्बदेशप्राप्त्युपगमे पृष्ठभागव्यवहितपदार्थस्यापि प्रतिबिम्बप्रसङ्ग इति चेत्, नायं दोषः—फलबलेन शरीरावयवानां सन्निकर्षविघटकत्वकल्पनात्, इत्यभिप्रेत्याह—**इत्यादिकल्पनादिति**। नयनरश्मीनां परावृत्य बिम्बग्राहित्वं सुरेश्वराचार्यैरुक्तं—'दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम्। व्याप्नुवन्त्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम्॥' [१-४-६१८] इति।

बिम्बप्रतिबिम्बयोर्भेदपक्षनिराकरणपूर्वकं तदभेदपक्षो निरूपितः। इदानीं तयोरभेदपक्षनिराकरणपूर्वकं भेदपक्षं निरूपयति—**अद्वैतविद्याकृतस्त्विति**। **त्रिविधेति**। पारमार्थिकव्यावहारिकप्रातिभासिकभेदेन

---

1. अस्मिन् पक्षे द्वैतिभिरुद्भावितान् दोषान् अनूद्य परिहरति-एवञ्चेत्यादिना।

गुरुप्रभृतीनामभिप्रायमेवमाहुः—चैत्रमुखात् भेदेन तत्सदृशत्वेन च पार्श्वस्थैः स्पष्टं निरीक्ष्यमाणं दर्पणे तत्प्रतिबिम्बं ततो भिन्नं स्वरूपतो मिथ्यैव, स्वकरगतादिव रजतात् शुक्तिरजतम्। न च 'दर्पणे मम मुखं भाति' इति बिम्बाभेदज्ञानविरोधः। स्पष्टभेदद्वित्वप्रत्यङ्मुखत्वादिज्ञानविरोधेन अभेदज्ञानासम्भवात्, 'दर्पणे मम मुखं' इति व्यपदेशस्य स्वच्छायामुखे स्वमुखव्यपदेशवत् गौणत्वाच्च। न च अभेदज्ञानविरोधात् भेदव्यपदेश एव गौणः किं न स्यादिति शङ्क्यम्। बालानां प्रतिबिम्बे पुरुषान्तरभ्रमस्य हानोपादित्साद्यर्थक्रियापर्यन्तस्य अपलपितुमशक्यत्वात्। न च प्रेक्षावतामपि स्वमुखविशेषपरिज्ञानाय दर्पणाद्युपादानदर्शनात् अभेदज्ञानमप्यर्थक्रियापर्यन्त-

---

जीवस्त्रिविध इति पक्षः प्रथमपरिच्छेदे निरूपित इति बोध्यम्। **एवमिति**। वक्ष्यमाणप्रकारेणेत्यर्थः। **चैत्रेति**। चैत्रो यदा दर्पणे स्वमुखं पश्यति, तदा पार्श्वस्थैश्चैत्रग्रीवायां बिम्बभूतं मुखं दर्पणे चैत्रमुखप्रतिबिम्बं च परस्परं भिन्नत्वेन परस्परं सदृशत्वेन च असन्दिग्धाविपर्यस्तमनुभूयते इत्यर्थः। **स्वेति**। स्वहस्तगतात् सत्यरजतात् भिन्नत्वेन तत्सदृशत्वेन च अनुभूयमानं शुक्तिरजतं यथा तद्भिन्नं मिथ्या च तद्वदित्यर्थः। अभेदज्ञानमसिद्ध-मित्याह—**स्पष्टेति**। उदाहृतरजतयोरभेदज्ञानादर्शनादिति भावः। आदिपदं प्राङ्मुखत्वग्रीवास्थत्वदर्पणस्थ-त्वस्वातन्त्र्यपारतन्त्र्यादिसङ्ग्रहार्थम्। तर्हि सर्वानुभवसिद्धस्याभेदव्यपदेशस्य का गतिः, ज्ञानपूर्वकत्वाद्व्यपदेशस्य-इत्याशङ्क्य [1]नायमभेदव्यपदेश इत्याह—**दर्पणे ममेति**। स्फुटभेदज्ञाने सति अभेदव्यपदेशायोगादिति भावः। ननु - 'दर्पणे मम मुखं भाति, मम मुखं मलिनं भाति, मम मुखं दीर्घं भाति, मुखं ग्रीवास्थमेव न दर्पणादौ' इत्यभेदानुभवानामपि स्फुटानां भूयसां सत्त्वात् अभेदव्यपदेशो मुख्यः। अभेदानुभवविरोधेन भेदानुभवस्यैवास-म्भवात् भेदव्यपदेशमात्रमवशिष्यते। तच्च बिम्बप्रतिबिम्बयोर्वस्तुगत्या भेदाभावेऽपि कल्पितभेदसत्त्वादुपपद्यते इति वैपरीत्यमाशङ्क्य निषेधति—**न चेत्यादिना**। प्रतिबिम्बगोचरप्रवृत्त्यादिदर्शनं तस्य बिम्बात् भेदं विना न सिद्ध्यतीति विनिगमकमाह—**बालानामिति**। बालाः खलु जलाशयादौ भयङ्करं प्रतिबिम्बं दृष्ट्वा तं विहाय पलायन्ते, सौम्यं प्रीतिकरं प्रतिबिम्बं दृष्ट्वा तमुपादातुमिच्छन्ति प्रतिबिम्बदेशं गच्छन्ति चेति सर्वानुभवसिद्धम्। तदुक्तं कर्णामृताचार्यैः—'रत्नस्थले जानुचरः कुमारः सङ्क्रान्तमात्मीयमुखारविन्दम्। आदातुकामस्तदलाभखेदाद्विलोक्य धात्रीवदनं रुरोद॥' इति। कुमारः—श्रीकृष्णरूपशिशुः अतिनिर्मलरत्न-मयवेदिकायां जानुभ्यां सञ्चरन् तत्र सङ्क्रान्तं - प्रतिबिम्बितं विविधैः कुण्डलादिभूषणैर्भूषितं निस्सीमसौन्दर्योपेतं गोपीजनमनोहरं ब्रह्मादिभिरपि सदा स्पृहणीयं स्वकीयमुखारविन्दं उपलभ्य लोकसिद्धां बालचेष्टामनुवर्तमानः तदादानेच्छया चिरकालं हस्तव्यापारं कृत्वाऽपि यदा तन्न लब्धवान् तदा तदलाभखेदेन धात्र्या मुखं दृष्ट्वा 'त्वया इदं गृहीत्वा मह्यं देयं' इत्यभिसन्धिमान् मुक्तकण्ठतया रोदनं कृतवानित्यर्थः। अभेदज्ञानस्याप्यर्थक्रियापर्यन्तत्वं समानमित्याशङ्क्य निषेधति—**न चेत्यादिना**। यदि बिम्बप्रतिबिम्बयोर्वस्तुतो भेद एव, तदा परीक्षकाणां

---

1. नायमिति। मुख्य इति शेषः। एवमुत्तरत्रापि।

मिति वाच्यम् । भेदेऽपि प्रतिबिम्बस्य बिम्बसमानाकारत्वनियमविशेषपरिज्ञानादेव तदुपादानोपपत्तेः । यत्तु-नात्रमुखमिति दर्पणे मुखसंसर्गमात्रस्य बाधः, न मुखस्येति तन्न–नेदं रजतमित्यत्रापि

तद्भेदनिर्णय आवश्यक इति तेषां स्वमुखगतविशेषनिर्णयाय दर्पणाद्यादानं न स्यात्, तेषामपि तद्दर्शनात् अभेदनिश्चयस्तेषां वाच्य इत्यर्थः। तेषां प्रवृत्तेरन्यथासिद्धिमाह—**भेदेऽपीति** । बिम्बप्रतिबिम्बयोः स्वरूपतो भेदे सत्यपीत्यर्थः । परीक्षकत्वादेव तेषामुक्तोपपत्तिभिर्भेदनिश्चयवत्त्वं नियमविशेषज्ञानवत्त्वं च सम्भवतीति भावः ।

ननु -बालानां प्रतिबिम्बगोचरहानादिक्रियापि बिम्बस्योपाधिस्थत्वभ्रमादेव सम्भवतीति अन्यथासिद्धिस्तत्रापि तुल्या । तथा च बिम्बप्रतिबिम्बयोर्भेदाभेदानुभवानां भेदाभेदप्रयुक्तार्थक्रियाणां च तुल्यत्वे सति अभेदस्य स्वाभाविकत्वकल्पनमेव युक्तम् । लाघवात्, बिम्बप्रतिबिम्बभावापन्नतयाश्रुतिसिद्धजीवब्रह्माभेदप्रतिपत्त्युपयोगितया लौकिकबिम्बप्रतिबिम्बाभेदकल्पनस्य अभेदश्रुत्युपोद्बलितत्वाच्च, प्रतिबिम्बजीवस्यैव ब्रह्माभेदसम्भवे तदतिरिक्त-[1]पारमार्थिकावच्छिन्नजीवकल्पनायाः गौरवग्रस्तत्वाच्च, 'यथाह्ययं ज्योतिरात्मा विवस्वान्' इत्यादिमन्त्रस्य तयोरभेदपक्ष एव स्वारस्याच्च । तत्र हि–यथा विवस्वदादेः बहुषूपाधिषु प्रतिबिम्बितत्वप्रयुक्तं नानात्वं स्वत एकत्वं, तथा चैतन्यस्य बहुषूपाधिषु प्रतिबिम्बितत्वप्रयुक्तं नानात्वं स्वत एकत्वमिति-प्रतिपाद्यते । तच्च बिम्बप्रतिबिम्बयोर्भेदपक्षे न सम्भवति । तत्पक्षे हि बिम्बचैतन्यस्यैकत्वं प्रतिबिम्बानां नानात्वमिति पर्यवसानेन एकस्यैवौपाधिकनानात्वपर्यवसानासम्भवात् । तस्माच्चैतन्यप्रतिबिम्बाङ्गीकारपक्षे लोके चैत्रप्रतिबिम्बस्थले च बिम्बप्रतिबिम्बयोरभेदपक्ष एव विवरणाद्यभिमतः श्रेयान् इति चेत्, सत्यम् । [2]सूक्ष्मदृष्ट्या एवमेव । अत एव भामतीनिबन्धनादिषु[3] जीवब्रह्मणोरभेदेऽपि लौकिकबिम्बप्रतिबिम्बयोरिव कल्पितभेदसत्त्वाद्धर्मव्यवस्था इति सार्वत्रिको व्यवहारः । श्रीविद्यारण्यगुरुप्रभृतिभिस्तु मन्दाधिकारिणां तत्त्वे बुद्ध्यारोहाय प्रतिबिम्बोत्पत्तिप्रक्रिया उपपादिता । मन्दाधिकारिणां हि, यथा 'कर्तृत्वभोक्तृत्वादिसंसाराश्रयश्चिदाभासो मिथ्याभूतः, स चात्मा न भवति, आत्मा त्वसङ्गचैतन्यरूपो न संसाराश्रयः' इति प्रक्रियया तत्त्वं बुद्धावारोहति, न तथा 'आत्मनो ब्रह्मप्रतिबिम्बस्य स्वतस्सिद्धं ब्रह्मत्वम्, अन्तःकरणतादात्म्यात् संसाराश्रयत्वं' इति प्रक्रियया तत्त्वं बुद्धावारोहति, लोके विरुद्धधर्मासाङ्कर्यस्य धर्मिभेदस्थल इव धर्म्यभेदस्थले स्फुटत्वाभावात् । अयं च तेषामभिप्रायः कूटस्थदीपे 'यया यया भवेत् पुंसां' इति वार्तिकवचनोदाहरणेन स्पष्टः । तच्च वचनं आदावेवोदाहृत्य व्याख्यातमिति संक्षेपः ।

प्रतिबिम्बस्थले दर्पणस्थत्वादिरूपसंसर्गमात्रबाधमुक्तमनूद्य [4]प्रतिबन्द्या प्रतिबिम्बस्वरूपबाधं साधयति—

---

1. पारमार्थिकावच्छिन्नजीवकल्पनाया इति । पारमार्थिकः यः अवच्छिन्नजीवः तत्कल्पनाया इत्यर्थः ।
2. सूक्ष्मदृष्ट्येति । विचार्यमाणे इति शेषः । [परिच्छेदे ।
3. भामतीनिबन्धनादिषु-भामत्यां अंशाधिकरणे, पञ्चपादिकाविवरणे अहङ्कारटीकायां, तत्त्वप्रदीपिकायां चतुर्थ-
4. प्रतिबन्द्येति । समानं विरोध्युत्तरं प्रतिबन्दी । अस्य प्रतिबन्दीतिनामप्रसिद्धिस्तु-जनकस्य राज्ञो बन्दिनं प्रति अष्टावक्रेण एतादृशेनोत्तरेण सिषाधयिषितसाधनात् । स्पष्टमेतत् महाभारते वनपर्वणि ।

इदमर्थे रजततादात्म्यमात्रस्य बाधो न रजतस्येत्यापत्तेः। यदि च इदमंशे रजतस्य तादात्म्येनाध्यासात् नेदं रजतमिति तादात्म्येन रजतस्यैव बाधः न तादात्म्यमात्रस्य, तदा दर्पणे मुखस्य संसर्गितयाऽध्यासात् नात्रमुखमिति संसर्गितया मुखस्यैव बाधः न संसर्गमात्रस्येति तुल्यम्। यत्तु धर्मिणोऽप्यध्यासकल्पने गौरवमिति, तद्रजताभासकल्पनागौरववत् प्रामाणिकत्वान्न दोषः। स्वनेत्रगोलकादिप्रतिबिम्बभ्रमस्थले बिम्बापरोक्ष्यकल्पनोपायाभावात्। नयनरश्मीनामुपाधिप्रतिहतानां बिम्बप्राप्तिकल्पने हि दृष्टविरुद्धं बह्वापद्यते। कथं जलसन्निकर्षे केषुचिन्नयनरश्मिषु अप्रतिहतमन्तर्गच्छत्सु अन्ये जलसम्बन्धेनापि प्रतिहन्यमाना नितान्तमृदवः सकलनयनरश्मिप्रतिघातिनं किरणसमूहं निर्जित्य तन्मध्यगतं सूर्यमण्डलं प्रविशेयुः। कथं च चन्द्रावलोकन इव तत्प्रतिबिम्बावलोकनेऽपि अमृतशीतलतद्बिम्बसन्निकर्षाविशेषे लोचनयोः शैत्याभि-

---

यक्तित्यादिना। आपत्तेरिति। तथा च शुक्तिरजतस्यानिर्वचनीयत्वं सिद्धान्ताभिमतं न स्यादिति भावः। अत्र यद्यपि तादात्म्यमात्रस्य बाध्यत्वेऽपि रजतस्यानिर्वचनीयस्योत्पत्तिरनिवार्या, देशान्तरस्थरजतादेस्संविद्भिन्नत्वाभावेन पुरोवर्त्यभिन्नतयाप्रत्यक्षत्वानुपपत्तिः इत्युक्तत्वात्; तथापि शुक्तिरजतस्य बाधोऽप्युपपादयितुं शक्यत इति मत्वा बिम्बप्रतिबिम्बाभेदवादी शङ्कते—यदि चेति। संसर्गितयेति। आधेयतयेत्यर्थः। प्रामाणिकत्वादिति। बाधकप्रमाणस्य शुक्तिरजत इव प्रतिबिम्बेऽपि सत्त्वेन अध्यासकल्पनागौरवस्य [1]तन्मूलकत्वाविशेषादित्यर्थः। अभेदपक्षे स्वमुखगतनयनगोलकादिप्रतिबिम्बस्यापरोक्ष्यासम्भवाच्च तदध्यासकल्पनागौरवं प्रामाणिकमित्याह—स्वनेत्रेति। पूर्वोक्तोपायमनूद्य निराकरोति—नयनरश्मीनामिति। किरणसमूहमिति। सूर्यकिरणसमूहमित्यर्थः। ननु—अत्र जलस्य प्रतिघातकत्वं न कल्प्यते, किं तु जलान्तर्गतसिकतादीनाम्, अतो न नितान्तमृदुत्वम्। यथा सूर्यादिकिरणानां स्वतस्तृणादिदाहकत्वाभावेऽपि सूर्यकान्तमणिप्रतिहतानां तद्दाहकत्वं, तथा नयनकिरणानां स्वतस्सूर्यकिरणप्रतिघातकत्वाभावेऽपि प्रतिबिम्बोपाधिप्रतिहतानां तद्विजये सामर्थ्यातिशयकल्पना उपपद्यते। तथा च नोक्तदोषः—इत्यस्वरसादाह—कथं चेति। कथं च आप्यायनं न स्यादिति सम्बन्धः। अमृतमिव शीतलं [2]यत् तस्य - चन्द्रप्रतिबिम्बस्य बिम्बं तत्सन्निकर्षाविशेषे इत्यर्थः। आप्यायनम् - औष्ण्यशान्तिः। यदा पुमानधोमुखः सन् जलाशयादौ चन्द्रमण्डलप्रतिबिम्बं नैरन्तर्येण पश्यति तदा [3]लोचनयोश्शैत्याभिव्यक्त्यादिकं[4] स्यात्, बिम्बप्रतिबिम्बयोरभेदेन प्रतिबिम्बसन्निकर्षस्यैव बिम्बसन्निकर्षत्वादित्यर्थः। ननु लोचनयोश्शैत्याभिव्यक्तिश्चन्द्रसन्निकर्षादिकृता न भवति, किं तु तयोश्चन्द्रकिरणसंसर्गसन्ततिकृता, तथा च अधोमुखस्य लोचनयोस्तद-

---

1. तन्मूलकत्वेति। प्रमाणं तच्छब्दार्थः।
2. यदिति। बिम्बं इत्यनेन अन्वेति। 'चन्द्रस्यबिम्बं'—इति पाठे यथाश्रुतमेवान्वेति।
3. लोचनयोरिति। अत्र लोचनशब्देन गोलकं इन्द्रियञ्च एकीकृत्य व्यवहारः।
4. शैत्याभिव्यक्त्यादिकमिति। औष्ण्यशान्तिः आदिशब्दार्थः।

व्यक्त्या आप्यायनं न स्यात्। कथं च जलसम्बन्धेनापि प्रतिहन्यमानाः शिलादिसम्बन्धेन न प्रतिहन्येरन्, तत्प्रतिहत्या परावृत्तौ वा नयनगोलकादिभिर्न संसृज्येरन्, तत्संसर्गे वा संसृष्टं न साक्षात्कारयेयुः। दोषेणापि हि विशेषांशग्रहणमात्रं प्रतिबध्यमानं दृश्यते, न तु सन्निकृष्टधर्मिस्वरूपग्रहणमपि। प्रतिमुखाध्यासपक्षे तु न किञ्चिद्दृष्टविरुद्धं कल्पनीयम्। तथाहि–अव्यवहितस्थूलोद्भूतरूप[1]स्यैव चाक्षुषाध्यासदर्शनात् बिम्बगतस्थौल्योद्भूतरूपयोः स्वाश्रयसाक्षात्कारकारणत्वेन क्लृप्तयोः स्वाश्रयप्रतिबिम्बाध्यासेऽपि कारणत्वं, कुड्याद्यावरणद्रव्यस्य त्वगिन्द्रियन्यायेन प्राप्यकारितयावगतनयनसन्निकर्षविघटनद्वारा व्यवहितवस्तुसाक्षात्कारप्रतिबन्धकत्वेन क्लृप्तस्य व्यवहितप्रतिबिम्बाध्यासेऽपि विनैव द्वारान्तरं प्रतिबन्धकत्वं च कल्पनीयम्। तत्र को विरोधः क्वचित्

भावात् चन्द्रसन्निकर्षतद्दर्शनसत्त्वेऽपि न शैत्याभिव्यक्त्यादिप्रसक्तिः - इत्यस्वरसादाह—**कथं च जलेति**। कथं च न प्रतिहन्येरन्निति सम्बन्धः। प्रतिहन्येरन्नेवेत्यर्थः। ततः किं, तत्राह—**तत्प्रतिहत्येति**। नयनगोलकादिभिः कथं न संसृज्येरन्निति सम्बन्धः। ततोऽपि किं, तत्राह—**तत्संसर्गे वेति**। शिलादिदर्शनकाले शिलादिना प्रतिहता नयनरश्मयः स्वमुखगतनयनगोलकादिभिस्संसृष्टाश्चेत् संसृष्टं नयनगोलकादिकं कथं न साक्षात्कारयेयुः। साक्षात्कारयेयुरेवेत्यर्थः। ननु दोषबलात् संसृष्टमपि न साक्षात्कारयेयुः, अतो नोक्तदोषः, इत्यत आह—**दोषेणापि हीति**। **दृश्यत इति**। शुक्तिरजतादिभ्रमस्थलेष्विति शेषः। तथा च शिलादिसन्निकर्षकाले मुखत्वादिसामान्यरूपेण वा स्वमुखसाक्षात्कारप्रसङ्ग इति भावः। वस्तुतस्तु - अनन्यथासिद्धफलबलात् स्वच्छद्रव्यस्य तत्संसृष्टस्य वा प्रतिबिम्बोदययोग्यस्यैव प्रतिघातकत्वमुपेयते, अतो नोक्तदोष इति बोध्यम्। एवं बिम्बप्रतिबिम्बाभेदपक्षे दृष्टविरोधबाहुल्यं आपाततो दर्शयित्वा प्रतिबिम्बाध्यासोत्पत्तिपक्षमुपपादयति—**प्रतिमुखाध्यासपक्षे त्विति**। कारणत्वं प्रतिबन्धकत्वं च कल्पनीयमिति सम्बन्धः। **स्वाश्रयेति**। महत्त्वोद्भूतरूपाश्रयद्रव्यगोचरचाक्षुषत्वावच्छिन्नं प्रति घटादिचाक्षुषे [2]क्लृप्तयोरित्यर्थः। द्वितीयस्वपदमपि स्थौल्योद्भूतरूपपरम्। **अध्यासेऽपीति**। बिम्बभूतमुखादिचाक्षुष इव स्वाश्रयमुखादेर्यः प्रतिबिम्बरूपोऽध्यासः तदुत्पत्तावपीत्यर्थः। यदुक्तं प्रतिबिम्बाध्यासं प्रति कुड्यादेस्साक्षात्प्रतिबन्धकत्वस्वीकारे अन्यत्रापि तथात्वापत्त्या सन्निकर्षमात्रविलोपप्रसङ्ग इति, तन्न - सन्निकर्षहेतुत्वग्राहकप्रमाणानुरोधेन सन्निकर्षविघटनद्वारैव तस्य प्रत्यक्षप्रतिबन्धकत्वाभ्युपगमात् - इत्याशयेन सन्निकर्षस्य हेतुत्वग्राहकप्रमाणं सूचयति—**त्वगिन्द्रियेति**। त्वगिन्द्रियस्य विषयं प्राप्तस्यैव विषयप्रत्यक्षकारित्वदर्शनात् तद्दृष्टान्तेन नयनादेरपि प्राप्यकारित्वमवगतमित्यर्थः। व्यवहितेति छेदः। **व्यवहितप्रतिबिम्बेति**। कुड्यादिव्यवहितस्य मुखादेः प्रतिबिम्बाध्यासे साक्षात्प्रतिबन्धकत्वं कल्पनीयम्, अन्यथा प्रतिबिम्बोत्पत्तिपक्षे बिम्बसन्निकर्षस्य हेतुत्वानुपगमेन व्यवहितस्यापि प्रतिबिम्बप्रसङ्गस्य प्राग्दर्शितत्वा-

1. उद्भूतरूपेति बहुव्रीहिः।

2. क्लृप्तयोरित्यर्थ इति। घटगतमहत्त्वोद्भूतरूपयोः घटादिचाक्षुषस्य च अन्वयव्यतिरेकाभ्यां कार्यकारणभावग्रहकाले लाघवेन सामान्यतः महत्त्वोद्भूतरूपयोः द्रव्यगोचरसाक्षात्कारत्वावच्छिन्नं प्रति कारणताया निश्चयात् इति भावः।

कारणत्वादिना क्लृप्तस्य फलबलादन्यत्रापि कारणत्वादिकल्पने। एतेन—उपाधिप्रतिहतनयनरश्मीनां बिम्बप्राप्त्यनुपगमे व्यवहितस्योद्भूतरूपादिरहितस्य च चाक्षुषप्रतिबिम्बभ्रमप्रसङ्ग इति—निरस्तम्। किं च तदुपगम एव उक्तदूषणप्रसङ्गः। कथं? साक्षात् सूर्यावलोकन इव विनापि चक्षुर्विक्षेपं अवनतमौलिना निरीक्ष्यमाणे सलिले तत्प्रतिहतानां नयनरश्मीनामूर्ध्वमुत्प्लुत्य बिम्बसूर्यग्राहकत्ववत् तिर्यक्चक्षुर्विक्षेपं विना ऋजुचक्षुषा दर्पणे विलोक्यमाने तत्प्रतिहतानां पार्श्वस्थमुखग्राहकत्ववच्च वदनसाचीकरणाभावेऽप्युपाधिप्रतिहतानां पृष्ठभागव्यवहितग्राहकत्वं तावत् दुर्वारम्। उपाधिप्रतिहतनयनरश्मीनां प्रतिनिवृत्तिनियमं विहाय यत्र बिम्बं तत्रैव गमनोपगमात्। तथा मलिनदर्पणे श्यामतया गौरमुखप्रतिबिम्बस्थले विद्यमानस्यापि बिम्बगतगौररूपस्य चाक्षुषज्ञानेऽनुपयोगितया पीतशङ्खभ्रमन्यायेनारोप्यरूपवैशिष्ट्येनैव बिम्बमुखस्य चाक्षुषत्वं निर्वाह्यमिति तथैव

दित्यर्थः। तत्र कल्पने को विरोध इति सम्बन्धः[1]। तस्मिन् कल्पने इत्यर्थः। अव्यवहितत्वस्थूलत्वोद्भूतरूपाणां मुखादिप्रतिबिम्बाध्यासोपयोगकल्पनस्य प्रयोजनमाह—**एतेनेति**। आदिपदं स्थौल्यसङ्ग्रहार्थम्। **उक्तेति**। व्यवहितादिप्रतिबिम्बप्रसङ्ग इत्यर्थः। प्रसङ्गप्रकारानभिज्ञः पृच्छति—**कथमिति**। तमाह—**साक्षादिति**। गगनस्थसूर्यावलोकने चक्षुर्विक्षेपः क्लृप्तः, तं विनेत्यर्थः। अवनतमौलिना-अधोमुखेन। **तिर्यगिति**। स्वाभिमुखे दर्पणे स्वप्रतिबिम्बग्रहणकाले स्वपार्श्वस्थितपुरुषप्रतिबिम्बग्रहणमप्यस्ति। प्रतिबिम्बाभावकाले स्वपार्श्वस्थितपुरुषग्रहणाय स्वचक्षुषस्तिर्यग्विक्षेपोऽस्ति। ऋजुचक्षुषा स्वाभिमुखपुरुषस्येव स्वपार्श्वस्थितपुरुषस्य ग्रहणादर्शनात्। तथा च स्वाभिमुखे दर्पणे स्वपार्श्वस्थितपुरुषप्रतिबिम्बग्रहणाय चक्षुषस्तिर्यग्विक्षेपं विना दर्पणप्रतिहतानां स्वपार्श्वस्थितपुरुषग्राहकत्ववत् इत्यर्थः। **वदनेति**। वदनसाचीकरणं नाम चक्षुषा स्वपृष्ठभागव्यवहितपदार्थग्रहणानुकूलो वदनव्यापारः। **प्रतिनिवृत्तिनियममिति**। नयनगोलकाभिमुखविषयप्रतिहतानां पुनर्गोलकद्वारा शरीरान्तःप्रवेशनियममित्यर्थः। ननु - प्रतिनिवृत्तिनियमाभावपक्षेऽपि बिम्बसन्निकर्षविघटकव्यवधानाभावापेक्षाऽस्ति। अवनतमौलिनयनरश्मीनां सूर्यप्राप्तिस्थले, ऋजुचक्षुषा दर्पणे विलोक्यमाने दर्पणप्रतिहतानां पार्श्वस्थपुरुषप्राप्तिस्थले च, सन्निकर्षविघटकाभावात् तत्प्राप्तिःसम्भवति। प्रकृते च शरीरतदवयवानां व्यवधायकानां सत्त्वात् दर्पणप्रतिहतानां न पृष्ठभागव्यवहितवस्तुप्राप्तिः-इत्यस्वरसादाह—**तथेति**। उपाधिप्रतिहतनयनरश्मीनां प्रतिनिवृत्तिनियमाभावपक्षे पृष्ठभागव्यवहितस्य प्रतिबिम्बापत्तिवत् नीरूपवाय्वादेरपि चाक्षुषप्रतिबिम्बापत्तिरिति दूषणान्तरसमुच्चयार्थः तथाशब्दः। ननु - नीरूपस्यापि वाय्वादेः दर्पणाद्युपाधिगतरूपोपधानेन चाक्षुषप्रतिबिम्बभ्रमविषयत्वं दुर्वारमित्यनुपपन्नम्, द्रव्यस्य चाक्षुषप्रतिबिम्बभ्रमे बिम्बगतस्य महत्त्ववत् उद्भूतरूपस्यापि कारणत्वात् - इत्याशङ्क्य, द्रव्यगोचरचाक्षुषप्रतिबिम्बभ्रमे बिम्बगतरूपस्यानुपयोगात् नैवमित्याह—**मलिनेति**। मलिनदर्पणे गौरमुखस्य प्रतिबिम्बे सति प्रतिबिम्बं श्यामतया गृह्यते, न गौरतया। तथा च तत्र (गौरमुखे) आरोप्यैणैव

---

1. सम्बन्ध इति। तत्रेतिपदस्य कल्पने इत्यनेन तस्य च को विरोधः इत्यनेन सम्बन्ध इत्यर्थः।

नीरूपस्यापि दर्पणोपाधिश्यामत्ववैशिष्ट्येन चाक्षुषप्रतिबिम्बभ्रमविषयत्वमपि दुर्वारम्। स्वतो नीरूपस्यापि नभसोऽध्यस्तनैल्यवैशिष्ट्येन चाक्षुषत्वसंप्रतिपत्तेः। तस्मात् स्वरूपतः प्रतिमुखाध्यासपक्ष एव श्रेयान्। न च तत्रापि पूर्वानुभवसंस्कारदौर्घट्यम्। पुरुषसामान्यानुभवसंस्कारमात्रेण स्वप्नेष्वदृष्टचरपुरुषाध्यासवत् मुखसामान्यानुभवसंस्कारमात्रेण दर्पणेषु मुखविशेषाध्यासोपपत्तेः। इयांस्तु-भेदः—स्वप्नेषु शुभाशुभहेत्वदृष्टानुरोधेन पुरुषाकृतिविशेषाध्यासः, इह तु बिम्बसन्निधानानुरोधेन मुखाकृतिविशेषाध्यास इति। न च प्रतिबिम्बस्य स्वरूपतो मिथ्यात्वे ब्रह्मप्रतिबिम्बजीवस्यापि मिथ्यात्वापत्तिर्दोषः। प्रतिबिम्बजीवस्य तथात्वेऽपि अवच्छिन्नजीवस्य सत्यतया [1]मुक्तिभाक्त्वोपपत्तेरिति।

श्यामरूपेण उपहितस्य गौरमुखस्य चाक्षुषत्वं निर्वाह्यमित्यर्थः। आरोप्यरूपेणैव क्वचिद्द्रव्यस्य चाक्षुषत्वे दृष्टान्तमाह-**पीतशङ्खेति**। कवितार्किकमतोपपादनावसरे शङ्खस्य आरोप्यपीतरूपविशिष्टतयैव भ्रमस्थले चाक्षुषत्वं नान्यथेत्युक्तमिति भावः। वस्तुतस्तु - द्रव्यचाक्षुषे द्रव्यगतमेवोद्भूतरूपं कारणमिति न नीरूपद्रव्यस्य चाक्षुषप्रतिबिम्बभ्रमविषयत्वं प्रसज्ज्यते। मलिनदर्पणे गौरमुखप्रतिबिम्बभ्रमस्थले पीतशङ्खादिभ्रमस्थले च 'श्यामं मुखं, पीतश्शङ्खः' इत्यादि-भ्रमप्राचीनधर्मिज्ञानेऽध्यासकारणभूते गौरशुक्लादिरूपस्य कारणतया उपयोगाभावासिद्धेः, द्रव्यचाक्षुषे रूपविषयकत्व-नियमाभावस्य कवितार्किकग्रन्थव्याख्यानावसरे दर्शितत्वेन पीतशङ्खभ्रमसम्भवाच्च - इति बोध्यम्[2]।

आरोप्यरूपविशिष्टतयैव चाक्षुषत्वे उदाहरणान्तरमाह—**स्वत इति**। सम्प्रतिपत्तेरित्यापाततः। गगनस्य चाक्षुषवृत्तिविषयत्वं कवितार्किकमात्रसम्मतं, न तु पूर्वाचार्यसम्मतम्। आचार्याणां मते तु गगनव्यापिसौरालोकादि-गोचरचाक्षुषवृत्त्या आलोकाद्यवच्छिन्नचैतन्याभिव्यक्तिकाले आलोकाद्यनुगतगगनावच्छिन्नचैतन्यस्याप्यभिव्यक्तिं[3] स्वीकृत्य अभिव्यक्ते गगनावच्छिन्ने साक्षिणि नैल्याद्यध्यासाभ्युपगमेन नैल्यादिविशिष्टगगनस्य साक्षिमात्रभास्यत्वादिति ध्येयम्। **तस्मादिति**। दृष्टविरोधरूपबाधकाभावात् [4]साधकसत्त्वाच्चेति भावः। **श्रेयानिति**। मन्दाधिकारिणःप्रति इति वस्तुगतिः। उपाधिप्रतिहतानां बिम्बप्राप्त्यनुपगमे अध्यस्यमानमुखसजातीयगोचरपूर्वानुभवासम्भवात् अध्यास-कारणसंस्कारानुपपत्तिः इत्युक्तमनूद्य निराकरोति—**न च तत्रापीति**। प्रतिबिम्बाध्यासपक्षे तत्संस्कारदौर्घट्यमपि न चेत्यर्थः। **अदृष्टचरेति**। कदाप्यननुभूतेत्यर्थः। ननु मुखसामान्यानुभवजन्यसंस्कारस्य प्रतिमुखाध्यासहेतुत्वे चैत्रमुखदर्पणयोः सान्निध्ये सति यस्य कस्यापि मुखस्याध्यासप्रसङ्गः स्वप्नवदेव, न तु नियमेनाभिमुखमुखाध्यासः—इत्याशङ्क्य व्यवस्थामाह—**इयांस्तु भेद इति**। स्वप्नप्रतिबिम्बाध्यासयोरिति शेषः। आदौ त्रिविधजीववादि-नामिति विशेषणेन सूचितं परिहारमाविष्करोति—**प्रतिबिम्बजीवस्येति**। मुक्तिभाक्त्वं-ब्रह्माभेदः।

---

1. मुक्तिभाक्त्वोपपत्तेरिति। न चैवं बन्धमोक्षयोः वैयधिकरण्यं शङ्क्यम्। प्रतिबिम्बजीवाधिष्ठाने अवच्छिन्न-चैतन्ये कल्पितबन्धस्याप्युपगमात् इति भावः। 2. बोध्यमिति। इदमुपलक्षणम्—द्रव्यचाक्षुषे रूपविषयकत्वनियम-सत्वेऽपि नानुपपत्तिः, शुक्लरूपग्रहणेऽपि दोषबलात् शुक्लत्वाग्रहणसंभवस्य तत्रैव दर्शितत्वात् इत्यपि बोध्यम्। 3. अभि-व्यक्तिमिति। अन्याकारवृत्त्याऽपि अन्यावच्छिन्नचैतन्याभिव्यक्तेः वक्ष्यमाणत्वात् इति भावः। 4. साधकसत्वाच्चेति। बिम्बात् भेदेन स्पष्टदर्शनादिरूपस्य साधकस्य सत्वात् इत्यर्थः।

यत्तु प्रतिबिम्बं दर्पणादिषु मुखच्छायाविशेषरूपतया सत्यमेवेति [1]कस्यचिन्मतं-तन्न—छाया हि नाम शरीरादेः शरीरतदवयवैः आलोके कियद्देशव्यापिनि निरुद्धे तत्र देशे लब्धात्मकं तम एव। न च मौक्तिकमाणिक्यादिप्रतिबिम्बस्य तमोविरुद्धसितलोहितादिरूपवतः तमोरूपच्छायात्वं युक्तम्, न वा तमोरूपच्छायारहित[2]तपनादिप्रतिबिम्बस्य तथात्वमुपपन्नम्। ननु-तर्हि प्रतिबिम्बरूपच्छायायाः तमोरूपत्वासम्भवे द्रव्यान्तरत्वमस्तु, क्लृप्तद्रव्यानन्तर्भावे तमोवत् द्रव्यान्तरत्वकल्पनोपपत्तेरिति चेत्, तत् किं द्रव्यान्तरं प्रतीयमानरूपपरिमाणसंस्थानविशेषप्रत्यङ्मुखत्वादिधर्मयुक्तं तद्रहितं वा स्यात्। अन्त्ये न तेन द्रव्यान्तरेण रूपविशेषादिघटितप्रतिबिम्बोपलम्भनिर्वाह इति व्यर्थं तत्कल्पनम्। प्रथमे तु कथं एकस्मिन्नल्पपरिमाणे युगपदसंकीर्णतया प्रतीयमानानां महापरिमाणानामनेकमुखप्रतिबिम्बानां सत्यतानिर्वाहः। कथं च निबिडावयवानुस्यूते दर्पणे तथैवावतिष्ठमाने

प्रतिबिम्बस्य मिथ्यात्वदार्ढ्याय तत्सत्यत्वमतं दूषयितुमनुभाषते—**यत्त्विति**। ननु वृक्षादिच्छायायाः नैल्यदर्शनात् प्रतिबिम्बेषु प्रायेण नैल्यादर्शनेन छायावैलक्षण्यसत्त्वात् प्रतिबिम्बस्य छायारूपत्वमनुपपन्नं—इति शङ्कानिराकरणार्थं विशेषपदम्। तथा च बिम्बभिन्नोऽपि मुखाद्याभासश्शुक्तिरजतादिवत् प्रातिभासिको न भवति, किं तु बिम्बवत् सत्यः, छायाविशेषरूपत्वाभ्युपगमात्तस्य इत्यर्थः। छायाया नीलरूपत्त्वनियमात् तद्विशेषरूपत्वं प्रतिबिम्बस्य न सम्भवतीति छायास्वरूपकथनपूर्वकं दूषयति—**तन्नेति**। शरीरादेश्छाया नाम तम एव, नान्यदिति प्रसिद्धमित्यर्थः। कियद्देशव्यापिन्यालोके शरीरतदवयवैर्निरुद्धे सतीति सम्बन्धः। **न चेति**। मौक्तिकस्फटिकादिप्रतिबिम्बस्य सितरूपवतः तद्विरुद्धतमोरूपच्छायात्वं न युक्तं, तथा माणिक्यकनकादिप्रतिबिम्बस्य लोहितपीतरूपादिमतः तद्विरुद्धतमोरूपच्छायात्वं न युक्तमिति विभज्य योजनीयम्। तपनादेश्छायैव नास्तीति तत्प्रतिबिम्बस्य छायारूपत्वमनुपपन्नमेवेत्यर्थः। **तमोवदिति**। यथा तमसो द्रव्यस्य क्लृप्तद्रव्यानन्तर्भावे [3]सिद्धान्ते दशमद्रव्यत्वं कल्पितं तद्वदित्यर्थः। प्रथमे कथं सत्यतानिर्वाह इति सम्बन्धः। यद्येकमपि दर्पणं विशालं स्यात् तदा अनेकप्रतिबिम्बानामसङ्कीर्णतया तत्रावस्थानं सम्भवेदिति शङ्कावारणायाह—**अल्पेति**। अल्पपरिमाणानामपि दर्पणानामनेकत्वे सति एकैकस्मिन् दर्पणे एकैकं प्रतिबिम्बमसङ्कीर्णतयाऽवतिष्ठेत, तदपि नास्तीत्याह—**एकस्मिन्निति**। एकस्मिन्नल्पपरिमाणेऽपि दर्पणे क्रमेण अनेकप्रतिबिम्बानामसङ्कीर्णता स्यात्, तदपि नास्तीत्याह—**युगपदिति**। प्रतिबिम्बस्य मिथ्यात्वे तु नायं दोषो भवति। स्वप्नदशायां स्वल्पेऽपि शरीरस्यान्तराकाशे रथगजादिपदार्थानां तदुचितवैशाल्यस्य चाध्यासवत् अल्पपरिमाणेऽपि दर्पणे परस्परमसङ्कीर्णतया अनेकप्रतिबिम्बानां तदुचितवैशाल्यस्य चाध्याससम्भवादिति भावः। कथं च द्रव्यान्तरस्योत्पत्तिरिति सम्बन्धः। सत्यस्येति

---

1. कस्यचित्—द्वैतिनः।
2. छायारहितेति तपनविशेषणम्।
3. सिद्धान्ते इति। विवरणादिषु तमसो द्रव्यत्वादेः सिद्धान्तितत्वात् इति भावः।

तदन्तः हनुनासिकाद्यनेकनिम्नोन्नतप्रदेशवतो द्रव्यान्तरस्योत्पत्तिः। किं च सितपीतरक्ताद्यनेकवर्णादिमतः प्रतिबिम्बस्योत्पत्तौ दर्पणमध्ये स्थितं तत्सन्निहितं न तादृशं कारणमस्ति। यद्युच्येत—उपाधिमध्यविश्रान्तियोग्यपरिमाणानामेव प्रतिबिम्बानां महापरिमाणज्ञानं तादृशनिम्नोन्नतादिज्ञानं च भ्रम एव, यथापूर्वं दर्पणतदवयवावस्थानाविरोधेन तादृक्प्रतिबिम्बोत्पादनसमर्थं च किञ्चित् कारणं कल्प्यमिति, तर्हि शुक्तिरजतमपि सत्यमस्तु। तत्रापि शुक्तौ यथापूर्वं स्थितायामेव तत्तादात्म्यापन्नरजतोत्पादनसमर्थं किञ्चित्कारणं परिकल्प्य तस्य रजतस्य दोषत्वाभिमतकारणसहकृतेन्द्रियग्राह्यत्वनियमवर्णनोपपत्तेः किं शुक्तिरजतमसत्यं प्रतिबिम्बः सत्य इत्यर्धजरतीयन्यायेन। न च तथासति रजतमितिदृश्यमानायाः शुक्तेः अग्नौ प्रक्षेपे रजतवत् द्रवीभावापत्तिः। अनलकस्तूरि-

---

शेषः। सामग्र्यभावाच्च न तस्योत्पत्तिः सम्भवतीत्याह—**किं चेति**। दर्पणस्य यो वर्णः स एव प्रतिबिम्बस्यापीति नियमसत्त्वे तद्वर्णयुक्तं किञ्चित्कारणं दर्पणे सम्भाव्येत, न त्वेतदस्ति, दर्पणरूपविलक्षणनानारूपवतां प्रतिबिम्बानामनुभवात्-इत्याह—**अनेकेति**। सितपीतरक्ताद्यनेकवर्णयुक्तानां बिम्बानामेव कारणत्वमस्तु, नेत्याह—**दर्पणमध्ये स्थितमिति**। तेषां निमित्तत्वेऽप्युपादानत्वं न सम्भवति, प्रतिबिम्बोत्पत्तिदेशे तेषामभावादित्यर्थः। **तादृशमिति**। सितपीतरक्ताद्यनेकवर्णयुक्तं कारणं प्रतिबिम्बोदयकाले नियमेन नास्ति, अनुपलम्भादित्यर्थः। प्रतिबिम्बं हि **दर्पण**स्यान्तः दर्पणस्य पृष्ठभागे दर्पणसन्निहितमनुभूयते, न तु दर्पणगतरूपपरिमाणादिवद्दर्पणस्योपरिभागे। ततस्तत्कारणेनापि तत्रैव भवितव्यमिति मत्वा दर्पणमध्ये स्थितं तत्सन्निहितमित्युक्तम्। [1]मध्यशब्दोऽन्तरर्थकः। प्रतिबिम्बस्वरूपमात्रं सत्यं तत्र प्रतीयमानधर्मास्तु कल्पिता एवेति—तत्सत्यत्वेऽभिनिविशमानश्शङ्कते—**यद्युच्येतेति**। वस्तुगत्या उपाधिमध्ये विश्रान्तियोग्यान्येव प्रतिबिम्बान्युत्पद्यन्ते, तेषु महापरिमाणादिकं भ्रान्त्या भासत **इत्यर्थः**। **कल्प्यमिति**। नीवारावयवेषु[2] व्रीह्यवयवा यथा मीमांसकैः कल्प्यन्ते, तद्वत् दर्पणावयवसंसृष्टाः प्रतिबिम्बावयवाः कल्प्या इत्यर्थः। प्रतिबन्दीमाह—**तर्हीति**। पूर्वोक्तदृष्टान्तं मनसि निधाय शुक्तिरजतस्यापि कारणं कल्पयति—**तत्रापीति**। शुक्तिरजतस्थलेऽपीत्यर्थः। ननु-शुक्तिरजतं सत्यमिति स्वीकारे तस्य शुक्तौ सदा सत्त्वात् शुक्तिप्रत्यक्षकाले नियमेन तदपि गृह्येत, न च गृह्यते। अतो न तस्य सत्यत्वं सम्भवति - इत्याशङ्कां परिहरति—**तस्येति**। ततः किं, तत्राह—**किमिति**। **अर्धजरतीयन्यायेनेति**। जरती—वृद्धा, तस्याः अर्धं-मुखमात्रं कामयते नाधःकायं इत्येतद्यथा उपपत्तिशून्यम्, एवमिदमपीत्यर्थः। ननु प्रसिद्धरजतमग्नौ क्षिप्तं द्रवीभवति, शुक्तिरजतं तु न तथेति तस्य मिथ्यात्वमेवेति मत्वा शङ्कते—**न च तथासतीति**। तस्य सत्यत्वे सतीत्यर्थः। प्रतिबन्दीं समर्थयते—**अनलेति**। यद्यप्यत्र[3] इष्टापत्तिरेव, प्रतिबिम्बसत्यत्ववादिमते शुक्तिरजतादेरपि सत्यत्व-

---

1. दर्पणोपरिभागेऽपि मध्यप्रदेशः संभवति, तदुक्तिः न प्रकृतसङ्गता इत्यतो व्याचष्टे—मध्यशब्दोऽन्तरर्थक इति।
2. नीवारावयवेष्विति। संसृष्टा इति शेषः।
3. अत्र—शुक्तिरजतस्यापि सत्यत्वापादने।

कादिप्रतिबिम्बस्यौष्ण्यसौरभ्यादिराहित्यवत् शुक्तिरजतस्य द्रवीभावयोग्यताराहित्योपपत्तेः। अथोच्येत—नेदं रजतं मिथ्यैव रजतमभात् इति सर्वसंप्रतिपन्नबाधात् न शुक्तिरजतं सत्यमिति, तर्हि 'दर्पणे मुखं नास्ति मिथ्यैवात्र दर्पणे मुखमभात्' इत्यादिसर्वसिद्धबाधात् प्रतिबिम्बमप्यसत्यमित्येव युक्तम्। तस्मादसङ्गतः प्रतिबिम्बसत्यत्ववादः॥

ननु तन्मिथ्यात्ववादोऽप्ययुक्तः। शुक्तिरजत इव कस्यचिदन्वयव्यतिरेकशालिनः कारणस्याज्ञानस्य निवर्तकस्य ज्ञानस्य चानिरूपणात्

अत्र केचित्—यद्यपि सर्वात्मनाऽधिष्ठानज्ञानानन्तरमपि जायमाने प्रतिबिम्बाध्यासे नाधिष्ठानावरणमज्ञानमुपादानं न वाऽधिष्ठानविशेषांशज्ञानं निवर्तकं, तथाऽपि अधिष्ठानाज्ञानस्य

सम्भवात्, तथापि प्रतिबन्दीव्याजेन शुक्तिरजतादेरपि मिथ्यात्वनिरूपणे तात्पर्यं बोध्यम्। प्रतिबन्द्याः परिहारं शङ्कते प्रतिबिम्बसत्यत्ववादी—**अथोच्येतेति**। परिहारसाम्यमाह—**तर्हीति**। **मिथ्यैवात्रेति**। बिम्बप्रतिबिम्बाभेदपक्षे प्रतिबिम्बमिथ्यात्वानुभवः प्रतिबिम्बत्वविशिष्टवेषेण प्रतिबिम्बगोचरः न स्वरूपेणेति बोध्यम्[1]। ननु—तर्हि शुक्तिरजतमिथ्यात्वानुभवोऽपि इदमर्थतादात्म्यापन्नतयैव रजतगोचरः न स्वरूपेणेति वक्तुं शक्यतया रजतेदमर्थयोस्तादात्म्यमात्रं कल्पितं रजतं त्वकल्पितमिति प्रसज्येत-इति चेत्, न—रजतस्य शुक्तावनुत्पत्तौ तस्य [2]संविदभिन्नत्वाभावेन प्रत्यक्षत्वानुपपत्तेः तस्य तत्रोत्पत्तिरपरिहार्या, तदुत्पत्तौ च अन्वयव्यतिरेकाभ्यामनिर्वचनीयाज्ञानमेव कारणं नान्यदिति प्राक्प्रतिपादितत्वेन तस्य मिथ्यात्वोपपत्तेः, पूर्वोक्तरीत्या बिम्बप्रतिबिम्बाभेदसाधकप्रमाणसत्त्ववच्छुक्तिरजतसत्यत्वसाधकानन्यथासिद्धप्रमाणाभावेन शुक्तिरजतमिथ्यात्वानुभवस्य रजतस्वरूपगोचरत्वोपपत्तेश्च तस्य मिथ्यात्वमिति भावः। **तस्मादिति**। बिम्बभिन्नस्य सत्यत्वे मानाभावादित्यर्थः।

नन्विति। प्रतिबिम्बाध्यासपक्षे हि तस्योपादानमज्ञानं निवर्तकं ज्ञानञ्च वाच्यम्, तच्च न सम्भवति। सर्वात्मना दर्पणादिरूपाधिष्ठानगोचरसाक्षात्कारेण दर्पणाद्यवच्छिन्नचैतन्यनिष्ठाज्ञानस्य निवृत्तत्वात्, तादृशसाक्षात्कारे सत्येवानुवर्तमानस्य प्रतिबिम्बाध्यासस्य तन्निवर्त्यत्वायोगात्तन्निवर्तकज्ञानान्तरानुपलम्भाच्च। ज्ञानैकनिवर्त्यत्वं विना तस्य मिथ्यात्वानुपपत्तेः। तस्मात् तन्मिथ्यात्ववादोऽप्यसङ्गत इत्याक्षेपाभिप्रायः। यथा शुक्तिरजते शुक्त्यज्ञानस्य तत्कारणस्यान्वयव्यतिरेकसिद्धस्य पूर्वं निरूपणं कृतं, तथा प्रतिबिम्बाध्यासे दर्पणाद्यज्ञाने सति प्रतिबिम्बाध्यासः तदभावे तदभावः इत्यन्वयव्यतिरेकशालिनस्तत्कारणस्याज्ञानस्य कस्यचिदनिरूपणात् तन्निवर्तकज्ञानस्य चानिरूपणादित्यक्षरार्थः।

परिहरति—**अत्रकेचिदिति**। आक्षेपाभिप्रायमनुवदति—**यद्यपीति**। **सर्वात्मनेति**। शुक्तौ रजताध्यासात् पूर्वं इदन्त्वात्मना साक्षात्कारसत्त्वेऽपि शुक्तित्वादिविशेषात्मना साक्षात्कारो नास्तीति तत्र अधिष्ठानविशेषांशावरणमज्ञानमुपादानं लभ्यते। प्रकृते तु चक्षुस्सन्निकृष्टे दर्पणे प्रतिबिम्बाध्यासात् पूर्वं इदन्त्वात्मनेव

---

1. बोध्यमिति। तथा च बाधस्य सर्वसिद्धत्वोक्तिः नानुपपन्ना इति भावः।
2. संविदिति। अभिव्यक्तचैतन्येत्यर्थः।

आवरणशक्त्यंशेन निवृत्तावपि विक्षेपशक्त्यंशेनानुवृत्तिसम्भवात् तदेवोपादानम्। बिम्बोपाधिसन्निधिनिवृत्तिसचिवं चाधिष्ठानज्ञानं सोपादानस्य तस्य निवर्तकं इति।

अन्ये तु—**ज्ञानस्य विक्षेपशक्त्यंशं विहाय आवरणशक्त्यंशमात्रनिवर्तकत्वं न स्वाभाविकम्। ब्रह्मज्ञानेन मूलाज्ञानस्य शुक्त्यादिज्ञानेनावस्थाज्ञानस्य च आवरणशक्त्यंशमात्रनिवृत्तौ तस्य विक्षेपशक्त्या सर्वदा अनुवृत्तिप्रसङ्गात्। न च बिम्बोपाधिसन्निधिरूप[1]विक्षेपशक्त्यंशनिवृत्तिप्रतिबन्धकप्रयुक्तं तत्। बिम्बोपाधिसन्निधानात् प्रागेव बिम्बे चैत्रमुखे दर्पणसंसर्गाद्यभावे दर्पणे**

दर्पणत्वादिविशेषात्मनाऽपि साक्षात्कारसत्त्वेन सर्वात्मनाऽधिष्ठानसाक्षात्कारोऽस्ति। तथा च तेन अधिष्ठानविशेषावरणस्याज्ञानस्य निवृत्तत्वान्न तदुपादानं सम्भवतीत्येतत् युक्तमेवेत्यर्थः। अपिरवधारणे। **निवर्तकमिति।** प्रतिबिम्बाध्यासस्येति शेषः। कथं तर्ह्युपादानादिलाभः, तत्राह—**तथापीति। तदेवेति।** अधिष्ठानाज्ञानमेवेत्यर्थः। सर्वात्मनाऽधिष्ठानसाक्षात्कारेणाऽपि अज्ञानैकदेशस्यैव निवृत्तिः न तु कार्त्स्न्येनेति फलबलात् कल्प्यत इति भावः। निवर्तकज्ञानं च निरूपयति—**बिम्बेति।** बिम्बोपाध्योस्सन्निधिनिवृत्तिसहकृतं 'दर्पणे मुखं नास्ति' इति ज्ञानमेव प्रतिबिम्बाध्यासस्य निवर्तकमित्यर्थः।

दर्पणाद्यवच्छिन्नचैतन्ये दर्पणाद्युपादानभूतं मूलाज्ञानमेकमस्ति। दर्पणादिज्ञाननिवर्त्यमवस्थारूपाज्ञानमप्यपरमस्ति। तत्र मूलाज्ञानस्यैव दर्पणाद्युपादानत्ववत् प्रतिबिम्बाध्यासोपादानत्वमपीति परिहारान्तरमाह—**अन्ये त्विति।** ननु पूर्वमतोक्तरीत्या शुक्तिरजतादेरिव प्रतिबिम्बाध्यासस्याप्यवस्थाज्ञानपरिणामत्वसम्भवे किं मूलाज्ञानस्य तत्कल्पनयेति, नेत्याह—**ज्ञानस्येत्यादिना।** ज्ञानस्यावरणमात्रनिवर्तकत्वं किं स्वाभाविकं किं वा विक्षेपशक्त्यंशनिवृत्तिप्रतिबन्धकसत्त्वप्रयुक्तम्। नाद्य इत्यत्र हेतुमाह—**ब्रह्मज्ञानेनेति। तस्येति।** द्विविधस्याप्यज्ञानस्य निवर्तकाभावेन विक्षेपशक्तिसहकृतस्य [2]विदेहकैवल्येऽप्यनुवृत्तिप्रसङ्गादित्यर्थः। द्वितीयमनुवदति—**न चेति। तदिति।** आवरणमात्रनिवर्तकत्वमित्यर्थः। विक्षेपशक्तिमदज्ञानांशनिवृत्तिप्रतिबन्धकप्रारब्धनाशे सति ब्रह्मज्ञानसंस्कारविशिष्टचैतन्यमात्रादेव विक्षेपांशनिवृत्तिसम्भवात् न [3]पूर्वोक्तदोष इति मत्वा दोषमाह—**बिम्बोपाधिसन्निधानात् प्रागिति।** बिम्बोपाध्योराभिमुख्यलक्षणसन्निधानात् पूर्वक्षण एवेत्यर्थः। बिम्बप्रतिबिम्बाभेदपक्षे प्रतिबिम्बोत्पत्त्यभावेऽपि चैत्रस्य मुखे बिम्बभूते बिम्बत्वप्रतिबिम्बत्वदर्पणस्थत्वादेरनिर्वचनीयस्योत्पत्त्युपगमेन तस्य चैत्रमुखावच्छिन्नचैतन्यनिष्ठावस्थाज्ञानमेव कारणं वाच्यम्। तच्च चैत्रमुखे बिम्बदर्पणाभिमुख्यात् प्राक् विष्णुमित्रेण निरीक्ष्यमाणे सति तदा प्रतिबन्धकाभावाच्चैत्रमुखगोचरेण विष्णुमित्रीयसाक्षात्कारेण विक्षेपशक्त्या सह

---

1. सन्निधिरूपेति प्रतिबन्धकेत्यनेन अन्वेति।

2. विदेहकैवल्येपीति। न च व्यवहारदशायामेव अनुवृत्तिप्रसङ्गः कुतो न कृत इति शङ्क्यम्। इष्टापत्त्यापत्तेः। न च तदा अवस्थाज्ञानानुवृत्तौ शुक्तिरूप्यभानानुवृत्तिप्रसङ्ग इति वाच्यम्। तत्प्रयोजकदोषाभावेन तद्वारणसंभवात्-इत्यभिप्रायः।

3. पूर्वोक्तदोषः—विदेहकैवल्येऽप्यनुवृत्तिप्रसङ्गरूपो दोषः

चैत्रमुखाभावे वा प्रत्यक्षतोऽवगम्यमाने विक्षेपशक्त्यंशस्यापि निवृत्त्यवश्यंभावेन तत्काले तयोस्सन्निधाने सति उपादानाभावेन प्रतिबिम्बभ्रमाभावप्रसङ्गात्। अतो मूलाज्ञानमेव प्रतिबिम्बाध्यासस्योपादानम्। न चात्राप्युक्तदोषतौल्यम्। पराग्विषयवृत्तिपरिणामानां स्वस्वविषयावच्छिन्नचैतन्यप्रदेशे मूलाज्ञानावरणशक्त्यंशाभिभावकत्वेऽपि तदीयविक्षेपशक्त्यंशानिवर्तकत्वात्। अन्यथा तत्प्रदेशस्थितव्यावहारिकविक्षेपाणामपि विलयापत्तेः। न च प्रतिबिम्बस्य मूलाज्ञानकार्यत्वे व्यावहारिकत्वापत्तिः। अविद्यातिरिक्तदोषाजन्यत्वस्य व्यावहारिकत्वप्रयोजकत्वात्, प्रकृते

निवर्तते, उत्तरक्षण एव चैत्रमुखस्य दर्पणाभिमुख्ये सति विष्णुमित्रस्य दर्पणे चैत्रस्य मुखमिति प्रतिबिम्बभ्रमो भवति। तत्र चैत्रमुखे दर्पणस्थत्वादेरुत्पत्तिर्न स्यात्, उपादानाभावादित्याह—**बिम्ब इति।** दर्पणसंसर्गो दर्पणस्थत्वम्। आदिपदं प्रत्यङ्मुखत्वादिसङ्ग्रहार्थम्। तथा च संसर्गाद्यभावे प्रत्यक्षतोऽवगम्यमान इति सम्बन्धः। 'चैत्रमुखे दर्पणस्थत्वादिकं नास्ति' इत्यवगतिप्रकारो बोध्यः। दर्पणे प्रतिबिम्बाध्यासोत्पत्तिपक्षे अवगतिप्रकारमाह—**दर्पण इति।** प्रतिबिम्बाध्यासपक्षे संसर्गितया प्रतिमुखस्यैवाध्यासोपगमात् 'दर्पणे चैत्रमुखं नास्ति' इत्यनेन प्रकारेण दर्पणे चैत्रमुखाभावे प्रत्यक्षतोऽवगम्यमाने इत्यर्थः। एवं मतभेदेनाधिष्ठानभेदतत्साक्षात्काराकारभेदयोः प्रदर्शनार्थमेव चैत्रमुखे दर्पणे च पृथक् सप्तमीनिर्देशः कृतः। मतभेदज्ञापनार्थश्च वाकारः। **तत्काल इति।** अधिष्ठानभूते चैत्रमुखे दर्पणे च विक्षेपशक्त्यासहाज्ञाननिवर्तकसाक्षात्कारोत्पत्तिद्वितीयक्षणे इत्यर्थः। **तयोरिति।** चैत्रमुखदर्पणयोः सन्निधाने सति अधिष्ठानसाक्षात्कारवतो विष्णुमित्रस्य 'दर्पणे चैत्रमुखं' इति यः प्रतिबिम्बभ्रमो भवति तस्याभावप्रसङ्गात् इत्यत्र हेतुमाह—**उपादानाभावेनेति।** तत्र हेतुमाह—**विक्षेपशक्त्यंशस्यापि निवृत्त्यवश्यंभावेनेति। अत इति।** अवस्थाज्ञानस्य प्रतिबिम्बाध्यासे कारणत्वायोगादित्यर्थः। ननु - अस्मिन् पक्षेऽपि बिम्बोपाधिसन्निधानात् पूर्वक्षणोत्पन्नचैत्रमुखादिसाक्षात्कारेण चैत्रमुखाद्यवच्छिन्नचैतन्यावारकमूलाज्ञानस्यापि निवृत्तत्वादुपादानाज्ञानाभावदोषस्तुल्यः। तेन तदनिवृत्तौ च चैत्रमुखाद्यनवभासप्रसङ्गः; यत्किञ्चिदावरणस्य सत्त्वात्-इत्याशङ्क्याह—**न चात्रापीति।** ब्रह्मज्ञानस्यैव मूलाज्ञाननिवर्तकत्वं, जडविषयकवृत्तिरूपाणामन्तःकरणपरिणामानां तु स्वस्वविषयचैतन्यस्थमूलाज्ञानस्य योऽयमावरणांशः तदभिभावकत्वमात्रं यावद्विषयस्फुरणमङ्गीक्रियते, न त्ववस्थाज्ञानविक्षेपांशनिवर्तकत्ववत् मूलाज्ञानविक्षेपांशनिवर्तकत्वमपीत्यर्थः। **अन्यथेति।** विषयचैतन्यस्थस्य मूलाज्ञानस्य विषयज्ञानेन निवृत्तौ दर्पणादीनां व्यावहारिकाणां विक्षेपशब्दितकार्याणां नाशप्रसङ्गः, उपादाननाशादित्यर्थः। प्रातिभासिकविक्षेपाणामिवेत्यपिशब्दार्थः। ननु मूलाज्ञानकार्यस्य दर्पणादेर्व्यावहारिकत्वदर्शनात् प्रतिबिम्बाध्यासस्यापि तत्कार्यत्वे तदापत्तिरित्याशङ्क्य निराकरोति—**न चेत्यादिना।** मूलाज्ञानकार्यत्वं व्यावहारिकत्वप्रयोजकं न भवति, अनाद्यविद्यादौ तदभावेऽपि व्यावहारिकत्वसत्त्वात्, किं त्वन्यदेव तत्प्रयोजकमित्याह—**अविद्यातिरिक्तेति।** अनाद्यविद्यादौ अविद्याजन्यत्वाभावेऽपि तदतिरिक्तदोषाजन्यत्वसत्त्वात् नाव्याप्तिरिति भावः। प्रतिबिम्बाध्यासस्य मूलाज्ञानकार्यस्यापि न व्यावहारिकत्वम्,

च तदतिरिक्तबिम्बोपाधिसन्निधानदोषसद्भावेन प्रातिभासिकत्वोपपत्तेः। न च—एवंसति बिम्बोपाधिसन्निधिनिवृत्तिसहकृतस्याप्यधिष्ठानज्ञानस्य प्रतिबिम्बाध्यासानिवर्तकत्वप्रसङ्गः, तन्मूलाज्ञाननिवर्तकत्वाभावात्—इति वाच्यम्। विरोधाभावात् ब्रह्माज्ञानानिवर्तकत्वेऽपि तदुपादानकप्रतिबिम्बाध्यासविरोधिविषयकतया अधिष्ठानयाथात्म्यज्ञानस्य प्रतिबन्धकविरहसचिवस्य [1]तन्निवर्तकत्वोपपत्तेः। अवस्थाज्ञानोपादानत्वपक्षेऽपि तस्य प्राचीनाधिष्ठानज्ञाननिवर्तितावरणशक्तिकस्य समानविषयत्वभङ्गेन प्रतिबन्धकाभावकालीनाधिष्ठानज्ञानेन निवर्तयितुमशक्यतया प्रतिबिम्बाध्यासमात्रस्यैव तन्निवर्त्यत्वस्योपेयत्वात्। अथवा स्वोपादानाज्ञाननिवर्तकब्रह्मज्ञाननिवर्त्य एवाय-

---

तत्प्रयोजकाभावादित्याह—प्रकृते चेति। प्रतिबिम्बाध्यासे इत्यर्थः। न चैवंसतीति। प्रतिबिम्बाध्यासस्य मूलाज्ञानकार्यत्वे सतीत्यर्थः। तन्मूलेति। शुक्तिरजतादिमूलाविद्यानिवर्तकशुक्त्यादिसाक्षात्कारस्यैव रजताद्यध्यासनिवर्तकत्वदर्शनादिति भावः। विरोधाभावादिति। मूलाज्ञानं ब्रह्मविषयकं प्रतिबिम्बाध्यासाधिष्ठानभूतदर्पणादिज्ञानं तु दर्पणाद्यवच्छिन्नचैतन्यविषयकमिति तयोःसमानविषयकत्वस्य विरोधप्रयोजकस्याभावेन विरोधाभावात् अधिष्ठानयाथात्म्यज्ञानस्य ब्रह्माज्ञानानिवर्तकत्वेऽपीत्यर्थः। तत्पदं ब्रह्माज्ञानपरम्। विरोधिविषयकतयेति। दर्पणेमुखंनास्तीत्यादिरूपस्याधिष्ठानयाथात्म्यज्ञानस्य [2]प्रतिबिम्बाध्यासाभावविषयकतयेत्यर्थः। ननु—प्रतिबिम्बाध्यासस्यावस्थाज्ञानोपादानकत्वपक्षे बिम्बोपाधिसन्निधिनिवृत्तिसहकृताधिष्ठानज्ञानस्य तदुपादानाज्ञाननिवर्तकत्वं लभ्यते। तथा च 'ज्ञानमज्ञानस्यैव निवर्तकम्, अज्ञानकार्यस्य तु उपादानाज्ञाननिवृत्त्या निवृत्तिः' इति पञ्चपादिकाकारोक्तं[3] सङ्गच्छते—इत्याशङ्क्याह—अवस्थाज्ञानेति। तस्येति। अवस्थाज्ञानस्येत्यर्थः। प्राचीनेति। प्रतिबिम्बाध्यासात्प्राचीनेनाधिष्ठानज्ञानेन दर्पणेमुखंनास्तीत्याद्याकारेण निवर्तिता आवरणशक्तिः यस्यावस्थाज्ञानस्य तत्तथा, तस्येत्यर्थः। अज्ञानविषयत्वं अज्ञानावृतत्वम्, आवरणनाशे च दर्पणाद्यवच्छिन्नचैतन्यस्य अवस्थाऽज्ञानविषयत्वाभावात् अधिष्ठानज्ञानस्य अवस्थाज्ञानसमानविषयकत्वं विरोधप्रयोजकं भग्नमित्यर्थः। प्रतिबन्धकपदं बिम्बोपाध्योस्सन्निधिपरम्। [4]तस्य निवर्तयितुमशक्यतया इति सम्बन्धः। तन्निवर्त्येति। तत्पदमधिष्ठानज्ञानपरम्। अवस्थाज्ञानोपादानत्वपक्षेऽपि प्रतिबिम्बाध्यासमात्रस्यैव[5] तन्निवर्त्यत्वस्योपेयत्वादिति सम्बन्धः। तथा च पञ्चपादिकाविरोधः प्रतिबिम्बाध्यासस्यावस्थाज्ञानोपादानकत्वपक्षेऽपि तुल्य इति भावः। तदविरुद्धं प्रकारमाह—अथवेति। स्वपदं प्रतिबिम्बाध्यासपरम्। निवर्त्य एवेति। बिम्बोपाध्योस्सन्निधिविगमकाले प्रतिबिम्बाध्यासस्य सूक्ष्मावस्थालक्षणनाशे सत्यपि

---

1. तन्निवर्तकत्वोपपत्तेरिति। प्रतिबिम्बाध्यासः तच्छब्दार्थः।
2. प्रतिबिम्बाध्यासेति कर्मधारयः। प्रतिबिम्बरूपाध्यासेत्यर्थः।
3. पञ्चपादिकाकारोक्तमिति। अध्यासभाष्यावतरणे 'अस्यानर्थहेतोः प्रहाणाय' इतिभाष्यव्याख्यानावसरे च इत्यादिः।
4. मूलस्थं तस्येति पदमत्र ग्राह्यम्।
5. मात्रस्यैवेति। मात्रशब्देन अवस्थाऽज्ञानव्यवच्छेदः।

मध्यासोऽस्तु। व्यावहारिकत्वापत्तिस्तु अविद्यातिरिक्तदोषजन्यत्वेन प्रत्युक्ता—इत्याहुः।

स्वप्नाध्यासाधिष्ठानसत्तादिविचारः

एवं स्वप्नाध्यासस्यापि अनवच्छिन्नचैतन्ये अहङ्कारोपहितचैतन्ये वा अवस्थारूपाज्ञानशून्येऽध्यासात् 'सुषुप्त्याख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः' [उ. सा. १७-२६] इति आचार्याणां स्वप्नजाग्रत्प्रपञ्चयोरेकाज्ञानकार्यत्वोक्तेश्च मूलाज्ञानकार्यतया स्वोपादाननिवर्तकब्रह्मज्ञानैकबाध्यस्य अविद्यातिरिक्तनिद्रादिदोषजन्यतयैव प्रातिभासिकत्वं इति [1]केचिदाहुः।

अन्ये तु -'बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे' इति [2]भाष्योक्तेः 'अविद्यात्मकबन्धप्रत्यनीकत्वात् जाग्रद्बोधवत्' इति विवरणदर्शनात् उत्थितस्य स्वप्नमिथ्यात्वानुभवाच्च जाग्रद्बोधः

बाधरूपा निवृत्तिस्तदा नास्ति, सा तु ब्रह्मज्ञानाधीनैव, तस्यैव तदुपादानमूलाज्ञाननिवर्तकत्वादिति भावः। ननु ब्रह्मज्ञानबाध्यस्य घटादेरिव तद्बाध्यस्यास्यापि व्यावहारिकत्वापत्तिरिति, नेत्याह—**व्यावहारिकत्वापत्तिस्त्विति**। तुशब्दोऽवधारणे। प्रत्युक्तैवेति सम्बन्धः। बिम्बोपाधिसन्निधिर्दोषः।

उक्तन्यायमन्यत्राप्यतिदिशति—**एवमिति**। एवं स्वप्नाध्यासस्यापि मूलाज्ञानकार्यतया अविद्यातिरिक्तनिद्रादिदोषजन्यतयैव प्रातिभासिकत्वमिति सम्बन्धः। न त्ववस्थाज्ञानकार्यतया प्रातिभासिकत्वमित्येवकारार्थः। अवस्थाज्ञानस्य स्वप्नोपादानत्वाभावे हेतुमाह—**अवस्थारूपाज्ञानशून्येऽध्यासादिति**। मतभेदेन स्वप्नाध्यासाधिष्ठानभेदमाह—**अनवच्छिन्नेति**। अहङ्कारानवच्छिन्नब्रह्मचैतन्यस्य मूलाज्ञानमात्राश्रयत्वादवस्थाज्ञानशून्यत्वम्, अहङ्कारोपहितस्य साक्षिचैतन्यस्य सुखाद्यधिष्ठानस्य आवरणानङ्गीकारादवस्थाज्ञानशून्यत्वं इति भावः। अत्र अज्ञानकार्यस्य स्वप्नाध्यासस्य अवस्थाज्ञानशून्यचैतन्येऽध्यासोक्त्या अर्थान्मूलाज्ञानकार्यत्वमुक्तं, तत्र हेत्वन्तरमाह—**सुषुप्त्याख्यमिति**। सुषुप्तेरज्ञानावस्थारूपत्वविवक्षया सुषुप्त्याख्यत्वमज्ञानस्योक्तम्। बीजम्—उपादानं, बोधः—जाग्रत्प्रपञ्चः, तस्य शुक्तिरजतादिव्यतिरिक्तस्य मूलाज्ञानकार्यत्वं सम्प्रतिपन्नमिति भावः। आचार्याणामुक्तेश्चेति सम्बन्धः। स्वपदं स्वप्नाध्यासपरम्। **ब्रह्मज्ञानैकेति**। प्रबोधकाले स्वप्नप्रपञ्चस्य सूक्ष्मावस्थापत्तिरूपनाशे सत्यपि बाधरूपा निवृत्तिः ब्रह्मज्ञानैकसाध्येति बोध्यम्।

अविद्यातिरिक्तदोषजन्यत्वं प्रातिभासिकत्वप्रयोजकमिति मतेन स्वप्नाध्यासस्य निद्रादिदोषजन्यस्य प्रातिभासिकत्वमुपपादितम्। व्यवहारकाले बाध्यमानत्वं प्रातिभासिकत्वप्रयोजकमिति मतेन तस्य तदुपपादयति—**अन्ये त्विति**। भाष्यगतं प्रबोधपदं सप्तम्यन्तम्। बन्धस्याविद्याकार्यत्वादविद्यात्मकत्वम्। प्रत्यनीकत्वं निवर्तकत्वम्। पञ्चम्यनन्तरं ब्रह्मज्ञानस्येति शेषः[3]। यथा जाग्रत्कालीनो घटादिबोधः स्वप्नबन्धनिवर्तकः तद्वदित्यर्थः। **उत्थितस्येति**। 'मिथ्यैव मया स्वप्ने महाजनसमागमो दृष्टः न ह्यस्ति महाजनसमागमः'

---

1. केचित् - आश्रमस्वामिनः 2. सन्ध्याधिकरणे इत्यादिः।

3. वेदान्तमीमांसाशास्त्रं सम्भावितविषयप्रयोजनं इत्यत्र हेतुत्वेन अविद्यात्मकबन्धप्रत्यनीकत्वं निर्दिष्टं अध्यासभाष्यावतरणटीकाविवरणे। शास्त्रस्य अविद्यात्मकबन्धप्रत्यनीकत्वं ब्रह्मज्ञानद्वारैव इत्यतः ब्रह्मज्ञानस्येति शेषपूरणं कृतम्।

स्वप्नाध्यासनिवर्तक इति ब्रह्मज्ञानेतरज्ञानबाध्यतयैव तस्य प्रातिभासिकत्वम्। न चाधिष्ठानयाथात्म्यागोचरं [1]स्वोपादानाज्ञानानिवर्तकं ज्ञानं कथमध्यासनिवर्तकं स्यादिति वाच्यम्। रज्जुसर्पाध्यासस्य स्वोपादानाज्ञाननिवर्तकाधिष्ठानयाथात्म्यज्ञानेनेव तत्रैव स्वानन्तरोत्पन्नदण्डभ्रमेणापि निवृत्तिदर्शनात् - इत्याहुः।

अपरे तु जाग्रद्भोगप्रदकर्मोपरमे सति जाग्रत्प्रपञ्चद्रष्टारं प्रतिबिम्बरूपं व्यावहारिकजीवं तद्दृश्यं जाग्रत्प्रपञ्चमप्यावृत्य जायमानो निद्रारूपो मूलाज्ञानस्यावस्थाभेदः स्वाप्नप्रपञ्चाध्यासोपादानं, न मूलाज्ञानम्। न च निद्राया अवस्थाज्ञानरूपत्वे मानाभावः। मूलाज्ञानेनानावृतस्य

इति तस्य मिथ्यात्वानुभवादित्यर्थः। यदि स्वप्नप्रपञ्चस्य ब्रह्मज्ञानबाध्यत्वप्रयुक्तं मिथ्यात्वं तदा स्वप्नादुत्थितस्य तन्मिथ्यात्वानुभवो न स्यात्। ब्रह्मज्ञानात्पूर्वं तद्बाध्ये घटादौ मिथ्यात्वानुभवादर्शनात्। अतो ब्रह्मज्ञानादितरेण जाग्रद्बोधेनैव बाधः स्वप्नप्रपञ्चस्य वक्तव्य इति शुक्तिरजतादिवत् व्यवहारकालीनबाधवशादेव तस्य प्रातिभासिकत्वम्, व्यवहारकालश्च ब्रह्मतत्त्वज्ञानात्पूर्वकाल इति भावः। **ज्ञानमिति**। ब्रह्मज्ञानेतरज्ञानमित्यर्थः। तस्य स्वप्नाध्यासनिवर्तकत्वाभावे हेतुं सूचयति—**स्वेति**। स्वस्य - स्वप्नाध्यासस्य उपादानं मूलाज्ञानं तदनिवर्तकमित्यर्थः। तदनिवर्तकत्वे हेतुं सूचयति—**अधिष्ठानेति**। स्वप्नाधिष्ठानस्य पूर्वोक्तस्य यद्याथात्म्यं अनवच्छिन्नब्रह्मचैतन्यत्वादि तदविषयकमित्यर्थः। अधिष्ठानयाथात्म्यज्ञानस्यैव अज्ञाननिवृत्तिद्वारा अध्यासनिवर्तकत्वनियमादिति भावः। उक्तनियमासिध्या दूषयति—**रज्जुसर्पेति**। स्वपदं सर्पाध्यासपरम्। **ज्ञानेनेवेति**। 'नायं सर्पः, रज्जुरेषा' इति ज्ञानेनेवेत्यर्थः। **तत्रैवेति**। सर्पाध्यासाधिष्ठानरज्जावेवेत्यर्थः। **स्वेति**। सर्पभ्रमानन्तरोत्पन्नेन 'नायं सर्पः दण्डोऽयं' इति भ्रमेणेत्यर्थः। **निवृत्तिदर्शनादिति**। बाधदर्शनादित्यर्थः।

अधिष्ठानयाथात्म्यज्ञानस्यैवाध्यासनिवर्तकत्वनियमेऽपि प्रकृते नानुपपत्तिरिति मत्वा तदनुगुणं मतमाह—**अपरे त्विति**। अस्मिन् मते व्यावहारिकजीवः स्वप्नप्रपञ्चद्रष्टुः प्रातिभासिकजीवस्याधिष्ठानम्। स्वप्नप्रपञ्चस्य च जाग्रत्प्रपञ्च एवाधिष्ठानं, न त्वनवच्छिन्नचैतन्यादिकम्। द्विविधाधिष्ठानावरणद्वारा च निद्रारूपमवस्थाज्ञानं द्रष्टृदृश्यात्मकद्विविधस्वप्नप्रपञ्चोपादानं, न तु मूलाज्ञानम्, तस्य ब्रह्मचैतन्यमात्रावारकत्वेन व्यावहारिकजीवाद्यावारकत्वाभावात्। ततश्च व्यावहारिकजीवजगद्गोचरस्य प्रबोधस्य अधिष्ठानयाथात्म्यज्ञानरूपत्वात् तेन स्वप्नाध्यासबाधः संभवतीति तात्पर्यार्थः। कर्मोपरमे सति जायमानः इति सम्बन्धः। आवृत्येत्यनेन उपादानमित्यनेन च निद्रायाः आवरणविक्षेपशक्तिमत्त्वरूपमज्ञानलक्षणमुक्तम्। एवमज्ञानत्वे तस्याः सिद्धे सति उत्पत्तिमत्त्वात्तदवस्थारूपत्वं सिध्यति। अस्मिन् मते सर्वेषामेवावस्थाज्ञानानामादिमत्त्वस्य प्रथमपरिच्छेदे [2]उक्तत्वादिति भावः। सङ्ग्रहेणोक्तमर्थमाशङ्कापूर्वकं प्रपञ्चयति—**न च निद्राया इत्यादिना**। मूलाज्ञानेनानावृतस्य व्यावहारिकजीवस्य जाग्रत्प्रप-

---

1. स्वोपादानाज्ञानेति। अस्मिन्नपि मते स्वप्नाध्यासस्य मूलाज्ञानकार्यत्वं बोध्यम्।
2. उक्तत्वात् - आवरणाभिभवपदार्थविचारावसरे उक्तत्वात्।

जाग्रत्प्रपञ्चद्रष्टुः व्यावहारिकजीवस्य 'मनुष्योऽहं, ब्राह्मणोऽहं, देवदत्तपुत्रोऽहं' इत्यादिना स्वात्मानमसंदिग्धाविपर्यस्तमभिमन्यमानस्य तदीयचिरपरिचयेन तं प्रति सर्वदा अनावृतैकरूपस्य अनुभूतस्वपितामहात्ययादिजाग्रत्प्रपञ्चवृत्तान्तस्य च स्वप्नसमये केनचिदावरणाभावे जागरण इव स्वप्नेऽपि 'व्याघ्रोऽहं, शूद्रोऽहं, यज्ञदत्तपुत्रोऽहं' इत्यादिभ्रमस्य स्वपितामहजीवद्दशादिभ्रमस्य च अभावप्रसङ्गेन निद्राया एव तत्कालोत्पन्नव्यावहारिकजगज्जीवावारकाज्ञानावस्थाभेदरूपत्वसिद्धेः। न चैवं जीवस्याप्यावृतत्वात् स्वप्नप्रपञ्चस्य द्रष्टृभावप्रसङ्गः। स्वप्नप्रपञ्चेन सह द्रष्टुर्जीवस्यापि प्रातिभासिकस्य अध्यासात्। एवं च पुनर्जाग्रद्भोगप्रदकर्मोद्भूते बोधे व्यावहारिकजीवस्वरूपज्ञानात् स्वोपादाननिद्रारूपाज्ञाननिवर्तकादेव स्वाप्नप्रपञ्चबाधः। न चैवं तद्द्रष्टुः प्रातिभासिकजीवस्यापि ततो बाधे 'स्वप्ने करिणमन्वभूवं' इत्यनुसन्धानं न स्यादिति वाच्यम्। व्यावहारिकजीवे प्रातिभासिकजीवस्याध्यस्ततया तदनुभवात् व्यावहारिकजीवस्यानुसन्धानोपगमेऽप्यतिप्रसङ्गाभावात्—इत्याहुः।

वृत्तान्तस्य च स्वप्नकाले केनचिदावरणाभावे 'यज्ञदत्तपुत्रोऽहं' इत्यादिभ्रमस्य स्वपितामहजीवद्दशानुभवस्य चाभावप्रसङ्गेन निद्राया एव भेदरूपत्वसिद्धेरिति सम्बन्धः। जाग्रत्काले ब्राह्मणत्वादिरूपसत्त्वे संशयविपर्यययोरभावं हेतुमाह—**असन्दिग्धेति**। असन्दिग्धाविपर्यस्तं यथा भवति तथा अभिमन्यमानस्येति सन्देहविपर्यासभिन्नत्वमभिमानक्रियाविशेषणम्। स्वपितामहात्ययादेर्जाग्रत्प्रपञ्चवृत्तान्तस्य तं देवदत्तपुत्रं प्रति सर्वदाऽनावृतत्वेनैकरूपतयाऽवस्थाने हेतुमाह—**तदीयेति**। देवदत्तपुत्रो हि स्वपितामहादिमरणं प्रथममनुभूय पश्चात्प्रतिमासं प्रतिवत्सरं च श्राद्धतर्पणादिकं करोति, ततश्च तन्मरणादिगोचरानुभवस्मरणाभ्यासः-चिरपरिचयः, तेन स्वपितामहात्ययादौ संशयादिनिवृत्तिभाक्त्वलक्षणमनावृतत्वं सदा एकरूपेण वर्तते इत्यर्थः। जागरणे यथा देवदत्तपुत्रस्य व्याघ्रत्वादिभ्रमाभावः स्वपितामहजीवद्दशानुभवाभावश्च, तथा स्वप्नेऽप्यभावप्रसङ्गेनेत्यर्थः। **तत्कालेति**। निद्राकाले उत्पन्नो यो व्यावहारिकजगज्जीवयोरावारकोऽज्ञानावस्थाभेदः तद्रूपत्वं निद्राया एव सिद्ध्यति नान्यस्य, आवरणविक्षेपशक्तिमत्त्वेन तस्या उपस्थितत्वात् अन्यस्यानुपस्थितत्वादित्यर्थः। **न चैवमिति**। निद्राया व्यावहारिकजीवाद्यावारकाज्ञानावस्थाविशेषरूपत्वसिद्धौ सत्यामित्यर्थः। प्रातिभासिकान्तःकरणे चित्प्रतिबिम्बरूपस्य जीवान्तरस्याभ्युपगमात् नैतच्चोद्यावकाश इत्याशयेनाह—**स्वप्नप्रपञ्चेन सहेति**। **एवं चेति**। व्यावहारिकजीवजगतोरेव स्वाप्नजीवजगदधिष्ठानत्वे सिद्धे सतीत्यर्थः। **कर्मोद्भूते बोध इति**। कर्मजन्ये जागरणे इत्यर्थः। **जीवस्वरूपज्ञानादिति**। 'मनुष्योहं ब्राह्मणोऽहं देवदत्तपुत्रोऽहं' इत्यादिरूपादित्यर्थः। उपलक्षणं चैतत्, स्वपितामहात्ययादिज्ञानाच्चेत्यपि द्रष्टव्यम्। स्वपदं स्वाप्नप्रपञ्चपरम्। न चैवमित्येवंशब्दार्थमाह—**तद्द्रष्टुरिति**। तस्य-स्वाप्नप्रपञ्चस्य द्रष्टुः-'व्याघ्रोऽहं, शूद्रोऽहं' इत्यादिरूपेण स्वात्मानमभिमन्यमानस्येत्यर्थः। **तत इति**। व्यावहारिकजीवस्वरूपज्ञानादित्यर्थः। **न स्यादिति**। अन्यानुभूतेऽर्थेऽन्यस्य स्मरणायोगादिति भावः। **अध्यस्ततयेति**। तथा च व्यावहारिकप्रातिभासिकजीवयोरधिष्ठानारोप्ययोस्तादात्म्यसत्त्वात् प्रातिभासिकजीवकर्तृकानुभवाद्व्यावहारिकजीवस्य स्वाप्नपदार्थानुसन्धानं सम्भवतीत्यर्थः। **अतिप्रसङ्गेति**। यज्ञदत्तानुभूतार्थे विष्णु-

नन्वनवच्छिन्नचैतन्ये अहङ्कारोपहितचैतन्ये वा स्वाप्नप्रपञ्चाध्यास इति प्रागुक्तं पक्षद्वयमप्ययुक्तम् । आद्ये - स्वाप्नगजादेः अहङ्कारोपहितसाक्षिणो विच्छिन्नदेशत्वेन सुखादिवदन्तःकरणवृत्तिसंसर्गमनपेक्ष्य तेन प्रकाशस्य, चक्षुरादीनामुपरततया वृत्त्युदयासम्भवेन तत्संसर्गमपेक्ष्य तेन प्रकाशस्य च, अयोगात् । द्वितीये इदं रजतमितिवत् 'अहं गजः' इति वा, अहंसुखीतिवत् 'अहं गजवान्' इति वा अध्यासप्रसङ्गात् ।

अत्र केचित् आद्यपक्षं समर्थयन्ते—अहङ्कारानवच्छिन्नचैतन्यं न देहाद्बहिः स्वाप्नप्रपञ्चस्याधिष्ठानमुपेयते, किं तु तदन्तरेव । अत एव दृश्यमानपरिमाणोचिततदेशसम्पत्त्यभावात् स्वाप्नगजादीनां मायामयत्वमुच्यते । एवं च अन्तःकरणस्य देहाद्बहिरस्वातन्त्र्यात् जागरणे बाह्यशुक्ती-

---

मित्रस्याप्यनुसन्धानप्रसङ्गरूपातिप्रसङ्गाभावादित्यर्थः, तयोस्तादात्म्याभावादिति भावः ।

ननु जीवत्रैविध्यपक्षे द्रष्टृदृश्यात्मकस्वप्नाध्यासाधिष्ठानत्वेनोपगतस्य [1]व्यावहारिकजीवादेः मिथ्यात्वेन जडतया स्वप्नप्रपञ्चावभासकत्वं न सम्भवति । न च चैतन्यमेव तदवभासकमिति वाच्यम् । तथासति तस्यैवाधिष्ठानतया तत्सत्तास्फूर्तिरूपत्वसम्भवे जडस्याधिष्ठानत्वाभ्युपगमायोगात् । तर्हि तदेवाधिष्ठानमस्त्विति चेन्न—तत्राप्यनुपपत्तिसत्त्वादित्याह—**नन्वित्यादिना** । अनवच्छिन्नचैतन्याधिष्ठानत्वपक्षे स्वाप्नगजादेर्देहात् बाह्यदेशस्थत्वं वक्तव्यम् । तथा च तस्य किं साक्षिभास्यत्वम्, ऐन्द्रियकत्वं वा । नाद्य इत्याह—**अहङ्कारेति** । साक्षिण इति पञ्चमी । विच्छेदोक्त्या साक्षिणः स्वाप्नगजादिना सह स्वतत्संसर्गाभावो दर्शितः । अन्तःकरणवृत्तिसंसर्गमनपेक्ष्य स्वाप्नगजादेः तेन प्रकाशस्य, तत्संसर्गमपेक्ष्य तेन प्रकाशस्य च, अयोगादिति सम्बन्धः । तेनेतिपदद्वयं साक्षिपरम् । यथा सुखादेः सुखादिगोचरान्तःकरणवृत्तिसंसर्गमनपेक्ष्य तेन प्रकाशः तथा तेन स्वाप्नगजादेः प्रकाशायोगादित्यर्थः । द्वितीयं निरस्यति—**चक्षुरादीनामिति** । **द्वितीय इति** । अहमनुभवगोचराहङ्कारोपहितचैतन्यस्य स्वप्नाध्यासाधिष्ठानत्वपक्ष इत्यर्थः । किं गजादेः तादात्म्येन तत्राध्यासः किं वा आधाराधेयभावलक्षणसंसर्गेण । आद्यं दूषयति—**इदं रजतमितिवदिति** । द्वितीयं निराकरोति—**अहंसुखीतिवदिति** । 'द्वितीये अहं गज इति अहं गजवानिति वा अध्यासप्रसङ्गात्' इति योजना ।

अहङ्कारानवच्छिन्नेति । अविद्यायांबिम्बभूतमीश्वरचैतन्यमिहानवच्छिन्नचैतन्यं विवक्षितम्, ईश्वरचैतन्यस्यैव सर्वाधिष्ठानत्वात्, नाविद्याप्रतिबिम्बरूपं जीवचैतन्यम्, तस्यानुपादानत्वादिति बोध्यम् । आन्तरचैतन्यस्यैवाधिष्ठानत्वे नियामकमाह—**अत एवेति** । आन्तरचैतन्यस्यैवाधिष्ठानत्वोपगमादेवेत्यर्थः । स्वप्नकाले दृश्यमानपरिमाणवतां गजादीनां शरीरस्यान्तरुचितदेशसम्पत्त्यभावात् प्रातिभासिकत्वमुच्यते सूत्रकारादिभिः । शरीराद्बाह्यचैतन्यस्याधिष्ठानत्वे तु जाग्रद्गजादीनामिव स्वाप्नगजादीनामपि योग्यदेशलाभाद्व्यावहारिकत्वमेव स्यात् । तथा च सूत्रादिविरोध इत्यर्थः । **एवं चेति** । आन्तरस्यैव चैतन्यस्य स्वप्नाध्यासाधिष्ठानत्वे प्रमाणसिद्धे

---

1. व्यावहारिकजीवादेरिति । अत्र आदिशब्देन स्वाप्नदृश्याधिष्ठानस्य व्यावहारिकदृश्यस्य ग्रहणम् ।

दमंशादिगोचरवृत्त्युत्पादाय चक्षुराद्यपेक्षायामपि देहान्तरन्तःकरणस्य स्वतन्त्रस्य स्वयमेव वृत्तिसम्भवात् देहान्तरन्तःकरणवृत्त्यभिव्यक्तस्यानवच्छिन्नचैतन्यस्याधिष्ठानत्वे न काचिदनुपपत्तिः । अत एव-यथा जागरणे सम्प्रयोगजन्यवृत्त्यभिव्यक्तशुक्तीदमंशावच्छिन्नचैतन्यस्थिताऽविद्या रूप्याकारेण विवर्तते, तथा स्वप्नेऽपि देहस्यान्तरन्तःकरणवृत्तौ निद्रादिदोषोपप्लुतायां अभिव्यक्तचैतन्यस्थाविद्या अदृष्टोद्बोधितनानाविषयसंस्कारसहिता [1]प्रपञ्चाकारेण विवर्ततामिति विवरणोपन्यासे[2] भारतीतीर्थवचनमिति ।

अन्ये तु [3]अनवच्छिन्नचैतन्यं न वृत्त्यभिव्यक्तं सत् स्वाप्नप्रपञ्चस्याधिष्ठानम् । अशब्दमूलकानवच्छिन्नचैतन्यगोचरवृत्त्युदयासम्भवात् । अहङ्काराद्यवच्छिन्नचैतन्य एव अहमाकारवृत्त्युदय-

---

सतीत्यर्थः । ननु—शरीरान्तर्गतस्यापि ब्रह्मचैतन्यस्य आवृतत्वात् तत्राध्यस्तानां स्वाप्नगजादीनामनवभासप्रसङ्गः । न चान्तःकरणवृत्त्या आवरणनाशे सति तेषामवभासः संभवतीति वाच्यम् । स्वप्ने चक्षुरादीनामुपरतत्वेन वृत्त्यसम्भवात् । न च स्वयमेवान्तःकरणवृत्तिस्तदा सम्भवतीति वाच्यम् । जागरणेऽपि तथाप्रसङ्गेन तदापि चक्षुराद्यपेक्षाभावप्रसङ्गात् - इत्यत आह—**अन्तःकरणस्येति । स्वयमेवेति ।** [4]चक्षुरादिकमनपेक्ष्यैवेत्यर्थः । **न काचिदिति ।** अभिव्यक्तचैतन्यस्यैवान्तरस्याधिष्ठानत्वोपगमेन स्वाप्नप्रपञ्चस्य अवभासानुपपत्तिर्वा प्रातिभासिकत्वानुपपत्तिर्वा नास्तीत्यर्थः । अन्तःकरणवृत्त्यभिव्यक्तचैतन्यस्यैवाधिष्ठानत्वे सम्मतिमाह—**अत एवेति ।** अन्तःकरणवृत्त्यभिव्यक्तचैतन्यस्यैवाधिष्ठानत्वोपगमादित्यर्थः । विवर्तते - परिणमत इत्यर्थः । नन्वन्तःकरणे चक्षुरादिनिरपेक्षाया वृत्तेः सदा सम्भवात् तदभिव्यक्ते चैतन्ये सदा सुलभे सदा स्वप्नाध्यासप्रसङ्ग इत्यत आह—**निद्रादीति ।** [5]पित्तोद्रेकादिरादिशब्दार्थः । दोषोपप्लुतायां वृत्तावभिव्यक्तं यच्चैतन्यं तत्र विद्यमाना अविद्येत्यर्थः । स्वप्नप्रपञ्चवैचित्र्यप्रयोजकमाह—**नानाविषयेति ।** जागरणे नानाविधविषयानुभवजनिताः संस्कारा अन्तःकरणे तिष्ठन्ति, तैरदृष्टोद्बोधितैः सहिता अविद्या विचित्रप्रपञ्चाकारेण परिणमत इत्यर्थः ।

इदानीमविद्यायां प्रतिबिम्बभूतमनवच्छिन्नजीवचैतन्यमेवाधिष्ठानमिति मतान्तरमाह—**अन्येत्विति ।** पूर्वमते अनुपपत्तिमाह—**अनवच्छिन्नचैतन्यमिति ।** बिम्बभूतमिति शेषः । **अशब्दमूलकेति ।** शुद्धब्रह्मण इव ईश्वरचैतन्यस्यापि शास्त्रैकगम्यत्वादिति भावः । नन्वनवच्छिन्नेऽप्यविद्याप्रतिबिम्बरूपजीवचैतन्ये शब्दनिरपेक्षाहमाकारवृत्त्युदयदर्शनात् [6]ब्रह्मचैतन्येऽपि तथा किं न स्यादिति, नेत्याह—

---

1. प्रपञ्चेति । स्वाप्नप्रपञ्चेत्यर्थः ।
2. विवरणोपन्यास इति । विवरणप्रमेयसङ्ग्रहे इत्यर्थः ।
3. अनवच्छिन्नेति । अहङ्कारानवच्छिन्नेत्यर्थः ।
4. चक्षुरादिकमिति । प्रमाणान्तराण्यादिशब्दार्थः । तेन शब्दप्रमाणानपेक्षाऽपि सूचिता ।
5. पित्तोद्रेकादिरित्यत्र आदिशब्दार्थः अन्नरसपरिणामविशेषः ।
6. ब्रह्मचैतन्ये-ईश्वरचैतन्ये । एवमुत्तरत्रापि ।

दर्शनात् । तस्मात् स्वतोऽपरोक्षमहङ्काराद्यनवच्छिन्नचैतन्यं तदधिष्ठानम् । अत एव संक्षेपशारीरके—'अपरोक्षरूपविषयभ्रमधीरपरोक्षमास्पदमपेक्ष्य भवेत् । मनसा स्वतो नयनतो यदि वा स्वपनभ्रमादिषु तथाप्रथितेः' ॥ [१-४१] इति श्लोकेन अपरोक्षाध्यासापेक्षितमधिष्ठानापरोक्ष्यं क्वचित्स्वतः क्वचिन्मानसवृत्त्या क्वचिद्बहिरिन्द्रियवृत्त्या इत्यभिधाय 'स्वतोऽपरोक्षा चितिरत्र विभ्रमस्तथापि रूपाकृतिरेव जायते । मनोनिमित्तं स्वपने मुहुर्मुहुर्विनापि चक्षुर्विषयं स्वमास्पदम् । मनोऽवगम्येऽप्यपरोक्षताबलात् तथाऽम्बरे रूपमुपोल्लिखन् भ्रमः । सितादिभेदैर्बहुधा समीक्ष्यते यथाऽक्षिगम्ये रजतादिविभ्रमः' ॥ [१-४२, ४३] इत्याद्यनन्तरश्लोकेन स्वप्नाध्यासे स्वतोऽधिष्ठानापरोक्ष्यमुदाहृतम् । न चाहङ्कारानवच्छिन्नचैतन्यमात्रमावृतमिति वृत्तिमन्तरेण न तदभिव्यक्तिरिति वाच्यम् । ब्रह्मचैतन्यमेवावृतं अविद्याप्रतिबिम्बजीवचैतन्यमहङ्कारानवच्छिन्नमप्यनावृतं इत्युपगमात् । एवं च

अहङ्काराद्यवच्छिन्नचैतन्य इति । इयं विषयसप्तमी । आदिपदं शरीरादिसङ्ग्रहार्थम् । न त्वहङ्काराद्यनवच्छिन्नजीवचैतन्ये इत्येवकारार्थः । जीवचैतन्यस्यापि व्यापकत्वं त्वम्पदार्थशोधकश्रुतितदनुकूलन्यायगम्यमेवेति दृष्टान्तासिद्धिरिति भावः । **तस्मादिति** । बिम्बभूतानवच्छिन्नब्रह्मचैतन्यस्याधिष्ठानत्वासम्भवादित्यर्थः । **स्वत इति** । वृत्तिमन्तरेणैवाभिव्यक्तमित्यर्थः । **चैतन्यमिति** । पूर्वमत इव आन्तरमेवेति शेषः । **अत एवेति** । स्वतोऽपरोक्षचैतन्यस्यैव स्वाप्नाध्यासाधिष्ठानत्वेन स्वीकारादेवेत्यर्थः । अपरोक्षरूपा विषयस्य - शुक्तिरजतादेर्या भ्रमरूपा धीः सा अपरोक्षमधिष्ठानमपेक्ष्य भवति । यद्वा अपरोक्षरूपस्य विषयस्य - शुक्तिरजतादेर्या भ्रमरूपधीः सेत्यर्थः । तच्चाधिष्ठानापरोक्ष्यं केन भवतीत्यत आह—**मनसेत्यादिना** । मनसा वा स्वतो वा यदि वा नयनत इति योजना । तत्र प्रमाणमाह—**स्वपनभ्रमादिषु तथाप्रथितेरिति** । अन्वयादिना तथा प्रतीतेरित्यर्थः । तथाहि - शुक्तीदमंशस्य नयनसन्निकर्षे सति तस्य रजताध्यासापेक्षितमारोक्ष्यं भवति नान्यथा इत्यन्वयव्यतिरेकाभ्यां क्वचिदधिष्ठानापरोक्ष्यं नयनत इति प्रथते । तथा गगननैल्याद्यध्यासापेक्षितं गगनावच्छिन्नचैतन्यरूपस्याधिष्ठानस्यापरोक्ष्यं मनसा भवतीति गम्यते । मनसेत्यनेन गगनावच्छिन्नचैतन्यव्यञ्जिका आलोकादिगोचरचाक्षुषवृत्तिर्विवक्षिता । नीरूपगगनगोचरचाक्षुषवृत्तेरसम्भवात्, चक्षुरुन्मीलनानन्तरमेव नीलं नभ इत्यादिप्रत्यक्षं नान्यथा इत्यन्वयव्यतिरेकाभ्यां गगनावच्छिन्नचैतन्याभिव्यक्तौ चाक्षुषवृत्तेरुपयोगावगमाच्च । तथा च फलबलात् अन्याकारवृत्त्याऽपि अन्यावच्छिन्नचैतन्याभिव्यक्तिरिष्यते । इदं च अद्वैतदीपिकादौ प्रपञ्चितमिति बोध्यम् । उदाहृतश्लोकस्य तात्पर्यमाह—**इति श्लोकेनेति** । **अत्रेति** । प्रकृतेऽपि भ्रमे स्वप्नाध्यासरूपे स्वतोऽपरोक्षं चैतन्यं अधिष्ठानमित्यर्थः । 'अत एव संक्षेपशारीरके स्वप्नाध्यासे स्वतोऽधिष्ठानापरोक्ष्यमुदाहृतं' इति सम्बन्धः । स्वप्नाध्यासाधिष्ठानचैतन्यापरोक्ष्यस्य स्वतस्सिद्धत्वं आक्षेपसमाधानाभ्यां दर्शयति—**न चाहङ्कारानवच्छिन्नेति** । मात्रपदं कात्स्न्यार्थकम् । तथा च शरीरान्तर्गतमपि चैतन्यं आवृतमेवेति भावः । **वृत्तिमिति** । वृत्तिरप्यनवच्छिन्नगोचरा शब्दमन्तरेण न सम्भवतीति प्रागुक्तमिति ध्येयम् । **अनावृतमिति** । तदेव स्वप्नाध्यासाधिष्ठानमिति भावः । ननु सर्वगतस्य

अहङ्कारानवच्छिन्नचैतन्येऽध्यस्यमाने स्वाप्नगजादौ तत्समनियताधिष्ठानगोचरान्तःकरण(ादि)[1]वृत्तिकृताभेदाभिव्यक्त्या प्रमातृचैतन्यस्यापि इदं पश्यामीति व्यवहारः—इत्याहुः ।

अपरे तु द्वितीयं पक्षं समर्थयन्ते—

अहङ्कारावच्छिन्नचैतन्यमधिष्ठानमिति अहङ्कारस्य विशेषणभावेनाधिष्ठानकोटिप्रवेशो नोपेयते, किं तु अहङ्कारोपहितं तत्प्रतिबिम्बरूपचैतन्यमात्रमधिष्ठानमिति । अतो 'नाहं गजः' इत्याद्यनुभवप्रसङ्ग इति ।

एवं शुक्तिरजतमपि शुक्तीदमंशावच्छिन्नचैतन्यप्रतिबिम्बे वृत्तिमदन्तःकरणगतेऽध्यस्यते ।

जीवचैतन्यस्यानावृतत्वे तस्य घटादिविषयदेशे सदा सत्त्वेन चाक्षुषादिवृत्तिमनपेक्ष्य सदा सर्वविषयावभासप्रसङ्ग इति चेत्, न - सर्वत्र विद्यमानस्यापि तस्यानुपादानतया घटादिविषयैस्सह [2]सम्बन्धाभावेन सम्बन्धार्थतया वृत्त्यपेक्षायाः प्रतिकर्मव्यवस्थायामुक्तत्वात् । ननु - अविद्याप्रतिबिम्बरूपजीवचैतन्ये शरीरान्तर्गते विशेषणत्वेनोपाधित्वेन वा अहङ्कारनिरपेक्षे अनवच्छिन्नचैतन्यशब्दिते स्वप्नाध्यासोपगमे सति तस्यैव स्वप्नकाले द्रष्टृत्वं स्यात्, न तु प्रमातुः । तस्याहङ्कारतादात्म्यापत्त्या तदवच्छिन्नस्य ततो भिन्नत्वात् । न चेष्टापत्तिः । स्वप्नकाले 'अहं श्रीकृष्णं पश्यामि' इति प्रमातुः स्वप्नपदार्थद्रष्टृत्वानुभवविरोधापत्तेः—इत्यत आह—**एवं चेति ।** स्वतोऽपरोक्षजीवचैतन्यस्याधिष्ठानत्वे सतीत्यर्थः । **तत्समनियतेति ।** यदा गजादिरध्यस्यते तदैव तदधिष्ठानगोचरान्तःकरणवृत्तिः (अविद्यावृत्तिर्वा ?) जायते । तथा च स्वाप्नगजाद्यधिष्ठानचैतन्यस्य वृत्तिद्वारा वृत्तिमदन्तःकरणसम्बन्धेन प्रमातृत्वप्राप्तौ सत्यां प्रमातुस्तद्द्रष्टृत्वं सम्भवतीत्यर्थः । **अभेदाभिव्यक्त्येति ।** उक्तप्रकारेण प्रमातृविषयचैतन्ययोरभेदाभिव्यक्त्येत्यर्थः ।

द्वितीयमिति । अवच्छिन्नचैतन्यं स्वप्नाध्यासाधिष्ठानमिति पक्षमित्यर्थः । 'अयं गजः' इति प्रत्ययस्थाने 'अहं गजः' इत्यादिप्रत्ययप्रसङ्गवारणाय अहङ्कारांशस्याधिष्ठानत्वं नाङ्गीक्रियते चेत्, तर्ह्यनवच्छिन्नस्याधिष्ठानत्वमागतमिति पूर्वमताभेदप्रसक्तिरिति शङ्कते—**किं त्विति ।** अन्तःकरणे चैतन्यप्रतिबिम्बभूतं यज्जीवचैतन्यं, तन्मात्रमधिष्ठानमुपेयते, तच्च परिच्छिन्नमेव, उपाधेः परिच्छिन्नत्वात्—इति परिहरति—**अहङ्कारोपहितमिति । अत इति ।** अहमुल्लेखप्रयोजकस्याहङ्कारात्मकान्तःकरणस्याधिष्ठानकोटावननुप्रवेशादित्यर्थः । अविद्यायां बिम्बभूतब्रह्मचैतन्यस्य तस्यां प्रतिबिम्बभूतजीवचैतन्यस्य वा स्वप्नप्रपञ्चाध्यासाधिष्ठानत्वमते तयोस्सर्वप्रमातृसाधारणत्वात् स्वप्नप्रपञ्चस्यापि साधारण्यं स्यात् । अन्तःकरणप्रतिबिम्बचैतन्यस्य तदधिष्ठानत्वे तु साधारण्यप्रसङ्गदोषो नास्तीत्याशयेनास्य द्वितीयपक्षस्य प्रवृत्तिरिति बोध्यम् ।

नन्वेवं शुक्तिरजतादेरसाधारण्यं न स्यात्, तदधिष्ठानचैतन्यस्य साधारणत्वात् - इत्याशङ्क्य हेत्वसिद्धिमाह—**एवमिति । वृत्तिमदन्तःकरणेति ।** शुक्तीदमंशसंसृष्टायां वृत्तौ शुक्तीदमंशावच्छिन्नब्रह्मचैतन्यस्य यः

---

1. इयं अन्तःकरणवृत्तिः न वक्ष्यमाणपक्षे प्रमातृत्वसंपादनार्थं आवश्यकीति बोध्यम् ।
2. सम्बन्धाभावेन—भानप्रयोजकाध्यासिकतादात्म्यसम्बन्धाभावेन ।

शुक्तीदमंशावच्छिन्नबिम्बचैतन्ये सर्वसाधारणे तस्याध्यासे सुखादिवदनन्यवेद्यत्वाभावप्रसङ्गात् इति केचित्।

केचित्तु बिम्बचैतन्य एव तदध्यासमुपेत्य यदीयाज्ञानोपादानकं यत् तत् तस्यैव प्रत्यक्षं न जीवान्तरस्य इत्यनन्यवेद्यत्वमुपपादयन्ति।

स्वाप्नपदार्थानुभवस्य अनैन्द्रियकत्वनिरूपणम्

ननु शुक्तिरजताध्यासे चाक्षुषत्वानुभवः साक्षाद्वा अधिष्ठानज्ञानद्वारा तदपेक्षणाद्वा समर्थ्यते। स्वाप्नगजादिचाक्षुषत्वानुभवः कथं समर्थनीयः?

उच्यते—

न तावत् तत्समर्थनाय स्वाप्नदेहवद्विषयवच्च इन्द्रियाणामपि प्रातिभासिको विवर्तः शक्यते वक्तुम्। प्रातिभासिकस्याज्ञातसत्त्वाभावात्, इन्द्रियाणां चातीन्द्रियाणां सत्त्वेऽज्ञातसत्त्वस्य वाच्यत्वात्।

प्रतिबिम्बः तस्मिन्नध्यस्यते, स च प्रतिबिम्बो वृत्तिगत एव, तस्य वृत्तिवृत्तिमतोरभेदोपचारात् वृत्तिमदन्तःकरणगतत्वोक्तिः अनन्यवेद्यत्वस्फुटीकरणायेति बोध्यम्। वृत्तिगतस्य ब्रह्मप्रतिबिम्बस्य शुक्तिरजताधिष्ठानत्वानुपगमे साधारण्यप्रसङ्गतादवस्थ्यमभिप्रेत्याह—**शुक्तीदमंशावच्छिन्नेति**। सुखादेरिव शुक्तिरजतादेर्यदनन्यवेद्यत्वं तस्याभावप्रसङ्गादित्यर्थः। देवदत्तसुखदुःखरागद्वेषादिकं देवदत्तादन्यस्य वेद्यं-प्रत्यक्षं न भवतीत्यनन्यवेद्यंतदित्यर्थः।

अधिष्ठानचैतन्यस्य साधारणत्वेऽपि शुक्तिरजताद्युपादानाज्ञानस्यासाधारण्यात् शुक्तिरजतादेरसाधारण्यमित्याह— **केचित्त्विति। बिम्बचैतन्य एवेति**। वृत्तिगतप्रतिबिम्बं प्रति बिम्बचैतन्ये इत्यर्थः। यद्वा अविद्याप्रतिबिम्बं प्रति बिम्बभूते ब्रह्मचैतन्ये शुक्तीदमंशावच्छिन्ने इत्यर्थः। न त्वसाधारणे वृत्तिप्रतिबिम्बे-इत्येवकारार्थः। **यदीयेति**। यद्रजतं यत्पुरुषीयाज्ञानोपादानकं तद्रजतं तस्यैव पुरुषस्य प्रत्यक्षं नान्यस्येति कल्पनोपपत्तेः न शुक्तिरजतादेःसाधारण्यप्रसङ्ग इत्यर्थः।

एवं स्वप्नप्रपञ्चाध्यासस्याधिष्ठानं निरूप्य स्वाप्नपदार्थानुभवः किमैन्द्रियकः किं वा साक्षिरूप इति संशये निर्णयाय आक्षेपमवतारयति—**नन्विति। साक्षाद्वेति**। इदं च—शुक्तिरजतादेरैन्द्रियकत्वमिति कवितार्किकमतानुसारेणेति—बोध्यम्। शुक्तिरजतादेस्साक्षिभास्यत्वमतानुसारेणाह—**अधिष्ठानज्ञानद्वारेति**। धर्मिज्ञानद्वारा चक्षुरपेक्षत्वात् शुक्तिरजतादेरित्यर्थः। **कथमिति**। स्वाप्नगजादिचाक्षुषत्वानुभवो हि वासनामयैरिन्द्रियैर्वा व्यावहारिकैरिन्द्रियैर्वा सूक्ष्मेन्द्रियैर्वा आरोपरूपतया वा समर्थनीयतया सम्भाव्यते। तथा च स केन प्रकारेण समर्थनीय इति प्रश्नार्थः।

चतुर्थप्रकारेण तत्समर्थनं प्रतिजानीते—**उच्यत इति**।

आद्यं प्रकारत्रयं निराकरोति—**न तावदित्यादिना**। वासनामयैः प्रातिभासिकैरिन्द्रियैश्चाक्षुषत्वानुभवसमर्थनप्रकारं प्रथमं दूषयति —**स्वाप्नदेहवदिति**। स्वाप्नदेहः स्वाप्नाश्च विषयाः प्रातिभासिकाश्चैतन्य-

नापि व्यावहारिकाणामेवेन्द्रियाणां स्वस्वगोलकेभ्यो निष्क्रम्य स्वाप्नदेहमाश्रित्य स्वस्वविषयग्राहकत्वं वक्तुं शक्यते। स्वप्नसमये तेषां व्यापाररराहित्यरूपोपरतिश्रवणात्, व्यावहारिकस्य स्पर्शनेन्द्रियस्य स्वोचितव्यावहारिकदेशसम्पत्तिविधुरान्तःशरीरे स्वाधिकपरिमाणकृत्स्नस्वाप्नशरीरव्यापित्वायोगाच्च। तदेकदेशाश्रयत्वे च तस्य स्वाप्नजलावगाहनजन्यसर्वाङ्गीणशीतस्पर्शानिर्वाहात्।

अत एव—स्वप्ने जाग्रदिन्द्रियाणामुपरतावपि तैजसव्यवहारोपयुक्तानि सूक्ष्मशरीरावयवभूतानि सूक्ष्मेन्द्रियाणि सन्तीति तैः स्वाप्नपदार्थानामैन्द्रियकत्वं इत्युपपादनशङ्काऽपि—निरस्ता। जाग्रदिन्द्रियव्यतिरिक्तसूक्ष्मेन्द्रियाप्रसिद्धेः।

किञ्च 'अत्रायं पुरुषः स्वयंज्योतिः [बृ. उ.-४-३] इति जागरे आदित्यादिज्योतिर्व्यतिकराच्चक्षुरादिवृत्तिसञ्चाराच्च दुर्विवेकं आत्मनः स्वयंज्योतिष्ट्वमिति स्वप्नावस्थामधिकृत्य तत्रात्मनः

विवर्तरूपा अभ्युपगम्यन्ते, न तथा इन्द्रियाणां स्वरूपभूतश्चैतन्यविवर्तः प्रातिभासिकोऽभ्युपगन्तुं शक्यत इत्यर्थः। **वाच्यत्वादिति।** तेषामज्ञातसत्त्वनियमस्य दर्शनात् दृष्टानुसारित्वाच्च कल्पनाया इति भावः।

द्वितीयं प्रकारं निराकरोति—**नापीति।** ननु-व्यावहारिकेन्द्रियैःस्वाप्नगजादीनां चाक्षुषत्वानुभवसमर्थनप्रकारस्योत्थितिरेव नास्ति, तेषां जाग्रद्देहस्थत्वेन स्वाप्नदेहस्थत्वाभावात् - इत्याशङ्क्याह—**स्वस्वेति। श्रवणादिति।** 'य एषु सुप्तेषु जागर्ति' [क-उ-२-२-८] इत्यादिश्रुतिष्विति शेषः। श्रुतौ सुप्तेष्वित्यनन्तरं करणेष्विति शेषः। करणानां स्वापो नाम उपरतिः। सा च स्वप्नसमये व्यापारराहित्यरूपैव, न तु तेषां स्वरूपोपरतिः, तस्याः सुषुप्तावेव श्रवणात् इति बोध्यम्। त्वगिन्द्रियमात्रे दोषान्तरमाह—**व्यावहारिकस्येति। स्वस्य** - स्पर्शनेन्द्रियस्य उचितो यो व्यावहारिकदेशः तत्संपत्तिविधुरे शरीरस्यान्तःप्रदेशे स्थितं व्यावहारिकत्वगिन्द्रियपरिमाणापेक्षया कदाचिदधिकपरिमाणवत् स्वाप्नदेहं कृत्स्नं न व्याप्नुयात् त्वगिन्द्रियमित्यर्थः। व्यावहारिकस्पर्शनेन्द्रियस्योचितदेशकालसंपत्तिवैधुर्यविशेषणेन तस्य स्वप्नदेहप्रवेशायान्तश्शरीरे गमनमेव न सम्भवतीति सूचितम्। यदि व्यावहारिकस्पर्शनेन्द्रियस्य कृत्स्नस्वाप्नदेहव्यापित्वायोगः, तर्हि स्वाप्नदेहैकदेशाश्रयत्वमेवास्तु, को दोषः, तत्राह—**तदेकदेशेति। तस्येति।** स्पर्शनेन्द्रियस्येत्यर्थः।

तृतीयं प्रकारं निराकरोति—**अत एवेति।** व्यावहारिकस्पर्शनेन्द्रियस्यैव स्वाधिकपरिमाणकृत्स्नस्वाप्नशरीरव्यापित्वायोगे सति तदवयवभूतसूक्ष्मस्पर्शनेन्द्रियस्य सुतरां स्वाप्नदेहव्यापित्वायोगादेवेत्यर्थः। तैजसः-स्वप्नावस्थागतो जीवः। सूक्ष्मशरीरशब्देन व्यावहारिकाण्येकादशेन्द्रियाण्युच्यन्ते। स्पर्शनेन्द्रियमात्रे दोषमतिदेशेन दर्शयित्वा साधारणदोषमाह—**जाग्रदिन्द्रियेति।**

नन्वप्रसिद्धान्यपि स्वप्नकाले पदार्थानां चाक्षुषत्वाद्यनुभवानुरोधेन कल्प्यन्ते-इत्याशङ्क्य श्रुतिविरोधान्नैवमित्याह—**किं चात्रेति।** श्रुतौ अत्रेतिपदेन स्वप्नावस्थाग्रहणस्य तात्पर्यमाह—**जागर इति।** जागरे कार्य-

स्वयञ्ज्योतिष्ट्वं प्रतिपादयति। अन्यथा तस्य सर्वदा स्वयञ्ज्योतिष्ट्वेन अत्रेति वैयर्थ्यात्। तत्र यदि स्वप्नेऽपि चक्षुरादिवृत्तिसञ्चारः कल्प्येत, तदा तत्रापि जागर इव तस्य स्वयञ्ज्योतिष्ट्वं दुर्विवेकं स्यादिति उदाहृता श्रुतिः पीड्येत। ननु स्वप्ने चक्षुराद्युपरमकल्पनेऽपि अन्तःकरणमनुपरतमास्त इति परिशेषासिद्धेः न स्वयञ्ज्योतिष्ट्वविवेकः। मैवम्—'कर्ता शास्त्रार्थवत्त्वात्' [ब्र-सू-२-३-३३] इत्यधिकरणे [1]न्यायनिर्णयोक्तरीत्या अन्तःकरणस्य चक्षुरादिकरणान्तरनिरपेक्षस्य ज्ञानसाधनत्वा-

---

करणसंघातानामासनगमनादिलक्षणव्यवहारसाधनत्वेनादित्यादिज्योतींषि व्यवह्रियमाणपदार्थैस्सह सङ्कीर्णानि तिष्ठन्ति, तथा व्यवहारसाधनत्वेनैव चक्षुरादिजन्या वृत्तयो विषयदेशं प्रति गच्छन्तीत्यर्थः। व्यतिकरः- संपर्कः-संसर्ग इति यावत्। जागरे दुर्विवेकमिति सम्बन्धः। दुःखेन विवेको निर्णयो यस्य तत् दुर्विवेकम्, अनायासेन निर्णेतुमशक्यमिति यावत्। आत्मनः स्वयंज्योतिष्ट्वं नाम अन्यानवभास्यत्वे सति स्वव्यतिरिक्तसकलावभास-कत्वयोग्यत्वम्। तच्च जागरे ग्रहीतुमशक्यम्। तथा हि—आत्मव्यतिरिक्तस्य सर्वस्य आत्ममात्रावभास्यत्वं वक्तुं न शक्यते, आदित्यादिज्योतिषां चक्षुरादिजन्यवृत्तिज्ञानानां च लोके जगदवभासकत्वेन प्रसिद्धानां सत्त्वात्, आत्मनोऽप्यहमितिज्ञानप्रकाश्यत्वेन तस्यान्यानवभास्यत्वस्य वक्तुमशक्यत्वाच्च - इति शङ्कायाः जागरे परिहर्तुमशक्य-त्वेन जागरे स्वयंज्योतिष्ट्वनिर्णयायोगात्। स्वप्नावस्थायां तु जागरणे प्रसिद्धानामादित्यादिज्योतिषां चक्षुरादि-जन्यज्ञानानां चाभावात् आत्मचैतन्यमात्रावभास्यं स्वाप्नं जगदिति निर्णयः सम्भवति। तथा अहमिति ज्ञानं वृत्तिरूपं आत्मनः प्रकाशकं न भवतीति वक्ष्यते। तथा च अन्यानवभास्यत्वे सति सकलजगदवभासकत्व-योग्यत्वरूपं स्वयंज्योतिष्ट्वमात्मनः स्वप्नावस्थासाक्षित्वेन निर्णेतुं शक्यमित्यर्थः। ननु स्वप्नदशायामेव तस्य स्वयंज्योतिष्ट्वं न त्ववस्थान्तर इति यथाश्रुतार्थ एव श्रुतेस्तात्पर्यं किं न स्यादिति, नेत्याह—**अन्यथेति**। श्रुतेः स्वप्नावस्था-माश्रित्य तत्साक्षित्वेन स्वयंज्योतिष्ट्वमात्मनः सुविवेकमिति तात्पर्यकल्पन इत्यर्थः। **सर्वदेति**। 'तमेव भान्तमनु-भाति सर्वं' [क-उ. ५-१५] इत्यादिश्रुतिपर्यालोचनया तस्य सर्वदा स्वयंज्योतिष्ट्वनिश्चयादिति भावः। **अत्रेतीति**। अत्रेति विशेषणस्य व्यावर्तकत्वासम्भवेन व्यर्थत्वं स्यात्। अतो न यथाश्रुतार्थे तात्पर्यं किं तूक्तार्थे तात्पर्यमिति भावः। एवं श्रुतितात्पर्यं निरूप्य स्वप्नकाले चक्षुरादिव्यापारकल्पनं तद्बाधितमित्याह—**तत्रेति**। स्वयंज्योतिष्ट्वं स्वप्नावस्थासाक्षित्वेन सुगमं-इत्यत्र श्रुतितात्पर्ये सिद्धे सतीत्यर्थः। ननु 'स्वाप्नजगतोऽवभासकान्तराभावादात्ममात्र-भास्यत्वं' इत्युक्तमयुक्तमिति शङ्कते—**नन्विति**। **अनुपरतमास्त इतीति**। तथा च मनस एव स्वाप्न-जगदवभासकत्वसम्भवात् अवभासकान्तराभावरूपपरिशेषासिद्धिरित्यर्थः। स्वप्नावस्थायां मनसो ज्ञानकरणत्वम-सिद्धम्, अतस्तस्य स्वाप्नजगदवभासकत्वासम्भवात् परिशेषसिद्धिः–इति परिहरति—**मैवमिति**। आत्मा कर्ता भवितुमर्हति, तथासति 'कर्ता विज्ञानात्मा पुरुषः' इत्यादिशास्त्रस्यार्थवत्त्वोपपत्तेः-इति सूत्रार्थः। **उक्तरीत्येति**।

---

1. न्यायनिर्णयोक्तरीत्येति। 'कर्ता शास्त्रार्थवत्त्वात्' इति सूत्रे आत्मनः कर्तृत्वे श्रुतार्थापत्तिः श्रुतिश्च प्रमाणत्वेनोक्ता, तत्र किमिति प्रत्यक्षं प्रमाणत्वेन नोक्तं? इत्याशङ्कापरिहाराय 'न तावत् बाह्यं चक्षुरादि तत्र प्रमाणं भवति,

भावाद्वा [1]तत्त्वप्रदीपिकोक्तरीत्या स्वप्ने तस्यैव गजाद्याकारेण परिणामेन ज्ञानकर्मतयाऽवस्थितत्वेन तदानीं ज्ञानसाधनत्वायोगाद्वा परिशेषोपपत्तेः। न च स्वप्नेऽन्तःकरणवृत्त्यभावे उत्थितस्य स्वप्नदृष्टगजाद्यनुसन्धानानुपपत्तिः। सुषुप्तिकल्पितया अविद्यावृत्त्या तदुपपत्तेः। 'सुषुप्तौ तदवस्थोपहितमेव स्वरूपचैतन्यं अज्ञानसुखादिप्रकाशः, उत्थितस्यानुसन्धानमुपाधिभूतावस्थाविनाशजन्यसंस्कारेण' इति वेदान्तकौमुद्यभिमते सुषुप्तावविद्यावृत्त्यभावपक्षे इहापि स्वाप्नगजादिभासकचैतन्योपाधिभूतस्वप्नावस्थाविनाशजन्यसंस्कारादनुसन्धानोपपत्तेश्च। अथवा 'तदेतत् सत्वं येन स्वप्नं पश्यति' [पै. र. ब्रा.उ] इत्यादिश्रुतेः अस्तु स्वप्नेऽपि कल्पतरूक्तरीत्या स्वाप्नगजादिगोचरान्तःकरणवृत्तिः[2]। न च तावता परिशेषासिद्धिः। अन्तःकरणस्य अहमितिगृह्यमाणस्य सर्वात्मना[3] जीवैक्येनाध्यस्ततया लोकदृष्ट्या

मनस उपादानत्वेन स्वतो ज्ञानकरणत्वं नास्तीत्युक्तरीत्येत्यर्थः। **तत्त्वप्रदीपिकोक्तरीत्येति**। स्वप्ने मनस एव विविधसंस्कारविशिष्टस्य स्वाप्नप्रपञ्चाकारेण परिणामित्वं, न त्वविद्यायाः, तस्यास्संस्काराश्रयत्वाभावेन विचित्रपदार्थपरिणामित्वायोगात् - इत्याद्युक्तरीत्येत्यर्थः। **कर्मतयेति**। विषयत्वेनैवोपक्षीणस्य विषयित्वरूपप्रकाशकत्वाभावादित्यर्थः। तदानीमित्यनेन—अस्तु वा जागरणे ज्ञानकरणत्वं, तथापि स्वप्ने तन्नोपेयते। तस्य विषयत्वेनैवावस्थितत्वात् इति - सूचितम्। **अनुपपत्तिरिति**। संस्काराभावादिति भावः। ननु - सुषुप्तावप्यविद्यावृत्तिर्न कल्पनीया, सुषुप्त्यादिसाक्षिचैतन्यस्य नित्यत्वेऽपि साक्षिभास्यायास्सुषुप्त्यवस्थाया विनाशित्वेन विषयभूतसुषुप्त्यवस्थाविशिष्टवेषेण तत्साक्षिणो नाशलक्षणसंस्कारसम्भवात् सुषुप्तिसुखादीनामनुसन्धानोपपत्तिरिति चेत्, तर्हि स्वप्नसाक्षिणोऽपि प्रातिभासिकविषयविशिष्टवेषेण नाशलक्षणसंस्कारसम्भवात् स्वप्नदृष्टगजाद्यनुसन्धानोपपत्तिरित्याह—**सुषुप्ताविति**। तत्पदं सुषुप्तिपरम्। **अज्ञानसुखादिप्रकाश इति**। अज्ञानसुखाद्यनुभव इत्यर्थः। **इहापीति**। स्वप्नावस्थायामपीत्यर्थः। **उपाधिभूतेति**। विषयतया उपाधिभूतेत्यर्थः। जागर इव स्वप्नेऽपि गजादिगोचरान्तःकरणवृत्तिरेवोपेयते, अतो न संस्काराभावशङ्कावकाशः, न च तदा अन्तःकरणवृत्तिसत्त्वे परिशेषासिद्धिरिति वाच्यम्। परिशेषस्यापि लोकदृष्ट्या उपपत्तेः - इति मतान्तरमाह—**अथवेति**। 'सत्त्वशब्दितान्तःकरणस्य तृतीयाश्रुत्या स्वाप्नगजादिगोचरज्ञानकरणत्वं भाति। तथा च श्रुतिप्रामाण्यात् स्वप्ने चक्षुरादि-

---

आत्मधर्माणां बहिरिन्द्रियायोग्यत्वस्य सर्वसम्प्रतिपन्नत्वात्। नापि मनः, मनसः चक्षुरादिनिरपेक्षस्य प्रत्यक्षसाधनत्वाभावात्। न च 'सत्येव मनसि आत्मनि कर्तृत्वोपलब्धिः असति च मनसि सुषुप्ते कर्तृत्वानुपलब्धिः' इत्यन्वयव्यतिरेकाभ्यां मनसः चक्षुरादिनिरपेक्षस्य प्रत्यक्षसाधनत्वं शङ्क्यम्। उक्तान्वयव्यतिरेकयोः कर्तृत्वसत्ताकारणतया अन्यथासिद्धेः' इति शारीरकन्यायनिर्णये विवरणाचार्योक्तयुक्त्येत्यर्थः। चक्षुरादिनिरपेक्षस्येत्यनेन सूचिता युक्तिः टीकायामुक्ता।

1. तत्त्वप्रदीपिकोक्तेति। प्रथमपरिच्छेदे आत्मस्वप्रकाशत्ववादे 'अत्रायं पुरुषः स्वयञ्ज्योतिः' इति श्रुतेः आत्मस्वप्रकाशत्वे प्रमाणत्वोपपादनावसरे कथितेत्यर्थः। कल्पतरावपि सन्ध्याधिकरणे उक्तमेतत्। तस्यैवेति मूलस्थेन एवकारेण अविद्यापरिणामत्वं स्वाप्नगजादीनां निरस्तम्, तत्र युक्तिः टीकोक्ता।

2. अन्तःकरणवृत्तिरिति। न चैवं स्वाप्नगजादिज्ञानस्य प्रमात्वप्रसङ्गः। निद्रादिदोषप्राबल्यात् अप्रमात्वोपपत्तेः इति भावः। 3. सर्वात्मना—स्वरूपेण धर्मविशिष्टरूपेण च।

तस्य तद्व्यतिरेकाप्रसिद्धेः परिशेषार्थं चक्षुरादिव्यापाराभावमात्रस्यैवापेक्षितत्वात्। प्रसिद्धदृश्यमात्रं दृगवभासयोग्यमिति निश्चयसत्त्वेन परिशेषार्थमन्यानपेक्षणात्।

तस्मात् सर्वथाऽपि स्वप्ने चक्षुरादिव्यापारासम्भवात् स्वाप्नगजादौ चाक्षुषत्वाद्यनुभवो भ्रम एव।

ननु स्वप्नेऽपि 'चक्षुरुन्मीलने गजाद्यनुभवः तन्निमीलने न' इति जागर इव गजाद्यनुभवस्य चक्षुरुन्मीलनाद्यनुविधानं प्रतीयत इति चेत्, चक्षुषा गजादिकं पश्यामीत्यनुभववत् अयमपि कश्चित् स्वप्नभ्रमो भविष्यति - यत् केवलसाक्षिरूपे स्वाप्नगजाद्यनुभवे चक्षुराद्यनुविधानं तदनुविधायिनी वृत्तिर्वा अध्यस्यते। किमिव हि दुर्घटमपि भ्रमं माया न करोति, विशेषतो निद्रारूपेण परिणता। यस्या माहात्म्यात् स्वप्ने रथः प्रतीतः क्षणेन मनुष्यः प्रतीयते, स च क्षणेन मार्जारः, स्वप्नद्रष्टुश्च न पूर्वापरविरोधानुसन्धानम्। तस्मादन्वयाद्यनुविधानप्रतीतितौल्येऽपि जाग्रद्गजाद्यनुभव एव चक्षुरादिजन्यः, न स्वाप्नगजाद्यनुभवः।

जन्यवृत्त्यभावेऽपि मानसवृत्तिरस्ति, अतो न संस्कारानुपपत्तिः' इति कल्पतरूक्तरीत्येत्यर्थः। अन्तःकरणस्य सर्वात्मना जीवचैतन्यैक्येनाध्यस्ततया अहंपश्यामीत्यादिरूपेण द्रष्टृतया गृह्यमाणस्य तस्य - अन्तःकरणस्य अज्ञदृष्ट्या तस्माच्चिदात्मनस्सकाशाद्भेदाप्रसिद्ध्या परिशेषार्थं लोकप्रसिद्धद्रष्टृव्यतिरिक्तकरणादिव्यापाराभावस्यैवापेक्षितत्वात् तावता परिशेषासिद्धिर्न चेत्यर्थः। तावतेत्यस्य अन्तःकरणवृत्तिसद्भावमात्रेणेत्यर्थः। एतदुक्तं भवति—अन्तःकरणवृत्तिलक्षणो व्यापारो वस्तुतः करणव्यापारोऽपि प्रतीतितो द्रष्टृव्यापारो भवति, अन्तःकरणस्य द्रष्टृत्वेन गृहीतत्वाल्लोकैः - इति। स्वयंज्योतिष्ट्वनिर्णयप्रकारं दर्शयति—**प्रसिद्धेति**। पूर्वं 'उच्यते' इत्यनेन सूचितां स्वाप्नपदार्थेषु चाक्षुषत्वाद्यनुभवस्य गतिं इदानीं प्रपञ्चयति—**तस्मादिति**। पञ्चमीं व्याचष्टे—**सर्वथेति**। पूर्वोक्तसर्वप्रकारैरपीत्यर्थः। स्वाप्नानुभवस्य साक्षिरूपत्वे चक्षुराद्यनुविधानविरोधमाशङ्क्य दृष्टान्तेन समाधत्ते—**ननु स्वप्नेऽपीत्यादिना। तदनुविधायिनीति**। जागरे चक्षुराद्यनुविधायिनी या प्रसिद्धा वृत्तिः सा स्वप्नसाक्षिण्यध्यस्यते—इति यथाश्रुतार्थो न ग्राह्यः। अन्यथाख्यातिप्रसङ्गात्। किं तु 'तदेतत्सत्त्वं येन स्वप्नं पश्यति' इति श्रुत्यनुसारेण कल्पतरुकारैर्या गजादिगोचरमानसवृत्तिरुपेता, तस्यां तदनुविधायित्वं वा अध्यस्यते इत्यर्थः। तथा च 'केवलसाक्षिरूपे स्वाप्नगजाद्यनुभवे चक्षुराद्यनुविधानमध्यस्यते, तदनुविधायिनी वृत्तिर्वा तत्राध्यस्यते' इति यत्, तच्च भ्रममात्रमित्यर्थः। नन्वेतावान् भ्रमो दुर्घट इत्याशङ्क्याह—**किमिव हीति**। दुर्घटमपि भ्रमं माया किमिव न करोतीति सम्बन्धः। किमिव-केन दृष्टान्तेन न करोति। दुर्घटाकरणे मायायाः दृष्टान्तो नास्तीत्यर्थः। प्रत्युत तस्यास्तत्कारित्वमैन्द्रजालिकमायादौ प्रसिद्धमिति हिशब्दार्थः। वियदादिप्रपञ्चभ्रमहेतुभूता माया दुर्घटमपि प्रपञ्चभ्रमं व्यवस्थितरूपं घटयति, निद्रारूपेण परिणता तु सा ततो विलक्षणमेव भ्रमं करोतीति मत्वा विशेषत इत्युक्तम्। **यस्या इति**। निद्रारूपेण परिणताया इत्यर्थः। स्वप्ने चाक्षुषत्वाद्यनुभवस्य गतिनिरूपणमुपसंहरति—**तस्मादिति**। स्वप्ने चक्षुरादिव्यापारासम्भवादित्यर्थः।

दृष्टिसृष्टिवादनिरूपणम्

दृष्टिसृष्टिवादिनस्तु **कल्पितस्याज्ञातसत्त्वमनुपपन्नमिति कृत्स्नस्य जाग्रत्प्रपञ्चस्य दृष्टिसमसमयां सृष्टिमुपेत्य घटादिदृष्टेश्चक्षुःसन्निकर्षानुविधानप्रतीतिं दृष्टेः पूर्वं घटाद्यभावेनासङ्गच्छमानां स्वप्नवदेव समर्थयमानाः जाग्रद्दजाद्यनुभवोऽपि न चाक्षुष इत्याहुः ।**

ननु - दृष्टिसृष्टिमवलम्ब्य कृत्स्नस्य जाग्रत्प्रपञ्चस्य कल्पितत्वोपगमे कस्तस्य कल्पकः। निरुपाधिरात्मा वा, अविद्योपहितो वा। नाद्यः—मोक्षेऽपि साधनान्तरनिरपेक्षस्य कल्पकस्य सत्त्वेन प्रपञ्चानुवृत्त्या संसाराविशेषप्रसङ्गात् । न द्वितीयः—अविद्याया अपि कल्पनीयत्वेन तत्कल्पनात्प्रागेव कल्पकसिद्धेर्वक्तव्यत्वात् ।

ये त्वधिकारिणो बहुविधज्ञानकर्मानुष्ठानसाधितनिरतिशयपरमेश्वरप्रसादमहिम्ना नितान्तनिर्मलीकृतान्तःकरणाः सन्तो जागरेऽपि स्वप्नाद्विशेषं न पश्यन्ति, तान् ब्रह्मविद्याकामान् अधिकृत्य प्रवृत्तां कृत्स्नस्य जगतः प्रबोधस्वापावस्थयोः प्रभवप्रलयप्रतिपादिकां [1]श्रुतिं अनुसृत्य दृष्टिसृष्टिवादः पूर्वाचार्यैर्निरूपितः। तं स्वप्नविचारेण बुद्धिमागतं दर्शयति—**दृष्टिसृष्टिवादिनस्त्विति**। 'दृष्ट्या सह समः समयो यस्याः(सा) तां सृष्टिं कृत्स्नस्य जाग्रत्प्रपञ्चस्योपेत्य' इत्यत्र पूर्ववाक्येन हेतुमाह— **कल्पितस्येति**। स्वाप्नप्रपञ्चस्येवेति शेषः। घटादिदृष्टेर्या अनुविधानप्रतीतिः तामसङ्गच्छमानां स्वप्नवदेव–भ्रममात्ररूपां समर्थयमाना इति सम्बन्धः। असङ्गच्छमानत्वे हेतुः–**दृष्टेः पूर्वं घटाद्यभावेनेति**। तत्र च हेतुःदृष्टिसमसमया सृष्टिः। **न चाक्षुष इति**। किं तु स्वप्नानुभववदेव केवलसाक्षिरूप इत्यर्थः।

कल्पितत्वोपगम इति। [2]प्रातिभासिकत्वोपगम इत्यर्थः। किंशब्दसूचितं विकल्पं दर्शयति—**निरुपाधिरिति**। निरपेक्षश्चिदात्मैव संसारकल्पक इति प्रथमं कल्पं दूषयति—**मोक्षेऽपीति**। **अनुवृत्त्येति**। [3]अनुवृत्त्यापत्त्येत्यर्थः। **अविद्याया अपीति**। तस्या अपि कादाचित्कत्वाभ्युपगमे अविद्यासृष्टेः पूर्वमेव अविद्योपहितस्य चिदात्मनोऽविद्यादिकल्पकस्य वक्तव्यत्वात् तदभावादविद्यादिसृष्टिर्न सम्भवति, तथा च सदा संसारानुपलम्भप्रसङ्ग इति भावः।

---

1. श्रुतिमिति। 'यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एव एकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैं रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन् एवमेव एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' इति कौषीतकिश्रुतिमित्यर्थः।

ब्राह्मलौकिकपदार्थानां स्वरूपविचारावसरे 'अत्यल्पमिदमुच्यते जाग्रद्विषयाऽपि मानसप्रत्ययाभिनिर्वृत्ता एव' इत्यादि छान्दोग्याष्टमपञ्चमभाष्यमपि श्रुतेः दृष्टिसृष्टिपरत्वे प्रमाणम्।

2. प्रातिभासिकत्वोपगमे इत्यर्थ इति। एतेन-सृष्टदृष्ट्यवलम्बेऽपि कल्पितत्वोपगमात् दृष्टिसृष्टिमवलम्ब्येति विशिष्योक्तिर्व्यर्थेतिशङ्का निरस्ता।

3. मोक्षे प्रपञ्चानुवृत्तेरभावात् व्याचष्टे—अनुवृत्त्यापत्त्येति।

अत्र केचिदाहुः—पूर्वपूर्वकल्पिताविद्योपहित[1] उत्तरोत्तराविद्याकल्पकः। अनिदंप्रथमत्वाच्च कल्पककल्पनाप्रवाहस्य नानवस्था दोषः। न च - अविद्याया अनादित्वोपगमाच्छुक्तिरजतवत् कल्पितत्वं न युज्यते, अन्यथा साद्यनादिविभागानुपपत्तेरिति - वाच्यम्। यथा स्वप्ने कल्प्यमानं गोपुरादि किञ्चित् पूर्वसिद्धत्वेन कल्प्यते किञ्चित्तदानीमुत्पाद्यमानत्वेन, एवं जागरेऽपि किञ्चित् कल्प्यमानं सादित्वेन कल्प्यते किञ्चिदन्यथेति तावता साद्यनादिविभागोपपत्तेः। एतेन कार्यकारणविभागोऽपि व्याख्यात इति।

नन्वेवमपि प्रथमाविद्यायाः कः कल्पकः तत्राह—**अनिदमिति**। इदंप्रथमत्वाभावात् प्रथमाविद्यैव काचिन्नास्ति, अतो न चोद्यावकाश इति भावः। तर्ह्यनवस्थेत्याशङ्क्य - सा न दोषाय, अविद्योपहितात्मनः प्रपञ्चकल्पकत्वेन श्रुतिसिद्धस्य[2] पूर्वपूर्वाविद्यां विना तत्कल्पकत्वनिर्वाहाभावात् - इत्याशयेनाह— **नानवस्थादोष इति**। ननु - 'जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकमनादयः'[3]। इति सिद्धान्तविरुद्धं अविद्यायाः प्रवाहानादित्वकल्पनम्। तस्याः स्वरूपानादित्वस्यैव सिद्धान्तसङ्ग्रहश्लोके चैतन्यवत् प्रतीतेः इति शङ्कते—**न चेति**। सिद्धान्तमुल्लङ्घ्य प्रवृत्तावपि दोषमाह—**अन्यथेति**। अविद्यादीनां स्वरूपानादित्वानुपगम इत्यर्थः। **अनुपपत्तेरिति**। उक्तविभागस्य लोकशास्त्रसिद्धत्वादिति भावः। श्रुत्येकसमधिगम्यविशुद्धचैतन्यव्यतिरिक्तमात्रे दृष्टिसृष्टिमुपेत्यैव साद्यनादिविभागबोधकलौकिकवैदिकप्रमाणानां सिद्धान्तप्रवादस्य च आलम्बनत्वेन भ्रमविशेषं सदृष्टान्तमाह- **यथेत्यादिना**। **किञ्चिदन्यथेति**। किञ्चित्—अविद्यादिकम्, अन्यथा—अनादित्वेन, कल्प्यते पूर्वपूर्वाविद्योपहितेनात्मनेत्यर्थः। तावता-कल्पनामात्रेणेत्यर्थः। ननु-प्रत्यक्षे विषयस्य कारणतया घटादिदृष्टेः पूर्वमज्ञातो घटादिर्वाच्यः। अन्यथा कार्यकारणविभागो न स्यात्। तथा अविद्योपहितस्य चिदात्मन एकस्यैव स्वस्मिन् संसारकल्पकत्वे संसारवतो जीवस्यैकत्वेन गुरुशिष्यविभागो देवतिर्यङ्मनुष्यादिविभागश्च न स्यात् इति - अत आह—**एतेनेति**। साद्यनादिविभागोपपत्तिकथनेनेत्यर्थः। **व्याख्यात इति**। वस्तुतः प्रत्यक्षे विषयस्याकारणत्वेऽपि स तत्कारणत्वेन कल्प्यते, तथा अन्यदपि स्वप्नभ्रमवदेव सर्वमूह्यमित्यर्थः।

---

1. पूर्वपूर्वकल्पिताविद्योपहित इति। न चैवं-उत्तरोत्तराविद्याकाले पूर्वपूर्वाविद्यानामप्यनुवृत्त्यापत्तिः, ब्रह्मज्ञानं विना अविद्याया निवृत्त्यसम्भवात्-इति शङ्क्यम्। इष्टापत्तेः। न चैवं तावदुपहितत्वमात्मनः स्यादिति वाच्यम्। तत्रापीष्टापत्तेः। न च तावतीनां प्रत्यक्षानुभवः स्यादिति वाच्यम्। इष्टापत्तेः। न जानामीति अज्ञानत्वेन सर्वानुभवात्। न च अविद्यानानात्वानुभवापत्तिः। सजातीयसंवलनेन भेदाप्रतीत्या नानात्वाननुभवोपपत्तेः।

2. श्रुतिसिद्धस्येति। तथा च बीजाङ्कुरस्थले इव प्रामाणिकत्वात् अनवस्था न दोष इति भावः।

3. षडस्माकमनादय इति। न च - ईश्वरचिन्मात्रयोर्भेदः जीवचिन्मात्रयोर्भेदश्च स्वरूपानादिरिति अष्टाविति वक्तव्यम्, न षडिति-इति वाच्यम्। भेदराशित्वेन त्रयाणामेकीकरणात् षडित्यस्योपपत्तेः। अत एव 'जीव ईशो विशुद्धा चित् भेदस्तस्याः तयोर्द्वयोः। अविद्यातच्चितोर्योगः षडस्माकमनादयः' इत्यपि पठन्ति। तस्याः-शुद्धचितः सकाशात् तयोः—जीवेशयोः भेदः, तयोर्द्वयोः अन्योन्यञ्च भेदः इति तदर्थः।

अन्ये तु—वस्तुतोऽनाद्येवाविद्यादि, तत्र दृष्टिसृष्टिर्नोपेयते, किं तु (ततः) अन्यत्र प्रपञ्चमात्रे—इत्याहुः।

नन्वेवमपि श्रुतिमात्रप्रतीतस्य वियदादिसर्गतत्क्रमादेः कः कल्पकः। न कोऽपि। किमालम्बना तर्हि 'आत्मन आकाशः सम्भूतः' [तै-उ-२-१] इत्यादिश्रुतिः। निष्प्रपञ्चब्रह्मात्मैक्यावलम्बनेत्यवेहि। अध्यारोपापवादाभ्यां निष्प्रपञ्चब्रह्मप्रतिपत्तिर्भवतीति तत्प्रतिपत्त्युपायतया श्रुतिषु

कल्पकस्याविद्योपहितस्यानन्त्यपरिहाराय साद्यनादिविभागाज्ञस्याय च दृष्टिसृष्टेस्संङ्कोचमाह—**अन्ये त्विति**। **वस्तुत इति**। स्वरूपत इत्यर्थः। तर्हि दृष्टिसृष्टिः कुत्रापि नोपेया मानाभावादिति शङ्कते—**किं त्विति**। स्वापप्रबोधयोः कार्यप्रपञ्चमात्रस्य प्रलयप्रभवप्रतिपादक[1]बहुश्रुतिसिद्धत्वात् नैवमिति परिहरति—**(ततः) अन्यत्रेति**। अविद्यादेस्सकाशादिति शेषः। मात्रपदं कार्त्स्न्यार्थकम्।

ननु-दृष्टिसमय एव प्रपञ्चसृष्टिरिति मतेऽपि दृष्टिशब्देन प्रत्यक्षप्रतीतिरेव विवक्षिता, न परोक्षप्रतीतिः, अपरोक्षप्रतीतेरेव [2]विषयाविनाभूतत्वेन प्रातिभासिकविषयसाधकत्वात्, परोक्षप्रतितेश्चातथात्वात्। तथास्थिते सति बाधकमाशङ्कते—**नन्वेवमपीति**। अविद्योपहितस्यात्मनः प्रत्यक्षवस्तुकल्पकत्वेऽपीत्यर्थः। यदि वियदादिसर्गः श्रुत्या प्रत्यक्षेण च प्रतीतो भवेत्, तदा प्रत्यक्षबलात् घटादेरिव तस्यापि प्रातिभासिकस्य सिद्धिः सम्भवेत्, न त्वेतदस्तीत्याशयेन मात्रपदं दत्तम्। वाय्वादिसङ्ग्रहार्थं प्रथममादिपदम्। वियदादिप्रलयतत्क्रमसङ्ग्रहार्थं द्वितीयमादिपदम्। **क इति**। कल्पको न सम्भवत्येवेत्यर्थः। कल्पकाभावे इष्टापत्तिमाह दृष्टिसृष्टिवादी—**न कोऽपीति**। तर्हि सृष्ट्यादिश्रुतिप्रतिपाद्यस्य वियदादिसृष्टितत्क्रमादेः शशशृङ्गायमाणतया श्रुतेरालम्बनाभावादप्रामाण्यं स्यादिति शङ्कते—**किमिति**। तात्पर्यविषयीभूतार्थस्य सत्त्वात् नाप्रामाण्यापत्तिरिति परिहरति—**निष्प्रपञ्चेति**। ननु—सृष्ट्यादिवाक्यानां श्रुतार्थपरित्यागेनाश्रुतार्थे तात्पर्यकल्पनमयुक्तम्। किं तु श्रुत्यनुसारेण वियदादिसर्गस्य तत्कल्पकस्य च कल्पनमेव युक्तं, इत्यत आह—**अध्यारोपेति**। यथा लोके गगनतत्त्वबोधनाय प्रवृत्तः कश्चित् प्रथमं नैल्यवैशाल्याद्यध्यारोपोपेतं[3] गगनं ग्राहयित्वा पश्चात् 'नेदं वस्तुतो नैल्यादियुक्तं' इति तदपवादेन नीरूपं व्यापकमुदासीनं गगनतत्त्वमिति बोधयति, तथा वेदान्ता अपि प्रथमं 'यद्वियदादिसर्गप्रलयादिकारणं सृष्ट्यादिवाक्यैः प्रतीयते तद्ब्रह्म' इत्यध्यारोपितसर्गादियुक्ततया ब्रह्म ग्राहयित्वा पश्चान्निषेधवाक्यैरध्यारोपितसर्गाद्यपवादेन निष्प्रपञ्चब्रह्मात्मैक्यं प्रतिपादयन्ति। तथा च सृष्ट्यादिवाक्यानां निषेधवाक्यापेक्षितनिषेध्य-

---

1. बहुश्रुतीति—पूर्वोक्तकौषीतकि-बृहदारण्यक-नृसिंहतापन्यादिबहुश्रुतीत्यर्थः।

2. विषयाविनाभूतत्वेनेति। विषयव्याप्यत्वेनेत्यर्थः। परोक्षज्ञानस्य तु विषयं विनाऽपि संभवः। न चैवं शशशृङ्गस्यापि परोक्षप्रतीतिः स्यादिति शङ्क्यम्। इष्टापत्तेः। 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इत्यभियुक्तोक्तेः, कलहादौ दृष्टत्वाच्च।

3. नैल्यवैशाल्याद्यध्यारोपोपेतं—अध्यारोपितनैल्यवैशाल्याद्युपेतं इत्यर्थः।

सृष्टिप्रलयोपन्यासः न तात्पर्येण इति भाष्याद्युद्घोषः। व्यर्थस्तर्हि तात्पर्याभावे वियत्प्राणपादयोर्वियदादिसर्गतत्क्रमादिविषयश्रुतीनां परस्परविरोधपरिहाराय यत्नः। न व्यर्थः। न्यायव्युत्पत्त्यर्थं अभ्युपेत्यतात्पर्यं तत्प्रवृत्तेः। उक्तं हि शास्त्रदर्पणे—'श्रुतीनां सृष्टितात्पर्यं स्वीकृत्येदमिहेरितम्। ब्रह्मात्मैक्यपरत्वात्तु तासां तन्नैव विद्यते।' [१-४-४] इति। ज्योतिष्टोमादिश्रुतिबोधितानुष्ठानात् फलसिद्धिः स्वाप्नश्रुतिबोधितानुष्ठानप्रयुक्तफलसंवादतुल्या, ज्योतिष्टोमादिश्रुतीनां च सत्त्वशुद्धिद्वारा

समर्पकतया तदेकवाक्यतापन्नानां निष्प्रपञ्चब्रह्मप्रतिपत्तिप्रयोजनकत्वमेव, न तु स्वार्थसृष्ट्यादिप्रतिपादनमात्रेण चारितार्थ्यम्। अर्थवादादीनामिव तेषां स्वार्थप्रतिपादने फलाभावात्। निष्फलेऽर्थे वेदतात्पर्यायोगात्। अतो युक्तमेव स्वार्थत्यागेन निष्प्रपञ्चब्रह्मात्मैक्ये तात्पर्यकल्पनम्। तज्ज्ञानस्य मुक्तिफलकतायाः श्रुतिसिद्धत्वात्। एवं च प्रथममध्यारोपेण सप्रपञ्चब्रह्मप्रतिपत्तिर्भवति। पश्चात् प्रपञ्चापवादेन तस्यैव ब्रह्मणो निष्प्रपञ्चत्वप्रतिपत्तिर्भवति। पूर्वप्रतिपत्तिश्चोत्तरप्रतिपत्तेश्शेष एव न स्वतन्त्रेति निष्कर्षः। प्रपञ्चस्तु भाष्यादिष्वेव द्रष्टव्य इत्यर्थः। **शङ्कते—व्यर्थ इति।** तर्हीत्यस्य व्याख्या तात्पर्याभाव इति। वियदादिसर्गतत्क्रमादाविति शेषः। यत्नो व्यर्थः, सूत्रकारभाष्यकारयोरिति शेषः। तात्पर्याविषये विद्यमानस्यापि श्रुतिविरोधस्य अकिञ्चित्करत्वादिति भावः। परिहरति— **न व्यर्थ इति। न्यायेति।** वियत्प्राणपादद्वयगताधिकरणेषु निरूपिता ये सिद्धान्तन्यायाः तेषां बोधार्थमित्यर्थः। तेषां न्यायानां सृष्ट्यादिवाक्यार्थाविरोधनिर्णयायानपेक्षितानामपि श्रुतितात्पर्यविषये क्वचिदेवंविरोधप्रसक्तौ तत्समाधानायोपयोगस्तेषां भविष्यतीत्याशयेन प्रवृत्तस्सूत्रकारादियत्नोऽर्थवानित्यर्थः। **तत्प्रवृत्तेरिति।** वियत्प्राणपादयोः प्रवृत्तेरित्यर्थः। सृष्ट्यादिश्रुतीनां स्वार्थे तात्पर्यमभ्युपेत्यैव वियत्पादादिप्रवृत्तिः- इत्यत्र कल्पतरुकारसम्मतिमाह—**उक्तं हीति। इदमिति।** विरोधसमाधानमित्यर्थः। **इहेति।** वियत्प्राणपादयोरित्यर्थः। तुशब्दोऽवधारणे। तासां-सृष्ट्यादिश्रुतीनां ब्रह्मात्मैक्यपरत्वादेव तत् - तात्पर्यं नास्त्येव। तासां स्वार्थेऽपि तात्पर्ये वाक्यभेदप्रसङ्गात् स्वार्थे फलाभावाच्चेत्यर्थः। एवं दृष्टिसृष्टिवादे सृष्ट्यादिश्रुतीनां निरालम्बनत्वं परिहृत्य कर्मोपासनावाक्यानामपि निरालम्बनत्वं परिहरति—**ज्योतिष्टोमादीत्यादिना।** ज्योतिष्टोमादिश्रुत्या स्वर्गादिसाधनत्वेन बोधितस्य यागादेरनुष्ठानात् स्वर्गादिफलसिद्धिरित्यर्थः। **स्वाप्नेति।** स्वप्ने हि कश्चित् कदाचिज्ज्योतिष्टोमादिश्रुतिं कल्पयित्वा ततस्साधनविशेषमुपलभ्य तदनुष्ठानात् फलं लभते, तत्तुल्यं जागरणेऽपि स्वर्गादिफललम्भनमित्यर्थः। वस्तुतस्तु—श्रुतिमात्रप्रतीतवियदादिसर्गतत्क्रमादेरिव श्रुतिमात्रप्रतीतस्वर्गादिफलस्याप्यसत्त्वमेवाभिप्रेतम्, कल्पकाभावस्य तुल्यत्वादिति बोध्यम्। तर्हि तासामप्रामाण्यं स्यादिति, नेत्याह—**ज्योतिष्टोमादिश्रुतीनां चेति।** कर्मवाक्यैरुपासनावाक्यैश्च विहितानि कर्मोपासनान्यनुतिष्ठतः सत्वशुद्धिर्भवति। शुद्धसत्वस्य चाधिकारिणो वेदान्तशास्त्रं ब्रह्मप्रमितिं जनयति। तथा च कर्मोपासनाकाण्डयोः अधिकारिसम्पादनद्वारा ब्रह्मप्रमितिशेषत्वात् तयोस्तत्रैव तात्पर्यं न स्वार्थे स्वर्गसाधनत्वादाविति नाप्रामाण्यप्रसङ्ग इति भावः। न च वेदानामशेषतो ब्रह्मप्रतिपत्तिपरत्वे नास्ति मानमिति वाच्यम्। 'सर्वे वेदा यत्पदमामनन्ति'

ब्रह्मणि तात्पर्यान्नाप्रामाण्यं, इत्यादिदृष्टिसृष्टिव्युत्पादनप्रक्रियाप्रपञ्चस्तु आकरग्रन्थेषु[1] द्रष्टव्यः। अयमेको दृष्टिसमसमया विश्वसृष्टिरिति दृष्टिसृष्टिवादः।

अन्यस्तु—दृष्टिरेव विश्वसृष्टिः। दृश्यस्य दृष्टिभेदे प्रमाणाभावात्, [2]'ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः। अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः।' [वि. पु. १-४-४०] इति स्मृतेश्च इति - सिद्धान्तमुक्तावल्यादिदर्शितो दृष्टिसृष्टिवादः।

द्विविधेऽपि दृष्टिसृष्टिवादे मनःप्रत्ययमलभमानाः केचिदाचार्याः सृष्टदृष्टिवादं रोचयन्ते—श्रुतिदर्शितेन क्रमेण परमेश्वरसृष्टं अज्ञातसत्तायुक्तमेव विश्वं, तत्तद्विषयप्रमाणावतरणे तस्य तस्य दृष्टिसिद्धिरिति। न चैवं प्रपञ्चस्य कल्पितत्वाभावे श्रुत्यादिप्रतिपन्नस्य सृष्टिप्रलयादिमतः

[क. उ. २-१५] 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' [बृ. उ. ४-४-२२] इत्यादिश्रुतिसहस्रस्य तत्र मानत्वात् - इत्यादिकमभिप्रेत्याह—इत्यादिदृष्टिसृष्टिव्युत्पादनप्रक्रियाप्रपञ्चस्त्विति। अयमेको दृष्टिसृष्टिवाद इति सम्बन्धः। अन्यस्तु सिद्धान्तमुक्तावल्यादिदर्शितो दृष्टिसृष्टिवाद इति सम्बन्धः।

द्वितीयं निरूपयति—दृष्टिरेवेति। दृष्टिः-दर्शनं स्वप्रकाशज्ञानस्वरूपमित्यर्थः। एतदुक्तं भवति-दृश्यप्रपञ्चतादात्म्यापन्नं ज्ञानस्वरूपमेव प्रपञ्चस्य आद्यक्षणावच्छिन्नं सत् तस्य सृष्टिरित्युच्यत इति। ननु दृग्दृश्ययोर्भिन्नयोरभिन्नसत्ताकत्वरूपं तादात्म्यमसिद्धमित्याशङ्क्याह—दृश्यस्येति। दृष्टिर्ज्ञानं, तस्मात् भेदे-भिन्नसत्ताकत्वे इत्यर्थः। अन्यथा 'सन् घटः' इत्यादिरूपेण सद्रूपस्य ज्ञानस्य घटादेश्च सामानाधिकरण्यप्रत्ययो न स्यादिति भावः। स्मृतौ एतदिति। प्रत्यक्षसिद्धमित्यर्थः। अर्थस्वरूपमिति। अर्थपदं [3]स्वत[न्त्रार्थ](न्त्र)परम्। कुदृष्टय इति। कुतर्कदूषितज्ञाना इत्यर्थः। तथा च एतज्जगत् अन्ये कुदृष्टयो भ्रान्ताः ज्ञानस्वरूपसत्तापेक्षया भिन्नसत्ताकं पश्यन्तीति उत्तरार्धेन भेददृष्ट्यपवादाच्च तयोरभिन्नसत्ताकत्वसिद्धिरित्यर्थः। स्मृतेश्चेति। चकाराच्छ्रुतेश्चेत्यर्थः। 'चिद्धीदं सर्वं' [नृसिंहोत्तर-७] इत्यादिश्रुतिरुदाहर्तव्या।

मनःप्रत्ययो मनसोविश्वासः—प्रामाणिकत्वनिश्चयः, तमलभमाना इत्यर्थः। तदलाभे च हेतुः जाग्रत्प्रपञ्चस्यापि प्रातिभासिकत्वाभ्युपगमः, वियदादिसर्गाद्यपलापः, कर्मोपासनाकाण्डार्थानुष्ठानाधीनस्वर्गलोकब्रह्मलोकाद्यपलापः, जाग्रति चक्षुराद्यनुविधानप्रतीतेर्भ्रममात्रत्वाभ्युपगमः - इत्यादिरिति द्रष्टव्यम्। दृष्टिसृष्टिपदं व्याचष्टे—श्रुतिदर्शितेनेत्यादिना। अपसिद्धान्तं शङ्कते—न चैवमिति। उक्तरीत्या प्रामाणिकत्वे

---

1. आकरग्रन्थेषु—श्रुतिसिद्धदृष्टिसृष्ट्युपपादकमूलग्रन्थेषु वेदान्तसिद्धान्तमुक्तावल्यादिषु। यद्यपि अनुपदं वक्ष्यमाणपक्ष एव सिद्धान्तमुक्तावलीसंमतः, तथापि दृष्टिसृष्टिस्वरूप एव स पक्षभेदः, तद्व्युत्पादनप्रक्रियायां तु न पक्षभेदः इति बोध्यम्।

2. ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः। अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसम्प्लवे॥ इति मुद्रिते विष्णुपुराणे पाठः। 'पश्यन्ति भ्राम्यन्तः' इत्यपि क्वचित्।

3 'अर्थस्वरूपं भ्राम्यन्तः पश्यन्ति' इत्येतत् सृष्टदृष्टिपक्षेऽपि तुल्यम्, नातः दृष्टिसृष्टिपक्षस्य एतत् प्रमाणं, इत्याशङ्क्य व्याचष्टे-स्वतन्त्रेति।

प्रत्यक्षादिप्रतिपन्नार्थक्रियाकारिणश्च तस्य सत्यत्वमेवाभ्युपगतं स्यादिति वाच्यम्। शुक्तिरजतादिवत् संप्रयोगसंस्कारदोषरूपेण अधिष्ठानज्ञानसंस्कारदोषरूपेण वा कारणत्रयेण अजन्यतया [1]कल्पनासमसमयत्वाभावेऽपि ज्ञानैकनिवर्त्यत्वरूपस्य [2]सदसद्विलक्षणत्वरूपस्य प्रतिपन्नोपाधिगतत्रैकालिकनिषेधप्रतियोगित्वरूपस्य वा मिथ्यात्वस्याभ्युपगमात्। सत्यत्वपक्षे प्रपञ्चे उक्तरूपमिथ्यात्वाभावेन ततो भेदात्।

प्रपञ्चस्य स्वीकृते सतीत्यर्थः। कल्पितत्वाभावे सत्यत्वमेवाभ्युपगतं स्यादिति सम्बन्धः। प्रपञ्चः सत्यः श्रुतिसिद्धत्वात् ब्रह्मवत्। न च तस्य प्रत्यक्षसिद्धस्य श्रुतिसिद्धत्वमसिद्धमिति वाच्यम्। तस्य स्वरूपेण प्रत्यक्षसिद्धत्वेऽपि सृष्टिप्रलयादिविशिष्टतया श्रुतिस्मृत्यादिसिद्धत्वात्। तथा प्रपञ्चः सत्यः, अर्थक्रियाकारित्वात्, सृष्ट्याद्यर्थक्रियाकारिब्रह्मवत्। न च हेत्वसिद्धिः, पृथिवीजलादौ तस्य प्रत्यक्षादिसिद्धत्वादिति भावः। प्रपञ्चस्य ब्रह्मवत् परमार्थसत्यत्वे [3]हेतुद्वयमप्रयोजकम्, अतो नापसिद्धान्तापत्तिः इत्याशयेन परिहरति—**शुक्तिरजतादिवदिति।** वियदादिप्रपञ्चे शुक्तिरजतादाविव कल्पनासमसमयत्वस्य दृष्टिसृष्टिवाद्यभिमतस्याभावेऽपि पारमार्थिकसत्यत्वविरुद्धस्य मिथ्यात्वस्याभ्युपगमादिति सम्बन्धः। वियदादिप्रपञ्चे कल्पनासमसमयत्वाभावे कारणत्रयाजन्यत्वं हेतुः। सम्प्रयोगस्य स्वप्नभ्रमव्यापित्वाभावात् सम्प्रयोगस्थाने अधिष्ठानसामान्यज्ञानं निक्षिपति—**अधिष्ठानज्ञानेति।** मिथ्यात्वनिर्वचनं त्रेधा दर्शयति—**ज्ञानैकेत्यादिना।** अधिष्ठानतत्त्वज्ञानमात्रनिवर्त्यत्वरूपस्येत्यर्थः। सद्विलक्षणत्वमात्रं असति अतिव्याप्तम्। असद्विलक्षणत्वमात्रं सति ब्रह्मणि अतिव्याप्तम्। अत उभयोपादानम्। प्रपञ्चस्य तूभयविलक्षणत्वं [4]प्रमाणसिद्धमिति भावः। **प्रतिपन्नेति।** ब्रह्मणि प्रतिपन्नस्य—प्रतीतस्य-आरोपितस्येति यावत्, ब्रह्म उपाधिः-अधिष्ठानं, तत्र ब्रह्मणि तस्य त्रैकालिको निषेधः—श्रुतिगम्योऽत्यन्ताभावोऽस्ति, तत्प्रतियोगित्वं तस्याक्षतमिति भावः। तत्र आद्यलक्षणे घटादेस्सत्यत्वपक्षेऽपि 'घटादिकं नाशयामि' इत्यादिज्ञाननिवर्त्यत्वसत्त्वात् एकपदं दत्तम्। ज्ञानमात्रनिवर्त्यत्वस्य च सत्यत्ववादिभिरनङ्गीकारात् न सत्यत्वपक्षाविशेषः। तथा प्रपञ्चे परैस्सद्रूपत्वाङ्गीकारेण सद्विलक्षणत्वानङ्गीकारात् द्वितीयलक्षणेऽपि न सत्यत्वपक्षाविशेषः। प्रपञ्चस्य तदुपादाने ब्रह्मणि सिद्धान्त इव, घटाद्युपादाने वस्तुनि घटादेस्त्रैकालिकनिषेधस्य परैरनङ्गीकारात्, न तृतीयलक्षणेऽपि परमताविशेषः - इत्याशयेनाह—**सत्यत्वपक्षे इति।**

---

1. कल्पनासमसमयत्वं च स्वप्रतीतिशून्यकालावृत्तित्वम्—ज्ञातैकसत्ताकत्वमित्यर्थः।

2. सदसद्विलक्षणत्वेति। सद्भिन्नत्वे सति असद्भिन्नत्वे सति सदसद्भिन्नत्वेत्यर्थः। सत्त्वं त्रिकालाबाध्यत्वम्, असत्त्वं निःस्वरूपत्वम्।

3. हेतुद्वयं—श्रुत्यादिसिद्धत्वं अर्थक्रियाकारित्वं चेति हेतुद्वयम्। परमार्थसत्यत्वे अप्रयोजकं - परमार्थसत्यत्वानुमितिकारणतानवच्छेदकम्। कारणकारणतावच्छेदकयोः प्रयोजकशब्देन शास्त्रेषु व्यवहारात्, अनुमितिकारणे लिङ्गज्ञाने विषयतया लिङ्गस्य कारणतावच्छेदकत्वात्, अत्र साध्यव्याप्यस्य ज्ञापकहेतोः साध्यप्रयोजकत्वेन व्यवहारः। कारकहेतोः कारकहेतुतावच्छेदकस्य च प्रयोजकशब्देन व्यवहारः क्वचित्। यथा अत्रैव प्रकरणे टीकायां 'सत्यत्वस्य अर्थक्रियां प्रति अप्रयोजकत्वात्, इत्यादौ। 4. प्रमाणसिद्धम् - ख्यातिबाधाद्यन्यथाऽनुपपत्तिदृश्यत्वाद्यनुमानश्रुतितदर्थापत्तिप्रमाणैः निश्चितम्।

नन्वेवं-अहङ्कारतद्धर्माणामपि उक्तरूपमिथ्यात्वं वियदादिवत् कल्पितत्वाभावेऽपि सिद्ध्यतीति, भाष्यटीकाविवरणेषु तदध्यासे कारणत्रितयसम्पादनादियत्नो व्यर्थः - इति चेत् —अहङ्कारादीनामपि केवलसाक्षिवेद्यतया शुक्तिरजतवत् प्रातिभासिकत्वमभिमतमिति चित्सुखाचार्याः ।

अभ्युपेत्यवादमात्रं तत्, 'अद्वितीयाधिष्ठानब्रह्मात्मप्रमाणस्य चैतन्यस्य' इत्यादितत्रत्यकारणत्रितयसम्पादनग्रन्थस्य, चैतन्यस्य प्रमाकरणत्वे वेदान्तकरणत्वादिकल्पनाभङ्गप्रसङ्गेन प्रौढिवादत्वस्य स्फुटत्वादिति रामाद्वयाचार्याः ।

अर्थक्रियाप्रयोजकविचारः

ननु दृष्टिसृष्टिवादे सृष्टदृष्टिवादे च मिथ्यात्वसंप्रतिपत्तेः कथं मिथ्याभूतस्यार्थक्रियाकारित्वम्?

स्वप्नवदिति ब्रूमः । ननु स्वाप्नजलादिसाध्यावगाहनादिरूपार्थक्रिया असत्यैव । किं तु

दृष्टिसृष्टिवाद्येव शङ्कते—**नन्वेवमिति** । ज्ञानैकनिवर्त्यत्वादेर्मिथ्यात्वस्वरूपत्वे सतीत्यर्थः । अहङ्कारतद्धर्माणामप्युक्तरूपमिथ्यात्वं वियदादिवत् सिद्ध्यतीति सम्बन्धः । **कल्पितत्वाभावेऽपीति** । प्रातिभासिकत्वाभावेऽपीत्यर्थः । तत्पदमहङ्कारादिपरम् । चिदात्मनोऽधिष्ठानत्वादिसमर्थनमादिपदार्थः । [1]**अभिमतमिति** । भाष्यकारादीनामिति शेषः । तथा च तत्सम्पादनादियत्नस्सफल इति भावः ।

अहङ्कारतद्धर्माणां केवलसाक्षिवेद्यत्वेऽपि शुक्तिरजतादिवत् प्रातिभासिकत्वं वक्तुमयुक्तम्, व्यवहारकाले बाधानुपलम्भात् । अतो वस्तुगत्या तेषां प्रातिभासिकत्वाभावेऽपि तदभ्युपेत्य कारणत्रयसम्पादनादियत्नस्तैः कृतः - इति परिहारान्तरमाह—**अभ्युपेत्येति** । तत् - भाष्यादि प्रातिभासिकत्वमभ्युपेत्यवचनमेव, न वस्तुगतिमनुरुध्येत्यर्थः । 'अद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणं चैतन्यं' इति प्रतिपादयतष्टीकाविवरणादिगतस्य ग्रन्थस्य प्रौढिवादत्वस्य स्फुटत्वादिति सम्बन्धः । प्रौढिवादत्वे उपपत्तिमाह—**चैतन्यस्य प्रमाकरणत्वे इति** । ब्रह्मप्रमाकरणत्वे इत्यर्थः । औपनिषदत्वश्रुत्यनुसारेण वेदान्तानामेव ब्रह्मप्रमाकरणत्वकल्पनेत्यर्थः । वेदान्तवाक्यजन्यब्रह्मप्रमाया अपरोक्षत्वकल्पनमादिपदार्थः ।

प्रपञ्चस्य परमार्थसत्यत्वे पूर्वमर्थक्रियाकारित्वमप्रयोजकं इति सूचितम्, तदयुक्तम् - मिथ्याभूतस्य शुक्तिरूप्यादेः कटकाद्यर्थक्रियाकारित्वादर्शनादिति मत्वा शङ्कते—**नन्विति** । अर्थक्रियाकारित्वं सत्यत्वव्यभिचारीति परिहरति—**स्वप्नवदिति** । स्वाप्नजलादौ अवगाहनादिरूपार्थक्रियाकारित्वमस्ति तत्र सत्यत्वं नास्तीति व्यभिचार इत्यर्थः । नन्वर्थक्रियाकारित्वमात्रं न हेतुः, किं तु सत्यार्थक्रियाकारित्वम्, तच्च स्वाप्नजलादौ नास्तीति न व्यभिचारः - इति शङ्कते—**नन्विति** । असत्येव, न तु सतीत्यर्थः । असत्यैवेति पाठे - असत्या, न तु सत्येत्यर्थः । तर्हि 'प्रपञ्चस्सत्यः सत्यार्थक्रियाकारित्वात्' इत्यत्र हेत्वसिद्धिरित्याह सिद्धान्ती—**किं त्विति** ।

---

1. अभिमतमितीति । तत्त्वप्रदीपिकायां स्वप्रकाशत्वलक्षणनिरूपणावसरे अज्ञानाहङ्कारादीनां केवलसाक्षिवेद्यत्वमुक्तम् । तेन शुक्तिरजतादिवत् तेषां प्रातिभासिकत्वं चित्सुखाचार्याणां अभिमतम् । तेन-भाष्यकारादीनामपि एतदभिमतमिति चित्सुखार्याणामाशय उन्नीयते इति भावः ।

जाग्रज्जलादिसाध्या सा सत्या। अविशिष्टमुभयत्रापि स्वसमानसत्ताकार्थक्रियाकारित्वमिति केचित्।

अद्वैतविद्याचार्यास्त्वाहुः—स्वाप्नपदार्थानां न केवलं प्रबोधबाध्यार्थक्रियामात्रकारित्वम्, स्वाप्नाङ्गनाभुजङ्गमादीनां तदबाध्यसुखभयादिजनकत्वस्यापि दर्शनात्। स्वाप्नविषयजन्यस्यापि हि सुखभयादेः प्रबोधानन्तरं न बाधोऽनुभूयते, प्रत्युत प्रबोधानन्तरमपि मनःप्रसादशरीरकम्पनादिना सह तदनुवृत्तिदर्शनात् प्रागपि सत्त्वमेवावसीयते। अत एव प्राणिनां पुनरपि सुखजनक-

---

जाग्रज्जलादिसाध्या सा-अर्थक्रिया सत्या किमिति सम्बन्धः। तु शब्दोऽवधारणे। किंशब्दः आक्षेपार्थः। सा सत्या न भवत्येवेत्यर्थः। अतो [1]हेत्वसम्प्रतिपत्तिपरिहाराय अर्थक्रियाकारित्वमात्रं सत्यत्वप्रयोजकं वाच्यम्, तच्च स्वाप्नजलादावस्त्येवेति व्यभिचारतादवस्थ्यमिति भावः। ननु स्वाप्नजलादौ सत्यार्थक्रियाकारित्वाभावेऽपि स्वसमानसत्ताकार्थक्रियाकारित्वमस्त्येव, तर्हि जाग्रत्प्रपञ्चस्यापि तदस्तु, नैतावता त्वदभिमतपरमार्थसत्यत्वं सिद्ध्यति—इत्याशयेन परिहरति—**अविशिष्टमिति। उभयत्रापीति।** जाग्रत्स्वप्नावस्थाद्वयेऽपीत्यर्थः। स्वपदमर्थक्रियाहेतुभूतवस्तुपरम्।

'स्वप्नवदिति ब्रूमः' इति समाधाने 'स्वप्ने तावदर्थक्रिया सत्या न भवति, जागरे तु सा सत्या' इति वैषम्यशङ्कायां प्रतिबन्द्या केषाञ्चित् समाधानं दर्शितम्। इदानीं स्वाप्नादिपदार्थानामपि सत्यार्थक्रियाकारित्वदर्शनात् न दृष्टान्तवैषम्यमिति परिहारान्तरमाह—**अद्वैतेति।** प्रबोधबाध्यार्थक्रिया प्रातिभासिकी, प्रबोधाबाध्यार्थक्रिया स्वप्नकालीनापि व्यावहारिकसत्यैव-इति विभागः। तथा च स्वाप्नपदार्थानां प्रातिभासिकार्थक्रियाकारित्वमात्रं केवलं न भवति, किं तु व्यावहारिकार्थक्रियाकारित्वमप्यस्ति, स्वाप्नाङ्गनादीनां प्रबोधाबाध्यसुखजनकत्वस्य स्वाप्नभुजङ्गमादीनां प्रबोधाबाध्यभयकम्पादिजनकत्वस्य च दर्शनात्। एवं च व्यावहारिकजाग्रत्पदार्थानां व्यावहारिकार्थक्रियाकारित्वं कैमुतिकन्यायसिद्धमिति मिथ्यात्वपक्षे नार्थक्रियाकारित्वानुपपत्तिरिति भावः। ननु स्वाप्नभुजङ्गमाङ्गनादिरूपविषयाणां प्रबोधबाध्यत्वदर्शनात् तत्कार्यभयसुखादीनां कथं प्रबोधाबाध्यत्वं इत्याशङ्क्याह – **स्वाप्नविषयेति।** न हि प्रबोधानन्तरं 'स्वप्नकाले सुखभयादिकं मम नाभूत्' इति सुखभयादेर्बाधोऽनुभूयत इत्यर्थः। **प्रत्युतेति।** वर्तमानसुखानुभवकार्यं मनःप्रसादः, वर्तमानभयदुःखानुभवकार्यं गात्रकम्पादिः। ततश्च प्रबोधानन्तरमनुवर्तमानत्वे गमकं मनःप्रसादादि। तथा च तदनन्तरमनुवर्तमानस्य भयादेः सत्यत्वात् प्रबोधात्प्रागपि तस्य सत्यत्वं निश्चीयत इत्यर्थः। स्वप्नकालीनमपि सुखभयादिकं जाग्रत्सुखादिवद्व्यावहारिकसत्यमेव, न प्रातिभासिकम्, प्रबोधानन्तरं बाधाभावात् तदनन्तरमप्यनुवर्तमानत्वाच्च - इति निष्कर्षः। स्वाप्नसुखभयादेस्सत्यत्वे गमकान्तरमाह—**अत एवेति।** स्वाप्नभयादेरप्रातिभासिकत्वादेवेत्यर्थः, रागद्वेषयोस्सत्यसुखदुःखगोचरत्वनियमादिति भावः। ननु स्वप्ने सर्वस्य वासनामात्रत्वात् कथं सत्यस्य भयादेः सम्भव इत्यत आह

---

1. हेत्वसंप्रतिपत्तिः—हेत्वसिद्धिः।

विषयगोचरस्वप्ने वाञ्छा, अतादृशे च स्वप्ने प्रद्वेषः। सम्भवति च स्वप्नेऽपि ज्ञानवदन्तःकरणवृत्तिरूपस्य सुखभयादेरुदयः। न च - स्वाप्नाङ्गनादिज्ञानमेव सुखादिजनकम्, तच्च सदेवेति-वाच्यम्। तस्यापि दर्शनस्पर्शनादिवृत्तिरूपस्य स्वप्नप्रपञ्चसाक्षिण्यध्यस्तस्य कल्पनामात्रसिद्धत्वात्। न ह्युपरतेन्द्रियस्य चक्षुरादिवृत्तयः सत्याः सम्भवन्ति। न च—तद्विषयापरोक्षमात्रं सुखजनकम्, तच्च साक्षिरूपं सदेवेति—वाच्यम्। दर्शनात् स्पर्शने कामिन्याः पदा स्पर्शनात् पाणिना स्पर्शने भुजङ्गमस्यामर्मस्थले स्पर्शनान् मर्मस्थले स्पर्शने सुखविशेषस्य भयविशेषस्य चानुभवसिद्धत्वेन स्वप्नेऽपि तत्तत्सुखभयादिविशेषस्य कल्पितदर्शनस्पर्शनादिवृत्तिविशेषजन्यत्वस्य वक्तव्यत्वादिति।

तथा जागरे घटादिप्रकाशनक्षमतत्रत्यपुरुषान्तरनिरीक्ष्यमाणालोकवत्यपवरके सद्यः-

---

—**सम्भवति चेति** 'तदेतत्सत्वं येन स्वप्नं पश्यति' इति श्रुत्यनुसारेण कल्पतरुकारैर्मानसवृत्तिरूपज्ञानस्य स्वीकारात् तद्वदन्तःकरणपरिणामरूपभयादेर्व्यावहारिकस्य सम्भवः, तदतिरिक्तपदार्थानामेव वासनापरिणामत्वेन प्रातिभासिकत्वाभ्युपगमादिति भावः। ननु - स्वाप्नभयादिकं न भुजङ्गमाङ्गनादिपदार्थजन्यं, किं तु तद्गोचरज्ञानजन्यम्। तथा च ज्ञानस्य सत्यत्वात् 'असत्यात् सत्यस्यापि कार्यस्य जन्म स्वप्ने दृष्टं' इत्यनुपपन्नमिति शङ्कते—**न चेति**। तच्च सदेवेति वदता वक्तव्यं—किं तत् मनोमात्रजन्यवृत्तिरूपं, किं वा चक्षुरादिजन्यवृत्तिरूपम्, केवलसाक्षिरूपं वा। आद्येऽपि किं वृत्तिमात्रं भयादिहेतुः, उत स्वाप्नभुजङ्गमादिरूपविषयविशेषितम्। नाद्यः। यत्किञ्चिद्गोचरवृत्तिज्ञानादपि भयादिप्रसङ्गात्। न द्वितीयः। वृत्तिमात्रस्य सत्यत्वेऽपि विषयस्यासत्यतया तद्विशिष्टस्यापि प्रातिभासिकत्वात्। तथा च प्रातिभासि(कज्ञानात्) [कात्] व्यावहारिकार्थक्रियोत्पत्तौ तदुदाहरणं भवत्येवेति मत्वा प्रथमविकल्पत्रयमध्ये द्वितीयं दूषयति—**तस्यापीति**। ज्ञानस्यापीत्यर्थः। ननु चक्षुरादिजन्यमेव दर्शनस्पर्शनादिवृत्तिरूपं सत्यं ज्ञानं कुतो नोपेयते, तत्राह—**न हीति**। तृतीयं शङ्कते—**न च तदिति**। दूषयति—**दर्शनादित्यादिना**। कामिन्या दर्शनात् तस्याः स्पर्शने तस्या एव पदा स्पर्शनात् पाणिना स्पर्शने सुखविशेषस्यानुभवसिद्धत्वेनेति सम्बन्धः। भुजङ्गमस्यामर्मस्थले - पुच्छादौ स्पर्शनात् मर्मस्थले - शिरसि स्पर्शने भयविशेषस्यानुभवसिद्धत्वेनेति सम्बन्धः। **स्वप्नेऽपीति**। यथा जागरे सुखविशेषभयविशेषादेर्दर्शनस्पर्शनादिरूपवृत्तिविशेषविशिष्टविषयापरोक्षजन्यत्वम्, न तु विषयापरोक्षमात्रजन्यत्वम्, तन्मात्रस्यैकरूपत्वेन कार्यविशेषाप्रयोजकत्वात्, तथा स्वप्नेऽपि। तथा च तत्तद्विषयापरोक्षमात्रस्य साक्षिरूपस्य सत्यत्वेऽपि सुखभयादिजनकस्य प्रातिभासिकदर्शनस्पर्शनादिवृत्तिविशेषविशिष्टस्य तत्तद्विषयापरोक्षस्य प्रातिभासिकत्वात् प्रातिभासिकाद्व्यावहारिकसुखभयादिसम्भव इत्यर्थः।

एवं स्वप्नावस्थायां असत्यात् सत्यार्थक्रियामुदाहृत्य जागरेऽपि तामुदाहरति—**तथेति**। प्रकाशनक्षमो यः तत्रत्यैः - अपवरकस्थैः पुरुषान्तरैर्निरीक्ष्यमाणालोकः, तद्वत्यपीत्यर्थः। अपवरकं-स्वल्पगृहम्,

प्रविष्टेन पुंसा कल्पितस्य सन्तमसस्य प्रसिद्धसन्तमसोचितार्थक्रियाकारित्वं दृष्टम्। तेन तं प्रति घटाद्यावरणं दीपाद्यानयने तदपसरणं तन्नयने पुनरावरणं इत्यादेर्दर्शनात् इत्यपि-केचित्।

अन्ये तु—**पानावगाहनाद्यर्थक्रियायां जलादिस्वरूपमात्रमुपयोगि, न तद्गतं सत्यत्वम्, तस्य कारणत्वतदवच्छेदकत्वयोरभावादिति किं तेन। न चैवंसति मरुमरीचिकोदकशुक्तिरजतादेरपि प्रसिद्धोदकाद्युचितार्थक्रियाकारित्वप्रसङ्गः। 'मरीचिकोदकादावुदकत्वादिजातिर्नास्तीति तद्विषयकभ्रमस्य उदकशब्दोल्लेखित्वं तदुल्लेखिपूर्वानुभवसंस्कारजन्यत्वप्रयुक्तं' इति तत्त्वशुद्धिकारादि[1]मते तत्तदर्थक्रिया-[2]'प्रयोजकोदकत्वादिजात्यभावादेव तदप्रसङ्गात्। 'तत्राप्युदकत्वादिजातिरस्ति, अन्यथा तद्वैशिष्ट्यो-**

तत्रत्यालोकासत्त्वशङ्काव्यावृत्तये पुरुषान्तरनिरीक्ष्यमाणत्वविशेषणम्। दृष्टमित्येतत् प्रपञ्चयति—**तेनेति**। सन्तमसेनेत्यर्थः। अपिशब्दस्य तथा जागरेऽपीति सम्बन्धः।

अन्ये त्विति। जगत्सत्यत्ववादिभिरपि हि अर्थक्रियाकारित्वमेव[3] सत्यत्वमिति वक्तुं न शक्यते। अर्थक्रियानुत्पत्तिदशायां घटादेरसत्यत्वप्रसङ्गात्। किं तु सत्त्वमर्थक्रियाप्रयोजकमिति वक्तव्यम्। तथा च किं सत्त्वमर्थक्रियाकारणमभिप्रेतं, किं वा कारणतावच्छेदकम्? नोभयथापीत्याह—**पानेत्यादिना।** जलादिपदं जलत्वादेरपि सङ्ग्राहकं बोध्यम्। **उपयोगीति।** जलादिस्वरूपं कारणतया जलत्वादिस्वरूपं कारणतावच्छेदकतयेति विभागः। मात्रपदव्यवच्छेद्यमाह—**न तद्गतमिति।** सत्यत्वस्य जलादिस्वरूपातिरिक्ततया कारणत्वाभावात् अतिप्रसक्ततया कारणतावच्छेदकत्वाभावाच्चेत्यर्थः। **किं तेनेति।** सत्यत्वेनेत्यर्थः। तथा च सत्यत्वाभावेऽपि प्रपञ्चस्यार्थक्रियाकारित्वसम्भवात् न मिथ्यात्वविरोध इति भावः। ननु-सत्त्वस्य तत्तदर्थक्रियाकारितायामतिप्रसक्तत्वेऽप्यर्थक्रियाकारित्वसामान्ये[4] सत्त्वमनतिप्रसक्तत्वादवच्छेदकमेव, अन्यथा बाधकमस्तीत्याशङ्कते—**न चैवंसतीति।** सत्त्वस्य कारणतासामान्यानवच्छेदकत्वे सतीत्यर्थः। 'एवंसति प्रसङ्ग इति न च' इत्यत्र हेतुमाह—**मरीचिकोदकादाविति।** मरुभूमिसंसृष्टासु मरीचिकासु समारोपितं तोयं मरीचिकोदकं, तस्य तोयाभासत्वात् तत्र तोयत्वं नास्ति। [5]कथं तर्हि 'तोयमिदम्' 'उदकमिदम्' इति शब्दोल्लेखिप्रत्यय इत्याशङ्क्य तस्यान्यथासिद्धिमाह—**तद्विषयकभ्रमस्येति।** मरीचिकोदकविषयकभ्रमस्येत्यर्थः। उदकशब्दोल्लेखी यः पूर्वानुभवःसत्योदकविषयकः तज्जन्यसंस्कारजन्यत्वान्मरीचिकोदकस्य तत्प्रयुक्तं तच्छब्दोल्लेखित्वमित्यर्थः। **प्रयोजकेति।** प्रसिद्धोदकस्य उचिता अर्थक्रिया पानादिरूपा, तस्यामुदकत्वजातिः प्रयोजिका, उदकादन्यत्र पानादेरदर्शनात्; तथा

---

1. तत्त्वशुद्धिकारादीत्यादिपदेन तत्त्वप्रदीपिकाकाराणां ग्रहणम्।
2. प्रयोजकोदकत्वेति। कारणतावच्छेदकस्य कार्यप्रयोजकत्वात् इति भावः।
3. अर्थक्रियाकारित्वमेवेति। कार्योपधायकत्वमित्यर्थः।
4. अर्थक्रियाकारित्वसामान्ये इति। न च सामान्ये प्रयोजकसम्पादनं व्यर्थमिति शङ्क्यम्। शशशृङ्गादौ अर्थक्रियाकारित्वसामान्याभावे एकप्रयोजकलाभरूपप्रयोजनसत्त्वेन वैयर्थ्याभावात्।
5. कथमिति। तच्छब्दप्रवृत्तिनिमित्ताभावे तच्छब्दोल्लेखिप्रत्ययविषयत्वासम्भव इति भावः।

ल्लेखिभ्रमविरोधात् उदकाद्यर्थिनस्तत्र प्रवृत्त्यभावप्रसङ्गाच्च' इति प्रातिभासिके पूर्वदृष्टसजातीयत्व-व्यवहारानुरोधिनां मते क्वचिदधिष्ठानविशेषज्ञाने समूलाध्यासनाशात् क्वचिदधिष्ठानसामान्यज्ञानोपरमेण केवलाध्यासनाशात् क्वचित् गुञ्जापुञ्जादौ चक्षुषा वह्न्याद्यध्यासस्थले दाहपाकादिप्रयोजकस्योष्णस्पर्शादेरनध्यासाच्च तत्रतत्रार्थक्रियाऽभावोपपत्तेः, क्वचित् कासांचिदर्थक्रियाणामिष्यमाणत्वाच्च । मरीचिकोदकादिव्यावर्तकस्यार्थक्रियोपयोगिरूपस्य वक्तव्यत्वे च श्रुतिविरुद्धं प्रत्यक्षादिना दुर्ग्रहं त्रिकालाबाध्यत्वं विहाय [1]दोषविशेषाजन्यरजतत्वादेरेव रजताद्युचितार्थक्रियोपयोगिरूपस्य

प्रसिद्धरजतादेरुचितार्थक्रिया कटकादिलक्षणा, तत्र च रजतत्वादिकं प्रयोजकम्, मृदादौ कटकाद्यर्थक्रियाऽदर्शनात्- इति भावः । **तदप्रसङ्गादिति** । प्रसिद्धोदकाद्युचितार्थक्रियाकारित्वप्रसङ्गाभावादित्यर्थः । मरीचिकोदकादावर्थक्रियाकारित्वप्रयोजकजातिमभ्युपगम्याप्युक्तातिप्रसङ्गं परिहरति—**तत्रापीत्यादिना** । मरीचिकोदकादावपीत्यर्थः । **अन्यथेति** । तत्र जलत्वादिजात्यभावे सतीत्यर्थः । **तत्रेति** । मरीचिकोदकादाविष्टतावच्छेदकजलत्वादिवैशिष्ट्यभानं विना तदर्थिनस्तत्र प्रवृत्तिर्न सम्भवतीति भावः । किं च शुक्तिरजतादौ सत्यरजतादौ च रजतत्वादिजातेरेकस्या अभावे प्रातिभासिकाध्यासेषु पूर्वदृष्टसाजात्यव्यवहारो भाष्यादिगतो न स्यात्, तदनुरोधेनापि तत्र जातिरङ्गीकर्तव्या इत्याशयेनाह—**प्रातिभासिक इति** । **क्वचिदिति** । दूरे मरीचिकोदकभ्रमानन्तरं स्नानाद्यर्थं समीपं गतस्य 'नेदं जलं, मरीचिमात्रमिदं' इति विशेषदर्शने सति जलाध्यासस्य स्वमूलाज्ञानेन सहैव नाशात् न ततोऽर्थक्रियोत्पत्तिरापादयितुं शक्येत्यर्थः । **क्वचिदधिष्ठानेति** । शुक्त्यादौ रजताद्यध्यासानन्तरं यत्र विशेषदर्शनमस्ति तत्र पूर्वोक्ता रीतिः, यत्र तन्नास्ति तत्र तदधिष्ठानसामान्यज्ञानरूपकारणनाशेन रजताद्यध्यासमात्रनाशसम्भवात् तत्रापि नार्थक्रियोत्पत्तिरापादयितुं शक्येत्यर्थः । 'स्वप्नवदिति ब्रूमः' इत्यादिपूर्वग्रन्थे प्रातिभासिकपदार्थानामप्यर्थक्रियाकारित्वस्य दर्शितत्वात् उक्तातिप्रसङ्गे इष्टापत्तिरपीत्याह—**क्वचित्कासां चिदिति** । इदानीं प्रातिभासिकेष्वर्थक्रियाकारित्वराहित्यमुपेत्यापि सत्यत्वं कारणतावच्छेदकं न वक्तव्यमित्याह—**मरीचिकोदकादीति** । चशब्दोऽप्यर्थकः । **श्रुतीति** । मिथ्यात्वश्रुतीत्यर्थः । 'सद्रूपाद्रजतात् कटकादिकार्यं भवति तद्विलक्षणाच्छुक्तिरजतात् तन्न भवति' इत्यन्वयव्यतिरेकसहकृतप्रत्यक्षेण हि त्वया सत्त्वं अर्थक्रियाकारितायामवच्छेदकतया ग्राह्यम् । तादृशं च सत्त्वं मिथ्यात्वविरुद्धकालत्रयाबाध्यत्वरूपं न भवति, तस्य प्रत्यक्षायोग्यत्वात्[2], अतः अन्यदेव किंचित्तदवच्छेदकं वाच्यमित्याशयेनाह—**प्रत्यक्षादिनेति** । अत्रादिपदमनुमानादिसङ्ग्रहार्थम् । प्रत्यक्षश्रुतिविरोधेन अनुमानादेरपि प्रपञ्चे कालत्रयाबाध्यत्वरूपसत्त्वसाधकस्यानुदयादेव तस्यानु-

---

1. दोषविशेषाजन्यत्वं रजतत्वविशेषणम् । तथा हि रजतत्वं त्रिविधम्—व्यावहारिकरजतमात्रवृत्ति व्यावहारिकं कटकाद्यर्थक्रियाकारितावच्छेदकम्, प्रातीतिकरजतमात्रवृत्ति प्रातीतिकं शुक्त्यज्ञानरजतसादृश्यज्ञानदोषविशेषकार्यतावच्छेदकम्, तदुभयसाधारणं रजतपदशक्यतावच्छेदकं तृतीयं व्यावहारिकमेवेति । दोषविशेषशब्देन अविद्यातिरिक्तदोषो विवक्षितः ।

2. प्रत्यक्षायोग्यत्वादिति । प्रत्यक्षस्य वर्तमानमात्रग्राहिणः कालत्रयग्रहणासमर्थत्वात् कालत्रयघटितस्य उक्तसत्त्वस्य प्रत्यक्षायोग्यत्वम् ।

वक्तुं शक्यत्वाच्च । तस्मात् मिथ्यात्वेऽप्यर्थक्रियाकारित्वसम्भवात् मिथ्यैव प्रपञ्चः, न सत्यः—इति ।

प्रपञ्चमिथ्यात्वस्य मिथ्यात्वनिरूपणम्

ननु - मिथ्यात्वस्य प्रपञ्चधर्मस्य सत्यत्वे ब्रह्माद्वैतक्षतेः तदपि मिथ्यैव वक्तव्यमिति कुतः प्रपञ्चस्य सत्यत्वक्षतिः । 'मिथ्याभूतं ब्रह्मणः सप्रपञ्चत्वं न निष्प्रपञ्चत्वविरोधि' इति त्वदुक्तरीत्या मिथ्याभूतमिथ्यात्वस्य सत्यत्वाविरोधात्

अत्रोक्तमद्वैतदीपिकायां—

वियदादिप्रपञ्चसमानस्वभावं मिथ्यात्वम् । तच्च धर्मिणः सत्यत्वप्रतिक्षेपकम् । धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे हि उभयवादिसिद्धं धर्मिसमसत्त्वं तन्त्रं, न पारमार्थिकत्वम् । घटत्वादिप्रतिक्षेपके पटत्वादौ अस्माकं पारमार्थिकत्वासम्प्रतिपत्तेः । ब्रह्मणः सप्रपञ्चत्वं न धर्मिसम-

---

मानादिनापि दुर्ग्रहत्वमुक्तमिति बोध्यम् । **रजतत्वादेरिति** । व्यवहारकालीनबाधरहितरजतत्वादिकमादिपदार्थः । **तस्मादिति** । सत्यत्वस्यार्थक्रियां प्रत्यप्रयोजकत्वादित्यर्थः ।

प्रकारान्तरेण प्रपञ्चस्य सत्यत्वं शङ्कते—**नन्विति** । **वक्तव्यमिति** । सिद्धान्तिनेति शेषः । ननु मिथ्याभूतस्यापि मिथ्यात्वस्य स्वाश्रये प्रपञ्चे स्वविरोधिसत्यत्वप्रतिक्षेपकत्वात् तस्य सत्यत्वक्षतिरपरिहार्येत्याशङ्कां सिद्धान्तिसम्मतदृष्टान्तेन परिहरति—**मिथ्याभूतमिति** । सप्रपञ्चत्वम्—प्रपञ्चतादात्म्यम्, निष्प्रपञ्चत्वं च प्रपञ्चात्यन्ताभाववत्त्वम्, तच्च वास्तवम् । व्यावहारिकप्रपञ्चात्यन्ताभावस्य ब्रह्मणि परमार्थत्वाभ्युपगमात् । अतः सप्रपञ्चत्वनिष्प्रपञ्चत्वयोर्यथा एकत्राविरोधः, तथा मिथ्यात्वसत्यत्वयोरप्यविरोध इति भावः ।

मिथ्यात्वधर्मो मिथ्याभूत इति पक्षमेव परिगृह्य समाधत्ते—**अत्रोक्तमिति** । **समानस्वभावमिति** । समानसत्ताकमित्यर्थः । वियदादिप्रपञ्चश्च व्यावहारिकसत्ताक इति भावः । ननु—आरोपितघटत्वादेः[1] आरोपाधिष्ठानभूते स्वाश्रये स्वविरुद्धाघटत्वादिप्रतिक्षेपकत्वादर्शनात् सत्यमेव घटत्वादि स्वाश्रये स्वविरुद्धधर्मप्रतिक्षेपकत्वेन कल्पनीयमिति कथं मिथ्याभूतं मिथ्यात्वं स्वधर्मिणि प्रपञ्चे सत्यत्वप्रतिक्षेपकं भवेत् - इत्याशङ्क्याह—**धर्मस्येति** । घटत्वादौ परमतरीत्या पारमार्थिकत्वरूपं सत्यत्वमस्ति । [2]तथा धर्मिसमानसत्ताकत्वं मतद्वयसम्मतमस्ति । तथा च घटत्वादिधर्मस्य स्वाभाविकाश्रये स्वविरुद्धधर्मप्रतिक्षेपकत्वे प्रयोजकाकाङ्क्षायां सम्प्रतिपन्नमेव प्रयोजकं कल्पनीयं न विप्रतिपन्नमित्यर्थः । दृष्टान्तं विघटयति—**ब्रह्मण इति** । **न धर्मीति** । ब्रह्मणः पारमार्थिकत्वात् सप्रपञ्चत्वस्य च व्यावहारिकत्वादिति भावः । ननु—प्रपञ्चगतमिथ्यात्वस्य मिथ्यात्वपक्षे तत् व्यावहारिकमेव वाच्यम्, ब्रह्मज्ञानैकनिवर्त्यस्य मिथ्यात्वधर्मस्य प्रातिभासिकत्वपारमार्थिकत्वयोरयोगात् । तस्य व्यावहारिकत्वे तु प्रपञ्चगतं सत्यत्वं पारमार्थिकं सिद्ध्यति । तस्यापि 'सन् घटः' इत्यादिप्रत्यक्षसिद्धस्य यावत्तत्त्वज्ञानमनुवर्तमानस्य प्रातिभासि-

---

1. आरोपितघटत्वादेः प्रतिक्षेपकत्वादर्शनात् इति सम्बन्धः ।

2. तथेति समुच्चये । परमतरीत्या एकं मतद्वयसंमतं एकञ्च अस्तीत्यर्थः ।

सत्ताकमिति न निष्प्रपञ्चत्वप्रतिक्षेपकम्। अत एव—मिथ्यात्वस्य व्यावहारिकत्वे तद्विरोधिनोऽ प्रातिभासिकस्य प्रपञ्चसत्यत्वस्य पारमार्थिकत्वं स्यादिति-निरस्तम्। धर्मिसमसत्ताकस्य मिथ्यात्वस्य व्यावहारिकत्वे धर्मिणोऽपि व्यावहारिकत्वनियमात्।

अथवा यो यस्य [1]स्वविषयसाक्षात्कारानिवर्त्यो धर्मः स तत्र स्वविरुद्धधर्मप्रतिक्षेपकः। शुक्तौ शुक्तितादात्म्यं तद्विषयसाक्षात्कारानिवर्त्यं अशुक्तित्वविरोधि, तत्रैव रजततादात्म्यं तन्निवर्त्यं अरजतत्वाविरोधि इति व्यवस्थादर्शनात्। एवं च प्रपञ्चमिथ्यात्वं कल्पितमपि प्रपञ्चसाक्षात्कारा-निवर्त्यमिति सत्यत्वप्रतिक्षेपकमेव। ब्रह्मणः सप्रपञ्चत्वं तु ब्रह्मसाक्षात्कारनिवर्त्यमिति न निष्प्रपञ्च-त्वप्रतिक्षेपकमिति।

कत्वायोगात्, व्यावहारिकमिथ्यात्वधर्मवति प्रपञ्चे तत्सत्यत्वस्य व्यावहारिकत्वायोगाच्च। तथा च प्रपञ्चगतस्य सत्यत्वधर्मस्य पारमार्थिकत्वसिद्धौ धर्मिणः प्रपञ्चस्यापि पारमार्थिकत्वमनिवार्यमिति ब्रह्माद्वैतक्षतिः—इति [2]कस्यचिच्चोद्यं वक्ष्यमाणहेतुना निरस्तमित्याह—**अत एवेति। नियमादिति।** मिथ्यात्वधर्मस्य धर्मिसमानसत्ताकत्वप्रयुक्तं व्यावहारिकत्वमुपेत्य, मिथ्यात्वधर्मिणि प्रपञ्चे सत्यत्वपर्यवसायिनः प्रपञ्चसत्यत्वे पारमार्थिकत्वापादानस्य विरोधेनासम्भवादित्यर्थः। न च प्रपञ्चे पारमार्थिकस्य सत्यत्वस्याभावे प्रातिभासिकव्यावहारिकसत्यत्वयोरपि प्राङ्निरस्तत्वात्तत्र सत्त्वानुभवविरोध इति वाच्यम्। व्यावहारिकस्यैव सत्त्वस्य प्रपञ्चे स्वीकारेणानुभवविरोधाभावात्। न च मिथ्यात्वसत्यत्वयोर्व्यावहारिकत्वेन समानसत्ताकयोरेकत्र विरोध इति वाच्यम्। मिथ्यात्वाविरुद्धस्य यावत्तत्त्वज्ञानं बाधरहितस्वरूपत्वलक्षणसत्त्वस्य प्रत्यक्षादिविषयस्य असकृदुक्तत्वादिति भावः।

'सर्वत्र ब्रह्मसत्तैव प्रतीयते न तदतिरेकेण व्यावहारिकं प्रातिभासिकं वा सत्त्वमस्ति' इति मते 'धर्मि-समसत्त्वं तन्त्रम्' इतिसमाधानं न सम्भवतीति मत्वा समाधानान्तरमाह—**अथवेति।** धर्मस्य स्वविरुद्धधर्मप्रतिक्षेप-कत्वे हि स्वाश्रयसाक्षात्कारानिवर्त्यत्वं प्रयोजकं कल्प्यते, संप्रतिपन्नत्वात्। न तु पारमार्थिकत्वम्, तस्यास्मा-कमसम्प्रतिपत्तेरिति भावः। यो धर्मो यस्य धर्मिणो धर्मिगोचरसाक्षात्कारानिवर्त्यः स धर्मः तत्र धर्मिणि - इत्यक्ष-रार्थः। ,उक्तप्रयोजके हेत्वन्तरमाह—**शुक्ताविति।** तत्पदं शुक्तिपरम्। **अशुक्तित्वविरोधीति।** अशुक्तित्वस्य प्रतिक्षेपकमित्यर्थः। **तत्रैवेति।** शुक्तावेव रजततादात्म्यरूपो धर्मो वर्तते, स च स्वविरुद्धस्य अरजतत्वस्य-रजतभिन्नत्वस्य शुक्तिगतस्य विरोधी-प्रतिक्षेपको न भवति - इत्यत्र हेतुगर्भं विशेषणं—**तन्निवर्त्यमिति।** शुक्तिसाक्षात्कारनिवर्त्यमित्यर्थः। **एवं चेति।** स्वाश्रयसाक्षात्कारानिवर्त्यधर्मस्य स्वाश्रये स्वविरुद्धधर्मस्थिति-विरोधित्वे प्रमाणेन निश्चिते सतीत्यर्थः। **अनिवर्त्यमिति।** यथा शुक्तिसाक्षात्कारे सति शुक्तितादात्म्यं न निवर्तते, तथा घटादिरूपप्रपञ्चसाक्षात्कारे सति श्रुतिन्यायसिद्धं मिथ्यात्वं न निवर्तत इत्यर्थः।

---

1. स्वेति। द्वितीययच्छब्दार्थः स्वशब्देन गृह्यते।
2. कस्यचित् - न्यायामृताख्यग्रन्थकर्तुः।

एतेन-शब्दगम्यस्य ब्रह्मणः सत्यत्वे [1]शब्दयोग्यतायाः शाब्दधीप्रामाण्यस्य च सत्यत्वं वक्तव्यम्। प्रातिभासिकयोग्यतावता अनाप्तवाक्येन व्यावहारिकार्थस्य व्यावहारिकयोग्यतावता अग्निहोत्रादिवाक्येन तात्त्विकार्थस्य वा सिद्ध्यभावेन योग्यतासमानसत्ताकस्यैव शब्दार्थस्य सिद्धि-नियमात्। [2]अर्थाबाधरूपप्रामाण्यस्यासत्यत्वे अर्थस्य सत्यत्वायोगाच्च। तथाच ब्रह्मातिरिक्तसत्यवस्तु-सत्त्वेन द्वैतावश्यम्भावे सति वियदादिप्रपञ्चोऽपि सत्योऽस्त्विति-निरस्तम्।

व्यावहारिकस्यार्थक्रियाकारित्वस्य व्यवस्थापितत्वेन व्यावहारिकयोग्यताया अपि सत्यब्रह्मसिद्धिसम्भवात्। ब्रह्मपरे वेदान्ते सत्यादिपदसत्त्वात् ब्रह्मसत्यत्वसिद्धेः। अग्निहोत्रादिवाक्ये तादृशपदाभावात् तत्सत्त्वेऽपि प्रबलब्रह्माद्वैतश्रुतिविरोधात् तदसिद्धिः इत्येव वैषम्योपपत्तेः। शब्दार्थ-

---

[3]चोद्यान्तरमपि वक्ष्यमाणहेतुना निरस्तमित्याह—**एतेनेति**। शब्दगम्यस्य ब्रह्मणःसत्यत्वे शब्द-निष्ठयोग्यतायास्सत्यत्वं वक्तव्यमित्यत्र हेतुमाह—**योग्यतासमानसत्ताकस्यैवेति**। [4]वाक्यार्थवाक्यनिष्ठयोग्यतयो-स्समानसत्ताकत्वनियमं साधयति—**प्रातिभासिकयोग्यतावतेति**। व्यावहारिकार्थस्य सिद्ध्यभावेनेति सम्बन्धः। शब्दगम्यस्य ब्रह्मणः सत्यत्वे ब्रह्मगोचरशाब्दज्ञाननिष्ठस्य प्रामाण्यस्य सत्यत्वं वक्तव्यमित्यत्र हेतुमाह—**अर्थाबाध-रूपेति**। तथा च वेदान्तार्थस्य ब्रह्मणःसत्यत्वसंरक्षणाय तद्धीप्रामाण्यस्य सत्यत्वं वक्तव्यमिति भावः। ननु ब्रह्मव्यतिरिक्तस्य निरुक्तयोग्यतादेः सत्यत्वसिद्धावपि पूर्ववाद्यभिमतं निखिलद्वैतसत्यत्वं कथं सिद्ध्यति, तत्राह—**तथाचेति**। **द्वैतावश्यम्भाव इति**। अद्वैतभङ्गावश्यम्भाव इत्यर्थः।

वेदान्तशब्दनिष्ठयोग्यतायास्सत्यत्वं किं तस्याश्शाब्दबोधरूपार्थक्रियाकारित्वसिद्ध्यर्थमपेक्ष्यते, किं वा ब्रह्मणस्सत्यत्वसिद्ध्यर्थम्। नाद्य इत्याह— **व्यावहारिकस्येति**। प्रपञ्चस्येति शेषः। योग्यताया इति पञ्चमी। सत्यस्य ब्रह्मणः सिद्धिः-शाब्दबोधः। द्वितीये योग्यतायास्सत्यत्वाभावेऽपि ब्रह्मणस्तत् सिद्ध्यतीत्याह—**ब्रह्मपरे इति**। अत्र आदिपदं सत्पदादिसङ्ग्रहार्थम्। तर्ह्यग्निहोत्रादिधर्मस्यापि सत्यादिपदात् सत्यत्वसिद्धिस्स्यादिति, नेत्याह—**अग्निहोत्रादीति**। ननु 'यो वै स धर्मः सत्यं वै तत्' [बृ.उ. १-४-१४] इति धर्मेऽपि सत्यपदं श्रुतौ प्रयुक्तमस्ति, तत्राह—**तत्सत्त्वेऽपीति**। **तदसिद्धिरिति**। 'यो वै स धर्मः' इति वाक्यस्याग्निहोत्रादौ परमार्थत्वप्रतिपादने तात्पर्यलिङ्गानामभावेन अतत्परस्य तस्य तत्परत्वेन प्रबलया अद्वैतश्रुत्या बाधात् धर्मस्य न ब्रह्मवत् परमार्थत्वसिद्धिरित्यर्थः। श्रुतावग्निहोत्रादेरवगत्यवस्थत्वेन सत्यत्वं अनुष्ठीयमानावस्थत्वेन धर्मत्वं च विवक्षित्वा 'यो वै स धर्मः सत्यं वै तत्' इति सत्यधर्मयोरभेद उक्त इति मन्तव्यम्। व्यावहारिकयोग्यतावता

---

1. शब्दयोग्यतायाः—शब्दनिष्ठयोग्यतायाः। शब्दनिष्ठयोग्यता नाम स्वसमभिव्याहृतपदोपस्थापितार्थसंसर्ग-योग्यार्थोपस्थापकपदघटितवाक्यत्वम्।

2. अर्थाबाधेति। अबाधितार्थकत्वेत्यर्थः।

3. चोद्यान्तरमपि न्यायामृतोक्तम्।

4. वाक्यार्थस्य वाक्यनिष्ठयोग्यतायाश्च इत्यर्थः।

ग्यतयोः समानसत्ताकत्वनियमस्य निष्प्रमाणकत्वात्, घटज्ञानप्रामाण्यस्य अघटघटितत्ववत् सत्यभूतब्रह्मज्ञानप्रामाण्यस्यापि तदतिरिक्तघटितत्वेन मिथ्यात्वोपपत्तेश्च ।

तस्मात् आरम्भणाधिकरणोक्तन्यायेन कृत्स्नस्य वियदादिप्रपञ्चस्य मिथ्यात्वं [1]वज्रलेपायते ।

ऐकात्म्यवादे सुखदुःखादिव्यवस्थोपपादनम्

ननु – आरम्भणशब्दादिभिरचेतनस्य वियदादिप्रपञ्चस्य मिथ्यात्वसिद्धावपि चेतनानामपवर्गभाजां मिथ्यात्वायोगात् अद्वितीये ब्रह्मणि [2]समन्वयो न युक्तः । न च तेषां ब्रह्माभेदः प्रागुक्तो युक्तः । परस्परभिन्नानां तेषाम् एकेन ब्रह्मणा अभेदासम्भवात् । न च तद्भेदासिद्धिः । सुखदुःखादिव्यवस्थया तत्सिद्धेः—इति चेत्

न—तेषामभेदेऽपि उपाधिभेदादेव तद्व्यवस्थोपपत्तेः ।

वेदान्तवाक्येन सत्यस्य ब्रह्मणः सिद्धौ फलितमाह—**शब्दार्थयोग्यतयोरिति** । ब्रह्मणः सत्यत्वेऽपि तज्ज्ञाननिष्ठप्रामाण्यस्य न सत्यत्वं सिद्ध्यति, तस्य ब्रह्ममात्रत्वाभावात्—इत्याह—**घटज्ञानेति** । **तदतिरिक्तेति** । ब्रह्मत्ववतिब्रह्मत्वप्रकारकानुभवत्वरूपतत्प्रामाण्यस्यापि ब्रह्मातिरिक्तब्रह्मत्ववैशिष्ट्यघटितत्वेनेत्यर्थः । यदि च ब्रह्मज्ञानगतं प्रामाण्यं अबाधितार्थानुभवत्वरूपम्, तच्च विवक्षितविवेकेन बाधायोग्यविषयस्वरूपमात्रे पर्यवस्यति, तन्मात्रपर्यवसितप्रामाण्यस्य च अखण्डार्थपरवेदान्तेषु ब्रह्ममात्रत्वमेव न तदतिरिक्तघटितत्वमिति ब्रह्मज्ञानप्रामाण्यस्य सत्यत्वं सम्भवतीत्युच्यते, तर्हि ब्रह्मगोचरशाब्दधीप्रामाण्यस्य सत्यत्वेऽपि न तवेष्टसिद्धिः, तस्य ब्रह्ममात्रत्वेन ब्रह्मातिरिक्तसत्यवस्त्वसिद्धेः इति भावः । **तस्मादिति** । विरोधाभावादित्यर्थः ।

प्रपञ्चस्य मिथ्यात्वपक्षे प्रत्यक्षादिविरोधाभावो निरूपितः । इदानीं सर्वेषु शरीरेष्वात्मन एकत्वपक्षे सुखदुःखादिव्यवस्थाविरोधमाशङ्क्य तां निरूपयितुं [3]प्रसङ्गमाह—**नन्वित्यादिना** । **अपवर्गेति** । जीवानां स्वरूपेण मिथ्यात्वे तत्त्वज्ञानेन निवृत्त्यापत्त्या तेषां मुक्तिभाक्त्वं न स्यादित्यर्थः । ननु जीवानां ब्रह्माभेदस्य वेदान्तप्रमाणकस्य प्रथमपरिच्छेदावसाने उक्तत्वात् ब्रह्मणो नाद्वितीयत्वानुपपत्तिः इत्याशङ्क्य निराकरोति—**न च तेषामिति** । जीवानां परस्परभेदासिद्धिमाशङ्क्याह—**न च तदिति** । एकस्य यदा दुःखं भवति तदा जीवान्तरस्य सुखं भवतीति सुखदुःखव्यवस्था, एवं रागद्वेषादिव्यवस्थाऽप्यनुभवसिद्धा द्रष्टव्या । तया तेषां परस्परभेदस्सिद्ध्यतीत्याह—**सुखेति** ।

नन्वारम्भणेत्यादिना प्राप्तं प्रतिशरीरमात्मभेदपक्षं प्रतिक्षिपति—**नेति** । **उपपत्तेरिति** । नात्मभेदः प्रामाणिक इत्यर्थः ।

---

1. वज्रलेपायते—दृढीभवति—अप्रमात्वशङ्काशून्यनिश्चयविषयो भवति ।
2. समन्वय इति । वेदान्तानां इत्यादिः ।
3. प्रसङ्गं—सङ्गतिम् ।

ननु उपाधिभेदेऽपि तदभेदानपायात् कथं व्यवस्था। न ह्याश्रयभेदेनोपपादनीयः विरुद्धधर्मासंकरः तदतिरिक्तस्य कस्यचित् भेदोपगमेन सिद्धयति

अत्र केचिदाहुः—सिद्धयत्येवान्तःकरणोपाधिभेदेन सुखदुःखादिव्यवस्था। 'कामस्संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' [बृ. उ. १-५-३] विज्ञानं यज्ञं तनुते [तै. उ. २-५] इत्यादिश्रुतिभिस्तस्यैव निखिलानर्थाश्रयत्वप्रतिपादनात् 'असङ्गो ह्ययं पुरुषः' [बृ. उ. ४-३-१५] 'असङ्गो न हि सज्जते' [बृ. उ. ४-२-४] इत्यादिश्रुतिभिः चेतनस्य सर्वात्मना औदासीन्यप्रतिपादनाच्च। न चैवंसति कर्तृत्वादिबन्धस्य चैतन्यसामानाधिकरण्यानुभवविरोधः। अन्तःकरणस्य चेतनतादात्म्येनाध्यस्ततया तद्धर्माणां चैतन्यसामानाधिकरण्यानुभवोपपत्तेः। न चान्तःकरणस्य कर्तृत्वादिबन्धाश्रयत्वे चेतनः संसारी न स्यादिति वाच्यम्। कर्तृत्वादिबन्धाश्रयाहङ्कारग्रन्थितादात्म्याध्यासाधिष्ठानभाव एव तस्य संसार इत्युपगमात्। तावतैव भीषणत्वा-

---

तदभेदेति। आत्माभेदेत्यर्थः। कथंशब्दसूचितामनुपपत्तिमाह—**न हीति। तदतिरिक्तस्येति।** विरुद्धसुखदुःखाद्याश्रयातिरिक्तस्य कस्यचित् अहमनुभवागोचरस्येत्यर्थः।

अन्तःकरणमेव बन्धाश्रयः अहमनुभवगोचरश्च, न त्वात्मा, तस्य कूटस्थत्वात्। तथाच आश्रयभेदादेव धर्मव्यवस्थेति समाधत्ते—**अत्र केचिदाहुरिति। मन एवेति।** मनः - अन्तःकरणम्। कामसंकल्पादीनां तत्परिणामत्वात् सामानाधिकरण्यम्[1]। विज्ञानम् - अन्तःकरणं तनुते - करोति यज्ञं - शास्त्रीयं कर्म। आदिपदेन 'कामा येऽस्य हृदि श्रिताः' [क. उ. ६-१४] इत्यादिश्रुतिर्ग्राह्या। चिदात्मनः कूटस्थत्वे प्रमाणमाह—**असङ्ग इति। असङ्गो न हि सज्जते इति।** सङ्गायोग्यत्वादित्यर्थः। आदिपदेन 'साक्षी चेता केवलो निर्गुणश्च' [श्वे.उ.६-११] 'अनश्नन्न्योऽभिचाकशीति' [मु.उ.३-१-१] इत्यादिश्रुतिसङ्ग्रहः। **न चैवंसतीति।** अन्तःकरणस्यैव बन्धाश्रयत्वे सतीत्यर्थः। 'अहं करोमि, अहं सुखी, अहं दुःखी, अहमुपलभे' इत्यादिरूपेण उपलब्धिरूपचैतन्यस्य कर्तृत्वसुखदुःखाद्यात्मकबन्धसामानाधिकरण्यमनुभूयते, तद्विरोध इत्यर्थः। यथा इदमंशतादात्म्येनाध्यस्ते रजते रजतत्वस्य इदंत्वसामानाधिकरण्यानुभवः तद्वदिति समाधत्ते—**अन्तःकरणस्येति।** तद्धर्माणामित्यत्र तत्पदमन्तःकरणपरम्। एतदुक्तं भवति—आत्मनश्चैतन्यस्वरूपत्वेऽपि भेदकल्पनया चैतन्यमात्मधर्मः। तथा च आत्मान्तःकरणयोरैक्याध्यासे सति तयोर्धर्माणां चैतन्यकर्तृत्वादीनां सामानाधिकरण्यं सम्पद्यत इति न तदनुभवविरोध इति। **चेतन इति।** चैतन्याश्रय आत्मा संसारी - कर्तृत्वादिधर्मवान् न स्यादित्यर्थः। चेतनस्य स्वतस्संसाराश्रयत्वाभावेऽपि बुद्धिनिष्ठस्य संसाराश्रयत्वस्य साक्षिणाऽनुभूयमानस्य आत्मन्यारोपोपपत्तेः[2] आरोपितसंसाराश्रयत्वमस्तीति परिहरति—**कर्तृत्वादीति।** अहङ्कारस्य चेतनेन सह ग्रन्थितुल्यो यस्तादात्म्यरूपोऽध्यासः तदधिष्ठान-

---

1. सामानाधिकरण्यं—तादात्म्यम्, तादात्म्योक्तिर्वा।
2. प्रकाशे प्रकाश्यधर्मारोपस्य लोके दर्शनात् इति भावः।

श्रयसर्पतादात्म्याध्यासाधिष्ठाने रज्ज्वादौ 'अयं भीषणः' इत्यभिमानवत् आत्मनोऽनर्थाश्रयत्वाभिमानोपपत्तेः। एतदभिप्रायेणैव 'ध्यायतीव लेलायतीव' [बृ-उ-४-३-७] 'अहङ्कारविमूढात्मा कर्ताहमिति मन्यते' [भ. गी. ३-२७] इत्यादिश्रुतिस्मृतिदर्शनाच्च। न च एकस्मिन्नेवात्मनि विचित्रसुखदुःखाश्रयतत्तदन्तःकरणानामध्यासात् आत्मन्याभिमानिकसुखदुःखादिव्यवस्था एवमपि न सिद्ध्यतीति वाच्यम्। आध्यासिकतादात्म्यापन्नान्तःकरणगतानर्थजातस्येव तद्गतपरस्परभेदस्यापि अभिमानत आत्मीयतया आत्मनो यादृशमनर्थभाक्त्वं तादृशेन भेदेन तद्व्यवस्थोपपत्तेः। एतेन - सुखदुःखादीनामन्तःकरणधर्मत्वेऽपि तदनुभवः साक्षिरूप इति तस्यैकत्वात् सुखदुःखानुभवरूपभोग-

---

त्वमेवेत्यर्थः। **तस्य** - चेतनस्येत्यर्थः। [1]**संसार इति**। संसाराश्रयत्वभ्रान्तिप्रयोजक इत्युपगमादित्यर्थः। **तावतैवेति**। उपाधेस्संसाराश्रयत्वमात्रेणेत्यर्थः। भीषणत्वं - भयहेतुत्वम्, तच्च सर्पधर्मः। अभिमानो भ्रान्तिः। न च अन्यनिष्ठसंसाराश्रयत्वस्यात्मन्यारोपेऽन्यथाख्यातिप्रसङ्ग इति वाच्यम्। अनुभूयमानारोपस्थले आरोप्याधिष्ठानयोः संसर्गस्यानिर्वचनीयस्योत्पत्त्युपगमेन तदप्रसङ्गादिति भावः। **एतदिति**। [2]बुद्धिनिष्ठसंसारस्यात्मन्यारोपाभिप्रायेणैवेत्यर्थः। बुद्धौ ध्यायन्त्यां आत्मा ध्यायतीव भाति, तस्यामेव लेलायन्त्यां - चलन्त्यां आत्मा चलतीव[3], न तु वस्तुतो ध्यानाद्याश्रय इति इवशब्दार्थः। ध्यानादिग्रहणं अशेषबुद्धिधर्मोपलक्षणार्थम्। अहङ्कारेण कर्तृत्वाश्रयेण सह विमोहं तादात्म्याध्यासमापन्नस्सन् आत्मा स्वात्मानं 'अहं कर्ता' इति मन्यते। कर्तृत्वमननं अशेषसंसारमननोपलक्षणार्थम्। ननु बुद्धेःस्वतस्संसाराश्रयत्वं चिदात्मनस्तु भ्रान्तिसिद्धं संसाराश्रयत्वमिति विभागाभ्युपगमे प्रतिशरीरं बुद्धिभेदात्तद्धर्मव्यवस्थासिद्धावपि प्रतिशरीरमात्मभेदाभावात्तद्गतस्य बन्धस्य व्यवस्था न सिद्ध्यतीति शङ्कते—**न चैकस्मिन्नेवेति**। विचित्राणां सुखदुःखानामाश्रयभूतानि तत्तदन्तःकरणानि, तेषामेकस्मिन्नेवात्मन्यध्यासाद्धेतोः य आत्मन्याभिमानिकः सुखदुःखादिः, तस्य व्यवस्था न सिद्ध्यतीत्यर्थः। **एवमपीति**। बुद्धिधर्मव्यवस्थासिद्धावपीत्यर्थः। बन्धाश्रयत्वस्येव बुद्धिगतस्य परस्परभेदाश्रयत्वस्यापि आत्मन्यारोपाभ्युपगमात् नाव्यवस्थेति परिहरति—**आध्यासिकेति**। नन्वारोपितेन भेदेन कथं व्यवस्थेत्याशङ्क्य, व्यवस्थापनीयस्याप्यात्मन्यारोपितत्वात् नाव्यवस्थापकत्वं तादृशभेदस्येत्याह—**यादृशमिति**। आत्मसाक्षिचैतन्ययोरभेदेऽपि भेदं कल्पयित्वा कल्पितबन्धाश्रयस्यात्मन एकत्वप्रयुक्तो दोषो निरस्तः, इदानीं साक्षिचैतन्यस्य सर्वशरीरेष्वेकत्वप्रयुक्तं दोषमाशङ्क्य निराकरोति—**एतेनेति**। वक्ष्यमाणहेतुनेत्यर्थः। **तदनुभव इति**। सुखाद्यनुभव इत्यर्थः। **सुखेति**। देवदत्तस्य यस्सुखानुभवः स एव चेद्यज्ञदत्तस्यापि, तदा देवदत्तस्य सुखानुभवकाले तमेव सुखानुभवमादाय यज्ञदत्तस्यापि अहं सुखीति भोगप्रसङ्ग इत्यर्थः। यथा अन्तःकरणगतभेदस्यात्मन्यारोपः, तथा साक्षिचैतन्यरूपे सुखाद्यनुभवेऽपि तद्गतभेदारोपाभ्युपगमात् न भोगाव्यवस्थेति परिहरति—**तत्तदिति**। **भेदेनेति**। तत्तदन्तः-

---

1. अहङ्कारतादात्म्याध्यासाधिष्ठानत्वस्य कर्तृत्वसुखदुःखाद्यात्मकसंसाररूपत्वाभावात् व्याचष्टे—संसार इतीति।

2. बुद्धिनिष्ठसंसारस्य—बुद्धिनिष्ठस्य संसाराश्रयत्वस्य।

3. चलतीव—चलतीव भाति।

व्यवस्था न सिद्ध्यतीति-निरस्तम्। तत्तदन्तःकरणतादात्म्यापत्त्या तत्तदन्तःकरणभेदेन भेदवत एव साक्षिणः तत्तदन्तःकरणसुखदुःखाद्यनुभवरूपत्वेन तद्व्यवस्थाया अप्युपपत्तेरिति।

अन्ये तु–जडस्य कर्तृत्वादिबन्धाश्रयत्वानुपपत्तेः 'कर्ता शास्त्रार्थवत्त्वात्'[ब्र-सू-२-३-३३] इति चेतनस्यैव तदाश्रयत्वप्रतिपादकसूत्रेण च अन्तःकरणे चिदाभासो बन्धाश्रयः, तस्य चासत्यस्य बिम्बाद्भिन्नस्य प्रत्यन्तःकरणं भेदात् विद्वदविद्वत्सुखिदुःखिकर्त्रकर्त्रादिव्यवस्था। न चैवमध्यस्तस्य बन्धाश्रयत्वे बन्धमोक्षयोर्वैयधिकरण्यापत्तिः। अस्य चिदाभासस्य अन्तःकरणावच्छिन्ने स्वरूपतस्सत्यतया मुक्त्यन्वयिनि परमार्थजीवेऽध्यस्ततया कर्तृत्वाश्रयचिदाभासतादात्म्याध्यासाधिष्ठानभावः तस्य बन्ध इत्यभ्युपगमात्-इत्याहुः।

करणभेदेन साक्षिण्यारोपितेन भेदविशिष्टस्यैवेत्यर्थः। [1]धान्येन धनवानित्यत्रेव तृतीया। साक्षिण्यन्तःकरणभेदारोपे हेतुः तादात्म्यापत्त्येति।

सर्वशरीरेष्वात्मन एकत्वे सुखादिव्यवस्था न स्यादिति पूर्ववाद्याक्षेपे अन्यत् समाधानमाह—**अन्ये त्विति**। पूर्वोक्तं बुद्धेर्बन्धाश्रयत्वं प्रथमं दूषयति—**जडस्येति**। **अनुपपत्तेरिति**। बन्धस्य चेतनधर्मत्वप्रसिद्धिविरोधादिति भावः। 'बुद्धेरेव कर्तृत्वं न चेतनस्य, तस्य कूटस्थत्वात्' इति साङ्ख्यमतनिराकरणपूर्वकं चेतनस्यैव कर्तृत्वव्यवस्थापकसूत्रानुसाराच्चेत्याह—**कर्तेति**। चेतनः कर्ता भवितुमर्हति, तथासत्येव चेतनस्य कर्तृत्वप्रतिपादकं 'कर्ता विज्ञानात्मा पुरुषः' इति शास्त्रमर्थवद्भवति, अन्यथा तदनर्थकं स्यात्-इति सूत्रार्थः। **चिदाभास इति**। न तु साक्षाच्चिदात्मैव, तस्य कूटस्थत्वेन बन्धपरिणामित्वायोगादिति भावः। चिदाभासस्य बन्धाश्रयत्वेऽपि कथं व्यवस्थासिद्धिः, तत्राह—**तस्य चेति**। बिम्बप्रतिबिम्बयोरभेदेऽपि प्रत्यन्तःकरणं प्रतिबिम्बभेदो लभ्यते, उपाधिभेदेन तन्निरूपितप्रतिबिम्बानामपि कल्पितभेदाभ्युपगमात्। तथापि प्रतिबिम्बमिथ्यात्वमत एव तस्य बन्धाश्रयत्वं [2]स्वाभाविकं सम्भवतीति तन्मिथ्यात्वमतमाश्रितम्। **न चैवमिति**। बिम्बप्रतिबिम्बयोर्भेदाङ्गीकार इत्यर्थः। सत्यस्य बिम्बचैतन्यस्य ब्रह्मभावलक्षणमोक्षाश्रयत्वे च सतीति शेषः। मुक्त्यन्वयिनो [3]बिम्बभूतावच्छिन्नचैतन्यस्य स्वतस्संसाराश्रयत्वाभावेऽपि भ्रान्तिसिद्धस्य तदाश्रयत्वस्य सम्भवात् न वैयधिकरण्यदोष इत्याह—**अस्येति**। चिदाभासगतबन्धस्य चिदात्मन्यध्यासे चिदात्मचिदाभासयोस्तादात्म्याध्यासं हेतुमाह—**अध्यस्ततयेति**। अस्य चिदाभासस्य परमार्थजीवेऽध्यस्ततयेति सम्बन्धः। **तस्य बन्ध इति**। बन्धः-बन्धारोपहेतुः इत्युपगमादित्यर्थः, यथाश्रुतस्याध्यासाधिष्ठानत्वस्य बन्धरूपत्वाभावात् सुखादेरेव बन्धरूपत्वाच्च इति बोध्यम्।

---

1. धान्येन धनवान् इत्यत्र अभेदे तृतीया, धान्याभिन्नधनवान् इत्यर्थः। तद्वत् तत्तदन्तःकरणभेदात्मकभेदवान् इत्यर्थः।

2. स्वाभाविकम्—आश्रयसमानसत्ताकम्।

3. बिम्बभूतावच्छिन्नचैतन्यस्य—बिम्बभूतस्य अवच्छिन्नचैतन्यस्य।

अपरे तु 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'। [क. उ. १-३-४] इति सहकारित्वेन देहेन्द्रियैः तादात्म्येन मनसा च युक्तस्य चेतनस्य भोक्तृत्वश्रवणात् अन्तःकरणभेदेन तद्विशिष्टभेदात् व्यवस्था। न चैवं विशिष्टस्य बन्धः शुद्धस्य मोक्ष इति वैयधिकरण्यम्। विशिष्टगतस्य बन्धस्य विशेष्येऽनन्वयाभावात्, विशिष्टस्यानतिरेकात् - इत्याहुः।

इतरे तु—अस्तु केवलश्चेतनः कर्तृत्वादिबन्धाश्रयः। स्फाटिकलौहित्यन्यायेन अन्तःकरणस्य तद्विशिष्टस्य वा कर्तृत्वाद्याश्रयस्य सन्निधानात् चेतनेऽपि कर्तृत्वाद्यन्तरस्याध्यासोपगमात्।

सर्वशरीरेषु चिदात्मन एकत्वेऽपि तस्य केवलस्य बन्धाश्रयत्वं नोपेयते, किं तु बुद्धिविशिष्टस्य चिदात्मनः, तथा च बन्धाश्रयस्य विशिष्टस्य प्रतिशरीरं भेदात् न सुखदुःखादिसाङ्कर्यमिति मतान्तरमाह—**अपरे त्विति**। विशिष्टस्य भोक्तृत्वे मानमाह—**आत्मेति**। आत्मशब्दो देहपरः। श्रुतौ आत्मानमित्यध्याहारः। इतिशब्दो द्वितीयासमानार्थकः। ततश्च देहेन्द्रियान्तःकरणयुक्तमात्मानं भोक्तारमाहुर्विद्वांस इत्यर्थः। ननु—देहस्य विशेषणतया भोक्तृकोटौ निवेशो न सम्भवति, तस्य आत्मनि भोगं प्रत्यवच्छेदकतया उपकरणत्वात्। इन्द्रियाणामपि भोक्तृकोटौ निवेशो न सम्भवति, तेषामुपकरणमात्रत्वात् स्वप्ने तेषामभावेऽपि भोगदर्शनाच्च। तस्माद्देहेन्द्रियैर्युक्तस्यात्मनो भोक्तृत्वश्रुतिरनुपपन्ना- इत्याशङ्क्य युक्तपदोदितं योगं यथायोग्यं दर्शयति—**सहकारित्वेनेति**। आत्मनि तावत् कामसङ्कल्पादयोऽनुभूयन्ते। ते च मनोधर्मत्वेन श्रुतिसिद्धाः। तथा च कामादिमन्मनस्तादात्म्यं विना आत्मनः कामाद्याश्रयत्वानुपपत्तेः तत्तादात्म्येन तद्विशिष्टस्य भोक्तृत्वं युक्तमित्याशयेनाह—**तादात्म्येनेति**। ननु-बुद्धिविशिष्टात्मा केवलात्मनस्सकाशाद्भिन्नः। विशिष्टं केवलं न भवतीति प्रतीतेः, विशिष्टवृत्तिकेवलप्रतियोगिकभेदस्य [1]विशेष्यवृत्तित्वनियमात्। तथा च विशिष्टात्मगतबन्धस्य विशेष्यान्वयित्वेऽपि मुक्त्यन्वयिकेवलचैतन्येऽनन्वयात् वैयधिकरण्यतादवस्थ्यमिति, नेत्याह—**विशिष्टस्येति**। विशिष्टान्तर्गतविशेष्यस्य [2]केवलादनतिरेकादित्यर्थः। अयं भावः—लोके दण्डविशिष्टपुरुषे केवलपुरुषाभेदस्य प्रत्यभिज्ञायमानत्वात् तत्प्रत्यभिज्ञाया बाधकाभावाच्च विशिष्टान्तर्गतविशेष्यस्य केवलस्य च स्वाभाविकमेकत्वं विशिष्टत्वाविशिष्टत्वरूपभेदेन काल्पनिको भेदश्च कल्प्यते। तथा च विशिष्टगतबन्धस्य विशेष्यान्वयिनः केवलात्मन्यप्यन्वयःसिद्ध इति।

[3]अञ्जसा बन्धमोक्षयोः सामानाधिकरण्यमाह—**इतरे त्विति**। **स्फाटिकेति**। यथा लौहित्याश्रयस्य जपाकुसुमादेः सन्निधानात् स्फटिके उपाधिगतलौहित्यापेक्षया तत्प्रतिबिम्बभूतस्य लौहित्यान्तरस्योत्पत्तिः, तथा चिदात्मनि बुद्ध्यादिगतबन्धापेक्षया अन्यस्य कर्तृत्वादिबन्धस्य अध्यासात्मकस्योपगमादित्यर्थः। न च बुद्ध्यादौ

---

1. विशेष्यवृत्तित्वनियमादिति। विशेषणमात्रवृत्तित्वे विशिष्टवृत्तित्वं न स्यात्। तथा च 'विशिष्टान्तर्गतविशेष्यं केवलाभिन्नं' इति वक्तुं न शक्यते, किन्तु अत्यन्तभिन्नमेवेत्यर्थः।

2. केवलादनतिरेकादिति—अतिरेकः—आत्यन्तिकभेदः - अभेदासमानाधिकरणो भेदः, केवलप्रतियोगिकात्यन्तिकभेदरहितत्वात् इत्यर्थः।

3. अञ्जसा-मुख्यं सामानाधिकरण्यं—बन्धमोक्षाश्रययोः ऐक्यघटितं, न तु पूर्वमते इव भेदाभेदरूपतादात्म्यघटितम्।

न च तस्यैकत्वाद्व्यवस्थानुपपत्तिः। उपाधिभेदादेव तदुपपत्तेः। न चान्यभेदादन्यत्र विरुद्धधर्माणां व्यवस्था न युज्यत इति वाच्यम्। मूलाग्ररूपोपाधिभेदमात्रेण वृक्षे संयोगतदभावव्यवस्थादर्शनात्, तत्तत्पुरुषकर्णपुटोपाधिभेदेन श्रोत्रभावमुपगतस्याकाशस्य तत्रतत्र शब्दोपलम्भकत्वानुपलम्भकत्वतारमन्द्रेष्टानिष्टशब्दोपलम्भकत्वादिवैचित्र्यदर्शनाच्च—इत्याहुः।

एके तु - यद्याश्रयभेदादेव विरुद्धधर्मव्यवस्थोपपादननियमः, तदा चेतने निष्कृष्ट एव उपाधिवशात् भेदकल्पना अस्तु। अकल्पिताश्रयभेद एव व्यवस्थाप्रयोजक इति क्वाप्यसम्प्रतिपत्तेः, मणिमुकुरकृपाणाद्युपाधिकल्पितेन भेदेन मुखे श्यामावदातवर्तुलदीर्घभावादिधर्माणां अङ्गुल्युपष्टम्भोपाधिकल्पितेन भेदेन दीपे पाश्चात्यपौरस्त्यादिधर्माणां च व्यवस्थासम्प्रतिपत्तेः—इत्याहुः।

साक्षिणाऽनुभूयमानस्य बन्धस्य चिदात्मनि संसर्गमात्राध्यासोपगमेन वैयधिकरण्यशङ्कापरिहारसम्भवात् तत्र च बुद्ध्यादिनिष्ठकर्तृत्वादिसदृशकर्तृत्वप्रमुखबन्धोत्पत्तिकल्पनं न प्रामाणिकमिति वाच्यम्। 'बुद्धेर्गुणेन....आराग्रमात्रो ह्यवरः' [श्वे.उ.५-८] इति श्रुतौ अवरशब्दितजीवस्य आराग्रमात्रशब्दितमल्पपरिमाणं बुद्धिगुणशब्दितबुद्धिपरिमाणहेतुकमिति प्रतिपादनेन, तुल्यन्यायतया 'कर्तृत्वादिकमपि बुद्धिधर्मसदृशमात्मन्युत्पद्यते' इत्यस्यार्थस्य श्रुतिसम्मतत्वेन प्रामाणिकत्वात्। **न च तस्येति**। कर्तृत्वाद्यध्यासाधिष्ठानस्यात्मन इत्यर्थः। **मूलेति**। परमतेनेदं दृष्टान्तद्वयम्, सिद्धान्ते [1]मूलावच्छिन्नवृक्षस्याग्रावच्छिन्नवृक्षस्य च काल्पनिकभेदाभ्युपगमेनैव संयोगतदभावव्यवस्थोपगमात् श्रोत्रेन्द्रियस्य दिगारभ्यत्वोपगमाच्चेति बोध्यम्। **तारेति**। तारशब्दोपलम्भकत्वमन्द्रशब्दोपलम्भकत्वेष्टशब्दोपलम्भकत्वानिष्टशब्दोपलम्भकत्वादिलक्षणस्य वैचित्र्यस्य दर्शनादित्यर्थः।

यदि दृष्टान्तयोरुपाधिभेदेन तदुपहितवृक्षादिभेदं परो ब्रूयात् तदा प्रकृतेऽपि तथाऽस्त्वित्याशयेनाह—**एके त्विति**। **निष्कृष्ट इति**। अन्तःकरणविशिष्टवेषात् निष्कृष्टे–तदुपहिते चिदात्मनीत्यर्थः। ननु सत्यभेद एव व्यवस्थाप्रयोजक इति, नेत्याह—**अकल्पितेति**। घटादिभेदस्यापि सत्यत्वस्य अस्माकमसम्मतत्वादित्यर्थः। ननु स्वाभाविकभेद एव व्यवस्थाप्रयोजकः, न त्वौपाधिकभेदः - इत्याशङ्क्याह—**मणीति**। मुखे हि मलिनमणिदर्पणकृतेन भेदेन श्यामत्वावदातत्वव्यवस्थासम्प्रतिपत्तेः, कृपाणमणिमयस्तम्भादिकृतेन भेदेन वर्तुलत्वदीर्घभावादिव्यवस्थासम्प्रतिपत्तेः—इत्यर्थः। न च–बिम्बप्रतिबिम्बयोरभेदे स्वाभाविके खलु भेद औपाधिक इति सिद्ध्यति, तद्वशाद्व्यवस्था च सिद्ध्यति, तयोरभेद एव कथं सिद्ध इति—वाच्यम्। तस्य प्रागेव साधितत्वादिति भावः। अवच्छेदपक्षे औपाधिकभेदस्य व्यवस्थापकत्वसम्प्रतिपत्तिं दर्शयति—**अङ्गुलीति**।

---

1. मूलावच्छिन्नेति। मूलविशिष्टेत्यर्थः, एवं अग्रावच्छिन्नेत्यत्रापि। सिद्धान्ते अवच्छेद्यावच्छेदकभावस्य अत्र अनुपगमात्। 'अग्रे वृक्षः कृष्णसंयोगी' इत्यादेः 'तादात्म्यावच्छिन्नाधेयतासम्बन्धेन अग्रविशिष्टो वृक्षः' इत्यादिरर्थः। विशिष्टकेवलयोरिव भिन्नविशेषणविशिष्टयोरपि भेदाभ्युपगमात्।

जीवानां सुखदुःखाद्यनुसन्धानाननुसन्धानव्यवस्थोपपादकोपाधिस्वरूपविशेषविचारः

एवमुपाधिवशाद्व्यवस्थोपपादने सम्भाविते जीवानां परस्परसुखाद्यननुसन्धानप्रयोजक उपाधिः [1]क इति निरूपणीयम् ।

अत्र केचिदाहुः—**भोगायतनाभेदतद्भेदौ अनुसन्धानाननुसन्धानप्रयोजकोपाधी । शरीरावच्छिन्नवेदनायाः तदवच्छिन्नेनानुसन्धानात्, चरणावच्छिन्नवेदनाया हस्तावच्छिन्नेनाननुसन्धानाच्च । 'हस्तावच्छिन्नोऽहं पादावच्छिन्नवेदनामनुभवामि' इत्यप्रत्ययात् । कथं तर्हि चरणलग्नकण्टकोद्धाराय हस्तव्यापारः । नायं हस्तव्यापारः हस्तावच्छिन्नानुसन्धानात्, किंतु अवयवावयविनोश्चरणशरीरयोर्भेदासत्त्वेन चरणावच्छिन्नवेदना शरीरावच्छिन्नेन 'अहं चरणे वेदनावान्' इत्यनुसन्धीयत इति तदनुसन्धानात् । एवं च चैत्रमैत्रशरीरयोरभेदाभावात् चैत्रशरीरा-**

जीवानां उपाधिभेदाद्वा औपाधिकभेदाद्वा सुखदुःखादिव्यवस्थासिद्धौ तेषां वस्तुतः परस्परं भेदे प्रमाणाभावात् एकब्रह्माभेदः सिद्ध्यति । तत्सिद्धौ च जीवाभिन्ने निष्प्रपञ्चे ब्रह्मणि वेदान्तसमन्वयः सिद्ध इति प्रतिपादितम्[2] । सम्प्रति विचारान्तरमारभते—**एवमिति** । उक्तप्रकारेणेत्यर्थः । **क इति** । अनुसन्धानाननुसन्धानयोः किं भोगायतनाभेदतद्भेदौ प्रयोजकौ, किं वा विश्लिष्टभोगायतनाभेदतद्भेदौ, अथवा शरीराभेदतद्भेदौ, अन्तःकरणाभेदतद्भेदौ वा, अज्ञानाभेदतद्भेदौ वा इति प्रश्ने प्रतिवचनं निरूपणीयमित्यर्थः ।

तत्र आद्यं पक्षमादाय प्रतिवचनं निरूपयति—**अत्र केचिदाहुरिति** । तत्रान्वयव्यतिरेकौ प्रमाणयति—**शरीरावच्छिन्नेति** । भोगायतनं ह्यवच्छेदकतासम्बन्धेन भोगाश्रयः । स च देहस्तदवयवहस्तादिश्च भवतीत्याशयेनाह—**चरणेति** । अननुसन्धानमेव दर्शयति—**हस्तावच्छिन्न इति** । हस्तावच्छिन्नात्मनः पादावच्छिन्नात्मगतदुःखानुसन्धातृत्वाभावे बाधकं शङ्कते—**कथं तर्हीति** । 'अयं हस्तव्यापारो हस्तावच्छिन्नस्यानुसन्धानात् न भवति किं तु तदनुसन्धानात्' इति सम्बन्धः । तस्य - शरीरावच्छिन्नस्य यच्चरणावच्छिन्नगतवेदनानुसन्धानम्, तस्मादित्यर्थः । ननु—चरणावच्छिन्नगता वेदना कथं शरीरावच्छिन्नेनानुसन्धीयते, अवयवावयविनोर्भेदात् । भेदेऽप्यनुसन्धानोपगमे चैत्रशरीरावच्छिन्ना वेदना मैत्रशरीरावच्छिन्नेनाप्यनुसन्धीयेत, भेदाविशेषात् । तथा च चैत्रशरीरलग्नकण्टकोद्धाराय मैत्रशरीरस्य स्वारसिको व्यापारः प्रसज्येत—अत आह—**अवयवावयविनोरिति** । अवयवानां परस्परं भेदेऽपि शरीरतदवयवयोस्तादात्म्योपगमादित्यर्थः । **एवं चेति** । शरीरावच्छिन्नस्य चरणावच्छिन्नवेदनानुसन्धानं प्रति शरीरचरणयोस्तादात्म्यस्य

---

1. क इति । यद्यपि अन्तःकरणमुपाधिमाश्रित्य तद्भेदाभेदाभ्यां व्यवस्था उपपादिता, तथाऽपि प्रश्नोत्तरशैल्या उपाध्यन्तरनिरूपणे तात्पर्यम् ।

2. इति प्रतिपादितमिति । पूर्वं 'नन्वारम्भणशब्दादिभिः' इत्यादिना या वेदान्तानां अद्वितीये ब्रह्मणि समन्वयासिद्धिशङ्का कृता तत्परिहारायोपक्रान्तो विचारः परिसमाप्तः—इति समुदायार्थः ।

वच्छिन्नवेदना न मैत्रशरीरावच्छिन्नेनानुसन्धीयते, नाप्युभयशरीरानुस्यूतावयव्यन्तरावच्छिन्ने-नानुसन्धीयते, उभयानुस्यूतस्यावयविनो भोगायतनस्यैवाभावात् इति न चैत्रशरीरलग्नकण्टकोद्धाराय मैत्रशरीरव्यापारप्रसङ्ग इति ।

अन्ये तु - विश्लिष्टोपाधिभेदोऽननुसन्धानप्रयोजकः । तथा च हस्तावच्छिन्नस्य चरणाव-च्छिन्नवेदनानुसन्धानाभ्युपगमेऽपि न दोषः । न चैवंसति गर्भस्थस्य मातृसुखानुसन्धानप्रसङ्गः । एकस्मिन्नवयविन्यवयवभावेनाननुप्रविष्टयोः विश्लिष्टशब्देन विवक्षितत्वात्, मातृगर्भशरीरयोस्तथा-त्वात्—इत्याहुः ।

न च 'उद्यतायुधदोर्दण्डाः पतितस्वशिरोऽक्षिभिः । पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीनिह ॥' इति भारतोक्त्या विश्लेषेऽप्यनुसन्धानमवगतमिति-वाच्यम् । तत्रापि शिरःकबन्ध-योरेकस्मिन्नवयविन्यवयवभावेनानुप्रविष्टचरत्वात्, शिरश्छेदानन्तरं मूर्छामरणयोरन्यतरावश्यंभावेन

नियामकत्वे सतीत्यर्थः । ननु हस्तावच्छिन्नस्य चरणावच्छिन्नगतवेदनानुसन्धातृत्वाभावेऽपि चरणलग्न-कण्टकोद्धाराय हस्तव्यापारवत् मैत्रशरीरावच्छिन्नस्य चैत्रशरीरावच्छिन्नगतवेदनानुसन्धातृत्वाभावेऽपि चैत्रशरीर-लग्नकण्टकोद्धाराय मैत्रशरीरव्यापारप्रसङ्गः परिहर्तुं न शक्यते, तत्राह—**नापीति** । चैत्रमैत्रशरीरद्वयानुस्यू-तेत्यर्थः । चैत्रशरीरावच्छिन्नवेदना उभयानुस्यूतावयव्यन्तरावच्छिन्नेनापि नानुसन्धीयत इति सम्बन्धः । अतो न दृष्टान्तसाम्यमिति भावः ।

चरणलग्नकण्टकोद्धाराय हस्तव्यापारानुरोधेन हस्तावच्छिन्नस्यैव चरणावच्छिन्नवेदनानुसन्धातृत्वमुपेयते । न च—तथा सति भोगायतनभेदस्याननुसन्धानप्रयोजकत्वं न स्यात्, चरणहस्तभेदे व्यभिचारादिति—वाच्यम् । तद्वारणाय विशेषणदानोपपत्तेः—इति मत्वा द्वितीयमुपाधिं निरूपयति—**अन्ये त्विति** । उपाधिपदं भोगायतनपरम् । **न दोष इति** । भोगायतनयोर्हस्तचरणयोर्भेदे सत्यपि तयोर्विश्लिष्टत्वाभावेन विश्लिष्टभोगायतनभेदस्याननुसन्धान-प्रयोजकस्याभावात् न तत्र व्यभिचारदोष इत्यर्थः । **न चैवंसतीति** । विश्लिष्टत्वविशेषणदाने सतीत्यर्थः । गर्भस्थजीवस्य यत् भोगायतनं तस्य मातृशरीरस्य च विश्लेषाभावादिति भावः । विश्लिष्टपदार्थानभिज्ञस्येदंचोद्यमिति परिहरति—**एकस्मिन्निति** । **तथात्वादिति** । एकस्मिन्नवयविन्यवयवभावेनाननुप्रविष्टत्वादित्यर्थः । तथा च विश्लिष्टोपाधिभेदसत्त्वात् न गर्भस्थजीवस्य मातृसुखानुसन्धानप्रसङ्ग इति भावः ।

निरुक्ताननुसन्धानप्रयोजकस्य व्यभिचारं शङ्कते—**न चेति** । दोर्दण्डाः-बाहुदण्डाः । कबन्धाः-छिन्न-शिरस्कदेहाः । इह-युद्धे भूमौ वा । अत्र वचने चैत्रमैत्रशरीरयोरिव विश्लिष्टयोः कबन्धशिरसोर्भेदे सत्यपि शिरोऽ-वच्छिन्नस्य कबन्धावच्छिन्नगतयोद्धृत्वानुसन्धातृत्वमवगम्यत इति व्यभिचार इत्यर्थः । तत्रानुसन्धानमुपेत्य चैत्रमैत्र-शरीरवैलक्षण्येन समाधत्ते—**तत्रापीति** । **चरत्वादिति** । पूर्वमनुप्रविष्टत्वादित्यर्थः । अस्य वचनस्य स्वार्थे मानत्वाभावात् व्यभिचारशङ्कैवायुक्तेत्याशयेन अभ्युपगमं परित्यजति—**शिरश्छेदानन्तरमिति** । कबन्धा अपि पातयन्ति, किमु-

दृष्टविरुद्धार्थस्य तादृशवचनस्य कैमुत्यन्यायेन योधोत्साहातिशयप्रशंसापरत्वात्, तादृक्प्रभावयुक्तपुरुषविशेषविषयत्वेन भूतार्थवादत्वेऽपि निरुक्तस्य उत्सर्गतोऽननुसन्धानतन्त्रत्वाविघाताच्च। अत एव उक्तवक्ष्यमाणपक्षेषु योगिनां जातिस्मराणां च शरीरान्तरवृत्तान्तानुसन्धाने न दोषप्रसक्तिः।

अपरे तु - शरीरैक्यभेदौ अनुसन्धानतदभावप्रयोजकोपाधी। बाल्यभवान्तरानुभूतयोरनुसन्धानतदभावदृष्टेः। न च बाल्ययौवनयोरपि शरीरभेदः शङ्कनीयः। प्रत्यभिज्ञानात्। न च परिमाणभेदेन तद्भेदावगमः। एकस्मिन् वृक्षे मूलाग्रभेदेनेव कालभेदेनैकस्मिन्ननेकपरिमाणान्वयोपपत्तेः। ननु-अवयवोपचयमन्तरेण न परिमाणभेदः, अवयवाश्च पश्चादापतन्तो न पूर्वसिद्धं शरीरं परियुज्यन्ते, इति परिमाणभेदे शरीरभेद आवश्यकः—इति चेत्, न—प्रदीपारोपणसमसमयसौ-

---

तान्ये—इति योधानामुत्साहातिशयं प्रशंसत्येतद्वचनमित्यर्थः। ननु - शिरश्छेदानन्तरमपि युद्धानुसन्धानादिकं योगमहिम्ना तपोमहिम्ना वा वरदानमहिम्नावा केषांचित् सम्भवति, ततो विद्यमानार्थकमेवेदं वचनं - इत्याशङ्कायां पुनरनुसन्धानमुपेत्य व्यभिचारं परिहरति—**तादृगिति**। 'विश्लिष्टभोगायतनभेदोऽननुसन्धानप्रयोजक इत्युत्सर्गः' इत्युपगमात् उदाहृतानुसन्धानस्थलस्य तदपवादस्थलत्वाभ्युपगमात् तत्र व्यभिचारो न दोषायेति भावः। **अत एवेति**। उत्सर्गरूपत्वाभ्युपगमादेवेत्यर्थः। **न दोषप्रसक्तिरिति**। भोगायतनभेदादेरननुसन्धानप्रयोजकत्वनियमाभ्युपगमे हि योगिषु जातिस्मरेषु च [1]भोगायतनभेदादिप्रयोजकचतुष्टयस्य सत्त्वेप्यननुसन्धानाभावेन व्यभिचाररूपदोषप्रसक्तिर्भवेदित्यर्थः। अदृष्टविशेषासहकृतस्य भोगायतनभेदादेरननुसन्धानप्रयोजकत्वस्य विवक्षितत्वात् न योग्यादिषु व्यभिचार इति तात्पर्यम्।

तृतीयपक्षमादाय प्रतिवचनं निरूपयति—**अपरे त्विति**। तत्र मानमाह—**बाल्येति**। बाल्येऽनुभूतस्य वार्धकेऽनुसन्धानं दृश्यते। बाल्यवार्धकयोश्शरीराभेदात्। तद्भेदादेव भवान्तरानुभूतस्य अस्मिन् जन्मनि अनुसन्धानं न दृश्यत इत्यर्थः। **शङ्कनीय इति**। परिमाणभेदादिति भावः। बाल्याद्यवस्थाभेदेऽपि 'तदेवेदं शरीरं' इति प्रत्यभिज्ञादर्शनात् न शरीरभेद इति परिहरति—**प्रत्यभिज्ञानादिति**। शङ्काबीजमनूद्यान्यथासिद्धिमाह—**न चेत्यादिना**। आरम्भवादमाश्रित्य शङ्कते—**नन्विति**। **न पूर्वसिद्धमिति**। पूर्वसिद्धे शरीरे उपादानत्वायोगात् पूर्वसिद्धशरीरनाशपूर्वकं तदवयवैरुपचितावयवैश्च मिलित्वा शरीरान्तरं द्व्यणुकत्र्यणुकादिक्रमेणारब्धव्यमिति परिमाणभेदे शरीरभेद आवश्यकः, प्रत्यभिज्ञा च शरीरत्वसामान्यविषया भविष्यतीत्यर्थः। समसमयत्वं विकासविशेषणम्। समयश्च क्षणरूपो बोध्यः। तत्पदं दीपपरम्। उपादानोपादेययोः [2]सामानाधिकरण्यानुभवादिः

---

1. भोगायतनभेदादिप्रयोजकचतुष्टयस्य—भोगायतनभेदः, विश्लिष्टभोगायतनभेदः, शरीरभेदः, अन्तःकरणभेदः—इत्येतेषां अननुसन्धानप्रयोजकानां चतुष्टयस्य। योगिषु प्रयोजकचतुष्टयं वर्तते, जातिस्मरेषु अन्तःकरणभेदव्यतिरिक्तं प्रयोजकत्रयं, इति यथायोगं योज्यम्। अज्ञानोपाधिपक्षे न व्यभिचार इत्यतः चतुष्टयस्येत्युक्तम्।

2. सामानाधिकरण्यं—तादात्म्यम्। सत्कार्यवादयुक्तयः आदिशब्देन गृह्यन्ते।

धोदरव्यापिप्रभामण्डलविकासतत्पिधानसमसमयतत्सङ्कोचाद्यननुरोधिनः परमाणुप्रक्रियारम्भवादस्य अनभ्युपगमात् । विवर्तवादे च ऐन्द्रजालिकदर्शितशरीरवत् विनैवावयवोपचयं मायया शरीरस्य वृद्ध्युपपत्तेः—इत्याहुः ।

इतरे तु - अन्तःकरणाभेदतद्भेदाभ्यामनुसन्धानाननुसन्धानव्यवस्थामाहुः । अयं च पक्षः प्रागुपपादितः ।

केचित्तु अज्ञानानि जीवभेदोपाधिभूतानि नानेति स्वीकृत्य तद्भेदाभेदाभ्यां अनुसन्धानाननुसन्धानव्यवस्थामाहुः ।

अत्र केचित् 'अंशो नानाव्यपदेशात्' [ब्र. सू. २.३.४३] इत्यधिकरणे 'अदृष्टानियमात्' 'अभिसन्ध्यादिष्वपि चैवम्' 'प्रदेशादिति चेन्नान्तर्भावात्' [ब्र. सू २-३-५१, ५२, ५३] इति सूत्रतद्गतभाष्यरीतिमनुसृत्य एकस्मिन्नात्मनि उपाधिभेदेन व्यवस्थानुपगमे कणभुगादिरीत्याऽऽत्मभेदवादेऽपि व्यवस्थानुपपत्तितौल्यमाहुः ।

आदिपदार्थः । **अननुरोधिन इति** । द्व्यणुकादिक्रमेण स्थूलावयव्युत्पत्तिपक्षे विलम्बापत्तेः समसमयत्वानुभवविरोधात्, परमाणुसंयोगनाशक्रमेण प्रभादिनाशेऽपि विलम्बापत्तेः, आरम्भवादे उपादानोपादेययोः अत्यन्तभेदाभ्युपगमेन सामानाधिकरण्यानुभवविरोधाच्च, तद्वादस्य हेयत्वमेवेत्यर्थः । अवयवोपचयक्रमेण शरीरान्तरारम्भानुपगमे कथमेकस्मिन् शरीरे विरुद्धपरिमाणयोग इत्यत आह—**विवर्तवादे चेति** ।

चतुर्थं पक्षमादाय प्रतिवचनं ददाति—**इतरे त्विति** । **प्रागिति** । सुखदुःखादिव्यवस्थोपपादनग्रन्थ इत्यर्थः ।

पञ्चमं पक्षमाह—**केचित्त्विति** । प्रतिजीवमज्ञानभेदे प्रमाणं ब्रह्मलक्षणविचारावसरे दर्शितम् ।

एवमैकात्म्यवादे व्यवस्थामुपपाद्य तन्नानात्ववादे व्यवस्थानुपपत्तिमाह—**अत्रेति** । अंशो ब्रह्मणो जीवः, श्रुतिषु जीवब्रह्मणोर्नानात्वव्यपदेशात् । न च ब्रह्मणो निरंशस्य कथं जीवोंऽश इति वाच्यम् । अवच्छिन्नाकाशो महाकाशस्य यथा अंशः, तथा अवच्छिन्नचैतन्यं अनवच्छिन्नचैतन्यरूपस्य ब्रह्मणोंऽश इत्युपगमादिति—सूत्रभागार्थः । 'अदृष्टानियमात्' इत्यादिसूत्रत्रयस्य व्याख्यानं भविष्यति । कणभुगादिभिर्हि प्रतिशरीरमात्मभेदाभावे व्यवस्था न सम्भवतीति आत्मभेद आश्रितः । न च आत्मन एकत्वेऽप्युपाधिकृता व्यवस्था सम्भवतीति तद्भेदाश्रयणं तेषां व्यर्थमिति वाच्यम् । उपाधिकृतव्यवस्थायाः क्लिष्टत्वात् । अतोऽञ्जसा व्यवस्थासिद्धये आत्मभेदस्तैराश्रितः । तदेतन्मतं दूषयति—**कणभुगादिरीत्येति** । **व्यवस्थेति**[1] । व्यवस्थाञ्जस्याभावस्य तुल्यत्वमाहुरित्यर्थः ।

---

1. सिद्धान्ते व्यवस्थाया उपपादितत्वात् व्यवस्थाऽनुपपत्तेर्न तुल्यत्वं—इत्यतः अनुपपत्तिपदं आञ्जस्याभावपरतया व्याचष्टे—व्यवस्थेतीति । व्यवस्थायाः स्वभावकृतत्वं आञ्जस्यम् ।

तथा हि— चैत्रचरणलग्नकण्टकेन चैत्रस्य वेदनोत्पादनसमये अन्येषामप्यात्मनां कुतो वेदना न जायते। सर्वात्मनां सर्वगतत्वेन चैत्रशरीरान्तर्भावाविशेषात्। न च—यस्य शरीरे कण्टकवेधादि तस्यैव वेदना, नान्येषामिति-व्यवस्था। सर्वात्मसन्निधावुत्पद्यमानं शरीरं कस्यचिदेव नान्येषामिति नियन्तुमशक्यत्वात्। न च यददृष्टोत्पादितं यच्छरीरं तत्तदीयमिति नियमः। अदृष्टस्यापि नियमासिद्धेः। यदा हि तददृष्टोत्पादनाय केनचिदात्मना संयुज्यते मनः, संयुज्यत एव तदा अन्यैरपि। कथं कारणसाधारण्ये क्वचिदेव तददृष्टमुत्पद्येत। ननु—मनस्संयोगमात्रसाधारण्येऽपि 'अहमिदं फलं प्राप्नवानि' इति अभिसन्धिः अदृष्टोत्पादककर्मानुकूलकृतिः इत्येवमादि व्यवस्थितमिति तत एवादृष्टनियमो भविष्यति इति चेत्, न—अभिसन्ध्यादीनामपि साधारणमनस्संयोगादिनिष्पाद्यतया व्यवस्थित्यसिद्धेः। ननु स्वकीयमनस्संयोगोऽभिसंध्यादिकारणमिति मनस्संयोग एवासाधारणो भविष्यतीति, न - नित्यं सर्वात्मसंयुक्तं मनः कस्यचिदेव स्वं इति नियन्तुमशक्यत्वात्। न च अदृष्टविशेषात् आत्मविशेषाणां मनसः स्वस्वामिभावसिद्धिः। तस्याप्यदृष्टस्य पूर्ववद्व्यवस्थित्यसिद्धेः। नन्वात्मनां विभुत्वेऽपि तेषां प्रदेशविशेषा एव बन्धभाज इति आत्मान्तराणां चैत्रशरीरे तत्प्रदेशविशेषाभावात् सुखदुःखादिव्यवस्था भविष्यतीति, न—यस्मिन् प्रदेशे चैत्रः सुखाद्यनुभूय तस्मात्प्रदेशादपक्रान्तः तस्मिन्नेव मैत्रे समागते तस्यापि तत्र सुखदुःखादिदर्शनेन शरीरान्तरे आत्मा-

---

अविशेषादिति। यथा चैत्रस्य तथा अन्येषामपीत्यर्थः। कण्टकवेधादीत्यादिपदं खड्गघातादिसंग्रहार्थम्। शरीरस्य आत्मविशेषं प्रत्यसाधारण्यमसिद्धं इति दूषयति—**सर्वात्मसन्निधाविति**। 'अदृष्टानियमात्' इति सूत्रमवतारयति—**यददृष्टेति**। सूत्रं व्याचष्टे—**अदृष्टस्यापीति**। अनियमं साधयति—**यदा हीति**। तदा अन्यैरप्यात्मभिस्संयुज्यत इत्यर्थः। ततः किं, तत्राह—**कथमिति**। आत्ममनस्संयोगरूपासमवायिकारणस्य समवायिकारणरूपात्मनश्च साधारणत्वादित्यर्थः। **संयोगमात्रेति**। मात्रपदमभिसन्ध्यादिसाधारण्यव्यवच्छेदार्थं, न तु समवायिकारणस्य तद्व्यवच्छेदार्थमिति बोध्यम्। अभिसन्धिः—फलेच्छा। आदिपदेन कृतिजनककार्यताज्ञान-चिकीर्षयोः संग्रहः। 'अभिसन्ध्यादिष्वपि चैवं' इति सूत्रं योजयन्नुत्तरमाह—**नेत्यादिना**। मनसः असाधारण्यमाशङ्क्य निराकरोति—**ननु स्वकीयेति**। तथा च तत्संयोगासमवायिकारणकं सर्वं असाधारणं भविष्यतीति भावः। 'प्रदेशादिति चेन्नान्तर्भावात्' इति सूत्रं व्याचक्षाण एव प्रदेशकृतां व्यवस्थामाशङ्क्य निराकरोति—**नन्वात्मनामिति**। बन्धः - सुखदुःखादिः। तत्तदात्मासाधारणात् प्रदेशविशेषात् व्यवस्थेति चेत् - इति सौत्रशङ्काभागाक्षरार्थः। एकस्मिन् शरीरे एकस्यैवात्मनः प्रदेशः नात्मान्तराणां - इति नियमोऽसिद्ध इति दूषयति—**न यस्मिन्निति**। अदृष्टसुखादेरव्याप्यवृत्तित्वात् आत्मनो यः प्रदेशोऽदृष्टाद्याश्रयः स एवात्र प्रदेशशब्दार्थः। तथा च यस्मिन्नासनादिप्रदेशे चैत्रशरीरं स्थितं सत् चैत्रस्य सुखाद्यायतनं भवति, तस्मिन्नेव प्रदेशे चैत्रशरीरापक्रमणानन्तरं मैत्रशरीरमागत्य स्थितं सत् मैत्रस्य सुखाद्यायतनं दृश्यते। ततस्तत्र पश्चादागत-

न्तरप्रदेशविशेषस्याप्यन्तर्भावात् ।

तस्मात् आत्मभेदेऽपि व्यवस्था दुरुपपादैव । कथंचित्तदुपपादने च श्रुत्यनुरोधाल्लाघवाच्च आत्मैक्यमङ्गीकृत्य तत्रैव तदुपपादनं कर्तुं युक्तमिति ।

सन्तु तर्ह्यणव एवात्मानः, यदि विभुत्वे व्यवस्था न सुवचा । मैवम्—आत्मनामणुत्वे कदाचित् सर्वाङ्गीणसुखोदयस्य करशिरश्चरणाधिष्ठानस्य चानुपपत्तेः ।

यदत्रार्वाचीन[1]कल्पनम्–उत्क्रान्तिगत्यागतिश्रवणान्यथानुपपत्त्या 'अणुर्ह्येवैष आत्मा यं वा एते सिनीतः पुण्यं च पापं च' [ ] 'वालाग्रशतभागस्य' [श्वे. उ. ४-९] इत्यादिश्रुतिषु साक्षादणुत्वश्रवणेन च अणव एव जीवाः । तेषामणुत्वेऽपि ज्ञानसुखादीनां प्रदीपप्रभान्यायेन

मैत्रशरीरे चैत्रमैत्रात्मप्रदेशयोरदृष्टाश्रययोः प्रवेशात् तच्छरीरे चैत्रमैत्रयोरुभयोरपि भोगप्रसङ्गः । न च पूर्वशरीरापक्रमणसमये तच्छरीरगतस्य चैत्रात्मप्रदेशस्याप्यपक्रमणमेवास्त्विति वाच्यम् । प्रदेशवत आत्मनः स्थिरत्वेन प्रदेशस्य चलनानुपपत्तेः । एवमन्येषामप्यात्मनां प्रदेशान्तर्भावप्रयुक्तं भोगसाङ्कर्यमूह्यम् । **तस्मादिति** । आत्मनां व्यापकत्वाभ्युपगमात् इत्यर्थः । नन्वात्मैक्यमत इव तन्नानात्वमतेऽपि कथञ्चिद्व्यवस्था स्वीक्रियत इत्याशङ्कयाह— **श्रुतीति** । आत्मैक्यश्रुतीत्यर्थः । **तत्रैवेति** । एकस्मिन्नेवात्मनीत्यर्थः ।

जीवाणुत्वगमकश्रुतियुक्त्यवष्टम्भेन पुनर्जीवब्रह्माभेदमाक्षिपति—**सन्त्विति** । निराकरोति— **मैवमिति** । **अधिष्ठानस्य चेति** । युगपत् करादिप्रेरणस्येत्यर्थः ।

जीवस्याणुत्वेऽपि सर्वशरीरव्यापिसुखादिकं सम्भवतीति शङ्कते - **यदत्रेति** । कल्पनाप्रकारस्तेषामणुत्वेऽपीत्यादिना भविष्यति । आदौ तस्याणुत्वे मानमाह—**उत्क्रान्तीति** । तमुत्क्रामन्तमित्यादिश्रुतिषूत्क्रान्त्यादिकं श्रूयत इति भावः । नन्वमध्यमपरिमाणस्य जीवस्य उत्क्रान्त्याद्यन्यथानुपपत्त्या चेदणुत्वं कल्प्यते, तर्हि जीवस्य ब्रह्मभावश्रवणानुपपत्त्या तस्य विभुत्वं कल्प्यते, श्रुतार्थापत्तेरविशेषात् - इत्याशङ्कय श्रुतिमप्याह—**अणुर्हीति** । यं आत्मानं एते सिनीतः - बध्नीतः, के ते, तत्राह—पुण्यं च पापं च, एष आत्मा अणुर्हीत्यर्थः । वालः- केशः । 'शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयः' इति वाक्यमादिपदेन गृह्यते । वालाग्रस्य यश्शततमो भागः, तस्यापि शतधा विभक्तस्य यो भागः, तत्तुल्यपरिमाणो जीव इत्यर्थः । जीवस्याणुत्वसाधकप्रमाणानुसारिणमर्वाचीनकल्पनाप्रकारं दर्शयति —**तेषामणुत्वेऽपीति** । यथा प्रभायाःस्वाश्रयं प्रदीपं विहाय प्रदेशान्तरव्यापित्वं, तथा ज्ञानादीनां स्वाश्रयमणुमात्मानं विहाय कदाचिच्छरीरव्यापित्वं कल्प्यत इत्यर्थः । नन्वात्मनश्शरीरव्यापित्वे सति युगपत् सुखदुःखप्रयत्नादय उत्पद्यमानाः तस्मिन्नवच्छेदकभेदेन[2] सम्भवन्ति । तस्याणुत्वे तु कथं तेषां

---

1. अर्वाचीनाः—न्यायामृतकाराः द्वैतिनः विशिष्टाद्वैतिनश्च

2. अवयवभेदेन इति पाठान्तरम्

आश्रयातिरिक्तप्रदेशविशेषव्यापिगुणतया न सर्वाङ्गीणसुखानुपलब्धिः, 'द्रोणं बृहस्पतेर्भागं' इत्यादिस्मृत्यनुरोधेन जीवानामंशसत्त्वात् करशिरश्चरणाद्यनुगतेषु सुखदुःखादियौगपद्यं कायव्यूहगतेषु योगिनां भोगवैचित्र्यं चेति न काचिदनुपपत्तिः। एवं च जीवानामणुत्वेनासङ्करात् सुखदुःखादिव्यवस्था विभोरीश्वरात् भेदश्च—इति।

अत्रोक्तमद्वैतदीपिकायां—एवमपि कथं व्यवस्थासिद्धिः। चैत्रस्य 'पादे वेदना शिरसि सुखं' इति स्वांशभेदगतसुखदुःखानुसन्धानवत् मैत्रगतसुखदुःखानुसन्धानस्यापि दुर्वारत्वात्। अविशेषो हि चैत्रजीवात् तदंशयोः मैत्रस्य च भेदः। कायव्यूहस्थले वियुज्यान्यत्रप्रसरणसमर्थानामंशानां जीवाद्भेदावश्यंभावात्, अंशांशिनोःत्वया भेदाभेदाभ्युपगमाच्च। न च शुद्धभेदोऽननुसन्धानप्रयोजक इति वाच्यम्। शुद्धत्वं हि भेदस्य अंशांशिभावासहचरितत्वं वा अभेदासहचरितत्वं वा स्यात्। नाद्यः - ['अंशो ह्येष परमस्य'] ममैवांशो जीवलोके' [भ. गी. १५-७.]

यौगपद्यनिर्वाहः, तत्राह—द्रोणमिति। अनुगतेष्वित्यनन्तरं जीवांशेष्विति शेषः। व्यूहः - समूहः। कायव्यूहगतेष्वित्यनन्तरमपि जीवांशेष्विति शेषः। भोगानां - भुज्यमानसुखादीनां - वैचित्र्यं - युगपन्नानाविधत्वं युगपदनेकशरीराधिष्ठानं च योगिनां स्वांशैस्सम्भवतीत्यर्थः। जीवाणुत्वपक्षे न केवलमनुपपत्तिसामान्याभावः, किं तु लाभोऽप्यस्तीत्याह—एवं चेति। जीवस्याणुत्वे सतीत्यर्थः। असङ्करादिति। एकस्मिन् शरीरे सर्वेषां जीवानां प्रवेशाभावादित्यर्थः। विभोरिति। जीवस्यापि विभुत्वे लक्षणभेदाभावात् ईशात् भेदो न सिध्येत्, अणुत्वे त्वत्यन्तवैलक्षण्यात् भेदस्सुगम इति भावः।

अर्वाचीनकल्पनं दूषयति—अत्रोक्तमिति। एवमपीति। जीवस्याणुत्वसांशत्वकल्पनेऽपीत्यर्थः। जीवस्य स्वांशगतसुखाद्यनुसन्धानं जीवान्तरगतसुखाद्यननुसन्धानं चाभ्युपगच्छता त्वया भेदोऽननुसन्धानप्रयोजकः अभेदश्च तदनुसन्धानप्रयोजक इति वक्तव्यम्। तत्राननुसन्धानप्रयोजकभेदो भेदमात्रं वा शुद्धभेदो वा। आद्ये चैत्रः स्वांशगतं सुखादिकं नानुसन्दध्यात्। अननुसन्धानप्रयोजकभेदस्य सत्त्वात्। यदि सत्यपि भेदे स्वांशगतमनुसन्दध्यात् तदा चैत्रो मैत्रगतसुखादिकमप्यनुसन्दध्यादित्याह—चैत्रस्येति। अंशांशिनोरननुसन्धानप्रयोजकभेदासिद्धिमाशङ्क्य तं साधयति—कायव्यूहेति। वियुज्येति। अंशिनस्सकाशाद्विभागं प्राप्येत्यर्थः। अन्यत्रेति। योगिनो निजशरीरादन्यत्र कायव्यूह इत्यर्थः। तयोर्भेदो नास्माभिस्साधनीय इत्याशयेनाह—अंशांशिनोरिति। ननु-भेदमात्रमननुसन्धानप्रयोजकतया नेष्यते, येन 'जीवः स्वांशगतमपि सुखादिकं नानुसन्दध्यात्, यद्यनुसन्दध्यात् तदा जीवान्तरगतमपि तदनुसन्दध्यात्' इति दोषः प्रसज्येत, किं तु विशेषतो भेदः-इति द्वितीयं शङ्कते—न चेति। आद्ये कल्पे जीवेश्वरभेदस्य अंशांशिभावसहचरितत्वेन शुद्धभेदत्वाभावात् तयोः परस्परं सुखाद्यनुसन्धानं स्यादित्याह—नाद्य इति। जीवेश्वरयोरंशांशिभावे मानमाह—अंशोहीति। परमस्य-परमात्मनः। जीवलक्षणो लोको जीवलोकः। ननु - भेदस्य अंशांशिभावमात्रासहचरितत्वं शुद्धत्वं न भवति, किं तु मुख्यांशांशिभावासहचरितत्वम्। जीवेश्वरयोरं-

'अंशो नानाव्यपदेशात्' इति श्रुतिस्मृतिसूत्रैर्जीवस्य ब्रह्मांशत्वप्रतिपादनेन ब्रह्मजीवयोर्भोगसांकर्यप्रसङ्गात्। ननु-जीवांशानां जीवं प्रतीव जीवस्य ब्रह्म प्रति नांशत्वं, किं तु 'चन्द्रबिम्बस्य गुरुबिम्बः शतांशः' इतिवत् सदृशत्वे सति ततो न्यूनत्वमात्रमौपचारिकांशत्वमिति-चेत्, किं तदतिरेकेण मुख्यमंशत्वं जीवांशानां जीवं प्रति? यदत्राननुसन्धानप्रयोजकशरीरे निवेश्यते। न तावत् पटं प्रति तन्तूनामिकत्वम्। जीवस्यानादित्वात्। नापि महाकाशं प्रति घटाकाशादीनामिव प्रदेशत्वं, टङ्कच्छिन्नपाषाणशकलादीनामिव खण्डत्वं वा। अणुत्वेन निष्प्रदेशत्वादच्छेद्यत्वाच्च। भिन्नाभिन्नद्रव्यत्वमंशत्वमभिमतमिति चेत्, न—तथासति जीवेश्वरयोर्जीवानां च भोगसाङ्कर्यप्रसङ्गात्। स्वतो भिन्नानां तेषां चेतनत्वादिना अभेदस्यापि त्वयाऽङ्गीकारात्, समूहसमूहिनोर्भेदाभेदवादिनस्तव मते एकसमूहान्तर्गतजीवानां परस्परमप्यभेदसत्त्वाच्च स्वाभिन्नसमूहाभिन्नेन स्वस्याप्यभेदस्य दुर्वारत्वात्। 'यदि

शांशित्वं तु न मुख्यम्। अतस्तयोर्भेदे मुख्यांशांशिभावासहचरितत्वरूपशुद्धत्वस्य सत्त्वान्नोक्तदोषः-इति शङ्कते—**नन्विति। जीवं प्रतीति।** तथा च जीवतदंशयोर्भेदे मुख्यांशांशिभावसहचरितत्वस्यैव सत्त्वेन तदसहचरितत्वरूपशुद्धत्वाभावादनुसन्धानोपपत्तिरिति भावः। नांशत्वमित्यनन्तरं मुख्यमिति शेषः। कान्तिमत्त्वं सादृश्यम्। मुख्यांशांशिभावासहचरितभेदोऽननुसन्धानप्रयोजक इत्यत्र मुख्यांशांशिभावो दुर्निरूप इत्याह—**किं तदिति।** यन्मुख्यमंशत्वमत्र प्रयोजकशरीरे निवेश्यते तत् एतदतिरेकेण किं इति योजना। मुख्यमंशत्वं आरम्भकावयवत्वं वा, प्रदेशत्वं वा, खण्डत्वं वा, भिन्नाभिन्नद्रव्यत्वं वेति किंशब्दार्थः। तत्राद्यं निराकरोति—**न तावदिति।** द्वितीयतृतीयौ क्रमेणानूद्य दूषयति—**नापीत्यादिना।** जीवस्याणुत्वेन प्रदेशासम्भवात् अणुत्वेनैव द्वैधीभावायोग्यत्वाच्चेत्यर्थः। चतुर्थं शङ्कते—**भिन्नाभिन्नेति।** जीवांशानां जीवेन सह भिन्नत्वे सत्यभिन्नद्रव्यत्वं मुख्यमंशत्वमभिमतम्, तदेव चाननुसन्धानप्रयोजकशरीरे निवेश्यते। तथा च भिन्नाभिन्नद्रव्यत्वासहचरितभेदः शुद्धभेदः, स चाननुसन्धानप्रयोजकः- इति निष्कर्षः। तत्र दूषणमाह—**तथासतीति।** जीवेश्वरयोस्त्वया भिन्नाभिन्नद्रव्यत्वाभ्युपगमात् तयोर्भेदश्शुद्धभेदो न भवति। तथा जीवांशानां परस्परं भिन्नाभिन्नद्रव्यत्वस्य त्वया स्वीकारात् तेषां भेदोऽपि शुद्धभेदो न भवति। तथा च अननुसन्धानप्रयोजकाभावाज्जीवेश्वरयोर्जीवांशानां च भोगसाङ्कर्यप्रसङ्ग इत्यर्थः। **चेतनत्वादिनेति।** सत्त्वद्रव्यत्वसङ्ग्रहार्थमादिपदम्। दूषणान्तरमाह—**समूहेति।** समूहस्य समूहिनां च परस्परं भिन्नत्वेसत्यभिन्नत्वमङ्गीकुर्वतस्तव मते समूहिनामपि परस्परमभिन्नत्वमावश्यकम्। तथा च उत्सवादावेकत्र मिलितानां जीवानां भिन्नानां परस्परमभिन्नद्रव्यत्वस्यापि सत्त्वात् तेषां परस्परभेदःशुद्धभेदो न भवति। भिन्नाभिन्नद्रव्यत्वसहचरितत्वात्। तथा च परस्परं तेषां सुखाद्यनुसन्धानप्रसङ्ग इत्यर्थः। ननु- समूहिनां समूहाभिन्नत्वेऽपि न तेषां परस्परमभिन्नत्वमस्मन्मतेऽस्ति, अतो नोक्तदोष इत्याशङ्क्याह—**स्वाभिन्नेति।** स्वं - एकसमूही देवदत्तः, तदभिन्नस्समूहः, तदभिन्नो यज्ञदत्तः, तेन सह स्वस्यापि-देवदत्तस्यापि अभेदस्य तव मते दुर्वारत्वात्। त्वया तदभिन्नाभिन्नस्य तदभिन्नत्वनियमाभ्युपगमादित्यर्थः।

संयोगादीनां जातेश्च अनेकाश्रितत्वं स्यात्, तदा गुणगुण्यादेरभेदात् घटाभिन्नसंयोगाभिन्नपटादेरपि घटाभेदः प्रसज्येत'इत्यादि वदता त्वया तदभिन्नाभिन्नस्य तदभेदनियमाभ्युपगमात्। न च जीवान्तरसाधारणचेतनत्वादिधर्मैकरूप्यैकसमूहान्तर्गतत्वादिप्रयुक्ताभेदविलक्षणमभेदान्तरमंशांशिनोरस्ति भेदेऽप्यनुसन्धानप्रयोजकं, यदत्रानतिप्रसङ्गाय विवक्ष्येत। तथासति तस्यैव विशिष्य निर्वक्तव्यत्वापत्तेः। धर्मैकरूप्याद्यप्रयुक्तत्वमंशांशिनोरभेदे विशेष इति चेत्, न - जीवतदंशयोश्चेतनत्वादिधर्मैकरूप्यसत्त्वेन एकशरीरावच्छेदे कायव्यूहमेलने च समूहत्वेन च तयोरभेदे धर्मैकरूप्यादिप्रयुक्तत्वस्यापि सद्भावात्। धर्मैकरूप्यादिप्रयुक्ताभेदान्तरसत्त्वेऽपि जीवतदंशयोरंशांशिभावप्रयोजकाभेदो न तत्प्रयुक्त

परं प्रत्युक्तनियमाभ्युपगमं साधयति—**यदीत्यादिना**। गुणगुणिनोर्जातिव्यक्त्योश्चाभेदवादिनं प्रति दूषणपरोऽयं जीवाणुत्ववादिग्रन्थो यदीत्यादिः। गुणगुणिनोरभेदमङ्गीकृत्य यदि गुणस्य संयोगविभागद्वित्वादेरनेकाश्रितत्वमभ्युपगम्येत, तथा जातिव्यक्त्योरभेदमुपेत्य यदि जातेरनेकाश्रितत्वमभ्युपगम्येत, तदा पटादेरपि घटाभेदप्रसङ्गः-इत्यत्र हेतुगर्भं विशेषणमाह—**घटाभिन्नेति**। घटाभिन्नः संयोगः तदभिन्नत्वात् पटादेरित्यर्थः। ननु - जीवेश्वरयोःजीवांशानां समूहाभिन्नजीवानां च योऽयं चेतनत्वादिधर्मप्रयुक्ताभेदः एकसमूहाभेदप्रयुक्ताभेदश्च तदपेक्षया अन्य एवाभेदो जीवतदंशयोरस्ति। अतः तयोर्भेदे सत्यपि परस्परमनुसन्धानं, जीवेश्वरयोः जीवांशानां समूहिजीवानां च तादृशाभेदाभावाच्चेतनत्वादिप्रयुक्ताभेदे सत्यपि न परस्परमनुसन्धानं इति व्यवस्था। तथा च भिन्नाभिन्नद्रव्यत्वासहचरितभेदश्शुद्धभेदः, स च अननुसन्धानप्रयोजकः' इत्यत्र जीवतदंशयोः परस्परानुसन्धानप्रयोजकत्वाभिमतो विलक्षणाभेद एव प्रविष्ट इति जीवेश्वरादौ तादृशाभेदघटितभिन्नाभिन्नद्रव्यत्वासहचरितभेदसत्त्वान्नोक्तातिप्रसङ्गः-इति शङ्कां निराकरोति—**न चेति**। जीवतदंशयोरिव जीवान्तराणामपि साधारणो यश्चेतनत्वादिधर्मैकरूप्यप्रयुक्तः एकसमूहान्तर्गत्यादिप्रयुक्तश्च अभेदः तद्विलक्षणमित्यर्थः। जीवेश्वरगतस्यामुख्यांशांशिभावस्य सङ्ग्रहार्थमादिपदम्। अंशांशिनोर्भेदे सत्यपि तयोरनुसन्धानप्रयोजकमभेदान्तरं न चास्ति, यदभेदान्तरं जीवेश्वरादावतिप्रसङ्गपरिहाराय भिन्नाभिन्नद्रव्यत्वशरीरप्रविष्टतया विवक्ष्येत इति योजना। नन्वभेदान्तरं कुतो नास्तीत्याशङ्क्याह—**तथासतीति**। विलक्षणाभेदस्यांशांशिनोस्सत्त्व इत्यर्थः। जीवेश्वराद्यभेदापेक्षया जीवतदंशयोरभेदस्य विशेषं विशेषतो निर्वक्ति—**धर्मैकरूप्याद्यप्रयुक्तत्वमिति**। उक्तविशेषासिद्धिमाह—**न - जीवेति**। जीवस्य तदंशानां च चेतनत्वसत्त्वद्रव्यत्वादिधर्मैरैकरूप्यमस्ति। तथा जीवस्य तदवयवानां च एकशरीरानुप्रवेशकाले तच्छरीरावच्छेदेन समूहोऽप्यस्ति। तथा योगिजीवावयवानां कायव्यूहशब्दितानेकशरीरेषु प्रविष्टानां कदाचित्तेषां शरीराणां मेलने सति योगिजीवेनांशिना सह समूहोऽस्ति। तथा च जीवतदंशयोर्भेदे धर्मैकरूप्यादिप्रयुक्तत्वसम्भवात् तदप्रयुक्तत्वमसिद्धमित्यर्थः। ननु-जीवानां चेतनत्वादिधर्मैकरूप्यादिप्रयुक्ताभेदसत्त्वेऽपि तेषामंशांशिभावाभावात् अंशांशिभावप्रयोजकाभेदोऽन्य एव, स च न धर्मैकरूप्यादिप्रयुक्तः—इति शङ्कते—**धर्मैकरूप्यादीति**। जीवान्तरसाधारणाभेदस्य धर्मैकरूप्यादिप्रयुक्तस्याप्यप-

इति चेत्, न—तयोरभेदद्वयाभावात्, त्वन्मतेऽधिकरणैक्ये सति भेदस्याभेदस्य वा प्रतियोगिभेदेन तदाकारभेदेन वा अनेकत्वानभ्युपगमात्, तस्मादाद्यपक्षे सुस्थोऽतिप्रसङ्गः। एतेनैव द्वितीयपक्षोऽपि निरस्तः। अभेदासहचरितभेदस्याननुसन्धानप्रयोजकत्वे उक्तरीत्या त्वन्मते जीवब्रह्मणोर्जीवानां चाभेदस्यापि सत्त्वेनातिप्रसङ्गस्य दुर्वारत्वात्। ननु - अभेदप्रत्यक्षमनुसन्धाने तन्त्रमिति तदभावेऽननुसन्धानं, स्वस्य स्वाभेदः स्वांशाभेदश्च प्रत्यक्ष इति तद्द्रष्टृदुःखाद्यनुसन्धानं, जीवान्तरेणाभेदसत्त्वेऽपि तस्याप्रत्यक्षत्वात् न तद्दुःखाद्यनुसन्धानम्; जातिस्मरस्य प्राग्भवीयात्मनापि अभेदस्य प्रत्यक्षसत्त्वात् तद्वृत्तान्तानुसन्धानम्, अन्येषां तदभावात् न; इत्यादि सर्वं सङ्गच्छते—इति चेत्, तर्ह्यैकात्म्यवादेऽपि सर्वात्मतावारकाज्ञानावरणात् चैत्रस्य न मैत्रात्माद्यभेदप्रत्यक्षमिति तत एव सर्वव्यवस्थोपपत्तेः व्यर्थः श्रुतिविरुद्ध आत्मभेदाभ्युपगमः। न चेत्थमपि प्रपञ्चतत्त्ववादिनस्तव व्यवस्थानिर्वाहः। सर्वज्ञस्येश्वरस्य वस्तुसज्जीवान्तराभेदप्रत्यक्षावश्यंभावेन जीवेषु दुःखिषु 'अहं दुःखी' इत्यनुभवापत्तेः। अस्मन्मते तु ईश्वरः स्वाभिन्ने जीवे संसारं

रिहार्यत्वात् तस्याप्यभ्युपगमे सति जीवतदंशयोरभेदद्वयमभ्युपगतं परस्य मते प्रसज्यते। ओमिति वदन्तं परं प्रत्याह—**न - तयोरिति**। अंशांशिनोरित्यर्थः। **तदाकारेति**। प्रतियोग्याकारेत्यर्थः। प्रतियोगितावच्छेदकेति यावत्। भेदस्यानेकत्वानभ्युपगमोपन्यासो दृष्टान्तार्थः। **तस्मादिति**। जीवेश्वरयोः यः पूर्वमंशांशिभावो निरूपितः, तदतिरेकेण जीवतदंशयोर्मुख्यस्यांशांशिभावस्य दुर्निरूपत्वादित्यर्थः। तथा च जीवेश्वरयोर्भेदस्य निरूपितांशांशिभावसहचरितत्वेन तदसहचरितत्वरूपशुद्धत्वाभावे सति अननुसन्धानप्रयोजकशुद्धभेदाभावात् जीवेश्वरयोः परस्परं भोगसाङ्कर्यप्रसङ्गरूपो दोषः स्थिर इत्यर्थः। **आद्यपक्ष इति**। अंशांशिभावासहचरितत्वं शुद्धत्वमिति पक्ष इत्यर्थः। अभेदासहचरितत्वं शुद्धत्वं भेदस्येति पक्षं वक्ष्यमाणहेतुना निराकरोति—**एतेनैवेति**। **उक्तरीत्येति**। चेतनत्वादिधर्मैकरूप्यं उक्ता रीतिः। जीवतदंशयोरिव जीवब्रह्मणोर्जीवानां चाभेदमुपेत्यापि पूर्वोक्तातिप्रसङ्गपरिहारं शङ्कते—**नन्विति**। **स्वस्येति**। अंशिनो जीवस्येत्यर्थः। **जीवान्तरेणेति**। स्वस्येत्यनुषङ्गः। **जातिस्मरस्येति**। पूर्वजन्मस्मरणवत इत्यर्थः। **सर्वेति**। सर्वात्मताऽऽवारकं यदज्ञानं, तत्प्रयुक्तावरणादित्यर्थः। **तत एवेति**। चैत्रमैत्रादीनां सर्वेषां परस्परमभेदप्रत्यक्षाभावादेव व्यवस्थिततया सुखाद्यननुसन्धानोपपत्तेरित्यर्थः। अभेदप्रत्यक्षस्यानुसन्धानप्रयोजकत्वमुपेत्य परमते आत्मभेदकल्पनागौरवं श्रुतिविरोधं च दर्शयित्वा, परमते तस्य प्रयोजकत्वमपि न सम्भवति अतिप्रसङ्गादित्याह—**न चेत्थमपीति**। अभेदप्रत्यक्षमनुसन्धानप्रयोजकमिति कल्पनयाऽपीत्यर्थः। वस्तुसन् - परमार्थो यो जीवान्तराभेदः तत्प्रत्यक्षमीश्वरस्यावश्यकम्, अन्यथा सर्वज्ञत्वभङ्गप्रसङ्गादित्यर्थः। ननु सिद्धान्तेऽपि ब्रह्मणस्सर्वज्ञत्वजीवाभिन्नत्वयोस्सत्त्वादुक्तदोषप्रसङ्ग इति, नेत्याह—**अस्मन्मत इति**। यत्तु - जीवानां सांशत्वात् करशिरश्चरणानुगतेषु जीवांशेषु सुखदुःखादियौगपद्यं सम्भवति, योगिनां कायव्यूहगतेषु योगिजीवावयवेषु युगपत् सुखदुःखादिभोगवैचित्र्यं च

प्रतिबिम्बमुखे मालिन्यमिव पश्यन्नपि मिथ्यात्वनिश्चयात् न शोचतीति नैष प्रसङ्गः।

स्यादेतत्–माभूदंशभेदः। करशिरश्चरणादीनां कायव्यूहस्य च अधिष्ठानं आत्मदीपस्यानपायिनी ज्ञानप्रभाऽस्ति व्यापिनीति सैव सर्वाधिष्ठानं भविष्यतीति चेत्, न—ज्ञानवदात्मधर्मस्य सुखदुःखभोगस्य ज्ञानमाश्रित्य उत्पत्त्यसम्भवेन करचरणाद्यवयवभेदेन[1] कायव्यूहवतः कायभेदेन च भोगवैचित्र्याभावप्रसङ्गात्। 'सुखदुःखभोगादि ज्ञानधर्म एव नात्मधर्मः' इत्यभ्युपगमे तद्वैचित्र्येण आत्मगुणस्य ज्ञानस्य भेदसिद्धावपि आत्मनो भेदासिद्ध्या भोगवैचित्र्यादिना आत्माभेदप्रतिक्षेपा-

---

सम्भवतीति न काचिदनुपपत्तिरिति - तन्न - जीवं प्रति जीवांशानां मुख्यांशत्वस्यापि निरस्तत्वात्। जीवं प्रति तदंशानां जीवसदृशत्वे सति जीवापेक्षया न्यूनपरिमाणत्वरूपौपचारिकांशत्वस्यापि जीवाणुत्वपक्षे बाधितत्वाच्च। अणुपरिमाणस्यैव सर्वपरिमाणापेक्षया न्यूनपरिमाणत्वेन ततोऽपि न्यूनपरिमाणाभावात्। सदृशत्वे सति ततो न्यूनत्वरूपांशत्वस्य चन्द्रबिम्बांशगुरुबिम्बवत् जीवांशानां जीवापेक्षया अत्यन्तभेदप्रयोजकत्वेन जीवस्य स्वांशगतसुखाद्यनुसन्धातृत्वासम्भवाच्च। तथा योगिजीवांशानां कायव्यूहाधिष्ठातृत्वेऽपि तेभ्योऽत्यन्तभिन्नस्य योगिजीवस्य कायव्यूहाधिष्ठातृत्वाभावप्रसङ्गात्, तथा शरीराधिष्ठातुर्जीवस्य शरीरावयवकरशिरश्चरणाद्यधिष्ठातॄणां जीवांशानां चात्यन्तभिन्नत्वेन एकस्मिन् शरीरे भोक्तृनानात्वप्रसङ्गात्, जीवस्य सांशत्वे मानाभावाच्च, 'द्रोणं बृहस्पतेर्भाग' मित्यादिवचनस्य वर्णितरीत्या उक्तांशपरत्वासम्भवेन बृहस्पत्यादेर्योगप्रभावेन भूभारहरणादिदेवकार्यार्थं शरीरान्तरपरिग्रहमात्रपरत्वात्। एतेन श्रीरामकृष्णादेर्विष्ण्वंशत्वव्यवहारोऽपि व्याख्यातः।

तस्माज्जीवांशविशेषस्य करशिरश्चरणाद्यधिष्ठातृत्वं कायव्यूहाद्यधिष्ठातृत्वं च न सम्भवतीति पूर्वग्रन्थाशये स्थिते शङ्कते—**स्यादेतदिति। अधिष्ठानमिति।** प्रेरक इत्यर्थः। **भविष्यतीति।** जीवः स्वयमणुतया शरीरैकदेशस्थोऽपि स्वसमवेतेन व्यापिज्ञानेन करशिरश्चरणादीन् कायव्यूहं चाधितिष्ठतीति निरंशस्याप्यणोर्जीवस्य कृत्स्नशरीराधिष्ठातृत्वादिकं नानुपपन्नमिति भावः। **ज्ञानमाश्रित्येति।** ज्ञानधर्मत्वे हि सुखादेर्ज्ञाने उत्पत्तिःसम्भवेत्। ततश्च ज्ञानस्य व्यापकत्वात् तदाश्रितसुखादिरूपभोगस्यापि करशिरश्चरणादौ कायव्यूहे च युगपदुदयस्सम्भवेत्, न तु त्वया सुखादेर्ज्ञानधर्मत्वमिष्यते। तस्य [2]ज्ञानवदण्वात्मधर्मत्वाभ्युपगमात्। अतो ज्ञानस्य व्यापित्वेऽपि न करशिरश्चरणादौ कायव्यूहे च युगपत् भोगवैचित्र्यं सम्भवतीत्यर्थः। **कायव्यूहवत इति।** योगिन इति शेषः। तस्य च भोगवैचित्र्यं स्मर्यते—'आत्मनां च सहस्राणि बहूनि भरतर्षभ। योगी कुर्याद्बलं प्राप्य तैश्च सर्वां महीं चरेत्॥ प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत्। संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव॥' इति। आत्मनां - शरीराणां, बलं - योगजनितं सामर्थ्यं। तर्हि ज्ञानधर्मत्वमेव सुखादेरस्तु, यदि तद्धर्मत्वे भोगवैचित्र्यं सम्भवेत्, तत्राह—**सुखदुःखभोगादीति। असिद्ध्येति।** आत्मगुणज्ञाननिष्ठस्य भोगवैचित्र्यस्य

---

1. अवयविनः-इत्यधिकं पाठान्तरे।
2. ज्ञानवदेव आत्मधर्मत्वाभ्युपगमात्—इति पाठान्तरम्।

योगात्। 'भोगाद्याश्रयस्यात्मनोऽणुत्वेन प्रतिशरीरं विच्छिन्नतया तद्व्यापित्ववाद इव तदभेदवाद इव च न सर्वधर्मसङ्करापत्तिः' इति मतहानेश्च।

तस्माज्जीवस्याणुत्वोपगमेन व्यवस्थोपपादनं न युक्तमिति।

नापि तेन तस्य ईश्वरात् भेदसाधनं युक्तम्। 'उत्क्रान्त्यादिश्रवणात् साक्षादणुत्वश्रवणाच्च अणुर्जीवः' इति वदतः तव मते 'तत्सृष्ट्वा। तदेवानुप्राविशत्।' [तै. उ. २-६] 'अन्तः प्रविष्टश्शास्ता जनानां' [तै.आ. ३-११] 'गुहां प्रविष्टौ परमे परार्ध्ये' [क. उ. ३-१] इत्यादिश्रुतिषु प्रवेशादिश्रवणात् 'स य एषोऽणिमा' [छा.उ. ६-८] 'एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा' [छा.उ.३-१४] इति श्रुतौ साक्षादणुत्वश्रवणाच्च परोऽप्यणुरेव सिध्येदिति कुतः परजीवयोर्विभुत्वाणुत्वाभ्यां भेदसिद्धिः। ननु—'आकाशवत् सर्वगतश्च नित्यः' 'ज्यायानन्तरिक्षात् ज्यायान् दिवः' [छा. उ. ३-१४] इत्यादिश्रवणात् सर्वप्रपञ्चोपादानत्वाच्च परस्य सर्वगतत्वसिद्धेः तदणुत्वश्रुतयः उपासनार्था दुर्ग्रहत्वाभिप्राया वा नेयाः। प्रवेशश्रुतयश्च शरीराद्युपाधिना निर्वाह्याः। न च

व्यधिकरणतया आत्मभेदसाधकत्वासम्भवादित्यर्थः। सुखादेर्व्यापिज्ञानधर्मत्वं स्वमतविरुद्धं चेत्याह—**भोगाद्याश्रयस्येति**। नैयायिकादिमत इव अद्वैतिमत इव चेत्यर्थः।

तस्मादिति। आत्मगुणस्य [1]ज्ञानस्य व्यापित्वकल्पनायोगादित्यर्थः।

जीवाणुत्वाभ्युपगमस्य पराभिमतं प्रयोजनान्तरं दूषयति—**नापि तेन तस्येति**। जीवस्याणुत्वेनेत्यर्थः। श्रुतितदर्थापत्तिभ्यां जीवस्याणुत्वं वदतः तव मते ताभ्यामेवेश्वराणुत्वस्यापि दुर्वारत्वान्नेश्वरस्य विभुत्वसिद्धिः, तदसिद्धौ च न तवेष्टसिद्धिरिति दूषयति—**उत्क्रान्त्यादीति**। वदतस्तव मते परोऽप्यणुरेव सिध्येदिति सम्बन्धः। तत्सृष्ट्वा इत्यत्र तत्पदद्वयं जगत्परं। प्रकृतः परमात्मा सृष्ट्यादिकर्ता। **अन्तरिति।** शरीरेष्विति शेषः। शास्ता - नियन्ता। परस्यार्धं - स्थानमर्हतीति परार्ध्यं परमं-उत्कृष्टं हार्दाकाशं, तस्मिन् या बुद्धिलक्षणा गुहा, तां प्रविष्टौ जीवेश्वरावित्यर्थः। **प्रवेशादीति।** शरीरान्तस्स्थत्वादिकमादिपदार्थः। सः-उपक्रमे प्रकृतः, एषः - सन्निहितः, अणिमा - अणुः, भावप्रत्ययो न विवक्षितः, मे हृदयेऽन्तः एषः-प्रकृतो भारूपत्वादिगुणक आत्मा वर्तते, स च व्रीह्याद्यपेक्षया अणुतर इत्यर्थः। अनन्यथासिद्धश्रुत्यादिवचनेन विभुत्वमीश्वरस्य शङ्कते—**नन्विति**। ज्यायान् - महत्तरः। परस्य विभुत्वे लिङ्गमाह—**सर्वेति**। पराणुत्वश्रुतीनामन्यथासिद्धिमाह—**तदणुत्वेति। उपासनार्था इति।** 'अणीयान्व्रीहेर्वा' इत्यादिश्रुतय इत्यर्थः। **दुर्ग्रहत्वेति।** स य एषोऽणिमेत्यादिश्रुतय इत्यर्थः। आसामुपासनाप्रकरणगतत्वाभावादिति भावः। व्यवस्थितविकल्पवाची वाकारः। प्रवेशादिश्रवणस्यान्यथासिद्धिमाह—**प्रवेशश्रुतयश्चेति**। परमेश्वरस्य स्वेच्छापरिगृहीतशरीरेन्द्रियप्रवेशोपाधिकःशरीरेष्वन्तः-

---

1. ज्ञानसुखादेः इति पाठान्तरम्।

जीवोत्क्रान्त्यादिश्रुतयोऽपि बुद्ध्याद्युपाधिना निर्वोढुं शक्या इति शङ्क्यम्। 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' [बृ.उ.४-४-२] इति प्राणाख्यबुद्ध्युत्क्रान्तेः प्रागेव जीवोत्क्रान्तिवचनात् 'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं' [मु.उ. ३-२-८] इति नामरूपविमोक्षानन्तरमपि गतिश्रवणाच्च, 'तद्यथाऽनस्सुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति' [बृ.उ. ४-३-३५] इति स्वाभाविकगत्याश्रयशकटदृष्टान्तोक्तेश्च - इति चेत्, नैतत्सारम्—'स वा एष महानज आत्मा योऽयं विज्ञानमयः' [बृ-उ-४-४-२२] 'घटसंवृतमाकाशं नीयमाने घटे यथा। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः'। [अमृतबि-१३] इत्यादिश्रुतिषु जीवस्यापि विभुत्वश्रवणात्। त्वन्मते प्रकृतेरेव जगदुपादानत्वेन ब्रह्मणो जगदुपादानत्वाभावात् जीवस्य कायव्यूहगतविचित्रसुखदुःखोपादानत्ववत् अणुत्वेऽपि जगदुपादानत्वसम्भवाच्च ततस्तस्य सर्वगतत्वासिद्धेः। तत्प्रवेशश्रुतीनां शरीरोपाधिकत्वकल्पने जीवोत्क्रान्त्यादिश्रुतीनामपि बुद्ध्युपाधिकत्वोपगमसम्भवात्।

प्रवेश इत्यर्थः। ननु - जीवाणुत्वश्रुतिलिङ्गानामपि अन्यथानयनसम्भवाज्जीवस्यापि स्वाभाविकं विभुत्वं किं न स्यात्, तथा च न तस्याणुत्वसिद्धिरिति सिद्धान्तिनश्शङ्कामनूद्य निराकरोति जीवाणुत्ववादी- **न चेत्यादिना**। **तमुत्क्रामन्तमिति**। न च-अत्र श्रुतौ प्राणोत्क्रान्तेः प्रागेव जीवस्योत्क्रान्तिश्रवणेऽपि न केवलस्य तस्योत्क्रान्तिसिद्धिः, बुद्धिविशिष्टस्य तस्योत्क्रान्तिसम्भवादिति - वाच्यम्। बुद्धिप्राणयोर्भेदासिद्धेः, तयोरभेदस्यैव श्रुतिसिद्धत्वाच्च। तथा च श्रुतिः—'यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः' [कौ.उ.३-३] इति, प्रज्ञा-बुद्धिः-इत्याशयेनाह—**प्राणाख्यबुद्ध्युत्क्रान्तेरिति**। नामरूपशब्दितोपाधिनिवृत्त्यनन्तरमपि जीवस्य ब्रह्म प्रति गतिः श्रूयते। तथा च यथा उत्क्रान्तेरौपाधिकत्वं न सम्भवति तथा गतेरप्यौपाधिकत्वं न सम्भवतीति अमध्यमपरिमाणस्य जीवस्य स्वाभाविकमणुत्वं स्वीकर्तव्यमित्याशयेनाह—**तथा विद्वानिति**। परात् - हिरण्यगर्भात्। जीवस्य स्वाभाविके गत्याश्रयत्वे सत्येव दृष्टान्तविशेषः सङ्गच्छते, अन्यथा तद्वैरूप्यं स्यादित्याशयेनाह—**तद्यथेति**। तत् - तत्र - जीवस्य परलोकं प्रति गमने दृष्टान्त उच्यते। अनः - शकटं सुसमाहितं - गृहोपकरणैः पूर्णं उत्सर्जत् - शब्दं कुर्वत् यायात्-गच्छेत् यथा, एवं जीव ईश्वरेणान्वारूढः - प्रेरितो गच्छति परलोकमित्यर्थः। तथा च जीवस्याणुत्वे स्वाभाविके सिद्धे सति अणुत्वविभुत्वाभ्यां जीवेश्वरयोर्भेदसिद्धिरिति भावः। सिद्धान्ती दूषयति— **नैतत्सारमिति**। यथा परमात्मप्रकरणे श्रुतं परस्य विभुत्वमन्यथा नेतुमयुक्तं तथा जीवप्रकरणे श्रुतं जीवस्य विभुत्वमप्यन्यथा नेतुमयुक्तमित्याशयेन 'कतम आत्मा' इत्यादिजीवप्रकरणगतं वाक्यजातमुदाहरति—**स वा इत्यादिना**। विज्ञानमयो जीवः महान्-व्यापक आत्मेति जीवस्य व्यापकत्वश्रवणादित्यर्थः। 'नभोपमः' इत्यनेन स्वतो जीवस्य विभुत्वमुच्यत इत्यर्थः। इयं श्रुतिः प्रागेव व्याख्याता। विभुत्वेऽनन्यथासिद्धश्रुतिसाम्यमुक्त्वा परस्य परोक्तं विभुत्वलिङ्गं विघटयति—**त्वन्मत इति**। प्रकृतिः - माया। परस्य ब्रह्मणःसर्वप्रपञ्चोपादानत्वमुपेत्यापि न तत् विभुत्वसाधकमित्याह—**जीवस्येति**। अणोरिति शेषः। ततः-सर्वोपादानत्वात्, तस्य-ईश्वरस्येत्यर्थः। जीवाणुत्वश्रुतिलिङ्गानामन्यथानयनमपि तुल्यमेवेत्याह—**तत्प्रवेशश्रुतीनामिति**। ब्रह्मप्रवेशेत्यर्थः। पञ्च - प्राणापानादिलक्षणा वृत्तयो

'पञ्चवृत्तिर्मनोवद्व्यपदिश्यते' [ब्र.सू. २-४-१२] इतिसूत्रभाष्ये बुद्धिप्राणयोः कार्यभेदाद्भेदस्य प्रतिपादितत्वेन बुद्ध्युपाधिके जीवे प्रथममुत्क्रामति प्राणस्यानूत्क्रमणोपपत्तेः, नामरूपविमोक्षानन्तरं ब्रह्मप्राप्तिश्रवणस्य प्राप्तरि जीव इव प्राप्तव्ये ब्रह्मण्यपि विभुत्वविरोधित्वात्, प्राकृतनामरूपविमोक्षानन्तरमपि अप्राकृतलोकविग्रहाद्युपधानेन ब्रह्मणः प्राप्तव्यत्ववादिमते प्राप्तुर्जीवस्यापि अप्राकृतदेहेन्द्रियादिसत्त्वेन तदुपधानेन ब्रह्मप्राप्तिश्रवणाविरोधात्, स्वाभाविकगत्याश्रयशकटदृष्टान्तश्रवणमात्रात् जीवस्य स्वाभाविकगतिसिद्धौ 'गुहां प्रविष्टौ' इति स्वाभाविकप्रवेशाश्रयजीवसमभिव्याहारेण ब्रह्मणोऽपि स्वाभाविकप्रवेशसिद्ध्यवश्यम्भावात्, ब्रह्मजीवोभयान्वयिन एकस्य प्रविष्टपदस्य एकरूपप्रवेशपरत्वस्य वक्तव्यत्वात्। तस्मात् परमते ब्रह्मजीवयोर्विभुत्वाणुत्वव्यवस्थित्यसिद्धेः ततो भेदसिद्धिप्रत्याशा दूरादपनेया। अस्मन्मते ब्रह्मात्मैक्यपरमहावाक्यानुरोधेन अवान्तरवा-

---

यस्य मुख्यप्राणस्य स पञ्चवृत्तिः प्राणः श्रुतिषु व्यपदिश्यते। बहुवृत्तिमत्त्वमात्रे च दृष्टान्तो मनोवदिति। प्राणापानादिवृत्तीनां चोच्छ्वासादिकं प्रत्येकं कार्यमिति द्रष्टव्यम्। तथा च दृष्टान्तदार्ष्टान्तिकभावेन सूत्रे मनश्शब्दितबुद्धेः प्राणस्य च भेदो निर्दिष्टः। स च बुद्धीन्द्रियकार्यविषयालोचनापेक्षया विलक्षणस्योच्छ्वासादिक्रियारूपकार्यस्य प्राणे दर्शनात् प्राणो बुद्ध्यादिभ्यो भिन्न इत्यादिप्रकारेण भाष्ये साधित इत्यर्थः। 'यो वै प्राणस्सा प्रज्ञा' इति श्रुतौ प्रज्ञाप्राणयोर्भेदे सत्यपि प्रज्ञाप्राणोपहितस्य प्रत्यगात्मन एकत्वात् उपहितात्मप्राधान्येन तयोरेकीकरणमविरुद्धमिति प्रतर्दनाधिकरणभाष्ये प्रतिपादितत्वात् न श्रुतिविरोधोऽपीति भावः। यत्तु नामरूपोपाधिनिवृत्त्यनन्तरं जीवस्य ब्रह्म प्रति गतिश्रवणं जीवस्य विभुत्वविरोधीति, तदयुक्तम्—तस्य ब्रह्मण्यपि विभुत्वविरोधित्वेन ब्रह्मणोऽपि तदसिद्धिप्रसङ्गात्, लोके परिच्छिन्नस्यैव गन्तव्यत्वनियमदर्शनात् -इत्याह—**नामरूपेति**। ननु परमते ब्रह्मणो व्यापकस्वरूपेण न मुक्तप्राप्यत्वं, किं तु लोकविशेषाद्युपहितत्वेन। उपहितरूपेण प्राप्तव्यत्वं च न ब्रह्मणः स्वरूपेण व्यापकत्वविरोधि - इत्याशङ्क्य, तुल्यमेतत् तव मते जीवस्यापीत्याह—**प्राकृतेति**। 'विद्वान्नामरूपाद्विमुक्तः' इति श्रुतौ प्राकृतनामरूपाद्विमुक्त इत्यर्थं कल्पयता त्वया विदुषो जीवस्याप्यप्राकृतनामरूपस्वीकारेण स्वतो विभोरपि जीवस्य अप्राकृतनामरूपोपाधिपरिच्छिन्नस्य ब्रह्म प्रति गन्तृत्वसम्भवात् न विभुत्वश्रुतयो जीवविषया बाधनीया इत्यर्थः। ननु प्रविष्टावित्यत्र प्रविष्टपदं जीवे स्वाभाविकप्रवेशार्थकं, ब्रह्मणि तु शरीराद्युपाधिकृतप्रवेशार्थकं - इत्याशङ्क्य, तथासति सकृच्छ्रुतस्य प्रविष्टपदस्य अर्थवैरूप्यं प्रसज्येतेति मत्वा आह—**ब्रह्मजीवोभयेति**। यदि च ब्रह्मणो विभुत्वश्रुत्याद्यनुरोधेन प्रवेशसामान्यपरत्वमेव प्रविष्टपदस्य कल्प्यते न तु तद्गतविशेषपरत्वमपि, तर्हि जीवस्यापि विभुत्वश्रुत्यनुरोधेन शकटदृष्टान्ते गमनादिसाम्यमात्रं विवक्ष्यते न तु स्वाभाविकगत्याश्रयत्वादिकमपीति न जीवस्य स्वाभाविकाणुत्वसिद्धिः। तस्य तत्सिद्धौ वा ब्रह्मणोऽप्यणुत्वं दुर्वारम्, विनिगमनाविरहादिति भावः। **तत इति**। उक्तव्यवस्थितेरित्यर्थः। ननु - परमते जीवेश्वरयोरुभयोरपि विभुत्वाणुत्वश्रुतिलिङ्गानामविशेषात् उभयाणुत्वश्रुतिलिङ्गानामन्यथासिद्ध्यविशेषाच्च तयोरणुत्वं विभुत्वं वा

क्यानां नेयत्वात् 'स्वरूपेण जीवस्य विभुत्वं औपाधिकरूपेण परिच्छेदः' [1]इत्युभयश्रुत्युपपादनं भाष्यादिषु व्यक्तम् ।

तस्मात् अचेतनस्य प्रपञ्चस्य मिथ्यात्वात् चेतनप्रपञ्चस्य ब्रह्माभेदाच्च न वेदान्तानां अद्वितीये ब्रह्मणि विधेयकप्राप्ये समन्वयस्य कश्चिद्विरोध इति ॥

॥ इति शास्त्रसिद्धान्तलेशसङ्ग्रहे द्वितीयः परिच्छेदः ॥

समानतयैव सिध्येत् न त्वेकस्य विभुत्वं अपरस्याणुत्वमिति व्यवस्था सिध्येदिति यथा दोषः प्रसज्यते, तथा सिद्धान्तेऽपि जीवस्य परिच्छिन्नत्वविभुत्वश्रुतिलिङ्गानामविशेषात् तस्य स्वाभाविकं विभुत्वं परिच्छिन्नत्वमौपाधिकमिति व्यवस्था न सिध्येदिति दोषः प्रसज्यत एवेति, नेत्याह—**अस्मन्मत इति**। ब्रह्मात्मैक्यज्ञानस्य मुक्तिसाधनत्वात् तज्ज्ञानजनकानि तत्त्वमस्यादिवाक्यानि महावाक्यानि वाक्यार्थज्ञानकारणीभूततत्त्वंपदार्थज्ञानं प्रति साधनभूतानि जीवस्वरूपप्रतिपादकवाक्यानीश्वरस्वरूपप्रतिपादकवाक्यानि च अवान्तरवाक्यानीति महावाक्यशेषत्वात् पदार्थप्रतिपादकवाक्यानां प्रधानवाक्यानुरोधेन गुणभूतवाक्यानां नेयत्वादित्यर्थः । **स्वरूपेणेति** । जीवस्य स्वरूपेण अणुत्वे महावाक्यप्रतिपाद्यब्रह्माभेदानुपपत्तेः ब्रह्मणश्च स्वरूपेण पूर्णत्वाभावे बहुश्रुत्यादिविरोधादिति भावः ।

अद्वितीये ब्रह्मणि वेदान्तसमन्वयाविरोधसमर्थनरूपं परिच्छेदार्थमुपसंहरति—**तस्मादिति** । पञ्चम्यर्थं पञ्चमीभ्यां विवृणोति—**अचेतनस्येति** ।

श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं संप्रणम्य च ।
व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वती-
दिव्यश्रीचरणारविन्दसंलग्नरजोभूतस्याच्युतकृष्णानन्दतीर्थस्य
कृतौ शास्त्रसिद्धान्तलेशसंग्रहव्याख्यायां कृष्णालंकारा-
ख्यायां द्वितीयः परिच्छेदःसमाप्तः**

---

1. इत्यादिप्रकारेण जीवब्रह्मभेदप्रापकश्रुतीनां उपपादनं—इति पाठान्तरम् ।

श्रीः

तृतीयः परिच्छेदः

ननु - कथं विद्ययैव ब्रह्मप्राप्तिः, यावता कर्मणामपि तत्प्राप्तिहेतुत्वं स्मर्यते—' तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने' [वि-पु-६-५-६०] इति

सत्यम् । ' नान्यः पन्था विद्यतेऽयनाय [श्वे.उ-३-८] ' इतिश्रुतेः नित्यसिद्धब्रह्मावाप्तौ कण्ठगतविस्मृतकनकमालावाप्तितुल्यायां विद्यातिरिक्तस्य साधनत्वासम्भवाच्च ब्रह्मावाप्तौ परम्परया कर्मापेक्षामात्रपरा तादृशी स्मृतिः ।

क्व तर्हि कर्मणामुपयोगः ।

अत्र भामतीमतानुवर्तिन आहुः—**' तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा-**

आपन्ना यं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ।
कृष्णा कृष्णस्य महिषी तं कृष्णं संश्रयेऽन्वहम् ॥

पूर्वपरिच्छेदान्ते ब्रह्मप्राप्तिरूपमोक्षस्य विद्यैकप्राप्यत्वमुक्तम् । तत्र विद्याप्राप्यत्वमुपेत्य मोक्षस्य एकपदलभ्यं साधनान्तरव्यवच्छेदं असहमानः समुच्चयवादी प्रत्यवतिष्ठते—**ननु कथमिति । यावतेति ।** यस्मादित्यर्थः । स्मृतौ तत्पदं ब्रह्मपरम् । **उक्तमिति ।** 'तेनैति ब्रह्मवित् पुण्यकृत्' [बृ.उ. ४-४-९] इत्यादिश्रुत्येति शेषः । तेन-ब्रह्मवेदनपुण्ययोस्समुच्चयेन एति—ब्रह्म प्राप्नोतीति श्रुत्यर्थः । ज्ञानकर्मणोस्समुच्चयस्य ब्रह्मप्राप्तिहेतुत्वश्रवणमनुमोदते—**सत्यमिति ।** ब्रह्मप्राप्तेर्विद्यामात्रसाध्यत्वप्रतिपादकश्रुत्यन्तरेणोपपत्तिसहितेन विरोधात् समुच्चयश्रवणं तन्मूलकस्मृतिवचनं च क्रमसमुच्चयपरतया नेतव्यमित्याशयेनाह—**नान्यः पन्था इति ।** ब्रह्मज्ञानापेक्षया अन्यः-ज्ञानकर्मसमुच्चयरूपः केवलकर्मरूपो वा पन्थाः-उपायो मोक्षं प्रति नास्तीति श्रुत्यर्थः । नित्यं आत्मस्वरूपतया सिद्धस्य ब्रह्मणोऽवाप्तिः अप्राप्तत्वभ्रमादिनिवृत्तिरूपा । भ्रमादिनिवृत्तिश्च ज्ञानमात्रसाध्यत्वेन लोके दृष्टा । यथा कण्ठगतायामेव कनकमालायां विस्मृतायां सत्यां तस्यामप्राप्तत्वभ्रमेण बहुविधविक्षेपं प्राप्तस्य आप्तोपदेशजन्यज्ञानमात्रेण अप्राप्तत्वभ्रमनिवृत्तिरूपा पूर्वसिद्धकनकमालावाप्तिः । तत्तुल्यायां नित्यसिद्धब्रह्मावाप्तौ विद्यातिरिक्तसाधनापेक्षाऽभावात् तदतिरिक्तस्य भ्रमादिनिवृत्तौ सामर्थ्याभावाच्चेत्यर्थः ।

परम्परया मुक्तावुक्तं कर्मणामुपयोगं प्रपञ्चयितुं पृच्छति—**क्व तर्हीति ।** तर्हि-ज्ञानवत् साक्षान्मुक्तिहेतुत्वाभावे सति क्व-विविदिषायां विद्यायां वा साधनत्वं तेषामित्यर्थः ।

तमेतमिति तच्छब्दः प्रकृतपरमात्मपरः । एतच्छब्दः नित्यापरोक्षजीवपरः । तथा च जीवाभिन्नं परमात्मानं वेदानुवचनादिभिर्वेदितुमिच्छन्तीत्यर्थः । अनशनादिलक्षणतपोव्यावृत्तये तपसो विशेषणं अनाशकेनेति ।

ऽनाशकेन' [बृ.उ.४-४-२२] इति श्रुतेः विद्यासम्पादनद्वारा ब्रह्मावाप्त्युपायभूतायां विविदिषायामुपयोगः। नन्विष्यमाणायां विद्यायामेवोपयोगः किं न स्यात्? न स्यात्-प्रत्ययार्थस्य प्राधान्यात्, 'विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमदमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनि' इति सर्वापेक्षाधिकरणभाष्याच्च। ननु—विविदिषार्थं यज्ञाद्यनुष्ठातुर्वेदनगोचरेच्छावत्त्वे विविदिषायाः सिद्धत्वेन तदभावे वेदनोपायविविदिषायां कामनाऽसम्भवेन च विविदिषार्थं यज्ञाद्यनुष्ठानायोगात्

तथा च हितमितमेध्याशनादिरूपं तपः इह विवक्षितमिति लभ्यते। ननु विविदिषायामपुमर्थभूतायां कथं विनियोगः, तत्राह—**विद्यासम्पादनद्वारेति**। ततश्च गौणपुरुषार्थत्वं तस्याःसम्भवतीत्यर्थः। ननु मुक्तिं प्रति प्रत्यासन्नत्वाद्विद्यायाः तस्यामेव विनियोगः कुतो न कल्प्यते? श्रुतत्वाविशेषात्, कामनाविषयत्वेन श्रुतस्वर्गादेरेव कर्मफलतयाऽन्यत्र स्वीकाराच्च-इति मत्वा शङ्कते—**नन्विति**। स्वर्गकामादिवाक्येषु यागादेर्विधिप्रत्ययेनेष्टसाधनत्वे बोधिते किं तदिष्टमिति विशेषाकाङ्क्षायां सत्यां पुरुषविशेषणत्वेन श्रुतयोः कामनास्वर्गयोरन्यतरस्यापि शब्दतः प्राधान्याभावेन तत्रार्थतः प्राधान्यस्यैवाश्रयणीयत्वे स्वतः पुरुषार्थतया स्वर्गस्यैव फलत्वेनान्वयः स्वीकृतः 'यागः स्वर्गसाधनं' इति, न तु कामनायाः। इह तु वेदनकामनाया एव फलत्वेनान्वय उचितः, शब्दतः प्रधानत्वात्। अतः फलप्रत्यासत्त्यादिकमप्यकिञ्चित्करं—इति मत्वा समाधत्ते—**न स्यादिति**। सन्प्रत्ययः प्रत्ययशब्दार्थः। विविदिषायामेव विनियोग इत्यत्र भाष्यसम्मतिमाह—**विद्यासंयोगादिति**। विद्यासाधनत्वादित्यर्थः। **प्रत्यासन्नानीति**। यावद्विद्योदयमनुष्ठेयानीत्यर्थः। शमादिवैषम्यं कर्मसु दर्शयति—**विविदिषासंयोगात्त्विति**। तत्साधनत्वादेवेत्यर्थः। **बाह्यतराणीति**। विविदिषोदयपर्यन्तमेवानुष्ठेयानीति यावत्। **सर्वापेक्षाधिकरणेति**। 'विद्योत्पत्तौ सर्वाणि कर्माण्यपेक्षितव्यानि' इति प्रतिपादकाधिकरणेत्यर्थः। विविदिषाविनियोगं प्रकारान्तरेणाक्षिपति—**नन्विति**। वेदनेच्छाया यज्ञादिफलत्वे वेदनेच्छागोचरेच्छया यज्ञाद्यनुष्ठानं वाच्यम्। वेदनेच्छायाश्च स्वतःफलत्वाभावाद्वेदनद्वारा मुक्तिफलकत्वं वाच्यम्। तथा चायं क्रमः—प्रथमं मुक्तौ स्वतः पुरुषार्थत्वज्ञानादिच्छा, ततो वेदने मुक्तिसाधनत्वज्ञानादिच्छा, ततो वेदनेच्छायां वेदनसाधनत्वज्ञानादिच्छा, तया च यज्ञाद्यनुष्ठानमिति। तथा च वेदनेच्छारूपविविदिषोद्देशेन यज्ञाद्यनुष्ठाने प्रवर्तमानस्य ब्रह्मवेदने विविदिषाफले किमिच्छाऽस्ति न वा? आद्ये यज्ञाद्यनुष्ठानवैयर्थ्यमभिप्रेत्याह—**वेदनगोचरेति**। वेदनगोचरेच्छाया एव विविदिषात्वादिति भावः। सिद्धत्वेन विविदिषार्थं यज्ञाद्यनुष्ठानायोगादिति सम्बन्धः। न द्वितीयः-विविदिषाफले वेदने कामनाया असत्त्वे विविदिषायामपि कामनाया अभावात् विविदिषोद्देशेन यज्ञाद्यनुष्ठानायोग इत्याह—**तदभाव इति**। वेदनगोचरेच्छाया अभावे इत्यर्थः। विविदिषार्थं यज्ञाद्यनुष्ठातुरस्त्येव वेदनगोचरेच्छा। न चैतावता तदनुष्ठानवैयर्थ्यम्। विविदिषाया द्वैविध्योपपत्तेः। तथा हि—वेदनेच्छा द्विविधा—विद्याया-मौन्मुख्यलक्षणा, रुचिलक्षणा च। तत्राद्या यज्ञाद्यनुष्ठानात्प्रागपि वेदने वर्तत इति तामादाय वेदनसाधनभूतायां विविदिषायां कामना सम्भवतीति विविदिषार्थं यज्ञाद्यनुष्ठानमुपपन्नम्, द्वितीया तु यज्ञादिफलभूता तदनुष्ठानानन्तर-

न यज्ञादीनां विविदिषायां विनियोगो युक्त इति चेत्, न—अन्नद्वेषेण कार्श्यं प्राप्तस्य तत्परिहाराया-न्नविषयौन्मुख्यलक्षणायामिच्छायां सत्यामपि उत्कटाजीर्णादिप्रयुक्तधातुवैषम्यदोषात् तत्र प्रवृत्ति-पर्यन्ता रुचिर्न जायत इति तद्रोचकौषधविधिवत् 'निरतिशयानन्दरूपं ब्रह्म, तत्प्राप्तौ विद्या साधनम्' इत्यर्थे प्राचीनबहुजन्मानुष्ठितानभिसंहितफलकनित्यनैमित्तिककर्मोपसञ्जातचित्तप्रसाद-महिम्नासम्पन्नविश्वासस्य पुरुषस्य ब्रह्मावाप्तौ विद्यायां च तदौन्मुख्यलक्षणायामिच्छायां सत्यामपि अनादिभवसञ्चितानेकदुरितदोषेण आस्तिककामुकस्य हेयकर्मणीव विषयभोगे प्रावण्यं सम्पादयता प्रतिबन्धात् विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ता रुचिर्न जायत इति प्रतिबन्धनिरासपूर्वकं तत्सम्पाद-कयज्ञादिविधानोपपत्तेः—इति ।

विवरणानुसारिणस्त्वाहुः-'**प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्' इति सामान्यन्यायात्**

भाविनीति युक्त एव विविदिषायां यज्ञादिविनियोगः इति समाधानमभिप्रेत्याह—**नेति**। वेदनेच्छायाः द्वैविध्ये यज्ञाद्यनुष्ठानादौ च दृष्टान्तमाह—**अन्नद्वेषेणेति**। **तत्परिहारायेति**। कार्श्यपरिहारायान्नभ-क्षणविषयकोत्कटेच्छायां सत्यामपीत्यर्थः। **उत्कटेति**। अधिकेत्यर्थः। धातुवैषम्यप्रयोजकात्यन्तानशनादि-सङ्ग्रहार्थमादिपदम्। **तत्रेति**। अन्नभक्षणे इत्यर्थः। **जायत इति**। एतच्चानुभवसिद्धमिति भावः। अधीतसाङ्गस्वाध्यायः पुरुषो वेदान्तैर्ब्रह्मणो निरतिशयानन्दरूपत्वं विद्यायां तत्प्राप्तिसाधनत्वं च ज्ञात्वा तस्मिन्नर्थे सम्पन्नविश्वासो भवतीत्ययुक्तम्, तथाविधानामपि पुरुषाणां बहूनां तस्मिन्नर्थे विश्वाससम्पत्तेरद-र्शनात् - इत्याशङ्क्याह—**प्राचीनेति**। प्राचीनेषु बहुषु जन्मसु अनुष्ठितानि फलाभिसन्धिरहितानि च यानि नित्यनैमित्तिककर्माणि, तैरुपसञ्जातो यश्चित्तप्रसादः - शुद्धिविशेषः, तस्य महिम्नेत्यर्थः। तथा च स्मृतिः— 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।' [भ. गी. ७-३] इति। कश्चिदिति। उक्तचित्तप्रसादवानित्यर्थः। सिद्धये–विद्यालाभाय। न सर्वं इति भावः। ननु ब्रह्मप्राप्तितत्साधनविद्यागोचरोत्कटेच्छायां सत्यां तत्साधन-श्रवणादौ प्रवृत्तिपर्यन्ता रुचिर्भवेदेवेति कृतं तस्य यज्ञाद्यनुष्ठानेन, तत्राह—**अनादीति**। दुरितदोषेण प्रतिबन्धात् रुचिर्न जायत इति सम्बन्धः। ननु पूर्वोक्तचित्तप्रसादमहिम्ना ब्रह्मविद्यादौ सम्पन्नविश्वासस्य आस्तिकतमस्य अनर्थ-बहुले विषयभोगे प्रावण्यं कथं सम्भवतीत्याशङ्क्य, अनुभवसिद्धदृष्टान्तेन तत् सम्भावयति–**आस्तिककामुकस्येति**। 'विहितानुष्ठानादवश्यं श्रेयो भवति, निषिद्धकरणादितश्चावश्यं महाननर्थो भवति, शास्त्रप्रामाण्यात्' इति निश्चयवान् आस्तिकः। तस्यापि कस्यचित् कामोद्रेको निन्दितागम्यागमनादौ प्रावण्यं च यथा पापविशेषात् सम्भवति तथा यथोक्तमुमुक्षोरपीत्यर्थः। **प्रतिबन्धेति**। अनादिभवसञ्चितानेकदुरितदोषकृतप्रतिबन्धेत्यर्थः। **तत्सम्पादकेति**। विविदिषाशब्दिता या श्रवणादौ प्रवृत्तिपर्यन्ता रुचिः तत्सम्पादकेत्यर्थः।

'क्व तर्हि कर्मणामुपयोगः' इत्यत्र प्रश्ने विद्यायां विनियोग इति प्रतिवचनान्तरमवतारयति— **विवरणेति**। पूर्वत्र यज्ञादीनां तृतीयाश्रुत्या साधनत्वेनावगतानां साध्याकाङ्क्षायां विविदिषैव साध्यत्वेनान्वेति,

'इच्छाविषयतया शब्दबोध्य एव शाब्दसाधनताऽन्वयः' इति स्वर्गकामादिवाक्येक्लृप्तविशेषन्यायस्य बलवत्त्वात्, 'अश्वेन जिगमिषति' 'असिना जिघांसति' इत्यादिलौकिकप्रयोगे अश्वादिरूपसाधनस्य 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' [छा.उ. ८-१] 'मन्तव्यो निदिध्यासितव्यः' [बृ.उ.२-४-७] इत्यादिवैदिकप्रयोगे प्रत्ययार्थविधेश्च सन्प्रत्ययाभिहितेच्छाविषय एव गमनादौ अन्वयस्य व्युत्पन्नत्वाच्च प्रकृत्यभिहितायां विद्यायां यज्ञादीनां विनियोगः। ननु तथासति यावद्विद्योदयं कर्मानुष्ठानापत्त्या 'त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक् परं पदम्' इत्यादिश्रुतिसिद्धा कर्मत्यागरूपस्य सन्न्यासस्य

तस्याः शब्दतः प्रधानत्वात्। शब्दतः प्रधानस्यैव पदार्थस्य 'राजपुरुषमानय' इत्यादौ सर्वत्र समभिव्याहृतपदार्थान्तरेणान्वयस्य व्युत्पत्तिसिद्धत्वात् - इत्याशयेन यज्ञादीनां विविदिषायां विनियोग उक्तः। तत्रास्वरसं दर्शयन् विद्यायां तेषां विनियोगमुपपादयति—**प्रकृतीति**। प्रकृतिप्रत्ययार्थयोः - वेदनतदिच्छयोर्मध्ये प्रत्ययार्थस्य - विविदिषालक्षणस्य प्रत्ययार्थत्वात् शब्दतः प्राधान्यम्। ततश्च विविदिषाया एव यज्ञादिफलत्वेनान्वयः - इत्यत्र हेतुभूतो यस्सामान्यन्यायः राजपुरुषमानयेत्यादौ प्रसिद्धः 'शब्दतः प्रधानस्यैव समभिव्याहृतक्रियाकारकान्वयः' इत्येवंरूपः तस्मादित्यर्थः। विधिप्रत्ययेनेष्टसाधनत्वेनावगतयागादेरिष्टविशेषाकाङ्क्षायां सत्यां शब्दतः प्राधान्याभावेऽपि स्वर्गस्य फलत्वेनान्वयः क्लृप्त इत्यर्थः। शाब्दप्राधान्याभावाविशेषे कामनाया एव यागादिफलत्वेनान्वयः कुतो न कल्पितः, तत्राह—**इच्छाविषयतयेति**। इच्छाविषयत्वस्य फलत्वव्यञ्जकत्वात्[1] पुरुषार्थत्वेन प्रतीतस्य स्वर्गस्यैव फलत्वं न कामनाया इत्यर्थः। ननु कामनाविषयत्वस्य मुक्तिसाधारणत्वात् सैव यागादिफलं कस्मान्न कल्प्यते, तत्राह—**शब्दबोध्य इति**। 'शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते' इति न्यायान्नातिप्रसङ्गः। तथा च 'इच्छेष्यमाणसमभिव्याहारे इष्यमाणस्यैव प्राधान्यं न त्विच्छायाः' इति विशेषन्यायेन उक्तसामान्यन्यायबाधस्य कामोपबन्धवाक्येषु क्लृप्तत्वात् 'विविदिषति' इत्यत्रापि प्रत्ययार्थत्वप्रयुक्तं विविदिषायाश्शाब्दप्राधान्यं त्यक्त्वा वेदनप्राधान्यमेवादरणीयमित्यर्थः। इच्छावाचिसन्प्रत्ययसमभिव्याहृतेष्वेव लौकिकवैदिकप्रयोगेषु प्रत्ययार्थतया प्रधानभूतामपीच्छामुल्लङ्घ्य तद्विषयेष्वेव समभिव्याहृतपदार्थान्तरान्वयदर्शनाच्च-इत्याह—**अश्वेनेति**। **तदन्वेष्टव्यमिति**। तत् - दहराकाशाख्यं ब्रह्म विचार्यमित्यर्थः। **विजिज्ञासितव्यमिति**। तदेव ब्रह्म ध्यातव्यमित्यर्थः। **निदिध्यासितव्य इति**। आत्मा ध्यातव्य इत्यर्थः। ननु उदाहृतप्रयोगेषु इच्छायाः अश्वादिसाधनाद्यन्वयायोग्यत्वात्तस्याः परित्याग इति चेत्, तर्हि प्रकृतेऽपि वेदनेच्छायास्तदयोग्यत्वात् ब्रह्मवेदनस्य च ब्रह्मानन्दसाक्षात्काररूपतया फलत्वेनान्वेतुं योग्यत्वात् वेदन एव यज्ञाद्यन्वयः न विविदिषायामिति तुल्यमिति भावः। विद्याविनियोगपक्षे विध्यन्तरविरोधं शङ्कते—**नन्विति**। कर्माणि त्यजतैव मुमुक्षुणा त्यक्तुः स्वस्य प्रत्यगात्मस्वरूपं पदं ब्रह्म साक्षात्कर्तव्यं, न त्वत्यजता - इति श्रुत्यर्थः। 'अथ परिव्राट्' इत्युपक्रम्य 'ब्रह्मभूयाय कल्पते' [जा. उ. ५] इत्यन्तेन श्रुत्यन्तरेणापि परिव्राट्छब्दोपात्तसन्न्यासस्य ब्रह्मभूयशब्दितब्रह्मसाक्षात्कारहेतुत्वमुक्तम्, एवं श्रुत्यन्तरेष्वपि - इत्यभिप्रेत्य आदिपदं द्रष्टव्यम्।

---

1. व्यञ्जकत्वात् - ज्ञापकत्वात्।

विद्यार्थता पीड्येतेति चेत्, न - प्राग् बीजावापात् कर्षणं तदनन्तरमकर्षणमिति कर्षणाकर्षणाभ्यां व्रीह्यादिनिष्पत्तिवत् 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते ॥' [भ.गी.६-२] इत्यादिवचनानुसारेण चेतश्शुद्धिविविदिषादिरूपप्रत्यक्प्रावण्योदयपर्यन्तं कर्मानुष्ठानं ततः सन्न्यासः इति कर्मतत्सन्न्यासाभ्यां विद्यानिष्पत्त्यभ्युपगमात्। उक्तं हि नैष्कर्म्यसिद्धौ—'प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः। कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥' [१-४९] इति।

कर्मणां विद्यार्थत्वपक्षेऽपि विविदिषापर्यन्तमेव कर्मानुष्ठाने विविदिषार्थत्वपक्षात् को भेद इति चेत्, अयं भेदः—कर्मणां विद्यार्थत्वपक्षे द्वारभूतविविदिषासिद्ध्यनन्तरमुपरतावपि फलपर्यन्तानि विशिष्टगुरुलाभनिर्विघ्नश्रवणमननादिसाधनानि निवृत्तिप्रमुखानि सम्पाद्य विद्योत्पादकत्वनियमोऽस्ति। विविदिषार्थत्वपक्षे तु श्रवणादिप्रवृत्तिजननसमर्थोत्कटेच्छासम्पादनमात्रेण कृतार्थतेति नावश्यं विद्योत्पादकत्वनियमः। 'यस्यैते चत्वारिंशत् संस्काराः' [गौ. ध. सू. १-८-२५]

विविदिषावाक्यसन्न्यासविध्योरविरोधं सदृष्टान्तं सप्रमाणं च दर्शयति—**न - प्रागिति**। वचने[1] कारणपदद्वयं कर्तव्यार्थकम्। शमः - सन्न्यासः। चेतश्शुद्धिविविदिषादिरूपप्रत्यक्प्रावण्येत्येतत् गीतावचनगतयोगपदव्याख्यानमिति बोध्यम्। रागादिराहित्यरूपचित्तशुद्धिविविदिषावैराग्यगुरुदेवतादिभक्तिलक्षणप्रत्यक्प्रावण्यजन्मपर्यन्तं कर्मानुष्ठानं - इत्यत्र सुरेश्वराचार्यसम्मतिमाह—**उक्तं हीति**। **शुद्धित इति**। शुद्धिद्वारेत्यर्थः। **अस्तमायान्तीति**। त्यागमायान्ति - त्यक्तव्यान्येव भवन्ति, कृतप्रयोजनत्वादित्यर्थः। कृतप्रयोजनानां निवृत्तौ दृष्टान्तमाह—**प्रावृडन्त इति**। वर्षाकालावसाने इत्यर्थः।

विविदिषायां विनियोगपक्षे विविदिषोदयपर्यन्तमेव यज्ञाद्यनुष्ठानमित्यविवादम्। विद्यायां विनियोगपक्षेऽप्येवं चेत् कस्तयोर्भेद इति शङ्कते—**कर्मणामिति**। अनुष्ठाने विशेषाभावेऽपि फलतो विशेषोऽस्तीत्याह—**अयं भेद इति**। वक्ष्यमाण इत्यर्थः। **उपरताविति**। त्यागेऽपीत्यर्थः। अदृष्टद्वारेति शेषः। विविदिषाविनियोगपक्षे हि यज्ञादिकर्मजनितादृष्टं श्रवणादिषु प्रवृत्तिपर्यन्तां विविदिषाशब्दितां रुचिमुत्पाद्य नश्यति, फलैकनाश्यत्वाददृष्टस्य। विविदिषोत्पत्त्यनन्तरं च श्रवणादिप्रतिबन्धकदुरिताभावे सति विविदिषाबलादेव श्रवणादिकं सम्पाद्य विद्यां लभते। श्रवणादिप्रतिबन्धकदुरितसत्त्वे तु तत्सत्त्वं यत्ने कृतेऽपि श्रवणाद्यलाभेन निश्चित्य तन्निवृत्त्युपायमनुतिष्ठति प्रायेण, तन्निवर्तकोपायाननुष्ठाने वा तदनुष्ठानस्यापि विघ्नबाहुल्ये वा श्रवणाद्यसम्भवात् न ज्ञानोदयः। यथा औषधवीर्येणान्नभक्षणे रुच्युत्पत्तौ सत्यामपि अप्रतिबन्धेनान्नलाभे तद्भक्षणेन कार्श्यनिवृत्तिं लभते, तदलाभे तु तल्लाभाय यतते, यत्ने कृतेऽपि यद्यन्नं न लभते तदा न कार्श्यनिवृत्तिं लभते, एवमिहापीत्यभिप्रेत्याह—**नावश्यमिति**। विविदिषाविनियोगपक्षस्य संस्कारे कर्मणां विनियोगपक्षं दृष्टान्तयति—**यस्यैत इति**। यस्य

---

1. वचने—'आरुरुक्षोर्मुनेर्योगं........' इत्यादिभगवद्गीतावचने।

इति स्मृतिमूले कर्मणामात्मज्ञानयोग्यतापादकमलापकर्षणगुणाधानलक्षणसंस्कारार्थत्वपक्ष इव - इति वदन्ति ॥

विद्योपयोगिकर्मविवेचनम्

ननु केषां कर्मणां उदाहृतश्रुत्या विनियोगो बोध्यते ।

अत्र केश्चित् उक्तं—'वेदानुवचनेन' इति ब्रह्मचारिधर्माणां 'यज्ञेन दानेन' इति गृहस्थधर्माणां च 'तपसाऽनाशकेन' इति वानप्रस्थधर्माणां च उपलक्षणं इत्याश्रमधर्माणामेव विद्योपयोगः । अत एव 'विहितत्वाच्चाश्रमकर्मापि' [ब्र. सू. ३-४-३२] इति शारीरकसूत्रे विद्यार्थकर्मस्वाश्रमकर्मपदप्रयोगः—इति ।

पुरुषस्य एते-श्रौतस्मार्ता धर्माः चत्वारिंशत्सङ्ख्याकास्संस्काराः सन्ति, शमादिसम्पत्तिश्च वर्तते, तस्य कर्मभिस्संस्कृतस्य विद्याधिकारिणः श्रवणादिसम्पत्तौ सत्यां तत्त्वज्ञानद्वारा परब्रह्मप्राप्तिर्भवति, तदसम्पत्तौ च पुण्यलोकावाप्तिः इति कर्मणां संस्कारकत्वपक्षे यथा ज्ञानोत्पादकत्वनियमो नास्ति, संस्कारजननमात्रेण चरितार्थानां कर्मणां विद्योत्पत्तिपर्यन्तव्यापाराभावात्, तथा तेषां विविदिषार्थत्वपक्षेऽपीत्यर्थः। आत्मज्ञानयोग्यता कार्यकारणसंघातनिष्ठा, तदापादकौ यौ मलापकर्षणगुणाधानलक्षणौ संस्कारौ, तदर्थत्वपक्षे इत्यर्थः। कर्मणां विविदिषार्थत्वपक्षे संस्कारार्थत्वपक्षे च ज्ञानोत्पत्त्यनियमे समानेऽपि विविदिषार्थत्वपक्षे प्रायिकी ज्ञानोत्पत्तिः। तीव्रबुभुक्षाया इव दृढविविदिषायाः सर्वप्रयत्नेन विद्यासम्पादनसमर्थत्वात्। संस्कारार्थत्वपक्षे तु ब्रह्मज्ञानयोग्यतामात्रसिद्धावपि विविदिषाया अप्यनियतत्वेन विद्योत्पत्तिः प्रायिक्यपि न भवतीति विविदिषासंस्कारार्थत्वपक्षयोरपि भेद ऊहनीय इति भावः ।

केषामिति । किमाश्रमकर्मणामेव, किं वा अन्येषामपीत्यर्थः ।

नन्वाश्रमधर्माणामपि सर्वेषां विविदिषावाक्ये श्रवणाभावात् तेषामपि न सर्वेषां विनियोगो लभ्यते, तत्राह—**वेदानुवचनेनेति**। वेदस्य गुरुवचनमनु शिष्यस्य वचनं - वेदानुवचनं - वेदाध्ययनम्। तच्च ब्रह्मचारिधर्माणां मध्ये प्रधानम्। तेन तद्धर्मास्सर्वे गृह्यन्त इत्यर्थः। एवमुत्तरत्रापि प्राधान्यं द्रष्टव्यम्। तपः कृच्छ्रचान्द्रायणादिरूपं वानप्रस्थासाधारणं इह तपश्शब्दरूढ्या भातीति भावः। 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः' [भ.गी. ६-१] इत्यादिस्मृतिषु-नित्यं आश्रमिणां कार्यं कर्तव्यं यद्यत् कर्मास्ति, तत् सर्वं फलाभिसन्धिं त्यक्त्वा यः करोति, सः योगपदोदितं पूर्वोक्तचेतश्शुद्धिविविदिषादिरूपं प्रत्यक्प्रावण्यं लभते—इति प्रतिपादनात् तन्मूलभूते विविदिषावाक्येऽपि सर्वेषामाश्रमकर्मणामुपलक्षणं युक्तमिति मन्तव्यम्। 'आश्रमकर्मणामेव' विनियोगः इत्यत्र सौत्रं लिङ्गमाह—**अत एवेति**। आश्रमकर्मणामेव विनियोगाभ्युपगमादेवेत्यर्थः। आश्रमकर्मणां विविदिषावाक्येन विद्यायां विनियुक्तत्वात् तत्कामनारहितेनाश्रमिणा स्वाश्रमविहितं कर्मानुष्ठेयं - इति शङ्कायां उत्तरं सूत्रम्। तेनापि तत् कर्तव्यमेव, तं प्रति विहितत्वात्, अन्यथा प्रत्यवायप्रसङ्गात् - इति सूत्रार्थो बोध्यः ।

कल्पतरौ तु—**नाश्रमधर्माणामेव विद्योपयोगः, 'अन्तराचापि तु तद्दृष्टेः' [ब्र.सू.३-३-३६] इत्यधिकरणे अनाश्रमिविधुराद्यनुष्ठितकर्मणामपि विद्योपयोगनिरूपणात्। न च—विधुरादीनामनाश्रमिणां प्राग्जन्मानुष्ठितयज्ञाद्युत्पादितविविदिषाणां विद्यासाधनश्रवणादावधिकारनिरूपणमात्रपरं तदधिकरणं, न तु तदनुष्ठितकर्मणां विद्योपयोगनिरूपणपरमिति—शङ्क्यम्। 'विशेषानुग्रहश्च'**

'अन्येषामपि विनियोगः' इति पक्षं नित्यकर्ममात्रविषयतया प्रथमं दर्शयति—**कल्पतरौ त्विति।** कल्पतरौ तूक्तमिति सम्बन्धः। 'आश्रमधर्मव्यतिरिक्तानामप्यस्ति विद्योपयोगः' इति कल्पतरुकारमतमयुक्तम्, सूत्रे विद्यार्थकर्मस्वाश्रमकर्मपदप्रयोगविरोधात्। न च सौत्राश्रमकर्मपदस्य वर्णधर्मेष्वप्यजहल्लक्षणोपपत्तेः न तद्विरोध इति वाच्यम्। लक्षणायामेव प्रमाणाभावात्—इत्याशङ्क्य, तत्र नियामकं दर्शयति—**नाश्रमधर्माणामेव विद्योपयोग इति।** 'आश्रमधर्मव्यतिरिक्तानां वर्णधर्माणामप्यस्ति विद्योपयोगः' इत्येवकारार्थे हेतुमाह—**अन्तरा चापि त्विति।** विद्यां प्रति बहिरङ्गसाधनेषु कर्मसु अन्तरङ्गसाधनेषु श्रवणादिषु च अनाश्रमिणामधिकारोऽस्ति न वेति सन्देहे सति, नास्त्यधिकार इति पूर्वपक्षः—आश्रमकर्मणामेव विद्यायां विनियुक्तत्वात्, तेषामाश्रमकर्माभावात्, साधनचतुष्टयसम्पन्नस्यैव श्रवणादिष्वधिकाराच्च, अनाश्रमिणां च साधनचतुष्टयान्तर्गतस्योपरतिशब्दितसन्न्यासस्याभावेन तत्सम्पत्त्यभावादिति। सिद्धान्तस्तु—सूत्रे तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। अन्तराशब्दः आश्रमान्तरालमनाश्रमित्वमाह। तथा च अनाश्रमित्वे वर्तमानोऽपि पुरुषः श्रवणादिषु विद्यार्थकर्मसु च अधिक्रियते। कुतः। श्रुतिस्मृतिषु रैक्वाचक्नवीप्रभृतीनामनाश्रमिणामपि विद्यावत्त्वोपलब्धेः, परिव्राजकस्य श्रवणादिषु मुख्याधिकारेऽपि गृहस्थादीनामिव अनाश्रमिणामपि गौणाधिकारोपपत्तेः। तथा च तदधिकरणे भाष्यं—'दृष्टार्था च विद्या प्रतिषेधाभावमात्रेण अर्थिनमधिकरोति श्रवणादिषु' इति। अविद्यानिवृत्तिः विद्याया दृष्टं फलं, अर्थिनं - अविद्यानिवर्तकसाक्षात्कारार्थिनं अधिकारित्वेन स्वीकरोति। शूद्रस्येव वेदान्तश्रवणादिष्वनाश्रमिणां प्रतिषेधाभावात् इति भाष्यार्थः। गौणाधिकारे सन्न्यासापेक्षा नास्तीति मत्वा मात्रपदम्। 'अन्तराचापि' इत्यधिकरणं अनाश्रमिणां श्रवणाद्यधिकारमात्रनिरूपणपरं, न त्वनाश्रमिकर्मणामपि विद्योपयोगनिरूपणपरम्। तथा च सौत्राश्रमकर्मपदस्य वर्णधर्मोपलक्षकत्वं न सिद्ध्यतीति मत्वा शङ्कते—**न च विधुरादीनामिति।** ननु तेषां विद्यार्थकर्माभावे विविदिषोदयासम्भवात् अनाश्रमिणां श्रवणाधिकारनिरूपणमयुक्तमित्याशङ्क्याह—**प्राग्जन्मेति।** अनाश्रमिणोऽपि ये जन्मान्तरीयाश्रमकर्मानुष्ठानजनितविविदिषावन्तः सन्न्यासहेतुतीव्रवैराग्याभावात् मुख्याधिकारात् प्रच्युताश्च तेषां श्रवणाधिकारनिरूपणपरं तदधिकरणं, न त्वनाश्रमिमात्रविषयम्, अविविदिषूणां श्रवणादौ प्रवृत्त्यसम्भवादेव इत्यर्थः। इति न च शङ्क्यमिति सम्बन्धः। ननु - 'अन्तरा चापितु' इति सूत्रे विद्यार्थकर्मसु विधुरादीनामधिकारे श्रुत्यादिषु अनाश्रमिणां रैक्वाचक्नवीप्रभृतीनां विद्यावत्त्वदर्शनं हेतुत्वेनोक्तं, तदयुक्तम्—रैक्वाचक्नवीविदुरप्रभृतीनां जन्मान्तरीयविद्यासाधनानुष्ठानबलादेव विद्या जातेति शङ्कासम्भवात्। 'अतोऽनाश्रमिकर्मणां विद्योपयोगः' इत्यत्र तेषां विद्यावत्त्वदर्शनमनन्यथासिद्धं लिङ्गं न भवति - इत्यस्वरसात् अनन्यथासिद्धं हेतुमन्यमभिप्रेत्योक्तं—**विशेषानुग्रहश्चेति।**

[ब्र.सू.३-४-३८] इति तदधिकरणसूत्रतद्भाष्ययोः तदनुष्ठितानां जपादिरूपवर्णमात्रधर्माणामपि विद्योपयोगस्य कण्ठत उक्तेः। 'विहितत्वाच्चाश्रमकर्मापि' इति सूत्रे आश्रमकर्मपदस्य वर्णधर्माणामप्युपलक्षणत्वात् इत्यभिप्रायेण—उक्तम्। आश्रमधर्मव्यतिरिक्तानामप्यस्ति विद्योपयोगः, किं तु नित्यानामेव। तेषां हि फलं दुरितक्षयं विद्या अपेक्षते, न काम्यानां फलं स्वर्गादि। तत्र यथा प्रकृतौ क्लृप्तोपकाराणामङ्गानामतिदेशे सति न प्राकृतोपकारातिरिक्तोपकारकल्पनम्, एवं ज्ञाने विनियुक्तानां यज्ञादीनां नित्यक्लृप्तफलपापक्षयातिरेकेण न नित्यकाम्यसाधारणविद्योपयोग्युपकारकल्पनमिति।

संक्षेपशारीरके तु नित्यानां काम्यानां च कर्मणां विनियोग उक्तः। यज्ञादिशब्दाविशेषात्।

विशेषैः - धर्मविशेषैःजपादिलक्षणैर्ब्राह्मणत्वादिवर्णमात्रसम्बन्धिभिरपि चित्तशुद्धिविविदिषादिद्वारा आश्रमधर्मैरिव विद्याया अनुग्रहः—उपकारः सम्भवत्येव। कुतः। 'जप्येनैव तु संसिध्येत् ब्राह्मणो नात्र संशयः।' [मनु. २-८७] गङ्गायां स्नानमात्रेण मुच्यते नात्र संशयः। 'यस्य स्मरणमात्रेण' [विश्रामोप, म. भा. आनु] इत्यादिवचनैर्जपतीर्थस्नानदेवताध्यानादिधर्माणां शुद्ध्यादिद्वारा विद्यादिसाधनत्वस्य प्रतिपादनात् - इति सूत्रार्थः। **तदनुष्ठितानामिति**। अनाश्रमिणः तच्छब्दार्थः। एवमनाश्रमिधर्माणामपि सूत्रकारेणैव स्पष्टं विद्योपयोगस्य साधितत्वात् तदविरोधाय सौत्रमाश्रमकर्मपदं वर्णधर्माणामप्युपलक्षकं वाच्यं इत्याशयेनाह—**सूत्र इति**। एवं कल्पतरुकाराणमभिप्रायमुपवर्ण्य तन्मतमुपपादयति—**आश्रमधर्मेत्यादिना**। ननु—यज्ञादीनां विनियोगः कल्प्यमानः किं काम्यसाधारणः कल्प्यते, किं वा नित्यानामेव। नाद्यः। काम्यकर्मफलस्य स्वर्गादेः विद्यया अनपेक्षितत्वेन तेषां विद्योपकारकत्वासम्भवात्। न द्वितीयः। नित्यकर्मफलस्य दुरितक्षयस्यापि प्रमाणसाध्यविद्यापेक्षितत्वे मानाभावेन तेषामपि विद्याविनियोगानुपपत्तेः—इति शङ्कते—**किं त्विति**। समाधत्ते—**नित्यानामेवेति**। 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः' इत्यादिवचनानि नित्यकर्मफलस्य दुरितक्षयस्य विद्ययाऽपेक्षितत्वे प्रमाणत्वेन सूचयति—**हीति**। प्रमाणजन्यायामपि विद्यायां दुरितस्य प्रतिबन्धकत्वसम्भवात् दुरितक्षयापेक्षा युक्तेति भावः। काम्यकर्मणां विद्यानुपकारकत्वमङ्गीकरोति—**नेति**। न च - काम्यानां नित्यानामिव दुरितक्षयफलकत्वमप्यस्तु, तथा च तेषामपि विद्यापेक्षितदुरितक्षयलक्षणोपकारजनकत्वं सम्भवतीति - वाच्यम्। तेषां दुरितक्षयफलकत्वे मानाभावेन विद्योपकारकत्वस्याक्लृप्तत्वादिति भावः। कर्मणां विद्यायां विनियोगविधेः क्लृप्तोपकारैर्नित्यकर्मभिरेव चारितार्थ्ये दृष्टान्तमाह—**तत्र यथेति**। यद्वा काम्यानां पापक्षयफलकत्वस्य अन्यतः प्राप्त्यभावेऽपि यज्ञादीनां विनियोगबलादेव तेषां तत् कल्प्यतामिति, नेत्याह—**तत्रेति**। काम्यकर्मणां विद्यापेक्षितोपकारहेतुत्वाक्लृप्तौ सत्यामित्यर्थः। **न नित्येति**। गौरवादिति भावः।

'आश्रमकर्मव्यतिरिक्तानामपि विनियोगः' इति पक्षं काम्यसाधारणं दर्शयति—**संक्षेपेति**। **अविशेषादिति**। यज्ञादिशब्दानां नित्ययज्ञादिष्विव काम्ययज्ञादिष्वपि रूढत्वाविशेषात् नित्यानामिव काम्यानामपि

प्रकृतौ क्लृप्तोपकाराणां पदार्थानां क्लृप्तप्राकृतोपकारातिदेशमुखेनैव विकृतिष्वतिदेशेन सम्बन्धः, न तु पदार्थानामतिदेशानन्तरमुपकारकल्पना, इति न तत्र प्राकृतोपकारातिरिक्तोपकारकल्पना-प्रसक्तिः। इह तु प्रत्यक्षश्रुत्या प्रथममेव विनियुक्तानां यज्ञादीनां उपदिष्टानामङ्गानामिव पश्चात् कल्पनीय उपकारः प्रथमावगतविनियोगनिर्वाहाय अक्लृप्तोऽपि सामान्यशब्दोपात्तसकलनित्यकाम्य-साधारणः कथं न कल्प्यः। अध्वरमीमांसकैरपि हि 'उपकारमुखेन पदार्थान्वय एव क्लृप्तोपका-रनियमः, पदार्थान्वयानन्तरम् उपकारकल्पने तु अक्लृप्तोऽपि विनियुक्तपदार्थानुगुण्येन उपकारः कल्पनीयः' इति सम्प्रतिपद्यैव बाधलक्षणारम्भसिद्ध्यर्थं उपकारमुखेन विकृतिषु प्राकृ-

---

विनियोगः श्रुत्या भातीति तत्साधारण एव कर्मणामुपकारः कल्प्यत इत्यर्थः। काम्यसाधारण्येन विद्योपयोग्युप-कारकल्पनं न सम्भवति, तत्कल्पने पूर्वतन्त्रन्यायविरोधात् - इति मत्वा विकृतिष्वतिदिष्टान्यङ्गानि दृष्टान्तत्वेन कल्पतरावुदाहृतानि, न तानि यज्ञादीनां दृष्टान्तत्वेनोदाहरणयोग्यानीत्याह—**प्रकृताविति**। दर्शपूर्णमा-सादिषु प्रकृतियागादिषु यः पदार्थानां क्लृप्त उपकारः तस्य प्रथममतिदेशः, तत्पृष्ठभावेन पदार्थानां विकृतिषु सौर्यपशुयागादिष्वतिदेशः, न तु प्राकृतपदार्थानामतिदेशेन विकृतिषु विनियोगानन्तरं पदार्थानामुपकारकल्पनं इति न तत्र क्लृप्तोपकारपरित्यागेन उपकारान्तरप्रसक्तिरस्तीत्यर्थः। एतदुक्तं भवति—प्रकृते यज्ञादीनां विनियो-गानन्तरमुपकारकल्पनम्, अतिदेशस्थले तु प्रकृतावुपकारकल्पनानन्तरं प्राकृतपदार्थानां विकृतिषु विनियोगः, ततो दृष्टान्तो विषमः—इति। **इह त्विति**। दार्ष्टान्तिके इत्यर्थः। प्रकृतानुगुणं दृष्टान्तमाह—**उपदिष्टानामिति**। दर्शपूर्णमासादिप्रकरणेष्वन्यत्र वा श्रुतानां पदार्थानां श्रुतिलिङ्गादिभिर्दर्शपूर्णमासादिषु विनियुक्तानां प्रथमावगतवि-नियोगनिर्वाहाय यथायोग्यं दृष्टादृष्टलक्षण उपकारः कल्प्यते यथा, तथा उपकारोऽत्रापि कल्प्य एव, न तु प्रथमावगतविनियोगपरित्याग उचितः, यज्ञाद्यविशेषश्रुतिबाधप्रसङ्गात् इत्यर्थः। **सामान्यशब्देति**। नित्यकाम्य-साधारणयज्ञादिशब्देत्यर्थः। यथा क्लृप्तोपकारातिरिक्तोपकाराकल्पनं कल्पतरुकारोक्तं मीमांसकसम्मतं, तथा प्रथमावगतविनियोगानुसारेणाक्लृप्तोपकारकल्पनमपि मीमांसकसम्मतमेवेत्याह—**अध्वरेति**। कर्ममीमांसकैर-पीत्यर्थः। अध्वरमीमांसकैरपि संप्रतिपद्यैव प्राकृतान्वयः समर्थित इति सम्बन्धः। **पदार्थान्वय एवेति**। पदार्थान्वयस्थल एवेत्यर्थः। क्लृप्तोपकारनियमः—क्लृप्तोपकारातिरिक्तोपकाराकल्पनमित्यर्थः। एवकारव्यावर्त्य-माह—**पदार्थान्वयानन्तरमिति**। **उपकारकल्पनेत्विति**। उपकारकल्पनस्थले त्वित्यर्थः। **संप्रतिपद्यैवेति**। स्वीकृत्यैवेत्यर्थः। **बाधलक्षणेति**। बाधाध्यायारम्भसिद्ध्यर्थमित्यर्थः। **प्राकृतान्वय इति**। प्रकृतियागादौ शेषभूता ये पदार्थाः तेषां विकृतियागादिष्वतिदेशेन प्राप्तिरित्यर्थः। एतदुक्तं भवति—पूर्वतन्त्रे दशमाध्याये विकृतावतिदिष्टानामङ्गानां प्रकृतौक्लृप्तस्योपकारस्यासम्भवे बाधो निरूप्यते। तच्च बाधनिरूपणं विकृतिष्वतिदेशेन पदार्थप्राप्त्यनन्तरमुपकारकल्पनपक्षे न सिद्ध्यति। प्रकृतौ श्रुत्यादिभिर्विनियुक्तपदार्थानां दृष्टोपकारासम्भवे अदृष्टोपकारकल्पनवत् विकृतिष्वप्यतिदेशेन विनियुक्तानां पदार्थानां दृष्टोपकारासम्भवे अदृष्टोपकारकल्पनया

तान्वयो दशमाद्ये समर्थितः । किं च क्लृप्तोपकारालाभात् नित्यानामेवायं विनियोग इत्यभ्युपगमे नित्येभ्यो दुरितक्षयस्य तस्माच्च ज्ञानोत्पत्तेः अन्यतः सिद्धौ व्यर्थोऽयं विनियोगः, अन्यतस्तदसिद्धौ ज्ञानापेक्षितोपकारजनकत्वं तेष्वक्लृप्तमिति अविशेषात् नित्यकाम्यसाधारणो विनियोगो दुर्वारः । ननु—नित्यानां दुरितक्षयमात्रहेतुत्वस्य अन्यतः सिद्धावपि विशिष्य ज्ञानोत्पत्तिप्रतिबन्धकदुरितनिबर्हकत्वं न सिद्धं, किं तु अस्मिन् विनियोगे सति ज्ञानोद्देशेन नित्यानुष्ठानात् अवश्यं

तत्सिद्धयर्थं सर्वेषामेवाङ्गानामनुष्ठानावश्यंभावेन केषाञ्चिदङ्गानामननुष्ठानतदंशातिदेशप्रामाण्यरूपबाधासम्भवात् । अतो बाधनिरूपणसिद्धयर्थं 'प्रकृतिक्लृप्तोपकारमुखेनैव प्राकृतानामन्वयो विकृतिषु' इति दशमाध्यायप्रथमाधिकरणे साधितम् । तथा च यत्र पदार्थानां विनियोगानन्तरमुपकारकल्पनं, तत्र तत्पदार्थसामर्थ्यानुसारेण प्रथमावगतविनियोगनिर्वाहाय अक्लृप्तोपकारकल्पनं मीमांसकसम्मतमिति प्रतीयते । यदि विनियोगानन्तरं उपकारकल्पनास्थलेऽपि क्लृप्तोपकारासम्भवे विनियुक्तपदार्थपरित्याग एव, न त्वक्लृप्तोपकारकल्पनं तत्सम्मतं भवेत्, तदा 'उपकारमुखेनैव पदार्थानामतिदेशः' इति निरूपणपरमधिकरणं व्यर्थं स्यात् । पदार्थानामेव श्रपणावघातादीनां अतिदेशेन विनियोगेऽपि विकृतिगतकृष्णलादिषु श्रपणादेः विक्लित्तितुषविमोकरूपदृष्टोपकारस्य लोकसिद्धस्याभावात् अक्लृप्तोपकारकल्पनानङ्गीकाराच्च श्रपणादेरननुष्ठानादिलक्षणबाधस्य दशमाध्याये निरूपणीयस्य सम्भवेन तदर्थं 'उपकारमुखेनैव पदार्थानामतिदेशः' इति निरूपणस्यानपेक्षितत्वात् । तस्मात् विविदिषावाक्येन अविशेषेण नित्यकाम्यसाधारणे विनियोगे प्रथममवगते सति तन्निर्वाहाय अक्लृप्तोपकारकल्पनं युक्तमेवेति । वस्तुतस्तु नित्यकर्मस्वपि विद्यापेक्षितोपकारजनकत्वक्लृप्तिरसिद्धेत्याह—**किञ्चेत्यादिना । अलाभादिति ।** काम्येष्विति शेषः । नित्यानां विद्यापेक्षितदुरितक्षयरूपलक्षणोपकारद्वारा विद्याहेतुत्वं विविदिषावाक्यादन्यतः सिद्धम्, असिद्धं वा ? तत्र नाद्यः, विविदिषावाक्यवैयर्थ्यप्रसङ्गात् - इत्याह—**नित्येभ्य इति । विनियोग इति ।** शेषत्वरूपविनियोगबोधकः शब्द इत्यर्थः । द्वितीये नित्येष्वपि विद्योपकारकत्वमक्लृप्तमेव कल्पनीयमिति नित्यकाम्यसाधारणोपकारकल्पनं युक्तमेवेत्याह—**अन्यतस्तदसिद्धाविति ।** नित्यानां विद्योपकारकत्वासिद्धावित्यर्थः । अन्यतः सिद्धिपक्षमवलम्ब्य विनियोगार्थवत्त्वं शङ्कते—**नन्विति ।** दुरितं तावद्द्विविधं–ज्ञानोत्पत्तिप्रतिबन्धकं, ज्ञानोत्पत्तिं प्रत्युदासीनं सत् नरकादिप्रदं च । तथा च नित्यानां ज्ञाने विनियोगाभावे 'नित्यकर्मभिर्ज्ञानप्रतिबन्धकदुरितस्यैव क्षयः' इत्यत्र नास्ति मानम् । 'धर्मेण पापमपनुदति' [म. ना. १७-६] 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' [भ.गी.१८-५] इत्यादिश्रुतिस्मृतिवचनानां नित्यानां दुरितसामान्यक्षयहेतुत्वबोधनमात्रपरत्वात् । अतो नियमेन ज्ञानप्रतिबन्धकदुरितक्षयहेतुत्वं नित्यकर्मणां अन्यतो न प्राप्तमिति तत्प्राप्त्यर्थोऽयं विनियोग इत्यर्थः । 'नित्यैरेव यज्ञादिभिःदुरितक्षयद्वारा ज्ञानं सम्पादयेत्' इति प्रकारेण विविदिषावाक्यी नित्यानां ज्ञाने विनियोगे सति वा कथं ज्ञानप्रतिबन्धकदुरितस्यैव क्षयो नित्यानुष्ठानतो लभ्यत इति पृच्छति—**किं त्विति ।** तल्लाभप्रकारमाह—**अस्मिन्निति । अवश्यमिति ।** नित्यानुष्ठानात् ज्ञानप्रतिबन्धकदुरितक्षये सति प्रतिबन्धकरहि-

ज्ञानं भवति, इतरथा शुद्धिमात्रं न नियता ज्ञानोत्पत्तिः, इति सार्थकोऽयं विनियोग इति चेत्, तर्हि नित्यानामपि अक्लृप्तमेव ज्ञानोत्पत्तिप्रतिबन्धकदुरितनिबर्हणं ज्ञानसाधनविशिष्टगुरुलाभश्रवणमनना-दिसम्पादकापूर्वं च द्वारं कल्पनीयमिति अक्लृप्तोपकारकल्पनाविशेषात् न सामान्यश्रुत्यापादितो नित्यकाम्यसाधारणो विनियोगो भञ्जनीय इति ।

विविदिषाद्वारकविद्यार्थकर्मसु अधिकारिविचारः ।

ननु-एवमपि कथं 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।' [भ. गी. ३-२०] इत्या-दिस्मरणनिर्वाहः । न च तस्य विद्यार्थकर्मानुष्ठानपरत्वम् । विविदिषावाक्ये ब्राह्मणग्रहणेन ब्राह्मणाना-

---

तमहावाक्यात् अवश्यं ज्ञानं भवतीत्यर्थः । **इतरथेति** । [1]एतद्विनियोगाभावे इत्यर्थः । दुरितसामान्यक्षयरूपा शुद्धिर्भवति, न तु नियमेन ज्ञानप्रतिबन्धकदुरितक्षयरूपशुद्धिविशेषो भवति । ज्ञानोद्देशेन नित्यानामननुष्ठानात् । तथा च बहुजन्मसु नित्यकर्मानुष्ठानशीलस्यापि नियमेन ज्ञानं न जायते, किं तु दैवयोगात् कदाचित् ज्ञानप्रति-बन्धकदुरितसङ्घस्य निश्शेषं क्षयसम्भवात् ज्ञानमपि कदाचित् भवतीति अनियता ज्ञानोत्पत्तिरित्यर्थः । 'ज्ञानापेक्षितोपकारो नित्येषु क्लृप्तः' इति मतं निरालम्बनमित्यभिप्रेत्य, काम्येष्विव नित्येष्वप्यक्लृप्तोपकार-कल्पनं तुल्यमिति दूषयति—**तर्हीति** । नित्येषु ज्ञानोपकारकत्वनियमासिद्धावित्यर्थः ।

नन्वेवमपि नित्यानामेव विनियोगपक्षे विधेर्लाघवमस्ति । तेषां, पक्षे ज्ञानप्रतिबन्धकदुरितनि-बर्हकत्वस्य वचनान्तरात् प्राप्तत्वेन, नियममात्रस्य विधिलभ्यत्वात् । काम्येषु तु ज्ञानप्रतिबन्धकदुरितनिबर्हकत्वं सर्वथा न प्राप्तमिति काम्यानामपि विनियोगपक्षे विधेस्तात्पर्यगौरवमपरिहार्यमिति—चेत्, सत्यम् । तथापि यज्ञादिश्रुतीनां सङ्कोचलक्षणबाधपरिहाराय काम्यानामपि विनियोग आवश्यक इत्यत्रैव तात्पर्यं बोध्यम् । नित्येभ्यो ज्ञानप्रतिबन्धकदुरितस्यैवक्षयरूपशुद्धिविशेषलाभेऽपि तावन्मात्रात् न ज्ञानोत्पत्तिरस्ति, प्रमाणप्रमेया-सम्भावनादिरूपदृष्टप्रतिबन्धकसत्त्वात्, अतः तन्निरासोपयोगिनामुत्कृष्टगुरुतदधीनश्रवणमननध्यानादीनां संपादका-दृष्टजनकत्वं नित्यानामक्लृप्तमेव विविदिषावाक्यीयविनियोगबलात् कल्पनीयमित्याह—**ज्ञानसाधनेति** ।

एवं विविदिषाद्वारा विद्यायां कर्मणां विनियोगं निरूप्य तेषु त्रैवर्णिकानामधिकार इति निरूपणार्थं आक्षेपव्याजेन प्रसङ्गं दर्शयति—**नन्वित्यादिना । एवमपीति** । 'तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने' इति ज्ञानकर्मसमुच्चयप्रतिपादकस्मरणस्य, विविदिषावाक्याविरोधेन 'ज्ञानं साक्षात् ब्रह्मप्राप्तिसाधनं कर्म च विद्याद्वारा तत्प्राप्तिसाधनं' इति क्रमसमुच्चयपरतया निर्वाहेऽपीत्यर्थः । अत्र अवधारणेन संसिद्धिशब्दितमुक्तिं प्रति कर्मातिरिक्तोपायनिषेधात् जनकाद्यनुष्ठितकर्मणो मुक्तिं प्रति साक्षादेवोपयोगः प्रतीयते, स च विविदिषावाक्य-विरुद्ध इति समुच्चयस्मरणवत् अस्य स्मरणस्य निर्वाहो न सिद्ध्यतीत्यर्थः । अस्यापि विविदिषावाक्याविरुद्धं सिद्धान्त्यभिमतमर्थमाशङ्क्य निषेधति—**न च तस्येति । विद्यार्थेति** । अस्मिन् स्मरणे संसिद्धिपदं

---

1. एतद्विनियोगाभावादित्यर्थः इति पाठान्तरम् ।

मेव विद्यार्थकर्मण्यधिकारप्रतीतेः। अतो जनकाद्यनुष्ठितकर्मणां साक्षादेव मुक्त्युपयोगो वक्तव्यः। मैवम्-विविदिषावाक्ये ब्राह्मणग्रहणस्य त्रैवर्णिकोपलक्षणत्वात्। यथाहुः अत्रभवन्तो वार्तिककाराः- 'ब्राह्मणग्रहणं चात्र द्विजानामुपलक्षणम्। अविशिष्टाधिकारत्वात् सर्वेषामात्मबोधने ॥' [४-४-१०२९] इति। न हि 'विद्याकामो यज्ञादीननुतिष्ठेत्' इति विपरिणमिते विद्याकामाधिकारविधौ ब्राह्मणपदस्याधिकारिविशेषसमर्पकत्वं युज्यते। उद्देश्यविशेषणायोगात्। नापि-'राजा स्वाराज्यकामो राजसूयेन यजेत' इति स्वाराज्यकामाधिकारे राजसूयविधौ 'स्वाराज्यकामो राजकर्तृकेण राजसूयेन यजेत' इति कर्तृतया यागविशेषणत्वेन विधेयस्य राज्ञः, राजकर्तृकराजसूयस्य

विद्यापरम्। तथा च शुद्धिद्वारा कर्मणैव विद्यां प्राप्ता इति स्मरणार्थ इति भावः। तस्य स्मरणस्य विद्यार्थकर्मानुष्ठानपरत्वं न चेत्यत्र हेतुमाह—**विविदिषावाक्य इति। अत इति।** विविदिषावाक्यबोध्ये विद्यासाधनकर्मणि त्रैवर्णिकानामनधिकारादित्यर्थः। **उपलक्षणत्वादिति।** तथा च भाष्यं—ब्राह्मणग्रहणमुपलक्षणार्थं, अविशिष्टो ह्यधिकारस्त्रयाणां वर्णानाम्' बृ. उ. ४-४ इति। तथा च विद्यार्थकर्मसु जनकादीनामप्यधिकारसत्त्वात् 'कर्मणैव हि' इति स्मरणं विद्यार्थकर्मानुष्ठानपरमेवेति न तद्बलात् 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः' इत्यादिश्रुतिविरुद्धः साक्षादेव कर्मणां मुक्त्युपयोगो वक्तव्य इति भावः। **अत्रभवन्त इति।** पूज्या इत्यर्थः। **आत्मबोधन इति।** आत्मबोधसाधनयज्ञादिकर्मणीत्यर्थः, विद्यार्थकर्माधिकारस्यैव प्रकृतत्वात् इति मन्तव्यम्। ननु-विविदिषावाक्ये ब्राह्मणपदस्य त्रैवर्णिकोपलक्षणत्वे सिद्धे त्रयाणां वर्णानामविशेषेण विद्यार्थकर्मस्वधिकारस्सिद्ध्यति, तत्र सर्वेषामविशिष्टाधिकारत्वे सिद्धे तदनुरोधेन ब्राह्मणग्रहणस्योपलक्षणत्वं सिद्ध्यतीति परस्पराश्रयत्वप्रसङ्गः-इति चेत्, न—ब्राह्मणग्रहणस्य द्विजोपलक्षणत्वमनुपजीव्यैव सर्वेषां द्विजानां विद्यार्थकर्मस्वधिकारसिद्धेः वार्तिकवचने विवक्षितत्वात्। ननु विविदिषावाक्ये ब्राह्मणग्रहणेन ब्राह्मणस्यैव विद्यार्थकर्मस्वधिकारे प्रतीयमाने कथं वर्णत्रयसाधारणाधिकारस्सिद्ध्येदिति चेत्, तत्र वक्तव्यं—किं ब्राह्मणपदस्य यज्ञादिविधौ उद्देश्यविशेषणसमर्पकतया ब्राह्मणमात्राधिकारप्रापकत्वं, किं वा विधेयकर्तृसमर्पकतया तन्मात्राधिकारप्रापकत्वं, तदुभयसमर्पकत्वाभावेऽपि स्वसन्निधिमात्रेण वा तन्मात्राधिकारप्रापकत्वम्?, गत्यन्तराभावात्। तत्र नाद्य इत्याह—**न हीति।** यज्ञादीनां विद्यालक्षणफले विनियोगपरे विधौ विद्याकामस्याधिकारस्सिद्ध एव। तथा च ब्राह्मण्यविशिष्टस्य विद्याकामस्याधिकारो विवक्षित इति स्वीकृत्य ब्राह्मणपदस्य अधिकारिविशेषणसमर्पकत्वं वक्तुं न शक्यते। विधेययज्ञादिनिरूपितोद्देश्यताया विद्याकाममात्रे पर्यवसानसम्भवेन ब्राह्मण्यरूपविशेषणस्यानाकाङ्क्षिततया विद्याकामं प्रति विशेषणत्वेनान्वयायोगात्, विशिष्टस्योद्देश्यत्वकल्पने गौरवाच्च, विद्याकामब्राह्मण्ययोः प्रत्येकमुद्देश्यत्वे च वाक्यभेदप्रसङ्गात्-विद्याकामो यज्ञादीननुतिष्ठेत्, ब्राह्मणो यज्ञादीननुतिष्ठेदिति-इति भावः। द्वितीयं सदृष्टान्तमाशङ्क्य निराकरोति—**नापीति।** स्वाराज्यकामवाक्ये राजपदस्य पूर्वोक्तरीत्या स्वाराज्यकामं प्रति विशेषणत्वायोगात् कर्तृविधायकत्वं स्वीकृत्य राजसूये राज्ञस्सतस्स्वाराज्यकामस्याधिकारः साधित इत्यर्थः। राज्ञोऽर्थादधिकारिकोटिनिवेशवदिति सम्बन्धः। अर्थादितिपदोक्तामर्थापत्तिं स्फुटयति—**राजकर्तृकेति। इहेति।** विविदि-

अराज्ञा सम्पादयितुमशक्यत्वात् अर्थादधिकारिकोटिनिवेशवत्, इह यज्ञादिकर्तृतया विधेयस्य ब्राह्मणस्य अर्थादधिकारिकोटिनिवेश इति युज्यते। 'सर्वथाऽपि त एवोभयलिङ्गात्' [ब्र. सू. ३-४-३४] इति सूत्रे, अन्यत्र विहितानामेव यज्ञादीनां विविदिषावाक्ये फलविशेषसम्बन्धविधिः नापूर्वयज्ञादिविधिरिति व्यवस्थापितत्वेन, प्राप्तयज्ञाद्यनुवादेन एकस्मिन् वाक्ये कर्तृरूपगुणविधिः फलसम्बन्धविधिश्च इत्युभयविधानाद्वाक्यभेदापत्तेः। नापि-राजसूयवाक्ये राज्ञः कर्तृतया विधेयत्वाभावपक्षे राजपदसमभिव्याहारमात्राद्विशिष्टकर्तृकत्वलाभवत्, इह वाक्याभेदाय कर्तृतया ब्राह्मणाविधानेऽपि ब्राह्मणपदसमभिव्याहारमात्रेण ब्राह्मणकर्तृकत्वलाभात्, तदधिकारपर्यवसानमित्युपपद्यते। अन्यत्र त्रैवर्णिकाधिकारिकत्वेन क्लृप्तानां इहापि त्रैवर्णिकाधिकारात्मविद्यार्थत्वेन विधीयमानानां यज्ञादीनां त्रैवर्णिकाधिकारत्वस्य युक्ततया विधिसंसर्गहीनब्राह्मणपदसमभिव्याहारमात्रादधिकारसंकोचासम्भवेन

षावाक्ये इत्यर्थः। **विधेयस्येति**। 'विद्याकामो ब्राह्मणकर्तृकयज्ञादीननुतिष्ठेत्' इत्येवंविधेयस्येत्यर्थः। **अर्थादिति**। ब्राह्मणकर्तृकयज्ञादेरब्राह्मणेन सम्पादयितुमशक्यत्वादित्यर्थः। 'अर्थादधिकारिकोटिनिवेश इत्यपि न युज्यते' इत्यत्र दृष्टान्तवैषम्यमभिप्रेत्य हेतुमाह—**सर्वथापीत्यादिना**। यज्ञादीनामाश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च यावज्जीवादिवाक्येषु येऽग्निहोत्रादयो धर्मा विहिताः त एवानुष्ठेयाः। कुतः। श्रुतिस्मृतिरूपोभयलिङ्गात्। श्रुतिस्तावद्विविदिषावाक्यगतयज्ञादिश्रुतिरेव। तया प्रसिद्धयज्ञादीनां प्रसिद्धदानादीनां च प्रत्यभिज्ञायमानत्वात्, अपूर्वयज्ञादिविधायकत्वे प्रत्यभिज्ञाविरोधात्, प्रसिद्धयज्ञाद्यनुवादेन फलसम्बन्धमात्रबोधने लाघवाच्च, यज्ञादीनां सुबन्तयज्ञादिपदोपात्तत्वेन अत्र विधेयत्वाप्रतीतेश्च। स्मृतिश्च 'अनाश्रितः कर्मफलम्' इत्याद्या प्रसिद्धयज्ञादीनामेव फलाभिसन्धिं विना अनुष्ठितानां विद्याहेतुत्वं दर्शयति—इति सूत्रार्थः। **अन्यत्रेति**। विविदिषावाक्यादन्यत्र कर्मकाण्डे इत्यर्थः। **उभयविधानादिति**। राजसूयवाक्ये तु कर्त्रादिगुणविशिष्टस्य अपूर्वकर्मण एव विध्युपगमात् न वाक्यभेदप्रसक्तिरिति तत्र राजपदस्य कर्तृरूपगुणविधायकत्वं युक्तमिति भावः। तृतीयमपि सदृष्टान्तमाशङ्क्य निराकरोति—**नापीति**। **राज्ञ इति**। राज्ञः कर्तृतया विधेयत्वाभावेऽपि राज्ञ एव राजसूयाधिकारस्सिद्ध्यति, राजपदसन्निधानेन स्वाराज्यकामपदस्य क्षत्रियपरत्वावगमात्, अन्यथा राजपदवैयर्थ्यप्रसङ्गात् - इति तात्पर्येण येषां मते राज्ञः कर्तृतया विधिर्नाभ्युपगम्यते, तेषां पक्षे इत्यर्थः। 'ब्राह्मणाधिकारपर्यवसानम्' इत्यपि नोपपद्यते - इत्यत्र हेतुमाह—**अन्यत्रेति**। कर्मकाण्डे इत्यर्थः। **इहापीति**। विविदिषावाक्येऽपीत्यर्थः। **त्रैवर्णिकाधिकारात्मविद्येति**। ब्राह्मणस्येव क्षत्रियवैश्ययोरपि विद्यायामर्थित्वलक्षणाधिकाराविशेषात् शूद्रस्येव विद्यार्थयज्ञादिषु तयोः प्रतिषेधाभावाच्च इत्यर्थः। **युक्ततयेति**। अधिकारिणामसङ्कोचस्य विधिगतानुष्ठापकत्वलक्षणप्रामाण्योपपादकत्वादिति भावः। अन्यत्रक्लृप्तत्वाद्युपपत्तित्रयप्राप्तस्यापि क्षत्रियवैश्ययोरधिकारस्य ब्राह्मणपदमपवादकमित्याशङ्क्याह—**विधिसंसर्गहीनेति**। उद्देश्यसमर्पकतया विधेयसमर्पकतया वा विधिवाक्यार्थान्वयबोधानुपयोगीत्यर्थः। राजसूयवाक्ये तु राजसूयस्य अत्रैव विधेयत्वेन त्रैवर्णिकाधिकारत्वेनान्यत्राक्लृप्तत्वात् युक्तं

ब्राह्मणपदस्य यथाप्राप्तविद्याधिकारिमात्रोपलक्षणत्वौचित्यात् ।

ननु विद्याधिकारिमात्रोपलक्षणत्वे शूद्रस्यापि विद्यायामर्थित्वादिसम्भवेन तस्यापि विद्यार्थ-कर्माधिकारप्रसङ्ग इति चेत्, न—'अध्ययनगृहीतस्वाध्यायजन्यतदर्थज्ञानवत एव वैदिकेष्वधिकारः' इत्यपशूद्राधिकरणे अध्ययनवेदवाक्यश्रवणादिविधुरस्य शूद्रस्य विद्याधिकारनिषेधात्, 'न शूद्राय मतिं दद्यात्' [म. नु. ४-८०] इति स्मृतेः आपाततोऽपि तस्य विद्यामहिमावगत्युपायासम्भवेन तदर्थित्वानुपपत्तेश्च, तस्य विद्यायामनधिकारादिति केचित् ।

अन्ये त्वाहुः—शूद्रस्याप्यस्त्येव विद्यार्थकर्माधिकारः, तस्य वेदानुवचनाग्निहोत्राद्यसम्भवेऽपि कण्ठोक्तसर्ववर्णाधिकारश्रीपञ्चाक्षरमन्त्रराजविद्यादिजपपापक्षयहेतुतपोदानपाकयज्ञादिसम्भवात्

विधिसंसर्गहीनराजपदसमभिव्याहारमात्रात् राजकर्तृनियम इति भावः । ननूक्तन्यायेन ब्राह्मणपदाभावेऽपि क्षत्रियवैश्ययोरिव ब्राह्मणस्यापि विद्यार्थकर्मस्वधिकारसिद्धेः ब्राह्मणग्रहणं व्यर्थमेव स्यादिति चेत्, न—विद्यार्थकर्मसु ब्राह्मणस्य मुख्याधिकारज्ञापनार्थतोपपत्तेर्वैयर्थ्यानवकाशादिति भावः ।

ब्राह्मणग्रहणस्योपलक्षणत्वपक्षेऽतिप्रसङ्गं शङ्कते—**नन्विति** । अविधेयायां हि विद्यायामधिकारो नाम विद्यार्थित्वमात्रम्, तच्च शूद्रस्यापि सम्भवतीति क्षत्रियादेरिव तस्यापि विद्यार्थकर्मस्वधिकारो दुर्निवार इत्यर्थः । शूद्रस्य श्रुत्युक्तसगुणब्रह्मविद्यासु निर्गुणब्रह्मविद्यासाधनवेदान्तश्रवणादिषु चाधिकारमाशङ्क्य नास्त्यधिकार इति निर्णीतमपशूद्राधिकरणे । तस्याधिकाराभावे च भाष्ये हेतुरुपन्यस्तो वेदाध्ययनाभावादिति । 'शूद्रस्य वेदोच्चारण-श्रवणधारणानां निषेधेन वेदाध्ययनाभावेऽपि वेदार्थभूतोपासनाद्यनुष्ठानं किं न स्यात्' इत्याशङ्क्य, 'अध्ययनविधिना वेदजन्यवेदार्थज्ञानस्य वेदार्थानुष्ठानेषु नियमितत्वात् अध्ययनशून्यस्य तदभावात् न सगुणनिर्गुणविद्यानुष्ठानेष्वधि-कारः' इत्युक्तम् । तथा च तुल्यतया विद्यार्थकर्मस्वप्यधिकारो नास्तीत्यर्थः । ननु 'शूद्रस्य वेदोक्तयज्ञादिष्वधिकारा-भावेऽपि वक्ष्यमाणरीत्या तस्य विद्यासाधनकर्मणां सम्भवात् विद्याकामनया शूद्रस्यापि तेषामनुष्ठानं सम्भवतीत्या-शङ्क्य, तस्य विद्याकामनैव न सम्भवतीत्याह—**न शूद्रायेति** । मतिं - शास्त्रार्थज्ञानं, विद्यायाः महिमा - निरति-शयानन्दरूपब्रह्मप्राप्तिसाधनत्वम् ।

'शूद्रस्यापि विद्यार्थकर्माधिकारप्रसङ्गः' इत्यत्र इष्टापत्तिरित्याह—**अन्ये त्विति** । कण्ठत उक्तस्सर्ववर्णाधिकारो यस्मिन् तादृशविद्यादिजपे स तथोक्तः । श्रीमत्पञ्चाक्षरमेव मन्त्रराजविद्या । आदिपदं च आगमिकपौराणिकमन्त्रान्तरसङ्ग्रहार्थम् । तथा च ब्रह्मोत्तरखण्डे—'किं तस्य बहुभिर्मन्त्रैः किं तीर्थैः किं तपोऽध्वरैः । यस्योन्नमश्शिवायेति मन्त्रो हृदयगोचरः । मन्त्राधिराजराजो यःसर्ववेदान्तशेखरः । सर्वज्ञाननिधानं च सोऽयं शैवषडक्षरः ॥ प्रणवेन विना मन्त्रः सोऽयं पञ्चाक्षरः स्मृतः । स्त्रीभिश्शूद्रैश्च सङ्कीर्णैर्ध्यायते मुक्तिकाङ्क्षिभिः ॥' इति । पाकयज्ञादीत्यादिपदं द्विजशुश्रूषानामकीर्तनतीर्थस्नानादिसङ्ग्र-हार्थम् । ननु—विविदिषावाक्ये शूद्रसाधारणवर्णधर्माणामुपलक्षणेऽपि यज्ञादीनामेकवाक्योपादानात् तेषां समुच्च-यस्य विद्यासाधनत्वं भाति, यज्ञादिसमुच्चयश्च शूद्रे बाधित इति कथं तस्य विद्यार्थकर्माधिकारः, इत्याशङ्क्य

'वेदानुवचनेन यज्ञेन दानेन' इत्यादिपृथक्कारकविभक्तिश्रुतेः विधुरादीनां विद्यार्थजपदानादिमात्रानुष्ठानानुमतेश्च वेदानुवचनादिसमुच्चयानपेक्षणात्। न च शूद्रस्य विद्यायामर्थित्वासम्भवः। 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः।' इति इतिहासपुराणश्रवणे चातुर्वर्ण्याधिकारस्मरणेन पुराणाद्यवगतविद्यामाहात्म्यस्य तस्यापि तदर्थित्वसम्भवात्। 'न शूद्राय मतिं दद्यात्' इति स्मृतेश्च तदनुष्ठानानुपयोग्यग्निहोत्रादिकर्मज्ञानदाननिषेधपरत्वात्। अन्यथा तस्य स्ववर्णधर्मस्याप्यवगत्युपायासम्भवेन 'शूद्रश्चतुर्थो वर्ण एकजातिः' 'तस्यापि सत्यमक्रोधश्शौचम्' 'आचमनार्थे पाणिपादप्रक्षालनमेवैके' 'श्राद्धकर्म' 'भृत्यभरणम्' 'स्वदारतुष्टिः' 'परिचर्या चोत्तरेषाम्' [गौ. ध. सू. २.१.५१-५७] इत्यादितद्धर्मविभाजकवचनानामननुष्ठानलक्षणाप्रामाण्यापत्तेः। न चैवंसति अपशूद्राधिकरणस्य निर्विषयत्वम्। तस्य 'न शूद्रे पातकं किंचित् न च संस्कारमर्हति' [मनु १०-१२६] इत्यादि-

---

हेत्वसिद्ध्या दूषयति—**वेदानुवचनेनेति**। 'वेदानुवचनेन विविदिषन्ति' 'यज्ञेन विविदिषन्ति' इत्यादिरूपेण प्रत्येकं साधनत्वप्रतीतेर्न समुच्चयापेक्षा। तद्विवक्षायां हि 'वेदानुवचनयज्ञदानतपोभिर्विविदिषन्ति' इति वाक्यं स्यात्। पृथक्करणविभक्तिश्रवणेऽपि 'वेदानुवचनेन च यज्ञेन च दानेन च तपसा च' इति प्रतिपदार्थं चकारयुक्तं वा वाक्यं स्यात् 'यदग्नये च प्रजापतये च' इत्यादिवदिति भावः। यत्तु - आपाततोऽपि विद्यामहिमावगत्युपायासम्भवेन विद्यायामर्थित्वलक्षणाधिकारानुपपत्तिरिति, तदनूद्य निराकरोति—**न च शूद्रस्येति**। **श्रावयेदिति**। ब्राह्मण इति शेषः। यदा क्षत्रियादीन् श्रावयेत् तदा विशेषमाह—**कृत्वेति**। पुराणादिभिस्साधनभूतैरवगतं विद्यामाहात्म्यं येन शूद्रेण स तथा, तस्येत्यर्थः। मतिनिषेधवचनस्य सङ्कोचं दर्शयति—**न शूद्रायेति**। **अन्यथेति**। शास्त्रार्थज्ञानमात्रदाननिषेधपरत्वे इत्यर्थः। शूद्रस्य स्वतः पुराणादिपठननिषेधात् अन्येभ्योऽपि पुराणादिश्रवणाभावे स्वधर्मावगतिः न सम्भवतीत्यर्थः। इष्टापत्तिमाशङ्क्याह—**शूद्रश्चतुर्थो वर्ण इत्यादिना**। जातिः जन्म, उपनयनाख्यद्वितीयजन्मशून्य इत्यर्थः। **प्रक्षालनमेवेति**। न त्वपां प्राशनं अङ्गस्पर्शनादिकं च-इत्येवकारार्थः। **उत्तरेषामिति**। द्विजानामित्यर्थः। 'न शूद्राय मतिं दद्यात्' इति स्मृतेः शास्त्रार्थज्ञानमात्रदाननिषेधपरत्वेऽपि 'वृद्धौ च मातापितरौ भार्या साध्वी सुतश्शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥' [मनु. ११-१०] इत्यादिवचनदर्शनेन ये ब्राह्मणाः उक्तलक्षणमात्रादिसंरक्षणोपयोग्यर्थलाभाय शूद्रान् प्रति पुराणादिपठने प्रवर्तन्ते तेभ्यो विद्यामाहात्म्यस्वधर्मयोरवगतिसम्भवात् न काप्यनुपपत्तिरिति मन्तव्यम्। **न चैवमिति**। शूद्रस्यापि विद्यार्थकर्माधिकारस्वीकारे इत्यर्थः। **निर्विषयत्वमिति**। तदधिकरणस्य शूद्राधिकारनिषेधपरत्वादिति भावः। सत्यं तदधिकरणं शूद्राधिकारनिषेधपरं, किं तु विद्यार्थकर्माधिकारनिषेधपरं न भवति, वेदान्तश्रवणाद्यधिकारनिषेधपरत्वात्तस्य-इति परिहरति—**तस्य न शूद्र इत्यादिना**। वेदान्तश्रवणसगुणोपासनेषु अधिकाराभावे हेतुगर्भं विशेषणमाह—**गुरूपसदनाख्येति**। शूद्रस्य संस्कारशून्यत्वे मानमाह—**न शूद्र इति**। **पातकमिति**। अभक्ष्यभक्षणादिकृतमित्यर्थः। संस्कारो द्विविधः—अध्यय-

स्मृतेःगुरूपसदनाख्यविद्याङ्गोपनयनसंस्कारविधुरस्य शूद्रस्य सगुणविद्यासु निर्गुणविद्यासाधनवेदान्तश्रवणादिषु च अधिकारनिषेधपरत्वात्, निर्गुणविद्यायां शूद्रस्यापि विषयसौन्दर्यप्रयुक्तार्थित्वस्य निषेद्धुमशक्यत्वात्, अविधेयायां च तस्यां तदतिरिक्ताधिकाराप्रसक्त्या तन्निषेधायोगाच्च। न च तस्य वेदान्तश्रवणासम्भवे विद्यार्थकर्मानुष्ठानसम्भवेऽपि विद्यानुत्पत्तेः तस्य तदर्थकर्मानुष्ठानं व्यर्थमिति वाच्यम्। तस्य वेदान्तश्रवणाधिकाराभावेऽपि भगवत्पादैः-'श्रावयेच्चतुरोवर्णान्' इति चेतिहासपुराणाधिगमे चातुर्वर्ण्याधिकारस्मरणात् वेदपूर्वस्तु नास्त्यधिकारः शूद्राणामिति स्थितम्'-इति अपशूद्राधिकरणोपसंहारभाष्ये ब्रह्मात्मैक्यपरपुराणादिश्रवणे विद्यासाधनेऽधिकारस्य दर्शितत्वात्; विद्योत्पत्तियोग्यविमलदेवशरीरनिष्पादनद्वारा मुक्त्यर्थं भविष्यतीति त्रैवर्णिकानां क्रममुक्तिफलकस-

---

नाङ्गोपनयनलक्षणः, विद्याङ्गोपनयनलक्षणश्च। द्विविधमपि संस्कारं निषेधति—**न च संस्कारमर्हतीति**। शिष्यत्वेन स्वीकृत्य समीपे स्थापनरूपं विद्याङ्गोपनयनं आचार्यकर्तृकं, तच्च शिष्यकर्तृकगुरूपसदनपूर्वकत्वात् गुरूपसदनाख्येत्युक्तम्। गुरूपसदनं च 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' [मु. उ. १-२-१२] इत्यादिना विद्याङ्गत्वेन विहितम्। तथा 'तं होपनिन्ये' इत्यादिश्रुत्या विद्याङ्गत्वेनोपनयनं च प्रतीयत इति भावः। तं-विद्यार्थिनं गुरुरुपनीतवानिति श्रुत्यर्थः। ननु-श्रुत्युक्तसगुणोपासनेष्विव निर्गुणविद्यासाधनवेदान्तश्रवणादिष्विव च निर्गुणविद्यायामप्यधिकारनिषेधपरमपशूद्राधिकरणं किं न स्यात्, विनिगमकाभावात्। तथा च निर्गुणविद्यायामधिकाराभावे तत्साधनकर्मसु शूद्रस्याधिकारो न सिद्ध्येत्, इत्यत आह—**निर्गुणविद्यायामिति**। ब्रह्मविद्यालक्षणस्य विषयस्य सौन्दर्यं मुक्तिसाधनत्वम्, तज्ज्ञानप्रयुक्तस्य विद्यायामर्थित्वलक्षणाधिकारस्य तदधिकरणन्यायेन निषेद्धुमशक्यत्वादित्यर्थः। ननु-शूद्रस्य विद्यायामर्थित्वलक्षणाधिकारसत्त्वेऽपि तदतिरिक्तस्याधीतवेदत्वादिरूपविशेषणान्तरस्याभावात् कथं तस्याधिकारो विद्यायां, इत्यत आह—**अविधेयायामिति**। चशब्दः शङ्कानिरासार्थः। **तदतिरिक्तेति**। अर्थित्वातिरिक्तेत्यर्थः। स्वर्गानुभववत् ब्रह्मानन्दानुभवरूपाया निर्गुणविद्यायाः फलरूपत्वादविधेयत्वम्। फलस्याविधेयत्वात्। तथा च यथा स्वर्गानुभवादौ फले तदर्थित्वमात्रमधिकारः, तथा निर्गुणविद्यायामपि तदर्थित्वमात्रमेवाधिकारः, स च निषेद्धुमशक्यः, विधेयेष्वेवोपासनादिषु पूर्वोक्ताधिकारिविशेषणान्तरापेक्षा शास्त्रे निरूपितेति विषमो दृष्टान्त इति भावः। **असम्भव इति**। अपशूद्राधिकरणन्यायेन तदसम्भवे सतीत्यर्थः। तस्य वेदान्तश्रवणाभावेऽपि ब्रह्मात्मैक्यपरपुराणादिश्रवणे अधिकारस्य भाष्ये दर्शितत्वात् शूद्रस्यापि सम्भवति विद्योत्पत्तिरित्यर्थः। भाष्ये तुशब्दोऽवधारणार्थः। 'श्रावयेच्चतुरो वर्णान्' इतिवचनेन शूद्रस्य पुराणादिश्रवणाभ्यनुज्ञानेऽपि मनननिदिध्यासनयोरभ्यनुज्ञानाभावात् न मननाद्यनुष्ठानं तस्य सिद्ध्यति। न च मननादेः श्रवणाङ्गत्वात् न पृथगभ्यनुज्ञानापेक्षेति वाच्यम्। प्रयाजदर्शपूर्णमासादेरिव प्रकृते शेषशेषिभावबोधकप्रमाणाभावेन श्रवणादिष्वङ्गाङ्गिभावव्यवहारस्य गौणत्वात्। तथा च शूद्रस्याद्वैतपरपुराणादिभागश्रवणे कृतेऽपि विद्योदयासम्भवात् विद्यार्थकर्मानुष्ठानवैयर्थ्यं तदवस्थमेव - इत्यस्वरसादाह—**विद्योत्पत्तियोग्येति**। यद्वा 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'

गुणविद्यार्थकर्मानुष्ठानवत् वेदान्तश्रवणयोग्यत्रैवर्णिकशरीरनिष्पादनद्वारा विद्योत्पत्त्यर्थत्वं भविष्यतीति शूद्रस्य विद्यार्थकर्मानुष्ठानाविरोधाच्च। तस्मात् विविदिषावाक्ये ब्राह्मणपदस्य यथाप्राप्तविद्याधिकारिमात्रविषयत्वेन शूद्रस्यापि विद्यार्थकर्माधिकारः सिद्ध्यत्येवेति।

सन्न्यासस्य विद्योपयोगित्वनिरूपणम्

नन्वस्तु कर्मणां चित्तशुद्धिद्वारा विद्योपयोगः, सन्न्यासस्य किंद्वारा तदुपयोगः?

[1]केचिदाहुः—विद्योत्पत्तिप्रतिबन्धकदुरितानामनन्तत्वात् किञ्चित् यज्ञाद्यनुष्ठाननिवर्त्यं

[म. भा-१-१-२६७] इतिवचनात् इतिहासादिगतब्रह्मात्मैक्यपरभागस्य वेदान्तश्रवणजनितवेदान्तार्थज्ञानोपकारकत्वमात्रमेव, न तु वेदान्तश्रवणमनपेक्ष्य स्वातन्त्र्येण ब्रह्मात्मैक्यज्ञानजनकत्वं-इति निश्चीयते। तथासत्येव तद्वचनपूर्वार्धं सङ्गच्छते—'बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति' इति। अयमर्थः—अल्पं वेदमात्रं श्रुतं—विचारितं येन पुरुषेण सोऽल्पश्रुतः। तस्मात् पुरुषात् तेन श्रुतो वेदो बिभेति। कथं बिभेति, तत्राह—मामिति। अयं - अल्पश्रुतः पुरुषः मां-श्रुतं वेदं प्रतरेत् - मद्विचाररूपायां मीमांसायां न्यायाभासत्वादिशङ्कया मामप्यर्थान्तरपरं सम्भावयेत्। इतिशब्दो हेत्वर्थः। एवं प्रतारणसम्भवाद्धेतोः इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्-इतिहासपुराणवचनैः मीमांसानुसारिभिः तस्या दृढन्यायत्वनिश्चयसंपादनद्वारा मीमांसानिर्णीतार्थ एव वेदं स्थापयेत् इति। तथा च शूद्रस्य वेदान्तश्रवणरहितस्य वेदान्तार्थोपबृंहणरूपब्रह्मात्मैक्यपरेतिहासादिश्रवणे प्रवृत्तावपि नास्ति विद्योदयः। 'श्रावयेच्चतुरो वर्णान्' इति वचनमपि शूद्रस्य अद्वैतपरपुराणादिश्रवणांशे अदृष्टार्थमभ्यनुज्ञापरम्। अपशूद्राधिकरणभाष्येऽपि शूद्रस्य अद्वैतपुराणादिश्रवणाधिकारवर्णनं, बिभेत्यल्पश्रुतादितिवचनं [2]नास्तीतिकृत्वा कृतमिति, न भाष्यविरोधोऽपि। तथा च वेदान्तश्रवणैकसाध्या विद्या तदभावे शूद्रस्य न सिद्ध्येदेव-इत्यस्वरसादाह—**विद्योत्पत्तियोग्येति। मुक्त्यर्थमिति।** सगुणब्रह्मोपासनमिति शेषः। **विद्योत्पत्त्यर्थत्वमिति।** शूद्रस्य 'मदनुष्ठितधर्माणां विद्योत्पत्त्यर्थत्वं भविष्यति' इति निश्चयेन तदनुष्ठानसम्भवादित्यर्थः। **तस्मादिति।** शूद्रस्य विद्यार्थकर्मानुष्ठाने बाधकाभावादित्यर्थः। **विद्याधिकारिमात्रेति।** न तु ब्राह्मणपदस्य ब्राह्मणमात्रपरत्वं न वा त्रैवर्णिकमात्रपरत्वमिति मात्रशब्दार्थः। ब्राह्मणपदस्य द्विजोपलक्षणत्वे वार्तिकवचने यो हेतुरुक्तः 'त्रयाणामात्मबोधसाधनकर्मस्वधिकाराविशेषात्' इति, तस्य हेतोः शूद्रसाधारणत्वादिति भावः।

किंद्वारेति। किमदृष्टद्वारा विद्योपयोगः, किं वा दृष्टद्वारा। नाद्यः, विद्योत्पत्तिप्रतिबन्धकदुरितस्य यज्ञाद्यनुष्ठानजनितापूर्वेणैव निवर्तितत्वेन सन्न्यासजनितापूर्वनिवर्त्यदुरितालाभे सति सन्न्यासवैयर्थ्यप्रसङ्गात्। न द्वितीयः, तदनुपलम्भात्—इत्याक्षेपाभिप्रायः।

तत्राद्यं पक्षं समर्थयते—**केचिदाहुरिति।** ननु - सन्न्यासापूर्वस्य न विद्योदयहेतुत्वम्, असन्न्या-

---

1. केचित्—वेदान्तकौमुदीकाराः, आश्रमस्वामिनश्च।

2. नास्तीतिकृत्वाकृतमिति। उक्तवचनाभावमभ्युपेत्य कृतमित्यर्थः। अन्यादृशस्य नास्तित्वकरणस्यासम्भवात्। महाभारते उक्तवचनस्य स्पष्टं दर्शनात्। दृश्यन्ते हि कृत्वाचिन्तारूपा विचाराः शास्त्रेषु।

अदृष्टकल्पनायोगात्। यदि त्वनलसस्य धीमतः पुरुषधौरेयस्य आश्रमान्तरस्थस्यापि कर्मच्छिद्रेषु श्रवणादि सम्पद्यते, तदा चतुर्ष्वाश्रमेषु सन्न्यासाश्रमपरिग्रहेणैव श्रवणादि निर्वर्तनीयमिति नियमोऽभ्युपेयः—इति[1]।

ननु अस्मिन् पक्षद्वये क्षत्रियवैश्ययोः कथं वेदान्तश्रवणाद्यनुष्ठानम्? सन्न्यासस्य ब्राह्मणाधिकारिकत्वात्, 'ब्राह्मणो निर्वेदमायात्' 'ब्राह्मणो व्युत्थाय' 'ब्राह्मणः प्रव्रजेत्' इति

विधानेन चारितार्थ्यसम्भवे अदृष्टद्वारा विद्यासाधनसन्न्यासविधायकत्वासम्भवात्। तथा च पूर्ववत् सन्न्यासस्य श्रवणाद्यङ्गतयैव विद्याफलकत्वं न त्वदृष्टद्वारेति सिद्धमिति। [2]अस्मिन् व्याख्याने 'अनन्यव्यापारतया' इत्यस्य विक्षेपनिवृत्तिद्वारा इत्यर्थो विवक्षितः। **तस्येति।** सन्न्यासस्येत्यर्थः। ननु—सन्न्यासस्य विक्षेपनिवृत्तिद्वारा श्रवणाद्यङ्गभावमापन्नस्य विद्यासाधनत्वमुक्तमनुपपन्नम्, सन्न्यासं विनाऽपि विक्षेपनिवृत्तेः केषुचित् श्रवणाधिकारिषु सम्भवात्—इति शङ्कते—**यदि त्विति। अनलसस्येति।** सत्त्वगुणप्रधानस्येति यावत्। **धीमत इति।** विषयेषु दोषदर्शनशीलस्येति यावत्। **पुरुषधौरेयस्येति।** विषयेभ्यस्सकाशात् इन्द्रियाणां निग्रहे समर्थस्येत्यर्थः। एतैर्विशेषणैः विक्षेपहेतूनामभावसूचनात् विक्षेपनिवृत्तिरुक्ता। सन्न्यासफलस्य विक्षेपाभावस्य सन्न्यासादिव सन्न्यासादन्यतोऽपि प्राप्तौ सन्न्यासस्य विधित्सितस्य श्रवणाद्यपेक्षितविक्षेपनिवृत्तिं प्रति पक्षे प्राप्तिः पक्षे चाप्राप्तिरिति लभ्यते, तथा च मा भूत् सन्न्यासाश्रमविधिरपूर्वविधिः, नियमविधिस्तु[3] भवेदेव - इति समाधत्ते—**तदेति। परिग्रहेणैवेति।** विक्षेपनिवृत्तिद्वारेति **शेषः।**

नन्वस्मिन्पक्षद्वय इति। सन्न्यासस्याधिकारिविशेषणत्वपक्षे श्रवणाङ्गत्वपक्षे चेत्यर्थः। **कथमिति।** सन्न्यासाभावादिति भावः। तयोस्सन्न्यासाभावे हेतुमाह—**सन्न्यासस्येति।** ब्राह्मणस्यैव सन्न्यासाधिकारे मानमाह—**ब्राह्मण इति।** निर्वेदं - वैराग्यं - तत्पूर्वकसन्न्यासं कुर्यादित्यर्थः। निर्वेदशब्दितवैराग्यस्य सन्न्यासं प्रति सामग्रीत्वेन तस्मिन् सति सन्न्यासस्यावश्यकत्वात् सन्न्यासविधिरेवायमिति भावः। **व्युत्थायेति।**

---

1. आहुरिति शेषः।

2. अस्मिन्व्याख्याने-यद्वेत्यादिद्वितीयव्याख्याने। प्रथमव्याख्याने 'अनन्यव्यापारतया' इति यथाश्रुतार्थकमेव। तत्र हि सन्न्यासेन विद्योत्पादने निरन्तरश्रवणं द्वारमुक्तम्, तच्च अनन्यव्यापारतासम्पाद्यमिति। द्वितीये तु व्याख्याने—सन्न्यासेन विद्योत्पत्तौ श्रवणादिकं द्वारम्, श्रवणाद्युत्पादने विक्षेपनिवृत्तिर्द्वारं—इत्युक्तम्। तत्र अनन्यव्यापारतया' इति यथाश्रुतार्थो नान्वेति इत्यतः 'विक्षेपनिवृत्तिद्वारा' इत्यर्थविवक्षोक्ता।

प्रथमव्याख्यानं 'यदितु' इत्यादिसमनन्तरग्रन्थाञ्जस्यं न लभते इत्याशयेन द्वितीयव्याख्यानं प्रवृत्तम्।

'ब्रह्मसंस्थः' इत्यादि श्रुतिस्मृत्योः न श्रवणनैरन्तर्ये तात्पर्यम्। सन्न्यासिनामपि तदाश्रमोचितशौचादिशरीरयात्रानिर्वाहकभैक्ष्यादिव्यापारेण तन्नैरन्तर्यासम्भवात्। किन्तु निर्विक्षेपं तदनुष्ठाने। तच्च विनाऽपि सन्न्यासं आश्रमान्तरेऽपि कस्यचित् सम्भवतीति सन्न्यासस्य न निरन्तरश्रवणाङ्गत्वं, नापि तद्द्वारा विद्यासाधनत्वं-इत्याशयेन हि शङ्कते यदीति।

3. नियमविधिस्त्विति। नियमविधित्वेऽपि सन्न्यासस्य दृष्टद्वारकत्वमेव, अदृष्टं तु नियमफलम्। अतोऽस्य पक्षस्य 'सन्न्यासस्य दृष्टद्वारा विद्योपयोगः' इति पक्षसमर्थनरूपताया नानुपपत्तिः।

सन्न्यासविधिषु ब्राह्मणग्रहणात्, 'अधिकारिविशेषस्य ज्ञानाय ब्राह्मणग्रहः । न सन्न्यासविधिः यस्माच्छ्रुतौ क्षत्रियवैश्ययोः ।' [बृ.वा. ३-५-८८] इति वार्तिकोक्तेश्च—इति चेत् ।

अत्र केचित्–'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' [जा. उ. ४] [1]इत्यविशेषश्रुत्या 'ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेत् गृहात् । त्रयाणामपि वर्णानाममी चत्वार आश्रमाः ।' इतिस्मृत्यनुगृहीतया क्षत्रियवैश्ययोरपि [2]सन्न्यासाधिकारसिद्धेः श्रुत्यन्तरेषु ब्राह्मणग्रहणं त्रयाणामुपलक्षणम् । अत एव वार्तिकेऽपि 'अधिकारिविशेषस्य' इति श्लोकेन भाष्याभिप्रायमुक्त्वा 'त्रयाणामविशेषेण सन्न्यासः श्रूयते श्रुतौ । यदोपलक्षणार्थं स्यात् ब्राह्मणग्रहणं तदा ।' [बृ.वा.३-५-८९] इत्यनन्तरश्लोकेन स्वमते क्षत्रियवैश्ययोरपि सन्न्यासाधिकारो दर्शित इति - तयोः श्रवणाद्यनुष्ठानसिद्धिं समर्थयन्ते ।

अन्ये तु–अनेकेषु सन्न्यासविधिवाक्येषु ब्राह्मणग्रहणात्, उदाहृतजाबालश्रुतौ सन्न्यासविधिवाक्ये ब्राह्मणग्रहणाभावेऽपि श्रुत्यन्तरसिद्धं ब्राह्मणाधिकारमेव सिद्धं कृत्वा सन्न्यासावस्थायां 'अयज्ञोपवीती कथं ब्राह्मणः' इति ब्राह्मणपरामर्शाच्च ब्राह्मणस्यैव सन्न्यासाधिकारः । विरोधाधि-

---

सन्न्यस्येत्यर्थः । यस्मात् श्रुतौ अधिकारिविशेषस्य ज्ञानाय ब्राह्मणग्रहः तस्मात् क्षत्रियवैश्ययोः सन्न्यासविधिर्नास्तीति वार्तिकयोजना ।

अत्र केचित् तयोःश्रवणाद्यनुष्ठानसिद्धिं समर्थयन्ते - इति सम्बन्धः । 'ब्रह्मचर्यं समाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्' इति पूर्वश्रुतौ चतुर्णामप्याश्रमाणां समुच्चयं प्रतिपाद्य तेषां विकल्पं दर्शयति—**यदि वेतरथेति** । यदि वा इत्यस्य, ब्रह्मचर्याश्रमे एव वैराग्यमुत्पन्नं चेदित्यर्थः । तत्र तदनुत्पत्तावाह—**गृहाद्वेति** । गृहाश्रमेऽपि तदनुत्पत्तावाह—**वनाद्वेति** । **अविशेषेति** । ब्राह्मणादिविशेषग्रहणरहितेत्यर्थः । **अत एवेति** । वर्णत्रयसाधारणतया सन्न्यासस्य श्रुतिस्मृतिसिद्धत्वादेवेत्यर्थः । यदा 'यदिवा' इति श्रुतौ श्रूयते, तदा उपलक्षणार्थं स्यादिति [3]सम्बन्धः ।

अन्ये त्विति । भाष्यानुवर्तिन इत्यर्थः । **श्रुत्यन्तरसिद्धमिति** । 'ब्राह्मणो व्युत्थाय' इत्यादिश्रुत्यन्तरसिद्धमित्यर्थः । **सिद्धं कृत्वेति** । विधोद्देशेन सन्न्यासविधिवाक्यानां सर्वेषामेकवाक्यत्वादिति भावः । **कथमिति** । तान्तवयज्ञोपवीतादेः ब्राह्मणत्वव्यञ्जकत्वात् परमहंससन्न्यासे च तदभावात् आक्षेप इत्यर्थः । यद्यत्र क्षत्रियवैश्ययोरपि सन्न्यासो विवक्षितः स्यात्, तदा 'कथं ब्राह्मणः' इतिवत् 'कथं क्षत्रियः' 'कथं वैश्यः' इत्यपि

---

1. इत्याद्यविशेषेति पाठान्तरम् ।

2. सन्न्यासाधिकारे सिद्धे इति पाठान्तरम् ।

3. सम्बन्ध इति । 'त्रयाणामविशेषेण' इति वार्तिके इत्यादिः । अस्मिन् मते वार्तिके 'यदा' इत्यस्य 'यस्मात्' इत्यर्थः, 'तदा' इत्यस्य 'तस्मात्' इत्यर्थः । सन्न्यासोऽपि विविदिषासन्न्यासः ।

करणन्यायेन श्रुत्यविरुद्धस्यैव स्मृत्यर्थस्य सङ्ग्राह्यत्वात्। यत्तु सन्न्यासस्य सर्वाधिकारत्वेन वार्तिकवचनं तत् विद्वत्सन्न्यासविषयं, न तु आतुरविविदिषासन्न्यासे भाष्याभिप्रायविरुद्धसर्वाधिकार-प्रतिपादनपरम्। 'सर्वा[कर्मा]धिकारविच्छेदि विज्ञानं चेदुपेयते। कुतोऽधिकारनियमो व्युत्थाने क्रियते बलात्॥' [बृ.वा. ३-५-९०] इत्यनन्तरश्लोकेन ब्रह्मज्ञानोदयानन्तरं जीवन्मुक्तिकाले विद्वत्सन्न्यास एव अधिकारनियमनिराकरणात्। एवं च—ब्राह्मणानामेव श्रवणाद्यनुष्ठाने सन्न्यासोऽङ्गम्, क्षत्रिय-वैश्ययोः तन्निरपेक्षः श्रवणाद्यधिकार इति, तयोः श्रवणाद्यनुष्ठाननिर्वाहः। न हि सन्न्यासस्य श्रवणापेक्षिततत्वपक्षे श्रवणमात्रस्य तदपेक्षा नियन्तुं शक्यते। क्रममुक्तिफलकसगुणोपासनया देवभावं प्राप्तस्य श्रवणादौ सन्न्यासनैरपेक्ष्यस्य अवश्यं वक्तव्यत्वात्, देवानां कर्मानुष्ठानाप्रसक्त्या

श्रूयेत, न तु श्रूयते। तस्मात् न तयोः सन्न्यासः श्रुत्यभिमत इति भावः। एवं सन्न्यासविधीनामैककण्ठ्ये स्थिते सति 'ब्राह्मणः क्षत्रियो वाऽपि' इति स्मृतिवचनं जाबालश्रुतितात्पर्याज्ञानमूलत्वादप्रमाणमित्याह—**विरोधाधिकरण-न्यायेनेति**। 'प्रत्यक्षश्रुतिविरुद्धं स्मृतिवचनं अप्रमाणम्' इति विरोधाधिकरणन्यायः। 'तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य' इत्यादिश्रुतौ सन्न्यासाधिकारानुरोधेन 'ब्राह्मणः सन्न्यस्य पाण्डित्यादिकमनुतिष्ठेत्' इति वाक्यार्थलाभात् 'विद्यार्थसन्न्यासे विविदिषुणा क्रियमाणे ब्राह्मणस्यैवाधिकारः' इति भगवतो भाष्यकारस्य मतम्। यदि वार्तिकवचनस्य प्रमाणमूलभाष्यकारमतविरुद्धेऽर्थे तात्पर्यं कल्प्येत, तदा सन्न्यासस्य साधारण्य-प्रतिपादकस्मृतिवचनवद्वार्तिकवचनमपि हेयमेव स्यात्। अतो भाष्याविरुद्धार्थपरं वार्तिकवचनमित्याह—**तद्वि-द्वत्सन्न्यासविषयमिति**। विविदिषासन्न्यासे सर्वाधिकारप्रतिपादनपरं न भवति - इत्यत्र हेत्वन्तरमाह—**सर्वाधिकारेति**। क्षत्रियवैश्ययोस्तत्त्वज्ञानमभ्युपेयते, न वा। नान्त्यः। जनकादीनां तत्त्वज्ञानवत्त्वप्रतिपादकशास्त्र-विरोधात्। नाद्यः। तत्त्वज्ञानेन कर्माधिकारप्रयोजकवर्णाश्रमाद्यध्यासनिवृत्तौ सकलकर्मनिवृत्तिरूपविद्वत्सन्न्यासस्य क्षत्रियवैश्ययोरपि वारयितुमशक्यतया 'विविदिषासन्न्यास इव विद्वत्सन्न्यासेऽपि ब्राह्मणस्यैवाधिकारः' इति नियमा-सम्भवादिति भावः। कुतो बलात् नियमः क्रियते, तादृशं बलं नास्तीत्यर्थः। **एवं चेति**। श्रवणाङ्गत्वेन अधिकारि-विशेषणत्वेन वा विद्यासाधने विविदिषासन्न्यासे ब्राह्मणस्यैवाधिकार इति सिद्धे सतीत्यर्थः। ननु-सन्न्यासस्याधि-कारिविशेषणतया अङ्गतया वा श्रवणापेक्षिततत्वपक्षे श्रवणमात्रस्य सन्न्यासापेक्षत्वावगमात्, क्षत्रियवैश्ययोर्विविदिषा-सन्न्यासरहितयोः श्रवणानुष्ठानं नास्तीत्येव पर्यवस्यति, न तु तयोरश्रवणं सन्न्यासनिरपेक्षमिति। तथा च कथं तयोरश्रवणाद्यनुष्ठाननिर्वाहः, तत्राह—**न हीति**। **देवभावं प्राप्तस्येति**। न च - सगुणोपासकस्य ब्रह्मलोकं गतस्य उपासनया देवभावं प्राप्तस्य निर्गुणब्रह्मसाक्षात्काराय उपासकेन क्रियमाणे श्रवणादौ सन्न्यासस्य व्यभिचार इत्युक्तम्, तस्य सगुणविद्यासामर्थ्यादेव निर्गुणसाक्षात्कारसम्भवेन श्रवणाद्यनुष्ठानस्यैवाभावादिति - वाच्यम्। देवताधिकरणे सगुणविद्यया देवभावं प्राप्तमुपासकमेव प्राधान्येन विषयीकृत्य श्रवणादौ देवाद्यधिकारस्य निरूपितत्वेन तस्यापि

तत्त्यागरूपस्य सन्न्यासस्य तेष्वसम्भवात् - इत्याहुः ।

अपरे तु 'ब्रह्मसंस्थोऽमृतत्वमेति' [छा.उ. २-२३-२] इति श्रुत्युदिता यस्य ब्रह्मणि संस्था-समाप्तिः - अनन्यव्यापारत्वरूपं तन्निष्ठत्वं तस्य श्रवणादिषु मुख्याधिकारः । 'गच्छतस्तिष्ठतो वाऽपि जाग्रतः स्वपतोऽपि वा । न विचारपरं चेतो यस्यासौ मृत उच्यते । आसुप्तेरामृतेः कालं नयेद्वेदान्त-चिन्तया ॥' इत्यादिस्मृतिषु सर्वदा विचारविधानात् । सा च ब्रह्मणि संस्था विना सन्न्यासं आश्रमा-न्तरस्थस्य न सम्भवति स्वस्वाश्रमविहितकर्मानुष्ठानवैयग्र्यात् , इति सन्न्यासरहितयोः क्षत्रियवैश्ययोः न मुख्यः श्रवणाद्यधिकारः । किं तु 'दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणाप्यर्थिनमधिकरोति श्रवणा-

---

श्रवणाद्यनुष्ठानं विना विद्यानुदयस्य प्रागेव श्रवणविधिविचारावसरे दर्शितत्वात् । तथा च तत्र व्यभिचारात् सन्न्यासो न श्रवणमात्राङ्गं, किं तु ब्राह्मणकर्तृकश्रवणस्यैवाङ्गमिति क्षत्रियवैश्ययोः सन्न्यासाभावेऽपि श्रवणाद्यनुष्ठान-निर्वाह इत्यर्थः । ननु देवानामपि कुतस्सन्न्यासाभावः, तत्राह—**देवानामिति** ।

ननु–देवकर्तृकश्रवणे सन्न्यासाश्रमस्य यदि व्यभिचारः, तर्हि त्रैवर्णिकमनुष्यकर्तृकश्रवणे सन्न्यासाश्र-मस्य हेतुत्वमस्तु, न तु ब्राह्मणमात्रकर्तृके । तथा सङ्कोचे मानाभावात् । उक्तं हि प्रागेव चतुर्ष्वाश्रमेषु सन्न्यासा-श्रमपरिग्रहेणैव श्रवणादि निर्वर्तनीयमिति । स चाश्रमविभागो वर्णत्रयसाधारण एव, न ब्राह्मणमात्रगतः । तथा च सन्न्यासहीनयोः क्षत्रियवैश्ययोः श्रवणादौ नाधिकारस्संभवति - इत्यस्वरसादाह—**अपरे त्विति** । श्रुत्युदिता ब्रह्मणि संस्था यस्य सम्भवति तस्य मुख्याधिकार इति सम्बन्धः । संस्थापदव्याख्यानं समाप्तिरिति । तस्या अपि व्याख्यानं अनन्येति । अमृतत्वकामस्य नैरन्तर्येण विचारकर्तव्यतायां स्मृतिवचनान्य-प्युदाहरति—**गच्छत इति** । **स्वपत इति** । शयानस्येत्यर्थः । 'स जीवति मनो यस्य मननेनैव जीवति' [म.उ. ३-१३] इत्यादिवचनसङ्ग्रहार्थमादिपदम् । मननं तत्त्वचिन्तनं, तद्रहितो जीवन्नेव मृत इत्यर्थः । अयं च मुख्याधिकारः सन्न्यासिनामेवेत्याह—**सा चेति** । **वैयग्र्यादिति** । व्यग्रत्वादित्यर्थः । सार्वकालिकी विक्षेपनिवृत्तिः असन्न्यासिनां न सम्भवतीति भावः । **न मुख्य इति** । शास्त्रीयोऽधिकारो नास्तीत्यर्थः ।

अयं भावः–'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुत्या पाण्डित्यश्रुत्येव ब्रह्मनिष्ठाधर्मकस्सन्न्यासाश्रमो विधीयते, ब्रह्मसंस्थाशब्दिताया: ब्रह्मनिष्ठायाः सन्न्यासाश्रमे सम्भवात् आश्रमान्तरेष्वसम्भवात्-इति प्रतिपादितं सन्न्यासाधि-करणभाष्यादौ । तथा च ब्रह्मनिष्ठत्वस्य सन्न्यासाश्रमधर्मत्वेन विहितत्वात् सन्न्यासिनो ब्राह्मणस्य ब्रह्मनिष्ठत्वं स्वधर्म इति सन्न्यासिनः तत्र मुख्योऽधिकारः । तस्य ब्रह्मनिष्ठत्वव्यतिक्रमे प्रत्यवायावगमाच्च । तथा च परमहंसोपनिषदि [३] श्रूयते —'काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः । स याति नरकान् घोरान् महारौरवसंज्ञकान् ॥' [ना.प.उ.५-१४] इति । काष्ठदण्डोपलक्षितः सन्न्यासाश्रमो धृतः - परिगृहीतः । सर्वाशी - सर्वं विषयजातं अशितुं - भोक्तुं शीलम-स्यास्तीति सर्वाशी, बाह्यान्तःकरणजयरहित इति यावत् । ज्ञानवर्जितः - ज्ञानाभ्यासवर्जित इत्यर्थः । यः सन्न्यस्य

दिषु ' इति ' अन्तरा चापि तु तद्दृष्टेः'[ब्र.सू.३-४-९/३६] इत्यधिकरणभाष्योक्तन्यायेन शूद्रवदप्रतिषिद्धयोस्तयोः विधुरादीनामिव देहान्तरे विद्याप्रापकेण अमुख्याधिकारमात्रेण श्रवणाद्यनुमतिः । न हि

शमदमादिसहितं ब्रह्मनिष्ठत्वं नानुतिष्ठति, स तीव्रां दुर्गतिं गच्छतीत्यर्थः। यथा सन्न्यासिनो ज्ञाननिष्ठाविधायकानि 'सन्न्यस्य श्रवणं कुर्यात्' 'गच्छतस्तिष्ठतो वाऽपि' 'आसुप्तेरामृतेः कालं' इत्यादीनि स्मृतिवचनानि सहस्रशस्सन्ति, तथा तत्परित्यागे पातित्यबोधकान्यपि स्मृतिवचनानि सहस्रशस्सन्ति। 'त्वंपदार्थविवेकाय सन्न्यासः सर्वकर्मणाम् । श्रुत्या विधीयते यस्मात् तत्त्यागी पतितो भवेत्॥ नित्यं कर्म परित्यज्य वेदान्तश्रवणं विना । वर्तमानस्तु सन्न्यासी पतत्येव न संशयः ॥' इत्यादीनि । सर्वाश्रमसाधारण्येनापि स्वधर्मस्य विगुणस्यापि परित्यागे महाननर्थः स्मर्यते—' श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥' [भ.गी.३-३५] इत्यादौ । सन्न्यासाधिकरणे भाष्यकारैः एतत्सर्वमभिप्रेत्य सन्न्यासिनः अनन्यव्यापारतया श्रवणादिनिष्पादनमकुर्वतः पातित्यं कण्ठत एवोक्तम् । तथा च भाष्यम्—'ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म, यज्ञादीनि चेतरेषां, तद्व्यतिक्रमे च तस्य प्रत्यवायः' [ब्र. सू, ३-४-२०] इति । तस्मात् श्रवणादेर्भिक्षुं प्रति विहितत्वात् तद्व्यतिक्रमे भिक्षोः प्रत्यवायावगमाच्च सन्न्यासिनः श्रवणादौ मुख्योऽधिकारः, सन्न्यासरहितान् प्रति तु श्रवणादेरविहितत्वात् अकरणे प्रत्यवायानवगमाच्च नास्ति तेषां मुख्योऽधिकार इति ।

ननु क्षत्रियादिकं प्रति श्रवणादिविधानाभावे सति अधिकार एव नास्तीति कुतो नोच्यत इति शङ्कते—**किं त्विति** । नित्याधिकाररूपमुख्याधिकारासम्भवेऽपि काम्याधिकाररूपगौणाधिकारसम्भवान्नैवमिति - भाष्येणोत्तरमाह—**दृष्टार्था चेति** । किं तु अमुख्याधिकारमात्रेण श्रवणाद्यनुमतिः इति सम्बन्धः। यथा भुजिक्रिया क्षुद्बाधानिवृत्तिरूपदृष्टफला, तथा विद्याऽपि सर्वानर्थमूलाविद्यानिवृत्तिरूपदृष्टफला श्रुतिसिद्धा । तथा च तस्यां विद्यायां अनर्थनिवृत्तिकामानां सर्वेषामेव अर्थित्वलक्षणाधिकारः सम्भवति । तथा च विद्याधिकारिणां सर्वेषां अविशेषेण वेदान्तश्रवणादावधिकारप्रसक्तौ शूद्रस्य वेदश्रवणादिप्रतिषेधान्नाधिकार इत्युक्तमपशूद्राधिकरणे । क्षत्रियादीनां च तथा प्रतिषेधाभावात् वेदान्तश्रवणाधिकारो भाष्यानुमतो विधुरादेरिव—इत्यर्थः । ननु—अमुख्याधिकारिभिरनुष्ठितश्रवणादेरपि विद्योत्पादकत्वमवश्यं वाच्यम् । अन्यथा गौणाधिकारनिरूपणपरभाष्यवैयर्थ्यप्रसङ्गात् । विद्योत्पादकत्वावश्यंभावे च न काम्याधिकारस्य गौणत्वम् , मुख्यगौणाधिकारयोः फलतो विशेषाभावात् ; इत्यत आह—**देहान्तर इति** । अयं भावः—मुख्याधिकारिणामनन्यव्यापारतया प्रत्यहं निर्वर्त्यमानं श्रवणादिकं निरङ्कुशब्रह्मचर्याहिंसाशमदमादियुक्तं अस्मिन्नेव जन्मनि प्रायेण विद्योत्पादकं सम्पद्यते । अमुख्याधिकारिणां तु श्रवणादिकं अनन्यव्यापाररूपत्वाभावात् सङ्कुचितब्रह्मचर्यादियुक्तत्वाच्च अस्मिन् जन्मनि विद्योत्पादनयोग्यमेव न भवति । किं तु बहुषु जन्मसु किञ्चित् किञ्चित् श्रवणादिकं सम्पाद्यमानं सम्भूय देहान्तरे क्वचित् ज्ञानमुत्पादयेदिति महान् फलभेदो गौणमुख्याधिकारयोः । तथा च स्मृतिः—' अनेकजन्मसंसिद्धस्ततो याति परां गतिम् '

'अन्तरा चापि तु तद्दृष्टेः' [ब्र. सू. ३-४-३६] इत्यधिकरणे विधुरादीनामङ्गीकृतः श्रवणाद्यधिकारो मुख्य इति वक्तुं शक्यते। 'अतस्त्वितरज्ज्यायो लिङ्गाच्च' [ब्र. सू. ३-३-३९] इति सूत्रकारेणैव तेषाममुख्याधिकारस्फुटीकरणात्। न च—तत्र तेषां श्रवणाद्यधिकार एव नोक्तः, किं तु तदीयकर्मणां विद्यानुग्राहकत्वमिति-शङ्क्यम्। 'दृष्टार्था च विद्या' इत्युदाहृततदधिकरणभाष्यविरोधात्। न च-क्षत्रियवैश्ययोः सन्न्यासाभावात् अमुख्याधिकारे तत एव देवानामपि श्रवणादिष्वमुख्य एवाधिकारः स्यात्, तथा च क्रममुक्तिफलकसगुणविद्यया देवदेहं प्राप्य श्रवणाद्यनुतिष्ठतां विद्याप्राप्त्यर्थं सन्न्यासार्हं पुनर्ब्राह्मणजन्म वक्तव्यमिति 'ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्तते' [छा. उ. ८-१५] 'अनावृत्तिश्शब्दात्' [ब्र.सू. ४-४-२२] इत्यादिश्रुतिसूत्रविरोधः

[भ.गी. ६-४५] इति। अनेकेषु जन्मसु कृतश्रवणादितया क्वचिज्जन्मनि संसिद्धः-उत्पन्नविद्यःसन् ततः-सिद्धिबलात् मुक्तिं गच्छतीति स्मृत्यर्थ इति। ननु-क्षत्रियवैश्ययोः विधुरादीनामिवामुख्याधिकार इत्ययुक्तम्, दृष्टान्तासम्प्रतिपत्तेः, इत्यत आह—**न हीति**। वक्तुं न हि शक्यत इति सम्बन्धः। यद्यपि सन्न्यासिन एव मुख्याधिकार इति पूर्वं प्रतिपादितत्वेन विधुरादीनां सन्न्यासाभावादेव गौणाधिकारस्सिद्धः, तथापि तेषां गौणाधिकारे सूत्रसंगृहीतामप्युपपत्तिमाह—**अतस्त्वितरदिति**। अतः-अनाश्रमिभिरनुष्ठितविद्यासाधनापेक्षया इतरत्-आश्रमिभिरनुष्ठितं विद्यासाधनं कर्म श्रवणादिकं वा ज्यायः-प्रशस्तं विद्यासाधनम्। ज्यायस्त्वावधारणार्थः तुशब्दः। श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च। 'तेनैति ब्रह्मवित्पुण्यकृत्' इतिवाक्यं श्रुतिलिङ्गम्। 'अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विजः' इत्यादि स्मृतिवाक्यं स्मृतिलिङ्गम्। तेन-पुण्यलब्धेन ब्रह्मवेदनेन ब्रह्म-एति-प्राप्नोतीति श्रुत्यर्थः। अत्र श्रुतौ पुण्यत्वेन प्रसिद्धानामाश्रमधर्माणामेव विशिष्य ब्रह्मप्राप्तिसाधनत्वप्रतिपादनात् अनाश्रमिधर्माणां 'विशेषानुग्रहश्च' [ब्र.सू. ३-४-३८] इति सूत्रोक्तन्यायेन विद्योपयोगिनामपि निकर्षो भाति। स च निकर्षो विधुरादीनां विद्यार्थकर्मसु श्रवणादिषु च मुख्याधिकाराभावप्रयुक्त एवेति वक्तव्यम्। हेत्वन्तराभावात्, अनाश्रमित्वस्य निन्दितत्वाच्च। न हि कर्मज्ञानयोर्मुख्याधिकारी निन्दार्हः-इति सूत्रभाष्यकारयोरभिप्राय इत्यर्थः। ननु-विधुराधिकरणे 'विधुराद्यनुष्ठितं कर्म विद्यासाधनम्' इत्येतावदेवोक्तं, न तु विधुरादेः श्रवणाद्यधिकारोऽपि तत्र प्रतिपादितः। तथा च श्रवणादौ विधुराद्यधिकारस्य गौणमुख्यत्वचिन्ता निरालम्बना-इत्याशङ्क्य परिहरति—**न च तत्रेति**। विधुराधिकरणे इत्यर्थः। **तत एवेति**। सन्न्यासाभावादेवेत्यर्थः। अस्तु पुनर्ब्राह्मणजन्म, इत्यत आह—**ब्रह्मलोकमिति**। **न च पुनरिति**। ब्रह्मलोकमभिसम्पद्य पुनरिमं लोकं प्रति नावर्तत इत्यर्थः। एतच्छ्रुतिमूलं सूत्रमुदाहरति—**अनावृत्तिरिति**। ब्रह्मलोकं गतानामुपासकानामावृत्तिर्नास्ति, उदाहृतश्रुतेरित्यर्थः। 'स्मृतेश्च' [ब्र.सू. ४-३-११] इत्यादिसूत्रसङ्ग्रहार्थमादिपदम्। तथा च स्मृतिः—'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥' इति। ते-ब्रह्मलोकवासिनः ब्रह्मोपासकाः प्रतिसञ्चरे-महाप्रलये परस्य-हिरण्यगर्भस्य ब्रह्मलोकस्वामिन आयुषः अन्ते कृतः-साक्षात्कृत आत्मा येषां ते तथा। नन्वनन्यव्यापारत्वसम्भवेऽपि सन्न्यासो नास्तीत्या-

इति-वाच्यम् । देवानामनुष्ठेयकर्मवैयग्र्याभावात् स्वत एव अनन्यव्यापारत्वं सम्भवतीति क्रममुक्तिफलकसगुणविद्याभिधायिशास्त्रप्रामाण्यात् विनाऽपि सन्न्यासं तेषां मुख्याधिकाराभ्युपगमात्-इत्याहुः ।

ननु - अमुख्याधिकारिणा दृष्टफलभूतवाक्यार्थावगत्यर्थं अविहितशास्त्रान्तरविचारवत् क्रियमाणो वेदान्तविचारः कथं जन्मान्तरविद्यावाप्तावुपयुज्यते । न खल्वद्यतनविचारस्य दिनान्तरीयविचार्यावगतिहेतुत्वमपि युज्यते, दूरे जन्मान्तरीयतद्धेतुत्वम् । न च वाच्यं - मुख्याधिकारिणा परिव्राजकेन क्रियमाणमपि श्रवणं दृष्टार्थमेव, अवगतेर्दृष्टार्थत्वात् ; तस्य यथा प्रारब्धकर्मविशेषरूपप्रतिबन्धात् इह जन्मनि फलमजनयतो जन्मान्तरे प्रतिबन्धकापगमेन फलजनकत्वं 'ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्' [ब्र. सू. ३-४-५१] इत्यधिकरणे तथानिर्णयात्, एवममुख्याधिकारिकृतस्यापि स्यात्-इति । यतः शास्त्रीयाङ्गयुक्तं श्रवणं अपूर्वविधित्वपक्षे फलपर्यन्तमपूर्वं नियमविधित्वपक्षे नियमादृष्टं वा जनयति, तच्च जातिस्मरत्वप्रापकादृष्टवत् प्राग्भवीयसंस्कारमुद्बोध्य तन्मूलभूतस्य विचारस्य जन्मान्तरीयविद्योपयोगितां घटयतीति युज्यते । शास्त्रीयाङ्गविधुरं श्रवणं नादृष्टोत्पादकमिति

शङ्क्याह—**क्रममुक्तीति** । मनुष्येष्वेव सन्न्यासो मुख्याधिकारप्रयोजकः, वर्णाश्रमविभागस्य मनुष्यविषयत्वादिति भावः ।

अविहितेति । न्यायशास्त्रादिविचारवदित्यर्थः । एतज्जन्मीयवेदान्तविचारस्य आगामिजन्मीयां वेदान्तार्थावगतिं प्रति हेतुत्वासम्भवं कैमुतिकन्यायेन द्रढयति—**न खल्विति** । मुख्याधिकारिकृतविचारदृष्टान्तेन गौणाधिकारिश्रवणादेरपि जन्मान्तरीयविद्योपयोगं शङ्कते—**न च वाच्यमिति** । ततः किं, तत्राह—**तस्येति** । यथा तस्य - मुख्याधिकारिकृतश्रवणस्य प्रतिबन्धादिहजन्मनि विद्यालक्षणं फलमजनयतो जन्मान्तरे फलजनकत्वम्, एवममुख्याधिकारिकृतमपि श्रवणं जन्मान्तरे फलजनकं स्यादिति न च वाच्यमिति सम्बन्धः । मुख्याधिकारिकृतश्रवणस्य सति प्रतिबन्धके आमुष्मिकं विद्याजन्मेत्यत्र मानमाह—**ऐहिकमपीति** । प्रस्तुतप्रतिबन्धे असति (सति) विद्याजन्म इह जन्मनि भवति, अपिशब्दात् सति प्रतिबन्धे जन्मान्तरे भवति । कुतः, तद्दर्शनात्-तस्य-प्रतिबन्धकवशात् जन्मान्तरे विद्योदयस्य वामदेवादिषु दर्शनादित्यर्थः । दृष्टान्तवैषम्येणोत्तरमाह—**शास्त्रीयाङ्गयुक्तमिति** । शास्त्रीयाङ्गं सन्न्यासः, तद्युक्तं, सन्न्यासिना अनुष्ठीयमानमिति यावत् । तथा च शास्त्रीयाङ्गसहितं श्रवणं 'श्रवणविधिरपूर्वविधिः' इति पक्षे स्वयमेव विद्यालक्षणफलपर्यन्तमदृष्टं जनयति । 'श्रवणविधिर्नियमविधिः' इति पक्षे तु तादृशं श्रवणं नियमविशिष्टं सत् फलपर्यन्तं नियमादृष्टं जनयतीत्यर्थः । **तच्चेति** । श्रवणजनितादृष्टमित्यर्थः । **जातीति** । जातिः - जन्म । ततश्च यथा जातिस्मरत्वसम्पादकमदृष्टं पूर्वजन्मतद्वृत्तान्तानुभवजन्यसंस्कारं अस्मिन् जन्मन्युद्बोध्य तदुद्बोधनद्वारा पूर्वजन्मतद्वृत्तान्तस्मृतिं घटयति, तथा प्राचि भवे श्रवणादिजनितं अदृष्टं संस्कारमुद्बोध्य तत्संस्कारकारणभूतस्य श्रवणस्य भाविजन्मनि विद्योपयोगित्वं घटयतीत्यर्थः । **शास्त्रीयाङ्गविधुरमिति** । सन्न्या-

कुतस्तस्य जन्मान्तरीयविद्योपयोगित्वमुपपद्यते, घटकादृष्टं विना जन्मान्तरीयप्रमाणव्यापारस्य जन्मान्तरीयावगतिहेतुत्वोपगमे अतिप्रसङ्गात् ।

उच्यते—**अमुख्याधिकारिणाऽपि उत्पन्नविविदिषेण क्रियमाणं श्रवणं द्वारभूतविविदिषोत्पादकप्राचीनविद्यार्थयज्ञाद्यनुष्ठानजन्यापूर्वप्रयुक्तमिति तदेवापूर्वं विद्यारूपफलपर्यन्तं व्याप्रियमाणं जन्मान्तरीयायामपि विद्यायां स्वकारितश्रवणस्य उपकारितां घटयतीति नानुपपत्तिः । श्रवणादौ विध्यभावपक्षे तु सन्न्यासपूर्वकं कृतस्यापि श्रवणस्य अदृष्टानुत्पादकत्वात् प्रतिबन्धके सति तस्य जन्मान्तरीयविद्याहेतुत्वं [1]इत्थमेव निर्वाह्यम् ।**

आचार्यास्तु—**नियमविधिपक्षेऽपि अयमेव निर्वाहः । श्रवणमभ्यस्यतः फलप्राप्तेरर्वाक् प्रायेण तन्नियमादृष्टानुत्पत्तेः, तस्य फलपर्यन्तावृत्तिगुणकश्रवणानुष्ठाननियमसाध्यत्वात् । न हि**

सरहितक्षत्रियादिना क्रियमाणं श्रवणं अदृष्टोत्पादकं न भवति, क्षत्रियादिकं प्रत्यविहितत्वाच्छ्रवणादेरिति भावः । नन्वविहितश्रवणस्यादृष्टानुत्पादकत्वेऽपि संस्कारजनकत्वसम्भवात् तद्बलादेव जन्मान्तरीयविद्याहेतुत्वं कुतो न स्यादित्यत आह—**घटकादृष्टं विनेति । अतिप्रसङ्गादिति ।** जन्मान्तरानुभूतसकलपदार्थस्मृतिप्रसङ्गादित्यर्थः ।

कर्मणां विद्यायां विनियोग इति पक्षमाश्रित्य परिहरति—**उच्यत इति ।** यज्ञादिभिर्विद्यायां सम्पादनीयायां द्वारभूता या विविदिषा, तस्या उत्पादकं प्राचीनं च यद्विद्यार्थयज्ञाद्यनुष्ठानं, तज्जन्येत्यर्थः । स्वपदं यज्ञाद्यनुष्ठानजन्यापूर्वपरम् । वाचस्पतिमते मुख्याधिकारिकृतश्रवणस्यापि [2]यज्ञाद्यपूर्वेणैव [3]निर्वाह इति दृष्टान्ताभिप्रायेणाह—**श्रवणादौ विध्यभावपक्षे त्विति ।**

विवरणपक्षेऽप्येवमेव निर्वाह इत्याह—**आचार्यास्त्विति ।** अयं भावः—प्रमाणासम्भावनानिवृत्तिः श्रवणफलं, प्रमेयासम्भावनानिवृत्तिर्मननफलं, विपरीतभावनानिवृत्तिर्निदिध्यासनफलम् । तथा च त्रिविधप्रतिबन्धकनिवृत्ति-

---

1. इत्थमेव-यज्ञादिजनितापूर्वस्य घटकत्वाभ्युपगमेनैव । ननु—श्रवणादौ विध्यभावपक्षः वाचस्पतिपक्षः । तत्र च यज्ञादीनां विविदिषासाधनत्वात् विविदिषापर्यन्त एव यज्ञादीनां व्यापारः, न तु विद्यापर्यन्तो युक्तः—इति चेत्-मैवम्—विविदिषन्तिवाक्यानुसारेण कर्मणां विविदिषासाधनत्वस्येव 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इतिवचनानुसारेण विद्यादिप्रतिबन्धककर्मक्षयसाधनत्वस्यापि आचार्यवाचस्पतिमिश्राभिप्रेतत्वात् । उक्तञ्च ऐहिकाधिकरणे भामत्याम्—'यत एवात्र विद्योत्पादे श्रवणादिभिः कर्तव्ये यज्ञादीनां सत्वशुद्धिद्वारेण वा विघ्नोपशमद्वारा वा उपयोगः, अत एव तेषां यज्ञादीनां कर्मान्तरप्रतिबन्धाप्रतिबन्धाभ्यां अनियतफलत्वेन तदपेक्षाणां श्रवणादीनामपि अनियतफलत्वं न्याय्यम्' इति । न च वाचस्पतिमते दृष्टैकफलत्वात् श्रवणादेः आमुष्मिकफलत्वमनुपपन्नमिति शङ्क्यम् । प्राग्भवीयगान्धर्वादिशास्त्राभ्यासस्य इह जन्मनि षड्जादिवैशद्यहेतुभावोपलम्भात् । अत एव केषाञ्चिदेव इह जन्मनि गान्धर्वशास्त्रविचारे पूर्वजन्मवासनावशात् झटिति षड्जादिसाक्षात्कारो जायते नान्येषाम् । अधिकं ऐहिकाधिकरणे कल्पतरुपरिमळयोर्द्रष्टव्यम् ।

2. यज्ञाद्यपूर्वेणैवेति । एवञ्च श्रवणापूर्वाभ्युपगममारोप्य केषाञ्चित् वाचस्पत्युपालम्भोऽनुचित इति भावः ।

3. निर्वाहः—जन्मान्तरीयावगतिहेतुत्वोपपत्तिः ।

नियमादृष्टजनकश्रवणनियमः फलपर्यन्तमावर्तनीयस्य श्रवणस्य उपक्रममात्रेण निर्वर्तितो भवति, येन तज्जन्यनियमादृष्टस्यापि फलपर्यन्तश्रवणावृत्तेः प्रागेवोत्पत्तिः सम्भाव्येत। अवघातवत् आवृत्तिगुणकस्यैव श्रवणस्य फलसाधनत्वेन फलसाधनपदार्थनिष्पत्तेः प्राक् तन्नियमनिर्वर्तिवचनस्य निरालम्बनत्वात्, श्रवणावघाताद्युपक्रममात्रेण नियमनिष्पत्तौ तावतैव नियमशास्त्रानुष्ठानं सिद्धमिति तदनावृत्तावप्यवैकल्यप्रसङ्गाच्च-इत्याहुः।

केचित्तु-**दृष्टार्थस्यैव वेदान्तश्रवणस्य 'दिने दिने तु वेदान्तश्रवणात् भक्तिसंयुतात्।**

लक्षणफलपर्यन्तमावृत्तिविशिष्टानि श्रवणादीनि यस्य मुख्याधिकारिणो निष्पन्नानि, तस्य नियमादृष्टमुत्पन्नमेव। एवं सम्पन्नविद्यासाधनस्यापि प्रतिबन्धवशात् यदि विद्या न जाता, तदा पुनर्जन्मलाभेन प्रतिबन्धक्षये सति पुनर्विचारमनपेक्ष्यैव विद्या जायते। यथा वामदेवहिरण्यगर्भादेः। यस्य तु उक्तप्रतिबन्धनिवृत्तिपर्यन्तं श्रवणाद्यावृत्तिर्न जाता, मध्ये मृतिश्च जाता, तस्य मुख्याधिकारिणोऽपि नियमादृष्टं न जायते। स च पुनर्जन्मान्तरे उक्तप्रतिबन्धकनिवृत्तिपर्यन्तश्रवणादिकमभ्यस्य श्रवणादिनियमादृष्टवशेन विद्याप्रतिबन्धककल्मषक्षये सति विद्यां लभते। तदुक्तं भगवता श्रीकृष्णेन—'तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्। यतते च ततो भूयस्संसिद्धौ कुरुनन्दन ॥' [भ. गी. ६-४३] इति। तत्र-प्राप्ते साधुकुलजन्मनि तं-पूर्वदेहभवं इदानीं संस्कारात्मनाऽनुवर्तमानं बुद्धिसंयोगं-श्रवणादिकर्तव्यताबुद्ध्या सम्बन्धं लभते। 'अस्मिन्नपि जन्मनि प्रतिबन्धनिवृत्तिद्वारा विद्योदयाय मया श्रवणादिकमनुष्ठेयम्' इति बुद्ध्या युक्तो भवतीत्यर्थः। ततः-पूर्वजन्मीययत्नापेक्षया भूयः-अधिकं यतते संसिद्ध्यर्थमित्यर्थः। तथा च योऽयं फलपर्यन्तावृत्तिगुणकश्रवणादिरहितो योगभ्रष्टः तस्य नियमादृष्टाभावात् यज्ञाद्यदृष्टादेव निर्वाहः कर्तव्य इति। प्रतिबन्धनिवृत्तिरूपफलप्राप्तेः पूर्वं नियमादृष्टानुत्पत्तौ हेतुमाह—**तस्येति।** नियमादृष्टस्येत्यर्थः। नियमादृष्टं हि न श्रवणमात्रजन्यं, किं तु श्रवणनियमजन्यम्। तन्नियमश्च श्रवणादेरेव फलपर्यन्तमावृत्तौ सत्यां निष्पद्यते। तथा च फलोत्पत्तेरर्वाक् श्रवणादिनियमस्यैवाभावात् न नियमादृष्टोत्पत्तिरित्यर्थः। उक्तं प्रपञ्चयसि—**न हीत्यादिना।** श्रवणनियमः श्रवणस्योपक्रममात्रेण निर्वर्तितो न भवतीत्यत्र हेतुमाह—**अवघातवदिति।** आवृत्तिविशिष्टस्यैवावहननस्य तण्डुलनिष्पत्तिलक्षणफलसाधनतायाः लोकसिद्धत्वादिति भावः। **प्राक्तदिति।** फलपर्यन्तं श्रवणस्यैवावृत्तौ सत्यां श्रवणस्य अप्राप्तांशपरिपूरणलक्षणनियमो निष्पन्नो भवति, न ततः प्रागित्यर्थः। श्रवणस्यारम्भमात्रे वा कतिपयावृत्तिमात्रे वा जाते सति श्रवणनियमो निष्पन्नः' इति वचनं विषयाभावात् निरालम्बनमित्यर्थः। **तदनावृत्तावपीति।** श्रवणावघाताद्यनुष्ठानमुपक्रम्य श्रवणादिकं त्यक्त्वा भाषाप्रबन्धादिविचारे नखविदलनादौ च प्रवृत्तावपि नियमविधिविरोधाभावप्रसङ्गादित्यर्थः।

मुख्यामुख्याधिकारिभिरन्वहं क्रियमाणस्य वेदान्तश्रवणस्य प्रतिबन्धकनिवृत्तिरूपदृष्टफलोत्पादकत्ववत् अदृष्टोत्पादकत्वमप्यस्ति, तथा च तद्बलात् जन्मान्तरे विद्योपयोगित्वं विचारस्य घटते-इति परिहारान्तरमाह—**केचित्त्विति। फलमिति।** पुण्यरूपमित्यर्थः। वचने तुशब्दः चार्थे। तथा च वेदान्तश्रवणस्य देवता-

गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत्' इत्यादिवचनप्रामाण्यात् स्वतन्त्रादृष्टोत्पादकत्वमप्यस्ति। यथा अग्निसंस्कारार्थस्याधानस्य पुरुषसंस्कारेषु परिगणनात् तदर्थत्वमपि, एवं वचनबलादुभयार्थत्वोपपत्तेः। तथा च प्रतिदिनश्रवणजनितादृष्टमहिम्नैव आमुष्मिकविद्योपयोगित्वं श्रवणमननादिसाधनानां - इत्याहुः।

निर्गुणोपासनात्मकयोगस्य ब्रह्मसाक्षात्कारसाधनत्वनिरूपणम्

एवं श्रवणमननादिसाधनानुष्ठान[प्रणाल्या] (प्रवणस्य) विद्यावाप्तिः इत्यस्मिन्नर्थे सर्वसम्प्रतिपन्ने स्थिते [1]भारतीतीर्थाः ध्यानदीपे **विद्यावाप्तौ उपायान्तरमप्याहुः—**

'तत् कारणं साङ्ख्ययोगाभिपन्नम्' [श्वे. उ. ६-१३] 'यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।' [भ. गी. ५-५] इतिश्रुतिस्मृतिदर्शनात् यथा साङ्ख्यं नाम वेदान्तविचारः

गुरुवेदान्तविषयभक्तिगुरुशुश्रूषाभ्यामुपात्ताभ्यां अनुपात्तैश्च शमदमब्रह्मचर्याहिंसादिभिः समुच्चयार्थः तुशब्द इति भावः। **स्वतन्त्रेति।** वेदान्तश्रवणस्य स्वतन्त्रतया अदृष्टोत्पादकत्वमस्तीत्यर्थः। स्वातन्त्र्यं च अदृष्टजनने श्रवणस्य विद्यायां विनियोगबोधकश्रवणविधिनैरपेक्ष्यमिति बोध्यम्। एकस्योभयार्थत्वे दृष्टान्तमाह—**यथाग्नीति।** 'अग्नीनादधीत' इति वचनात् आधानस्य आहवनीयाद्यग्निसंस्कारत्वोपगमादिति भावः। **पुरुषसंस्कारेष्विति।** 'अग्न्याधेयमग्निहोत्रम्' [गौ. ध. सू. ८-१७] इत्यादिपुरुषसंस्कारसङ्ग्राहकसूत्रे अग्न्याधानस्यापि पाठादित्यर्थः। **अदृष्टमहिम्नैवेति।** वेदान्तश्रवणजनितादृष्टस्य योग्यतया विद्यायामेव विनियोगस्य वक्तव्यतया तद्बलात् जन्मान्तरीयविद्योपयोगित्वमिति भावः।

एवमुत्तममध्यमाधिकारिणां साङ्ख्यमार्गं निरूप्य तदशक्तानामत्यन्तमन्दाधिकारिणां योगमार्गं निरूपयितुमुपक्रमते—**एवमिति। सर्वसम्प्रतिपन्न इति।** सर्वश्रुतिस्मृतिषु सम्यक् प्रतिपन्ने-निश्चिते इत्यर्थः। **आहुरिति।** सम्यक् निरूपितवन्तः इत्यर्थः। न तु 'नूतनतया कल्पितवन्त' इति भ्रमितव्यम्। तस्यापि श्रुत्यादिसिद्धत्वात्।

तत् - प्रकृतं कारणत्वोपलक्षितं ब्रह्म साङ्ख्ययोगाभ्यां विद्याद्वारा आभिमुख्येन-प्रत्यक्त्वेन प्राप्तमिति श्रुत्यर्थः। साङ्ख्यैः - श्रवणादिपरैः योगैः - उपासकैः यत् स्थानं ब्रह्मस्वरूपं विद्याद्वारा गम्यते - प्राप्यते इत्यर्थः।

---

1. भारतीतीर्थाः—विद्यारण्यस्वामिनः। ध्यानदीपस्य विद्यारण्यकर्तृकत्वेन ब्रह्मानन्दसरस्वतीस्वामिभिः दृश्यत्वनिरुक्तावुक्तत्वात्, भक्तिरसायने श्रीमधुसूदनसरस्वतीस्वामिभिरपि तथैवोक्तत्वात्, विठ्ठलमिश्रैरपि माधवाचार्यकर्तृकत्वेनोक्तत्वाच्च। विद्यारण्यस्वामिन एव हि पूर्वाश्रमे माधवाचार्याः। नन्वेवं भारतीतीर्थाः' इत्युक्तिर्विरुद्धा, पञ्चदशप्रकरणव्याख्यातृभिः "नत्वा **श्रीभारतीतीर्थविद्यारण्य**मुनीश्वरौ" इति भारतीतीर्थविद्यारण्ययोर्भेदेनोक्तत्वात् इति चेत्, अत्र केचित्—विद्यारण्यस्वामिनामपि भारतीतीर्थसंज्ञा, तेन मूलग्रन्थोपपत्तिः। तद्गुरुषु अन्यतमानामपि भारतीतीर्थसंज्ञा, अतश्च पञ्चदशप्रकरणव्याख्यातॄणां वचनोपपत्तिः—इत्याहुः। अन्ये तु - सहैव वसतोः भारतीतीर्थविद्यारण्ययोः गुरुशिष्ययोः समुत्पन्नं पञ्चदशप्रकरणम्। तेन उभयकर्तृकत्वेनापि व्यवहारः, अतो न कोऽपि विरोधः—इत्याहुः।

श्रवणशब्दितो मननादिसहकृतो विद्यावाप्त्युपायः, एवं योगशब्दितं निर्गुणब्रह्मोपासनमपि। न च निर्गुणस्योपासनमेव नास्तीति शङ्क्यम्। प्रश्नोपनिषदि शैब्यप्रश्ने 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' [प्र. उ. ५-५] इति निर्गुणस्यैवोपासनप्रतिपादनात्। तदनन्तरं 'स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते' इति उपासनाफलवाक्ये ईक्षतिकर्मत्वेन निर्दिष्टं यन्निर्गुणं ब्रह्म, तदेवोपासनावाक्येऽपि ध्यायतिकर्म, नान्यत्। ईक्षतिध्या-

---

योगैरपीत्यपिशब्दात् योगमार्गस्यानुकल्पत्वं भातीति बोध्यम्। **अपीति**। 'विद्यावाप्त्युपायः' इत्यनुषङ्गः। निर्गुणब्रह्मोपासनं मानशून्यमित्याशङ्क्य परिहरति—**न चेत्यादिना**।

ननु-इयं शङ्का न युक्ता, 'तत्कारणं' 'यत्साङ्ख्यैः' इति श्रुतिस्मृत्योः आदावेव तत्र प्रमाणत्वेनोदाहृतत्वात्। न च उदाहृतश्रुतिस्मृतिगतयोगपदस्य सगुणोपासनपरत्वसम्भवात् आशङ्का युक्तेति वाच्यम्। भिन्नविषययोरुपासनसाक्षात्कारयोः कार्यकारणभावासम्भवेन निर्गुणविद्याहेतुभूतस्य योगस्य निर्गुणोपासनरूपत्वावश्यंभावात्। न च—'यत्साङ्ख्यैः' इतिवचनगतयोगपदस्य उपास्तिपरत्वमेवासिद्धम्, तस्य गीताभाष्ये कर्मयोगपरत्वेन व्याख्यातत्वादिति—वाच्यम्। 'यत्साङ्ख्यैः' इतिवचनस्य वस्तुतो निर्गुणोपास्तिपरस्यैव सतो भगवता श्रीकृष्णेन कर्मविषये उदाहृतत्वेन तदनुरोधेन भाष्ये तथाव्याख्यानोपपत्तेः, योगपदस्य ध्याने रूढत्वेन वस्तुतः कर्मपरत्वाभावात्, तद्वचनमूलभूतायां 'तत्कारणम्' इतिश्रुतौ योगपदस्य ध्यानपरतया शारीरकभाष्ये व्याख्यातत्वाच्च, 'कर्मयोगस्य मुख्ययोगद्वारा ब्रह्मप्राप्तिसाधनत्वं न तु साक्षात्' इति ज्ञापनाय अस्य वचनस्य कर्मविषयतया भगवता उदाहरणसम्भवाच्च। तस्मात् मानाभावशङ्का न युक्तेति चेत्, न-उदाहृतश्रुतिस्मृतिव्यतिरेकेण अन्यत्र क्वापि निर्गुणोपासनं न दृष्टं इत्येतावदभिप्रायेण शङ्कोपपत्तेः।

अत एव सर्वासु श्रुतिषु निर्गुणोपासनं दृष्टमिति मन्दाधिकारिणामाश्वासनायाह—**प्रश्नोपनिषदीत्यादिना**। **त्रिमात्रेणेति**। द्वितीयार्थे तृतीया। तिस्रः-अकारोकारमकाराख्याः मात्राः यस्योङ्कारस्य, सः त्रिमात्रः। 'ओङ्कारे निर्गुणमेव ब्रह्म तदभेदेन ध्येयम्' इत्यत्र भाष्यादिसम्मतिमाह—**तदनन्तरमिति**। ध्यानवाक्यानन्तरमित्यर्थः। जीवरूपः परमात्मनो घनः-घटाकाशवदुपाधिपरिच्छिन्नचैतन्यात्मा जीवघनः, तस्मात् परः पुरुषः निरुपाधिकः परमात्मा, तं सः-ध्याता पुरि-हार्दाकाशे बुद्धिसाक्षित्वेन शयं-वर्तमानं ईक्षते-साक्षात्करोतीत्यर्थः। **उपासनावाक्ये**। 'परं पुरुषमभिध्यायीत' इति वाक्ये इत्यर्थः। **कार्येति**। ईक्षणवाक्यस्य ध्यानफलभूतसाक्षात्कारप्रतिपादकत्वेन ध्यानवाक्यैकवाक्यत्वात् ध्यानेक्षणयोः कार्यकारणभावोऽवगम्यत इति भावः। **नियमादिति**। अन्यध्यानादन्यसाक्षात्कारादर्शनादिति भावः।

ननु-कल्पतरौ ध्यातव्यस्य सूर्यान्तस्स्थत्वं 'स तेजसि सूर्ये संपन्नः' [प्र.उ. ५-५] इति सूर्यसम्पत्तिवचनानुसारेण विशेषणं दत्तम्। तथा च ओङ्कारेध्यातव्यपुरुषस्य निर्गुणब्रह्मरूपत्वं कल्पतरुकारैर्नाङ्गीकृतमिति प्रतीयते-इति चेत्, न-सूर्यसम्पत्तिवचनस्य अर्चिरादिमार्गप्राप्तिपरतायाः चतुर्थाध्याये व्यवस्थापितत्वेन

नयोः कार्यकारणभूतयोरेकविषयत्वनियमात् - इत्यस्यार्थस्य ईक्षतिकर्माधिकरणे भाष्यकारादिभिरङ्गीकृतत्वात्। अन्यत्रापि तापनीयकठवल्ल्याादिश्रुत्यन्तरे निर्गुणोपास्तेः प्रपञ्चितत्वात्। सूत्रकृताऽपि उपास्यगुणपरिच्छेदार्थमारब्धे गुणोपसंहारपादे निर्गुणेऽपि 'आनन्दादयः प्रधानस्य' [ब्र. सू. ३-३-११] इति सूत्रेण भावरूपाणां ज्ञानानन्दादिगुणानां 'अक्षरधियां त्ववरोधः' [ब्र. सू. ३-३-३३] इत्यादिसूत्रेण अभावरूपाणामस्थूलत्वादिगुणानां चोपसंहारस्य दर्शितत्वाच्च। ननु आनन्दादिगुणोपसंहारे उपास्यं निर्गुणमेव न स्यादिति चेत्, न-आनन्दादिभिरस्थूलत्वादिभिश्चोपलक्षितमखण्डैकरसं

सूर्यतदन्तस्स्थेश्वरप्राप्तिपरत्वाभावात्, कल्पतरुकाराणामपि तदीयवचनान्तरपर्यालोचनया श्रुतेर्मार्गपरतया च सूर्यान्तस्स्थत्वविशेषणदाने तात्पर्याभावस्य परिमले प्रतिपादितत्वाच्च इति भावः।

'देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्व' [नृ.उ. १] इत्याद्या तापनीयश्रुतिः। अणोः-सूक्ष्मादपि सूक्ष्मं - दुर्विज्ञेयं इमं - प्रत्यग्रूपं परमात्मानं ओङ्कारगम्यं इत्यर्थः। 'एतद्ध्येवाक्षरं ब्रह्म' [क.उ. २-१६] इत्याद्या कठवल्लीश्रुतिः 'ॐमित्येतदक्षरमिदं सर्वम्' [मा.उ. ९] इत्यादिमाण्डूक्यश्रुतिः 'ॐमित्येवं ध्यायथ आत्मानम्' [मु.उ. २-२-६] इति मुण्डकश्रुतिश्च आदिपदार्थः।

निर्गुणस्योपास्यत्वे सूत्रसम्मतिमाह—**सूत्रकृताऽपीति**। सूत्रकृता निर्गुणेऽपि गुणानामुपसंहारस्य दर्शितत्वादिति सम्बन्धः। निर्गुणे गुणोपसंहारो निर्गुणब्रह्मप्रमित्यर्थ एव, न निर्गुणब्रह्मोपास्त्यर्थः - इति शङ्काव्यवच्छेदाय पादं विशिनष्टि—**उपास्यगुणपरिच्छेदार्थमिति**। परिच्छेदः-निर्णयः। निर्गुणे गुणोपसंहारनिरूपणस्य निर्गुणोपास्तिरपि फलमिति वक्तव्यम्, अन्यथा तन्निरूपणस्य पादासङ्गतिप्रसङ्गादिति भावः। आनन्दादयः क्वचिच्छ्रुताः अन्यत्राप्युपसंहर्तव्याः, प्रधानस्य- वेद्यब्रह्मणः सर्ववेदान्तेष्वभेदेन ब्रह्मविद्याया एकत्वात् - इति सूत्रार्थः। भावरूपाणामितिविशेषणं 'अक्षरधियाम्' इत्यधिकरणस्य 'आनन्दादयः' इत्यधिकरणेन पौनरुक्त्यपरिहारार्थमिति बोध्यम्। अक्षरे-ब्रह्मणि धीः यैरस्थूलादिशब्दवाच्यार्थभूतैरभावैर्भवति तेऽक्षरधियः, तेषामवरोधः-उपसंहारः इतरेषु वेदान्तेषु कर्तव्य एव इति सूत्रभागार्थः। स्थौल्यादिनिषेधानां निष्प्रपञ्चब्रह्मप्रमितिहेतुत्वादिति भावः। व्याघातं शङ्कते—**नन्विति**। आनन्दादिगुणानां उपास्यकोटौ निवेशो नाङ्गीक्रियते, येन उपास्यं ब्रह्म सगुणं स्यात्। किं तु उपास्यनिर्गुणनिर्णयद्वारा निर्गुणोपास्तावुपयोगमात्रं स्वीक्रियते - इति समाधत्ते—**नेति**। आनन्दादिगुणानामस्थूलादिगुणानां चोपसंहारो हि तद्वाचकपदानां सहोच्चारणरूपो विवक्षितः। तथा च 'उपाधिविशिष्टचैतन्यवाचकैरानन्दादिपदैः स्थौल्याद्यभावविशिष्टचैतन्यवाचकैरस्थूलादिशब्दैश्च वाच्यार्थेषु सर्वेषु अनुगतमखण्डैकरसं यत् ब्रह्म लक्षणया बोध्यते तदहमस्मि' इत्युपासनसम्भवादित्यर्थः। उक्तं च ध्यानदीपे—'आनन्दादिभिरस्थूलादिभिश्चात्माऽत्र लक्षितः। योऽखण्डैकरसः सोऽहमस्मीत्येवमुपासते।' [पं. द. ९-७३] इति। अत्रेति। वेदान्तेष्वित्यर्थः।

ब्रह्मास्मीति निर्गुणत्वानुपमर्देनेन उपासनासम्भवात्। ननु 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' [के. उ. १-५] इतिश्रुतेः न परं ब्रह्मोपास्यमिति चेत्, 'अन्यदेव तद्विदितात्' [के.उ.१-४] इति श्रुतेः तस्य वेद्यत्वस्याप्यसिद्ध्यापातात्। श्रुत्यन्तरेषु ब्रह्मवेदनप्रसिद्धेः अवेद्यत्वश्रुतिर्वास्तवावेद्यत्वपरा चेत्, आथर्वणादौ तदुपासनप्रसिद्धेः तदनुपास्यत्वश्रुतिरपि वस्तुवृत्तपराऽस्तु।

एवं च 'श्रवणायापि बहुभिर्यो न लभ्यः' [क. उ. २-७] इति श्रवणात् येषां बुद्धिमान्द्यात् न्यायव्युत्पादनकुशलविशिष्टगुर्वलाभाद्वा श्रवणादि न सम्भवति, तेषामध्ययनगृहीतैर्वेदान्तैरापाततोऽधिगमितब्रह्मात्मभावानां तद्विचारं विनैव प्रश्नोपनिषदाद्युक्तं आर्षग्रन्थेषु ब्राह्मवासिष्ठा-

---

एवं श्रुतिसूत्राभ्यां निर्गुणस्योपास्यत्वं निरूप्य निर्गुणोपासनस्य श्रुत्यन्तरविरोधमाशङ्क्य परिहरति—**ननु तदेवेत्यादिना**। **तदेवेति**। बुद्ध्यादिसाक्षिचैतन्यमेवेत्यर्थः। उपास्यस्य ब्रह्मत्वनिषेधवत् वेद्यस्यापि ब्रह्मत्वनिषेधात् परब्रह्मवेदनमपि न सिद्ध्येदित्याह—**अन्यदेवेति**। 'वेदनविषयादन्यत् ब्रह्म' इत्युक्ते अर्थात् ब्रह्म वेद्यं न भवतीति सिद्ध्यतीत्यर्थः। **अस्त्वति**। वेद्यत्वमुपास्यत्वं वा ब्रह्मणि परमार्थतो नास्तीति निषेधश्रुतीनां तात्पर्यमिति भावः।

निर्गुणोपासनेऽधिकारिणं दर्शयति—**एवं चेति**। निर्गुणोपासने प्रमाणसिद्धे सतीत्यर्थः। केषांचित् मुमुक्षूणां श्रवणासम्भवे प्रमाणमाह—**श्रवणायापीति**। बहुभिर्मुमुक्षुभिः यः परमात्मा श्रोतुमपि न लभ्यते तस्य श्रुतस्यापि साक्षात्कारो दूरापास्त इत्यर्थः। बहूनां श्रवणालाभे श्रुत्यभिमतं कारणं दर्शयति—**येषामिति**। **बुद्धीति**। उक्तं च ध्यानदीपे—'अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाऽप्यसम्भवात्। यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम्॥' [पं.द. ९-५४] इति। तत्र सामग्र्यसम्भवं विवृणोति—**न्यायेति**। येषां अत्यन्तबुद्धिमान्द्यात् श्रवणादिकं न सम्भवति, येषां च कुशलमतीनामपि सामग्र्यभावात् श्रवणादिकं न सम्भवतीत्यर्थः। विशिष्टत्वं [1]असम्भिन्नार्यमर्यादत्वकारुणिकत्वादिलक्षणं बोध्यम्। तेषां ब्रह्मजिज्ञासाहेतुमाह—**अध्ययनेति**। अधिगमितः-अवगमितः ब्रह्मात्मभावो येषां ते तथोक्ताः, तेषामित्यर्थः। तेषां तद्विचारं विनैव गुरुभ्योऽवधार्य तदनुष्ठानात् साक्षात्कारः सम्पद्यत इति सम्बन्धः। निर्गुणब्रह्मविचारं विनैव निर्गुणब्रह्मोपासनानुष्ठानात् इत्यर्थः[2]। ननु प्रश्नोपनिषदादावुपासनमात्रमुक्तं न तु तदनुष्ठानप्रकारोऽपि, इत्याशङ्क्याह—**आर्षग्रन्थेष्विति**।

ननु—पञ्चीकरणे वेदान्तलक्ष्ये अखण्डैकरसे प्रणवमात्रात्मककृत्स्नप्रपञ्चप्रविलापनोक्तिपूर्वकं 'अहंब्रह्मास्मीत्यभेदेनावस्थानं समाधिः' इत्युक्त्वा 'योऽखण्डैकरसस्सोऽहमस्मीत्येवमुपासते' इत्युदाहृतध्यानदीपवचनेन च प्रकृतनिर्गुणोपासनं अहंग्रहरूपं विवक्षितम्। प्रश्नोपनिषद्गतशैब्यप्रश्ने तु ओंकाररूपे प्रतीके निर्गुणब्रह्मदृष्टिर्विव-

---

1. असम्भिन्नार्यमर्यादेति। अनुल्लङ्घितशिष्टाचारेत्यर्थः।

2. इत्यर्थः—'तद्विचारं विनैव तदनुष्ठानात्' इत्यस्यार्थः।

दिकल्पेषु पञ्चीकरणादिषु च अनेकशाखाविप्रकीर्णसर्वार्थोपसंहारेण कल्पसूत्रेष्वग्निहोत्रादिवत् निर्धारितानुष्ठानप्रकारं निर्गुणोपासनं सम्प्रदायमात्रविद्भ्यो गुरुभ्योऽवधार्य तदनुष्ठानात् क्रमेण उपास्यभूतनिर्गुणब्रह्मसाक्षात्कारः सम्पद्यते । अविसंवादिभ्रमन्यायेन उपास्तेरपि क्वचित् फलकाले प्रमापर्यवसानसम्भवात्, पाणौ पञ्च वराटकाः पिधाय केनचित् 'करे कति वराटकाः' इति पृष्टे 'पञ्च वराटकाः' इति तदुत्तरवक्तुः वाक्यप्रयोगमूलभूतसङ्ख्याविशेषज्ञानस्य मूलप्रमाणशून्यस्याहार्यारोपरूपस्यापि यथार्थत्ववत् निर्गुणब्रह्मोपासनस्य अर्थतथात्वविवेचकनिर्विचिकित्समूलप्रमाणनिरपेक्षस्य

क्षिता । तथा कठवल्ल्यामपि । तथा च कथं प्रश्नादिवाक्यं प्रकृतोपासने प्रमाणत्वेनोदाहृतमिति चेत्, न—प्रकृतोपासने तापनीयमाण्डूक्यमुण्डकश्रुतीनामेव प्रमाणत्वेन विवक्षितत्वात् । प्रश्नकठवल्लीश्रुत्युदाहरणं तु 'निर्गुणस्याप्युपासनं अन्यत्रापि दृष्टं' इत्येतावन्मात्रेणेति न विरोध इति भावः ।

पञ्चीकरणादिषु च निर्धारितानुष्ठानप्रकारमिति सम्बन्धः । तत्र दृष्टान्तमाह—**अनेकशाखेति** । अनेकासु शाखासु विप्रकीर्णतया - विशकलिततया स्थितानां पदार्थानां उपसंहारेण यथा अग्निहोत्रादिकर्म निर्धारितानुष्ठानप्रकारं भवति, तथेत्यर्थः । उपासनानुष्ठानप्रकारः सम्प्रदायः, तन्मात्रविद्भ्योऽपि गुरुभ्यः सकाशात् निश्चित्येत्यर्थः । उक्तं च भगवता श्रीकृष्णेन निर्गुणप्रकरणे —'श्रुत्वाऽन्येभ्य उपासते' [भ. गी. १३-२५] इति । **क्रमेणेति** । उपासनापरिपाकक्रमेणेत्यर्थः । ननु निर्गुणोपासनस्य कथं प्रमालक्षणसाक्षात्कारपर्यवसानं, इत्यत आह—**अविसंवादीति** । अयमर्थः—क्वचित् गृहविशेषे स्थितस्य श्रीकृष्णरूपबिम्बस्य प्रतिबिम्बं गृहात् बहिः पश्यतो दूरस्थितस्य पुरुषस्य प्रतिबिम्बे श्रीकृष्णोऽयमिति भ्रमो जायते, तेन भ्रमेण प्रतिबिम्बाध्यासोपाधिसमीपं गतस्य पुरुषस्य सत्यश्रीकृष्णगोचरप्रमा जायते इति लोकसिद्धम् । तत्र प्रतिबिम्बे बिम्बभूतश्रीकृष्णभ्रमोऽविसंवादिभ्रमः । विसंवादः फलाभावः, तद्रहितः - अविसंवादिभ्रमः, फलवद्भ्रम इति यावत् । यथा तेन भ्रमेण प्रवृत्तस्य श्रीकृष्णप्राप्तिलक्षणफलकाले श्रीकृष्णप्रमा जायते, तथा निर्गुणोपासने प्रवृत्तस्यापि ब्रह्मप्राप्तिलक्षणफलकाले निर्गुणप्रमा जायत इति । ननु—संवादिभ्रमदृष्टान्तेन निर्गुणोपास्तेः प्रमापर्यवसानमुक्तमनुपपन्नम्, दृष्टान्तवैषम्यात् । तत्र हि समीपोपसर्पणानन्तरं सत्यश्रीकृष्णस्य चक्षुस्सन्निकर्षे सति श्रीकृष्णप्रमा जायते, न तु संवादिभ्रममात्रात् । प्रकृते च निर्गुणोपासनस्य प्रमाजनने सामर्थ्याभावात् सामग्र्यन्तराभावाच्च कथं प्रमापर्यवसानं-इत्याशङ्क्य, निर्गुणोपासनस्यैव स्वसमानविषयकप्रमाजननसामर्थ्यसम्भावनाय तस्य यथार्थत्वं सदृष्टान्तमाह—**पाणाविति** । **पिधायेति** । तदुत्तरवक्तुरविदितमिति शेषः । **तदुत्तरेति** । दैवयोगात् 'पञ्चैव वराटकाः तव पाणौ सन्ति'इत्युत्तरवक्तुरित्यर्थः । निर्गुणोपासनस्यापि वस्तुतो यथार्थत्वेनेति सम्बन्धः । 'अखण्डैकरसं ब्रह्माहमस्मि' इति प्रत्ययसन्ततिरूपोपास्तेः विषयबाधाभावाद्यथार्थत्वमिति भावः । ननु प्रकृतोपासनस्य निर्विचिकित्सतत्त्वज्ञानपूर्वकत्वादेव श्रवणमननोत्तरकालीननिदिध्यासनस्येव यथार्थत्वसम्भवात् किमिति दैवयोगाद्यथार्थत्वं समर्थ्यते, तत्राह—**अर्थतथात्वेति** । अर्थस्य - ब्रह्मणः तथात्वं - प्रत्यग्रूपत्वनिष्प्रपञ्चत्वादि, तस्य विवेचकं - निर्णायकं यत्

दहराद्युपासनवत् उपासनाशास्त्रमात्रमवलम्ब्य क्रियमाणस्यापि वस्तुतो यथार्थत्वेन दहराद्युपासनेनेव निर्गुणोपासनेन जन्यस्य स्वविषयसाक्षात्कारस्य श्रवणादिप्रणालीजन्यसाक्षात्कारवदेव तत्त्वार्थविषयत्वावश्यंभावाच्च ।

इयांस्तु विशेषः–प्रतिबन्धरहितस्य पुंसः श्रवणादिप्रणाड्या ब्रह्मसाक्षात्कारो झटिति सिद्ध्यतीति साङ्ख्यमार्गो मुख्यः कल्पः, उपास्त्या तु विलम्बेनेति योगमार्गोऽनुकल्पः-इति ।

ब्रह्मसाक्षात्कारकरणविचारः

नन्वस्मिन् पक्षद्वयेऽपि ब्रह्मसाक्षात्कारे किं करणम् ?

केचिदाहुः—प्रत्ययाभ्यासरूपं प्रसङ्ख्यानमेव । योगमार्गे आदित आरभ्य उपासनरूपस्य साङ्ख्यमार्गे मननानन्तरनिदिध्यासनरूपस्य च तस्य सत्त्वात् । न च तस्य ब्रह्मसाक्षात्कारकरणत्वे मानाभावः । 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' [मु. उ. ३-१-८] इति श्रवणात् । कामातुरस्य व्यवहितकामिनीसाक्षात्कारे प्रसङ्ख्यानस्य करणत्वक्लृप्तेश्च, 'आप्रायणात् तत्रापि हि

निर्विचिकित्सं - अन्यपरत्वादिशङ्काशून्यं मूलप्रमाणं श्रुतिरूपं, तन्निरपेक्षस्येत्यर्थः । निदिध्यासनस्येव प्रकृतनिर्गुणोपासनस्य विचारपूर्वकत्वाभावात् न निर्विचिकित्सतत्त्वनिर्णयपूर्वकत्वप्रयुक्तं यथार्थत्वमिति भावः । ननु विचारपूर्वकं प्रत्यगभिन्नब्रह्मनिर्णयाभावे कथं 'अहंब्रह्मास्मि' इतिप्रत्ययसन्ततिरूपोपास्तिरनुष्ठीयते, तत्राह—**दहरादीति** । यथा सगुणस्येश्वरस्य विचारपूर्वकं जीवाभिन्नत्वनिर्णयाभावेऽपि 'स्वस्य सगुणेश्वराभेदचिन्तनं कर्तव्यम्' इत्येवंरूपं सगुणोपासनाविधिशास्त्रमवलम्ब्य सगुणोपासनं क्रियते, तथा 'निर्गुणोपासनं कर्तव्यम्' इत्येवमात्मकं शास्त्रमात्रमवलम्ब्य निर्गुणोपास्तिरनुष्ठीयते इत्यर्थः । निर्गुणोपासनस्य साक्षात्कारहेतुत्वे दृष्टान्तमाह—**दहराद्युपासनेनेवेति** । **अवश्यम्भावादिति** । समानविषयकध्यानसामर्थ्यात् विषयाबाधाच्चेत्यर्थः ।

साङ्ख्ययोगमार्गयोस्तुल्यकल्पत्वभ्रममपनयति—**इयांस्त्विति** । बुद्धिमान्द्यादिप्रतिबन्धरहितस्य विशिष्टगुर्वादिलाभे सति साङ्ख्यमार्ग एवानुष्ठेयः, तस्य त्वरया सिद्धिहेतुत्वात्; साङ्ख्यालाभे तु योगोऽनुष्ठेय इति अनुकल्पः सः-इत्यर्थः ।

नन्वस्मिन्निति । साङ्ख्ययोगमार्गद्वयेऽपीत्यर्थः । ननु योगमार्गे निर्गुणोपासनस्य सगुणोपासनदृष्टान्तेन साक्षात्कारकरणत्वस्य अनुपदमुक्तत्वात् पक्षद्वयसाधारण्येन प्रश्नानुपपत्तिरिति चेत्, नैष दोषः-उपासनस्य साक्षात्कारकरणत्वे प्रमाणाभिप्रायेण प्रश्नोपपत्तेः । अत एव तत्र प्रमाणं वक्ष्यति—न चेत्यादिना । अथवा, पूर्वत्र सगुणोपासनदृष्टान्तेन निर्गुणोपासनस्य हेतुत्वमात्रमुक्तं, न तु करणत्वम् । तथा च—योगमार्गेऽपि किमुपासनमेव करणं किंवाऽन्यदिति प्रश्नाभिप्रायः सङ्गच्छते-इति भावः । मार्गद्वयेऽपि साक्षात्कारोदयकाले प्रसङ्ख्यानस्यानुवृत्तिमाह—**योगमार्ग इत्यादिना** । निष्कलं-निर्विशेषं परमात्मानं ध्यायमानः ततः-ध्यानात् तं पश्यतीत्यर्थः । **कामातुरस्येति** । कामातुरस्य असन्निकृष्टकामिनीसाक्षात्कारे इत्यर्थः । तत्र

दृष्टम्' [ब्र. सू. ४-१-१२] इत्यधिकरणे 'विकल्पोऽविशिष्टफलत्वात्' [ब्र. सू. ३-३-५९] इत्यधिकरणे च दहराद्यहंग्रहोपासकानां प्रसङ्ख्यानादुपास्यसगुणब्रह्मसाक्षात्काराङ्गीकाराच्च। ननु च—प्रसङ्ख्यानस्य प्रमाणपरिगणनेष्वपरिगणनात् तज्जन्यो ब्रह्मसाक्षात्कारः प्रमा न स्यात्। न च काकतालीयसंवादिवराटकसङ्ख्याविशेषाहार्यज्ञानवत् अर्थाबाधेन प्रमात्वोपपत्तिः। प्रमाणामूलकस्य प्रमात्वायोगात्। आहार्यवृत्तेश्च उपासनावृत्तिवत् ज्ञानभिन्नमानसक्रियारूपतया इच्छादिवदबाधितार्थविषयत्वेऽपि प्रमात्वानभ्युपगमात्—मैवम् - क्लृप्तप्रमाकरणामूलकत्वेपि ईश्वरमायावृत्तिवत् प्रमात्वोपपत्तेः, विषयाबाधतौल्यात्। मार्गद्वयेऽपि प्रसङ्ख्यानस्य विचारितादविचारिताद्वा वेदान्तात् ब्रह्मावगतिमूलकतया प्रसङ्ख्यानजन्यस्य ब्रह्मसाक्षात्कारस्य प्रमाणमूलकत्वाच्च। उक्तं च कल्पतरुकारैः—"वेदान्तवाक्यजज्ञानभावनाजापरोक्षधीः। मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते॥' न च

सन्निकर्षाभावेन चक्षुषः करणत्वासम्भवात् मनसो बहिरस्वातन्त्र्याच्च कामिनीगोचरप्रसङ्ख्यानमेव करणमिति भावः। सगुणोपासनं प्रायणपर्यन्तमावर्तनीयम्, कुतः? तत्रापि-मरणकालेऽपि योगिनो ब्रह्मचिन्तनस्य श्रुतिस्मृतिसिद्धत्वात्, सदा प्रत्ययाभ्यासं विना मरणकाले तदसम्भवात्-इति सूत्रार्थः। अहंग्रहोपासनानां विकल्पः, उपास्यदेवतासाक्षात्कारलक्षणस्य फलस्य अविशिष्टत्वात्, एकार्थानां विकल्पस्य प्रसिद्धत्वात्—इति सूत्रार्थः। ब्रह्मसाक्षात्कारस्य प्रमाकरणजन्यत्वाभावेऽपि विषयाबाधात् प्रमात्वमाशङ्क्य निषेधति—**न च काकतालीयेति**। याद्दच्छिकेत्यर्थः। क्लृप्तज्ञानकरणाजन्यस्य ज्ञानत्वमेव नास्ति, प्रमात्वं तु दूरापास्तं इत्याशयेनाह—**प्रमाणामूलकस्येति**। अविसंवादिवराटकसङ्ख्याविशेषगोचराहार्यवृत्तेरपि ज्ञानत्वमसिद्धमित्याह—**आहार्यवृत्तेश्चेति**। अबाधितार्थज्ञानत्वं हि प्रमात्वं, न त्वबाधितार्थकत्वमात्रम्, अतिप्रसङ्गात् - इति मत्वा आह—**इच्छादिवदिति** 'ननु च प्रसङ्ख्यानस्य' इत्यादिना प्राप्तं चोद्यं परिहरति—**मैवमिति**। **मायावृत्तिवदिति**। न च मायावृत्तेरपि मास्तु ज्ञानत्वमिति वाच्यम्। तथासति ईश्वरीयमायावृत्तेः 'यस्सर्वज्ञः' इत्यादिश्रुतिषु ज्ञाधात्वर्थत्वाभावप्रसङ्गादिति भावः। **तौल्यादिति**। न च इच्छादावतिप्रसङ्ग इति वाच्यम्। तद्भिन्नत्वेन विशेषणोपपत्तेरिति भावः। प्रसङ्ख्यानजन्यसाक्षात्कारस्य प्रमाणमूलकत्वात् प्रमाणत्वमिति समाधानान्तरमाह—**मार्गद्वयेऽपीति**। अविचारितादिति योगमार्गाभिप्रायम्। वेदान्तात् या ब्रह्मावगतिः तन्मूलकतयेत्यर्थः। न च विचारितादविचारिताद्वा यदि ब्रह्मावगतिर्जाता तर्हि किमर्थं प्रसङ्ख्यानमिति वाच्यम्। प्रसङ्ख्यानात् पूर्वं अविद्यानिवर्तकाप्रतिबद्धब्रह्मावगतेरलाभात् तदर्थं तदावश्यकमिति भावः। प्रमाणाजन्यस्यापि प्रमाणप्रयोज्यत्वमात्रेण प्रमात्वे सम्मतिमाह—**उक्तं चेति**। ज्ञानभावना - ज्ञानाभ्यासरूपं प्रसङ्ख्यानं, तज्जन्यमपरोक्षज्ञानमित्यर्थः। मूलप्रमाणं - वेदान्तवाक्यं तज्जन्यप्रमा वा, तस्य दार्ढ्यं नाम अविप्रतिपन्नप्रामाण्यकत्वमिति बोध्यम्। प्रसङ्ख्यानजन्यसाक्षात्कारनिष्ठप्रामाण्यज्ञप्तौ मूलप्रमाणज्ञप्त्यपेक्षायामपसिद्धान्तापात इति शङ्कते—**न चेति**। प्रसङ्ख्यानजसाक्षात्कारनिष्ठमपि प्रामाण्यं नियमेन स्वाश्रयग्राहकसाक्षिभास्यमेवेति न तत्प्रामाण्यज्ञप्त्यर्थं मूलप्रमाणानुसरणं, किं तु प्रसङ्ख्यानजन्यव्यवहितकामिनीसाक्षात्कारस्याप्रमात्वदर्शनात् प्रसङ्ख्यानजन्यब्रह्मसाक्षात्कारेऽपि कदाचिद्-

प्रामाण्यपरतस्त्वापातः अपवादनिरासाय मूलशुद्ध्यनुरोधात्" [ब्र. सू. १-१-१] इति।

अन्ये तु—'एषोऽणुरात्मा चेतसा वेदितव्यः' '[मु.उ. ३-१-९] 'दृश्यते त्वग्र्यया बुद्ध्या' [क.उ. ३-१२] इत्यादिश्रुतेः मन एव ब्रह्मसाक्षात्कारे करणम्। तस्य सोपाधिकात्मनि अहं-वृत्तिरूपप्रमाकरणत्वक्लृप्तेः, 'स्वप्नप्रपञ्चविपरीतप्रमात्रादिज्ञानसाधनस्यान्तःकरणस्य' इत्यादिपञ्च-पादिकाविवरणग्रन्थैरपि तथा प्रतिपादनात् 'अहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः' [बृ.उ. ४-३-२०] इति श्रुत्युक्ते स्वाप्ने ब्रह्मसाक्षात्कार एव मनसः करणत्वसम्प्रतिपत्तेश्च, तदा करणान्तराभावात्। प्रसङ्ख्यानं तु मनस्सहकारिभावेनापि उपयुज्यते। 'वाक्यार्थभावनापरिपाक-सहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतां [1]आविर्भावयति' [ब्र.सू.१-१-१] इति भामतीवचनात्। 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' [मु.उ. ३-१-८] इति श्रुतावपि ज्ञानप्रसादशब्दितचित्तैकाग्र्यहेतुतयैव ध्यानोपादानात्। न तु प्रसङ्ख्यानं स्वयं करणम्। तस्य क्वचिदपि ज्ञानकरणत्वाक्लृप्तेः, कामातुरकामिनीसाक्षात्कारादावपि प्रसङ्ख्यानसहकृतस्य मनस एव करणत्वोपपत्त्या अक्लृप्तज्ञानकरणान्तरकल्पनायोगात्-इत्याहुः।

प्रामाण्यशङ्का सम्भाव्यते, ततस्तन्निरासाय मूलप्रमाणानुसरणमिति नापसिद्धान्त इति भावः। **अपवादेति**। अप्रामाण्यशङ्का अपवादः।

प्रसङ्ख्यानमात्रं न साक्षात्कारे करणं, किं तु तत्सहकृतं मनस्तत्र करणं - इति मतं दर्शयति—**अन्ये त्विति**। अणुः - दुर्विज्ञेयः। अग्र्यत्वं - प्रसङ्ख्यानसंस्कृतत्वम्। मनसैवानुद्रष्टव्यमित्यादिश्रुतिः आदिपदार्थः। जीवसाक्षात्कारे मनसः करणत्वे सम्मतिमाह—**स्वप्नेति**। प्रातिभासिकस्वप्नप्रपञ्चापेक्षया विपरीतो व्यावहारिकः प्रमात्रादिः, तज्ज्ञानसाधनस्येत्यर्थः। आदिपदं प्रमेयादिसङ्ग्रहार्थम्। **तथेति**। प्रमातृशब्दितसोपाधिकात्म-साक्षात्कारे मनसः करणतयेति तथाशब्दार्थः। निरुपाधिकात्मसाक्षात्कारेऽपि मनसः करणत्वं क्लृप्तमित्याह—**अहमेवेति**। 'इदं - सद्रूपेण सर्ववस्तुष्वनुभूयमानं सर्वात्मकं ब्रह्मैवाहमस्मि, ततः सर्वोऽस्मि' इति स्वप्ने ब्रह्मविन्मन्यते इत्यर्थः। ननु स्वप्ने ब्रह्मविदो महावाक्यानुसन्धानसम्भवात् वाक्यमेव करणं किं न स्यात्, इत्यत आह—**तदेति**। स्वप्ने महावाक्यानुसन्धानस्यानियतत्वात् वाक्यस्यापरोक्षधीहेतुत्वानुपगमाच्च इति भावः। सम्मतिमाह-**वाक्यार्थेति**। महावाक्यार्थेत्यर्थः। स्थूलसूक्ष्मकारणोपाधीनां 'नेति नेति' इत्यादिवाक्यैर्निषेधद्वारा शोधितो यस्त्वम्पदार्थः स्वप्रकाशचैतन्यात्मकः, तस्य पूर्णतामाविर्भावयति। आविर्भावश्च वृत्तिसाक्षात्कार इत्यर्थः। यत्तु 'निष्कलं ध्यायमानः ततो ध्यानात्तं पश्यते' इति योजनामभिप्रेत्य ध्यानस्य साक्षात्कारकरणत्वं श्रुतिसिद्धमित्युक्तं, तद्दूषयति—**ज्ञानप्रसादेनेति**। करणव्युत्पत्त्या ज्ञानपदं चित्तपरम्। ज्ञानस्य प्रसादः - ऐकाग्र्यम्। तथा च 'ध्यायमानः ध्यानाल्लब्धेन ज्ञानप्रसादेन पश्यते' इति योजना विवक्षितेति भावः। एवं योजनायां विनिगमकं पूर्वोदाहृतानि मनसः करणत्वबोधकवचनान्येव - इत्यभिप्रेत्य प्रसङ्ख्यानमात्रस्य करणत्वं दूषयति—**न त्विति**।

---

1. अनुभावयति—इति मुद्रिते पाठः।

अपरे तु—'तद्धास्य विजज्ञौ' [छा.उ. ६-१-१५] 'तमसः पारं दर्शयति' [छा.उ.७-२६] 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरम्' [छा.उ.६-१४] इत्यादिश्रुतिषु आचार्योपदेशानन्तरमेव ब्रह्मसाक्षात्कारोदये जीवन्मुक्तिश्रवणात् 'वेदान्तविज्ञानसुनिश्चितार्थाः' [मु.उ. ३-२-६] इति ज्ञानान्तरनैराकाङ्क्ष्यश्रवणात् 'तं त्वौपनिषदं पुरुषम्' [बृ.उ.३-९-२६] इति ब्रह्मण उपनिषदेकगम्यत्वश्रवणाच्च, औपनिषदं महावाक्यमेव ब्रह्मसाक्षात्कारे करणम्। न मनः। 'यन्मनसा न मनुते' [के.उ. १-६] इति तस्य ब्रह्मसाक्षात्कारकरणत्वनिषेधात्। न चापक्वमनोविषयमिदम्। 'येनाहुर्मनो मतम्' [के.उ. १-६] इति वाक्यशेषे मनोमात्रग्रहणात्। न चैवं 'यद्वाचाऽनभ्युदितम्' [के.उ. १-४] इति शब्दस्यापि तत्करणत्वं निषिध्यत इति शङ्क्यम्। मनःकरणत्ववादिनामपि

महावाक्यमेव तत्र करणमिति मतमाह—**अपरे त्विति**। अस्य - पितुरुपदेशात् तत् - ब्रह्म विजज्ञौ - साक्षात्कृतवान् ह - किल इत्यर्थः। पारं - अधिष्ठानभूतं ब्रह्म। तस्य-विदुषः तावानेव विलम्बो विदेहकैवल्यं प्रति, यावत् प्रारब्धात् न विमोक्ष्यते - इत्यर्थः। **वेदान्तेति**। अत्र वेदान्तजन्यज्ञानादेव ब्रह्मात्मैक्यलक्षणस्यार्थस्य सुनिश्चितत्वोक्त्या वाक्यार्थावगत्यनन्तरं प्रसङ्ख्यानानुष्ठानं नापेक्षितमिति प्रतीयते। इदं च तन्नैरपेक्ष्यं वाक्यादेवापरोक्षज्ञानोत्पत्तिपक्षे सङ्गच्छते। अन्यथा अपरोक्षज्ञानाय तस्यापेक्षितत्वात् तन्नैरपेक्ष्यं न सङ्गच्छते। अतो वेदान्तविज्ञानश्रुत्या वाक्यमेवापरोक्षज्ञाने करणमिति निश्चीयत इति भावः। **महावाक्यमेवेति**। साङ्ख्यमार्गानुष्ठानेन योगमार्गानुष्ठानेन वा दृष्टादृष्टलक्षणसकलप्रतिबन्धक्षये सति प्रतिबन्धरहितं सत् वाक्यमेव साक्षात्कारं जनयतीति वाक्यस्य करणत्वपक्षे न साङ्ख्ययोगमार्गयोर्वैयर्थ्यशङ्केति मन्तव्यम्। लोको मनसा यत् चैतन्यं न मनुते तदेव त्वं ब्रह्म विद्धि - इति योजना। 'न मनुते' इति वाक्यं अशुद्धमनस एव ब्रह्मज्ञानकरणत्वं निषेधतीति न च - इत्यत्र हेतुमाह—**येनाहुरिति**। 'येन - चैतन्येन मतं - प्रकाशितं मनः' इति वाक्यशेषे 'अपक्वमन एव चैतन्यभास्यम्' इति वक्तुमशक्यतया तत्र मनोमात्रग्रहणमावश्यकम्, तदैकरूप्याय 'न मनुते' इति पूर्ववाक्येऽपि मनोमात्रं ग्राह्यमित्यर्थः। **न चैवमिति**। मनोमात्रस्य ब्रह्मज्ञानकरणत्वनिषेधोपगमे इत्यर्थः। **अनभ्युदितमिति**। अप्रकाशितमित्यर्थः। न च 'वाचा' इत्यस्य वेदान्तातिरिक्तशब्दपरत्वं स्वीक्रियत इति वाच्यम्। अत्रापि 'येन वागभ्युद्यते' इति वाक्यशेषे शब्दमात्रस्य चैतन्यप्रकाश्यत्वप्रतिपादनेन तदैकरूप्याय पूर्ववाक्येऽपि 'वाचा' इत्यस्य शब्दमात्रपरत्वात्—इत्याशयवानाह—**शब्दस्यापीति**। मनोमात्रस्येव शब्दमात्रस्यापीत्यर्थः। सत्यं शब्दमात्रस्य ब्रह्मज्ञानकरणत्वं निषेधति, तथापि शब्दस्य शक्त्या ब्रह्मज्ञानकरणत्वनिषेधपरं तद्वचनं, न तु लक्षणयापि तत्करणत्वनिषेधपरम्, औपनिषदत्वश्रुतेर्निरालम्बनत्वप्रसङ्गात् - इति समाधानमभिप्रेत्य, विपक्षे परेषामपि बाधकं सूचयति—**मनःकरणत्ववादिनामपीति**। वेदान्तानां लक्षणयाऽपि ब्रह्मबोधकत्वानभ्युपगमे ब्रह्मण एवासिद्ध्यापत्त्या मनःकरणत्ववादिभिरपि तेषां ब्रह्मज्ञानकरणत्वस्याभ्युपगन्तव्यत्वादित्यर्थः। परं तु वाक्यजन्यं ब्रह्मज्ञानं परोक्षं

शब्दस्य निर्विशेषे परोक्षज्ञानकरणत्वस्याभ्युपगतत्वेन तस्य 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' [तै. उ. २-४/५] इति श्रुत्यनुरोधेन शब्दार्थप्राप्तिरूपशक्तिमुखेन शब्दस्य तत्करणत्वनिषेधे तात्पर्यस्य वक्तव्यतया शक्यसम्बन्धरूपलक्षणामुखेन तस्य तत्करणत्वाविरोधात्। न च 'मनसैवानुद्रष्टव्यम्' [बृ. उ. ४-४-१९] इतिश्रुतिसिद्धं मनसोऽपि तत्करणत्वं न पराकर्तुं शक्यमिति वाच्यम्। शाब्दसाक्षात्कारजननेऽपि तदैकाग्र्यस्यापेक्षितत्वेन हेतुत्वमात्रेण तृतीयोपपत्तेः। 'मनसा ह्येव पश्यति मनसा शृणोति' [बृ. उ. १-५-३] इत्यादौ तथा दर्शनात्, गीताविवरणे भाष्यकारीयमनःकरणत्ववचनस्य मतान्तराभिप्रायेण प्रवृत्तेः - इत्याहुः।

ननु तथाऽपि शब्दस्य परोक्षज्ञानजनकत्वस्वभावस्यापरोक्षज्ञानजनकत्वं न सङ्गच्छते-इति चेत् अत्र केचित् - स्वतोऽसमर्थोऽपि शब्दः शास्त्रश्रवणमननपूर्वकप्रत्ययाभ्यासजनितसंस्कारप्रचयलब्धब्रह्मैकाग्र्यवच्चित्तदर्पणानुगृहीतः अपरोक्षज्ञानमुत्पादयति, शास्त्रीयसंस्कारसहकृताग्न्यधि-

---

भवतां मते, अस्माकं मते तु तदपरोक्षमिति विशेषः - इत्याशयेनाह—**परोक्षेति**। वेदान्तानां शक्त्या ब्रह्मबोधकत्वनिषेधपरं 'यद्वाचाऽनभ्युदितम्' इतिवचनं इति व्यवस्थायां श्रुत्यन्तरमनुकूलयति—**तस्येति**। 'यद्वाचानभ्युदितम्' इति निषेधवचनस्येत्यर्थः। **अप्राप्येति**। श्रुत्या ब्रह्मणि विषये शब्दानां प्राप्तिर्निषिध्यते, सा च प्राप्तिः शक्तिरेव, तस्याः शब्दानामौत्सर्गिकत्वादिति भावः। **वक्तव्यतयेति**। मनःकरणत्ववादिभिरपीति शेषः। **तस्येति**। शब्दस्येत्यर्थः। **तदिति**। ब्रह्मसाक्षात्कारेत्यर्थः। ब्रह्मगोचरवृत्तिं प्रति करणत्वं न तृतीयाश्रुत्यर्थः, पूर्वोदाहृतश्रुतिविरोधात्। किं त्वेकाग्रस्य मनसः तां प्रत्युपादानतया हेतुत्वमात्रं तदर्थः-इत्याह—**शब्दसाक्षात्कारजननेऽपीति**। **तथेति**। चाक्षुषज्ञानादौ मनसः करणत्वाभावेन हेतुत्वमात्रेणापि तृतीयादर्शनादित्यर्थः। 'शमदमादिसंस्कृतं मन एवात्मदर्शने करणम्' इति गीताभाष्यवचनविरोधं परिहरति—**गीतेति**। **मतान्तरेति**। वृत्तिकारमतेत्यर्थः। न तु स्वमताभिप्रायेण, उक्तप्रमाणविरोधादिति भावः।

ननु तथाऽपीति। शब्दस्य ब्रह्मसाक्षात्कारकरणत्वपक्षे श्रुतिभाष्यविरोधाभावेऽपि शब्दप्रमाणस्वभावविरोधात् न महावाक्यं ब्रह्मसाक्षात्कारे करणमित्यर्थः।

शब्दस्वभावमनुरुध्यैव तस्यापरोक्षज्ञानकरणत्वं साधयति—**अत्र केचिदिति**। प्रचयः-समूहः। प्रचयलब्धं यत् ब्रह्मण्यैकाग्र्यं, तद्वच्चित्तमेव दर्पणं, तदनुगृहीत इत्यर्थः। यथा चक्षुः स्वतः प्रतिबिम्बानुभवजननासमर्थमपि दर्पणानुगृहीतं सत् तदनुभवं जनयति तद्वदिति सूचयति—**चित्तदर्पणेति**। **शास्त्रीयेति**। यथा आधानादिजनितसंस्काररहिताग्न्यधिकरणको होमस्तावत् अपूर्वं न जनयति, अग्न्यधिकरणकहोममात्रस्यापूर्वजननस्वभावाभावात्। शास्त्रीयसंस्कारविशिष्टाग्न्यधिकरणकहोमस्तु अपूर्वं जनयति, तद्वदित्यर्थः। ननु - दृष्टान्ते शास्त्रबलात्तथा स्वीक्रियते, प्रकृते तथा शास्त्रं नोपलभ्यते, इत्यत आह—**तरतीति**। नन्वनया श्रुत्या चिदात्मन्यध्यस्तस्य

करणक इव होमोऽपूर्वम् - इति कल्प्यते । 'तरति शोकमात्मवित्' [छा. उ. ७-१-३] इति शास्त्रप्रामाण्यात् । अपरोक्षस्य कर्तृत्वाद्यध्यासस्य अपरोक्षाधिष्ठानज्ञानं विना निवृत्त्ययोगात्, औपनिषदे च ब्रह्मणि मानान्तराप्रवृत्तेः, शब्दादप्यपरोक्षज्ञानानुत्पत्तौ अनिर्मोक्षप्रसङ्गात्—इत्याहुः ।

अन्ये तु—भावनाप्रचयसाहित्ये सति बहिरसमर्थस्यापि मनसो नष्टवनितासाक्षात्कारजनकत्वदर्शनात् निदिध्यासनसाहित्येन शब्दस्याप्यपरोक्षज्ञानजनकत्वं युक्तमिति दृष्टानुरोधेन समर्थयन्ते ।

अपरे तु—अपरोक्षार्थविषयत्वं ज्ञानस्यापरोक्षत्वं नाम । अन्यानिरुक्तेः । अर्थापरोक्षत्वं तु नापरोक्षज्ञानविषयत्वं, येनान्योन्याश्रयः स्यात् । किं तु तत्तत्पुरुषीयचैतन्याभेदः । अन्तःकरण-

---

शोकोपलक्षितकर्तृत्वाद्यध्यासस्य आत्मवेदनान्निवृत्तिरुच्यते, न तु शब्दस्यापरोक्षज्ञानकरणत्वं, इत्यत आह—**अपरोक्षस्येति** । यथा दृष्टान्ते होमाधिकरणस्याग्नेराधानादिसंस्कृतत्वश्रवणान्यथानुपपत्त्या 'शास्त्रीयाधानसंस्कारसहकृताग्न्यधिकरणको होमोऽपूर्वं जनयति' इति कल्प्यते, तथा आत्मज्ञानस्यापरोक्षाध्यासनिवर्तकत्वश्रवणान्यथानुपपत्त्या आत्मज्ञानजनकवेदान्तानामेवापरोक्षज्ञानकरणत्वं कल्प्यते इत्यर्थः । **अयोगादिति** । सत्यपि श्रवणजनितपरोक्षज्ञाने कर्तृत्वाद्यध्यासनिवृत्त्यदर्शनात् परोक्षज्ञानमात्रेणाध्यासनिवृत्तौ मननादिविधिवैयर्थ्यप्रसङ्गाच्च अपरोक्षाध्यासरूपदिग्भ्रमादिषु दिग्याथात्म्यादिसाक्षात्कारं विना निवृत्त्यदर्शनाच्च इति भावः । ननु - कर्तृत्वाद्यध्यासनिवर्तकमधिष्ठानात्मतत्त्वसाक्षात्काररूपं ज्ञानं मनसैव सम्भवति, किं शब्दस्य तत्करणत्वकल्पनयेति, तत्राह—**औपनिषदे चेति** । अन्तरिन्द्रियस्य मनसः प्रत्यक्षप्रमाणत्वेन ब्रह्मणस्तद्गम्यत्वे उपनिषदेकगम्यत्वप्रतिपादकश्रुतिबाधप्रसङ्ग इति भावः । नन्वौपनिषदत्वश्रुतिविरोधेन ब्रह्मणि मानान्तराप्रवृत्तौ शब्दस्वभावविरोधेन शब्दस्यापि ब्रह्मसाक्षात्कारजनने प्रवृत्तिर्न सम्भवति, तथा च ब्रह्मसाक्षात्कारकरणस्यैवालाभात् मास्तु तत्साक्षात्कार इति, अत आह—**शब्दादपीति** । तथा च मोक्षशास्त्रप्रामाण्याय शब्दस्यैव साक्षात्कारकरणत्वं कल्पनीयमिति भावः ।

शास्त्रप्रामाण्यमनुपजीव्यापि शब्दस्यापरोक्षज्ञानकरणत्वं साधयति—**अन्ये त्विति** ।

इदानीं - शब्दस्य परोक्षज्ञानजननस्वाभाव्यमेवासिद्धम्, अतो नित्यापरोक्षे ब्रह्मणि वेदान्तानां साक्षात्कारकरणत्वं निरपवादम् - इति मतान्तरमाह—**अपरे त्विति** । नन्विन्द्रियजन्यज्ञानत्वादिकमेव ज्ञानस्यापरोक्षत्वं, ब्रह्मगोचरशाब्दज्ञानस्य तु तदभावान्नापरोक्ष्यं, इत्यत आह—**अन्यानिरुक्तेरिति** । इन्द्रियजन्यज्ञानत्वादेश्च प्रथमपरिच्छेदावसाने निरस्तत्वादिति भावः । ननु - अर्थस्यापरोक्षत्वं अपरोक्षज्ञानविषयत्वम्, अन्यस्यानिर्वचनात् । तथाचान्योन्याश्रयः - अर्थस्यापरोक्षत्वज्ञप्तौ ज्ञानस्यापरोक्षत्वज्ञप्तिः, ज्ञानस्यापरोक्षत्वज्ञप्तौ चार्थस्यापरोक्षत्वज्ञप्तिरिति, इत्याशङ्क्य, अन्यानिर्वचनमसिद्धमित्यभिप्रेत्याह—**अर्थापरोक्षत्वं त्विति** । **तत्तदिति** । तत्तत्प्रमातृचैतन्याभिन्नत्वं तस्य तस्य विषयस्य तं तं प्रमातारं प्रत्यपरोक्षत्वं, तत्तत्प्रमातृचैतन्याभिन्नार्थ-

तद्धर्माणां साक्षिणि कल्पिततया तदभेदसत्त्वात्, बाह्यचैतन्ये कल्पितानां घटादीनां बाह्यचैतन्ये वृत्तिकृततत्तत्पुरुषीयचैतन्याभेदाभिव्यक्त्या तदभेदसत्त्वाच्च न क्वाप्यव्याप्तिः। न च अन्तःकरण-तद्धर्माणां ज्ञानादीनामिव धर्माधर्मसंस्काराणामपि साक्षिणि कल्पितत्वाविशेषात् आपरोक्ष्यापत्तिः। तेषामनुद्भूतत्वात्, उद्भूतस्यैव जडस्य चैतन्याभेदे आपरोक्ष्यं इत्यभ्युपगमात्। एवं च सर्वदा सर्वपुरुषचैतन्याभिन्नत्वात् 'यत्साक्षादपरोक्षात् ब्रह्म' [बृ. उ. ३-४-१] इति श्रुत्या स्वत एवापरोक्षं ब्रह्मेति अपरोक्षार्थविषयत्वात् शाब्दस्यापि ब्रह्मज्ञानस्य अपरोक्षत्ववाचोयुक्तिर्युक्ता—इत्याहुः।

विषयकं ज्ञानं तत्तत्प्रमातुः तत्तत्प्रमातृचैतन्याभिन्ने विषये अपरोक्षज्ञानमित्यर्थः। न च अर्थापरोक्ष्यादावननुगम इति वाच्यम्। ज्ञानगतस्यानुगतापरोक्षत्वस्य जातिरूपस्योपाधिरूपस्य वा प्राक् निरस्तत्वेन तदभावादेव अर्थापरोक्ष्यस्याप्यनुगतस्यासम्भवेन तस्यादोषत्वादिति भावः। ननु प्रमातृचैतन्याभिन्नत्वरूपस्यार्थापरोक्ष्यस्य जडरूपापरोक्षार्थे अव्याप्तिः, चैतन्यजडयोरैक्यस्य बाधितत्वात्, इत्यत आह—**अन्तःकरणेति। तदभेदसत्त्वादिति।** साक्षिशब्दितप्रमातृचैतन्याभेदसत्त्वादित्यर्थः। तथा च अर्थापरोक्ष्यनिर्वचने कल्पिताकल्पितसाधारणाभेदस्य विवक्षितत्वेन प्रमातृचैतन्यब्रह्मचैतन्ययोरिव प्रमातृचैतन्यजडयोः अकल्पिताभेदाभावेऽपि 'जडं सत्' इति सामानाधिकरण्यानुभवसिद्धकल्पिताभेदसत्त्वात् नाव्याप्तिरिति भावः। आन्तरजडपदार्थेषु प्रमातृचैतन्याभिन्नत्वमुपपाद्य बाह्यापरोक्षार्थेषु तदुपपादयति—**बाह्येति।** अन्तःकरणतद्धर्माणां तदभेदसत्त्वात् घटादीनां तदभेदसत्त्वाच्च न क्वापि आन्तरार्थे बाह्यार्थे वा अव्याप्तिरिति सम्बन्धः। घटादीनां तत्तत्पुरुषीयचैतन्याभेदसत्त्वे हेतुमाह—**बाह्यचैतन्ये वृत्तिकृततत्तत्पुरुषीयचैतन्याभेदाभिव्यक्त्येति।** ननु बाह्यचैतन्यस्य तत्तत्पुरुषीयचैतन्यस्य च वस्तुतः सदा अभेदसत्त्वेऽपि तदभिव्यक्तिः कुतः, इत्यत आह—**वृत्तिकृतेति।** बाह्ये विषयावच्छिन्नचैतन्ये चक्षुरादिद्वारा निर्गताया वृत्तेः संसर्गे सति वृत्तिवृत्तिमतोरभेदात् वृत्तिमदन्तःकरणस्यापि तत्र संसर्गो लभ्यते, तथा च वृत्तिसंसृष्टबाह्यचैतन्यमेव अन्तःकरणसम्बन्धात् तत्तत्पुरुषीयचैतन्यं भवति, इत्यनेन प्रकारेण बाह्यचैतन्ये वृत्तिकृता तत्तत्पुरुषीयचैतन्याभेदाभिव्यक्तिर्भवतीत्यर्थः। ननु उक्तप्रकारेण बाह्यचैतन्यस्य प्रमातृचैतन्याभिन्नत्वसिद्धावपि घटादीनां प्रमातृचैतन्याभिन्नत्वमसिद्धमेव, इत्याशङ्क्याह—**बाह्यचैतन्ये कल्पितानामिति।** बाह्यचैतन्ये तावत् घटादीनामभेदः प्रागेव सिद्धः, तत्र तेषां कल्पितत्वात्। तथा च बाह्यचैतन्यस्य वृत्तिकृततत्तत्पुरुषीयचैतन्याभेदाभिव्यक्तिदशायां घटादीनामपि तत्तत्पुरुषीयचैतन्याभिन्नत्वं सिद्ध्यतीति भावः। अर्थापरोक्ष्यलक्षणस्यातिव्याप्तिमाशङ्क्य निराकरोति—**न चेत्यादिना। धर्मेति।** धर्मादीनामपि अधिष्ठानभूतप्रमातृचैतन्येन सह अभिन्नसत्ताकत्वरूपाभेदसत्त्वादिति भावः। उद्भूतत्वे सति प्रमातृचैतन्याभिन्नत्वं अर्थापरोक्ष्यम्, उद्भूतत्वं च फलबलकल्प्यःस्वभावविशेषः, स च धर्मादेर्नास्तीति परिहारार्थः। एवं शब्दस्य ब्रह्मसाक्षात्कारे करणत्वसिद्ध्यर्थं उपोद्घातं कृत्वा प्रकृतं दर्शयति—**एवं चेति।** ज्ञानापरोक्ष्यस्य अर्थापरोक्ष्यप्रयुक्तत्वे सतीत्यर्थः। **अभिन्नत्वादिति।** जीवरूपप्रमातुः ब्रह्माभेदस्य श्रुतिसिद्धत्वादिति भावः। इदं च ब्रह्मणो जीवाभिन्नत्वं जडस्य प्रमातृचैतन्याभिन्नत्ववत् काल्पनिकं न भवति, किं तु वास्तवैक्यरूपं

अद्वैतविद्याचार्यास्तु—**नापरोक्षार्थविषयत्वं ज्ञानस्यापरोक्ष्यम्, स्वरूपसुखापरोक्षरूपस्वरूपज्ञानाव्यापनात्। स्वविषयत्वलक्षणस्वप्रकाशत्वनिषेधात्। किं तु यथा तत्तदर्थस्य स्वव्यवहारानुकूलचैतन्याभेदोऽर्थापरोक्ष्यम्, एवं तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभेदो ज्ञानापरोक्ष्यम्। तथा च चैतन्यधर्म एवापरोक्ष्यं, न त्वनुमितित्वादिवत् अन्तःकरणवृत्तिधर्मः। अत एव सुखादिप्रकाशरूपे साक्षिणि स्वरूपसुखप्रकाशरूपे चैतन्ये च आपरोक्ष्यम्। न च घटाद्यैन्द्रियकवृत्तौ**

इत्याशयेनाह—**स्वत एवेति**। ब्रह्मणो नित्यापरोक्षप्रमातृचैतन्याभेदे श्रुतिमाह—**यत्साक्षादिति**। ब्रह्म जडवत् स्वव्यतिरिक्तप्रमातृचैतन्यमपेक्ष्य अपरोक्षं न भवति, किं तु साक्षात्प्रमातृचैतन्यस्वरूपत्वादेवापरोक्षं इत्यर्थः।

ज्ञानापरोक्ष्यं अर्थापरोक्ष्यं च प्रकारान्तरेण निरूपयति—**अद्वैतविद्याचार्यास्त्विति**। पूर्वोक्तं ज्ञानापरोक्ष्यलक्षणं अव्याप्त्या दूषयति—**नापरोक्षेति**। स्वरूपसुखस्य आपरोक्ष्यरूपे स्वरूपज्ञाने अव्यापनादित्यर्थः। ननु आत्मस्वरूपसुखानुभवस्य साक्षिचैतन्यरूपस्य स्वप्रकाशत्वाभ्युपगमात् स्वप्रकाशत्वस्य च स्वविषयकत्वरूपत्वात् स्वरूपसुखविषयकत्वं तदपरोक्षरूपे स्वरूपज्ञाने निरपवादं, इत्यत आह—**स्वविषयत्वलक्षणेति**। एकस्मिन् चैतन्ये विषयविषयिभावलक्षणसम्बन्धो न सम्भवति, सम्बन्धस्य द्विनिष्ठत्वात्, स्वविषयत्वं विनाऽपि स्वसत्ताप्रयुक्तसंशयाद्यगोचरत्वादिलक्षणस्य स्वप्रकाशत्वस्य आकरेषु निरूपितत्वादिति भावः। किं तर्हि ज्ञानापरोक्ष्यं इति पृच्छति—**किं त्विति**। ज्ञानापरोक्ष्यनिर्वचनं प्रति दृष्टान्तव्याजेन प्रथमं अर्थापरोक्ष्यं निर्वक्ति—**यथेति**। अर्थस्य स्वव्यवहारानुकूलचैतन्याभिन्नत्वं अपरोक्षत्वम्। अस्ति च अन्तःकरणतद्धर्माणां स्वव्यवहारानुकूलेन साक्षिचैतन्येन अभिन्नत्वं, तत्र तेषामध्यस्तत्वात्। तथा घटादीनामपि स्वव्यवहारानुकूलेन घटादिगोचरवृत्त्युपहितेन घटाद्यधिष्ठानचैतन्येन अभिन्नत्वमस्ति। तथा च ब्रह्मणोऽपि स्वव्यवहारानुकूलेन स्वगोचरवृत्त्युपहितेन साक्षिचैतन्येन अभिन्नत्वमस्तीति न क्वाप्यव्याप्तिः। घटाद्यर्थस्य चैतन्ये कल्पितस्य चैतन्याभिन्नत्वं सदा वर्तते अपरोक्षत्वं तु सदा नास्तीति स्वव्यवहारानुकूलेत्युक्तम्। घटादिगोचरवृत्तिदशायामेव घटाद्यधिष्ठानचैतन्यं घटादिव्यवहारानुकूलं भवति न सर्वदेति नातिप्रसङ्गः। ननु—तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभिन्नत्वं अपरोक्षत्वमस्तु नाम। तथाऽपि ज्ञानापरोक्ष्यं नोक्तरूपमेव, वृत्तिरूपज्ञानस्य चैतन्यापेक्षया भिन्नत्वात्, इत्यत आह—**तथा चेति**। चैतन्यस्यैव तत्तदर्थव्यवहारानुकूलत्वे विवक्षिते सतीत्यर्थः। तथा च 'ज्ञानापरोक्ष्यम्' इत्यत्र ज्ञानपदं चैतन्यपरमेव न वृत्तिज्ञानपरमिति नानुक्तिदोष इति भावः। 'तत्तदर्थव्यवहारानुकूलत्वे सति तत्तदर्थाभिन्नत्वरूपं ज्ञानापरोक्षत्वं चैतन्यधर्म एव' इत्यत्र युक्तिमाह—**अत एवेति**। चैतन्यधर्मत्वाभ्युपगमादेवेत्यर्थः। तस्य वृत्तिधर्मत्वे तु सुखदुःखादिगोचरापरोक्षवृत्त्यनङ्गीकारात् सुखदुःखादिभासकसाक्षिचैतन्ये वृत्तिधर्मस्यापरोक्ष्यस्य असम्भवाच्च सुखदुःखादेरपरोक्षत्वानुभवविरोधः स्यादिति भावः। लक्षणे सत्यन्तं वह्निगोचरानुमितिवृत्त्युपहिते जीवचैतन्ये वह्निव्यवहारानुकूले गतमिति तत्रातिव्याप्तिवारणाय विशेष्यम्। अनुमितिवृत्तेः विषयदेशे गमनाभावेन तद्वृत्त्यवच्छिन्नचैतन्यस्य न वह्न्यभिन्नत्वमिति नातिव्याप्तिः। घटादिगोचरवृत्त्यभावदशायां घटाद्यवच्छिन्नचैतन्ये घटाद्यपरोक्षत्वरहिते घटाद्यर्था-

तदनुभवविरोधः। अनुभवस्य वृत्त्यवच्छिन्नचैतन्यगतापरोक्ष्यविषयत्वोपपत्तेः।

ननु उक्तं ज्ञानार्थयोरापरोक्ष्यं हृदयादिगोचरशाब्दवृत्तिशाब्दविषययोरतिप्रसक्तम्, तत्र दैवात् कदाचित् वृत्तिविषयसंसर्गे सति वृत्त्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चाभेदाभिव्यक्तेः अवर्जनीयत्वात् इति चेत्, न—परोक्षवृत्तेः विषयावच्छिन्नचैतन्यगताज्ञाननिवर्तनाक्षमतया

भिन्नत्वमस्तीति तद्वारणाय सत्यन्तम्। तदा तस्य चैतन्यस्य आवृतत्वेन घटादिव्यवहारानुकूलत्वाभावात् नातिव्याप्तिरिति मन्तव्यम्। **न चेति।** ज्ञानापरोक्ष्यस्य चैतन्यधर्मत्वे घटादिगोचरवृत्तौ 'घटं साक्षात्करोमि' इत्यादिप्रकारेणापरोक्षत्वानुभवविरोध इत्यर्थः। **उपपत्तेरिति।** वृत्तिचैतन्ययोस्तादात्म्येन वृत्तिसाक्षात्कारत्वानुभवस्य चैतन्यगतापरोक्ष्यविषयकत्वोपपत्तेरित्यर्थः। ननु—हृदयनाडीधर्मादिगोचरशाब्दवृत्तिः अन्तःकरणे शरीरव्यापिनि जायमाना दैवयोगात् हृदयनाड्याद्यवच्छिन्नान्तःकरणप्रदेशे यदि जायेत, तदा हृदयादिरूपविषयावच्छिन्न-चैतन्यस्य हृदयादिगोचरशाब्दवृत्त्यवच्छिन्नस्य च अभेदाभिव्यक्तिरपरिहार्या। घटादिस्थले वृत्तेर्विषयसंसर्गे सति वृत्तिविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तिस्वीकारात्। तथा च हृदयादिगोचरशाब्दानुमित्यादिवृत्त्यवच्छिन्न-चैतन्यरूपे परोक्षज्ञाने हृदयाद्यर्थाभिन्ने हृदयादिव्यवहारानुकूले ज्ञानापरोक्ष्यलक्षणमतिव्याप्तम्, तथा हृदयादिरूपे परोक्षार्थे स्वव्यवहारानुकूलशाब्दादिवृत्त्यवच्छिन्नचैतन्याभिन्ने अर्थापरोक्ष्यलक्षणमतिव्याप्तं इति शङ्कते—**ननूक्तमिति।** ययोश्चैतन्ययोरभेदाभिव्यक्तिरिष्यते, तयोरुभयोरप्यनावृतत्वमपेक्षितम्, अन्यतरचैतन्यस्यावरणदशायां तयोरभेदस्य प्रत्यक्षत्वलक्षणाभिव्यक्त्ययोगात्। तथा च हृदयादिगोचरशाब्दवृत्तिस्थले नातिव्याप्तिः। तत्र विषयचैतन्यस्या-वृतत्वात् - इति परिहरति—**न परोक्षवृत्तेरिति। आपरोक्ष्याप्रसक्तेरिति।** परोक्षहृदयादिविषयस्य हृदयादि-गोचरशाब्दवृत्त्यवच्छिन्नचैतन्यरूपपरोक्षज्ञानस्य च इति शेषः। तथा च हृदयादिगोचरशाब्दवृत्त्यवच्छिन्नचैतन्य-रूपपरोक्षज्ञानस्य हृदयादिव्यवहारानुकूलत्वे सत्यपि हृदयादिविषयेण सह अभिव्यक्ताभेदाभावात् अभिव्यक्ततत्त-दर्थाभिन्नत्वे सति तत्तदर्थव्यवहारानुकूलज्ञानत्वलक्षणं ज्ञानापरोक्ष्यं नास्ति, तथा हृदयाद्यर्थस्यापि स्वव्यवहारानुकूल-शाब्दवृत्त्यवच्छिन्नसाक्षिचैतन्याभेदसत्त्वेऽपि तदभेदाभिव्यक्त्यभावेन स्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिशालित्व-रूपमर्थापरोक्ष्यं नास्ति इत्यर्थः।

न च 'अहं सुखी दुःखी' इत्याकारके सुखादिसाक्षिणि सुखदुःखादिरूपविषयाभेदो विद्यमानोऽपि नाभिव्यज्यते, सुखादिसाक्षिणो जीवस्य सुखादेश्च आधाराधेयभावप्रतीतेः। तथा च सुखदुःखादिप्रत्यक्षे अभिव्यक्तविषयाभेदाभावात् अव्याप्तिरिति-वाच्यम्। घटादिप्रत्यक्षरूपे घटादिस्फुरणे 'घटः स्फुरति' 'पटः स्फुरति' इत्याद्याकारकानुभवमादाय घटाद्यर्थाभेदाभिव्यक्तिमत्त्वस्येव 'सुखं स्फुरति' 'दुःखं स्फुरति' इत्याद्याकारकानुभवमादायैव सुखदुःखादिप्रत्यक्षे सुखाद्यर्थाभेदाभिव्यक्तिमत्त्वसत्त्वात्। न च - घटःस्फुरति-इत्यनुभवे घटस्य स्फुरणाश्रयत्वमेव भाति, न तु स्फुरणाभेदः-इति वाच्यम्। 'घटःस्फुरति' इति प्रयोगे 'देवदत्तो गच्छति' इत्यत्र 'गमनकर्त्रभिन्नो देवदत्तः' इति वाक्यार्थवत् 'स्फुरणाश्रयाभिन्नो घटः' इति वाक्यार्थस्य

तत्र अज्ञानेनावृतस्य विषयचैतन्यस्य अनावृतेन वृत्त्यवच्छिन्नसाक्षिचैतन्येन अभेदाभिव्यक्तेरभावात् आपरोक्ष्याप्रसक्तेः। अत एव जीवस्य संसारदशायां वस्तुतस्सत्यपि ब्रह्माभेदे न तदापरोक्ष्यम्, अज्ञानावरणकृतभेदसत्त्वात्। न चैवं ब्रह्मणो जीवापरोक्ष्यासम्भवात् असर्वज्ञत्वापत्तिः। अज्ञानस्य

वक्तव्यतया'घटःस्फुरति'इतिप्रयोगमूलभूते 'घटःस्फुरति'इत्यनुभवेऽपि स्फुरणाश्रयभूतचिदात्माभिन्नतया घटस्य भानावश्यम्भावात्। न च घटस्य स्फुरणाश्रयाभेदाभिव्यक्तावपि स्फुरणाभेदाभिव्यक्तिः अद्यापि नोपपादितैवेति वाच्यम्। 'घटस्यस्वरूपम्'इति प्रत्यक्षं हि घटमेव घटस्य स्वरूपतया यथा विषयीकरोति,तथा'घटःस्फुरति'इति प्रत्यक्षमपि घटादिवृत्तिदशायां घटाद्यधिष्ठानभूतमनावृतचिदात्मानमेव स्वप्रकाशचिदात्माश्रितस्फुरणस्वरूपेण विषयीकरोति, इत्युपगमेन घटेस्फुरणाश्रयाभेदभानस्यैव स्फुरणाभेदभानरूपत्वात्। एतदुक्तं भवति–'घटस्य स्वरूपम्' इति शब्दप्रयोग एव घटतत्स्वरूपयोर्भेदो भासते, न तु तन्मूलभूते 'घटस्य स्वरूपम्' इति प्रत्यक्षे। अन्यथा तत्प्रत्यक्षस्य भ्रमत्वप्रसङ्गात्, घटतत्स्वरूपयोर्भेदाभावात्। न च तस्य भ्रमत्वमभ्युपगन्तुं शक्यते, बाधकाभावात्। एवं 'स्फुरति' इतिशब्दप्रयोग एव स्वप्रकाशात्मनः स्फुरणतदाश्रयभावेन भेदभानं, न तु 'स्फुरति' इतिप्रत्यक्षे, तत्र स्फुरणद्वित्वानुपलम्भात् इति। न च ब्रह्मगोचरशाब्दवृत्तेः विषयसंसृष्टाया विषयगताज्ञाननिवर्तनक्षमत्वदर्शनेन हृदयादिगोचरशाब्दवृत्तेरपि विषयसंसर्गाविशेषे कथं तस्याः स्वविषयचैतन्यगताज्ञाननिवर्तनक्षमत्वं नेति वाच्यम्। हृदयादिगोचरशाब्दवृत्तेः सत्यपि विषयसंसर्गे तस्यां वृत्तौ अज्ञाननिवर्तकत्वप्रयोजकाभावेन अज्ञानानिवर्तकत्वस्य प्रथमपरिच्छेदावसाने दर्शितत्वादिति भावः।

अर्थस्य स्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिमत्त्वमेव आपरोक्ष्यं, न तु तादृशाभेदवत्त्वमात्रम्—इत्यत्र लिङ्गमाह—**अत एवेति**। अभेदाभिव्यक्तेरेवापरोक्षत्वप्रयोजकत्वस्वीकारादेवेत्यर्थः। **संसारेति**। तत्त्वसाक्षात्कारात् पूर्वकाले इत्यर्थः। 'जीवस्य ब्रह्माभेदे सत्यपि' इत्यनेन ब्रह्मणः स्वव्यवहारानुकूलजीवचैतन्याभिन्नत्वे सत्यपि इत्यर्थो विवक्षितः। तथा च संसारदशायां स्वव्यवहारानुकूलजीवचैतन्याभिन्नस्यापि ब्रह्मणो जीवं प्रत्यपरोक्षत्वाभावः तयोरभेदाभिव्यक्त्यभावादेवेति वक्तव्यतया अभेदाभिव्यक्तेरापरोक्ष्यप्रयोजकत्वं युक्तमिति भावः। **न चैवमिति**। अज्ञानकृतभेदस्याभेदाभिव्यक्तिप्रतिबन्धकत्वे इत्यर्थः। **असम्भवादिति**। 'जीवं साक्षात्करोमि' 'जीवो ममापरोक्षः' इति जीवगोचरव्यवहारानुकूलं ज्ञानं ब्रह्मणो मायावृत्त्युपहितं ब्रह्मचैतन्यमेव। तथा च ब्रह्मकर्तृकव्यवहारविषयस्य जीवस्य ब्रह्मकर्तृकव्यवहारानुकूलतादृशब्रह्मचैतन्याभिन्नत्वसत्त्वेऽपि अभिव्यक्ताभेदशालित्वाभावात् जीवस्य ब्रह्म प्रत्यपरोक्षत्वं न सम्भवति। न च - ब्रह्मणो जीवगोचरापरोक्षज्ञानासम्भवेऽपि न सर्वज्ञत्वभङ्गः, जीवगोचरपरोक्षज्ञानमात्रेणापि तत्सम्भवात् इति वाच्यम्, ईश्वरस्य परोक्षज्ञानानङ्गीकारादिति भावः। अज्ञानं हि जीवधर्मिकब्रह्मप्रतियोगिकभेदप्रयोजकम्, जीवस्य 'नाहं ब्रह्म' इति ब्रह्मभेदानुभवसत्त्वात्। न तु ब्रह्मधर्मिकजीवप्रतियोगिकभेदप्रयोजकम्, ब्रह्मणो 'नाहं जीवः' इत्यनुभवे मानाभावात्। तथा च ब्रह्म प्रति जीवस्य ब्रह्माभेदाभिव्यक्तिप्रतिबन्धकस्य अज्ञानकृतभेदस्य अभावात् नोक्तदोष इति परिहरति–**अज्ञानस्येति**।

ईश्वरं प्रत्यनावारकतया तं प्रति जीवभेदानापादनात्। यं प्रति यदज्ञानमावारकं तस्य तं प्रत्येव स्वाश्रयभेदापादकत्वात्। अत एव चैत्रज्ञानेन तस्य घटाज्ञाने निवृत्ते अनिवृत्तं मैत्राज्ञानं मैत्रं प्रत्येव विषयचैतन्यस्य भेदापादकमिति न चैत्रस्य घटापरोक्ष्यानुभवानुपपत्तिरपि।

ननु—एवं वृत्तिविषयचैतन्याभेदाभिव्यक्तिलक्षणस्यापरोक्ष्यस्य स्वविषयचैतन्यगताज्ञाननिवृत्तिप्रयोज्यत्वे तस्य अज्ञाननिवृत्तिप्रयोजकत्वायोगात् ज्ञानमात्रमज्ञाननिवर्तकं भवेदिति चेत्, न—यत् ज्ञानं उत्पद्यमानं स्वकारणमहिम्ना विषयसंसृष्टमेवोत्पद्यते तदेवाज्ञाननिवर्तकमिति विशेष-

---

अनावारकतयेति। ईश्वरस्य 'अहमज्ञ' इत्यनुभवे मानाभावात् अज्ञानं ईश्वरं प्रति जीवावारकं न भवति। न च ईश्वरस्यापि लीलाविग्रहपूर्वकव्यवहारकाले तदीयेनैव वचनेन तस्याज्ञत्वानुभवोऽस्तीति गम्यत इति वाच्यम्। तदीयस्य तदीयाज्ञत्वगमकवचनस्य अन्यथासिद्धेः चतुर्थपरिच्छेदे वक्ष्यमाणत्वादिति भावः। **तमिति।** ईश्वरं प्रति जीवप्रतियोगिकभेदाप्रयोजकत्वादित्यर्थः। तं प्रति जीवानावारकस्यापि जीवभेदापादकत्वं किं न स्यात्, इत्यत आह—**यं प्रतीति।** यं जीवं प्रति यदज्ञानं विषयचैतन्यावारकं तं प्रत्येव तस्याज्ञानस्य स्वाश्रयभूतविषयचैतन्यप्रतियोगिकभेदापादकत्वाभ्युपगमात् इत्यर्थः। उक्तव्यवस्थायां नियामकमाह—**अत एवेति।** 'यं प्रति यदज्ञानं' इत्यादिव्यवस्थाभ्युपगमादेव चैत्रस्य घटापरोक्ष्यानुभवानुपपत्तिरपि नेति सम्बन्धः। घटावच्छिन्नचैतन्ये चैत्रं प्रति घटचैतन्यावारकमज्ञानं यथा वर्तते, तथा मैत्रं प्रत्यपि घटचैतन्यावारकमज्ञानं तत्रास्ति। तथा च चैत्रीयघटज्ञानेन चैत्रस्य घटाज्ञाने चैत्रं प्रति स्वाश्रयभूतविषयचैतन्यप्रतियोगिकभेदापादके निवृत्ते सति चैत्रीयघटज्ञानेनानिवृत्तं घटचैतन्यगतं मैत्रं प्रति घटावारकाज्ञानं मैत्रं प्रत्येव स्वाश्रयभूतघटचैतन्यप्रतियोगिकभेदापादकं, न तु मैत्राज्ञानं चैत्रं प्रति घटचैतन्यानावारकमपि चैत्रं प्रति स्वाश्रयभूतघटचैतन्यप्रतियोगिकभेदापादकम्। तथासति चैत्रीयघटज्ञानेन चैत्राज्ञाने निवृत्ते सति तत्कृतभेदनिवृत्तावपि चैत्रस्य घटचैतन्यस्य च मैत्राज्ञानकृतभेदसत्त्वेन अभेदाभिव्यक्त्यभावात् चैत्रस्य घटापरोक्ष्यानुभवानुपपत्तिरेव स्यात्। अतो मैत्राज्ञानं मैत्रं प्रतीव चैत्रं प्रति स्वाश्रयभेदापादकं न भवति चैत्रं प्रति स्वाश्रयचैतन्यानावारकत्वात् इति वक्तव्यम्, तथा च उक्तव्यवस्था सिद्धेत्यर्थः। ननु—'अपरोक्षज्ञानमज्ञाननिवर्तकम्' इति रीत्या ज्ञानस्याज्ञाननिवर्तकत्वे अपरोक्षत्वं प्रयोजकमिति वक्तुं न शक्यते, ज्ञानगतापरोक्षत्वस्यैवाज्ञाननिवृत्त्यधीनत्वात्। न च मास्तु ज्ञानापरोक्ष्यस्याज्ञाननिवृत्तिप्रयोजकत्वं इति वाच्यम्। तथासति ज्ञानमात्रस्याज्ञाननिवर्तकत्वापत्त्या परोक्षज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसङ्गात् इत्याशयेन शङ्कते—**नन्वेवमिति।** एवंशब्दार्थमेवाह—**वृत्तीति।** वृत्त्यवच्छिन्नचैतन्यरूपे ज्ञाने घटादिरूपविषये च वृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरभेदाभिव्यक्तिघटितस्येत्यर्थः। **अज्ञाननिवृत्तिप्रयोज्यत्व इति।** प्रमातारं प्रति विषयचैतन्यावरणद्वारा विषयचैतन्यप्रतियोगिकभेदापादकस्य अज्ञानस्य निवृत्तिं विना अर्थस्य ज्ञानस्य वा आपरोक्ष्यासम्भवस्योक्तत्वात् आपरोक्ष्यस्य अज्ञाननिवृत्तिप्रयोज्यत्वमित्यर्थः। ज्ञानस्याज्ञाननिवर्तकतायां आपरोक्ष्यस्य प्रयोजकत्वाभावेऽपि न हानिः, प्रयोजकान्तरस्य प्रथमपरिच्छेदान्ते दर्शितत्वात् - इत्याशयेन परिहरति—**नेति।**

णात्, ऐन्द्रियकज्ञानानां तथात्वात्। एवं च शब्दादुत्पद्यमानमपि ब्रह्मज्ञानं सर्वोपादानभूतस्वविषयब्रह्मसंसृष्टमेव उत्पद्यत इति तस्याज्ञाननिवर्तकत्वं अज्ञाननिवृत्तौ तत्मूलभेदप्रविलयादापरोक्ष्यं चेत्युपपद्यतेतराम्। नन्वेवं अध्ययनगृहीतवेदान्तजन्येनापि तज्ज्ञानेन मूलाज्ञाननिवृत्त्या आपरोक्ष्यं किं न स्यात्। न च तत् सत्तानिश्चयरूपत्वाभावात् नाज्ञाननिवर्तकमिति वाच्यम्। तथापि कृतश्रवणस्य निर्विचिकित्सशाब्दज्ञानेन तन्निवृत्त्या मननादिवैयर्थ्यापत्तिरिति चेत्, न—सत्यपि श्रवणात् निर्विचिकित्सज्ञाने चित्तविक्षेपदोषेण प्रतिबन्धात् अज्ञानानिवृत्त्या तन्निराकरणे मननि-

---

तथात्वादिति। सन्निकर्षरूपकारणमहिम्ना विषयसंसृष्टतयैवोत्पद्यमानत्वात् इत्यर्थः। अनुमित्यादिवृत्तीनामतथात्वेनातिप्रसङ्गाभावाच्च इत्यपि द्रष्टव्यम्। ननु अनुमेयवह्न्यादिगोचरानुमितिवृत्तेरिव ब्रह्मगोचरशाब्दवृत्तेरपि स्वविषयभूतेन ब्रह्मचैतन्येन संसर्गाभावात् मूलाज्ञानानिवर्तकत्वं न स्यात्, तथा च तत्त्वज्ञानानन्तरमपि ब्रह्मापरोक्ष्यं न स्यात्, इत्यत आह—**एवं चेति**। एवमेवेत्यर्थः। ऐन्द्रियकवृत्तिवदेवेति यावत्। ब्रह्मगोचरवृत्तेः स्वविषयसंसर्गनियमे कारणमाह—**सर्वोपादानभूतेति**। जायमानस्य सर्वस्य ब्रह्मसंसर्गनियमे सति ब्रह्मगोचरवृत्तेः स्वविषयसंसर्गनियमे किं वक्तव्यं इत्याशयेन सर्वोपादानेत्युक्तम्। कार्यस्योपादानसंसर्गनियमात्। तथा च ब्रह्मगोचरवृत्तेर्नानुमेयवह्न्यादिगोचरानुमितिवृत्तितुल्यता इति भावः। **आपरोक्ष्यं चेति**।

ननु ज्ञानापरोक्ष्यस्याज्ञाननिवृत्तावप्रयोजकत्वमते वेदान्तजन्यज्ञानस्यापरोक्षत्वप्रसाधनं अस्मिन् शाब्दापरोक्षवादे व्यर्थमिति चेत्, न—'अज्ञाननिवर्तकज्ञानमपरोक्षरूपं' इति नियमस्य चक्षुरादिजन्यज्ञानेषु दृष्टस्य ब्रह्माज्ञाननिवर्तके ब्रह्मगोचरशाब्दज्ञाने व्यभिचारवारणार्थतया तत्साधनस्यार्थवत्त्वोपपत्तेः, मूलाज्ञाननिवर्तके ब्रह्मगोचरशाब्दज्ञाने आपरोक्ष्यस्य 'तद्वैतत्पश्यन्' इत्यादिश्रुत्या 'ब्रह्म साक्षात्करोमि' इति विद्वदनुभवेन च सिद्धस्य तत्र तत्प्रसाधनं विना अनुपपत्तेश्च इति भावः।

घटादौ घटादिगोचरवृत्तिकाल एवापरोक्ष्यं, तद्वृत्त्युपरमे तु पुनरज्ञानान्तरकृतभेदप्राप्त्या स्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्त्यभावात् नापरोक्ष्यं, ब्रह्मणि तु मूलाज्ञाननिवृत्तौ पुनरावरणकृतभेदाप्रसक्त्या ब्रह्मज्ञानानन्तरं सदैवापरोक्ष्यं - इति विशेषं सूचयति—**तरामिति**। **नन्वेवमध्ययनगृहीतेति**। 'नियमेन यत् ज्ञानं विषयसंसृष्टतयोदेति तज्ज्ञानं अज्ञानं निवर्तयत्येव' इति नियमोपगमे सतीति एवंशब्दार्थः। आपातज्ञानस्यापि स्वविषयब्रह्मसंसर्गितयैवोत्पन्नत्वात् इति भावः। सत्तानिश्चयरूपत्वमपि निवर्तकज्ञानविशेषणं, अतो नोक्तातिप्रसङ्गः- इति शङ्कते—**न च तदिति**। विचारप्राचीनं अध्ययनगृहीतवेदान्तजन्यज्ञानं तच्छब्दार्थः। विशेषणमभ्युपगम्याप्यतिप्रसङ्गमाह—**तथापीति**। अप्रतिबद्धत्वमपि निवर्तकज्ञानविशेषणं, अतो नोक्तातिप्रसङ्गोऽपीति समाधत्ते—**न सत्यपीति**। ननु - मननादेः विक्षेपशब्दितासम्भावनाविपरीतभावनानिवृत्त्यर्थत्वे, यस्य विद्याधिकारिणो जन्मान्तरीयमननादिसहितश्रवणानुष्ठानेन समस्तो विक्षेपदोषो निरस्तः तस्य उपदेशमात्रेणापि सत्तानिश्चयरूपम-

दिध्यासननियमविध्यर्थानुष्ठानस्यार्थवत्त्वात्, भवान्तरीयमननाद्यनुष्ठाननिरस्तचित्तविक्षेपस्य उपदेशमात्रात् ब्रह्मापरोक्ष्यस्य इष्यमाणत्वाच्च इत्याहुः ।

अथैवमपि—कृतनिदिध्यासनस्य वेदान्तजन्यब्रह्मज्ञानेनेव घटादिज्ञानेनापि ब्रह्माज्ञाननिवृत्तिः किं न स्यात् । न च तस्य ब्रह्माविषयत्वात् न ततो ब्रह्माज्ञाननिवृत्तिरिति वाच्यम् । 'घटस्सन्' इत्यादिबुद्धिवृत्तेः सद्रूपब्रह्मविषयत्वोपगमात् । न च - तत्र घटाद्याकारवृत्त्या तदज्ञाननिवृत्तौ स्वतःस्फुरणादेव तदवच्छिन्नं चैतन्यं सदिति प्रकाशते, न तस्य घटाद्याकारवृत्तिविषयत्वमिति - वाच्यम् । तदभावे घटविषयं ज्ञानं तदवच्छिन्नचैतन्यविषयमज्ञानमिति भिन्नविषयेण ज्ञानेन तदज्ञाननिवृत्तेरयोगात्, जडे आवरणकृत्याभावेन घटस्याज्ञानाविषयत्वात् । न च घटादिवृत्तेः तदवच्छिन्नचैतन्यविषयत्वेऽपि अखण्डानन्दाकारत्वाभावात् न ततो मूलाज्ञाननिवृत्तिरिति वाच्यम् । वेदान्तजन्यसाक्षात्कारेऽपि तदभावात् । न हि तत्र अखण्डत्वमानन्दत्वं वा कश्चिदस्ति प्रकारः । वेदान्तानां संसर्गागोचरप्रमाजनकत्वलक्षणाखण्डार्थत्वहानापत्तेः । न च वेदान्तजन्यज्ञानादेव

प्रतिबद्धं च ब्रह्मज्ञानं जायते । तथा च तस्य इह जन्मनि श्रवणमननाद्यनुष्ठानं विनाऽपि मूलाज्ञाननिवृत्तिर्ब्रह्मापरोक्ष्यं च स्यात्, इत्यत आह—**भवान्तरीयेति** । तथा च इष्टापत्तिरिति भावः ।

अथैवमपीति । विक्षेपदोषनिवृत्त्यर्थं मननाद्यपेक्षायामपीत्यर्थः । कृतनिदिध्यासनस्याधिकारिणो घटादिज्ञानेनापि मूलाज्ञाननिवृत्तिः किं न स्यात्, घटादिवृत्तेरपि मूलाज्ञानविषयचैतन्यविषयकत्वाविशेषात्—इत्याक्षेपाभिप्रायः । मूलाज्ञानघटज्ञानयोः समानविषयकत्वमसिद्धमिति सिद्धान्तिनश्शङ्कां अनूद्य निराकरोति—**न च तस्येति** । घटादिज्ञानस्येत्यर्थः । **तत इति** । घटादिज्ञानादित्यर्थः । 'घटस्सन्' इत्याद्याकाराया वृत्तेः ब्रह्मचैतन्यविषयकत्वाभ्युपगमोऽसिद्ध इति सिद्धान्ती शङ्कते—**न च तत्रेति** । तत्रेत्यादितच्छब्दत्रयं घटादिपरम् । **तस्येति** । ब्रह्मण इत्यर्थः । घटाद्यवच्छिन्नचैतन्यस्य घटादिवृत्तिविषयत्वं पूर्ववादी साधयति—**तदभाव इत्यादिना** । चैतन्यस्य घटादिवृत्तिविषयत्वाभावे सतीत्यर्थः । ननु - यदि घटमात्रविषयकज्ञानेन घटाद्यवच्छिन्नचैतन्यविषयकाज्ञाननिवृत्तिर्न सम्भवति तयोस्समानविषयकत्वाभावात्, तर्हि घटज्ञानेन सह अज्ञानस्य समानविषयकत्वसम्पत्तये अज्ञानमपि घटादिजडमात्रविषयकमेवास्तु, नेत्याह पूर्ववादी—**जड इति** । जडस्य जडत्वादेव प्रमाणानवतारदशायामप्रकाशोपपत्त्या जडस्याप्रकाशार्थमावरणकल्पनायोगादित्यर्थः । कृत्यं - फलम् । तथा च वेदान्तजन्यज्ञानवत् घटादिज्ञानस्यापि ब्रह्मचैतन्यविषयकत्वावश्यंभावेन मूलाज्ञानसमानविषयकत्वात् तेनापि तन्निवृत्तिप्रसङ्ग इति स्थितम् । तत्र सिद्धान्ती शङ्कते—**न चेति** । तर्हि वेदान्तजन्यज्ञानमपि ब्रह्माज्ञाननिवर्तकं न स्यादिति पूर्ववादी दूषयति—**वेदान्तजन्येति** । अखण्डत्वं अनवच्छिन्नत्वम् । वेदान्तजन्यज्ञानस्य अखण्डत्वादिधर्मवैशिष्ट्यावगाहित्वोपगमे बाधकमाह—**वेदान्तानामिति** । मूलाज्ञाननिवर्तकज्ञानस्य वेदान्तजन्यत्वमपि विशेषणं विवक्षितं, अतो घटादिज्ञाने नातिप्रसङ्गः—इत्याशयवतीमाशङ्कां अनूद्य दूषयति पूर्ववादी—**न च वेदान्तेत्यादिना** । वेदान्तजन्यज्ञाने क्लृप्तस्य मूलाज्ञाननिवर्तकत्वप्रयोजक-

तन्निवृत्तिनियम इति वाच्यम्। क्लृप्ताज्ञाननिवर्तकत्वप्रयोजकस्य रूपस्य ज्ञानान्तरेऽपि सद्भावे तथानियन्तुमशक्यत्वात्। न च घटाद्याकारवृत्तिविषयस्यावच्छिन्नचैतन्यस्यापि कल्पितत्वेन यत् मूलाज्ञानविषयभूतं सत्यमनवच्छिन्नचैतन्यं तद्विषयत्वाभावात् घटादिवृत्तीनां निवर्त्यत्वाभिमताज्ञानसमानविषयत्वलक्षणं क्लृप्तप्रयोजकमेव नास्तीति वाच्यम्। तत्र अवच्छेदकांशस्य कल्पितत्वेऽपि अवच्छेद्यांशस्य अकल्पितमूलाज्ञानविषयचैतन्यरूपत्वात्, तस्य कल्पितत्वे घटवज्जडतया अवस्थाज्ञानं प्रत्यपि विषयत्वायोगेन अवस्थाज्ञानस्य मूलाज्ञानविषयाकल्पितचैतन्यविषयत्वस्य वक्तव्यतया तन्निवर्तकघटादिज्ञानस्यापि तद्विषयत्वावश्यंभावेन तत्पक्षेऽपि ततो मूलाज्ञाननिवृत्तिप्रसङ्गस्य अपरिहारात्।

अत्राहुः आचार्याः—न चैतन्यं चक्षुरादिजन्यवृत्तिविषयः। 'न संदृशे तिष्ठति रूपमस्य न

रूपस्य मूलाज्ञानसमानविषयकत्वसत्तानिश्चयरूपत्वाप्रतिबद्धत्वलक्षणस्य निदिध्यासनपरिपाककाले चक्षुरादिजन्यघटादिज्ञानेऽपि सत्त्वे सति 'वेदान्तजन्यज्ञानादेव मूलाज्ञाननिवृत्तिः, न तु घटादिज्ञानात्' इति नियन्तुमयुक्तत्वात्, वेदान्तजन्यत्वस्यापि सत्तानिश्चयरूपत्वादेरिव प्रयोजकविशेषणत्वे गौरवात् मानाभावाच्च इति भावः। तर्हि वेदान्तजन्यज्ञाने क्लृप्तं यत् प्रयोजकं, तदेव घटादिज्ञाने नास्तीति शङ्कते—**न च घटाद्याकारेति**। अवच्छिन्नत्वं कल्पितत्वे हेतुः, अनवच्छिन्नत्वं सत्यत्वे हेतुः। घटादिवृत्तीनां कल्पितचैतन्यविषयकत्वेन सत्यब्रह्मविषयकत्वाभावादित्यर्थः। 'घटाद्यवच्छिन्नचैतन्यं कल्पितम्' इत्यत्र चैतन्यांशस्य अकल्पितत्वं कल्पितत्वं वा विवक्षितम्? नाद्य इत्याह—**तत्रेति**। अवच्छिन्नचैतन्ये इत्यर्थः। अवच्छेद्यचैतन्यांशस्य घटादिवृत्तिविषयस्य अकल्पितं यत् मूलाज्ञानविषयब्रह्मचैतन्यं तद्रूपत्वादित्यर्थः। तथा च घटाद्यवच्छिन्नचैतन्यगोचरवृत्तेरपि निवर्त्यत्वाभिमतमूलाज्ञानसमानविषयकत्वरूपं वेदान्तजन्यज्ञाने क्लृप्तं प्रयोजकमस्तीति भावः। द्वितीयकल्पेऽपि घटादिवृत्तौ क्लृप्तप्रयोजकमस्तीति दर्शयन् तं कल्पं दूषयति—**तस्य कल्पितत्वे इति**। अवच्छेद्यचैतन्यांशस्येत्यर्थः। **वक्तव्यतयेति**। अवच्छेद्यचैतन्यांशस्य कल्पितत्वपक्षे तस्य जडत्वापत्त्या जडस्य तस्य अज्ञानविषयत्वासम्भवात् अवस्थाज्ञानं प्रति मूलाज्ञानविषयब्रह्मचैतन्यमेव विषय इति वक्तव्यं, निर्विषयाज्ञानासम्भवात्। तथा च ब्रह्मचैतन्यविषयकावस्थाज्ञाननिवर्तकत्वाय घटादिवृत्तीनामपि मूलाज्ञानविषयब्रह्मचैतन्यविषयकत्वमपरिहार्यम्, घटादिवृत्तीनां सत्यब्रह्मविषयकत्वाभावे अवस्थाज्ञानेन सह समानविषयकत्वाभावात् तासामवस्थाज्ञाननिवर्तकत्वं न स्यादित्यर्थः। **तन्निवर्तकेति**। अवस्थाज्ञानं तच्छब्दार्थः। **तद्विषयत्वेति**। मूलाज्ञानविषयब्रह्मचैतन्यं तच्छब्दार्थः। **तत्पक्षेऽपीति**। 'अवच्छेद्यांशस्य कल्पितत्वम्' इति द्वितीयकल्पेऽपीत्यर्थः। **तत इति**। घटादिज्ञानादित्यर्थः। **अपरिहारादिति**। घटादिज्ञानस्यापि वेदान्तजन्यज्ञानस्येव मूलाज्ञानसमानविषयकत्वादिति भावः।

अत्राहुरिति। 'घटादिज्ञानमपि मूलाज्ञाननिवर्तकं स्यात् चैतन्यविषयकत्वात् वेदान्तजन्यज्ञानवत्'

चक्षुषा पश्यति कश्चनैनम्' [क. उ. २-३ ९] 'पराञ्चि खानि व्यतृणत्स्वयंभूः तस्मात् पराङ् पश्यति नान्तरात्मन्' [क. उ. २-१-१] इत्यादिश्रुत्या तस्य परमाण्वादिवत् चक्षुराद्ययोग्यत्वोपदेशात् 'औपनिषदम्' इति विशेषणाच्च । न च 'सर्वप्रत्ययवेद्ये [वा] (च) ब्रह्मरूपे व्यवस्थिते ।' इत्यादिवार्तिकविरोधः । तस्य घटाद्याकारवृत्त्युदये सति आवरणाभिभवात् स्वप्रभं सद्रूपं ब्रह्म 'घटस्सन्' इति घटवद्व्यवहार्यं भवतीति औपचारिकघटादिवृत्तिवेद्यत्वपरत्वात् । आवरणाभिभावकत्वं च घटादिज्ञानस्य घटादिविषयत्वादेव उपपन्नम् । घटादेरप्यज्ञानविषयत्वात् 'घटं न जानामि' 'घटज्ञानेन घटाज्ञानं नष्टम्' इति अवस्थाज्ञानस्य घटादिविषयत्वानुभवात् । न च - तत्र आवरणकृत्याभावादज्ञानाङ्गीकारो न युक्तः, तद्भासकस्य तदवच्छिन्नचैतन्यस्य आवरणादेव तदप्रकाशोपपत्ते-

---

इति चोद्ये हेत्वसिद्धिमाहुरित्यर्थः । अस्य - आत्मनः रूपं सन्दृशे - (सन्दृशः) चक्षुषो योग्यत्वे न तिष्ठति । रूपादिहीनत्वात् । अतो न कश्चित् एनं - आत्मानं चक्षुषा पश्यति । पराञ्चि - पराग्विषयाणि खानि - इन्द्रियाणि व्यतृणत् - हिंसितवान् ईश्वरः । जडार्थविषयकत्वेनैव करणानि सृष्टवानिति यावत् । तस्मात् - तथा सृष्टत्वात् पराङ्-पराञ्चं सर्वो लोक इन्द्रियैरुपलभते, न अन्तरात्मानं चैतन्यस्वभावमित्यर्थः । 'न चक्षुषा गृह्यते' इत्यादिश्रुतिः आदिपदार्थः । **तस्येति** । चैतन्यस्येत्यर्थः । ननु—यदि इन्द्रियायोग्यत्वोपदेशादुपनिषदेकगम्यत्वश्रवणाच्च चैतन्यं घटादिवृत्तिविषयो न भवतीत्युपेयते, तर्हि वार्तिकविरोधः—इति शङ्कते—**न च सर्वेति** । यद्यत् वस्तु प्रतीयते, तत् सर्वं सदित्येव प्रतीयते । तथा च अनुभवबलात् सद्रूपं ब्रह्म सर्वप्रत्ययवेद्यतया व्यवस्थितमित्यर्थः । चैतन्यस्य सर्वप्रत्ययवेद्यत्वं गौणमेव वार्तिककाराणामभिमतं, न घटादिवन्मुख्यम् । उदाहृतश्रुतिविरोधात् । तथा च न वार्तिकविरोध इति समाधत्ते—**तस्येति** । वार्तिकवचनस्येत्यर्थः । यथा घटस्य घटगोचरवृत्त्यधीनव्यवहारविषयत्वं, तथा घटाद्यधिष्ठानसद्रूपब्रह्मणोऽपि घटादिवृत्त्यधीनव्यवहारविषयत्वमस्ति - इत्यनेन गुणेन, सद्रूपं ब्रह्म घटादिप्रत्ययवेद्यमिति वार्तिककारैरुच्यत इत्यर्थः । न चैवं परोक्षवृत्तिविषयेष्वावरणाभिभवाभावात् उक्तगतिस्तत्र न सम्भवतीति वाच्यम् । वार्तिके प्रत्ययपदस्यावरणाभिभावकवृत्तिपरत्वोपपत्तेरिति भावः । ननु—घटादिवृत्तेः घटाद्यवच्छिन्नचैतन्यविषयकत्वाभावे चैतन्यावारकाज्ञानाभिभावकत्वं न सम्भवति, ज्ञानाज्ञानयोः समानविषयकत्वाभावात्, इत्यत आह—**आवरणाभिभावकत्वं चेति** । जडस्याप्यज्ञानविषयत्वं अनुभवबलात् स्वीकार्यमित्याह—**घटादेरपीति** । अवस्थापदं मूलाज्ञानव्यवच्छेदाय । तस्य 'ब्रह्म न जानामि' इति ब्रह्ममात्रविषयकत्वानुभवात् न जडविषयकत्वमिति भावः । **न च तत्रेति** । जडवस्तुनीत्यर्थः । **न युक्त इति** । अज्ञानाश्रयत्वं जडे न युक्तम्, तत्रावरणाभावात्, तदभावश्च फलाभावात्, इत्यर्थः । 'घटं न जानामि' इत्यनुभवस्तु घटतदधिष्ठानचैतन्ययोस्तादात्म्याच्चैतन्यविषयकत्वेनाप्युपपद्यत इति भावः । ननु – जडस्यावरणाभावे कथं तदप्रकाशः सम्भवति । न च - तत्प्रकाशकचैतन्यसंसर्गाभावादेवाप्रकाशः, न त्वावरणबलादिति - वाच्यम् । जडस्य स्वप्रकाशचैतन्ये अध्यस्ततया तस्य सदा अवभासकचैतन्यसंसर्गसत्त्वात् । अतो जडस्याप्रकाश एव जडावरणफलं,

रिति–वाच्यम् । उक्तभङ्ग्या जडस्य साक्षादज्ञानविषयत्वस्य प्रतिक्षेपेऽपि जडावच्छिन्नचैतन्यप्रकाशस्याज्ञानेनावरणं, ततो नित्यचैतन्यप्रकाशसंसर्गेऽपि जडस्य 'नास्ति न प्रकाशते' इत्यादिव्यवहारयोग्यत्वमिति परम्परया अज्ञानविषयत्वाभ्युपगमात् साक्षात्परम्परया वा यदज्ञानावरणीयं तद्विषयत्वस्यैव ज्ञानस्य तदज्ञाननिवर्तकत्वप्रयोजकशरीरे निवेशात् । न चैवं घटादीनामुक्तरीत्या मूलाज्ञानविषयत्वमपीति घटादिसाक्षात्कारादेव मूलाज्ञाननिवृत्त्यापातः । फलबलात् तदज्ञानकार्यातिरिक्ततद्विषयविषयकत्वस्यैव तन्निवर्तकत्वे तन्त्रत्वात् ।

इत्यत आह—**तद्भासकस्येति** । अत्र तच्छब्दत्रयं जडपरम् । **उक्तभङ्ग्येति** । 'तत्रावरणकृत्याभावादज्ञानाङ्गीकारो न युक्तः' इति वाक्येन जडे साक्षादज्ञानाश्रयत्वस्य साक्षादज्ञानविषयत्वस्य च प्रतिक्षेपेऽपीत्यर्थः । ननु तद्वाक्यस्य जडे साक्षादज्ञानविषयत्वप्रतिक्षेपपरत्वं किमिति कल्प्यते, साक्षात्परम्परासाधारणाज्ञानविषयत्वमात्रप्रतिक्षेपपरत्वसम्भवात् इत्याशङ्क्य तथासति 'तद्भासकस्य तदवच्छिन्नचैतन्यस्य आवरणादेव तदप्रकाशोपपत्तेः' इत्युत्तरवाक्येन जडेऽपि परम्परया अज्ञानविषयत्वाभ्युपगमविरोधप्रसङ्गात् - इत्याशयेनाह—**जडावच्छिन्नेत्यादिना** । शङ्काग्रन्थे 'तदप्रकाशोपपत्तेः' इत्यनेनांशेन जडे 'अस्ति प्रकाशते प्रियं च' इत्येवमात्मकव्यवहारायोग्यत्वलक्षणमावरणमभ्युपगतम् । 'चैतन्यस्यावरणादेव' इत्यनेनांशेन जडावरणस्य कारणत्वेन चैतन्यावरणमभ्युपगतं - इति प्रतिपादयति—**अज्ञानेनेति** । **तत इति** । चैतन्यावरणादित्यर्थः । चैतन्यस्य स्वप्रकाशतया तस्य यथा सदा प्रसक्तप्रकाशत्वं आवरणकल्पकमस्ति, तथा जडस्यापि सदा चैतन्यप्रकाशसंसृष्टतया सदा प्रसक्तप्रकाशत्वं आवणकल्पकं तुल्यमिति सूचयति—**नित्यचैतन्यप्रकाशसंसर्गेऽपीति** । इतिशब्दः प्रकारवचनः । ननु उक्तरीत्या अवच्छिन्नचैतन्यनिष्ठमवस्थाज्ञानं जडतदवच्छिन्नचैतन्ययोरुभयोरप्यावारकमिति लभ्यते । तथा च घटादिज्ञानस्य जडमात्रविषयकत्वस्वीकारेण तस्य अज्ञानेन सह सर्वांशे समानविषयकत्वाभावात् अज्ञाननिवर्तकत्वं न स्यात्, इत्यत आह—**साक्षादिति** । ज्ञानस्याज्ञानसमानविषयकत्वमात्रं विरोधप्रयोजकशरीरे प्रविष्टं, न तु सर्वांशेऽपि समानविषयकत्वम्, गौरवादिति भावः । **न चैवमिति** । ज्ञानाज्ञानयोः सर्वांशे समानविषयकत्वानादरे इत्यर्थः । **उक्तरीत्येति** । अवच्छिन्नचैतन्यस्य स्वरूपेण सत्यतया ब्रह्मस्वरूपस्य अवस्थाज्ञानविषयत्ववत् मूलाज्ञानविषयत्वमप्यस्ति । तथा च अवस्थाज्ञानकृतचैतन्यावरणबलात् जडस्यापि परम्परया अवस्थाज्ञानविषयत्वं इत्युक्तरीत्या मूलाज्ञानकृतचैतन्यावरणबलात् मूलाज्ञानविषयत्वमपि जडस्य घटादेरपरिहार्यं स्यादित्यर्थः । ततः किं तत्राह—**घटादीति** । यथा अवस्थाज्ञानं प्रति परम्परया विषयभूतजडसाक्षात्कारादेव अवच्छिन्नचैतन्यनिष्ठावस्थाज्ञानस्य निवृत्तिः, तथा मूलाज्ञानं प्रत्यपि परम्परया विषयभूतजडसाक्षात्कारादेव ब्रह्मचैतन्यनिष्ठमूलाज्ञानस्यापि निवृत्त्यापात इत्यर्थः । 'मूलाज्ञाननिवृत्त्यापातो न च' इत्यत्र हेतुमाह—**फलबलादित्यादिना** । घटादिसाक्षात्कारे सत्यपि मूलाज्ञानानुवृत्तिरूपफलबलादित्यर्थः । मूलाज्ञानतत्कार्यातिरिक्तो यो मूलाज्ञानविषयः चिन्मात्रं तद्विषयकत्वस्यैव ज्ञाने मूलाज्ञाननिवर्तकत्वे तन्त्रत्वकल्पनात् घटादिसाक्षात्कारे च तदभावात् न मूलाज्ञाननिवर्तकत्वापत्तिरित्यर्थः ।

अथवा, मूलाज्ञानस्यैव जडं न विषयः। अवस्थाज्ञानानां तु अवच्छिन्नचैतन्याश्रितानां तत्तज्जडमेव विषयः। अन्यथा चाक्षुषवृत्त्या चन्दनखण्डचैतन्याभिव्यक्तौ तत्संसर्गिणो गन्धस्याप्यापरोक्ष्यापत्तेः, तदनभिव्यक्तौ चन्दनतद्रूपयोरप्यप्रकाशापत्तेः। न च - चाक्षुषवृत्त्या चन्दनतद्रूपावच्छिन्नचैतन्ययोरभिव्यक्त्या तयोः प्रकाशः, गन्धाकारवृत्त्यभावेन गन्धावच्छिन्नचैतन्यस्यानभिव्यक्त्या तस्याप्रकाशश्चेति - वाच्यम्। चैतन्यस्य द्विगुणीकृत्य वृत्त्ययोगेन एकद्रव्यगुणानां स्वाश्रये सर्वत्र व्याप्य वर्तमानानां पृथक्पृथक् गगनावच्छेदकत्वस्येव चैतन्यावच्छेदकत्वस्याप्यसम्भवात्। तेषां स्वाश्रयद्रव्यावच्छिन्नचैतन्येनैव शुक्तीदमंशावच्छिन्नचैतन्येन शुक्तिरजतवत् प्रकाश्यतया तस्याभिव्यक्तौ गन्धस्यापि (आपरोक्ष्यापत्तेः) प्रकाशस्य अनभिव्यक्तौ रजतादेरप्यप्रकाशस्य चापत्तेः।

'जडमात्रगोचरवृत्त्या कथमवच्छिन्नचैतन्यावारकाज्ञाननिवृत्तिः भिन्नविषयत्वात्' इति शङ्कायां 'अवस्थाज्ञानं अवच्छिन्नचैतन्यस्यावरणद्वारा जडमप्यावृणोति, अतो जडमात्रगोचरयाऽपि वृत्त्या अवस्थाज्ञाननिवृत्तिस्सम्भवति इति प्रतिपादितम्। इदानीं तस्यामेव शङ्कायां प्रकारान्तरेण समाधानं दर्शयति—**अथवेति।** अथवा अवस्थाज्ञानानां तत्तज्जडमेव विषय इति सम्बन्धः। 'घटं न जनामि' इत्यादिपूर्वोक्तानुभवादेवेति भावः। तर्ह्यवस्थाज्ञानानामाश्रयोऽपि तत्तज्जडमेव स्यात्, तथाचापसिद्धान्तः, इत्यत आह—**अवच्छिन्नचैतन्याश्रितानामिति।** ननु जडस्याज्ञानविषयत्वोपगमे 'जडमज्ञानस्य विषयो न भवति' इति सिद्धान्तस्य का गतिः, अत आह—**मूलाज्ञानस्यैवेति।** जडस्याज्ञानाविषयत्वसिद्धान्तो मूलाज्ञानमात्रविषय इति भावः। **अन्यथेति।** जडस्यानावृतत्वे इत्यर्थः। चन्दनखण्डगोचरचाक्षुषवृत्त्या तदवच्छिन्नचैतन्यं अभिव्यज्यते न वा? आद्ये दोषमाह—**तत्संसर्गिण इति।** चन्दननिष्ठगन्धस्यापि चन्दनस्येव आपरोक्ष्यापत्तिः, अभिव्यक्तचैतन्यसंसर्गित्वस्य उभयत्राविशेषात्। जडस्यावृतत्वपक्षे तु नायं दोषः, चाक्षुषवृत्त्या गन्धावरणानिवृत्तेः, इत्यर्थः। द्वितीये दोषमाह—**तदनभिव्यक्ताविति। अप्रकाशापत्तेरिति।** चन्दनगोचरचाक्षुषवृत्तिकाले चन्दनतद्रूपप्रकाशाभावोऽनिष्ट इति भावः। चन्दनखण्डघटपटादिद्रव्याणामिव एकद्रव्यवृत्तिगुणानामपि चैतन्यावच्छेदकत्वमस्तीत्यभिप्रेत्याशङ्कते—**न चेति।** एकत्र द्रव्ये रूपरसगन्धादिभेदेन चैतन्यभेदो नास्ति, मानाभावादित्याह—**चैतन्यस्येति।** चैतन्यस्य निरवयवतया द्रव्ये द्रव्यावच्छेदेनैका गुणावच्छेदेनापरा वृत्तिः सम्भवतीत्यर्थः। यद्येकत्र द्रव्ये प्रदेशभेदेन गन्धादयःस्युः, तदा तत्र द्रव्ये गन्धादिभेदेन चैतन्यभेदशङ्काऽपि स्यात्, न त्वेतदस्ति, गन्धादीनां व्याप्यवृत्तित्वानुभवाद् - इत्याशयेनाह—**व्याप्येति। गगनेति।** यथा घटादिद्रव्याणां गगनभेदकत्वमस्ति तथा गन्धादीनां गगनभेदकत्वं नास्ति, गन्धादिभेदेन गगनभेदाननुभवादिति भावः। गन्धादिभेदेन चैतन्यभेदाभावे सिद्धे चन्दनचैतन्याभिव्यक्त्यनभिव्यक्तिकृतौ पूर्वोक्तदोषौ दुष्परिहरावित्याह—**तेषामिति। शुक्तीति।** यथा शुक्तीदमंशावच्छिन्नचैतन्ये रजतस्याध्यासात् रजतं शुक्तीदमंशचैतन्येनैवावभास्यं न त्विदमंशावच्छिन्नचैतन्यापेक्षया पृथग्भूतेन स्वावच्छिन्नचैतन्येनावभास्यम्, तथा द्रव्यावच्छिन्नचैतन्ये कल्पिता रूपादयोऽपि द्रव्यावच्छिन्नचैतन्येनैव प्रकाश्या इत्यर्थः। ननु चन्दनगन्धस्य अभिव्यक्तचैतन्यप्रकाशसंसृष्टस्यापि

न च गन्धाकारवृत्त्युपरक्त एव चैतन्ये गन्धः प्रकाशत इति नियमः। प्रकाशसंसर्गस्यैव प्रकाशमान-शब्दार्थत्वेन असत्यामपि तदाकारवृत्तौ अनावृतप्रकाशसंसर्गे अप्रकाशमानत्वकल्पनस्य विरुद्धत्वात्, अभिव्यक्तस्य च गन्धोपादानचैतन्यस्य गन्धासंसर्गोक्त्यसम्भवात्। तस्मात् यथा चैत्रस्य घटवृत्तौ तं प्रत्यावारकस्यैवाज्ञानस्य निवृत्तिरिति तस्यैव विषयप्रकाशो नान्यस्य, तथा तत्तद्विषयाकारवृत्त्या तत्तदावारकाज्ञानस्यैव निवृत्तेः न विषयान्तरस्यापरोक्ष्यम्, 'अनावृतार्थस्यैव संविदभेदात् आपरोक्ष्यम्' इत्यभ्युपगमादिति प्रमातृभेदेनेव विषयभेदेनाप्येकत्र चैतन्ये अवस्थाज्ञानभेदस्य वक्तव्यतया अवस्थाज्ञानानां तत्तज्जडविषयकत्वमिति घटादिवृत्तीनां नावस्थाज्ञाननिवर्तकत्वे काचिदनुपपत्तिः, न वा मूलाज्ञाननिवर्तकत्वापत्तिः।

गन्धगोचरवृत्त्यभावादेवापरोक्ष्याभावः - इति शङ्कामनूद्य निराकरोति—**न च गन्धाकारेति**। 'नियमो न च' इत्यत्र हेतुमाह—**प्रकाशसंसर्गस्यैवेति**। न तु वृत्त्युपहितानावृतप्रकाशसंसर्गस्य प्रकाशमानताशब्दार्थत्वं, सुखादिगोचरवृत्त्यनुपहितसाक्षिप्रकाशसंसर्गिणि सुखादौ प्रकाशमानशब्दार्थत्वाभावप्रसङ्गात् इत्यर्थः। गन्धस्य अभिव्यक्तचैतन्यसंसर्ग एव नास्तीत्याशङ्क्याह—**अभिव्यक्तस्य चेति**। चकारस्य असम्भवादित्यनेन सम्बन्धः। उपादानपदमधिष्ठानपरम्। **असम्भवादिति**। तथा च जडस्यानावृतत्वपक्षे चन्दनचैतन्याभिव्यक्तिदशायां गन्धस्याप्यापरोक्ष्यापत्तिरपरिहार्येति भावः। जडस्यावृतत्वपक्षे तु नोक्तदोषप्रसक्तिरित्याह—**तस्मादिति**। जडे आवरणस्य सिद्धत्वादित्यर्थः। ननु—जडस्यावृतत्वपक्षेऽपि चन्दनगोचरचाक्षुषवृत्त्यैव गन्धावरणस्यापि निवृत्तिस्स्यात्, गुणगुणिनोस्तादात्म्यात्। तथा च चन्दनापरोक्ष्यदशायां तद्गन्धापरोक्ष्यदोषोऽत्रापि तुल्यः—इति शङ्कां दृष्टान्तेन परिहरति—**यथेति**। न अन्यं प्रत्यावारकाज्ञानस्यापि निवृत्तिः-इत्येवकारार्थः। **तस्यैवेति**। चैत्रस्यैव घटप्रकाशः नान्यस्य मैत्रादेरित्यर्थः। **तथेति**। गुणगुणिनोस्तादात्म्येऽपि भेदस्यापि सत्त्वात् न चन्दनगोचरवृत्त्या गन्धादेराप-रोक्ष्यप्रसक्तिरित्यर्थः। ननु चन्दनसंविदभिन्नस्य गन्धस्य आवृतस्यापि कथं नापरोक्ष्यं इत्याशङ्क्य, अनावृतसुखादा-वेव संविदभेदस्य आपरोक्ष्यप्रयोजकत्वदर्शनात् मैवमित्याह—**अनावृतार्थस्यैवेति**। नन्वेकत्र चन्दनावच्छिन्नचैतन्ये अवस्थाज्ञानस्य चैत्रं प्रति चन्दनावारकस्य एकत्वात् तस्य च चन्दनगोचरवृत्त्या निवृत्तत्वात् चन्दनवृत्तिकाले गन्धस्या-वरणमयुक्तं इत्याशङ्कां निराकरोति—**इति प्रमातृभेदेनेवेति**। 'यथा एकत्र विषये चैत्रमैत्रादिभेदेनाज्ञानमने-कमस्ति, तथा एकत्रापि चन्दनावच्छिन्नचैतन्ये गन्धादिविषयभेदेनाप्यज्ञानमनेकमस्तीति वक्तव्यम्, चन्दनापरोक्ष्य-दशायां गन्धापरोक्ष्यादर्शनादेव' इत्ययं हेतुः प्रकृतपरामर्शिना इतिपदेन समर्प्यते। तथा च चन्दनापरोक्ष्यकाले गन्धादेरावरणसम्भवात् नोक्तदोष इति भावः। **जडविषयकत्वमितीति**। जडविषयकत्वादित्यर्थः। **न काचिदनुपपत्तिरिति**। 'घटादिवृत्तीनां चैतन्यविषयकत्वाभावे ज्ञानाज्ञानयोः समानविषयकत्वरूपं विरोधप्रयोजकं न सम्भवति, तासां जडमात्रगोचरत्वात् अज्ञानस्य च चैतन्यमात्रविषयकत्वात्' इति पूर्वोक्तानुपपत्तिर्नास्ति। अवस्थाज्ञानस्यापि जडमात्रविषयकत्वाभ्युपगमात्। तथा जडस्यावरणाभ्युपगमे अपसिद्धान्तापत्तिरूपानुपपत्तिरपि

न चैवमपि जीवविषयाया अहमाकारवृत्तेर्मूलाज्ञाननिवर्तकत्वापत्तिः। तस्याः स्वयंप्रकाशमानचित्संवलिताचिदंशमात्रविषयत्वात्, 'सोऽहम्' इति प्रत्यभिज्ञाया अपि स्वयम्प्रकाशे चैतन्ये अन्तःकरणवैशिष्ट्येन सह पूर्वापरकालवैशिष्ट्यमात्रविषयत्वेन चैतन्यविषयत्वाभावात्—इति।

केचित्तु - **घटादिवृत्तीनां तत्तदवच्छिन्नचैतन्यविषयत्वमभ्युपगम्य 'सर्वमानप्रसक्तौ च सर्वमानफलाश्रयात्। श्रोतव्येतिवचः प्राह वेदान्तावरुरुत्सया' [बृ. वा. २-४-२१२] इति वार्तिकोक्त-**

नास्ति। जडावरणानभ्युपगमस्य मूलाज्ञानविषयत्वात्। तथा तत्तज्जडावारकाज्ञाननानात्वाभ्युपगमे तदेकत्वसिद्धान्तविरोधरूपानुपपत्तिरपि नास्ति। तदेकत्वाभ्युपगमस्यापि मूलाज्ञानविषयत्वात्, जडावारकाज्ञानानां च अवस्थारूपत्वात्—इत्यादिकमभिप्रेत्य न काचिदनुपपत्तिरित्युक्तम्। परमप्रकृतमाह—**न वेति**। घटादिवृत्तीनामपि मूलाज्ञाननिवर्तकत्वापत्तिः—इति यत् पूर्ववादिनश्चोद्यं आदौ प्रकृतं तत् नास्त्येव, घटादिवृत्तीनां मूलाज्ञानविषयचैतन्यविषयकत्वानभ्युपगमादित्यर्थः।

न चैवमपीति। घटादिवृत्तीनां चैतन्यविषयकत्वाभावेऽपि अहमर्थरूपजीवस्य चिदचित्संवलितरूपतया अहंवृत्तेश्चैतन्यविषयकत्वावश्यम्भावादित्यर्थः। **तस्या इति**। स्वप्रकाशतया स्वयमेव प्रकाशमानायां चिति चित्संवलितः - चित्तादात्म्येनाध्यस्तो योऽयमचिदंशः तन्मात्रविषयकत्वादहमाकारवृत्तेः न तस्या अपि चैतन्यविषयकत्वम्, औपनिषदत्वश्रुतिविरोधादेवेत्यर्थः। ननु – 'योऽहं स्वप्ने श्रीकृष्णमन्वभूवं सोऽहं जागरे तं स्मरामि' इत्यादिप्रत्यभिज्ञायाश्चैतन्यविषयकत्वमावश्यकम्, अन्यथा तया चिदात्मनःस्थायित्वं संघातव्यतिरिक्तत्वं च न सिद्ध्येत्, इत्यत आह—**सोऽहमिति**। प्रत्यभिज्ञाऽपि स्वयमेव प्रकाशमाने चैतन्ये 'अहम्' इत्यन्तःकरणतादात्म्यमिव तत्तादिवैशिष्ट्यमपि विषयीकरोति, न तु स्वप्रकाशचैतन्यम्। अस्मिन्मते चिदात्मनस्स्थायित्वादेः श्रुतिबलादेव सिद्धिः न प्रत्यभिज्ञया इति बोध्यम्।

'घटादिवृत्तीनामपि चैतन्यविषयकत्वाविशेषात् वेदान्तजन्यज्ञानवत् मूलाज्ञाननिवर्तकत्वापत्तिः' इति चोद्ये, हेतोरेवासत्त्वान्नोक्तातिप्रसङ्ग इति समाधानमुक्तम्। इदानीं तासां चैतन्यविषयकत्वाभ्युपगमेऽपि नोक्तातिप्रसङ्ग इत्याह—**केचित्त्विति**। **अभ्युपगम्येति**। न च एवमभ्युपगमे चैतन्यस्य चक्षुरादिविषयत्वनिषेधश्रुतीनां बाधः स्यादिति वाच्यम्। तासां निरुपाधिकचैतन्यविषयत्वाभ्युपगमेन अवच्छिन्नचैतन्यस्य चक्षुरादिवृत्तिविषयत्वे तद्विरोधाभावादिति भावः। अत एव ब्रह्मचैतन्यस्य सर्वप्रत्ययवेद्यत्वप्रतिपादकं पूर्वोदाहृतवार्तिकवचनमपि सङ्गच्छते। अज्ञातज्ञापकत्वं हि प्रामाण्यम्। अज्ञातं च वस्तु चैतन्यमेव। तस्यैव स्वप्रकाशतया सदा प्रसक्तप्रकाशस्य अज्ञानविषयत्वकल्पनौचित्यात्। अवभासकचैतन्यस्यावरणे सति जडानवभाससम्भवेन तस्य पृथगावरणकल्पनायोगात्। अज्ञानस्य चैतन्याश्रितत्वनियमेन तस्य तमस इव स्वाश्रयादन्यत्र आवरणहेतुत्वानुपपत्तेश्च। तथा च प्रत्यक्षादीनामपि प्रामाण्यसिद्धये घटाद्यवच्छिन्नचैतन्यविषयकत्वमेव स्वीकर्तव्यं, न तु जडमात्रविषयकत्वम्। एवं सर्वेषामेव मानानां फलशब्दितचैतन्यविषयकत्वात् अमृतत्वसाधने ब्रह्मदर्शने

श्रोतव्यवाक्यार्थवेदान्तनियमविध्यनुसारेण वेदान्तजन्यमेव नियमादृष्टसहितं ब्रह्मज्ञानमप्रतिबद्धं ब्रह्माज्ञाननिवर्तकमिति घटादिज्ञानान्न तन्निवृत्तिप्रसङ्गः—इत्याहुः।

अन्ये तु—तत्त्वमस्यादिवाक्यजन्यं जीवब्रह्माभेदगोचरमेव ज्ञानं मूलाज्ञाननिवर्तकं, मूलाज्ञानस्य तदभेदगोचरत्वात्, इति न चैतन्यस्वरूपमात्रगोचरात् घटादिज्ञानात् तन्निवृत्तिप्रसङ्गः। न च अभेदस्य तत्त्वावेदकप्रमाणबोध्यस्य चैतन्यातिरेके द्वैतापत्तेः चैतन्यमात्रमभेदः इति तद्गोचरं घटादिज्ञानमप्यभेदगोचरमिति वाच्यम्। नह्यभेदज्ञानमिति विषयतो विशेषं ब्रूमः, किं तु

सर्वेषां मानानां कारणत्वप्रसक्तौ वेदान्तानामेव अवरोधेच्छया - नियमनेच्छया 'श्रोतव्यः' इति वचः 'वेदान्तानामेव विचारः कर्तव्यः' इत्यमुमर्थं प्राह—इति वार्तिकार्थः। घटादिवृत्तीनां तु चैतन्यविषयकत्वेऽपि वेदान्तजन्यत्वाभावेन श्रोतव्यविधिसिद्धनियमादृष्टसाहित्याभावात् न मूलाज्ञाननिवर्तकत्वप्रसङ्ग इति भावः। **अप्रतिबद्धमिति।** नियमादृष्टेन प्रतिबन्धकदुरितस्य क्षीणत्वादिति भावः।

'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' इति नारदवचनदर्शनात्, 'तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः। तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम्॥' [वाक्यवृत्तिः ६] इति भगवत्पादीयवचनदर्शनाच्च, मूलाज्ञानस्य जीवब्रह्माभेदावारकत्वाच्च, जीवब्रह्मणोरैक्यलक्षणतादात्म्यविषयकं यत् ज्ञानं इदमेव मुक्तिसाधनम्, अतो नोक्तातिप्रसङ्गः—इति समाधानान्तरं दर्शयति—**अन्ये त्विति। इतीति।** वाक्यजन्याभेदज्ञानमेव अज्ञाननिवर्तकं इति स्थिते तदभेदागोचरात् घटादिज्ञानात् न मूलाज्ञाननिवृत्तिप्रसङ्ग इत्यर्थः। **न चेति।** जीवब्रह्माभेदः चैतन्यापेक्षया अतिरिक्तः—इति वक्तुं न शक्यते। तथा सति वेदान्ततात्पर्यगोचरस्याभेदस्य सत्यत्वावश्यंभावेन चैतन्यस्याद्वितीयत्वहानापत्तेः, वेदान्ततात्पर्यविषयस्याभेदस्यासत्यत्वे वेदान्तानां तत्त्वावेदकत्वलक्षणस्य प्रामाण्यस्य सिद्धान्तसम्मतस्य भङ्गापत्तेः इत्यर्थः। अत्र तत्पदं परमार्थवस्तुपरम्। **न हीति।** घटादिज्ञाने चैतन्यविषयकेऽपि जीवब्रह्माभेदो न विषयः, महावाक्यार्थज्ञाने तु तयोरभेदो विषयः, इत्येवं घटादिज्ञानापेक्षया महावाक्यजन्यज्ञानस्य विषयतो विशेषं न ब्रूमः, येनोक्तदोषतादवस्थ्यं स्यादित्यर्थः। ननु—'इदं रजतम्' इतिभ्रमे यावदधिष्ठानांशो भासते तावदपेक्षया अधिकशुक्तित्वादिविशेषविषयकस्य शुक्त्यादिज्ञानस्य रजतादिभ्रमविरोधित्वं दृष्टम्। तथा च 'सन् घटः, स्फुरति घटः' इत्यादिभ्रमेषु यावदधिष्ठानभूतं चैतन्यं विषयः तावदपेक्षया अधिकाभेदविषयकत्वस्य वाक्यजन्यज्ञानेऽनभ्युपगमे वाक्योत्थज्ञानस्य भ्रमनिवर्तकत्वमेव न स्यात्, अतो विषयतो विशेषोऽभ्युपगन्तव्यः—इति शङ्कते—**किं त्विति।**

भ्रमाधिकविषयाणामेव ज्ञानानां भ्रमनिवर्तकत्वमिति नियमो नास्ति, भ्रमानधिकविषयाणामपि भ्रमनिवर्तकत्वदर्शनेन व्यभिचारात्। तथाहि—वस्तुतो घोषाधारभूते गङ्गातीरे यस्य तटाकतीरत्वभ्रमेण 'तटाकतीरे घोषः' इति भ्रमोऽस्ति, तं प्रति 'गङ्गायां घोषः' इति वाक्यप्रयोगे सति तस्माद्वाक्यात् तस्य पुरुषस्य 'गङ्गातीरे घोषः' इति बोधो जायते। तेन च बोधेन तस्य गङ्गातीरे तटाकतीरत्वभ्रमो निवर्तते। न च तत्र भ्रम-

तत्त्वंपदवाच्यार्थधर्मिद्वयपरामर्शादिरूपकारणविशेषाधीनेन स्वरूपसंबन्धविशेषेण चैतन्यविषयत्वमेव तदभेदज्ञानत्वम् ।

विषयगङ्गातीरांशे[1] भ्रमापेक्षया वाक्यजन्यबोधे कश्चिद्विशेषो विषयो दृष्टः । न च तत्र वाक्यजन्यज्ञाने तटाकतीरव्यावर्तकस्य गङ्गातीरत्वरूपविशेषस्य विषयत्वदर्शनात् विशेषाविषयकत्वमसिद्धमिति वाच्यम् । यत्र तीरत्वमात्रप्रकारकतात्पर्येण 'गङ्गायां घोषः' इति प्रयोगः, तथैव तस्य भ्रान्तस्य तात्पर्यग्रहश्च, तत्र गङ्गातीरत्वप्रकारकबाधाभावेऽपि भ्रमनिवृत्तिदर्शनेन व्यभिचारध्रौव्यात् । तथा—'येन केनचित् कपालेन तुषोपवापः कर्तव्यः' इति भ्रमवन्तं पुरुषं प्रति कपालत्वमात्रप्रकारकतात्पर्येण प्रयुक्तात् तन्मात्रतात्पर्यवत्तया गृहीतात् 'पुरोडाशकपालेन तुषानुपवपति' इति वाक्यात् 'कपालेन तुषोपवापः कर्तव्यः' इत्येव तस्य पुरुषस्य बोधो जायते । तत्र कपालांशे कपालान्तरव्यावर्तकविशेषाग्रहणेऽपि पुरोडाशकपालातिरिक्तकपालेषु तुषोपवापसाधनत्वभ्रमनिवृत्तिदर्शनेन तत्रापि व्यभिचारात् । तस्मात् 'तीरे घोषः' इति शाब्दबोधस्य गङ्गातीरत्वरूपविशेषविषयकत्वाभावेऽपि तद्धेतुपदार्थोपस्थितिकाले तीरस्य गङ्गासम्बन्धित्वेनोपस्थितत्वात् तदुपस्थितिमहिम्ना वस्तुगत्या गङ्गातीरविषयकस्य भ्रमानधिकविषयस्यापि तस्य भ्रमनिवर्तकत्वमिति वक्तव्यम् । तथा—'कपालेन तुषोपवापः कर्तव्यः' इति शाब्दबोधस्य स्वयं कपालान्तरव्यावर्तकविशेषविषयकत्वाभावेऽपि तादृशशाब्दबोधहेतुपदार्थोपस्थितिकाले कपालस्य पुरोडाशसम्बन्धित्वेनोपस्थितिसत्त्वात् तदुपस्थितिमहिम्ना तस्य भ्रमानधिकविषयस्यापि भ्रमनिवर्तकत्वमिति वक्तव्यम् । तथा च ज्ञानस्य भ्रमविरोधित्वे सामग्रीविशेषप्रयोज्यत्वं प्रयोजकं, न तु भ्रमाधिकविषयत्वम् । व्यभिचारात् । किं च महावाक्यजन्यज्ञानस्य संसारमूलभ्रमविरोधित्वं श्रुतिस्मृतिविद्वदनुभवैस्सिद्धं, महावाक्यानां च चैतन्यस्वरूपमात्रबोधकत्वं [2]द्वितीयपरिच्छेदे मुक्तिसाधनमहावाक्यजन्यज्ञानं प्रति चैतन्यमात्ररूपविषयनियामकश्रुत्युदाहरणेन अस्माभिस्साधितम् । प्रपञ्चितं च निबन्धनेष्वेतत् । तथा च शुक्तिरजतादिस्थले भ्रमाधिकविषयशुक्तिज्ञानादौ भ्रमविरोधिनि भ्रमाधिकविषयत्वस्येव दोषाभावादिघटितसामग्रीविशेषाधीनत्वस्यापि दृष्टत्वेन अखण्डार्थकवेदान्तानुसारेण पूर्वोदाहृतव्यभिचारस्थलानुरोधेन च ज्ञानस्य भ्रमविरोधित्वे सामग्रीविशेषाधीनत्वमेवानुगतं प्रयोजकं कल्पयितुं युक्तं, न तु भ्रमाधिकविषयत्वं—इत्यभिप्रेत्य महावाक्यार्थज्ञानस्य भ्रमानधिकविषयस्यापि भ्रमनिवर्तकत्वं सम्भवतीति समाधत्ते—**तत्त्वमिति** । तत्त्वंपदयोर्वाच्यार्थभूतौ जीवेश्वरावेव धर्मिद्वयम् । तस्य तत्त्वंपदाभ्यां प्रथमं शक्त्या स्मृतिरूपः परामर्शः, तदनन्तरं तत्त्वंपदसामानाधिकरण्यबलात् 'जीव ईश्वराभिन्नः' इति तयोर्विशेषणविशेष्यभावेनावगतिः, तदनन्तरं च 'विशिष्टयोरैक्यं न सम्भवति' इति विरोधप्रतीतिः, तदनन्तरं च तत्त्वंपदाभ्यां वाच्यार्थरूपविशिष्टान्तर्गतयोर्विशेष्यचैतन्यांशयोरभेदयोग्ययोः लक्षणया

---

1. तीरांशे विषयः इति सम्बन्धः । अंशः – विशेष्यता, निरूपितत्वं सप्तम्यर्थः, स च विषयशब्दार्थैकदेशे विषयतायां अन्वेति । 2. श्रुतेः प्रत्यक्षात् प्राबल्ये विवरणवार्तिकमतनिरूपणोपक्रमे ।

यथा हि विशेषणविशेष्यतत्सम्बन्धगोचरत्वाविशेषेऽपि विशिष्टज्ञानस्य विशेषणज्ञानादिकारणविशेषाधीनस्वरूपसम्बन्धविशेषेण तत्त्रितयगोचरत्वमेव समूहालम्बनव्यावृत्तं विशिष्टज्ञानत्वं, यथा वा 'स्थाणुत्वपुरुषत्ववान्' इत्याहार्यवृत्तिव्यावृत्तं संशयत्वं, विषयतो विशेषानिरूपणात्; तथा घटादावपि 'सोऽयं घटः' इत्यादिज्ञानस्य स्वरूपसम्बन्धविशेषेण घटादिविषयत्वमेव केवलघटशब्दादिजन्यज्ञानव्यावृत्तं तदभेदज्ञानत्वम्। अतिरिक्ताभेदानिरूपणात्। अभावसादृश्यादीनामधिकरणप्रति-

---

प्रतीतिः, ततश्च विशेष्यद्वयाभेदगोचरशाब्दबोधः—इति [1]क्रममभिप्रेत्य आदिपदम्। वाक्यजन्यज्ञानस्य स्वविषयचैतन्येन सह यः स्वरूपसम्बन्धविशेषः सामग्रीविशेषाधीनत्वप्रयुक्तः, तेन सम्बन्धेन यत् चैतन्यगोचरत्वं घटज्ञानादिव्यावृत्तं तदेव तस्याभेदज्ञानत्वं, तद्बलादेव तस्य मूलाज्ञानमिथ्याज्ञानादिविरोधित्वं इत्यर्थः।

महावाक्यजन्यज्ञानस्य घटादिज्ञानापेक्षया चैतन्यांशे विषयतो विशेषाभावेऽपि सामग्रीविशेषादेव घटादिज्ञानापेक्षया अभेदज्ञानत्वरूपे वैलक्षण्ये दृष्टान्तमाह—**यथा हीति। विशिष्टज्ञानस्येति।** 'दण्डी पुरुषः' इति ज्ञानस्येत्यर्थः। विशेषणविशेष्ययोरसंसर्गाग्रह आदिपदार्थः। **समूहालम्बनेति।** 'दण्डपुरुषसंयोगाः' इति ज्ञानेत्यर्थः। [2]तदुक्तं चिन्तामणिकृता—'कारणकृतः' इति। विशिष्टज्ञानस्य समूहालम्बनापेक्षया विशेषणज्ञानादिरूपकारणकृतो विशेष इति तदर्थः। **स्थाणुत्वेति।** 'स्थाणुत्व[3]तद्विरुद्धपुरुषत्ववान्' इति निश्चयः संशयसमानविषयको य आहार्यवृत्तिरूपः तद्व्यावृत्तमित्यर्थः। विशेषदर्शनदशायामनाहार्यनिश्चयासम्भवात्[4]—आहार्येत्युक्तम्। **विषयत इति।** विशिष्टज्ञाने 'स्थाणुः पुरुषो वा' इति संशये च इति शेषः। न केवलं तत्त्वमसिवाक्यजन्यज्ञानस्याभेदज्ञानत्वे इयं रीतिः। 'सोऽयं घटः' 'सोऽयं देवदत्तः' इत्यादिवाक्यजन्यज्ञानस्यापि केवलघटशब्ददेवदत्तशब्दादिजन्यज्ञानव्यावृत्ताभेदज्ञानत्वेऽपि इयं रीतिरनुसर्तव्येत्याह—**तथा घटादावपीति। अतिरिक्तेति।** केवलघटशब्ददेवदत्तशब्दादिजन्यज्ञानविषयघटादिस्वरूपापेक्षया 'सोऽयम्' इति वाक्यगम्याभेदस्यातिरिक्तत्वे मानाभावात्। तथा च विषयतो विशेषासम्भवात् 'सोऽयं घटः' इत्यादावपि 'तत्त्वमसि' इत्यत्रेव 'सोऽयम्' इति पदद्वयवाच्यार्थरूपधर्मिद्वयपरामर्शादिरूपकारणविशेषाधीनस्वरूपसम्बन्धविशेषेण घटादिस्वरूपविषयकत्वमेव घटाद्यभेदज्ञानत्वं नान्यदिति वक्तव्यमिति भावः। ननु - केवलघटशब्दादिजन्यज्ञानस्यापि

---

1. क्रमोऽयं संक्षेपशारीरके स्पष्टमुक्तः—सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः पश्चादेष विशेषणेतरतया पश्चाद्विरोधोद्भवः। उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके वृत्तिर्लक्षणया भवत्ययमिह ज्ञेयः क्रमः सूरिभिः॥ [सं. शा. १-११६] इति॥

2. प्रत्यक्षचिन्तामणौ प्रमालक्षणवादे 'समूहालम्बनात्तु विशिष्टज्ञानस्य विशेषः कारणकृतः' इत्युक्तम्।

3. तद्विरुद्धेति। स्थाणुत्वपुरुषत्वयोर्विरोधोऽपि संसर्गतया भासते इत्यभिप्रायं तद्विरुद्धेतिपदम्, न तु तद्विरुद्धत्वेन पुरुषत्वभानाभिप्रायम्। संशयसमानविषयकत्वासम्भवात्। संशये कोटयोर्विरोधस्य संसर्गतयैव भानात्। अथवा, संशयेऽपि कोटयोर्विरोधस्य प्रकारतया भानं-इति मताभिप्रायेणेदं टीकोक्तम्।

4. निश्चयासम्भवादिति। अनुपदोक्तविधनिश्चयस्यासभवात् इत्यर्थः।

योग्यादिभिः स्वरूपसम्बन्धयुक्तानां अधिकरणेन आधाराधेयभावरूपः स्वरूपसम्बन्धविशेषः प्रतियोगिना प्रतियोग्यनुयोगिभावरूपः, इत्यादिप्रकारेण स्वरूपसम्बन्धे अवान्तरविशेषकल्पनावत् वृत्तीनां विषयेऽपि संयोगतादात्म्ययोरतिप्रसक्त्या विषयैः विषयविषयिभावरूपस्वरूपसम्बन्धवतीनां विषयविशेषनिरूपणासम्भवे क्लृप्त एव स्वरूपसम्बन्धे अवान्तरविशेषकल्पनेन अभेदज्ञानत्वादिपरस्परवैलक्षण्यनिर्वाहाच्च । एवं च ब्रह्मज्ञानस्य अभेदाख्यकिञ्चित्संसर्गगोचरत्वानभ्युपगमात् न

विषयेण स्वरूपसम्बन्ध एव, तथा च कथं स्वरूपसम्बन्धकृता अभेदज्ञानत्वादिव्यवस्था । न च वृत्तिज्ञानानां विषयैस्सह विषयविषयिभावप्रयोजकस्वरूपसम्बन्धानां अविशेषेऽपि तेष्वेव विषयतज्ज्ञानस्वरूपात्मकसम्बन्धेषु सामग्रीविशेषाधीनत्वप्रयुक्तपरस्परवैलक्षण्यकल्पनया व्यवस्थोपपादनं कर्तुं शक्यत इति वाच्यम् । स्वरूपसम्बन्धेषु वैलक्षण्यस्य क्वाप्यदृष्टत्वेन तथाकल्पनानुपपत्तेः; इत्यत आह—**अभावसादृश्यादीनामिति ।** ननु—वृत्तीनां विषयैस्सह विषयविषयिभावः स्वरूपसम्बन्धकृत एव न भवति, किं तु संयोगादिकृतः । तथा च तासां तैस्सह स्वरूपसम्बन्धानामेवासिद्धत्वात् तेषु वैलक्षण्यात्मकविशेषकल्पना दूरापास्ता, इत्यत आह—**संयोगेति ।** वृत्तिसंयोगस्य वृत्तिविषयत्वप्रयोजकत्वे चक्षुर्गोलकादेरपि घटादिवृत्तिसंयोगित्वेन तद्विषयत्वप्रसङ्गात्, वृत्तितादात्म्यस्य वृत्तिविषयत्वप्रयोजकत्वे वृत्त्यधिष्ठानतया वृत्तितादात्म्यापन्नस्य घटाद्यवच्छिन्नचैतन्यस्य घटादिवृत्तिविषयत्वसम्भवेऽपि घटादेर्वृत्तितादाम्यरहितस्य तदविषयत्वप्रसङ्गात्, तद्वृत्तिपरिणाम्यन्तःकरणस्य घटादिवृत्तिविषयत्वप्रसङ्गाच्च, परिणामपरिणामिनोस्तादाम्यात्—इत्यर्थः । ननु तत्त्वमस्यादिवाक्यजन्यज्ञानस्य विषयेण सह यस्स्वरूपसम्बन्धः चैतन्यतद्गोचरज्ञानोभयस्वरूपात्मकः तत्र सामग्रीविशेषबलादपि विषयस्वरूपात्मके सम्बन्धे विशेषो निरूपयितुं न शक्यत इति, अत आह—**विषयविशेषनिरूपणासम्भव इति ।** विषये निर्विशेषचैतन्यात्मके विशेषाधानासम्भवेऽपि स्वरूपसम्बन्धान्तर्गततया क्लृप्त एव ज्ञानस्वरूपात्मके सम्बन्धे सामग्रीविशेषबलाद्विशेषाधानसम्भवात् नोक्तदोष इति भावः । यद्वा वृत्तीनां विषयेऽपि संयोगतादात्म्ययोरतिप्रसक्त्या विषयविशेषनिरूपणासंभवे विषयैर्विषयविषयिभावरूपस्वरूपसम्बन्धवतीनामिति सम्बन्धः । अभावसादृश्यादीनामधिकरणादाविव वृत्तीनामपि विषये संयोगतादात्म्ययोरतिप्रसक्तत्वेन ताभ्यां वृत्तीः प्रति विषयविशेषनियमनासम्भवे सति परिशेषात् विषयविषयिभावप्रयोजकस्वरूपसम्बन्धवतीनामित्यर्थः । रूपपदं नियामकपरम् । विषयविषयिभावस्य स्वरूपसम्बन्धनियम्यत्वेन तयोरभेदस्य रूपशब्दार्थस्य अयोगात् । ननु—संयोगतादात्म्ययोर्विषयविशेषनियामकत्वाभावेऽपि वृत्तीनां विषये स्वरूपसम्बन्धवत्त्वं परिशेषात् न सिद्ध्यति, स्वरूपसम्बन्धातिरिक्तस्य सम्बन्धान्तरस्य कल्पनोपपत्तेः, इत्यत आह—**क्लृप्त एवेति ।** स्वरूपसम्बन्धस्य वृत्त्यादिस्वरूपतया तस्य क्लृप्तत्वात् क्लृप्त एव स्वरूपसम्बन्धे विशेषकल्पनायां लाघवं, सम्बन्धान्तरं कल्पयित्वा तस्मिन् सम्बन्धान्तरे अभेदज्ञानत्वादिनिर्वाहकविशेषकल्पनायां गौरवं, अतो वृत्तीनां विषयैस्सह स्वरूपसम्बन्धवत्त्वमेवेति भावः । ननु 'तत्त्वमस्यादिवाक्यात् जीवस्य ब्रह्माभेदज्ञानोपगमे तदभेदस्यैव संसर्गविधया भानात् वेदान्तानां संसर्गगोचरप्रमिति-

वेदान्तानामखण्डार्थत्वहानिरपि—इत्याहुः।

ननु—घटादिज्ञानवत् ब्रह्मज्ञानस्यापि न मूलाज्ञाननिवर्तकत्वं युक्तम्, निवर्तकत्वे तदवस्थानासहिष्णुत्वरूपस्य विरोधस्य तन्त्रत्वात्, कार्यस्य चोपादानेन सह तादृशविरोधाभावात् इति चेत्—न-कार्यकारणयोः अन्यत्र तादृशविरोधादर्शनेऽपि एकविषयज्ञानाज्ञानभावप्रयुक्तस्य तादृग्विरोधस्य अत्र सत्त्वात्, कार्यकारणयोरप्यग्निसंयोगपटयोः तादृशविरोधस्य दृष्टेश्च। न च अग्निसंयोगात् अवयवविभागप्रक्रियया असमवायिकारणसंयोगनाशादेव पटनाशः नाग्निसंयोगादिति वाच्यम्। दग्धपटेऽपि पूर्वसंस्थानानुवृत्तिदर्शनेन मुद्गरचूर्णीकृतघटवदवयवविभागादर्शनात् तत्र अवयवविभागादिकल्पनाया अप्रामाणिकत्वात्। नापि तत्र तन्तूनामपि दाहेन समवायिकारण-नाशात् पटनाश इति युक्तम्। अंशुतन्त्वादिभिस्सह युगपदेव पटस्य दाहदर्शनेन क्रमकल्पना-योगात्। यतोऽधस्तात् नावयवनाशः तत्र अग्निसंयोगादेव नाशस्य वाच्यत्वात्।

जनकत्वरूपाखण्डार्थत्वाभ्युपगमहानिः' इत्येतच्चोद्यं निरवकाशमित्याह—**एवं चेति**। महावाक्यजन्यज्ञानगता-भेदज्ञानत्वस्य अन्यथोपपादितत्वेन अभेदसंसर्गभानानपेक्षायां सत्यामित्यर्थः। **हानिरपीति**। घटादिवृत्तीनां मूलाज्ञाननिवर्तकत्वापत्तिर्नास्ति, अखण्डार्थत्वहानिश्च नास्तीत्यपिशब्दार्थः।

वेदान्तजन्यज्ञानस्यापि मूलाज्ञाननिवर्तकत्वमाक्षिपति—**नन्विति**। **तादृशेति**। कार्यस्य लोके उपादानस्थितिविरोधित्वादर्शनादित्यर्थः। ब्रह्मगोचरवृत्तिं प्रति अन्तःकरणस्यैवोपादानत्वेन तां प्रत्यज्ञानस्यानु-पादानत्वात् तन्निवर्तकत्वं सम्भवतीति मत्वा आह—**नेति**। उपादानत्वमुपेत्याप्याह—**कार्येति**। उपादानो-पादेययोर्निवर्त्यनिवर्तकभावप्रयोजकविरोधो नास्तीत्युत्सर्गः। स च ब्रह्मज्ञानतदुपादानस्थले अपोद्यते। निवर्त्य-निवर्तकभावप्रयोजकतयालोकेक्ऌप्तस्य समानविषयज्ञानाज्ञानभावस्य विशेषरूपतया तेन सामान्यरूपस्य उपादानो-पादेयभावप्रयुक्ताविरोधस्य बाधोपपत्तेरित्यर्थः। लोके उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोजकविरोधादर्शनमसिद्धं चेत्याह—**कार्यकारणयोरपीति**। अग्निसंयोगरूपकार्यस्य स्वोपादानपटनाशकत्वदर्शनादित्यर्थः। ननु तत्र अग्निसंयोगस्य नाशकत्वदर्शनं भ्रान्तिरिति मत्वा शङ्कते—**न चाग्नीति**। **प्रक्रिययेति**। अग्निसंयोगात्तन्तुषु क्रिया, ततस्तेषां विभागः, ततस्तेषां पटासमवायिकारणसंयोगनाशः, ततः पटनाशः, इति वैशेषिकप्रक्रिया। तन्तुषु विभागप्रक्रियैव भ्रान्तिमूलेत्याह—**दग्धपटेऽपीति**। पूर्वसंस्थानं-संयुक्तावस्था। व्यतिरेकदृष्टान्तमाह—**मुद्गरेति**। यथा मुद्गरचूर्णीकृतस्य घटस्य अवयवेषु विभागो दृश्यते तथा पटदाहानन्तरं दग्धतन्तुषु विभागा-दर्शनेन इत्यर्थः। **तत्रेति**। तन्तुष्वित्यर्थः। वैशेषिकप्रक्रियान्तरमपि भ्रान्तिमूलमेवेत्याह—**नापीत्यादिना**। **तत्रेति**। पटदाहस्थल इत्यर्थः। अग्निसंयोगस्य क्वचिदुपादानद्रव्यनाशकताया आवश्यकत्वात् पटनाशकत्वमपि तस्यैवेत्याह—**यत इति**। यतः-द्व्यणुकात् अधस्तात् द्व्यणुकावयवस्य परमाणोः न नाशः, तत्र द्व्यणुके विद्यमानात् अग्निसंयोगादेव तदुपादानभूतद्व्यणुकनाशस्य वाच्यत्वात्। न च तत्र अवयवविभागप्रक्रियया

ब्रह्मज्ञाननिवर्तकनिरूपणम्

ननु—अस्त्वेतदेवं, तथापि सविलासाज्ञाननाशकमिदं ब्रह्मज्ञानं कथं नश्येत्, नाशकान्तरस्याभावात्—इति चेत्, न—यथा कतकरजः सलिलेन संयुज्य पूर्वयुक्तरजोऽन्तरविश्लेषं जनयत् स्वविश्लेषमपि जनयति, तथा आत्मन्यध्यस्यमानं ब्रह्मज्ञानं पूर्वाध्यस्तसर्वप्रपञ्चं निवर्तयत् स्वात्मानमपि निवर्तयतीति केचित्।

अन्ये तु अन्यन्निवर्त्य स्वयमपि निवृत्तौ दग्धलोहपीताम्बुन्यायमुदाहरन्ति।

अपरे तु अत्र दग्धतृणकूटदहनोदाहरणमाहुः।

न[1] च ध्वंसस्य प्रतियोग्यतिरिक्तजन्यत्वनियमः। अप्रयोजकत्वात्, निरिन्धनदहनादिध्वंसे व्यभिचाराच्च। न च - ध्वंसस्य प्रतियोगिमात्रजन्यत्वेऽतिप्रसङ्गात् कारणान्तरमवश्यं वाच्यं,

---

परमाणुद्वयसंयोगनाशादेव द्व्यणुकनाश इति वाच्यम्। अवयवविभागप्रक्रियायाः निरस्तत्वात्। तथा च अग्निसंयोगस्य स्वोपादानपटनाशकत्वदर्शनं न भ्रान्तिरिति भावः।

नन्वस्त्वेतदेवमिति। एतत् - ब्रह्मज्ञानं एवम् - अन्तःकरणद्वारा स्वोपादानाज्ञाननाशकं अस्त्वित्यर्थः। **तथापीति।** ब्रह्मज्ञानस्य सविलासाज्ञाननाशकत्वेऽपीत्यर्थः। सकार्याज्ञाननाशकस्य अज्ञाननाशकाले अवशिष्यमाणस्य ब्रह्मज्ञानस्य नाशो न सिद्ध्येत्, स्वस्य स्वनाशकत्वायोगात् नाशकान्तरानवशेषाच्च इत्यर्थः। प्रथमं ब्रह्मज्ञानव्यतिरिक्तस्य सकलस्य ब्रह्मज्ञानेन नाशः पश्चात् अवशिष्टस्य ब्रह्मज्ञानस्य नाशः-इति क्रमो नोपेयते, किं तु ब्रह्मज्ञानेन सविलासाज्ञाननाशकाले सविलासाज्ञानेन सहैव ब्रह्मज्ञानस्यापि नाशः इत्युपेयते। ब्रह्मज्ञानस्यैव स्वनाशं प्रत्यपि हेतुत्वाभ्युपगमात्। न चैकस्यैव स्वपरविलापकत्वं न दृष्टमिति वाच्यम्, कतकरजसि दृष्टत्वात् - इति परिहरति—**न—यथेति।** **पूर्वेति।** कतकरजस्संयोगात् पूर्वं जलेन संयुक्तरजोऽन्तरैः जलस्य विश्लेषमित्यर्थः। **पूर्वाध्यस्तेति।** ब्रह्मज्ञानाध्यासात् पूर्वेत्यर्थः।

अन्ये त्विति। यथा वह्नितप्तलोहपिण्डे प्रक्षिप्तमम्बु लोहगतमग्निं नाशयत् आत्मानमपि नाशयति तथा ब्रह्मज्ञानमपीत्यर्थः। ब्रह्मज्ञानस्य स्वव्यतिरिक्तं सर्वं निवर्तयतः तदैव स्वस्यापि निवर्तने दग्धलोहेन पीताम्बुरूपं दृष्टान्तं उदाहरन्तीत्यक्षरार्थः।

अपरे त्विति। यथा शुष्कतृणसमूहे प्रक्षिप्तो दहनःतृणकूटं नाशयन् आत्मानमपि नाशयति, तथा अज्ञानतत्कार्यसमुदाये समुत्पन्नो ब्रह्मप्रत्ययः तन्नाशयन् आत्मानमपि नाशयतीत्यर्थः।

ननु 'दग्धदाह्यदहनादिन्यायेन ब्रह्मज्ञानादेव ब्रह्मज्ञाननाशः' इत्युपपादनमयुक्तम्, घटादिनाशे प्रतियोगिघटाद्यतिरिक्तमुद्गरपातादिकारणान्तरदर्शनेन ध्वंसस्य प्रतियोग्यतिरिक्तकारणजन्यत्वनियमात्—इति शङ्कते—**न च ध्वंसस्येति।** **निरिन्धनेति।** इन्धनानां निश्शेषं नाशानन्तरं दहनस्य स्वत एव नाशदर्शनेन निरिन्धनदहन-

---

1. **'न च ध्वंसस्य' इत्यादिशङ्कातत्समाधाने उक्तपक्षत्रयसाधारणे।**

निरिन्धनदहनादिध्वंसेऽपि कालादृष्टेश्वरेच्छादिकारणान्तरमस्ति इति - वाच्यम्। अतिप्रसङ्गापरिज्ञानात्। न च 'घटादिध्वंसस्यापि कारणान्तरनिरपेक्षत्वं स्यात्' इत्यतिप्रसङ्गः। ध्वंसमात्रे कारणान्तरनैरपेक्ष्यानभिधानात्। न च घटध्वंसदृष्टान्तेन ब्रह्मज्ञानध्वंसस्य कारणान्तरापेक्षासाधनम्। तद्दृष्टान्तेन मुद्गरपतनापेक्षाया अपि साधनापत्तेः। नापि ज्ञानध्वंसत्वसाम्यात् घटज्ञानादिध्वंसस्यापि कारणान्तरनैरपेक्ष्यं स्यादित्यतिप्रसङ्गः। सेन्धनानलध्वंसस्य जलसेकादिदृष्टकारणापेक्षत्वेऽपि निरिन्धनानलध्वंसस्य तदनपेक्षत्ववत्, जाग्रज्ज्ञानध्वंसस्य विरोधिविशेषगुणान्तरापेक्षत्वेऽपि सुषुप्तिपूर्वज्ञानध्वंसस्य तदनपेक्षत्ववच्च, मूलाज्ञानानिवर्तकज्ञानध्वंसस्य कारणान्तरसापेक्षत्वेऽपि तन्निवर्तकज्ञानध्वंसस्य तदनपेक्षत्वोपपत्तेः। नापि कारणान्तरनैरपेक्ष्ये स्वोत्पत्त्युत्तरक्षण एव नाशः स्यादित्यतिप्रसङ्गः। इष्टापत्तेः। तदुत्पत्त्युत्तरक्षण एव ब्रह्माध्यस्तनिखिलप्रपञ्चदाहेन तदन्तर्गतस्य तस्यापि तदैव दाहाभ्युपगमात्, निरिन्धनदहनध्वंसन्यायेन ब्रह्मज्ञानध्वंसस्यापि कालादृष्टेश्वरेच्छादि-

---

ध्वंसे स्वापाव्यवहितपूर्वकालीनज्ञानादिध्वंसे च प्रतियोगिमात्रजन्ये व्यभिचाराच्चेत्यर्थः। उक्तं व्यभिचारं पूर्ववादी परिहरति—**निरिन्धनेति**। अतिप्रसङ्गस्यैवासिद्ध्या ध्वंसे प्रतियोग्यतिरिक्तकारणजन्यत्वनियमस्य अप्रयोजकत्वमित्याशयेन दूषयति सिद्धान्ती—**अतिप्रसङ्गापरिज्ञानादिति**। ननु कुतोऽपरिज्ञानमिति चेत्, तत्र वक्तव्यं 'ब्रह्मज्ञानध्वंसस्य प्रतियोग्यतिरिक्ताजन्यत्वे घटादिध्वंसोऽपि प्रतियोग्यतिरिक्तकारणानपेक्षः स्यात्' इत्यतिप्रसङ्गो वा 'घटादिध्वंसवत् ब्रह्मज्ञानध्वंसोऽपि प्रतियोग्यतिरिक्तकारणापेक्षःस्यात्' इत्यतिप्रसङ्गो वा 'ब्रह्मज्ञानध्वंसवत् घटज्ञानादिध्वंसोऽपि कारणान्तरानपेक्षः स्यात्' इत्यतिप्रसङ्गो वा 'ब्रह्मज्ञानस्य स्वोत्पत्तिद्वितीयक्षण एव नाशः स्यात्' इत्यतिप्रसङ्गो वा विवक्षित इति। तत्राद्यमनूद्य दूषयति—**न चेति**। **ध्वंसमात्र इति**। ध्वंसत्वावच्छिन्न इत्यर्थः। **अनभिधानादिति**। न च सिद्धान्तिना तथाऽनभिधानेऽपि ध्वंसत्वाविशेषात् तत्र तदापाद्यत इति वाच्यम्, अप्रयोजकत्वादिति भावः। द्वितीयमतिप्रसङ्गेन दूषयति—**घटध्वंसदृष्टान्तेनेति**। ध्वंसत्वहेतुनेति शेषः। तृतीयमनूद्य अप्रयोजकत्वेन दूषयति—**नापि ज्ञानध्वंसत्वसाम्यादिति**। ब्रह्मज्ञानध्वंसदृष्टान्तेनेति शेषः। **सुषुप्तीति**। सुषुप्तिपूर्वज्ञानादिगुणस्य नाशकगुणान्तरापेक्षायां तस्यापि नाशकात्मगुणान्तरकल्पनापत्त्या सुषुप्त्युच्छेदप्रसङ्गःस्यात्, तत्परिहाराय सुषुप्तिपूर्वज्ञानादिगुणस्य नाशकान्तरानपेक्षत्वं वक्तव्यमिति भावः। **मूलाज्ञानानिवर्तकेति**। घटादिज्ञानेत्यर्थः। चतुर्थमतिप्रसङ्गमनूद्य तस्येष्टत्वमाह—**नापि कारणान्तरनैरपेक्ष्य इति**। ब्रह्मज्ञानध्वंसस्येति शेषः। ननूदाहृतनिरिन्धनदहनध्वंसादौ जलसेकादिविशेषकारणानां व्यभिचारदर्शनेऽपि साधारणकारणानां व्यभिचारादर्शनेन ब्रह्मज्ञानध्वंसस्यापि साधारणकारणापेक्षा दुर्वारेत्यत आह—**निरिन्धनदहनध्वंसन्यायेनेति**। ननु—प्रथमक्षणे ब्रह्मज्ञानस्य जन्म, द्वितीयक्षणे सविलासाज्ञाननिवृत्तिः, तृतीयक्षणे ब्रह्मज्ञानस्य निवृत्तिः, इति क्रमे सति ब्रह्मज्ञाननाशात्पूर्वक्षणे कालादृष्टादीनामसत्त्वात् कथं तेषां ब्रह्मज्ञाननाशहेतुत्वा-

कारणान्तरजन्यत्वेऽप्यविरोधाच्च, 'सर्वप्रपञ्चनिवृत्त्यनन्तरं [1]एकशेषस्य ब्रह्मज्ञानस्य निवृत्तिः' इत्यनभ्युपगमेन युगपत् सर्वदाहे पूर्वक्षणे चिदविद्यासम्बन्धरूपस्य द्रव्यान्तररूपस्य वा कालस्य ईश्वरप्रसादरूपस्यान्तःकरणगुणविशेषस्य वा अदृष्टस्य अन्येषां च सत्त्वात्। न च—तत्र ज्ञानातिरिक्तकारणापेक्षणे ब्रह्मज्ञानस्य अमिथ्यात्वप्रसङ्गः, ज्ञानैकनिवर्त्यत्वं मिथ्यात्वमित्यभ्युपगमात् इति -वाच्यम्। ज्ञानाघटितसामग्र्यनिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वस्य तदर्थत्वात्। 'नान्यः पन्थाः' श्वे. उ. ३-८] इति श्रुतेरपि तत्रैव तात्पर्यात्। अतो युक्त एव दग्धदाह्यदहनादिन्यायः।

केचित् तु - वृत्तिरूपं ब्रह्मज्ञानं नाज्ञानतन्मूलप्रपञ्चनिबर्हकम्। अज्ञानस्य प्रकाशनिवर्त्यत्वनियमेन जडरूपवृत्तिनिवर्त्यत्वायोगात्। किं तु तदारूढचैतन्यप्रकाशः तन्निवर्तकः। स्वरूपेण तस्य

भ्युपगमे विरोधाभावः, इत्यत आह—**सर्वप्रपञ्चेति**। स्वमतेनाह—**चिदविद्येति**। परमतेनाह—**द्रव्यान्तरेति**। यद्वा स्वमतेऽपीश्वरस्य कालत्वमभिप्रेत्याह—**द्रव्यान्तरेति**। स्वमतेनैवादृष्टस्य द्विप्रकारत्वमाह—**ईश्वरेति**। प्रसादग्रहणमुपलक्षणम्। पुण्यमीश्वरप्रसादरूपं पापमीश्वरक्रोधरूपमिति द्रष्टव्यम्। **अन्तःकरणेति**। आत्मनः स्वमते निर्गुणत्वादिति भावः। **अन्येषां चेति**। ईश्वरदिगादीनामपीत्यर्थः। **न च तत्रेति**। ब्रह्मज्ञानध्वंस इत्यर्थः। ज्ञानैकनिवर्त्यत्वं हि ज्ञानातिरिक्तानिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वरूपं यथाश्रुतं न भवति, ज्ञानसाध्यायामज्ञाननिवृत्तौ ज्ञानातिरिक्तस्य प्रतियोगिनोऽपि हेतुत्वात्, किं त्वन्यदेव तदित्याह—**ज्ञानाघटितेति**। ज्ञानाघटिता या सामग्री तदनिवर्त्यत्वे सतीत्यर्थः। प्रपञ्चसत्यत्वमतेऽपि घटादेर्ज्ञाननिवर्त्यत्वमस्ति। 'घटं नाशयामि' इत्यादिज्ञानपूर्वकं मुद्गरपातादिना तन्नाशदर्शनादिति तद्वारणाय सत्यन्तम्। घटादिनाशस्य ज्ञानपूर्वकत्वनियमाभावेन ज्ञानाघटितसामग्रीनिवर्त्यजातीये[2] घटादौ तदघटितसामग्र्यनिवर्त्यत्वस्याभावात्। न च परमते नाशमात्रस्येश्वरज्ञानघटितसामग्रीसाध्यत्वात् तदीयज्ञानमादाय कार्यमात्रे ज्ञानाघटितसामग्र्यनिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वमस्तीति नैतत् मिथ्यात्वनिर्वचनमिति वाच्यम्। लक्षणे ज्ञानपदस्य जैवज्ञानपरत्वात्। आत्मन्यतिव्याप्तिवारणाय विशेष्यमिति भावः। ननु कार्यमात्रे कालादृष्टादेः कारणत्वमङ्गीकृत्य ब्रह्मज्ञानध्वंसेऽपि कालादृष्टादेः कारणत्वाभ्युपगमे मूलाज्ञानध्वंसरूपे मोक्षेऽपि कालादेः कारणत्वं स्यात्, कार्यत्वाविशेषात्। न चेष्टापत्तिः, 'नान्यः पन्थाः' इति श्रुतिविरोधादित्यत आह—**नान्यः पन्था इतीति**। अस्याः श्रुतेः ज्ञानमेकमेव मोक्षसाधनमित्यत्र न तात्पर्यम्, किं तु मोक्षस्य ज्ञानाघटितं किमपि साधनं नास्तीत्यत्र तात्पर्यम्, अतो न श्रुतिविरोध इत्यर्थः। **अत इति**। श्रुतिविरोधादिरूपबाधकाभावादित्यर्थः।

'वृत्तिरूपस्य ब्रह्मज्ञानस्य अविद्यादिनाशकत्ववदेव स्वनाशकत्वमप्यस्ति' इत्युक्तम्। इदानीं, 'वृत्तिरूपब्रह्मज्ञानस्याविद्यादिनाशकत्वं स्वनाशकत्वं वा नास्ति, किं तु तद्वृत्त्यारूढचैतन्यमेव तद्वृत्तिसहितसर्वनाशकम्' इति

---

1. एकशेषस्य—अवशिष्टस्य एकस्य।
2. निवर्त्यजातीये इति। ज्ञानाघटितसामग्र्यनिवर्त्यत्वं इत्यत्र निवर्त्यत्वं निवृत्तियोग्यत्वं विवक्षितमिति भावः।

अज्ञानादिसाक्षितया तदनिवर्तकत्वेऽपि अखण्डाकारवृत्त्युपारूढस्य तस्य तन्निवर्तकत्वोपपत्तेः। 'तृणादेर्भासिकाऽप्येषा सूर्यदीप्तिस्तृणं दहेत्। सूर्यकान्तमुपारुह्य तन्न्यायं तत्र योजयेत् ॥' इत्यभियुक्तोक्तेः। एवं च, यथा (किञ्चित्) काष्ठमुपारुह्य ग्रामनगरादिकं दहन् वह्निः दहत्येव तदपि काष्ठं, तथा चरमवृत्तिमुपारुह्य निखिलप्रपञ्चमुन्मूलयन् अखण्डचैतन्यप्रकाशः तन्निवर्तनेऽपि प्रगल्भत इति तन्नाशे न काचिदनुपपत्तिः—इत्याहुः।

अन्ये तु - ब्रह्मज्ञानमज्ञानस्यैव निवर्तकम्, ज्ञानाज्ञानयोरेव साक्षाद्विरोधात्, प्रपञ्चस्य तु उपादाननाशान्नाश इति प्रपञ्चान्तर्गतब्रह्मज्ञानस्यापि तत एव नाशः। न च प्रपञ्चस्य ज्ञानानिवर्त्यत्वे मिथ्यात्वानुपपत्तिः। प्रपञ्चनिवृत्तेः साक्षात् ज्ञानजन्यत्वाभावेऽपि ज्ञानजन्याज्ञाननाशजन्यत्वात्, साक्षात् परम्परया वा ज्ञानैकनिवर्त्यत्वं मिथ्यात्वमित्यङ्गीकारात्। एवं च तत्त्वसाक्षात्का-

---

मतमाह—**केचित्त्विति**। ननु चैतन्यस्याज्ञानादिसाधकत्वात् कथं तस्य नाशकत्वम्, अत आह—**स्वरूपेणेति**। तत्र दृष्टान्तं श्लोकेन दर्शयति—**तृणादेरिति**। एषा - प्रत्यक्षा सूर्यदीप्तिः स्वरूपेण तृणादेः प्रकाशिकाऽपि सूर्यकान्तमणिमुपारुह्य तृणादिकं दहतीति प्रत्यक्षसिद्धं, तन्न्यायं तत्र - चैतन्ये योजयेत्। चैतन्यं स्वरूपेणाज्ञानादिप्रकाशकमपि वृत्तिविशेषसंसृष्टं सत् अज्ञानादेर्नाशकमिति निश्चिनुयादेव, न तु 'साधकस्य कथं घातकत्वं' इत्यसम्भावनया प्रमाणसिद्धमर्थमुपेक्षेतेति श्लोकतात्पर्यम्। ननु—मण्यारूढा सूर्यदीप्तिः मणिव्यतिरिक्तमेव तृणादिकं दहति, न तु मणिमपि। तथा वृत्त्यारूढं चैतन्यं वृत्तिव्यतिरिक्तमेवाज्ञानादिकं नाशयेत्। न वृत्तिमपि। तथा च ब्रह्मज्ञानं कथं नश्येत्, नाशकान्तराभावात्—इति शङ्कायाः समाधानं कथं लब्धं, तत्राह—**एवं चेति**। चैतन्यस्य वृत्त्यारूढस्य नाशकत्वे 'प्रकाशाप्रकाशयोरेव लोके निवर्त्यनिवर्तकभावदर्शनात् प्रकाशस्यापि सहकारिविशेषवशेन नाशकत्वाविरोधाच्च' इति युक्तिद्वयेन सिद्धे सतीत्यर्थः। **उन्मूलयन्निति**। मूलभूताज्ञानेन सह नाशयन्नित्यर्थः। **प्रगल्भते इति**। समर्थो भवतीत्यर्थः। **तन्नाश इति**। चरमवृत्तिनाश इत्यर्थः।

अज्ञाननाश एव ब्रह्मज्ञाननाशहेतुः—इति मतं दर्शयति—**अन्ये त्विति**। **अज्ञानस्यैवेति**। उक्तं च पञ्चपादिकायां—'ज्ञानमज्ञानस्यैव निवर्तकम्' इति। **साक्षादिति**। विरोधप्रयोजकस्य समानविषयत्वादेः अज्ञान एव सम्भवादिति भावः। **तत एवेति**। उपादाननाशादेवेत्यर्थः। **साक्षात् परम्परया वेति**। मूलाज्ञानमात्रस्य ज्ञानैकनिवर्त्यतया मिथ्यात्वसिद्धौ मूलाज्ञानातिरिक्तजडमात्रस्य तदधीनतया स्वयं साक्षाज्ज्ञाननिवर्त्यत्वाभावेऽपि कृत्स्नप्रपञ्चस्य मिथ्यात्वसिद्धिरप्रत्यूहा [1]इत्यपि मन्तव्यम्। अस्य मतस्य जीवन्मुक्तिशास्त्रानुगृहीतत्वं दर्शयति - **एवञ्चेत्यादिना**। अज्ञानातिरिक्तस्य जडस्य ज्ञानेन सह साक्षाद्विरोधाभावे सतीत्यर्थः। ननु

---

1. इत्यपीति। तथा च ज्ञानैकनिवर्त्यतत्प्रयुक्तान्यतरत्वं मिथ्यात्वं इति भावः।

रोदयेऽपि जीवन्मुक्तस्य देहादिप्रतिभास उपपद्यते। प्रारब्धकर्मणा प्रतिबन्धेन, तत्त्वसाक्षात्कारोदयेऽपि प्रारब्धकर्मतत्कार्यदेहादिप्रतिभासानुवृत्त्या, उपादानाविद्यालेशानुवृत्त्युपपत्तेः। अज्ञानवत् प्रपञ्चस्यापि साक्षात् ब्रह्मसाक्षात्कारनिवर्त्यत्वे नायमुपपद्यते। विरोधिनि ब्रह्मसाक्षात्कारे सति प्रारब्धकर्मणः स्वयमेवावस्थानासम्भवेन अविद्यालेशनिवृत्तिप्रतिबन्धकत्वायोगात् - इत्याहुः ॥

इति शास्त्रसिद्धान्तलेशसङ्ग्रहे तृतीयः परिच्छेदः

तत्त्वसाक्षात्कारेणाज्ञाननाशे सति उपादानाभावात् देहादेरवस्थानासम्भवे सति कथं विद्योदये देहादिप्रतिभासः, इत्यत आह—**प्रारब्धेति**। तत्त्वसाक्षात्कारोदये सति अज्ञानस्य निश्शेषेण निवृत्तिप्रसक्तौ, प्रारब्धकर्मकृतप्रतिबन्धवशात् अज्ञानलेशस्य निवृत्तिर्न सम्भवति, तल्लेशानुवृत्तौ च तत्त्वज्ञानानन्तरमपि प्रारब्धकर्मणः तत्कार्यस्य देहादिप्रतिभासस्याप्यनुवृत्तिर्युज्यते देहाद्युपादानभूतस्याविद्यालेशस्यानुवृत्तेरित्यर्थः। पूर्वमते जीवन्मुक्त्यसिद्धिमाह—**अज्ञानवदिति**। **नायमिति**। जीवन्मुक्तस्य देहादिप्रतिभास इत्यर्थः। **विरोधिनीति**। अज्ञानस्येव प्रारब्धकर्मणोऽपि साक्षाद्विरोधिनीत्यर्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्द-
सरस्वतीदिव्यश्रीचरणारविन्दसंलग्नरजोभूतस्याच्युत-
कृष्णानन्दतीर्थस्य कृतौ शास्त्रसिद्धान्त-
लेशसंग्रहव्याख्यायां कृष्णालङ्काराख्यायां
तृतीयपरिच्छेदः समाप्तः

श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं सम्प्रणम्य च।
व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

श्रीः

चतुर्थः परिच्छेदः

अथ कोऽयमविद्यालेशः, यदनुवृत्त्या जीवन्मुक्तिः ?

आवरणविक्षेपशक्तिमत्या मूलाविद्यायाः प्रारब्धकर्मवर्तमानदेहाद्यनुवृत्तिप्रयोजको विक्षेपशक्त्यंश इति केचित्।

क्षालितलशुनभाण्डानुवृत्तलशुनवासनाकल्पोऽविद्यासंस्कार इति—अन्ये।

स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्॥

यत्र - यस्मिन् हरौ स्मृते सतीत्यर्थः।

नन्दहस्तमवलम्ब्य पाणिना मन्दमन्दमरविन्दलोचनः।
सञ्चरन् कनककिङ्किणीरवः सन्ततं मम तनोतु मङ्गलम्॥

यस्याः स्मरणमात्रेण वाग्विभूतिर्विजृम्भते।
सा भारती चिरं नित्यं रमतां मन्मुखाम्बुजे॥

यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला।
तयोःसंस्मरणात् पुंसां सर्वतो जयमङ्गलम्॥

विघ्नेश विधिमार्तण्डचन्द्रेन्द्रोपेन्द्रवन्दित।
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते॥

अथ कोऽयमिति। तृतीयपरिच्छेदे ब्रह्मज्ञानरूपं मुक्तिसाधनं सपरिकरं निरूपितम्। इदानीं तत्फलभूता मुक्तिर्निरूप्यते। तथा च फलनिरूपणपरस्य चतुर्थपरिच्छेदस्य साधननिरूपणपरतृतीयपरिच्छेदानन्तर्यं अथशब्दार्थः। लेशो नाम अवयवः। न च अनाद्यविद्याया अवयवोऽस्ति, सावयवस्य कार्यत्वनियमात्। अतोऽविद्यालेशो न संभवतीति किंशब्दार्थः।

अविद्याया अनादित्वाविरोधेन लेशशब्दार्थं मतभेदेनाह—**आवरणेति।** आवरणविक्षेपशक्तिद्वयवत्या अविद्यायाः वृत्तिसाक्षात्कारेण आवरणशक्तेर्नाशः, विक्षेपशक्तिमत्या अविद्यायाः प्रारब्धकर्मरूपप्रतिबन्धकक्षये सति पूर्वमेव निवृत्तावरणतया स्थितं चैतन्यं प्रतिबन्धापगमकाले नाशकं इत्यभ्युपगमात् 'तत्त्वज्ञानेन विक्षेपशक्तिमदविद्यारूपस्याविद्यालेशस्यानिवृत्तौ तस्य पश्चात् को निवर्तकः' इति शङ्काया अनवकाश इति बोध्यम्।

क्षालितेति। तत्त्वज्ञानेन अन्तःकरणाद्युपादानभूताविद्याया निवृत्तावपि अविद्याजन्यः कश्चित् देहादिस्थितिप्रयोजको वासनाविशेष इत्यर्थः। न च उपादाननाशे कथं कार्यस्थितिरिति वाच्यम्। पटादि-

दग्धपटन्यायेनानुवृत्ता मूलाविद्यैवेति—अपरे।

सर्वज्ञात्मगुरवस्तु—**विरोधिसाक्षात्कारोदये लेशतोऽप्यविद्यानुवृत्त्यसम्भवात् जीवन्मुक्तिशास्त्रं श्रवणादिविध्यर्थवादमात्रम्, शास्त्रस्य जीवन्मुक्तिप्रतिपादने प्रयोजनाभावात्। अतः कृतनिदिध्यासनस्य ब्रह्मसाक्षात्कारोदयमात्रेण सविलासवासनाविद्यानिवृत्तिः - इत्यपि कश्चित् पक्षं आहुः।**

अथ केयमविद्यानिवृत्तिः ?

आत्मैवेति ब्रह्मसिद्धिकाराः। न च तस्य नित्य(त्वेन)सिद्धत्वात् ज्ञानवैयर्थ्यम्। असति

नाशक्षणे पटरूपादीनां परमते स्थित्यभ्युपगमवत् अस्मन्मतेऽपि तदभ्युपगमोपपत्तेः। न च समवायिकारणनाशरूपकारणप्रतीक्षया रूपादीनामुपादानाभावकालेऽपि स्थितिरुपपद्यत इति वाच्यम्। तथा सति प्रकृतेऽपि तत्त्वज्ञानजनितस्य देहाद्युपादानाविद्यानाशस्य देहादिनाशहेतोः प्रारब्धकर्मणा प्रतिबद्धतया प्रतिबन्धकरहिताविद्यानाशप्रतीक्षया देहादीनामपि स्थित्युपपत्तेः। न च प्रारब्धकर्मणः प्रतिबन्धकत्वे मानाभावः। जीवन्मुक्तिशास्त्रविद्वदनुभवादेर्मानत्वात्। (परमते च) पटतद्रूपादीनां युगपदेव नाशदर्शनेन परमते परं तथाङ्गीकारे मानाभावः। तदुक्तं श्रीविद्यारण्यगुरुभिः—'विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते। श्रुतियुक्त्यनुभूतिभ्यो वदतां किं नु दुश्शकम्॥' [पं. द. ६-५६] इति। दुश्शकं अशक्यमित्यर्थः। क्षालिते लशुनभाण्डे अनुवृत्ता या लशुनवासना तत्तुल्य इत्यक्षरार्थः।

तत्त्वज्ञानेन बाधिता दृढतरकार्याक्षमत्वं नीता साक्षादविद्यैव अविद्यालेश इत्याह—**दग्धेति**। तदुक्तं—'कार्यक्षमं नश्यति चापरोक्ष्यात्।' इति। 'कोऽयमविद्यालेशः, यदनुवृत्त्या जीवन्मुक्ति(सिद्धि): इत्याक्षेपे इष्टापत्तिरित्याह—**सर्वज्ञेति**। **अनुवृत्त्यसम्भवादिति**। न जीवन्मुक्तिरस्तीति शेषः। ननु जीवन्मुक्त्यभावे 'तस्य तावदेव चिरं' इत्यादिशास्त्रं जीवन्मुक्तिप्रतिपादकं अप्रमाणं स्यात्, इत्यत आह—**जीवन्मुक्तिशास्त्रमिति**। 'श्रोतव्यादिविधिभिर्विधीयमानं श्रवणादिकं अतिप्रशस्तम्, यस्यानुष्ठानात् जीवतोऽपि मुक्तिर्लभ्यते' इति श्रवणादिस्तावकमित्यर्थः। न तु स्वार्थपरमिति मात्रशब्दार्थे हेतुमाह—**शास्त्रस्येति**। निष्फलेऽर्थे वेदतात्पर्यायोगादिति भावः। **अत इति**। जीवन्मुक्तौ मानाभावादित्यर्थः। **सविलासेति**। विलासेन वासनया च सहैव अविद्यानिवृत्तिरित्यर्थः। सत्यं जीवन्मुक्तिशास्त्रं श्रवणादिविध्यर्थवाद इति। अर्थवादत्वेऽपि सालम्बनार्थवादत्वसम्भवे निरालम्बनत्वायोगात्, लोके रज्ज्वादितत्त्वज्ञानेन सर्पाद्यध्यासस्य समूलस्य निवृत्त्यनन्तरमपि सर्पाद्यध्याससंस्कारवशात् कंचित्कालं भयकम्पाद्यनुवृत्तिदर्शनेन तत्त्वज्ञानस्य अविद्यादिसंस्काराविरोधित्वाच्च, मूलाविद्याद्यध्यासजनितसंस्कारवशात् जीवन्मुक्तौ नानुपपत्तिः—इति सूचयति—**इत्यपीति**।

अथ केयमिति। इयं - प्रकृता अविद्यानिवृत्तिः का ? आत्मस्वरूपा, अतिरिक्ता वा। नाद्यः। साध्यत्वायोगात्। न द्वितीयः। तस्याः सत्त्वे द्वैतापत्तेः असत्त्वे साध्यत्वायोगादेव इत्यर्थः।

तत्र अविद्यानिवृत्तेरात्मस्वरूपत्वमितिपक्षं साधयति—**आत्मैवेति**। आत्मैव अविद्यानिवृत्तिः

ज्ञाने अनर्थहेत्वविद्याया विद्यमानतया अनर्थमपि तिष्ठेदिति तदन्वेषणात्, 'यस्मिन् सति अग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके च अभावः तत् तत्साध्यम्' इति लक्षणानुरोधेन आत्मरूपाया अप्यविद्यानिवृत्तेः ज्ञानसाध्यत्वाच्च। ज्ञाने सति अग्रिमक्षणे आत्मरूपाविद्यानिवृत्तिसत्त्वं तद्व्यतिरेके तत्प्रतियोग्यविद्यारूपः तदभाव इति उक्तलक्षणसत्त्वात्।

नातिरिक्ता, उक्तदोषप्रसङ्गादिति भावः। आद्यपक्षेऽपि दोषतौल्यमाशङ्क्य निराकरोति—**न च तस्येति।** अविद्यानिवृत्तिरूपात्मन इत्यर्थः। तत्त्वज्ञानस्य वैयर्थ्यं वदता वक्तव्यं—किं ज्ञानसम्पादनस्य प्रयोजनं नास्तीति तद्वैयर्थ्यं विवक्षितं, किं वा अविद्यानिवृत्तेरात्मस्वरूपत्वे तस्या अनादितया ज्ञानं विनापि सिद्धत्वेन ज्ञानसाध्यत्वासम्भवात् तस्य वैयर्थ्यं विवक्षितं, नाद्य इत्याह—**असतीति। तदन्वेषणादिति।** अनर्थनिवृत्तिमुद्दिश्य ज्ञानान्वेषणोपपत्तेरित्यर्थः। अन्वेषणं च ज्ञानसाधनानुष्ठानम्। साध्यलक्षणं द्विविधम्—एकं सादिपदार्थमात्रासाधारणं जन्यत्वरूपम्। अपरं तु साद्यनादिसाधारणं 'यस्मिन् सति' इत्यादिरूपम्। तथा च आत्मस्वरूपायामविद्यानिवृत्तौ प्रथमलक्षणासम्भवेऽपि द्वितीयस्य साध्यलक्षणस्य सम्भवात् तस्याः ज्ञानसाध्यत्वमुपपन्नं, अतो न ज्ञानवैयर्थ्यं - इत्यभिप्रेत्य द्वितीयं निराकरोति—**यस्मिन् सतीति। अभाव इति।** यस्याभाव इत्यर्थः। **तत् तत्साध्यमिति।** 'यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वम्' इत्यत्र प्रथमयच्छब्दार्थः साधनं द्वितीययच्छब्दार्थः साध्यमिति विभागः। प्रायश्चित्ते सति अग्रिमक्षणे दुःखप्रागभावस्य सत्त्वं, प्रायश्चित्तस्य व्यतिरेके च दुःखस्यैवोदयात् अग्रिमक्षणे दुःखप्रागभावस्याभावः, इति दुःखप्रागभावस्यानादेरपि दुःखसाधनपापध्वंसस्य सादेरिव प्रायश्चित्तसाध्यत्वं एतल्लक्षणसिद्धमिति बोध्यम्। उक्तलक्षणं प्रकृते योजयति—**ज्ञाने सतीति।** आत्मस्वरूपाया अविद्यानिवृत्तेः अनादित्वेन ज्ञानोत्पत्तिद्वितीयक्षणे जन्मासम्भवेऽपि सत्त्वं सम्भवतीत्याह—**आत्मरूपाविद्यानिवृत्तिसत्त्वमिति। तद्व्यतिरेके तत्प्रतियोग्यविद्यारूपः तदभाव इति।** 'तद्व्यतिरेके तदभावः' इति उक्तलक्षणसत्त्वात् इति सम्बन्धः। 'ज्ञानव्यतिरेके आत्मरूपाविद्यानिवृत्तेरभावः' इत्यनेन प्रकारेण आत्मरूपाविद्यानिवृत्तौ ज्ञानसाध्यत्वरूपलक्षणसत्त्वादित्यर्थः। नन्वविद्यानिवृत्तेरात्मस्वरूपत्वे आत्मनोऽनन्तत्वेन वस्तुतस्तदभावस्यैवाभावात् कथमविद्यानिवृत्तेरभावः, तत्राह—**अविद्यारूप इति।** निर्विशेषचैतन्यस्य वास्तवाभावाभावेऽपि 'तादृशं चैतन्यं नास्त्येव' इति भ्रान्तिसिद्धः कश्चित्तदभावोऽस्ति। स च अविद्यैव। चैतन्यप्रतियोगिककल्पिताभावस्य अविद्यातिरिक्तत्वे मानाभावादित्यर्थः। ननु लोके घटादिभावपदार्थस्य अभावप्रतियोगिकाभावरूपत्वमेव दृष्टं, न तु भावप्रतियोगिकाभावरूपत्वम्। तथा च कथं अविद्याया भावरूपायाः चैतन्यप्रतियोगिकाभावरूपत्वम्, अत आह—**तत्प्रतियोगीति।** आत्मरूपाविद्यानिवृत्तेः प्रतियोगिनी या अविद्या तद्रूप इत्यर्थः। एतदुक्तं भवति—चैतन्यस्य स्वस्मिन्नध्यस्ताविद्यां प्रत्यभावरूपत्वात् अविद्यायाः स्वाभावरूपचैतन्यप्रतियोगिकाभावरूपत्वं सम्भवतीति।

आत्मान्यैव अविद्यानिवृत्तिः। सा च न सती। अद्वैतहानेः। नाप्यसती। ज्ञानसाध्यत्वायोगात्। नापि सदसद्रूपा। विरोधात्। नाप्यनिर्वाच्या, अनिर्वाच्यस्य सादेः अज्ञानोपादानकत्वनियमेन मुक्तावपि तदुपादनाज्ञानानुवृत्त्यापत्तेः, ज्ञाननिवर्त्यत्वापत्तेश्च। किंतु उक्तप्रकारचतुष्टयोत्तीर्णा पञ्चमप्रकारा इति आनन्दबोधाचार्याः।

अविद्यावत् तन्निवृत्तिरप्यनिर्वाच्यैव। न च तदनुवृत्तौ तदुपादानाज्ञानस्याप्यनुवृत्तिनियमात् अनिर्मोक्षप्रसङ्गः। तदनुवृत्तौ प्रमाणाभावात्। उत्पत्तेः प्रथमसमयमात्रसंसर्गिभावविकारत्ववत् निवृत्तेरपि चरमसमयमात्रसंसर्गिभावविकारत्वोपपत्तेः[1]। अत एव, यथा पूर्वं पश्चाच्च 'उत्पत्स्यते' 'उत्पन्नः' इति भाविभूतभावेन व्यवह्रियमाणाया उत्पत्तेः प्रथमसमयमात्रे 'उत्पद्यते' इति वर्तमानत्वव्यवहारः, तथा पूर्वं पश्चाच्च 'निवर्तिष्यते' 'निवृत्तः' इति भाविभूतभावेन

अविद्यानिवृत्तिरात्मान्या इति पक्षं मतभेदेन द्वेधा साधयति—**आत्मान्यैवेत्यादिना। तदुपादानेति।** अनिर्वचनीयामविद्यानिवृत्तिं प्रत्युपादानत्वेन अज्ञानस्य मुक्तावप्यनुवृत्त्यापत्तेः। तथा चानिर्मोक्षप्रसङ्ग इति भावः। किं च, मुक्तिकाले अनुवर्तमानाया अविद्यानिवृत्तेः अनिर्वाच्यत्वरूपमिथ्यात्वनिर्वाहार्थं ज्ञाननिवर्त्यत्वापत्तिः। 'ज्ञानैकनिवर्त्यत्वं मिथ्यात्वम्' इत्युपगमात्। न च मुक्तिकाले तन्निवर्तकं ज्ञानं सम्भवति, सामग्र्यभावात्। अतो नानिर्वाच्या अविद्यानिवृत्तिः - इत्याशयेनाह—**ज्ञाननिवर्त्यत्वापत्तेश्चेति।** सा च न सती, नाप्यसती, नापि सदसद्रूपा, नाप्यनिर्वाच्या, किं तु पञ्चमप्रकारा सेति सम्बन्धः। नन्वविद्यानिवृत्तेः उक्तप्रकारचतुष्टयेऽन्तर्भावासम्भवे प्रकारान्तराप्रसिद्धेः अविद्यानिवृत्तिरेव मास्त्विति शङ्कते—**किं त्विति।** मोक्षशास्त्रप्रामाण्यात् अप्रसिद्धोऽपि कश्चित्प्रकार एषितव्य इत्याशयेनाह—**उक्तप्रकारेति।**

अविद्यानिवृत्तेरात्मान्यत्वपक्षे मतान्तरं दर्शयति—**अविद्यावदिति। न च तदनुवृत्ताविति।** मुक्तावविद्यानिवृत्त्यनुवृत्तावित्यर्थः। **उत्पत्तेरिति।** यथा घटादिपदार्थानामुत्पत्तिः आद्यक्षणमात्रसंसर्गी भावरूपो विकार उपेयते, न त्वभावरूपा, तथा निवृत्तिशब्दितनाशोऽपि तेषां चरमक्षणमात्रसम्बन्धी कश्चित् भावरूप एव विकारोऽभ्युपगन्तव्यः, न त्वभावरूपः, विनिगमकाभावादित्यर्थः। उत्पत्तेः क्षणिकभावविकारत्व इव नाशस्यापि क्षणिकभावविकारत्वे प्रमाणं सममित्याह—**अत एवेति।** निवृत्तेरपि क्षणिकत्वाभ्युपगमादेवेत्यर्थः। उत्पत्तेः पूर्वं 'उत्पत्स्यते घटः' इति भावित्वेन व्यवह्रियमाणायाः (उत्पत्तेः) पश्चात् 'उत्पन्नो घटः' इति भूतत्वेन च व्यवह्रियमाणाया उत्पत्तेः प्रथमसमयमात्रे 'उत्पद्यते' इति वर्तमानत्वव्यवहारो यथा उत्पत्तेः क्षणिकत्वसाधकोऽस्ति इति दृष्टान्तभागार्थः। **तथेति।** निवृत्तेः पूर्वं 'निवर्तिष्यते घटः' इति भावित्वेन व्यवह्रियमाणायाः पश्चात् 'निवृत्तो घटः' इति भूतत्वेन च व्यवह्रियमाणाया निवृत्तेः चरमसमयमात्रे 'निवर्तते' इति वर्तमानत्वव्यपदेशरूपो व्यवहारो निवृत्तेरपि क्षणिकत्वसाधकोऽस्तीति प्रमाणं तुल्यमित्यर्थः। निवृत्तेः

---

1. भावविकारत्वोपपत्तेरिति। यास्काचार्यैः निरुक्ते 'जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति' इति भावविकारेषु षट्सु नाशस्य परिगणनात् इति भावः।

व्यवह्रियमाणाया निवृत्तेः चरमसमयमात्रे 'निवर्तते' 'नश्यति' 'ध्वंसते' इति वर्तमानत्व-व्यपदेशः। निवृत्तेरनुवृत्तौ तु चिरशकलितेऽपि घटे 'इदानीं निवर्तते' इत्यादिव्यवहारः स्यात्। आख्यातानां प्रकृत्यर्थगतवर्तमानत्वाद्यर्थाभिधायित्वात्।

ननु च तेषां स्वाभिहितसङ्ख्याश्रयप्रकृत्यर्थकर्तृकर्मगतवर्तमानत्वाद्यर्थाभिधायकत्वं स्वाभिहितप्रकृत्यर्थानुकूलव्यापारगतवर्तमानत्वाद्यर्थाभिधायकत्वं वा अस्तु। तथा च निवृत्तिक्रिया-कर्तुश्चिरचूर्णितस्य घटस्य तद्गतनिवृत्त्यनुकूलव्यापारस्य च अवर्तमानत्वात् नोक्तातिप्रसङ्ग—इति चेत्, न—आद्ये उत्पन्नेऽपि घटे उत्पद्यत इति व्यवहारापत्तेः। उत्पत्तिक्रियाकर्तुर्घटस्य वर्तमान-त्वात्। द्वितीये आमवातजडीकृतकलेबरे उत्थानानुकूलयत्नवति उत्थानानुदयेऽपि 'उत्तिष्ठति' इति व्यवहारापत्तेः। आख्यातार्थस्य प्रकृत्यर्थभूतोत्थानानुकूलस्य यत्नरूपव्यापारस्य वर्तमानत्वात्। तस्मात् प्रकृत्यर्थगतमेव वर्तमानत्वादि आख्यातार्थ इति, ध्वंसस्य स्थायित्वे चिरनिवृत्तेऽपि घटे 'निवर्तते' इति व्यवहारो दुर्वारः।

यदि च मुद्गरादिशकलिते घटे ध्वंसो नाम कश्चिदभावः तत्प्रतियोगिकः स्थायी भूतला-

---

स्थायित्वाभ्युपगमे बाधकमाह—**निवृत्तेरनुवृत्तौ त्विति**। मासात् पूर्वं ध्वस्तेऽपि घटे वर्तमानकालेऽपि घटावयवेषु शकलेषु कपालरूपेषु निवृत्तिरूपस्य पराभिमतप्रध्वंसाभावस्य वर्तमानत्वात् 'इदानीं निवर्तते, नश्यति, ध्वंसते' इति निवृत्तेर्वर्तमानत्वव्यपदेशस्स्यात् इत्यत्र हेतुमाह—**आख्यातानामिति**। प्रकृत्यर्थो धात्वर्थः, तद्गत-वर्तमानत्वातीतत्वभावित्वार्थकत्वादित्यर्थः।

आख्यातानां प्रकृत्यर्थगतवर्तमानत्वादिकं नार्थः, किं तु अन्यगतवर्तमानत्वादिकमेवेति शङ्कते—**ननु च तेषामिति**। एकवचनत्वादिरूपेण आख्यातैरभिहितानां सङ्ख्यानां आश्रयभूताः, 'घटो निवर्तते, देवदत्तः पचति, तण्डुलाः पच्यन्ते' इत्यादिप्रयोगेषु प्रकृत्यर्थभूतनिवृत्त्यादिक्रियाणां कर्तृकर्मादिरूपाश्च ये घटादयः, तद्गतवर्तमानत्वाद्यर्थवाचकत्वं लट्त्वादिरूपेण तेषामाख्यातानामस्त्वित्यर्थः। अर्थान्तरमाह—**स्वाभिहितेति**। 'घटो निवर्तते' इत्यत्र आख्याताभिहितो यः प्रकृत्यर्थनिवृत्त्यनुकूलो व्यापारः तद्गतेत्यर्थः। सङ्ख्यायाः प्रकृत्यर्थानुकूलव्यापारस्य च समानप्रत्ययोपात्तत्वेन अन्तरङ्गत्वात्[1] प्रकृत्यर्थस्य निवृत्त्यादेः प्रकृत्यर्थकर्तृघटादेश्च अतथात्वेन बहिरङ्गत्वात्—इत्यभिप्रायः[2]। ततः किं, तत्राह—**तथा चेति**। द्वितीयमर्थमभिप्रेत्याह—**तद्गतेति**। घटगतेत्यर्थः। निराकरणग्रन्थः स्पष्टार्थः। **तस्मादिति**। अर्थान्तरासम्भवादित्यर्थः।

पराभिमतो ध्वंसः प्रत्यक्षोऽनुमेयो वेति विकल्पं मनसि निधाय क्रमेण निराकर्तुं परमतमनुवदति—

---

1. अन्तरङ्गत्वादिति। प्रकृत्यर्थापेक्षया प्रकृत्यर्थकर्त्राद्यपेक्षया च शीघ्रोपस्थितियोग्यत्वात् इत्यर्थः। धातु-सामान्योत्तराख्यातसामान्यस्य व्यापारवाचकत्वात्।

2. अभिप्राय इति। स्वाभिहितप्रकृत्यर्थेत्याद्यर्थान्तरोक्तेरभिप्राय इत्यर्थः

द्याश्रितः उपेयेत, तदा कपालमालापसरणे तदनपसरणेऽपि मणिकशरावादिकपालव्यावृत्तकपालसंस्थानविशेषादर्शने च किमिति स प्रत्यक्षो न स्यात् ।

कपालसंस्थानविशेषादिना अनुमेयो घटादिध्वंसो न प्रत्यक्ष इति चेत् तर्हि तेन मुद्गरनिपातकालीनस्य उत्पत्तिवद्भावविकाररूपतया प्रतियोग्याश्रितध्वंसस्य अनुमानं सम्भवतीति न ततः पश्चादनुवर्तमानप्रतियोग्यधिकरणाश्रिताभावरूपध्वंससिद्धिः । 'इह भूतले घटो ध्वस्तः' इति भूतले ध्वंसाधिकरणत्वव्यवहारस्य 'इह भूतले घट उत्पन्नः' इतिवत् भावविकारयुक्तप्रतियोग्यधिकरणत्वविषयत्वोपपत्तेः । घटध्वंसानन्तरं भूतले घटाभावव्यवहारस्य घटापसरणानन्तरं तदभावव्यवहारवत् समयविशेषसंसर्ग्यत्यन्ताभावावलम्बनतोपपत्त्या ध्वंसविषयत्वस्याकल्पनीयत्वाच्च ।

यदि चेति । घटे मुद्गरपातादिना शकलीकृते सतीत्यर्थः । तत्प्रतियोगिकः घटप्रतियोगिक इत्यर्थः । **भूतलादीति ।** ध्वंसोत्तरकालं कपालेष्विव शकलीक्रियमाणघटाधिकरणभूतलादिष्वपि 'अत्र घटो ध्वस्तः' इति प्रतीतिबलात् भूतलादिकमपि कपालानीव घटध्वंसाधिकरणत्वेन कैश्चित्तार्किकैरुपेयत इति तन्मतानुवाद इति बोध्यम् । ध्वंसः प्रत्यक्ष इति पक्षं दूषयति—**तदेति ।** 'तदा किमिति स ध्वंसः प्रत्यक्षो न स्यात्' इति सम्बन्धः । ननु भूतलादौ घटध्वंसप्रत्यक्षे कपालमालाप्रत्यक्षमपि कारणम्, अतो नोक्तदोषः, इत्यत आह—**तदनपसरणेऽपीति ।** मृण्मयबृहत्पात्रविशेषो मणिकशब्दार्थः । यदा भूतलगतेषु घटकपालेषु मणिकशरावादिकपालेभ्यो व्यावृत्तस्य संस्थानविशेषस्य घटकपालासाधारणस्य दर्शनं नास्ति, कपालमालागोचरदर्शनमात्रमेवास्ति, तदाऽपि ध्वंसः प्रत्यक्षस्स्यात्, कपालमालादर्शनस्य सत्त्वादित्यर्थः । [1]वस्तुतस्तु प्रध्वंसाभावस्य इन्द्रियसन्निकर्षानिरूपणात् प्रत्यक्षत्वं न सम्भवतीति भावः ।

ध्वंसोऽनुमेय इति पक्षं दूषयति—**तर्हीति ।** अतीतस्यापि ध्वंसस्य अनुमानसम्भवात् अनुमानेन ध्वंसमात्रसिद्धावपि न अनुमानबलात् ध्वंसस्य पराभिमतं स्थायित्वं सिद्ध्यतीत्यर्थः **तत इति ।** अनुमानादित्यर्थः । ननु—'इदं भूतलं घटध्वंसवत्, कपालमालाविशेषवत्वात् व्यतिरेकेण कपालमालाविशेषानधिकरणप्रदेशवत्' इत्यनुमानं कथं घटाश्रितं ध्वंसं विषयीकुर्यादितिचेत्, न—ध्वंसोत्पत्तिकाले प्रतियोग्याश्रितस्यापि ध्वंसस्य प्रतियोगिद्वारा भूतलाश्रितत्वस्यापि सत्त्वेन अनुमानस्य तद्विषयत्वोपपत्तेरिति भावः । अनयैव रीत्या व्यवहारविशेषस्यापि गतिमाह—**इहेति ।** भूतलाधिकरणकस्थायिध्वंससाधकान्तरमप्यन्यथयति—**घटध्वंसानन्तरमिति । भूतल इति ।** भूतलेघटोनास्तीति[2]प्रत्ययप्रयोगात्मकव्यवहारस्येत्यर्थः । समयविशेषे - भूतलादौ घटसंयोगाद्यभावकाले संसर्गी योऽत्यन्ताभावः, स आलंबनं यस्य घटाभावव्यवहारस्य, स तथा, तस्य भावस्तत्ता, तदुपपत्त्येत्यर्थः । क्लृप्ताभावेनैव व्यवहारोपपत्तौ अतिरिक्तप्रध्वंसाभावो न कल्पनीयः, 'अतोऽन्यदार्तम्', [बृ. उ. ३-५] इति श्रुत्या चैतन्यव्यतिरिक्तवस्तुमात्रानित्यत्वप्रतिपादिकया पराभिमतस्य नित्यध्वंसस्य निराकृतत्वाच्च इति भावः । एतेन घटध्वंसानन्तरं

---

1. कपालमालाविशेषप्रत्यक्षमपि भूतलादौ घटध्वंसप्रत्यक्षे कारणं, अतो नोक्तदोषः, इत्यत आह—वस्तुतस्त्विति ।
2. प्रत्ययप्रयोगात्मकव्यवहारस्य—प्रत्ययात्मकस्य शब्दात्मकस्य च व्यवहारस्य ।

एवंसति घटोत्पत्तेः पूर्वं तदभावव्यवहारोऽपि अत्यन्ताभावेन चरितार्थ इति प्रागभावोऽपि न स्यादिति चेत्, सोऽपि माभूत्। नन्वेवं 'प्रागभावाधारकालः पूर्वकालः' 'ध्वंसाधारः उत्तरकालः' इति निर्वचनासम्भवात् काले पूर्वोत्तरादिव्यवहारः किमालम्बनः स्यात्? घटादिषु प्रतियोगित्वादिव्यवहारवत् अखण्डकिञ्चिद्धर्मगोचरोऽस्तु। अभावस्वरूपस्थायिध्वंसाभ्युपगमेऽपि तेषु ध्वंसत्वादेरखण्डस्यैव वक्तव्यत्वात्। न च जन्याभावत्वरूपं सखण्डमेव ध्वंसत्वम्। ध्वंसप्रागभावरूपस्य घटस्य तद्ध्वंसत्वापत्तेः। न च सप्तमपदार्थरूपाभावत्वं विवक्षितम्। घटस्य प्रागभावं प्रत्यपि ध्वंसत्वाभावप्रसङ्गेन घटकाले प्रागभावोत्तरकालत्वव्यवहारस्य निरालम्बनत्वापत्तेः। न च प्रतियोग्यतिरिक्तः प्रागभावध्वंसः। तथासति, तुल्यन्यायतया ध्वंसप्रागभावोऽपि प्रतियोग्यतिरिक्तः

'कपालमालायां घटो नास्ति' इति व्यवहारोऽपि नीतः। उपादानेऽपि समयविशेषेऽत्यन्ताभावसंसर्गमादाय तदुपपत्तेः।

शङ्कते—**एवंसतीति**। घटनाशोत्तरकालीनस्य घटाभावव्यवहारस्य सामयिकात्यन्ताभावालम्बनत्वोपपत्तौ सत्यामित्यर्थः। **तदभावेति**। 'मृदि घटो नास्ति' इति व्यवहारोऽपीत्यर्थः। **अत्यन्ताभावेनेति**। सामयिकेनेत्यर्थः, कालत्रयेऽप्यधिकरणसंसर्ग्यत्यन्ताभावस्य मृद्यसम्भवात् इति बोध्यम्। प्रागभावप्रध्वंसाभावयोरभावेऽपि काले पूर्वकालत्वमुत्तरकालत्वं च अखण्डोपाधिरूपमादाय व्यवहारोपपत्तिरिति परिहरति—**घटादिष्विति**। तत्राप्यखण्डोपाधिकल्पनमावश्यकमित्याह—**अभावस्वरूपेति**। सखण्डस्यैव ध्वंसत्वस्य मन्मते निर्वचनसम्भवात् न मम अक्लृप्ताखण्डोपाधिकल्पनं इत्याशयेन शङ्कते—**न च जन्याभावत्वरूपमिति**। जन्यत्वे सत्यभावत्वरूपमित्यर्थः। अतिव्याप्त्या दूषयति—**ध्वंसेति**। **तद्ध्वंसत्वेति**। घटध्वंसत्वापत्तेरित्यर्थः। ननु—जन्यत्वे सति सप्तमपदार्थरूपाभावत्वं ध्वंसलक्षणं विवक्षितम्। अत्यन्ताभावादिवारणाय सत्यन्तं, घटध्वंसप्रागभावरूपे घटे उक्तातिव्याप्तिवारणाय विशेष्यं—इत्याशङ्कामनूद्य निराकरोति—**न च सप्तमेति**। घटप्रागभावध्वंसत्वेनोपेते घटे उक्तलक्षणाभावात् घटस्य घटप्रागभावं प्रति ध्वंसत्वं न स्यादिति दूषयति—**घटस्येति**। इष्टापत्तिमाशङ्क्याह—**घटकाल इति**। घटकाले घटप्रागभावध्वंसाभावे प्रागभावध्वंसकालत्वरूपस्य तदुत्तरकालत्वस्याभावादिति भावः। ननु—घटप्रागभावध्वंसस्य घटातिरिक्तस्य सप्तमपदार्थरूपस्य अभ्युपगमात् नोक्तदोष इत्यत आह—**न च प्रतियोग्यतिरिक्त इति**। **तथासतीति**। प्रागभावध्वंसस्य प्रतियोग्यतिरिक्तत्वे सतीत्यर्थः। घटप्रागभावध्वंसः प्रतियोगिव्यतिरिक्त इति न च। तथासति घटध्वंसप्रागभावोऽपि घटरूपप्रतियोगिव्यतिरिक्तः स्यात्, ध्वंसप्रागभावयोरुभयोरपि कादाचित्काभावत्वेन तुल्यत्वादित्यर्थः। ततः किं, तत्राह—**इतीति**। इतिशब्दो हेत्वर्थे। तथा च यथा घटप्रागभावस्य ध्वंसः प्रतियोगिव्यतिरिक्तः, तथा घटप्रागभावध्वंसस्यापि प्रागभावो घटप्रागभावादन्यो वाच्यः, ध्वंसप्रागभावस्यापि ध्वंसप्रतियोगि-

स्यादिति, प्रागभावध्वंसस्यापि प्रागभावोऽन्यः, तस्यापि कश्चित् ध्वंसः, तस्यापि प्रागभावोऽन्यः, इत्यप्रामाणिकानवधिकध्वंसप्रागभावकल्पनापत्तेः। न चान्यत् ध्वंसत्वं आत्माश्रयादिशून्यं निर्वक्तुं शक्यम्, एवं प्रागभावत्वमपि, इत्यन्यत्र विस्तरः।

तस्मान्न पूर्वं प्रागभावः, न च पश्चात् ध्वंसाभावः, मध्ये परं किञ्चित्कालं अनिर्वचनीयोत्पत्तिस्थितिध्वंसरूपभावविकारवान् घटाद्यध्यासः[1]। एवं च अविद्यानिवृत्तिरपि ब्रह्मसाक्षात्कद्यानन्तरक्षणवर्ती कश्चिद्भावविकार इति तस्या मुक्तावनुवृत्त्यभावात् न तदनिर्वाच्यत्वे कश्चिद्दोष इति—अद्वैतविद्याचार्याः।

नन्वेवमविद्यानिवृत्तेः क्षणिकत्वे मोक्षः स्थिरपुरुषार्थो न स्यादिति चेत्, भ्रान्तोऽसि। न ह्यविद्यानिवृत्तिः स्वयमेव पुरुषार्थ इति तस्या ज्ञानसाध्यत्वमुपेयते। तस्याः सुखदुःखाभावेत-

---

व्यतिरिक्तत्वादित्यर्थः। ततः किं, तत्राह—**तस्यापीति**। अन्यस्य प्रागभावस्यापीत्यर्थः। **तस्यापीति**। ध्वंसस्यापीत्यर्थः। ननु—यदि जन्याभावत्वरूपं ध्वंसत्वं उक्तरीत्या अनवस्थादोषदुष्टं, तर्हि ध्वंसाप्रतियोगित्वे सति त्रैकालिकभिन्नाभावत्वरूपं ध्वंसत्वमस्तु अत्यन्ताभावादावतिव्याप्तिवारणाय विशेष्यम्, त्रैकालिकवस्तुभिन्ने प्रागभावे अतिव्याप्तिवारणाय सत्यन्तम्, तथा च सखण्डमेव ध्वंसत्वमिति, नेत्याह—**न चान्यदिति**। ध्वंसलक्षणे ध्वंसत्वप्रवेशादात्माश्रय इत्यर्थः। न च—प्रागभावात्यन्ताभावभिन्नत्वे सति संसर्गाभावत्वं ध्वंसत्वं, अतो नात्माश्रय इति - वाच्यम्। प्रागभावत्वादिनिर्वचनस्यापि प्रध्वंसाभावभिन्नत्वघटिततया अन्योन्याश्रयापत्तेः - इत्याशयेन आदिपदमिति बोध्यम्। ध्वंसत्ववत् प्रागभात्वमपि सखण्डं दुर्निरूपमित्याह—**एवमिति**। अयमभिप्रायः—न तावदनादित्वे सति सान्ताभावत्वं प्रागभावत्वं, घटध्वंसप्रागभावरूपे घटे अनादित्वाभावेन अव्याप्त्यापत्तेः। नापि प्रतियोगिजनकाभावत्वं प्रागभावत्वं, जनकत्वशरीरप्रविष्टपूर्ववृत्तित्वस्य कार्यप्रागभावकालवृत्तित्वरूपतया आत्माश्रयप्रसङ्गात्। एवं लक्षणान्तरमपि निरसनीयमिति। **तस्मादिति**। पराभिमतप्रागभावादिसाधकाभावादित्यर्थः। ननु प्रागभावाद्यनङ्गीकारे तत्प्रतियोगिघटादिकार्यमपि नाङ्गीकर्तव्यं, तदङ्गीकारे द्वैतापत्तेः, इत्यत आह—**मध्ये परमिति**। घटादिकार्यस्य शुक्तिरजतादिवदध्यासरूपत्वाभ्युपगमात् नाद्वैतविरोधः। ननु—यथा परमते ध्वंसत्वादिकं दुर्निरूपं, तथा सिद्धान्ते भावविकाररूपा उत्पत्तिस्थितिध्वंसा अपि दुर्निरूपा एव—इत्याशङ्क्य, तेषां दुर्निरूपत्वमलङ्कारायेत्याशयेनाह—**अनिर्वचनीयेति**। **एवं चेति**। लोके घटादिध्वंसस्य क्षणिकभावविकाररूपत्वे सिद्धे सतीत्यर्थः।

नन्वेवमिति। उक्तरीत्येत्येवंशब्दार्थः। अविद्यानिवृत्तेर्मोक्षसाधनज्ञानसाध्यत्वोपपादने सिद्धान्तिना क्रियमाणे सति सिद्धान्तिनः अविद्यानिवृत्तिरेव मोक्षत्वेनाभिमतेति पूर्वपक्षिणो भ्रान्तिरभूत्, तां भ्रान्तिमवलम्ब्य शङ्का। तस्य भ्रममपनयति—**भ्रान्तोऽसीति**। अविद्यानिवृत्तेरपुरुषार्थत्वे हेतुमाह—**तस्या इति**। तर्हि

---

1. घटाद्यध्यासः—घटादिरूपः अध्यासः—अध्यस्तः।

रत्वात्। किं तु अखण्डानन्दावारकसंसारदुःखहेत्वविद्योच्छेदे अखण्डानन्दस्फुरणं संसारदुःखोच्छेदश्च भवतीति तदुपयोगितया तस्यास्तत्त्वज्ञानसाध्यत्वमुपेयते।

चित्सुखाचार्यास्तु—दुःखाभावोऽपि मुक्तौ न स्वतः पुरुषार्थः। सर्वत्र दुःखाभावस्य स्वरूपसुखाभिव्यक्तिप्रतिबन्धकाभावतया सुखशेषत्वात्। सुखस्यैव स्वतः पुरुषार्थत्वं अन्येषां सर्वेषामपि तच्छेषत्वमिति सुखसाधनताज्ञानस्यैव प्रवर्तकत्वे सम्भवति, दुःखाभावस्यापि स्वतः पुरुषार्थत्वं परिकल्प्य तत्साधनप्रवर्तकसङ्ग्रहाय इष्टसाधनताज्ञानस्य इच्छाविषयत्वप्रवेशेन गुरुघटितस्य प्रवर्तकत्वकल्पनायोगात्। न च दुःखाभाव एव स्वतःपुरुषार्थः तच्छेषतया सुखं काम्यमिति वैपरीत्यापत्तिः। बहुकालदुःखसाध्येऽपि क्षणिकसुखजनके निन्दितग्राम्यधर्मादौ प्रवृत्ति-

---

तस्याः ज्ञानसाध्यत्वोपगमो व्यर्थ इति शङ्कते—**किं त्विति**। अविद्यानिवृत्तेः सुखेतरत्वाद्दुःखाभावेतरत्वाच्च स्वयं अपुरुषार्थत्वेऽपि पुरुषार्थसाधनतया तस्याः ज्ञानसाध्यत्वमुपेयत इत्याह—**अखण्डेति**। **तदुपयोगितयेति**। अनर्थात्मकदुःखनिवृत्तिरानन्दावाप्तिश्चेति द्वयमपि स्वतः पुरुषार्थभूतं तच्छब्दार्थः।

अविद्यानिवृत्तिवत् दुःखनिवृत्तिरपि स्वतःपुरुषार्थो न भवति, अतो ब्रह्मानन्दस्फुरणसाधनतयैव अविद्यानिवृत्तेर्ज्ञानसाध्यत्वमुपेयते - इति मतमाह—**चित्सुखेति**। मुक्ताविति विशेषणात् संसारदशायां सुखवत् दुःखाभावोऽपि स्वतःपुरुषार्थ इति भ्रान्तिर्भवेत्, तां वारयति—**सर्वत्रेति**। दुःखदशायां आत्मस्वरूपभूतस्यापि सुखस्य अभिव्यक्तिशब्दितस्फुरणविशेषाभावेन दुःखस्य तदभिव्यक्तिप्रतिबन्धकत्वं कल्प्यते, तथा च तदभावस्य सुखाभिव्यक्तिशेषतयैव काम्यमानत्वं न सुखवत् स्वतःपुरुषार्थत्वेनेति भावः। सुखस्यैव स्वतःपुरुषार्थत्वकल्पने विनिगमकमाह—**सुखस्यैवेति**। दुःखाभावस्य सुखशेषत्वे दुःखाभावसाधनान्यपि सुखसाधनानि भवन्ति। तथा च सुखसाधनेषु दुःखाभावसाधनेषु च सर्वत्र सुखसाधनताज्ञानस्यैव प्रवर्तकत्वं सम्भवति। दुःखाभावस्य स्वतःपुरुषार्थत्वकल्पने तु तत्साधनेषु सुखसाधनत्वस्य बाधितत्वात् सुखसाधनताज्ञानात् तेषु प्रवृत्तिर्न सम्भवति। न च तेषु दुःखाभावसाधनताज्ञानमेव प्रवर्तकमस्त्विति वाच्यम्। तथासति प्रवृत्तिमात्रे अनुगतकारणाभावप्रसङ्गात्। न च - तर्हि इष्टसाधनताज्ञानात् सर्वत्र प्रवृत्तिरस्तु, दुःखाभावस्यापि सुखवदिच्छाविषयतया इष्टपदेन सङ्ग्रहोपपत्तेरिति—वाच्यम्। प्रवृत्तित्वावच्छिन्नं प्रति कारणे इष्टसाधनताज्ञाने इष्टांशे सुखत्वजातेः प्रवेशकल्पने कारणतावच्छेदकलाघवं लभ्यते, इष्टत्वरूपोपाधेः प्रवेशकल्पने तु कारणतावच्छेदकगौरवं भवेदिति सुखस्यैव स्वतःपुरुषार्थत्वपक्षो युक्तिमानिति भावः। **तच्छेषत्वमितीति**। स्वीकृत्येति शेषः। **प्रवर्तकत्व इति**। प्रवर्तकत्वकल्पने इत्यर्थः। **तत्साधनेति**। दुःखाभावसाधनेषु प्रवर्तकस्य दुःखाभावसाधनताज्ञानस्य सङ्ग्रहायेत्यर्थः। **न च दुःखाभाव एवेति**। न च-इयं शङ्कैव नावतरति, वैपरीत्यपक्षे दुःखाभावत्वरूपोपाधेरेव प्रवर्तकज्ञानकारणतावच्छेदकशरीरे प्रवेशापत्त्या इच्छाविषयत्वरूपोपाधिप्रवेशपक्ष इव गौरवदोषस्य तुल्यत्वादिति—वाच्यम्। सिद्धान्ते सुखस्यात्मरूपतया एकव्यक्तित्वेन सुखत्वस्य जातित्वासम्भवं तस्योपाधिरूपत्वं च मन्वानस्य शङ्कासम्भवात्। इच्छाविषयत्वस्येव सुखत्वस्याप्युपाधिरूपत्वे सति सुखत्वप्रवेशेऽपि कारणतावच्छे-

दर्शनात्। तत्र क्षणिकसुखकालीनदुःखाभावस्य पुरुषार्थत्वे तदर्थं बहुकालदुःखानुभवायोगात्। न च तत्र क्षणिकसुखस्य पुरुषार्थत्वेऽपि दोषतौल्यम्। भावरूपे सुखे उत्कर्षापकर्षयोरनुभवसिद्धत्वेन क्षणमप्यत्युत्कृष्टसुखार्थं बहुकालदुःखानुभवोपपत्तेः। दुःखाभावे चोत्कर्षा[द्य](पकर्षा)सम्भवात्। तस्मात् मुक्तौ संसारदुःखनिवृत्तिरप्यविद्यानिवृत्तिवत् सुखशेष इति अनवच्छिन्नानन्दप्राप्तिरेव स्वतःपुरुषार्थ इत्याहुः।

नन्वनवच्छिन्नानन्दः प्रत्यग्रूपतया नित्यमेव प्राप्तः। सत्यम्। नित्यप्राप्तोऽपि अनवच्छिन्नानन्दः तमावृत्य तद्विपरीतमनर्थं प्रदर्शयन्त्या अविद्यया संसारदशायामसत्कल्पत्वं नीत इति अकृतार्थताऽभूत्। निवर्तितायां च तस्यां निरस्ते निखिलानर्थविक्षेपे स्वकण्ठगतविस्मृतकनकाभरणवत् प्राप्यत इवेति औपचारिकी तस्य प्राप्तव्यतेति केचित्।

दकगौरवाविशेषे सति विनिगमकाभावेन वैपरीत्याशङ्का युक्तैवेति भावः। सिद्धान्ते वस्तुतस्सुखव्यक्तेरेकत्वेऽपि औपाधिकभेदाङ्गीकारेण सुखत्वस्य जातित्वाक्षतेः वैपरीत्यं वक्तुं न शक्यत इति मनसि निधाय दोषान्तरमाह— **बहुकालेति**। लोके हि क्षणिकसुखोद्देशेन बहुकालदुःखानुभवमङ्गीकृत्याप्यगम्यागमनादौ प्रवृत्तिर्दृश्यते, सा च दुःखाभावस्यैव स्वतःपुरुषार्थत्वपक्षे न सम्भवतीत्यर्थः। कुत इत्यत आह—**तत्रेति**। निन्दितप्रवृत्तिस्थल इत्यर्थः। सुखस्य दुःखाभावशेषत्वपक्षे, सुखकालीनो यो दुःखाभावः तं प्रत्येव सुखस्य शेषत्वं वाच्यम्। कालान्तरीयं दुःखाभावं प्रति तस्य शेषत्वासम्भवात्। तथा च क्षणिकसुखकालीनं दुःखाभावं क्षणिकमुद्दिश्य बहुकालदुःखानुभवाङ्गीकारस्यायुक्तत्वादित्यर्थः। **न च तत्रेति**। निन्दितप्रवृत्तिस्थल इत्यर्थः। **दोषतौल्यमिति**। बहुकालदुःखानुभवाङ्गीकारायोगरूपदोषस्य तुल्यत्वमिति न चेत्यर्थः। दुःखाभावस्यैव स्वतःपुरुषार्थत्वपक्षेऽपि क्षणिकसुखकालीने दुःखाभावे उत्कर्षः कल्प्यतामिति, तत्राह—**दुःखाभावे चेति**। अभावस्योत्कर्षादिजात्याश्रयत्वानभ्युपगमात् इति भावः। **तस्मादिति**। दुःखाभावस्य स्वतः पुरुषार्थत्वासम्भवादित्यर्थः।

नित्यमेवेति। तथा च जीवस्य स्वस्वरूपतया सदा प्राप्तस्य ब्रह्मानन्दस्य प्राप्तव्यत्वासम्भवात् तत्प्राप्त्युद्देशेन तदुपायेषु प्रवृत्तिर्न स्यादिति भावः। नित्यतया तस्य प्राप्तिं तत्त्वमस्यादिश्रुतिसिद्धामङ्गीकरोति— **सत्यमिति**। औपचारिकं तस्य प्राप्यत्वमाह—**नित्यप्राप्तोऽपीति**। अनवच्छिन्नानन्दो नित्यप्राप्तोऽप्यविद्यया असत्कल्पत्वं नीत इति सम्बन्धः। तथा च प्राप्तेऽप्यप्राप्तत्वभ्रान्त्या तत्प्राप्त्युद्देशेन तदुपायेषु प्रवृत्तिर्युज्यत इत्यर्थः। **तमिति**। पूर्णानन्दमावृत्यानन्दविपरीतं दुःखात्मकं संसारं प्रापयन्त्येत्यर्थः। **अकृतार्थतेति**। [1]पूर्णानन्दाप्राप्तिरित्यर्थः। **निरस्ते इति**। अविद्यायां निवृत्तायां निखिलानर्थात्मकविक्षेपरहित आनन्दः प्राप्यते। यथा स्वकण्ठगतमेव विस्मृतं सत् कनकाभरणं प्राप्तमपि अप्राप्तत्वभ्रमतत्कृतविक्षेपलक्षणानर्थनिवृत्तिमात्रेण प्राप्यते, न त्वप्राप्ताभरणप्राप्तिवन्मुख्या तस्य प्राप्तिरस्ति। तद्वदित्यर्थः।

---

1. पूर्णानन्दाप्राप्तिः—'पूर्णानन्दो न प्राप्तः' इति भ्रमः।

अन्ये तु - संसारदशायां 'नास्ति, न प्रकाशते' इति व्यवहारयोग्यत्वरूपाज्ञानावरणप्रयुक्तस्य 'मम निरतिशयानन्दो नास्ति' इति प्रत्ययस्य सर्वसिद्धत्वात् तदालम्बनभूतः कश्चित् ब्रह्मानन्दस्याभावः काल्पनिको यावदविद्यमनुवर्तते, अविद्यानिवृत्तौ च तन्मूलत्वान्निवर्तत इति, 'यस्मिन् सत्यग्रिमक्षणे' इत्यादिलक्षणानुरोधेन मुख्यमेव तस्य प्राप्यत्वं इत्याहुः।

अपरे - तु अवेद्यस्यापुरुषार्थत्वात् संसारदशायां सदप्यनवच्छिन्नसुखं आपरोक्ष्याभावात् न पुरुषार्थः। न च—स्वरूपज्ञानेनापरोक्ष्यं तदाप्यस्ति, तस्य सर्वदा स्वरूपसुखाभिन्नत्वात्, वृत्तिज्ञानेनापरोक्ष्यं तु न मुक्तावपीति—वाच्यम्। न हि स्वव्यवहारानुकूलचैतन्याभेदमात्रमापरोक्ष्यम्। [1]घटावच्छिन्नचैतन्याभिव्यक्तौ तदभिन्नस्य घटगन्धस्यापि आपरोक्ष्यापत्तेः। किं तु अना-

---

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' [बृ. उ. ४-३-३२] 'आनन्दं ब्रह्मणो विद्वान्' [तै. उ. २-४] इत्यादिवेदान्तप्रसिद्धो निरतिशयानन्दो नास्ति - इत्यनुभवस्सर्वसम्प्रतिपन्नः, तथा च प्रत्यग्रूपतया नित्यमेव तादृशानन्दे विद्यमानेऽपि तदभावप्रत्ययदर्शनेन वास्तवस्य तदभावस्यासम्भवात् अविद्यावरणाधीनस्थितिकस्य अनादेः काल्पनिकाभावस्य तदभावप्रत्ययालम्बनत्वं वक्तव्यम्, तत्रावरणस्वरूपमाह—**नास्तीति**। 'निरतिशयानन्दो मे न प्रकाशते, अप्रकाशमानत्वान्नास्त्येव सः' इति व्यवहारस्य सदा अभावात् आवरणस्य च सदा [2]सत्त्वात् योग्यत्वपर्यन्तधावनमिति बोध्यम्। **निवर्तत इति**। ब्रह्मानन्दस्याभाव इति शेषः। इदानीं ब्रह्मानन्दाभावसाधनफलं ब्रह्मानन्दस्य मुख्यं प्राप्यत्वं दर्शयति—**इति यस्मिन्निति**। ज्ञाने सति अग्रिमक्षणे निरतिशयानन्दसत्त्वं ज्ञानाभावे च साधितस्य निरतिशयानन्दाभावस्यैव सत्त्वमिति लक्षणसत्त्वात् निरतिशयानन्दस्य प्राप्तस्यापि मुख्यमेव प्राप्यत्वमित्यर्थः।

ब्रह्मानन्दस्वरूपमात्रं न पुरुषार्थः, किं तु तस्यापरोक्ष्यम्। तच्च अविद्यानिवृत्तिद्वारा विद्यासाध्यमेव, न तु तत् विद्योदयात् प्रागस्ति—इति मतमाह—**अपरे त्विति**। विद्याप्राप्यं आनन्दापरोक्ष्यं स्वप्रकाशचैतन्यरूपं, वृत्तिरूपं वा ? उभयथाऽपि न सम्भवतीति शङ्कते—**न चेति**। आपरोक्ष्यं हि स्वव्यवहारानुकूलचैतन्याभिन्नत्वम्, तच्च संसारदशायामावृतस्यापि ब्रह्मानन्दस्य वर्तत एव, ब्रह्मानन्दव्यवहारानुकूलसाक्षिचैतन्याभेदस्य सदा ब्रह्मानन्दे सत्त्वादित्यर्थः। **तदापीति**। संसारकालेऽप्यस्ति। तथा च न तस्य ज्ञानप्राप्यत्वमिति भावः। **तस्येति**। स्वरूपज्ञानस्येत्यर्थः। आपरोक्ष्यशरीरप्रविष्टा या आवृतत्वनिवृत्तिः, तस्यास्सम्पादनद्वारा ब्रह्मानन्दापरोक्ष्यं विद्यासाध्यं इति समाधानं कर्तुं शाब्दापरोक्षवादे निर्णीतमर्थं स्मारयति—**न हीत्यादिना। तदभिन्नस्येति**। अभिव्यक्तचैतन्याभिन्नस्येत्यर्थः। **तदभेद इति**। अनावृतचैतन्याभिन्नत्व-

---

1. घटावच्छिन्नचैतन्याभिव्यक्ताविति। चाक्षुषवृत्त्या इत्यादिः।

2. सत्त्वादिति। आवरणं तादृशव्यवहाररूपं न भवतीति—इति शेषः। अविद्याचित्सम्बन्धरूपं आवरणं सुषुप्तादावप्यस्ति, उक्तव्यवहारस्तु सुषुप्तादौ नास्ति इति भावः। एवञ्च, अविद्या आवारिका, अविद्याचित्सम्बन्धरूपं उक्तव्यवहारयोग्यत्वं आवरणं, उक्तव्यवहारः आवरणकृत्यं - इत्युक्तं भवति।

वृतार्थस्य तद्भेदः। तथा च अनावृतत्वांशः तत्त्वसाक्षात्कारे सत्येवेति निरतिशयसुखापरोक्ष्यस्य पुरुषार्थस्य विद्याप्राप्यत्वं युक्तं इत्याहुः।

इतरे तु—अस्तु व्यवहारानुकूलचैतन्याभेदमात्रमापरोक्ष्यम्, तथाऽपि अज्ञानमहिम्ना जीवभेदवत् चिदानन्दभेदोऽपि अध्यस्त इति संसारदशायां पुरुषान्तरस्य पुरुषान्तरचैतन्यापरोक्ष्यवत् अनवच्छिन्नसुखापरोक्ष्यमपि नास्ति। अज्ञाननिवृत्तौ तु चिदानन्दभेदप्रविलयात्तदापरोक्ष्यमिति तस्य विद्यासाध्यत्वं इत्याहुः।

अथ विद्योदये सति उपाधिविलयादपेतजीवभावस्य किमीश्वरभावापत्तिर्भवति, उत शुद्धचैतन्यमात्ररूपेणावस्थानम्? इति विवेचनीयम्।

उच्यते—एकजीववादे तदेकाज्ञानकल्पितस्य जीवेश्वरविभागादिकृत्स्नभेदप्रपञ्चस्य तद्विद्योदये विलयात् निर्विशेषचैतन्यरूपेणैवावस्थानम्।

मित्यर्थः। **निरतिशयसुखापरोक्ष्यस्येति**। चैतन्यरूपस्येत्यर्थः, न वृत्तिरूपस्य, अतो न मुक्तावापरोक्ष्यानुपपत्तिरित्यर्थः।

चैतन्याभेदमात्रमिति। अर्थापरोक्ष्यनिर्वचनेऽस्मिन् अनावृतत्वमर्थविशेषणं मात्रपदेन व्यवच्छिद्यते। न चैवं घटावच्छिन्नचैतन्याभिव्यक्तौ सत्यां तदभिन्नस्य घटगन्धस्याप्यापरोक्ष्यापत्तिरिति वाच्यम्। धर्मादेः साक्षिण्यध्यस्तस्य अनावृतसाक्षिचैतन्याभिन्नस्यापि आपरोक्ष्यादर्शनेन तद्वत् घटगन्धस्याप्यभिव्यक्तघटावच्छिन्नचैतन्याभिन्नस्याप्यापरोक्ष्याभावोपपत्तेः। न च धर्मादेः अयोग्यत्वादापरोक्ष्याभाव इति वाच्यम्। तथासति प्रकृतेऽपि चाक्षुषवृत्त्यभिव्यक्तचैतन्यं प्रति फलबलेन गन्धस्यायोग्यत्वकल्पनेन तदापरोक्ष्याप्रसक्तेरिति भावः। तर्हि स्वरूपानन्दस्य सदा स्वव्यवहारानुकूलसाक्षिचैतन्याभिन्नत्वसत्त्वात् आपरोक्ष्यस्य विद्यासाध्यत्वानुपपत्तिः, इत्याशङ्क्याह—**तथापीति**। तावन्मात्रस्यापरोक्ष्यरूपत्वेऽपीत्यर्थः। यथा एकस्य पुरुषस्य पुरुषान्तरचैतन्यापरोक्ष्यं नास्ति, तथा जीवस्य संसारदशायां अनवच्छिन्नानन्दापरोक्ष्यमपि नास्ति। जीवानां परस्परभेदवत् साक्षिचैतन्यब्रह्मानन्दयोरपि आज्ञानिकस्यानादिभेदस्य सत्त्वेन ब्रह्मानन्दस्य स्वव्यवहारानुकूलेन साक्षिचैतन्येनाभेदाभावात्, वास्तवाभेदस्य च परस्परभिन्नजीवसाधारणस्य विद्यमानस्याप्यकिञ्चित्करत्वात् इत्यर्थः। **प्रविलयादिति**। तथा च तत्त्वज्ञानस्याज्ञानतत्प्रयुक्तभेदनिवृत्तिद्वारा अनवच्छिन्नानन्दापरोक्ष्यसम्पादकत्वात् तादृशानन्दापरोक्ष्यस्य तत्त्वज्ञानसाध्यत्वं युक्तमित्यर्थः।

इति विवेचनीयमिति। इत्याकाङ्क्षायां सत्यां विविच्य वक्तव्यमिति प्रश्नार्थः।

मतभेदेन विवेकं दर्शयति—**उच्यत इत्यादिना**। **तदेकाज्ञानेति**। तस्य जीवस्य यदेकमज्ञानं तत्कल्पितेत्यर्थः। जीवस्यैकत्वात् तदीयंमूलाज्ञानमप्येकमेव। तथा च तस्यैकस्य जीवस्य यत्र क्वाप्यन्तःकरणे तत्त्वसाक्षात्कारोदये सति अज्ञानस्य देवतिर्यङ्मनुष्यादिरूपसर्वप्रमातृसाधारणस्य सकार्यस्य तस्मिन्नेव क्षणे निश्शेषं

अनेकजीववादमभ्युपगम्य बद्धमुक्तव्यवस्थाङ्गीकारेऽपि यद्यपि कस्यचित् विद्योदये तदविद्याकृतप्रपञ्चविलयेऽपि बद्धपुरुषान्तराविद्याकृतः जीवेश्वरविभागादिप्रपञ्चोऽनुवर्तते, तथापि 'जीव इवेश्वरोऽपि प्रतिबिम्बविशेषः' इति पक्षे मुक्तस्य बिम्बभूतशुद्धचैतन्यरूपेणैवावस्थानम्। अनेकोपाधिषु एकस्य प्रतिबिम्बे सति एकोपाधिविलये तत्प्रतिबिम्बस्य बिम्बभावेनैवावस्थानौचित्येन प्रतिबिम्बान्तरत्वापत्त्यसम्भवात्। तत्सम्भवे कदाचिज्जीवरूपप्रतिबिम्बान्तरत्वापत्तेरपि दुर्वारत्वेन अवच्छेदपक्ष इव मुक्तस्य पुनर्बन्धापत्तेः। अत एव अनेकजीववादे अवच्छेदपक्षो नाद्रियते। यदवच्छेदेन मुक्तिः तदवच्छेदेनान्तःकरणान्तरसंसर्गे पुनरपि बन्धापत्तेः।

प्रविलयादित्यर्थः। न चैवं शुकाद्यन्तःकरणोत्पन्नतत्त्वज्ञानेनैव समूलस्य सर्वप्रमातृसाधारणसंसारस्य निवृत्तत्वात् इदानीं संसारानुपलब्धिप्रसङ्ग इति वाच्यम्। शुकादिमुक्तौ मानाभावात्, शुकादिमुक्तिप्रतिपादकशास्त्रस्य अन्यपरतायाः प्राग्दर्शितत्वादिति भावः।

एकजीववादे अस्वरसं सूचयन् नानाजीववादं पुरस्करोति—**अनेकेति**। कश्चिज्जीवो बद्धः कश्चिज्जीवो मुक्तः—इति व्यवस्थाभ्युपगम इत्यर्थः। नानाजीववादे मुक्तस्येश्वरभावापत्तिरिति मनसि निधाय तत्र तत्सम्भवमाह—**यद्यपीति। अनुवर्तत इति।** तथा च नानाजीववादे मुक्तस्य वक्ष्यमाणविधया यावत्सर्वमुक्ति बद्धपुरुषान्तराविद्याकृतेश्वरभावापत्तिस्सम्भवतीति भावः। नन्वेवं—'यद्यपि' इत्युक्तिरनुपपन्ना। तदुक्त्या हि यद्यपीश्वरभावापत्तिस्सम्भवति, तथापि न सम्भवतीत्यर्थप्रतीतेः- इति चेत्, नायं दोषः—नानाजीववादो हि बहुविधः। तथा च सर्वेषु नानाजीववादेषु मुक्तस्येश्वरभावापत्तिर्न सम्भवतीति 'यद्यपि' इत्युक्तेस्तात्पर्यात्। एतदेव प्रपञ्चयति—**तथापीत्यादिना। बिम्बभूतेति।** न तु प्रतिबिम्बविशेषरूपेश्वररूपेणावस्थानं इत्येवकारार्थः। एवकारार्थे हेतुमाह—**अनेकेत्यादिना।** एकस्य ब्रह्मचैतन्यस्येत्यर्थः। प्रतिबिम्बभूतस्य बिम्बप्राप्तिनियमं विहाय प्रतिबिम्बान्तरत्वापत्तिसम्भवाभ्युपगमे बाधकमाह—**तत्सम्भव इति।** दृष्टान्तं प्रपञ्चयति—**अत एवेति।** पुनर्बन्धापत्तेरेवेत्यर्थः। **यदवच्छेदेनेति।** पूर्णचैतन्ये यच्चैतन्यप्रदेशावच्छेदेन मुक्तिः तत्प्रदेशावच्छेदेन तत्र चैतन्ये उपाध्यन्तरसम्बन्धे सति पुनर्बन्धापत्तेरित्यर्थः। यच्चैतन्यप्रदेशो मुक्तः तस्य बन्धापत्तेरिति यावत्।

अत्रेदं चिन्त्यम्—चैतन्यं तावत् स्वतो नित्यमुक्तम्। तस्य च अनाद्युपाध्यवच्छिन्नस्य उपाध्युपहितस्य वा जीवत्वं बन्धश्चेति स्थितिः। तथा च मुक्तेः पूर्वं यस्योपाधिपरतन्त्रस्य चैतन्यप्रदेशस्य बन्ध आसीत् न तस्य पुनर्बन्धः आपादयितुं शक्यते। मुक्तिकाले तदुपाधिनिवृत्त्या तत्परतन्त्रस्य पूर्वं बन्धाश्रयस्य निवृत्तत्वात्। नापि मुक्तस्य शुद्धचैतन्यस्य तदापादनं सम्भवति। तस्य बद्धजीवान्तरोपाधिसंसर्गे जीवान्तरत्वापत्तावपि, 'पूर्वं यो बद्धस्सन् मुक्तिं गतः तस्य बन्धाप्रसक्त्या पुनर्बन्धापत्तेः' इत्युक्त्ययोगात्। किं च मुक्तचैतन्यस्य अन्तःकरणान्तरसंसर्गेण तदुपाधिकजीवान्तरत्वापत्तौ सत्यां 'योऽहं पूर्वं संसारी सन् कथञ्चिन्मुक्तः सोऽहं पुनःसंसारं प्राप्तः' इत्यनुसन्धानं तावत् न सम्भवति। मुक्तजीवस्य बद्धजीवस्य च उपाध्यैक्याभावात्। तथा च इयं

'प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वरः उभयानुस्यूतं शुद्धचैतन्यम्' इति पक्षे तु मुक्तस्य यावत्सर्वमुक्ति सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वसत्यकामत्वादिगुणपरमेश्वरभावापत्तिरिष्यते। यथा—अनेकेषु दर्पणेषु एकस्य मुखस्य प्रतिबिम्बे सति एकदर्पणापनये तत्प्रतिबिम्बो बिम्बभावेनावतिष्ठते, न तु मुखमात्ररूपेण, तदानीमपि दर्पणान्तरसन्निधानप्रयुक्तस्य मुखे बिम्बत्वस्यानपायात्; तथा एकस्य ब्रह्मचैतन्यस्य अनेकेषूपाधिषु प्रतिबिम्बे सति एकस्मिन् प्रतिबिम्बे विद्योदये तेन तदुपाधिविलये तत्प्रतिबिम्बस्य बिम्बभावेनावस्थानावश्यंभावात्। न च मुक्तस्य अविद्याऽभावात् सत्यकामत्वादिगुणविशिष्टसर्वेश्वरत्वानुपपत्तिः। तदविद्याऽभावेऽपि तदानीं बद्धपुरुषान्तराविद्यासत्त्वात्। न हि ईश्वरस्येश्वरत्वं सत्यकामादिगुणवैशिष्ट्यं च स्वाविद्याकृतम्, तस्य निरञ्जनत्वात्। किं तु बद्धपुरुषाविद्याकृतमेव तत्सर्वमेष्टव्यम्।

जीवान्तरतापत्तिः अकिञ्चित्करेति न दोषावहा। एवं पूर्वोक्ता मुक्तस्य प्रतिबिम्बरूपजीवान्तरत्वापत्तिरप्यकिञ्चित्करेति।

ननु—नानाजीववादे यदि प्रतिबिम्बेश्वरपक्षे मुक्तस्येश्वरभावापत्तिर्न सम्भवति, अवच्छेदपक्षे च मुक्तिरेव न सम्भवति दूरे ईश्वरभावापत्तिः; तर्हि कस्मिन् पक्षे मुक्तस्येश्वरभावापत्तिरिष्यते, तत्राह—**प्रतिबिम्बो जीव इति**। अस्मिन्नपि पक्षे सर्वेषां जीवानां मुक्त्यनन्तरं मुक्तस्य निर्विशेषशुद्धचैतन्यमात्ररूपेणैवावस्थानं, तदा सर्वेषामुपाधीनां निश्शेषं चिन्मात्रे विलीनत्वेन जीवेश्वरविभागाभावात् इत्याशयेनाह—**यावदिति**। ननु—ततः पूर्वमपि बिम्बप्रतिबिम्बोभयानुस्यूतशुद्धचैतन्यरूपेणैवावस्थानमस्तु, तथासति निर्गुणविद्याफलभूताया मुक्तेः ऐकरूप्यप्रतिपादकस्य तृतीयाध्यायान्तिमाधिकरणस्य सामञ्जस्योपपत्तेः, इत्यत आह—**यथेति**। **तदानीमपीति**। एकदर्पणापनयनकालेऽपीत्यर्थः। **एकस्मिन्निति**। एकस्मिन् प्रतिबिम्बरूपे जीवे विद्योदये सति तेन-विद्योदयेन तस्य-विदुषः उपाधिलये सति, तत्प्रतिबिम्बस्य-मुक्तस्य प्रतिबिम्बजीवस्येत्यर्थः। ननु—मुक्तस्य निरुपाधिकत्वात् कथं तस्यैश्वर्यं सम्भवतीति शङ्कते—**न च मुक्तस्येति**। परिहरति—**तदविद्येति**। तस्य-मुक्तस्याविद्याभावेऽपीत्यर्थः। अत्र अविद्यानानात्वव्यवहारेणाविद्याप्रतिबिम्बा एव जीवाः, अन्तःकरणानि तु तेषां कर्तृत्वाद्युपाधयः-इति सूचितम्। तथा च मुक्तस्य आविद्यकमेवैश्वर्यं इत्युपगमात् परमार्थत एकरूपैव सदा मुक्तिरिति न तृतीयाध्यायान्तिमाधिकरणविरोध इति भावः। ननु—जीवस्य संसारित्वं यथा स्वाविद्याकृतं, तथा ईश्वरस्याप्यैश्वर्यं स्वोपाधिकृतमेव वाच्यम्। तथा च मुक्तस्य स्वोपाध्यभावान्नैश्वर्यं सम्भवति—इति शङ्कां निराकरोति—**न हीति**। तत्र किं ईश्वरस्योपाधिः अविद्या, किं वा तदतिरिक्ता माया। नान्त्यः। अविद्यासु बिम्बभूतस्य चैतन्यस्य जीवाश्रिताविद्याभिरैश्वर्यसम्भवेन तदतिरिक्तमायोपाधिकल्पनावैयर्थ्यात्, तत्तज्जीवगततत्त्वज्ञानेन तत्तदविद्यानिवृत्तिरिति क्रमेण सर्वजीवमुक्त्यनन्तरमपि मायायाः निवर्तकाभावेन तदाऽपि मायावशेषप्रसङ्गाच्च, अविद्यानामपि बिम्बभूतेश्वरसंबन्धित्वसत्त्वेन ईश्वरस्य तासु विक्षेपशक्तिप्राधान्येन 'मम माया'

न च 'यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवति' [छा. उ. ३-१४] 'तं यथायथोपासते' [मुद्गलोपनिषत्. ३] इत्यादिश्रुतिषु सगुणोपासकानामपि ईश्वरसायुज्यश्रवणात् मुक्तेः सगुणविद्याफलाविशेषापत्तिः। सगुणोपासकानामखण्डसाक्षात्काराभावात् नाविद्यानिवृत्तिः, न वा तन्मूलाहंकारादेर्विलयः। आवरणानिवृत्तेर्नाखण्डानन्दस्फुरणम्। 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च' [ब्र. सू. ४-४-१७] 'भोगमात्रसाम्यलिङ्गाच्च' [ब्र. सू. ४-४-२१] इत्यादिसूत्रोक्तन्यायेन तेषां परमेश्वरेण भोगसाम्येऽपि सङ्कल्पमात्रात् स्वभोगोपयुक्तदिव्यदेहेन्द्रियवनितादिसृष्टिसामर्थ्येऽपि सकलजगत्सृष्टिसंहारादिस्वातन्त्र्यलक्षणं न निरवग्र-

---

इत्यादिनिर्देशोपपत्तेश्च, बन्धमुक्तिप्रतिपादकशास्त्रानुसारिभिः 'इन्द्रो मायाभिः पुरुरूपः [बृ. उ. २-५-१९] यो योनिंयोनिं' [श्वे. उ. ४-११] इत्यादिश्रुतिवाक्यैः अविद्यानानात्वसिद्धौ 'मायाम्' इत्याद्येकवचनस्य जात्यभिप्रायत्वोपपत्तेश्च। (तस्मान्नान्यः कल्पस्सम्भवति।) नाद्य इत्याह—**स्वाविद्याकृतमिति**। स्वाश्रिताविद्याकृतमित्यर्थः। **बद्धपुरुषेति**। अविद्यानां जीवाश्रितत्वं च प्रथमपरिच्छेदे निरूपितमस्माभिरिति नात्र निरूप्यते। **निरञ्जनत्वादिति**। दोषानाश्रयत्वादित्यर्थः।

ननु—निर्गुणब्रह्मविद्याफलभूतायां मुक्तावपि ईश्वरसायुज्याभ्युपगमे सगुणविद्याफलादविशेषापत्त्या सगुणनिर्गुणविद्ययोः फलतो भेदो न स्यात् इत्याशङ्कां निराकरोति—**न चेत्यादिना**। यादृग्गुणकब्रह्मध्यानवान् अस्मिन् लोके भवति, तादृशं ब्रह्म देहपातानन्तरं प्राप्नोति इति 'यथाक्रतुः' इतिश्रुत्यर्थः। तं ईश्वरं यथायथा-येनयेन गुणजातेन विशिष्टं उपासते तादृशमेव तं प्राप्नुवन्तीत्यर्थः। सगुणोपासकं प्रकृत्य श्रुतं 'आप्नोति स्वाराज्यं' [तै. उ. १-६-२] इत्यादिश्रुतिवाक्यं आदिशब्दार्थः। **अविशेषापत्तिरिति**। तथा च सगुणोपासकानां ब्रह्मलोकं गतानां निर्गुणविद्याश्रवणं व्यर्थं स्यादिति भावः। फलभेदं दर्शयति—**सगुणेत्यादिना**। **जगदिति**। सकलजगत्सृष्टिस्थितिसंहारकर्तृत्वलक्षणव्यापारव्यतिरिक्तं स्वभोगोपयुक्तभोग्यभोगोपकरणमात्रसृष्टिसामर्थ्यरूपमेवैश्वर्यमुपासकानां भवितुमर्हति, न तु सकलजगद्व्यापारः। स तु नित्यसिद्धस्य परमात्मन एव। कुतः। 'आत्मन आकाशस्सम्भूतः' [तै. उ. २-१] इत्यादिसृष्टिवाक्येषु परमात्मन एव प्रकृतत्वात् उपासकानामसन्निहितत्वाच्च। इतश्च सगुणोपासकानां न निरङ्कुशमैश्वर्यमित्याह—**भोगेति**। उपासकानां नित्यसिद्धेन परमेश्वरेण हिरण्यगर्भमाविश्य भोगान् भुञ्जानेन भोगमात्रे साम्यगमकस्य सत्त्वादित्यर्थः। तथा च श्रुतिः—'तमाह आपो वै खलु मीयन्ते लोकोऽसौ' [कौ. उ. १-६] इति। तं - उपासकं स्वसमीपमागतं प्रत्याह हिरण्यगर्भः 'मया खल्वापोऽमृतलक्षणा भुज्यन्ते, तवाप्यसावब्लक्षणपदार्थो लोको - भोग्यः' इति श्रुत्यर्थः। ननु, 'सङ्कल्पादेव तु तच्छ्रुतेः' [ब्र. सू. ४-४-८] इति सूत्रेण तेषामीश्वरवत् सत्यसङ्कल्पत्वव्यवस्थापनात् कथं जगद्व्यापाराभावः, इत्यत आह—**सङ्कल्पमात्रादिति**। 'यं यं कामं पित्रादिरूपं कामयते, स स कामस्सङ्कल्पादेव समुत्तिष्ठति' इति भोग्यादिपदार्थानामेव श्रुतौ

ह्मैश्वर्यं, मुक्तानां तु निस्सन्धिबन्धमीश्वरभावं प्राप्तानां तत्सर्वमिति महतो विशेषस्य सद्भावात्। न च परमेश्वरस्य रघुनाथाद्यवतारे तमस्वित्वदुःखसंसर्गादिश्रवणात् मुक्तानामीश्वरभावे पुनर्बन्धापत्तिः। तस्य विप्रशापामोघत्वादिस्वकृतमर्यादापरिपालनाय कथंचित् भृगुशापादि

सङ्कल्पमात्रसिद्धत्वप्रतिपादनात् तावन्मात्रविषयमेवोपासकानां सत्यसङ्कल्पत्वमिति सूत्रतात्पर्यान्न तद्विरोध इति भावः। **निस्सन्धिबन्धमिति**। सर्वात्मनेत्यर्थः। **तत्सर्वमिति**। अविद्यानिवृत्त्यादिकं पूर्वोक्तं सर्वमित्यर्थः। परममुक्तस्य ईश्वरभावापत्तौ बाधकमाशङ्क्य निराकरोति—**न चेत्यादिना**। **परमेश्वरस्येति**। श्रीमहाविष्णोरित्यर्थः। श्रीकृष्णाद्यवतार आदिशब्दार्थः। **तमस्वित्वेति**। 'आत्मानं मानुषं मन्ये रामं दशरथात्मजम्' [वाल्मीकिरामायणम् ६-१२०] इत्यादिश्रीरामवाक्यैरेव स्वकीयविष्णुत्वलक्ष्मीभर्तृत्वादिविषये अज्ञानावगमात्। 'राज्यनाशो वने वासस्सीता नष्टा द्विजो हतः। ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम्॥' [वाल्मीकिरामायणम् ३ ६७] 'न मद्विधो दुष्कृतकर्मकारी' इत्यादिभिः श्रीरामवाक्यैरेवात्यन्तदुःखित्वप्रतीतेश्च इत्यर्थः। 'सुग्रीवं शरणं गतः' [वाल्मीकिरामायणम् ४-४] इत्यादिवाक्यावगतदैन्यादिकमादिपदार्थः। तस्य कथंचिदभिनयमात्रपरत्वादिति सम्बन्धः। तस्येत्यस्य तमस्वित्वादिश्रवणस्येत्यर्थः। कथञ्चिदित्यस्य स्वेच्छयेत्यर्थः। विप्रशापामोघत्वादिरूपा या स्वेन-परमेश्वरेण कृता मर्यादा व्यवस्था तत्परिपालनायेत्यर्थः। सर्वज्ञस्यापि श्रीरामस्य महादेवब्रह्मेन्द्रादिदेवानां सन्निधौ 'आत्मानं मानुषं मन्ये' इत्यादिवचनेन 'देवानां सन्निधौ मनुष्येण विनय एव कर्तव्यः, न तु प्रागल्भ्यं कर्तव्यम्, तथासति मनुष्यस्यानर्थो भवेत्' इति या परमेश्वरकृता मर्यादा, सा श्रीरामेण परिपालिता। एवमन्या अपि मनुष्याणां हितार्थाय गुरुशिष्यसम्प्रदायादिलक्षणा मर्यादाः परमेश्वरेण कृताः, तास्सर्वा अपि तदातदा श्रीरामकृष्णाद्यैः लोकहितार्थायानुष्ठिताः, तासां सङ्ग्रहार्थमादिपदम्। **भृग्विति**। भृगुशापस्य स्वयं तच्छापाङ्गीकारस्य च सत्यत्वं मनुष्यलोके प्रकाशयितुमित्यर्थः। तत्प्रकाशनफलं च श्रेयोऽर्थिनां विप्रशापादिभ्योऽतिभीत्या निवृत्तिद्वारा श्रेयःप्राप्तिरेव। भृगुशापादिकं च वाल्मीकीये उत्तररामायणे [७-५१] व्यक्तम्। तथा हि वसिष्ठसन्निधौ दशरथं प्रति दुर्वासाः—

शृणु राजन् पुरावृत्तं पुरा देवासुरे युधि। दैत्यास्सुरैर्हन्यमानाः भृगुपत्नीमुपाश्रिताः।
तया दत्ताभयास्तत्र न्यवसन् निर्भयास्तदा। तया परिगृहीतांस्तान् दृष्ट्वा क्रुद्धस्सुरोत्तमः।
चक्रेण शितधारेण भृगुपत्न्याश्शिरोऽहरत्। ततस्तां निहतां दृष्ट्वा पत्नीं भृगुकुलोद्वहः।
शशाप सहसा क्रुद्धो विष्णुं रिपुबलार्दनम्'।

सहसा-विष्णोर्जगदीश्वरस्य शापानभिभाव्यत्वमविचार्येत्यर्थः।

यस्मादवध्यां मे भार्यामवधीः क्रोधमूर्छितः। तस्मात्त्वं मानुषे लोके जनिष्यसि जनार्दन।
तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम्। एवं शापं भृगुर्दत्वा विष्णोर्देवस्य विव्यथे।
विष्णुशक्तिमविद्वान् सन् प्रपेदे शापमूढताम्।

सत्यत्वं प्रत्याययितुं नटवदीश्वरस्य तदभिनयमात्रपरत्वात् । अन्यथा तस्य नित्यमुक्तत्वनिरवग्रह-

विष्णुशक्तिमविद्वान् सन् विष्णोश्शापं दत्वा पश्चाद्विष्णुशक्तिप्रतिहतं शापं स्वात्मानं प्रति पुनः प्राप्तं ज्ञात्वा व्यथां-भीतिं प्राप्तवान्, व्यथितश्च शापेन मूढतां विसंज्ञतां प्राप्त इत्यर्थः ।

'चिरकालमसंज्ञोऽभूच्छापान्धतमसावृतः
दृष्ट्वा सप्तर्षयश्चैनं कृपां चक्रुश्च भक्तिभिः ॥'

एवं चिरकालं शापान्धतमसावृतं भृगुं दृष्ट्वा पूर्वं सप्तर्षिषु भृगुणा कृताभिर्भक्तिभिः-पूजाभिः तस्मिन् ते ऋषयः कृपां चक्रुः । शापं च कृपया भृगोस्सकाशान्निस्सारितवन्त इत्यर्थः ।

'स च शापः पुरस्तस्थौ मन्दं भृगुरथाब्रवीत् ।
रक्षध्वं मामृषिश्रेष्ठाःशापान्मत्पुरतस्स्थितात् ।
श्रुत्वा तु भृगुवाक्यं तमाहुश्च परमर्षयः ।
स्तुत्यैर्ब्रह्मेशशक्राद्यैस्स्तूयमानमहर्निशम् ।'

स्तुत्यैरिति । अस्माभिस्स्तुत्यैरपीत्यर्थः ।

'नारायणं प्रपद्यस्व स्तोत्रैरेव च सुव्रत ।'

नारायणमेव प्रपद्यस्व, नान्यश्शक्तस्त्वां मोक्षयितुमित्यर्थः ।

'भृगुणाऽराधितो विष्णुरागतस्त्वरितं भृगुम् ।'

कृतापराधमपि भृगुं भक्तवात्सल्यात् त्वरया आगत इत्यर्थः ।

'माभैर्भृगोऽनृतं वाक्यं नाभविष्यत् द्विजस्य ते ।'

अनृतं न भविष्यतीत्यर्थः ।

'सम्मोचयित्वा शापात्त्वामहमेनं गृहीतवान् ।'

अङ्गीकृतवानित्यर्थः ।

'अर्चयामास तं देवं भृगुश्शापेन पीडितः ।
ततोऽब्रवीद्देवदेवः प्रीतिमान् भक्तवत्सलः ।
लोकानां तु हितार्थाय शापं तं ग्राह्यमुक्तवान् ।'

तव च हितार्थायेति तुशब्दार्थः ।

'इति शप्तो महातेजाः भृगुणा पूर्वजन्मनि ।
इहागतस्स पुत्रत्वं तव पार्थिवसत्तम ।
राम इत्यभिविख्यातस्त्रिषु लोकेषु मानद ॥' इति ।

अहर्निशं ब्रह्मेशादिस्तुत्यत्वदेवदेवत्वादिप्रतिपादकरामायणवचनैरेव श्रीमहाविष्णोर्लोकहितार्थाय श्रीराम-रूपेणावतीर्णस्य तमस्त्वादिश्रवणमभिनयमात्रपरमिति भावः । **अन्यथेति** । तस्याभिनयमात्रपरत्वानङ्गीकार

स्वातन्त्र्यसमाभ्यधिकराहित्यादिश्रुतिविरोधात् । तस्माद्यावत्सर्वमुक्ति परमेश्वरभावो मुक्तस्येति बिम्बेश्वर [पक्षे] (वादे) न कश्चिद्दोषः ॥

अयमेव पक्षः श्रुतिसूत्रभाष्याद्यनुगुणः । तथा हि–समन्वयाध्याये तावत् 'दहर उत्तरेभ्यः' [ब्र. सू. १३-१४] इत्यधिकरणे 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन् अन्तराकाशः' [छा. उ. ८-१-१] इत्यादिश्रुतिनिर्दिष्टो दहराकाशो न भूताकाशः, नापि जीवः, किं तु परमेश्वरः, उत्तरेभ्यो - वाक्यशेषेभ्यः । 'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' [छा.उ.८-१-३] 'एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' [छा. उ. ८-१-५] इत्यादिना प्रतिपाद्यमानेभ्यो द्यावापृथिव्याद्याधारत्वलक्षणगुणेभ्यो हेतुभ्यः' इति निर्णीय 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' [ब्र. सू. १-३-१९] इति सूत्रान्तरेण दहरविद्यानन्तरमिन्द्रप्रजापतिसंवादे 'य आत्मापहतपाप्मा' [छा. उ. ८-७-३] इत्यादिना अपहतपाप्मत्वादिगुणाष्टकयुक्तमात्मानमुपदेश्यमुप-

---

इत्यर्थः । **तस्येति** । 'नारायणात् ब्रह्मा जायते' [ना. उ. १] 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः' [म. ना. उ. ९-५] इत्यादिश्रुतिसहस्रसिद्धेश्वर[त्व]स्येत्यर्थः । 'एष त आत्मान्तर्याम्यमृतः' [बृ. उ. ३-७-३] 'एष सर्वेश्वरः' [बृ. उ. ४-४-२१] 'न तत्समश्चाभ्यधिकश्च दृश्यते' [श्वे. उ. ६-८] 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' [क. उ. ३-९] इत्यादिश्रुतिषु नारायणस्य नित्यमुक्तत्वसर्वेश्वरत्वसमाभ्यधिकरहितत्वमुक्तप्राप्यत्वादिश्रवणेन तद्विरोधप्रसङ्गादित्यर्थः । **तस्मादिति** । मुक्तस्येश्वरभावापत्तौ बाधकाभावादित्यर्थः ।

ननु, बाधकाभावेऽपि साधकमानं विना कथमीश्वरभावापत्तिस्तस्य सिद्ध्यतीत्याशङ्क्य तत्र मानमाह— **अयमेवेति** । अस्मिन् ब्रह्मणः - परमात्मनः उपलब्धिस्थानभूते पुरे - शरीरे यदिदं दहरं-अल्पं पुण्डरीकमस्ति वेश्माकारम्, अस्मिन् पुण्डरीकेऽन्तर्दहर आकाशो यः श्रुतःस भूताकाशो वा, जीवो वा, परमेश्वरो वा' इति संशये रूढिबलात् भूताकाश इत्येकः पूर्वः पक्षः, आकाशविशेषणदहरत्वलिङ्गादल्पोपाधिपरिच्छिन्नो जीव इति द्वितीयः पूर्वः पक्षः । पक्षद्वयनिषेधपूर्वकं सिद्धान्तं वदन् सूत्रं व्याचष्टे—**न भूताकाश इत्यादिना** । वाक्यशेषमेव खण्डश उदाहरति—**उभे इति** । अस्मिन् - प्रकृते दहराकाशे समाहिते-स्थिते । अयमाकाशः- भूताकाशः । एतच्छब्दाभ्यां दहराकाशो निर्दिष्टः । जिघत्सा - भक्षणेच्छा तद्रहितः, पिपासारहितश्च । अत्र भूताकाशे भूताकाशोपमितत्वसत्यकामत्वादयो गुणा न सम्भवन्तीति तन्निरासः । परिच्छिन्ने जीवे आकाशोपमितत्वद्यावापृथिव्यादिजगदाधारत्वापहतपाप्मत्वादयो गुणा न सम्भवन्तीति जीवनिरासः । उक्तहेतूनां परमेश्वरे सम्भवात् आकाशशब्दस्य तत्र निरूढत्वाच्च स एव दहराकाशः । तस्य दहरत्वं तु न स्वाभाविकं, किं तूपासनार्थं कल्पितं- अणीयस्त्वादिवत् इति निर्णयः । 'सूत्रान्तरेण जीवेऽप्यपहतपाप्मत्वादिगुणाष्टकमस्तीति तद्गुणाष्टकं निर्णायकं न भवति' इत्याशङ्क्य समादधानः सूत्रकारो मुक्तस्येश्वरभावापत्तिमाहेति सम्बन्धः । 'जीवेऽपि गुणाष्टकमस्ति' इत्यत्र 'गुणाष्टकयुक्तमात्मानमुपदेश्यमुपक्षिप्य जीवस्योपदेशात्' इति हेतुः । गुणाष्टकयुक्तमात्मानमुपदेश्यत्वेनोपक्रम्य

क्षिप्य 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मा' [छा. ८-७-४] इति जाग्रदवस्थायां द्रष्टृत्वेनाक्षिसन्निहितस्य 'य एष स्वप्ने महीयमानश्चरति एष आत्मा' [छा. उ. ८-१०-१] इति स्वप्नावस्थापन्नस्य 'तद्यत्रैतत्सुप्तस्समस्तस्संप्रसन्नः स्वप्नं न विजानाति एष आत्मा' [छा. उ. ८-११-१] इति सुषुप्त्यवस्थापन्नस्य 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' [छा. उ. ८-१२-३] इत्यवस्थात्रयोत्तीर्णस्य च जीवस्योपदेशात् जीवेऽप्यस्ति अपहतपाप्मत्वादिगुणाष्टकमिति न तद्दहराकाशस्य परमेश्वरत्वनिर्णायकम् । 'य एष स्वप्ने' इत्यादिपर्यायेषु प्रतिपर्यायं 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' [छा.उ. ८-१०-४] इति

प्रजापतिना जीव उपदिष्ट इति कथमवगम्यत इत्यत आह—**य एषोऽक्षिणीत्यादिना ।** प्रजापतिना हि पर्यायचतुष्टयेनात्मा इन्द्रं प्रत्युपदिष्टः । तत्र प्रथमपर्यायवाक्यं— 'य एषोऽक्षिणि' इति । पुरुषो जीवः । अक्षिग्रहणं सर्वेन्द्रियोपलक्षणार्थम् । 'चक्षुरादिषु रूपाद्युपलब्धिक्रियां कुर्वत्सु सत्सु यः पुरुषो दृश्यते रूपाद्युपलब्धिक्रियाकर्तृत्वेनानुमीयते, एषः युवाभ्यां पृष्ट आत्मा' इतीन्द्रविरोचनौ प्रति प्रजापतेरुपदेशः । तत्राक्षिग्रहणेन जाग्रदवस्थावान् जीव इह विवक्षित इति प्रतीयते, अवस्थान्तरेष्विन्द्रियव्यापाराभावादिति मत्वा प्रथमपर्यायवाक्यस्य तात्पर्यमाह—**जाग्रदवस्थायामिति । द्रष्टृत्वेनेति ।** इन्द्रियैः रूपादिद्रष्टृत्वेनेत्यर्थः । अक्षिसन्निहितस्य स्वप्नावस्थापन्नस्य सुषुप्त्यवस्थापन्नस्य अवस्थात्रयोत्तीर्णस्य च जीवस्योपदेशात् इति सम्बन्धः । द्वितीयपर्यायवाक्यमुदाहरति—**य एष स्वप्न इति ।** महीयमानः- वनितादिभिः पूज्यमान इत्यर्थः । चरति - विषयान्वासनामयाननुभवति यः, एषः इन्द्रेण त्वया पृष्ट आत्मा इत्यर्थः । तृतीयपर्यायवाक्यमुदाहरति—**तद्यत्रैतदिति ।** यत्र-यस्मिन् काले एतत्-एष जीवः सुप्तः-स्वापं प्राप्तः समस्तः-सम्यग्विलीनकरणग्रामः सम्प्रसन्नः-स्वरूपानन्दानुभववान् स्वप्नमपि न विजानाति, एष एव त्वया पृष्ट आत्मा इत्यर्थः । चतुर्थपर्यायवाक्यमुदाहरति—**एष सम्प्रसाद इति ।** सम्यक् प्रसीदत्यस्मिन् जीव इति व्युत्पत्त्या सम्प्रसादशब्दस्सुषुप्तस्थानवाचकस्सन् सुषुप्त्यवस्थोपलक्षितं जीवमुपलक्षयति । शरीरादुत्क्रम्य परं-उत्कृष्टं ज्योतिः आदित्यं उपसम्पद्य आदित्योपलक्षितं देवयानमार्गं प्राप्य स्वेन स्वकीयेनोपासनाफलभूतैश्वर्यविशिष्टेन रूपेण अभिनिष्पद्यते। ब्रह्मलोकं गत उपासकः स उत्तमः पुरुषः- उपक्रान्तापहतपाप्मत्वादिगुणक इति पूर्वपक्षरीत्या चतुर्थपर्यायवाक्यार्थो द्रष्टव्यः ।

ननु, प्रजापतिवाक्ये पर्यायचतुष्टयस्य जाग्रदाद्यवस्थापन्नजीवविषयकत्वमनुपपन्नम् । प्रथमपर्याये जाग्रदवस्थावाचिपदाभावेन तस्य जाग्रज्जीवविषयकत्वस्यास्फुटत्वात् । तथा च प्रथमपर्याये इन्द्रविरोचनाभ्यां पृष्टोऽपहतपाप्मत्वादिगुणक आत्मैव निर्दिष्टः, स च ब्रह्मैवेति प्रजापतिवाक्येऽपि ब्रह्मण एव गुणाष्टकमुपदिष्टं न जीवस्य इति चोद्यस्यात्र नावकाश इत्याह—**य एष स्वप्न इत्यादिपर्यायेष्विति । (स्फुटेति ।)** स्फुटानि स्वप्नस्वापशरीरात्समुत्थानरूपाणि जीवलिङ्गानि येषु पर्यायेषु, तेषामेव जीवविषयत्वम्, तेषां ब्रह्मविषयकत्वचोद्यानवकाशात्; प्रथमपर्यायस्य त्वस्फुटजीवलिङ्गस्य ब्रह्मविषयकत्वमिति चोद्यं सावकाशं इति भ्रमो न कर्तव्य इत्यत्र हेतुमाह—**प्रतिपर्यायमिति ।** द्वितीयपर्यायादौ 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति श्रवणेन प्रथमपर्यायस्य

श्रवणेन 'स्फुटस्वप्नादिजीवलिङ्गानां द्वितीयादिपर्यायाणामेव जीवविषयत्वं प्रथमपर्यायस्य च ब्रह्मविषयत्वं' इति चोद्यानवकाशात्—इत्याशङ्क्य 'तत्र चतुर्थपर्याये निरूप्यमाणः सकलबन्धविनिर्मुक्तत्वेनाविर्भूतस्वरूपो जीवः प्रतिपाद्यः, न तु सांसारिकावस्थाभेदकलुषितः, तत्र सत्यसङ्कल्पत्वादिगुणबाधात् अवस्थात्रयोपन्यासस्य तत्तदवस्थादोषाभिधानेन चतुर्थपर्यायोपदेशशेषत्वप्रतिपत्तेः' इति समा-

---

ब्रह्मविषयत्वासम्भवादित्यर्थः ।

एतदुक्तं भवति—द्वितीयादिपर्यायत्रयस्य जीवविषयत्वं तावत् सम्प्रतिपन्नम् । प्रथमपर्यायस्यापि जीवविषयत्वं वक्तव्यम् । प्रथमपर्यायनिर्दिष्टस्यैव 'एतम्' इति सर्वनाम्ना आकृष्यमाणत्वात् अर्थभेदे तदयोगादिति । एतेन-प्रथमपर्यायस्य चक्षुर्गोलकस्थप्रतिबिम्बविषयत्वमेव तस्याक्षिणि दृश्यत इति दृश्यमानत्वसम्भवादिति चोद्यमपि निरस्तम् । द्वितीयपर्यायगतैतत्पदेन प्रथमपर्यायनिर्दिष्टं पुरुषमाकृष्य तस्योत्तरत्र स्वप्नजीवरूपत्वोपदेशात्; प्रथमपर्याय एवाक्षिणि निर्दिष्टस्य पुरुषस्यामृतत्वाभयत्वब्रह्मत्वसङ्कीर्तनाच्च । न च प्रतिबिम्बे तत् सम्भवति । न च जीवस्यापि तदसम्भव इति वाच्यम् । जाग्रदाद्यवस्थासु अमृतत्वादेरसम्भवेऽप्यवस्थात्रयोत्तीर्णस्य तस्य प्रजापतिवाक्यप्रामाण्यात् तत्सम्भवात् इति पूर्वपक्ष्याशयः । एवं 'उत्तराच्चेत्' इति सौत्रशङ्काभागं व्याख्याय 'आविर्भूतस्वरूपस्तु' इति सिद्धान्तभागं व्याचष्टे — **तत्रेति** । पर्यायचतुष्टयमध्य इत्यर्थः । **सकलेति** । तत्त्वसाक्षात्कारेणाविद्यानिवृत्तौ सत्यां तन्मूलकसकलबन्धविनिर्मुक्त्या आविर्भूतं अमृताभयब्रह्मलक्षणं स्वरूपमस्य इत्याविर्भूतस्वरूपो जीवः प्रतिपाद्यत इत्यर्थः ।

ननु-चतुर्थपर्यायेऽपि पूर्वपर्यायेष्विव संसार्यात्मैव कुतो न निरूप्यते । तत्पर्यायेऽपि 'शरीरात् समुत्थाय' इति शरीरावधिकोत्क्रान्त्यवस्थाविशेषविशिष्टस्य संसारिण एव स्पष्टं प्रतीतेः-इत्याशङ्कां सौत्रावधारणार्थकतुशब्दव्याख्यानेन परिहरति—**न त्विति । तत्रेति** । संसारिणीत्यर्थः । तथा च चतुर्थपर्यायेऽपि संसारिण एव निरूपणे इन्द्रेण पृष्टस्यापहतपाप्मत्वादिगुणकस्य प्रजापतिना अनुपदिष्टत्वात् प्रजापतिवाक्यं प्रतिवचनमेव न स्यात् । अतश्चतुर्थपर्यायो गुणाष्टकयोग्यमुक्तजीवविषय एवेत्यर्थः । न च-पूर्वपक्षोक्तरीत्या सगुणविद्यया ब्रह्मलोकं गतस्य अपहतपाप्मत्वादिगुणाष्टकसम्भवात्-आत्यन्तिकमुक्तविषयत्वं चतुर्थपर्यायस्य न वक्तव्यम् । तथा च संसारिविषयत्वमेवास्यापि पर्यायस्येति-वाच्यम् । सगुणविद्याफलभूतस्यापि तस्याविद्यानिवृत्त्यादेरभावेन निरङ्कुशापहतपाप्मत्वादेरसम्भवात्, प्रजापतिवाक्यस्य निर्गुणब्रह्मपरत्वस्य समन्वयाध्याय एव सप्रपञ्चं निरूपितत्वाच्च न तद्विद उत्क्रान्त्यादिसम्भव इति भावः ।

तथाचोक्ततात्पर्यानुरोधेन चतुर्थपर्यायस्यायमर्थः—शरीरात् समुत्थानं शरीरत्रयविलक्षणस्य त्वंपदलक्ष्यस्य निर्णयः, परं ज्योतिः-ब्रह्म, तदुपसम्पत्तिः-तत्साक्षात्कारः, तत्फलं मुक्तिः-स्वस्वरूपाविर्भावः स्वेन रूपेणाभिनिष्पत्तिः । स च मुक्तः उत्तमः पुरुषः-परमात्मैवेति ।

ननुः चतुर्थपर्यायस्यैव पृष्टगुणाष्टकयुक्तात्मनिरूपणपरत्वे पूर्वपर्यायाणामवस्थात्रयोपन्यासरूपाणां वैयर्थ्यं स्यादिति, नेत्याह—**अवस्थात्रयोपन्यासस्येति** । जाग्रदवस्थायामन्धत्वविनाशित्वादिदोषाभिधानेन स्वप्नावस्थायां

दधानः सूत्रकारः चतुर्थपर्याये प्रतिपाद्यस्य मुक्तस्येश्वरभावापत्तिं स्पष्टमाह। तदभावे मुक्तेऽपि सत्यसङ्कल्पत्वाद्ययोगात् अनुक्रान्तस्य गुणाष्टकस्य ईश्वरादन्यत्रापि भावे कृतशङ्कापरिहारालाभाच्च। तस्मिन् सूत्रे 'तस्मात् यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृत्वभोक्तृत्वरागद्वेषादिदोषकलुषितमनेकानर्थयोगि तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यते' इति भाष्यकारोऽप्यतिस्पष्टं मुक्तस्य सगुणेश्वरभावापत्तिमाह।

रोदनादिदोषाभिधानेन सुषुप्त्यवस्थायां स्वपरज्ञानाभावविनष्टप्रायत्वादिदोषाभिधानेन चावस्थात्रयकलुषितस्य जैवरूपस्य लोकसिद्धस्य हेयत्वज्ञापनद्वारा तज्जिहासोरधिकारिणो वास्तवब्रह्मस्वरूपनिरूपणार्थं चतुर्थपर्यायप्रवृत्तिरित्यवगमात् पूर्वपर्यायाणां चतुर्थपर्यायशेषत्वं प्रतीयते। अतो न तेषां वैयर्थ्यमित्यर्थः। **समादधान इति।** अपहतपाप्मत्वादिगुणाष्टकं दहराकाशस्य ईश्वरत्वनिर्णायकं न भवति। प्रजापतिवाक्यात् जीवेऽपि गुणाष्टकसत्त्वेन तस्य व्यभिचारित्वात्, इत्याशङ्क्य-प्रजापतिवाक्ये मुक्तजीव एव गुणाष्टकयुक्तः प्रतिपाद्यते, न तु बद्धजीवः। ततो न गुणाष्टकस्य परमेश्वरादन्यत्र सत्त्वम्। येन तस्यान्यत्रापि सत्त्वेन व्यभिचारितया निर्णायकत्वं न स्यात् इति समादधान इत्यर्थः। ननु 'तत्र सत्यसङ्कल्पत्वादिगुणबाधात्' इति पूर्वग्रन्थेन चतुर्थपर्याये गुणाष्टकयुक्तो मुक्तजीवः प्रतिपाद्यत इति सूत्रतात्पर्यं वर्णितम्, तावता मुक्तस्येश्वरभावापत्तिः कथं सूत्रकारेणोक्ता, तत्राह—**तदभाव इति।** मुक्तस्येश्वरभावापत्त्यभावे बद्धजीव इव मुक्तजीवेऽपि निरस्तोपाधिके सत्यसङ्कल्पत्वादिगुणायोगात् गुणाष्टकयुक्तस्यात्मनो निरूपणं प्रजापतिवाक्ये न स्यात्। अतो मुक्तजीवस्य गुणाष्टकयुक्तत्वमीश्वरभावापत्त्यैवेति सूत्रकारस्य तात्पर्यं निश्चीयत इत्यर्थः। ननु जीवेश्वरयोर्वस्तुत एव भिन्नत्वान्मुक्तस्य नेश्वरभावापत्त्या गुणाष्टकयोगः किं तु स्वत एवेत्याशङ्कां निराकरोति—**अनुक्रान्तस्येति।** उपक्रमे श्रुतस्येत्यर्थः। **कृतेति।** गुणाष्टकस्य जीवसाधारणत्वेन ईश्वरासाधारणत्वाभावात् न ईश्वरलिङ्गत्वं गुणाष्टकस्य-इति या शङ्का 'उत्तराच्चेत्' इति सूत्रभागेन कृता, तस्याश्शङ्कायाः गुणाष्टकयुक्तस्य मुक्तस्य वस्तुगत्या ईश्वरात् भिन्नत्वपक्षे परिहारो न लभ्यते। तथा च सूत्रविरोधात् न मुक्तस्येश्वरात् भेदेनावस्थानमिति भावः। **तस्मिन्निति।** 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' इत्यस्मिन्नित्यर्थः। **तस्मादिति।** जीवब्रह्माभेदस्य वास्तवत्वादित्यर्थः। 'तस्मात्' इत्यनन्तरं 'यत्' इति पदमध्याहर्तव्यम्। विद्यया तद्विलयनेनाविद्यकसंसारनिवृत्तिद्वारा संसारविलक्षणं रूपं प्रतिपद्यत इत्यर्थः।

ननु - अत्र मुक्तस्येश्वरभावापत्तौ किं 'उत्तराच्चेत्' इति सूत्रभागकृतशङ्कापरिहारालाभप्रसङ्गो नियामकत्वेनाभिमतः, किं वा प्रजापतिवाक्यमेव मुक्तस्येश्वरभावापत्तौ नियामकत्वेनाभिमतम्। नाद्यः। मुक्तस्य बिम्बभूतेश्वरभावापत्तिं विना केवलचिन्मात्ररूपेणैवावस्थानाभ्युपगमे गुणाष्टकस्य बिम्बभूतेश्वरादन्यत्राभावेन तस्य तदसाधारणस्य दहराकाशे ईश्वरत्वनिर्णायकत्वसम्भवात्। न द्वितीयः। निर्गुणविद्याप्रकरणरूपे प्रजापतिवाक्ये गुणानामविवक्षितत्वेन मुक्तजीवेऽपि गुणाष्टकवैशिष्ट्यस्याप्रतिपाद्यत्वात्। ज्ञेयब्रह्मप्रकरणे गुणवैशिष्ट्यस्याप्रतिपाद्यत्वं आनन्दमयाधिकरणारम्भभाष्ये स्पष्टमभिहितम्। तथा च भाष्यम्—'एकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधि-

अविरोधाध्यायेऽपि 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' [कौ. उ. ३-८] इत्यादिश्रुतेः तत्तत्कर्मकर्तृत्वेन तत्तत्कर्मकारयितृत्वेन च उपकार्योपकारकभावेनावगतयोः जीवेश्वरयोः अंशांशिभावरूपसम्बन्ध निरूपणार्थत्वेनावतारिते 'अंशो नानाव्यपदेशात्' [ब्र. सू. २-३-४३] इत्यधिकरणे 'जीवस्येश्वरांशत्वाभ्युपगमे तदीयेन संसारदुःखभोगेन ईश्वरस्यापि दुःखित्वं स्यात्, यथा लोके हस्तपादाद्यन्यतमांशगतेन दुःखेनांशिनो देवदत्तस्यापि दुःखित्वं, तद्वत्; ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात्, ततो वरं पूर्वावस्था संसार एवास्तु इति सम्यग्ज्ञानानर्थक्यप्रसङ्गः' इति शङ्काग्रन्थेन, भामत्यादिषु स्पष्टीकृतं बिम्बप्रतिबिम्बभावकृतासङ्करमुपादाय समाहितेन भाष्यकारो मुक्तस्य ईश्वरभावापत्तिं स्पष्टीचकार ।

सम्बन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते' [ब्र.सू.भा.१-१-६/१२] इति । अत्र भाष्ये वेदान्तेषु निरस्तोपाधिसम्बन्धं ब्रह्म ज्ञेयत्वेनोपदिश्यत इत्युक्त्या ज्ञेयब्रह्मप्रकरणेषु गुणवैशिष्ट्यस्याप्रतिपाद्यत्वं स्पष्टं प्रतीयते । अत एव सिद्धान्ते ज्ञेयब्रह्मपराणां वेदान्तानां संसर्गागोचरप्रमितिजनकत्वरूपमखण्डार्थत्वमिष्यते । तस्मात् प्रजापतिवाक्योपक्रमे श्रुतं सत्यसङ्कल्पत्वादिकं बृहदारण्यकषष्ठाध्यायगतसर्वेश्वरत्वादिगुणजातवत् ज्ञेयब्रह्मप्रशंसापरम्, उपलक्षणमात्रं वा, न तु दहरविद्यागतगुणाष्टकवत् प्रतिपाद्यम् । 'तद्विपरीतं अपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यते' इति भाष्यमपि गुणाष्टकोपलक्षितं ब्रह्म प्रतिपद्यत इति योजनीयम् । अतो मुक्तस्येश्वरभावापत्तौ नोदाहृतश्रुतिसूत्रभाष्याणि प्रमाणं भवितुमर्हन्ति इत्यस्वरसादाह—**अविरोधाध्यायेऽपीति ।** वेदान्तसमन्वयस्य प्रथमाध्याये निरूपितस्य मानान्तरविरोधसमाधानप्रतिपादके द्वितीयाध्यायेऽपीत्यर्थः । अविरोधाध्यायेऽपि समाहितेन शङ्काग्रन्थेन भाष्यकारो मुक्तस्येश्वरभावापत्तिं स्पष्टीचकार - इति सम्बन्धः । उन्निनीषते - उत्कृष्टं लोकं नेतुमिच्छतीति यावत् । कर्मकर्ता जीव उपकार्यः, कर्मकारयिता ईश्वर उपकारकः, तयोः श्रुत्यवगतोपकार्योपकारकभावबलात् सामान्यतः कश्चित् सम्बन्धोऽवगतः, सम्बन्धं विना लोके तद्भावादर्शनात् । स च सम्बन्धः क इति विशेषाकाङ्क्षायां तयोरंशांशिभावसम्बन्ध इति निरूपणार्थत्वेनेत्यर्थः । जीव ईश्वरस्यांशः । कुतः । नानात्वस्य - भेदस्य व्यपदेशादिति सूत्रभागाक्षरार्थः । भाष्यं पठति—**जीवस्येत्यादिना ।** ईश्वरस्य स्वांशभूतसकलजीवगतदुःखभाक्त्वे को दोषः ? तत्राह—**ततश्चेति ।** तत्पदमीश्वरपरम् । **तत इति ।** ईश्वरप्राप्तेस्सकाशात् पूर्वावस्थितसंसाराङ्गीकरणमेव वरमिति बुद्ध्या ईश्वरप्राप्त्युपाये सम्यग्ज्ञाने कोऽपि न प्रवर्तेत, ततश्च ज्ञानशास्त्रमप्रमाणं स्यादित्यर्थः । अस्याश्शङ्कायाः परिहारग्रन्थरूपयोः सूत्रभाष्ययोः अभिप्रेतो जीवपरमेश्वरयोरंशांशिनोः परस्परं धर्मासङ्करो भामत्यादिग्रन्थेषु स्पष्टीकृतः । कथं ? जीवास्तावदविद्याप्रतिबिम्बभूता ईश्वरांशत्वेन श्रुतिसूत्रभाष्येषु विवक्षिताः, न तु हस्तपादादिवदवयवाः । तथा बिम्बभूतेश्वरोंऽशित्वेन विवक्षितः, न त्ववयवी । बिम्बप्रतिबिम्बयोश्च लोके धर्मासाङ्कर्यं प्रसिद्धम् । अतो न जीवगतानां दुःखानामीश्वरे प्रसक्तिरिति । **स्पष्टीचकारेति ।**

ननु मुक्तस्य ईश्वरभावापत्तिर्न सिद्धान्तसम्मता। तथा हि—यावत्सर्वमुक्ति ईश्वरभावापत्तिर्मुक्तस्येति स्वीकारे हि चरमं मुच्यमानस्य निर्विशेषचिन्मात्रस्वरूपेणैवावस्थानलक्षणा मुक्तिः, ततः प्राङ्मुच्यमानानां तु स्वतश्चिन्मात्ररूपेणावस्थितानामीश्वरभावापत्त्या निरवग्रहैश्वर्यप्राप्तिरूपा मुक्तिः, इति परममुक्तौ बहूनामैश्वर्यप्राप्तिः एकस्य तत् नास्तीत्येकं वैषम्यं, बहूनामैश्वर्यप्राप्तावपि क्रमेण मुच्यमानानां चिराचिरकालैश्वर्यलक्षणमपरं तारतम्यं, तेषामेव किञ्चित्कालमैश्वर्यं पश्चात्तदभाव इत्यादिरूपं तारतम्यं कल्पितं स्यात्। तच्च तृतीयाध्यायान्तिमाधिकरणविरुद्धम्। तत्र हि सगुणविद्याफलभूतायामवान्तरमुक्तावेव तारतम्यं न तु परममुक्ताविति व्यवस्थापितम्। न च - तदधिकरणस्य परममुक्तौ वस्तुतस्तारतम्यं नास्तीति प्रतिपादने तात्पर्यम्, तथा च काल्पनिकतारतम्ये सत्यपि न तदधिकरणविरोध इति - वाच्यम्। सिद्धान्ते सगुणविद्याफलभूतावान्तरमुक्तावपि वास्तवतारतम्याभावेन 'सगुणमुक्तावेव तारतम्यं न निर्गुणविद्याफलभूतायां परममुक्तौ' इति व्यवस्थापनपरस्य भाष्यादेर्निरालम्बनत्वापत्तेः। अतो मुक्तस्येश्वरभावापत्तिर्न सिद्धान्तसम्मता।

एवंस्थिते प्रकृते किं शङ्काभाष्यपर्यालोचनया ईश्वरभावापत्तिर्भाष्यकाराभिमतेति कल्प्यते, किं वा परिहारभाष्याभिप्रायालोचनया तथा कल्प्यते? नाद्यः। शङ्केन सिद्धान्त्यनभिमतामीश्वरभावापत्तिमापाद्य चोद्यकरणोपपत्तेः। न हि सर्वत्र सिद्धान्त्यभिमतमेवार्थमवलम्ब्य पूर्वपक्षिणा सिद्धान्तिनं प्रत्यनिष्टमाशङ्क्यत इति नियमो दृश्यते।

द्वितीयकल्पस्य हीत्थमुत्थितिः—'ईश्वरभावं प्राप्तानां महत्तरं दुःखं स्यात्' इति शङ्काया द्वेधा परिहारस्सम्भवति। ईश्वरस्य सकलजीवदुःखैः दुःखित्वेऽपि न मुक्तानां महत्तरदुःखप्राप्तिः, तेषां शुद्धचिन्मात्ररूपेणैवावस्थानाभ्युपगमेनेश्वरभावापत्तेरनभ्युपगमात् - इत्येकः प्रकारः। ईश्वरस्य दुःखाभावे समर्थिते सति तं प्राप्तानां मुक्तानां दुःखं स्यादिति शङ्का अर्थात्परिहृता भवतीत्याशयेन बिम्बप्रतिबिम्बभावकृतभेदाधीनधर्मव्यवस्थासमर्थनं द्वितीयः प्रकारः। तत्र परिहारभाष्यभामत्यादिनिबन्धनेषु प्रथमप्रकारं विहाय द्वितीयप्रकारस्यैवावलम्बनात् शङ्काग्रन्थोक्ता मुक्तानामीश्वरभावापत्तिः भाष्यकाराद्यनुमतेति प्रतीयते। अनेनैवाभिप्रायेण 'भामत्यादिस्पष्टीकृतबिम्बप्रतिबिम्बभावकृतासङ्करमुपादाय समाहितेन' इत्युक्तमिति। एवमुत्थितः परिहारभाष्यपर्यालोचनारूपो द्वितीयप्रकारोऽपि मुक्तस्येश्वरभावापत्तावनन्यथासिद्धहेतुर्न भवति। परिहारभाष्यादौ प्रथमप्रकारमवलम्ब्य 'मुक्तानामीश्वरभावापत्तिर्नास्ति। तेषां शुद्धचिन्मात्ररूपेणैवावस्थानाभ्युपगमात्। अतो न ज्ञानानर्थक्यप्रसङ्गः' इति वास्तवपरिहारे कथिते हि ज्ञानानर्थक्यशङ्कापरिहारेऽपि ईश्वरस्य सकलजीवदुःखैर्दुःखित्वप्रसङ्गः परिहृतो न भवतीति तत्प्रसङ्गशङ्का अवशिष्येत, सापि शङ्का माभूदित्यालोच्य प्रथमं प्रकारं विहाय द्वितीयप्रकारमवलम्ब्य महता यत्नेन परमेश्वरस्य दुःखित्वप्रसङ्गः परिहृतो भाष्यादिष्विति वक्तुं शक्यत्वात्। परिहारभाष्यादिषु परमेश्वरस्य दुःखित्वप्रसङ्गपरिहारानन्तरं 'तथा च मुक्तानामीश्वरभावापत्तिर्नानुपपन्ना' इति परापादितानुपपत्त्यभावोपसंहारादर्शनाच्च। किं च छान्दोग्ये सप्तमाध्याये 'स एकधा भवति त्रिधा भवति पञ्चधा, सप्तधा नवधा चैव पुनश्चैकादश स्मृतः। शतं च दश चैकश्च सहस्राणि च विंशतिः' [छा.उ. ७-२६-२] इति वाक्येन परब्रह्मविदो अनेकशरीरपरिग्रहादिरूपमैश्वर्यं श्रूयते। तच्च मुक्तस्येश्वरभावापत्तिपक्षे परममुक्तस्यैव सम्भवति। तथा च 'एकधा भवति' इत्यादिवचनं निर्गुणविद्या-

साधनाध्यायेऽपि 'सन्ध्ये सृष्टिराह हि' [ब्र. सू. ३-२-१] इत्यधिकरणे स्वप्नप्रपञ्चस्य मिथ्यात्वे व्यवस्थापिते तत्र मिथ्याभूते स्वप्नप्रपञ्चे जीवस्य कर्तृत्वमाशङ्क्य 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' [ब्र. सू. ३-२-५] इति सूत्रेण 'जीवस्येश्वराभिन्नत्वात् सदपि सत्यसङ्कल्पत्वादिकमविद्यादोषात्तिरोहितमिति न तस्य स्वप्नप्रपञ्चे स्रष्टृत्वं सम्भवति' इति वदन् सूत्रकारः 'तत्पुनस्तिरोहितं सत् परमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतेव

फलसमर्पकं न भवति, किं तु सगुणोपासनाफलसमर्पकम्, तच्च निर्गुणविद्याफलप्रशंसार्थं निर्गुणविद्याप्रकरणे पठ्यते इति भाष्यादिव्यवहारो विरुध्येत। तथा च सगुणविद्याफलविचारप्रस्तावे भाष्यं—'यद्यपि निर्गुणायां भूमविद्यायामनेकधाभावविकल्पः पठ्यते, तथापि विद्यमानमेवेदं सगुणावस्थायामैश्वर्यं भूमविद्यास्तुतये सङ्कीर्त्यते' इति। यदि मुक्तस्येश्वरभावापत्तिः सूत्रभाष्यकारयोरभिप्रेता स्यात्, तदा 'स एकधा भवति' इति वचनस्य निर्गुणविद्याफलसमर्पकत्वेन प्रकरणसमवेतार्थस्य सगुणविद्याफलसमर्पकत्वायोगात् एतद्वचनस्य तत्फलसमर्पकत्वमाश्रित्य सूत्रभाष्ययोः प्रवृत्तो 'भावं जैमिनिर्विकल्पामननात् [ब्र. सू. ४-४-११] इत्यादिविचारो निरालम्बन एव स्यात्। ब्रह्मलोकं गतस्य सगुणोपासकस्य स्थूलशरीरसद्भावं जैमिनिराचार्यो मन्यते। 'स एकधा भवति' इत्यादिना अनेकधाभावरूपविकल्पश्रवणात् स्थूलशरीरभेदं विना एकस्योपासकस्यानेकधाभावासम्भवात् इति सूत्रार्थः। तस्मात् उदाहृतशङ्काभाष्यग्रन्थस्य तत्परिहारभाष्यादिग्रन्थस्य च मुक्तानामीश्वरभावापत्तावनन्यथासिद्धप्रमाणत्वाभावात् उदाहृतानेकाधिकरणतद्भाष्यादिविरोधाच्च सा भाष्याभिमतेति कल्पयितुं न शक्यत इत्यस्वरसादाह—**साधनाध्यायेऽपीति**। ब्रह्मविद्यासाधनवैराग्यादिप्रतिपादकतृतीयाध्यायेऽपीत्यर्थः। साधनाध्यायेऽपि सूत्रकारः सूत्राभिप्रायं वर्णयन् भाष्यकारश्च मुक्तस्य परमेश्वरभावापत्तिं स्पष्टीचकार इति सम्बन्धः। सन्ध्ये-जाग्रत्सुषुप्त्योः सन्धौ भवे स्वप्नस्थाने रथादिसृष्टिः सत्या भवितुमर्हति। हि - यस्मात् श्रुतिराह रथादिसृष्टिम् 'अथ रथान् रथयोगान् पथस्सृजते' [बृ. उ. ४-३-१०] इत्यादिका। न हि श्रुतिसिद्धा सृष्टिरसत्या भवितुमर्हति। वियदादिसृष्टौ श्रुतिसिद्धायामसत्यत्वादर्शनात्—इति सूत्रार्थः। रथयोगाः - अश्वाः। **कर्तृत्वमाशङ्क्येति**। यथा अग्न्यंशस्य विष्फुलिङ्गस्याग्नेरिव दहनप्रकाशनसामर्थ्यमस्ति, तथा जीवस्य परमेश्वरांशत्वात्तद्वदेव जीवस्यापि स्वप्नादिसृष्ट्यनुकूलं सत्यसङ्कल्पत्वादिलक्षणं सामर्थ्यमस्ति, अतस्तस्य स्वप्नसृष्टौ कर्तृत्वं सम्भवतीत्याशङ्क्येत्यर्थः। सत्यं जीवस्य सत्यसङ्कल्पत्वादिकमस्ति, किं तु तत्तिरोहितं वर्तते संसारदशायाम्। अतो न सृष्ट्यादावुपयोगस्तस्य। तच्च तिरोहितमैश्वर्यं परस्य-बिम्बभूतेश्वरस्य अभिध्यानादीश्वरसाक्षात्कारपर्यन्तात्तिरोधायकनिवृत्तावभिव्यज्यते। ईश्वरध्यानादभिव्यक्तौ हेतुमाह—तत इति। हि - यस्मात् कारणात् ततः - ईश्वरादज्ञातात् बन्धोऽस्य जीवस्य, तत एव ज्ञातात् बन्धविपर्ययः ऐश्वर्याविर्भावः - इति सूत्रार्थः। सदपीत्यत्र हेतुः—ईश्वराभिन्नत्वादिति। जन्तोः - जीवस्य सत्यसङ्कल्पत्वादिलक्षणैश्वर्याविर्भावार्थं यतमानस्य श्रवणमननात्मकं विचारमनुतिष्ठतः क्रमेण परं परमेश्वरं-अभेदेन ध्यायतः कस्यचिदेवप्रतिबन्धरहितस्य श्रवणमननध्यानानुष्ठानजनितात् ईश्वरप्रसादात् संसिद्धस्य-अप्रतिबद्धपरमेश्वरसाक्षात्कारवतः (इत्यर्थः।)

दृक्छक्तिः औषधवीर्यात् ईश्वरप्रसादात्संसिद्धस्य कस्यचिदेवाविर्भवति, न स्वभावत एव सर्वेषां जन्तूनाम्' इति तत्सूत्राभिप्रायं वर्णयन् भाष्यकारश्च मुक्तस्य स्वप्नसृष्ट्याद्युपयोगिसत्यसङ्कल्पत्वाद्यभिव्यक्त्यङ्गीकारेण परमेश्वरभावापत्तिं स्पष्टीचकार।

फलाध्यायेऽपि 'स्वेन रूपेणाभिनिष्पद्यते' [छा. उ. ८-३-४] इति मुच्यमानविषयायां

तिमिरेण-रोगविशेषेण तिरस्कृता दृशःचक्षुषश्शक्तिर्यथा औषधवीर्यादाविर्भवति, तथेत्यर्थः। **न स्वभावत एवेति।** यथोक्तसाधनसम्पत्तिं विनेत्यर्थः। **अभिव्यक्त्यङ्गीकारेणेति।** ईश्वरभावापत्तिं विना मुक्तस्य सत्यसङ्कल्पत्वाद्यभिव्यक्तिर्न सम्भवतीत्यर्थः।

अत्रेदं विचार्यते—किं प्रतिबिम्बत्वविशिष्टचैतन्यरूपजीवगतस्य सत्यसङ्कल्पत्वादेः मुक्तावाविर्भावः प्रतिपाद्यते, किं वा बिम्बत्वविशिष्टचैतन्यरूपेश्वरगतस्य। नाद्यः। ईश्वरगतसत्यसङ्कल्पत्वाद्यपेक्षया जीवे पृथक् सत्यसङ्कल्पत्वादिसत्त्वे प्रमाणाभावात्। न हीश्वरस्येव जीवस्यापि पृथक् तत्सत्त्वप्रतिपादकं शास्त्रमस्ति। न च जीवस्येश्वराभिन्नत्वात्तत्समानधर्मवत्त्वमनुमातुं शक्यते। लोके बिम्बमुखाभिन्नस्यापि प्रतिबिम्बमुखस्य बिम्बवत् अवदातत्वादिधर्मादर्शनेन व्यभिचारात्, तत्त्वसाक्षात्कारादविद्यानिवृत्तौ अविद्यानिरूपितप्रतिबिम्बत्वस्यापि निवृत्त्या प्रतिबिम्बजीवाश्रितसत्यसङ्कल्पत्वादेरवस्थानस्यैवाभावेन मुक्तौ तदभिव्यक्त्यसम्भवात्, बन्धदशायामावृतस्य सत्यसङ्कल्पत्वादेरुपयोगाभावस्य स्पष्टतया जीवे पृथक्तत्कल्पनवैयर्थ्याच्च। न च-बन्धदशायामेव सगुणविद्याफलभूतावान्तरमुक्तौ सत्यसङ्कल्पत्वादेरुपयोगोऽस्तीति न तद्वैयर्थ्यं - इति वाच्यम्। तत्रापि ईश्वरसमानसत्यसङ्कल्पत्वाद्यभिव्यक्त्यनभ्युपगमेन जीवे तत्समानैश्वर्यस्य तिरोहितस्य कल्पनावैयर्थ्यात्। तस्मात् प्रतिबिम्बचैतन्यरूपजीवे पृथक् सत्यसङ्कल्पत्वादिकल्पनं प्रमाणप्रयोजनशून्यम्। तथा 'बिम्बभूतेश्वरगतं सत्यसङ्कल्पत्वाद्यैश्वर्यं बन्धदशायां जीवान्प्रति जीवाविद्याभिस्तिरोहितं सत् ईश्वरसाक्षात्कारात् मुक्तौ तेषामभिव्यज्यते' इति द्वितीयपक्षोऽप्यनुपपन्नः। सत्यसङ्कल्पत्वादिविशिष्टेश्वरस्याविद्यावृतत्वे मानाभावात्। न च 'इदानीमहं सत्यसङ्कल्पत्वादिगुणक ईश्वरोऽस्मि' इत्यनुभवाभावात् तद्विशिष्टेश्वरस्यावृतत्वं कल्प्यत-इति वाच्यम्। प्रतिबिम्बजीवानां बिम्बभूतेश्वरस्य च कल्पितभेदाभ्युपगमे तत एव जीवस्य जीवान्तरसाक्षात्काराभाववदीश्वरसाक्षात्काराभावोपपत्त्या तद्विशिष्टेश्वरस्य आवृतत्वकल्पनावैयर्थ्यात्, विशिष्टेश्वरस्यावृतत्वकल्पने विशिष्टावारकाविद्यानिवर्तकज्ञानासम्भवेन तदनिवृत्तिप्रसङ्गाच्च, तत्त्वमस्यादिवाक्यजन्यज्ञानस्य शुद्धचिन्मात्रगोचरस्य तद्विशिष्टेश्वरविषयकत्वाभावेन विशिष्टावरणानिवर्तकत्वात्, अविद्यायाश्शुद्धचिन्मात्रावारकत्वाश्रयणे च सत्यसङ्कल्पत्वाद्यैश्वर्यस्य अविद्यया तिरोधानासिद्धेश्च। न च जीवस्य स्वकीयत्वेनेश्वरगतसत्यसङ्कल्पत्वाद्यप्रतीतिरेवात्र तिरोधानं विवक्षितं इति वाच्यम्। तथासति तदुत्तरसूत्रे तिरोधानस्य अविद्याप्रयुक्तावरणरूपत्वप्रतिपादनविरोधात्। तस्मात् ईश्वरगतसत्यसङ्कल्पत्वाद्यैश्वर्यस्य जीवाविद्यातिरोहितत्वं ऐश्वर्यतिरोधानस्य तत्त्वसाक्षात्कारनिवर्त्यत्वं चाभ्युपेत्य 'पराभिध्यानात्' इति सूत्रतद्भाष्ययोः प्रवृत्तिरिति वक्तव्यम्। उक्तं चास्य सूत्रस्य अभ्युपेत्यवादत्वं सर्वज्ञात्ममुनिभिः, तेषां वचनं मूल एवोदाहरिष्यते—इति मुक्तस्येश्वरभावापत्तौ नैतत्सूत्रादिकमपि मान-

श्रुतौ केन रूपेणाभिनिष्पत्तिर्विवक्षिता इति बुभुत्सायां 'ब्राह्मेण जैमिनिरुपन्यासादिभ्यः' [ब्र. सू. ४-४-५] इति सूत्रेण यत् ब्राह्मं रूपमपहतपाप्मत्वादि सत्यसङ्कल्पत्वाद्यवसानं सर्वज्ञत्वसर्वेश्वरत्वादि च तेनाभिनिष्पत्तिः 'य आत्मापहतपाप्मा' [छा. उ. ८-७-१३] इत्याद्युपन्यासेन 'स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा' [छा. उ. ८-१२-३] इत्याद्यैश्वर्यावेदनेन च-इति जैमिनि-मतं, 'चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः' [ब्र. सू. ४-४-६] इत्यनन्तरसूत्रेण 'एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' [बृ.उ. ४-५-१३] इत्यादिश्रुत्या चैतन्यमात्र-मात्मस्वरूपमित्यवगतेः तन्मात्रेणाभिनिष्पत्तिः—इति मतान्तरं चोपन्यस्य 'एवमप्युपन्यासात् पूर्व-भावादविरोधं बादरायणः' [ब्र. सू. ४-४-७] इति सिद्धान्तसूत्रेण 'वस्तुदृष्ट्या चैतन्यमात्रत्वेऽपि पूर्वोक्तगुणकलापस्य उपन्यासाद्यवगतस्य मायामयस्य बद्धपुरुषव्यवहारदृष्ट्या सम्भवात् न श्रुतिद्वय-विरोधः' इति अविरोधं वदन् सूत्रकारः, सूत्रत्रयमिदमुक्तार्थपरत्वेन व्याकुर्वन् भाष्यकारश्च, मुक्तस्ये-

---

मित्यस्वरसादाह—**फलाध्यायेऽपीति** । **केन रूपेणेति** । किं सर्वज्ञत्वसर्वेश्वरत्वापहतपाप्मत्वादिगुणविशिष्टेन रूपेण मुक्तोऽवतिष्ठते, किं वा शुद्धचिन्मात्ररूपेणैवावतिष्ठते, अथवा द्विविधेन रूपेण? इति जिज्ञासायां सत्यामित्यर्थः । **उपन्यासेनेति** । उद्देशरूपवाक्यजातेनेत्यर्थः । 'य आत्माऽपहतपाप्मा' इत्युपक्रम्य 'सोऽन्वेष्टव्यः' इति विचा-रविधानात् । तथा 'एष सर्वेश्वरः' इत्याद्युपक्रम्य 'तमेतं यज्ञादिना विविदिषन्ति' इति तद्वेदने यज्ञादिविधानात् । उपन्यासग्रहणं सर्वज्ञत्वादिव्यपदेशस्याप्युपलक्षणम् । तथा च सर्वज्ञत्वादिव्यपदेशः—'यस्सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः' [मु.उ.१-१-९] इत्यादिः । व्यपदेशो नाम यो वाक्यसन्दर्भः उद्देशरूपो न भवति विधिरूपश्च न भवति स एव । सर्वज्ञत्वादिसन्दर्भश्च नोद्देशरूपः, विधेयानुपलम्भात् । नापि विधिः । यच्छब्दघटितत्वेन अनु-वादत्वप्रतीतेः । तथा च 'मुक्तो ब्राह्मेण वास्तवेन धर्मजातेन युक्तोऽवतिष्ठते । कुतः । उपन्यासव्यपदेशवि-धिभ्यःतस्य ब्रह्माभिन्नस्य तद्रूपयुक्तत्वावगमात्' इति सूत्रार्थः । सः-मुक्तः तत्र—प्रकृते ब्रह्मणि स्थितः जक्षत्—हसन् । **ऐश्वर्यावेदनेनेति** । अज्ञातस्य ऐश्वर्यस्य आवेदनेन ज्ञापकेन-विधिवाक्येनेति यावत् । अज्ञातज्ञापकवाक्यस्यापि उत्पत्तिविधित्वस्वीकारात् । चितितन्मात्रेण - चितिः - चैतन्यं, चैतन्यमात्ररूपेणैव मुक्तोऽवतिष्ठते इत्यर्थः । यथा लवणपिण्डो बहिरन्तश्च लवणैकरसः, एवमेव अरे-मैत्रेयि प्रकृत आत्मा शरीराद्यन्तस्तद्बहिश्च चैतन्यैकस्वभावः—इति श्रुत्यर्थः । **तन्मात्रेणेति** । मुक्तौ ब्रह्माभेदेन विद्यमानस्य न कश्चिद्धर्मोऽस्ति, ब्रह्मस्वरूपे मुक्ते उपन्यासाद्यवगतगुणैश्वर्यादीनां श्रुतितात्पर्यविषयत्वाभावेन तुच्छत्वात् - इतितात्पर्यकमौडुलोमिमतम् । इदं च मतद्वयं पूर्वपक्षः । सूत्रं व्याचष्टे—**वस्तुदृष्ट्येति** । परमार्थत इत्यर्थः । जैमिनिमत इव गुणकलापस्य वास्तवत्वानभ्युपगमात् न चिन्मात्रप्रतिपादकश्रुतिविरोधः, औडुलोमिमत इव गुणकलापस्य तुच्छत्वानभ्युप-गमात् न गुणकलापादिश्रुतीनां निर्विषयत्वापत्तिरूपोऽपि विरोधोऽस्तीत्यर्थः । 'एवमपि' इति सौत्रभागेन मुक्तस्य चिन्मात्रत्वमुपेत्य उपन्यासाद्यवगतगुणकलापादेरपि 'पूर्वभावात्' इत्यनेन सौत्रभागेन मुक्तात्मन्यङ्गीकृतत्वात्,

श्वरभावापत्तिं स्पष्टमनुमेने। भामतीनिबन्धप्रभृतयश्च श्रुत्युपबृंहितमिदं सूत्रजातं भगवतो भाष्यकारस्य उदाहृतं वचनजातं च तथैवान्ववर्तन्त।

ईश्वरभावापत्तिं विना मुक्तस्य गुणकलापादेरयोगात् तस्येश्वरभावापत्तिः सूत्रे भातीत्यर्थः। अस्यार्थस्य भाष्यादिकमपि न प्रतिकूलं, किं त्वनुकूलमेवेत्याह—**सूत्रत्रयमित्यादिना।**

अत्रेदं विचार्यते— मुक्तस्येश्वरभावापत्तिस्वीकारे बिम्बभूतेश्वरस्य साधकानुग्रहार्थं मायामयशरीराङ्गीकारेण मुक्तोऽपि शरीर्येव स्यात्। अन्यथा 'क्रीडन् रममाणः' इत्यादिश्रुतिसिद्धैश्वर्ययोगात्। तथा च 'अशरीरं वाव सन्तं' [छा. उ.८-१-२१] इति श्रुत्या मुक्तस्याशरीरत्वप्रतिपादनं विरुद्ध्येत। 'कथमिदं अशरीरत्वं सम्भवति' इत्याकाङ्क्षायां विद्यासामर्थ्यात् परब्रह्मप्राप्तौ सत्यां तत्सम्पद्यते नान्यथा इति प्रतिपादनार्थं अशरीरत्वप्रतिपादकवाक्यानन्तरं 'परं ज्योतिरुपसम्पद्य' इतिवाक्यं—इति प्रतिपादकं ज्योतिरधिकरणभाष्यं च विरुद्ध्येत। परब्रह्मप्राप्त्यनन्तरमपि सशरीरत्वाभ्युपगमात्। तथा च तदधिकरणभाष्यम्—"'अशरीरं वाव सन्तम्' इति च अशरीरतायै ज्योतिस्सम्पत्तेः अस्याभिधानात्, ब्रह्मभावाचान्यत्राशरीरत्वानुपपत्तेः" इति। ज्योतिरत्र ब्रह्म विवक्षितम्। किञ्च मुक्तस्य सर्वज्ञत्वाद्यभ्युपगमे 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' इत्यादिना तस्य विशेषविज्ञानाभावप्रतिपादनं विरुद्ध्येत। इदं च वचनं परममुक्तिविषयमिति 'स्वाप्ययसम्पत्त्योः' [ब्र. सू. ४. ४. १६] इति सूत्रतद्भाष्यादौ स्पष्टम्।

किञ्च सर्वेश्वरभावं प्राप्तस्य मुक्तस्य तद्भावापत्तिदशायां सगुणविद्याफलभूतेश्वरभावापत्तिदशायामिव 'योऽहं पूर्वं संसार्यभूवं सोऽहमिदानीमीश्वरस्सम्पन्नः' इति प्रतिसन्धानं अभ्युपगम्यते, न वा। नाद्यः। पूर्वोपाधेर्निवृत्तत्वेन तथाऽनुसन्धानासम्भवात्, उपाध्यैक्यस्य अनुसन्धानप्रयोजकशरीरप्रविष्टत्वात्। न द्वितीयः। ईश्वरभावापत्तौ केवलस्वरूपेणैवावस्थानापेक्षया मुक्तस्य फलतो विशेषाभावेन तद्भावापत्त्युपपादनस्यानतिप्रयोजनत्वापत्तेः। तस्मात् मुक्तस्येश्वरभावापत्तिप्रतिपादनं 'यत्र त्वस्य' इत्यादिश्रुतिविरुद्धं तदनुसारिबहुभाष्यादिविरुद्धं प्रयोजनशून्यं चेति सिद्धम्। अत एव न्यायरक्षामणौ आविर्भूतस्वरूपस्य सत्यकामत्वसर्वेश्वरभावापत्तौ अत्र साधितायां यथोक्तमस्वरसं मनसि निधाय मुक्तानां शुद्धचैतन्यभावापत्तिः तत्पक्षे जक्षणाद्यैश्वर्योपपत्तिश्च दर्शिता दीक्षितैरेव 'मुक्तानां यावत्सर्वमुक्ति बिम्बेश्वरभावापत्तिरस्ति इत्यस्माभिः सिद्धान्तलेशसङ्ग्रहे समर्थितत्वेन आविर्भूतस्वरूपस्य सत्यकामत्वं सत्यसङ्कल्पत्वं चोपपद्यते। तस्य शुद्धचैतन्यभावापत्तावपि तत्सर्वमुपपद्यत एव। शुद्धचैतन्यस्य जीवेश्वरानुस्यूतचैतन्यसामान्यात्मना अवस्थानात्। अत एव साक्षात्कृतब्रह्मणां यावत्सर्वमुक्ति सर्वात्मतापत्तिरस्तीति वामदेवस्य मनुसूर्यादिभावापत्तिःश्रूयते। एवं च मुक्तस्य सार्वभौमादिमानुषात्मना इन्द्रादिलोकपालात्मना दहराद्युपासनाफलानुभवितृपुरुषात्मना च जक्षणादिकं सर्वलोककामावाप्तिमत्त्वं ब्रह्मलोकसमाहितसत्यकामानुभवितृत्वं च व्यपदेष्टुं शक्यमिति जक्षणादिश्रवणमप्युपपद्यते" इत्यादिग्रन्थेन। तथा च तदनुसारेण प्रकृतसूत्रभाष्यादौ ब्राह्मस्यैश्वर्यस्य मुक्तजीवगतत्वाङ्गीकरणं - मुक्तस्य ब्राह्मेण रूपेणावस्थानाभ्युपगमेऽपि जैमिनिमत इव

न च श्रुत्युपबृंहितस्य एतावतः सूत्रभाष्यवचनजातस्य 'ऐश्वर्यमज्ञानतिरोहितं सत् ध्यानादभिव्यज्यत इत्यवोचत्। शरीरिणः सूत्रकृदस्य यत्तु तदभ्युपेत्योदितमुक्तहेतोः।' [सं. शा. ३-१७५] इति संक्षेपशारीरकोक्तरीत्या अभ्युपेत्यवादत्वं युक्तं वक्तुम्। तस्मान्मुक्तानामीश्वरभावापत्तेरवश्याभ्युपेयत्वात् एतदसंभव एव प्रतिबिम्बेश्वरवादे दोषः। तदाहुः कल्पतरुकाराः—'न मायाप्रतिबिम्बस्य विमुक्तैरुपसृप्यता [कल्पतरुः १-४-३] इति। एतदसम्भवश्च एकजीववादपारमार्थिकजीवभेदवादयोरपि दोषः।

यत्तु कैश्चित्[1] द्वैतिभिरुच्यते—भेदस्य पारमार्थिकत्वेन मुक्तौ जीवस्येश्वरभावाभावेऽपि तत्रापीश्वर इव पृथगपहतपाप्मत्वादिगुणसम्भवादविरोध इति, तत्तुच्छम्— तथासति जीवस्यापहतपाप्मत्वादिकमस्तीति न तस्य ब्रह्मलिङ्गत्वमिति शङ्कापरिहारालाभेन 'उत्तराच्चेदाविर्भूत-

---

सिद्धान्ते नाद्वैतविरोधः, तस्य रूपस्य बद्धजीवान्तराविद्याकृतत्वाभ्युपगमात् - इत्येतावन्मात्रपरं, न तु मुक्तस्येश्वरभावापत्तिपरमिति सङ्क्षेपः।

ननु अध्यायचतुष्टयेऽप्युदाहृतश्रुतिसूत्रभाष्यादिग्रन्थजातस्य सर्वज्ञात्ममुनिभिः उक्तयुक्तिभिः प्रौढिवादत्वप्रतीतेः कथं मुक्तस्येश्वरभावापत्तौ एतच्छ्रुत्यादिकं प्रमाणं स्यादित्यत आह—**न चेति**। 'एतावतः' इत्यनेन बहुश्रुतिसूत्रभाष्यादिविरोधात् सङ्क्षेपशारीरकमतं हेयमिति सूचितम्। अस्य-शरीरिणः तत्-सत्यसङ्कल्पत्वादिलक्षणमैश्वर्यं उपेत्य मुक्तौ ध्यानादभिव्यज्यत इत्युदितं-उक्तं सूत्रकृता इत्यर्थः। अभ्युपेत्यवादत्वे हेतुमाह—**उक्तहेतोरिति**। मुक्तस्येश्वरभावापत्तिप्रमाणत्वेनोदाहृतश्रुतिभाष्यादिकं व्याख्याय अन्ते अस्वरसादिरूपेण मुक्तस्येश्वरभावापत्तिं प्रत्यनुपपत्तिरूपा या युक्तयोऽस्माभिः प्रदर्शिताः तास्सर्वा अप्यत्र उक्तहेतोरित्यनेन विवक्षिता इति बोध्यम्। **तस्मादिति**। उक्तप्रमाणबलादित्यर्थः। मुक्तस्येश्वरभावापत्तिरेतच्छब्दार्थः। उपसृप्यता-प्राप्यता। **एकेति**। एकजीववादे एतदसम्भवः प्रागेव दर्शितः। **पारमार्थिकेति**। 'पारमार्थिको जीवेश्वरयोर्भेदः' इति वादेऽपि मुक्तस्येश्वरभावापत्त्यसम्भवो दोष इत्यर्थः। एतदुपलक्षणम्। शुद्धब्रह्मरूपेणावस्थानलक्षणमुक्त्यसम्भवोऽपि पारमार्थिकजीवेशभेदवादे दोष इति बोध्यम्।

ननु - 'प्रजापतिविद्यायां मुक्तस्यापहतपाप्मत्वादिगुणाष्टकं प्रतिपाद्यते, तच्च मुक्तस्येश्वरभावापत्त्यनभ्युपगमे न सम्भवतीति तस्य तद्भावापत्तिरेष्टव्या। सा च पारमार्थिकजीवभेदवादे न सम्भवति' इति खलु तवाभिप्रायः। स चानुपपन्नः। भेदपक्षेऽपि श्रुतिसूत्राभ्यां निरूपितस्य मुक्ते गुणकलापस्य मुक्तस्येश्वरभावापत्त्या विनाऽपि सम्भवात्-इति द्वैतिनां मध्ये केचिच्छ्रुतिसूत्रव्याख्यातारः। तेषां मतमनूद्य दूषयति—**यत्त्वित्यादिना**। **तत्रापीति**। मुक्तजीवेऽपीत्यर्थः। **तथासतीति**। जीवस्य पृथगपहतपाप्मत्वाद्यभ्युपगमे सतीत्यर्थः। इति या शङ्का 'उत्तराच्चेत्' इति सूत्रभागेन कृता, तस्याः 'आविर्भूतस्वरूपस्तु' इति परिहारभागेन मुक्तजीवे गुणाष्टकाविर्भाव-

---

1. द्वैतिभिः उच्यते - विशिष्टाद्वैतिभिः दहराधिकरणे उच्यते।

स्वरूपस्तु' [ब्र. सू. १-३-१९] इति सूत्रविरोधात् 'ब्राह्मेण जैमिनिः' [ब्र. सू. ४-४-५] इति सूत्रे जीवगतस्यापहतपाप्मत्वादेः 'उपन्यासादिभ्यः' [ब्र. सू. ४-४-६] इत्यत्रादिशब्दार्थत्वेन परेषामप्यभिमतस्य 'जक्षत् क्रीडन् रममाणः' [छा.उ.८-१२-३] इत्यादिश्रुत्युदितस्य जक्षणादेश्च ब्राह्मत्वनिर्देशविरोधाच्च। भेदे तेषां गुणानां सत्यत्वेन 'चितितन्मात्रेण' [ब्र. सू. ४-४-६] इति सूत्रोक्तस्य मुक्तजीवानां चैतन्यमात्रत्वस्य 'एवमपि' [ब्र. सू. ४-४-६] इति सिद्धान्तसूत्रेऽङ्गीकारविरोधाच्च। 'सम्पद्याविर्भावः' [ब्र. सू. ४-४-१] इत्यधिकरणविरोधाच्च। तत्र हि 'स्वेन रूपेणाभिनिष्पद्यते' [छा.उ. ८-३-४] इति श्रुतौ आगन्तुना केनचिद्रूपेणाभिनिष्पत्तिर्नोच्यते। स्वेन-शब्दवैयर्थ्यापत्तेः। येन रूपेण आगन्तुना स्वयमभिनिष्पद्यते तस्यात्मीयत्वस्यावक्तव्यत्वात्। तस्मादात्मवाचिस्वशब्दोपादानात् नित्यसिद्धेन स्वस्वरूपेणैव अभिनिष्पत्तिर्विवक्षिता न तु केन-चिद्धर्मेणेति व्यवस्थापितम्।

कथनेऽपि परिहारालाभादित्यर्थः। तथा च मुक्तब्रह्मणोर्भेदपक्षे गुणकलापस्य जीवसाधारणस्य ब्रह्मासाधारणत्वरूप-ब्रह्मलिङ्गत्वालाभात् दहराकाशस्य ईश्वरत्वनिर्णायकं गुणाष्टकं न स्यात् इति भावः। भेदपक्षे मुक्तजीवगतस्य अपहत-पाप्मत्वादेः ब्राह्मत्वनिर्देशविरोधश्च इत्याह—**ब्राह्मेणेति**। ननु भेदिनां मते मुक्तगतापहतपाप्मत्वादेर्जक्षणाद्यैश्वर्यस्य च ब्राह्मत्वमसिद्धम्, अत आह—**परेषामपीति**। **भेदे इति**। जीवब्रह्मभेदपक्षे वास्तवगुणवतो जीवस्य चिन्मात्रत्वायोगात् इति भावः। किं च, किं गुणजातं मुक्तावुत्पद्यते किं वा नित्यसिद्धं इति विकल्पं मनसि निधाय आद्यनिराकरणपूर्वकं द्वितीयं परिशेषयति—**सम्पद्याविर्भाव इत्यादिना**। **तत्र हीति**। सम्पद्याधिकरणे हि इत्यर्थः। 'स्वेन रूपेणाभिनिष्पद्यते' इत्यनेन मुक्तिरभिधीयते। सा किमागन्तुकस्य स्वरूपस्योत्पत्तिरेव स्वर्गा-दिरूपोत्पत्तिवद्विवक्षिता, किं वा आत्मस्वरूपस्यैव विद्ययाऽविर्भावमात्ररूपा विवक्षिता, इति संशये मुक्तेरपि स्वर्गादिवत् फलत्वात् तद्वदेव आगन्तुकातिशयरूपनिष्पत्तिर्मुक्तिरिति पूर्वपक्षनिषेधपूर्वकं सिद्धान्तमाह—**आगन्तुनेत्यादिना**। कथं तद्वैयर्थ्यम्, अत आह—**येनेति**। स्वर्गाद्यागन्तुकरूपवत् यत् मुक्तिलक्षणं रूपमुत्पद्यते मुक्तस्य, तत् स्वशब्देनानुक्तावपि स्वीयमेव भवति। अतःस्वशब्दस्य स्वीयवाचित्वे वैयर्थ्यमेवेत्यर्थः। **तस्मादिति**। 'आगन्तुकरूपाभिनिष्पत्तिर्मुक्तिः' इति पक्षे स्वशब्दस्य स्वकीयार्थकताया एव वक्तव्यत्वेन उक्तरीत्या तद्वैयर्थ्यापत्ते-रित्यर्थः। **आत्मेति**। स्वकीय इव स्वस्वरूपेऽपि स्वशब्दस्य रूढत्वेन नानार्थत्वे सति स्वकीयार्थकत्वस्य प्रकृते असम्भवात् आत्मस्वरूपवाचित्वं निश्चितमिति भावः। इदमेव अत्र आत्मवाचिस्वपदोपादानप्रयोजनं-यत् मुक्तेस्स्वर्गादिवत् आगन्तुकरूपत्वनिराकरणम्, अन्यथा आत्मवाचिस्वपदवैयर्थ्यादेवेति बोध्यम्।

सत्यसङ्कल्पत्वादिरूपस्य 'स्वेन रूपेण' इत्यत्र मुक्तित्वेनाभिमतस्य आगन्तुकत्वपक्षे तदागन्तुकत्व-निषेधाधिकरणविरोधवत् तस्य बन्धदशायां तिरोधानप्रतिपादकसूत्रेण मुक्तिदशायामाविर्भावप्रतिपादकसूत्रेण

किञ्चेदमपहतपाप्मत्वादि जीवस्य मुक्तावागन्तुकं चेत्, 'सम्पद्याविर्भावः' [ब्र. सू. ४-४-१] इति मुक्तावागन्तुकरूपनिषेधेन 'पराभिध्यानात्तु तिरोहितम्' [ब्र. सू. ३-२-५] 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' [ब्र. सू. १-३-१९] इति अपहतपाप्मत्वादेर्बन्धमुक्त्योस्तिरोभावाविर्भावप्रतिपादनेन च विरोधः स्यादिति नित्यसिद्धं वाच्यमिति बन्धस्य मिथ्यात्वं दुर्वारम्।

नित्यसिद्धमपहतपाप्मत्वं हि सर्वदा पाप्मरहितत्वम्। न च वस्तुतः सर्वदा पाप्मरहिते पाप्मसम्बन्धः तन्मूलककर्तृत्वभोक्तृत्वसम्बन्धो वा पारमार्थिकः सम्भवति। एवं च जीवस्येश्वराभेदोऽपि दुर्वारः। श्रुतिबोध्यतदभेदविरोधिबन्धस्य सत्यत्वाभावात्। अन्यथा संसारिणि नित्यसिद्धसत्यसङ्कल्पतिरोधानोक्त्ययोगाच्च। न हि जीवस्य संसारदशायामनुवर्तमानो यत्किञ्चिदर्थगोचरः कश्चिदस्त्यवितथसंकल्पः तिरोहित इति परैरपीष्यते। किं त्वीश्वरस्य यन्नित्यसिद्धं निरवग्रहं सत्यसंकल्पत्वं तदेव जीवस्य संसारदशायामीश्वराभेदानभिव्यक्त्या स्वकीयत्वेनानवभासमानं तं प्रति तिरोहितमित्येव समर्थनीयमिति घट्टकुटीप्रभातवृत्तान्तः।

च विरोधो भवेत्, मुक्तावभिनवतयोत्पद्यमानस्य उक्ततिरोधानाविर्भावयोरयोगादित्याह—**किञ्चेदमिति**। द्वितीयविकल्पपरिशेषस्य फलमाह—**इति बन्धस्येति**। अपहतपाप्मत्वादेरीश्वर इव जीवेऽपि नित्यसिद्धत्वादिति इतिशब्दार्थः।

तदेवोपपादयति—**नित्यसिद्धमिति। तन्मूलेति**। पाप्मसम्बन्धमूलकेत्यर्थः। **एवञ्चेति**। बन्धस्य मिथ्यात्वे सतीत्यर्थः। ननु किं बन्धस्य मिथ्यात्वसाधनेन? तस्य सत्त्वेऽपि जीवब्रह्माभेदबोधनसम्भवात् इति भास्करमतमाशङ्क्याह—**श्रुतीति**। बन्धस्य सत्यत्वमते परमात्मगतनित्यमुक्तत्वस्यापि सत्यत्वेन परमार्थभूतविरुद्धधर्माक्रान्तयोर्जीवब्रह्मणोर्दहनहिमयोरिव श्रुतिबोध्याभेदासम्भवादित्यर्थः। **अन्यथेति**। बन्धस्य मिथ्यात्वस्वीकारपूर्वकं जीवब्रह्मणोरभेदानङ्गीकार इत्यर्थः। कुतस्तिरोधानोक्त्ययोग इति चेत्, तत्र वक्तव्यं—किं जीवगतस्य नित्यसिद्धसत्यसङ्कल्पत्वादेःतिरोहितत्वं 'पराभिध्यानात्' इति सूत्रेणाभिधीयते, किं वा ईश्वरगतस्यैव जीवं प्रति तेन तिरोहितत्वमभिधीयते। नाद्य इत्याह—**न हीति**। यत्किञ्चिदर्थगोचरोऽपि सत्यसङ्कल्पः तिरोहितोऽस्तीति नेष्यते, सर्वार्थगोचरसत्यसङ्कल्पः तिरोहितोऽस्तीति नेष्यत इति किमु वक्तव्यमित्यर्थः। अद्वैतिभिरिव इत्यपिशब्दार्थः। न हि सिद्धान्ते 'प्रतिबिम्बचैतन्यरूपेषु जीवेषु बिम्बचैतन्यरूपेश्वरगतसत्यसङ्कल्पत्वाद्यपेक्षया पृथक् सत्यसङ्कल्पत्वादिकं संसारदशायां तिरोहितमस्ति' इति इष्यते। तत्र प्रमाणप्रयोजनयोरभावात्। एतच्च प्रागेवास्माभिर्दर्शितम्। द्वितीये तु कल्पे दूरं गत्वापि सिद्धान्तिमतमेवावलम्बनीयम्, तथा च न पारमार्थिकभेदसिद्धिरिति दूषणमाह—**किन्त्वीश्वरस्येति। ईश्वरेति**। बिम्बभूतेनेश्वरेण सह जीवस्य यो वास्तवाभेदः तदनभिव्यक्त्येत्यर्थः।

[1]ननु अपहतपाप्मत्वं न पाप्मविरहः, किं तु पाप्महेतुकर्माचरणेऽपि पापोत्पत्तिप्रतिबन्धकशक्तियोगित्वमिति, न तस्य नित्यसिद्धत्वेन बन्धस्य मिथ्यात्वप्रसङ्गः। एवं सत्यसंकल्पत्वमपि शक्तिरूपेण निर्वाच्यमिति नेश्वराभेदप्रसङ्गः- इति चेत्, मैवम् - एवं शब्दार्थकल्पने प्रमाणाभावात्। न हि पापजननप्रतिबन्धिका शक्तिः संसाररूपपरिभ्रमणदशायां पापानुत्पत्त्यर्थं कल्पनीया। तदानीं तदुत्पत्तेरिष्टत्वात्। विद्योदयप्रभृति तु विद्यामाहात्म्यादेवाश्लेषः 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्' [ब्र. सू. ४-१-१३] इति सूत्रेण दर्शितः। तत एव मुक्तावप्यश्लेष उपपद्यत इति व्यर्था शक्तिकल्पना। तस्मादुदाहृतश्रुतिसूत्रानुसारिभिः मुक्तजीवानां यावत्सर्वमुक्ति वस्तुसच्चैतन्यमात्रत्वाविरोधिबद्धपुरुषाविद्याकृतनिरवग्रहैश्वर्यतदनुगुणगुणकलापविशिष्टनिरतिशयानन्दस्फुरणसमृद्धनिस्सन्धिबन्धपरमेश्वरभावापत्तिरादर्तव्येति सिद्धम्॥

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलेरस्त्यप्पदीक्षित इति प्रथितस्तनूजः॥

तन्त्राण्यधीत्य सकलानि सदाऽवदातव्याख्यानकौशलकलाविशदीकृतानि।
आम्नायमूलमनुरुद्ध्य च सम्प्रदायं सिद्धान्तभेदलवसङ्ग्रहमित्यकार्षीत्॥

जीवब्रह्मणोरभेदापत्तिभयात् जीवे पृथगेवापहतपाप्मत्वादिकं स्वीकृत्य तस्य वास्तवबन्धाविरुद्धत्वं शङ्कते— **नन्विति**। किञ्च, निषिद्धकर्माचरणेऽपि पापोत्पत्तिप्रतिबन्धकशक्तिः अपहतपाप्मशब्दार्थत्वेन कल्प्यमाना किं विद्योदयात् प्राक् तत्प्रतिबन्धार्थं कल्प्यते, किं वा विद्योदयानन्तरं त्वदभिमतमुक्तेः प्राक् तत्प्रतिबन्धार्थं कल्प्यते, अथवा त्वदभिमतमुक्तिकाले मुक्तस्य देहेन्द्रियादिसत्त्वेन पाप्महेतुनिषिद्धकर्माचरणसम्भवात् तदा तत्प्रतिबन्धार्थं कल्प्यते, इति विकल्पं मनसि निधाय क्रमेण दूषयति— **न हीत्यादिना**। **इष्टत्वादिति**। तवापि सम्मतत्वादित्यर्थः। तस्य - ब्रह्मणः अधिगमे - साक्षात्कारे सति विद्योदयात् पूर्वाघस्य विनाशो भवति, तदुदयोत्तरकालीनाघस्य च अश्लेषो भवति। कुतः। तस्य-विद्ययाऽघविनाशादेःश्रुतिस्मृतिषु व्यपदेशात्-श्रुत्यादिसिद्धत्वात् इत्यर्थः। मुक्तस्येश्वरभावापत्तिमुपपादितामुपसंहरति— **तस्मादिति**। उदाहृतश्रुतिसूत्रभाष्यादिस्वारस्यादित्यर्थः। अविरोधित्वमैश्वर्यविशेषणम्। **तदनुगुणेति**। ऐश्वर्यानुगुणेत्यर्थः। समृद्धत्वमीश्वरभावापत्तिविशेषणम्।

---

1. नन्वित्यादिशङ्का यादवप्रकाशमतेन। अयं च तन्मताभिप्रायः संपद्याविर्भावाधिकरणे अन्ते श्रुतप्रकाशिकायां उपपादितः।

सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथाऽपि लिखितं यदि किञ्चिदस्य ।
संशोधने सहृदयास्सदया भवन्तु सत्सम्प्रदायपरिशीलननिर्विशङ्काः ॥

इति शास्त्रसिद्धान्तलेशसङ्ग्रहे चतुर्थः परिच्छेदः

समाप्तोऽयं ग्रन्थः

शिवाभ्यां नमः

श्रीकृष्णचरणद्वंद्वे सर्तॄणां मङ्गलप्रदे ।
योगिध्येये कृतिरियमलङ्कारार्थमर्पिता ॥

श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं सम्प्रणम्य च ।
व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्द-
सरस्वतीदिव्यश्रीचरणारविन्दसंलग्नरजोभूतस्याच्युत-
कृष्णानन्दतीर्थस्य कृतौ शास्त्रसिद्धान्त-
लेशसंग्रहव्याख्यायां कृष्णालङ्काराख्यायां
चतुर्थः परिच्छेदः समाप्तः**

॥ ॐ ॥

Office Bearers of the S. A. D. G. P. Samithi (Regd.)

SECUNDERABAD 26 (A.P.)

AS ON 31—3—1974

Hony. Patrons:

H. E. Viboothi Narain Sinha, Maharaja of Benares, Varanasi.
Sri Annam Viswanatha Rao, Hyderabad.
,, S. Balakrishna Joshi, Madras.
,, A. Doraiswamy Deekshither, Adayappalam.
,, P. S. Jagannatha Iyer, Madras.
,, K. Natesa Iyer, Madras.
,, M. Ramanatha Deekshither, Madras.

Office-bearers:

President:

Sri C. R. Pattabhi Raman, Barrister-at-Law.

Vice-Presidents:

Sri K. N. Anantha Raman, I.C.S. (Retd.).
,, AR. N. Ramaswamy Chettiar, Hyd'bad.
,, M. Nilakantan, Madras.
,, S. V. Narasimhan, Madras.
,, T. V. Viswanatha Ayyar, Madras.

Hony. Executive Secretary:

Sri Adayappalam Ramanathan, Sec'bad.

Hony. Joint Secretaries:

Sri Y. Krishnamoorthy, Madras.
,, Dr. K. Ramachandran, Madurai.
,, S. Nilakantan, Delhi.
,, N. S. Venkatakrishnan, Calcutta.

Hony. Treasurer:

T. Venugopal Reddy, Secunderabad.

Hony. Legal Advisor:

Sri T. Venugopal Reddy, Secunderabad.

Hony. Auditor:

Sri G. Vaidyanathan of M/s. G. V. N. Shankar & Co., Madras.

Local Finance Committee Members:

Sri K. N. Anantha Raman, I C.S. (Retd.).
,, C. E. Gupta.
,, AR. N. Ramaswamy Chettiar.
,, T. Venugopal Reddy.
,, Adayappalam Ramanathan (Secretary) (Ex-officio).

List of 116 Founder Members who also served in the First Board of Management for 5 years (1968—1973)

1. Sri K. N. Anantha Raman, I.C.S. (Retd.)
2. ,, H. Ananthanarayana Iyer, I.C.S. (Retd) Hyderabad.
3. ,, P. V. Anantharama Iyer, Hyderabad.
4. ,, S. Annadurai Iyengar, Kulitalai.
5. Dr. Aryendra Sarma, Hyderabad.
6. Sri W. Babiah, Secunderabad.
7. ,, V. Babu Rao, Hyderabad.
8. ,, K. Balasubramania Iyer, Madras.
9. ,, V. Balasubramanian, Hyderabad.
10. ,, V. Chandramouli, I.A.S., Nellore.
11. ,, M. N. Chandrasekara Sastrigal, Adayappalam.
12. ,, C. R. Chari, Secunderabad.
13. ,, Diwakarla Ramamoorthy, Vishakapatnam.
14. Dr. Diwakarla Venkata Avadhani, Hyderabad.
15. Sri M. A. Ekambaram, Sirpur.
16. ,, S. M. B. Eswara Iyer, Madras.
17. ,, P. K. Gopalakrishnan, Hyderabad.
18. ,, P. G. Gopalan, Secunderabad.
19. ,, R. Gopala Iyer, Hyderabad.
20. ,, C. E. Gupta, Seeunderabad.
21. ,, R. Kalyanasundaram, M dras.
22. ,, Kappaganthula Lakshmana Sastri, Hyderabad.

23. Sri E. G. Kotiswaran, Madras.
24. „ M. S. Kotiswaran, Secunderabad.
25. „ K. Y. Krishnamoorthy, Visakhapatnam.
26. „ P.G. Krishnamoorthy, Secunderabad,
27. „ Y. Krishnamoorthy, Madras.
28. Dr. T. N. Kumaraswamy Iyer, Vellore.
29. Sri A. Lakshminarayanan, Secunderabad.
30. Dr. P. G. Laley, Hyderabad.
31. „ Madhava Sastri, Kanchipuram.
32. „ B. Madhavan, Bombay.
33. Dr. T. M. P. Mahadevan, Madras.
34. Sri V. Mahalingam, Secunderabad.
35. „ B. V. V. S. Mani, Madras.
36. „ K. L. Manohar, Secunderabad.
37. „ C. P. Meenakshisundara Sastri, Coimbatore.
38. „ A. Nagaraja Iyer, Madras.
39. „ L. S. P. Nagarajan, Madras.
40. „ K. R. Nandagopal, Secunderabad.
41. „ S. V. Narasimham, Calcutta.
42. „ V. Narasimha Iyer, Secunderabad
43. „ R. Narayanaswamy, I. P. S., Warrangal
44. „ B. Natarajan, Itarsi
45. „ L. S. P. Natarajan, Seeunderabad
46. „ P. R. Natarajan, Madras
47. „ Neelam Raju Venkataseshaiah, Vijayawada
48. „ R. Nilakanta Iyer, Madras
49. „ M. Nilakantan, Secunderabad
50. „ K. Nilakantan, Madras
51. „ M. Nilakantan, Madras
52. „ S. Nilakantan, Delhi
53. „ D. G. Padhye, Hyderabad
54. „ L. S. Parthasarathy Iyer, Tiruchirapalli
55. „ C. R. Pattabhiraman, Madras
56. „ C. P. Pattabhiraman, Pondicherry
57. „ V. Pattabhirama Iyer, Arni
58. „ D. Pullela Sri Ramachandrudu, Hyderabad
59. Dr. V. Raghavan, Madras
60. Sri T. R. Raghava Sastrigal, Madras
61. „ K. Rajagopalan, Hyderabad
62. „ N. Raghunatha Iyer, Bangalore
63. „ N. Rajamani, Secunderabad
64. „ C. S. Ramachandran, I.C.S., New Delhi
65. „ R. Ramachandran, Secunderabad
66. Dr. K. Ramachandran, Madurai
67. Sri V. G. Ramachandran, New Delhi
68. „ K. Ramachandra Sarma, Madras
69. „ A. Ramakrishna Deekshitar, Madras
70. „ T. R. Ramakrishna Sastri, Madras
71. „ S. R. Ramamoorthy, I.A.S., Hyderabad
72. „ A. M. Ramanatha Deekshitar, Varanasi
73. „ A. A. Ramam, Calcutta
74. „ B. V. Raman, Madras
75. „ M. Ramaswamy, Hyderabad
76. „ N. Ramesan, I.A.S., Hyderabad
77. „ AR. N. Ramaswamy Chettiar, Hyderabad
78. „ M. Rangarajan, Avadi
79. „ A. Ramanathan, Secunderabad
80. „ D. Sankaraguruswamy, I.A.S., Hyderabad
81. „ S. Sankaran, Hyderabad
82. „ P. Sankaranarayanan, Madras
83. „ V. Seshadri, Hyderabad
84. „ P. A. Seshan, Madras
85. „ B. K. Seshu, Secunderabad
86. „ T. S. Shanmugasundara Mudaliar, Hyderabad
87. „ P. V. Sivarama Deekshitar, Madras
88. „ T. V. R. Somayajulu, Secunderabad
89. „ T. V. Srinivasan, Secunderabad
90. „ V. Srinivasan, I.P.S., Hyderabad
91. „ A. V. Subramaniam, Madras
92. „ K. V. V. Subramanyam, I.P.S., Hyderabad
93. „ K. R. Subrahmanyam, Hyderabad
94. „ K. S. Subramanpa Deekshitar, Pollachi
95. „ M. A. Subramanyan, Madurai

96. Sri P. S. Subramaniam, Hyderabad
97. ,, A. V. Sugavaneswaran, Bombay
98. Dr. P. K. Sundaram, Madras
99. Sri V. S. Sundararajan, Secunderabad
100. ,, M. Sundaresan, Secunderabad
101. ,, S. Sundaresan, I.A.S., New Delhi
102. ,, A. Swaminathan, New Delhi
103. ,, N. S. Swaminathan, Secunderabad
104. ,, C. R. Swaminathan, Katmandu
105. ,, T. S. Thirumalai, Madras
106. ,, R. Thyagarajan, Madras
107. Sri Vaidya Subramania Iyer, Madras
108. ,, Varanasi Ramamoorthy, ("RENU") Hyderabad
109. ,, A. J. Veeraswamy, Secunderabad
110. ,, Dr. Veezhinathan, Madras
111. ,, A. G. Venkatachari, Madras
112. ,, N. S. Venkatakrishnan, Calcutta
113. ,, T. Venugopal Reddy, Secunderabad
114. ,, K. R. Viswanatha Iyer, Kanchipuram
115. ,, T. V. Viswanatha Iyer, Madras
116. ,, M. Viswanathan, Madurai

DEEKSHITHENDRA GRANTHAVALI SERIES

List of books of Srimad Appayya Deekshita to be printed in 15 Volumes:

Vol. i. Nyāyarakshāmani.

Vol. ii. Siddhantalesasamgraha.
Purvottara—mimamsa—vada-nakshatramala.
Ratnatrayapariksha and Commentary.

Vol. iii. Parimala—with Mulam.

Vol. iv. ,, ,,

Vol. v. ,, ,,

Vol. vi. Caturmatasarasamgraha
Anandhvatalahari with Commentary.
Madhvatantramukhamardana with Commentary.
Taptamudradharananirasa.

Vol. vii. Mimamsa :
Upakramaparakrma.
Citrapata.

Vol. viii. Mimamsa : Mayukhavali-Sastra-dipikavyakhya.

Vol. ix. Saiva : Sivarkamanidipika with Mulam.

Vol. x. ,, ,, ,,

Vol. xi. Other Saiva Works.
Sivadvaitanirnaya.
Pancasloki and Commentary.
Bhasmoddhulanavadavali
Sivadhyanapaddhati.
Sivakarnamrta.
Sikharinimala and Commentary
Sivapurana-tamasaiva-nirakarana
Sivapujavidhi
Sivarcana candrika

Vol. xii Alamkara-Vyakarana :
Kuvalayananda
Citramimamsa
Vrttivarttika
Laksanaratnavali
Paniniyatantravadanaksatra-malika.

Vol. xiii. Stotras-Kavyas :

1. Apitakuacambastava-(Jvaraharastaka).
2. Atmarpanastuti
3. Adityastotra and Commentary.
4. Durgacandrakalastuti
5. Nigrahastaka.
6. Brahmatarkastava and Commentary.
7. Manasollasa.
8. Varadarajastava and Commentary.
9. Sivamahimakalikastava.
10. Mahabharata-tatparyanirnaya and Commentary.
11. Ramayana-tatparya-nirnaya and Commentary.

Vidhirasayana and Commentary.

Vol. xiv. Yadavabhyudayavyakhya.

Vol. xv. Harivamsa-sara-caritavyakhyana.

॥ श्री गुरुभ्यो नमः ॥

शास्त्रसिद्धान्तलेशसंग्रहे प्रमाणतया उद्धृतानां ग्रन्थानां ग्रन्थकाराणां च सूची

ग्रन्थाः

अद्वैतदीपिका
इष्टसिद्धिः
कल्पतरुः
कूटस्थदीपः
(वेदान्त) कौमुदी
गीताभाष्यम्
गौतमधर्मसूत्रम्
गौडपादीयविवरणम्
चित्रदीपः
तत्त्वदीपनम्
तत्त्वप्रदीपिका
तत्त्वविवेकः
तत्त्वशुद्धिः
दृग्दृश्यविवेकः
ध्यानदीपः
नारदस्मृतिः
नाटकदीपः
नैष्कर्म्यसिद्धिः
न्यायचन्द्रिका
न्यायनिर्णयः
न्यायरत्नमाला
न्यायसुधा
पञ्चपादिका
पञ्चीकरणम्
पदार्थतत्त्वनिर्णयः
प्रकटार्थविवरणम्
बृहदारण्यकभाष्यम्
ब्रह्मसिद्धिः
ब्रह्मसूत्रम्
ब्रह्मानन्दः
भामती
भाष्यं [भगवत्पादीयं]
मनुस्मृतिः
माण्डूक्यकारिका
वार्तिकम् [बृहदारण्यकोपनिषद्भाष्यवार्तिकम्]
विवरणम्
विवरणवार्तिकम्
विवरणोपन्यासः
विष्णुपुराणम्
शास्त्रदीपिका
संक्षेपशारीरकम्
सिद्धान्तमुक्तावली

ग्रन्थकाराः

अद्वैतविद्याचार्याः
आनन्दबोधाचार्याः
चित्सुखाचार्याः
नृसिंहभट्टोपाध्यायाः
प्रकटार्थकाराः
भारतीतीर्थ-विद्यारण्यगुरवः
रामाद्वयाचार्याः
विवरणानुसारिणः
विवरणैकदेशिनः
संक्षेपशारीरकानुसारिणः
सर्वज्ञात्मगुरवः

॥ श्री गुरुभ्यो नमः ॥

शुद्धाशुद्धपट्टिका

पुटसंख्या	पङ्क्तिसंख्या	अशुद्धं	शुद्धम्
xvi	13	नारायणपरि°	नारदपरि°
40	2	१-१-९	१-२-९
40	16	सल्ल°	सत् ल°
68	3	प्रतिबिम्बत्वनि°	प्रतिबिम्बत्वपक्षनि°
87	15	विक्षेप	विशेष
96	7	अकाश°	आकाश°
98	4	दोषतो°	दोषतौ°
99	29	तृतीयपरि°	द्वितीयपरि°
104	7	⁵प्रकृति	प्रकृति
109	4	अन्तः करणादीनां	अन्तःकरणानां
152	1	नृत्यशाला	नृत्यशाला
175	3	एत	एव
	12	छनात्व	छानत्वा°
295	4	°नामिक°	°नामिवारम्भक°
314	25	ब्राह्मण्ययोः	ब्राह्मणयोः
321	3	सम्बन्धवा-	सं. वा.
347	9	मूलाज्ञानानिवर्तकत्वं	मूलाज्ञाननिवर्तकत्वं
272	5	ब्रह्मसाक्षात्कदय	ब्रह्मसाक्षात्कारोदय
394	10	°श्वमीरा°	°मीश्वर°